
Barcode : 99999990292945
Title - Anandakandam Vol-I
Author - Chandrasekharan T.
Language - sanskrit
Pages - 788
Publication Year - 1952
Barcode EAN.UCC-13

ANANDAKANDAM

A TREATISE ON MERCURY AND
OTHER HEAVY METALS — AND
THEIR USES IN MEDICINE AND
ALCHEMY (ATOMIC PHENOMENA)

VOL. I - SANSKRIT TEXT



MADRAS GOVERNMENT ORIENTAL SERIES
NO. LIX.

आनन्दकन्दः

1950

Published Under The Authority of
The Government Of Madras.

PRESENTED BY
Ministry of Education
.....Govt. of India...

General Editor
T. CHANDRASEKHARAN, M A, L. T,
Curator, Govt. Oriental Manuscripts Library,
MADRAS.

LIX :

आनन्दकन्दः

Printed at the
SRI VILASAM PRESS,
SRIRANGAM

ANANDAKANDAM

Edited with Translation in Tamil, and Introduction in Tamil and Sanskrit

BY

SRI. S V. RADHAKRISHNA SASTRI,
VAIDYAVISARADA, AYURVEDA SIROMANI
Bharat Ayurveda Sala, Trichinopoly.

Published by

S. GOPALAN, B.A., B.L.,
Honorary Secretary, for the Administrative Committee,
T. M. S. S. M. LIBRARY, TANJORE.

1952 [Price Rs. 15
Also in 2 Parts. Text 10—8—0
Tamil Summary 5—8—0

आनन्दकन्दः

(रसवादग्रन्थः)

विशिर.पुरस्थ भारत आयुर्वेदशालाध्यक्षेण
वैद्यविशारद आयुर्वेदशिरोमणि
एस्. वि. राधाकृष्णशास्त्रिणा
संशोधितः
द्राविडानुवाद-संस्कृतद्राविडोपोद्घातादियोजनेन
परिष्कृतश्च ।

तञ्जापुर सरस्वतीमहाल्ग्रन्थालयनिर्वाहकसमितेः कृते,
गौरवकार्यदर्शिभिः,
एस्. गोपालन्, बी. ए. बी. एल्. एतैः
प्रकाशितः

1952 [मूल्यम् रू. १५

ஆனந்தகந்தம்.

(ஒரு இரஸவாதநூல்)

திருச்சிராபபளளி ' பாரத ஆயுர்வேதசரீல அத்யக்ஷர,
வைதயவிசாரத 'ஆயுர்வேதசிரோமணி'

ஸ வி ராதாகிருஷ்ண சாஸத்ரி அவாகளால,
தமிழ மொழிபெயாபபுடன பதிப்பிகக்படபெறறது

கருசாஹர, ஸரஸவதிமஹரல் நூலநிலயதது
நிருவாகக குழுவினருக்காக கௌரவ காரியதரிசி,
ஸ கோபாலன பி ஏ, பி எல, அவாகளால
வெளியிட ப பெறறது

1952 [விலை ரூ 15

மூலம மாதத்திரம 10—8—0
தமிழ மொழிபெயாப்பு 5—8—0

PREFACE.

This publication "ANANDAKANDAM" is a very exhaustive treatise on Chemistry and Atomic Science which had been developed in our country from earliest times The British rulers in their early days of the Empire were keenly aware of the greatness and value of our Cultural treasures and started the Asiatic Society, in which great Orientalists like Jones revealed to amazed Englishmen the achievements of Indians in the field of Arts and Sciences But they gradually lost their respect for the greatness of the conquered country, and the encouragement to the pursuit of Eastern knowledge which began under Warren Hastings, gradually limited itself to a study of Literature and Philosophy

Now, after the advent of Independence, we naturally turn to our own priceless heritage in arts and science The publication of this work with an abridged translation in Tamil and an introduction in English, is a step in the resuscitation of our neglected lore It is for the scientists to study this work carefully and verify the chemical and atomic reactions described in detail herein. Though we have a number of works on the various rare properties of mercury in medicine and alchemy, none is so clear or so full as this, our present publication. We hope that this publication will inspire students of research to new fields of discovery and help in the

growth of science as a means of making man more happy.

This work has been edited with great care by *Sri S. V. Radhakrishnan, Ayurveda Visharada* who has spared no pains in getting at the correct text and making its meaning clear in his translation and introduction. Our thanks are due to him for his valuable services. The English introduction by *Sri K. Vasudeva Sastri* will, it is hoped, help modern students of science to appreciate the worth of our ancient achievements in science. We are thankful to *Sri K. Vasudeva Sastri* for his valuable services in this direction.

We thank the Government of Madras for their timely grants that have enabled us to publish this and other valuable manuscripts of our Library

Saraswathi Mahal,
Tanjore,
25—7—1953

S. GOPALAN,
Honorary Secretary.

முன்னுரை.

'ஆனந்தகந்தம்' என்ற பெயருடைய இவ்வெளியீட்டில் ஓர் ரஸவாத நூல் அடங்கியுள்ளது. இதுவரையில் வெளிவந்திருக்கும் நூல்களைக்காட்டிலும் இது மிகவும் விரிவாகவும், தெளிவாகவும், உபதேசிக்கப்பட்ட ஓர் அரிய நூலாகும். நமது முன்னோர்கள் ரஸாயன சாஸ்திரத்திலும், ரஸவாதத்திலும் பலமுயன்றுதொட்டு பல நூற்றாண்டுகளாக அரிய பாடுபட்டுத தங்கள் அனுபவங்களைத் தமிழிலும் ஸம்ஸ்கிருதத்திலும் அநேக நூல்களில் எழுதி வைத்திருக்கிறார்கள். ஆனால் நமது விஞ்ஞான முன்னேற்றம், நம் நாட்டில் ஏற்பட்ட அரசியற்குறைவால் சென்ற சில நூற்றாண்டுகளாகத் தடைப்பட்டுப் போயிற்று. ஆங்கிலேயர் ஆட்சியின் கீழ் நாடு ஒன்றுபட்டு, நாட்டில் சமாதானம் நிலவியது. அவ்வாட்சியின் முதற்பகுதியில் ஆங்கிலேயர் நமது கலை, விஞ்ஞானம் முதலியவைகளைக் கண்டு வியந்து அதை வளர்க்க ஏற்பாடு செய்தனரெனினும், நாளடைவில் ஆளும் மனப்பான்மை மேலிட்டு நம் நாட்டுக கலை விஞ்ஞானங்களில் அவர்களுக்கிருந்த மதிப்புக் குறைந்துவிட்டது அதனால் நம நாட்டினருக்கே நமது கலை விஞ்ஞானங்களில் பற்றுதல் குறைந்து அவற்றின் முன்னேற்றம் அறவே நின்று விட்டது எனலாம். இப்பொழுது நல்ல காலம் பிறந்துவிட்டது. நம்நாடு சுதந்திரம் அடைந்ததால் பயனுற நம் நாட்டுக் கலைச் செல்வங்களைக் குப் புத்துயிரளிக்க வேண்டும் என்ற பேரவா நமக்கு எழுந்திருக்கிறது. அதற்காக வேண்டிய ஆராய்ச்சியும் துவக்கப் பட்டிருக்கிறது. அவ்வித சேவையில், மொழிபெயர்ப்புடனும், முகவுரைகளுடனும் வெளிவந்துள்ள இவ்வரிய வெளியீடு முதற்படியாகும்.

இதில் அடங்கியிருக்கும் ரஸாயன, ரஸவாதப் பிரயோகங்களைச் செய்து பார்த்து அதன் முழு ப்ரயோஜனத்தையும் நம் நாட்டினர் அனுபவிக்கும்படி செய்வது நமது விஞ்ஞான ஆராய்ச்சியாளரின் கடமையாகும்.

இந்நூலை வெகு பாடுபட்டுத் தெளிவான தமிழ் மொழிபெயர்ப்புடனும், முகவுரையுடனும் பதிப்பித்து உதவிய ஆயுர்வேதவிசாரத ஸ்ரீ எஸ். வி. ராதாகிருஷ்ண சாஸ்திரி அவர்களுக்கு எங்கள் நன்றி உரித்தாகும். ஆங்கிலத்தில் ஸ்ரீ கே. வாஸுதேவ சாஸ்திரி எழுதியுதவியிருக்கும் முகவுரை தற்கால விஞ்ஞான ஆராய்ச்சியாளர்களின் கவனத்தை இந்நூலின் சார்பாகத் திருப்பும் என்று நம்புகிறோம்.

இந்நூலையும் இதுபோன்ற பல அரிய நூல்களையும் பதிப்பிப்பதற்காகத் தகுந்த நிதியுதவி செய்து வரும் நமது சென்னை அரசாங்கத்தாருக்கு நாங்கள் என்றும் கடமைப் பட்டுள்ளோம்.

ஸரஸ்வதீமஹால் நூல்நிலையம்
தஞ்சை. 20—7—1952.

S. கோபாலன்,
கலைமகள் காரியதரிசி

GENERAL INTRODUCTION

TO THE

Madras Government Oriental Series.

The Government of Madras took up for consideration the question of publication of the various manuscripts in different languages on subjects like Philosophy, Medicine, Science, etc, early in May 1948. Important manuscript libraries in the Madras Presidency were requested to send a list of unpublished manuscripts with them for favour of being considered by the Government for publication. The Honorary Secretary of the Tanjore Maharaja Serfoji's Sarasvathi Mahal Library, Tanjore, alone complied with this request This list as well as a similar list of unpublished manuscripts in the Government Oriental Manuscripts Library, were carefully examined and a tentative selection of manuscripts suitable for publication was made The Government in their Memorandum No 34913/48-10 Education, dated 4-4-1949, constituted an Expert Committee with the Curator of the Government Oriental Manuscripts Library, Madras, as the Secretary, for the final selection of manuscripts suitable for printing and for estimating the cost of publication.

The following are members of the Committee:

1. Sri T. M. Narayanaswami Pillai, M A., B L ,
2. ,, R. P. Sothu Pillai, B A., B L ,
3 ,, C. M. Ramachandra Chettiar, B A , B L.,
4. Sri R. Krishnamoorthy, (Kalki)
5. Dr. N. Venkataramanayya, M.A., PH D ,
6. Sri M. Ramanuja Rao Naidu, M A., L.T.,
7. ,, V. Prabhakara Sastri,
8. ,, N. Venkata Rao, M A ,
9. ,, H. Sesha Ayyangar,
10. ,, Masthi Venkatesa Ayyangar, M A.,
11. ,, M. Mariappa Bhat, M.A , L T.,
12. Dr C Achyuta Menon, B.A., PH.D ,
13. ,, C. Kunhan Raja, M A., D. PHIL ,
14. ,, A. Sankaran, M A , PH.D., L T.,
15. Sri P S Rama Sastri,
16. ,, S K. Ramanatha Sastri,
17. Dr. M. Abdul Haq, M.A , D. Phil. (Oxon),
18. Afzul-ul-Ulma Hakim Khader Ahamed,
19. Sri P. D. Joshi,
20. ,, S Gopalan, B A., B.L ,
21. ,, T. Chandrasekharan, M A., L.T.

The members of the Committee formed into Sub-Committees for the various languages, Sanskrit Tamil, Telugu, Kannada, Malayalam, Marathi and Islamic Languages. They met during the month of May, 1949, at Madras and Tanjore to examine the manuscripts and make a selection. The recommendations of the Committee were accepted by the Government in G.O, No. Mis 2745 Education, dated

31—8—1949 and they decided to call these publications as the **"Madras Government Oriental Series,"** and appointed the Curator, Government Oriental Manuscripts Library, Madras, as the General Editor of the publications.

The following manuscripts have been taken up for publication during the current year:

"A" From the Government Oriental Manuscripts Library, Madras.

TAMIL

1. Kappal Sattiram
2 Anubhava Vaidya Murai
3 Attanakolahalam
4. Upadesa Kandam
5. Colan Purva Pattayam
6. Konga Desa Rajakkal
7. Sivajnana Dipam
8. Sadasiva Rupam, with commentary.

TELUGU.

1. Sangitaratnakaramu
2 Aushadha Yogamulu
3. Vaidya Nighantuvu
4. Dhanurvidya Vilasamu
5 Yoga Darsana Vishayamu
6 Khadga Lakshana Siromani.

SANSKRIT.

1 Vishanrayaniyam
2 Bhargava Nadika
3 Harihara catu rangam
4 Brihmasutravrtti—Mitaksara
5 Nyayasiddhanta Thattvamrtam

MALAYALAM.

1 Garbha Cikitsa
2 a Vastulakshanam
b Silpasastram
c. Silpavishayam
3 Mahasaram
4 Kanakkusaram
5 Kriyakramam

KANNADA.

1 Lokopakara
2 Rattamata
3 Asvasastram
4 a Aushadhagalu
b Vaidyavishaya
5 Sangitaratnakara
6 Supasastra

ISLAMIC LANGUAGES

1 Jamil-Al Asbya
2 Tibb E Faridi
3 Tahqiq Al Buhran
4 Safinat-Al Najat.

"B" From the Tanjore Maharaja Serfoji's Sarasvathi Mahal Library, Tanjore.

TAMIL.

1. Sarabhendravaidya Murai (Diabetes)
2. Do. (E N & T.)
3. Konkanarsarakku Vaippu
4. Tiruccirrambalakovaiyar with Padavurai
5. Sarabhendra Vaidya Murai— (Anæmia & Jaundice)
6. Talasamudram
7. Bharatam
8. a. Pandikeli Vilasa Natakam
   b Pururava Cakravarti Natakam
   c. Madana Sundara Vilasa Natakam
9. Percy Macqueen's Collection in the Madras University Library on Folklore
10. Ramaiyan Ammanai
11. Sarabhendra Vaidya Murai — (Asthma, Cough and other lung diseases)

TELUGU.

1. Kamandakanitisaramu
2. Taladasapranapradipika
3. Raghunatha Nayakabhyudayamu
4. Rajagopala Vilasamu
5. Ramayanamu by Katta Varadaraju

MAHRATHI.

1. Natyasastrasangraha
2. a. Folk Songs

b. Dora Dharun Veni Paddhati
c. Asvasa Catula Dumani
3. Pratapasimhendra Vijaya Prabandha
4. a. Sarabhendra Tirthavali
b. Lavani
5. Devendra Kuravanji
6. *Bhakta Vilasa*
7. Sloka Baddha Ramayana

SANSKRIT.

1. Asvasastra with Tricolour Illustrations
2 Rajamrganka
3. Ánanda Kandam
4 Ayurvedamahodadhi
5 Gita Govinda Abhinaya
6 a. Colacampu
b Sahendra Vilasam
7. Dharmakutam-Sundara Kanda
8. Jatakasara
9. Vishnutattvanirnaya Vyakbya
10. Sangita Darpanam
11. Bijapallavam

It is hoped that the publication of most of the important manuscripts will be completed within the next four years.

Some of the manuscripts taken up for publication are represented by single copies in the Library and consequently the mistakes that are found in them could not be corrected by comparing them

with other copies The editors have however, tried their best to suggest correct readings. The wrong readings are given in round brackets and correct readings have been suggested in square brackets. When different readings are found, they have been given in the foot-notes except in the case of a few books, in which the correct readings have been given in the foot-note or incorporated in the text itself.

The Government of Madras have to be thanked for financing the entire scheme of publication although there is a drive for economy in all the departments. My thanks are due to the members of the Expert Committee who spared no pains in Selecting the manuscripts for publication. I have also to thank the various editors, who are experts in their own field, for readily consenting to edit the manuscripts and see them through the press. The various presses that have co-operated in printing the manuscripts in the best manner possible also deserve my thanks for the patience exhibited by them in carrying out the corrections made in the proofs.

MADRAS,
1951.

T. CHANDRASEKHARAN,
General Editor

INTRODUCTION

"ANANDAKANDAM" or the 'ROOT of BLISS' as the present work is called, is a part of Tantric literature Tantras cover not only the modes of worship of deities, but also several arts and sciences These are Architecture, Sculpture, Painting, Music and Dance, which are necessary adjuncts of worship, as also Medicine, Anatomy, Chemistry and Atomic Science, Science of Breath, and Higher Psychology, for producing rare powers of protecting and prolonging life, and acquiring superhuman powers called Siddhis The main object in view is of course spiritual progress which all these powers subserve. The present treatise has for its object the promotion of health and longevity with the help of medical recipes chiefly metallic preparations, and treatment with atomic energy from mercury. The transmutation of baser metals into gold and various chemical processes dealing with metals are by-products in the processes

Appropriately to the name "*Anandakandam*", this work divided into two "Visranties" or places of restful peace Peace, as every one knows, is a preliminary requisite of Ananda or Bliss

The first part is called "AMRITEEKARANA VISRANTI" and deals with "Amriteekarana", or the art of defying old age, disease and death. This is sought to be achieved by what is known as Rasa Vedha or tapping atomic energy from mercury.

Another method by which Amriteekarana is achieed is by medical recipes known as. "Rasayanas". These Rasayanas are some of them single herbs and single inorganic substances and others, combinations of these. Regulated diet and regulated modes of life are prescribed for using these Rasayanas The third method is the simple process of regulated diet and habits, by themselves It may be mentioned in passing, that this third process has appealed itself to students of modern science; and the valuable hints about diet and modes of life to suit particular seasons and climatic conditions given in this work (chapters 17, 18 and 19 of part I) deserve a close study by students of research A fourth method is by *Yoga* or the control of breath and mind

The second part is called "KRIYAKARANA VISRANTI" and deals with chemical processes involving metals, metallic ores, alloys, and precious stones so as to make them serve as medical agencies for fighting disease, old age and death, and also with various rare and valuable herbs and their uses for a similar purpose

TREATMENT WITH ATOMIC ENERGY.

Mercury is subjected to several processes totaling 18 in number before it attains a stage in which it yields atomic energy. The actual treatment is called "*Deha Vedha*" or boring into the body, as distinguished from "*Loha Vedha*" or boring into the metals resulting in transmutation of baser metals into gold, which is achieved by mercury in that state. "*Loha Vedha*" or boring into the metals is easily recognised by modern students of Atomic

enrgy who are familiar with the process known as boring of the atom *Deha Vedha* is unknown to modern Science which has directed its attention in the first instance to the means of destruction instead of to the means of protection of the human body *Deha Vedha* can appropriately be called boring of the cell

Mercury in the state of *Vedha* or boring state' is thus capable of boring into the atom and boring into the cell The 18 Samskaras or processes to which mercury is subjected before it reaches the 'Vedha state yields mercury with different properties at the end of each process The names of the processes suggest that in the different processes, mercury is treated as if it were a living entity The names are —

1 Swedana or causing it to perspire by exposing it to medicated steam
2 Mardana Giving it blows
3 Murchhana Making it lose conciousness and stop breath
4 Utthapana Revivıng it
5 Patana Making it fall down
6 Nirodhana Confining it
7 Niyamana Bringing it under discipline
8. Deepana Increasing its appetite
9 Anuvasana Making it more energetic.
10 Charana Feeding it with morsels (of mica)
11 Jarana Helping it to digest the morsels

12 Garbhadruti: Causing the food to become part and parcel of its body by liquifying it

13 Bahyadruti: Feeding it with chemically digested food (of mica)

14 Ranjana · Adding to it colour and lustre

15 Sarana: Preparing it for moving at will in all directions (by providing a vehicle of Diamond)

16. Anusarana. Further repetition of Sarana

17. Pratisarana Further repetition of Sarana

18 Vedha Helping it to bore through atoms and cells

Special Chemical apparatus called *Yantras* for carrying out the several processes are also described in detail, as also the methods of preparing oils, decoctions and other ingredients for the several processes

An extraordinary provision in this treatise is the disciplined life and propitiation of deities prescribed as a priliminary to the undertaking of the chemical and atomic processes described in this work Their relevance and necessity are a matter for investigation. It must be mentioned that the subject of using mercury for tapping atomic energy is dealt with by numerous ancient treatises both in Sanskrit and Tamil, and in all these treatises, the preliminary discipline and propitiation called "*Rasa Deeksha*" is uniformly prescribed Transmutation of metals is carried out by modern sicence by a process involving the use of electricity And it must be expected that if such transmutation

should be possible by means of mercury in the Vedha state, electricity must play a necessary part in the process And how did the ancients get this electricity ? As in everything else undertaken by the men of the East, the process has been subjective rather than objective Electric energy is to be found in the human body, and the discipline prescribed, it may be safely guessed, has been intended to increase the quantity and power of human electricity so that anything touched by those who have undergone the discipline may be charged sufficiently for starting the atomic process that is involved in the process resulting in the Vedha state

This explains the failure of many alchemists who have taken the trouble to get the details of the processes from books and men of the ascetic order who are known to have succeeded in the transmutation, but have not cared to observe the discipline necessary for storing up the electric energy for starting the process Celibacy is the first requisite in the discipline for storing up electric energy, and it is no wonder that those who are known to have succeeded in alchemy have all lived an ascetic life

Although the processes and the books containing them in more or less detail have been public property all along in our country Alchemy has in most cases proved a dangerous speculation resulting in the ruin of many a rich man The reason is to be found in the neglect of the subjective process for storing up electricity which is uniformly prescribed in all the books It is just possible that if either the discipline is undergone as a preliminary to the performance of the experiments resulting in

the Vedha state, or if electricity is supplied by some other means for helping to start the reactions, that we may succeed in getting at the Vedha state which appears to be the state of the element in which it is easily separable into neutrons capable of boring through metals and the cells of the human body in an orderly manner so as to produce the transmutation in the one case, and energisation in the other.

It must be remembered that the various energetic by-products that start out as a result of atomic fission are capable of absorption by suitable means, and it may be fairly surmised that in the method used for Loha Vedha and Deha Vedha the destructive rays are absorbed, while the constructive ones are allowed to have free play. The success in both the Vedhas open out possibilities for protection of human life even from the effects of the explosion of the atomic bomb, and the accumulation of the precious metals to enrich the state treasury at will.

The various processes described in this book for purifying mercury and other metals and converting them into compounds that are easily assimilable by the human body are themselves very valua-. ble and they have long been used in the preparation of Siddha medicines for effecting cures in incurable deseases Till some fifty years ago, mercury and its compounds and arsenic and its compounds which are now dreaded by doctors, have been treated by processes which have made them quite safe for administration for curing many diseases which are now declared incurable A branch of medical science that has so long been successful is worth revival, and the sooner our students of western

medicine and western science shed their superiority complex and approach the accumulated experience of our countrymen based on the discoveries of Yogis, Siddhas and Rishis with due respect, the better for our country.

An English version of this work will soon be published so that even students who have not equipped themselves with the requisite knowledge of Sanskrit may easily follow the contents of this book But it must be added that there is such a vast deal of cultural wealth and discovery of scientific value in the works of our wise men who have uniformly employed Sanskrit as their medium, that it is worthwhile for anyone and more so for an Indian to acquire a working knowledge of Sanskrit without which no Indian can call his culture complete

It is hoped that students with an aptitude for research and institutions interested in scientific research will take up the work of understanding and adopting the chemical and atomic processes that are contained in this volume and other works of similar nature

Saraswathi Mahal
Tanjore
24—7—1952

K VASUDEVA SASTRI,
Pandit for Research

॥ श्री. ॥

भूमिका ॥

चिराय भारते चोलमण्डल तदापि तञ्जापुरमभिमथ्नयतः श्रीशरभजी-महाराजप्रतिष्ठापितात् सरस्वतीमहालयग्रन्थागारात् प्रकाश्यमानेष्वन्यतम उत्तमश्चायमानन्दकन्दारयो ग्रन्थः आयुर्वेदस्य रसशास्त्राख्ये विभागे रस-रसायनसिद्धिखण्डानधिकृत्य प्रवर्तते। सरस्वतीमहालये विद्यमानं ग्रन्थाक्षर-मयं तालपत्रग्रन्थमुपादाय प्रकाशनीयोऽयमिति सरस्वतीमहालयग्रन्थागारा-धिकृतैराज्ञप्तोऽहं यथामति ग्रन्थममुं संशोध्य द्रविडभाषायां सङ्गृहीतेना-नुवादेन समं प्रकाशये। ग्रन्थोऽयं रसतन्त्रग्रन्थेष्वग्रिमगणनामर्हति। रसा-र्णव-रसरत्नाकर-रसहृदयादीनि प्रसिद्धानि रसतन्त्राणि विषयेष्वनुसरन्, विषयप्रतिपादने तेभ्योऽतिशयानां सरलतरां क्रमबद्धां च शैलीमादधत् नाति-विस्तरसङ्ग्रहो विराजते।

मातृकाः।

अस्य प्रकाशने मातृकात्रयमुपलब्धं मया पाठशोधनाय। प्रथमा मूल-मातृका सरस्वतीमहालयग्रन्थागारगता ग्रन्थाक्षरमयी तालपत्रलिखिता प्रायः शुद्धा शोभनाक्षरा च[1]। द्वितीया मैसूरराष्ट्रीयप्राच्यग्रन्थसङ्ग्रहालयादुपलब्धा तत्रस्थैः आन्ध्रलिपिभिज्ञया मूलमातृकाया देवनागरी-लिप्यां प्रतिलेख्य प्रेषिता त्रुटिबहुलाऽशुद्धा च। तृतीया निखिलभारतायुर्वेदमहामण्डलपत्रिकायां उपपञ्चदशवर्षेभ्यः प्राक् क्रमात् प्रकाशिता त्रिशिरःपुरीस्थाया आलेयायुर्वेदशालाया अध्यक्षस्य आयुर्वेदाचार्यस्य श्री चा. वा नटराजशास्त्रिमहोदयस्य ग्रन्थभाण्डारात्प्राप्ता त्रुटिबहुलाऽशुद्धा

---

1. इयं च मातृका आन्ध्रलिपिभिज्ञया मूलमातृकायाः प्रतिलिखितेत्यु-न्नेतुं शक्यते, यत आन्ध्राक्षरमालाया श ळ क–वर्णानां न-स–वर्णयोश्च सरूपतामूलो वर्णविपर्ययोऽत्र बहुलाशुद्धिमुपजनयति।

च। एतन्मातृकालयसंवादेन मुद्रितामुद्रितन्त्रान्तरसमालोचनेन च प्रकाशनमिदं प्रस्तुतम्॥

भारते रसशास्त्रस्य उत्पत्तिः।

चिराय पाश्चात्यैः संपल्लोभेन प्रवर्तितस्याग्रवङ्गान्धमधातूनां स्वर्णरजताद्युत्तमधातुरूपतया परिणामनेन संपत्प्राप्तावुपकारको धातुवाद एव क्रमाच्चिकित्सायां कलासु चान्यासु लब्धप्रसरोऽधुना प्रसिद्धानां भौतिकरासायनिकविज्ञानानामाविष्करणे प्राभवदिति पाश्चात्यविज्ञानाभिवृद्धिं निरूपयतां प्रत्यक्षम्। भारतीय रसशास्त्रेतिहासविदस्तु मन्यते—स्पष्टमिदं, यद्भारते रसशास्त्रस्योत्पत्तौ प्रचारे च प्रवर्तकमन्यदेव किञ्चिद्धातुवादादिति। भारतीयशास्त्राणां हि शास्त्रत्व साक्षात्परंपरया वा~ आत्मदर्शनौपयिकतयैव सिद्धयति। तथैव रसशास्त्रमपि प्रकृतमात्मन शास्त्रत्वे भारतीयतां च तदेव प्रत्यगात्मसाक्षात्कारं हेतूकृत्य प्रतितिष्ठति। तत एव चास्य रसेश्वरदर्शनत्वेन व्यवहारः॥

भारते शैवा पाशुपता भैरवा अन्ये च विविधमार्गानुयायिन सामान्यतो माहेश्वरसामयिका इति व्यपदिश्यन्ते। जरामरणरहितं दीर्घकालस्थायि शरीर संपाद्य~ अर्थात्पिण्डस्थैर्यं संपाद्य, ततो योगाभ्यासादिना तत्त्वज्ञानसंपादनेन इहैव जीवत एव मुक्तिलाभो मोक्ष इति कृतधियस्ते सुधियः पिण्डस्थैर्यलाभे रसमेकमेव शरणमुपलब्धवन्तो रसेन पिण्डस्थैर्यनीरोगतादिलाभाय प्रायतन्त। रसस्य वेधमन्धादिसंस्काराणां पिण्डस्थैर्यसाधनानां सिद्धिसौष्ठवं परीक्षितुमेव लोहवेधे तेषामानुषङ्गिकी प्रवृत्तिरासीत्, न पुरुषार्थबुद्धया। न हि लोहवेधसिद्धौ सत्यां नष्टान्नधनादिलाभात्मके ऐहिके सुखे तेषामभिसन्धिः। यथा च रसार्णवे—

लोहवेध इति ख्यातो विस्तरेण सुरेश्वरि!।
यथा लोहे तथा देहे कर्तव्यः सूतकः सदा॥
समानं कुरुते देवि! भविष्यान् देहलोहयोः।
पूर्वं लोहे परीक्षेत ततो देहे प्रयोजयेत्॥ इति।

[पटल १७.]

यदि सिद्धिमाकांक्षमाणेन लोहवेधे चापल्य प्रदर्श्यते तर्हि सिद्धिनाश' इत्यवोचाम यत्प्रमाणं प्रसिद्धेष्वलंकारेषु भारतदेशीयानां सिद्धान्तं चरितेषु।

अत एव रसतन्त्राधिष्कारकाः सर्वे सिद्धा विरक्ता योगिनो व्याडिनागार्जुन-गोविन्दभगवत्पादादिमप्रभृतयः[1]। तैरेतद्रसशास्त्रं जीवन्मुक्तिसाधनोपायतया प्रणीतं प्रमाणितं प्रचारितञ्च।

दृश ज्ञानसामान्य इति पाणिनीयो धातुपाठः। तत उत्पन्नो दर्शनशब्द-श्चेतनानामचेतनानां च पदार्थानां मूलतत्त्वानुसन्धाने शक्तः। मूलतत्त्वानु-सन्धानं चामुष्मिकं मोक्षसाधनं सर्वेषामिष्टम्। न त्वै-हिकमात्रम्। शास्त्रेष्वैहिकतत्त्वानुसन्धानमपि प्रासङ्गिकं परोक्षात्मसाक्षात्कारपर्यवसाय्येव। तत्त्वानुसन्धानं च प्रमाणैकसाध्यं; प्रमाणं च प्रत्यक्षादिभिदाभिन्नं संस्कारे-रात्मगुणैः रुचिभिश्च द्रष्टारो भिन्ना इति दर्शनान्यपि भिन्नानि। अत एव हि कश्चित्कचिद्दर्शने पक्षपातः, दर्शनान्तरे चाप्रामाणिकताबुद्धिरुपजायते। केचिदध्यक्षं (प्रत्यक्षं) अन्येऽनुमानं (तर्कं) अपरे च शब्दं (श्रुतिं) प्रमाणमा-मनन्ति। प्रमाणानुसारेण दार्शनीकानां वर्गीकरणमप्येवं सम्भवति। यथा— आध्यक्षिकाः चार्वाकाः, तार्किका रसेश्वरवादिप्रभृतयः, श्रौता अद्वैतिनश्चेति।

दर्शनानि तल्लक्षणं भेदाश्च

तार्किका द्विविधा नास्तिका आस्तिकाश्च। नास्तिका द्विविधा बौद्धा जैनाश्च। आस्तिकाश्च द्विविधाः स-गुणात्मवादिनो निर्गुणात्मवादिनश्च। सगुणात्मवादिनः प्रच्छन्नतार्किकाः स्पष्टतार्किकाश्चेति द्विप्रकाराः। स्पष्टतार्किका भोगसाधनादृष्टवादिन उत्पत्तिसाधनादृष्ट-वादिनश्चेति द्विविधा भवन्ति। भोगसाधनादृष्टवादिनश्च जीवन्मुक्तिवादिनो विदेहमुक्तिवादिनश्चेति द्वेधा भवन्ति। विदेहवादिनश्च त्रिविधाः—

रसेश्वरदर्शनस्य दर्शनगोष्ठ्यां स्थानम्।

१. कर्मनिरपेक्षेश्वरवादिनः आत्मभेदवादिनो नकुलीशपाशुपताः,
२. कर्मसापेक्षेश्वरवादिनः आत्मभेदवादिनः शैवाः।
३. आत्मैक्यवादिनः प्रत्यभिज्ञादर्शिन इति।

जीवन्मुक्तिवादिनो रसेश्वरदर्शनानुयायिनः। सर्वेऽप्यमी भोगसाधना-दृष्टवादिनः शैवसामयिका। तत्र प्रत्यभिज्ञावादिनो जीवेश्वरयोरैक्यमभि-

---

1. आदिमो हि द्रविडदेशे तिरुमूलरिति श्री मूलनाथ इति च प्रसिद्धो नन्दिशिष्यः सिद्ध इति केचित्।

मन्वत इति असंभावितमुदाहरन्तो जघन्याः। जीवेश्वरभेदमङ्गीकुर्वन्तोऽपि ईश्वरस्य जगत्सृष्टौ कर्मानपेक्षितामङ्गीकुर्वाणा न तथा युक्तदर्शनाः, यत ईश्वरस्य वैषम्यनैर्घृण्यदोषपरिहाराय कर्मसापेक्षित्वमवश्यमभ्युपगन्तव्यम्। जैवास्तु कर्मसापेक्षत्ववादिनो देहपातात्परं मुक्तिमभिमन्वते, यच्चानुभवो दुरुपपादः। जीवन्मुक्तिवादिनां रसेश्वरवादिनां तु दर्शनं निर्दोषं सोपपत्तिकं चेति दर्शनेभ्योऽन्येभ्यो न्यायत्वमपि रसेश्वरदर्शनस्य निश्चीयते विपश्चिद्भिर्माहेश्वरैस्तीर्थकरैः। माहेश्वरसामयिका द्राविडाः सिद्धाः प्रायो रसेश्वरदर्शनमनुसरन्तीत्येतदपि चिन्तनीयमत्र। इति रसेश्वरदर्शनस्य दर्शनगोष्ठ्यां स्थानं सङ्ग्रहेण प्रदर्शितम्॥

अथ रसेश्वरदर्शनस्वरूपमीषद्विवियते। केचन माहेश्वराः पिण्डस्थैर्यैर्यं सर्वाभिमता जीवन्मुक्तिः सेत्स्यतीति मतमाश्रित्य पिण्डस्थैर्योपायं पारदादिपदवेदनीयं रसमेव सङ्गिरन्ते। श्रवणमननानिदिध्यासनादिनाऽवधारितात्मतत्त्वस्य अभ्यासातिशयापहृतमिथ्याज्ञानस्य जीवत एव या मुक्तिसा जीवन्मुक्तिः। दर्शनेष्वन्येषु देहपातानन्तरमेव मुक्तिः प्रतिपाद्यमाना न प्रत्ययाय साधकानाम्। अत्र तु न तथेति निर्विचिकित्सा प्रवृत्तिरिति मतमिदमभ्युपेयं मन्यन्ते। यदुक्तं आनन्दकन्दे :—

रसेश्वरदर्शन स्वरूपम्।

"देहान्तेषु तु मुक्तिर्या प्राणिनां साऽप्रयोजना।
देहान्ते देहिनस्सर्वे मुक्तिं यान्ति न संशयः॥"
"सर्वस्मिन्समये शास्त्रे मुक्तिरत्यन्तकालजा।
न दृश्यते कराम्लस्थमणिवत् सा च शांभवि!॥"

[अमृतीकरणविश्रान्तौ उल्लास २०. श्लो. २४ २८.]

पिण्डस्थैर्यसंपादनं जीवन्मुक्तौ नान्तरीयकमित्यपि तत्र प्रपञ्चितं यथा—

देहं विना न सिद्ध्यत्यादृदेहोऽयं सर्वसाधनम्।
तस्मादृदेहं प्रयत्नेन रक्षयेत्सर्वतः सदा॥
देहे पाते धर्मनाशो धर्मनाशे क्रियाच्युतिः।
क्रियाच्युतौ च्युतो योगो योगभ्रंशे क्व चिद्भवेत्।

चिदभावे क्षुतो मोक्षो मोक्षे भ्रष्टे न किञ्चन ॥"

[अमृतीकरणविश्रान्तौ उल्लास २०. श्लो ३०-३२.)

जीवन्मुक्तिसाधनतया संपिपादयिषिते देहस्थैर्ये देहस्य रसरक्तादिमयत्वेन यन्नश्वरत्वं तस्य रसाभ्रकगन्धाख्यहरगौरीसृष्टिसंयोगादपोहनं दिव्यत्वप्राप्तिर्नित्यत्वं चेत्यवसीयते। तादृशहरगौरीसृष्टिसिद्धिश्च रसस्याष्टाविधसंस्कारानेन संपद्यते। सच्चिदानन्दपरतत्त्वस्फुरणेनैव मुक्तिसिद्धौ किमनेन दिव्यदेहसंपादनप्रयासेन? नैवम्। नित्यशरीरलाभे मुक्तिवार्तैव नोपपद्यते। यथाहुर्गोविन्दभगवत्पादाचार्याः—

न हि देहेन कथञ्चिद्व्याधिजरामरणदुःखविधुरेण।
क्षणभङ्गुरेण सूक्ष्मं तद्ब्रह्मोपासितुं शक्यम्॥
गलितानल्पविकल्पः सर्वाण्यविवक्षितश्चिदानन्दः।
स्फुरितोऽप्यस्फुरिततनोः करोति किं जन्तुवर्गस्य॥
यज्जरया जर्जरितं कासश्वासादिदुःखविशदं च।
योग्यं तन्न समाधौ प्रतिहतबुद्धीन्द्रियप्रसरम्॥

[रसहृदये प्रथमेऽवबोधे]

जीवन्मुक्तिस्वरूपव्यवच्छेदश्चेत्थमानन्दकन्दे प्रतिपाद्यते पिण्डस्थैर्येण अमरत्वं, प्रत्यगात्मसाक्षात्कारेण पूर्णज्ञानवत्त्वं च जीवन्मुक्तिरिति। यदुक्तं—

"न केवलामरत्वाच्च न शिवत्वाद्भवेत्तथा।
तद्द्वयोर्मेलनाच्च स्याज्जीवन्मुक्तिरियं स्मृता॥" इति।

[अमृतीकरणविश्रान्तौ उल्लास २०. श्लो २७]

अस्तु। यदि जीवत एव मुक्तिरभिप्रेयते तर्हि कथं जीवत्व (संसारित्व) मुक्तत्वयोः परस्परविरुद्धयोर्धर्मयोरेकत्र समावेशः। अतो जीवन्मुक्तिशब्दः शशशृङ्गादिवदसंभवदर्थक एवेति केचिदाशङ्केरन्। तत्रोच्यते— मुक्तिस्तावत्सर्वतीर्थंकरसंमता। सा किं ज्ञानविषया स्वीक्रियत उत न? मुक्तेर्ज्ञेयत्वे ज्ञेयत्वस्य ज्ञातृसापेक्षत्वान्मुक्तस्य ज्ञातृत्वमवर्जनीयम्। तच्च हि जीवत एव संभवति। अत एव जीवन्मुक्तिरेव मुक्तिर्न तु विदेहमुक्तिरित्यभ्युपेयमिति। यथा चोक्तं रसेश्वरसिद्धान्ते—

"रसाङ्गमेयमार्गोक्तो जीवमोक्षोऽन्यथा न तु ।
प्रमाणान्तरवादेषु युक्तिभेदावलम्बिषु ॥
ज्ञातृज्ञेयमिदं विद्धि सर्वतन्त्रेषु संमतम् ।
नाजीवञ्ज्ञास्यति ज्ञेयं यदतोऽत्रैव जीवितम् ॥" इति ।

तस्मादेतद्दर्शनोक्तया रीत्या पिण्डस्थैर्यसंपादनेन योगाभ्यासवशात्परतत्वे दृष्टे पुरुषार्थप्राप्तिर्भवतीति सिद्धम् । यथाहुर्गोविन्दभगवत्पादाः-

"भ्रूयुगमध्यगतं यद्धिविद्युत्सूर्यवज्जगद्भासि ।
केषाञ्चित्पुण्यदृशामुन्मीलति चिन्मयं ज्योतिः ॥
परमानन्दैकरसं परमं ज्योतिः स्वभावमविकल्पम् ।
विगलितसकलक्लेशं ज्ञेयं शान्तं स्वयं वेद्यम् ॥
तस्मिन्नाधाय मनः स्फुरदखिलं चिन्मयं जगत्पश्यन् ।
उत्सन्नकर्मबन्धो ब्रह्मत्वमिहैव चाप्नोति ॥
अस्तं हि यान्ति विषयाः प्राणान्तःकरणसंयोगात् ।
स्फुरणं नेन्द्रियतम(मन)सां नातः स्फुरतश्च सुखदुःखे ॥
रागद्वेषविमुक्ताः सत्याचारा नरा मृषारहिताः ।
सर्वत्र निर्विशेषा भवन्ति चिद्ब्रह्मसंस्पर्शात् ॥
तिष्ठन्त्यणिमादियुता विलसद्देहा. सदानन्दाः ।
ये ब्रह्मभावममृतं संप्राप्ताश्चैव कृतकृत्याः ॥"

[रसहृदये प्रथमेऽवबोधे श्लो २१-२६.]

इति प्रतितन्त्रसिद्धान्तस्वरूपेण आत्मस्वरूपं मोक्षस्वरूपं मोक्षसाधनोपायः शरीरात्मसंबन्धश्चेत्यादीनि दर्शनोपयिकानि तत्त्वानि विवृण्वद्विदं रसेश्वर-दर्शन दार्शनिकेषु लब्धादरम् ॥

एतावदुपवर्णितं रसेश्वरदर्शनमुपजीव्य रसतन्त्रस्य प्रवृत्तिरुद्भूयते वर्षे । देशान्तरेषु पुनरैहिकमुखप्राप्तिसाधनस्यासाधनस्यापि पुरुषायुर्दैर्घ्यदत्वेन रसतन्त्रप्रवृत्तिः । तन्त्रमिदं प्रवृत्तम् । धातुवादश्च लोहवेधप्रयोजकः पिण्ड-स्थैर्यसाधने देहवेधे सिद्धिं परीक्षमाणेन योगिनोपकरणत्वेनोपबृंहितः— यथा जीवच्छरीरगततत्त्वान्वेषकैः परीक्षार्थं मृतशरीरे तत्तत्त्वविवेचने उपकारकतया उपबृंह्यते । अतो रस-

तन्त्रनिष्करणे प्रचारे उपयोगे च त एव सिद्धिमन्तो बभूवु, ये नित्यानित्य-विवेकिनो निगृहीतान्त करणा कामक्रोधाद्याधिविनिर्मुक्ता योगिनो जीवन्मुक्ता । ते सिद्धाख्यया नाथाख्यया च प्रसिद्धिमापु । एष रसेश्वरदर्शनानुग रसतन्त्रमार्गो प्रथम कदा केन कुत्र वाऽऽरब्धो दृष्टस्मृतो वेति एतन्न नो युक्तिस्मृतिगोचरम्। परमेष सम्प्रदाय प्राय सर्वत्र शिवपार्वतीनन्दीशमुखादवगत इति तन्त्रान्तरसामान्यतया अस्या अप्युत्पत्तिर्वर्ण्यते। एवं बौद्धैरपि मतमेन मवलम्ब्य कृतानि तन्त्राण्युपलभ्यन्ते प्रज्ञापारमिताऽभयङ्करादितीर्थङ्करमुखादवगततया प्रसिद्धानि ॥

रसतन्त्रप्रवर्तका सिद्धा नाथाश्च।

अत्र केषाञ्चिद्विदुषामयमभिसन्धि । ऋगादित्रय्या प्रतिपादितानां कर्मणां विषयाणां च सत्यदमश्रद्धात्मगुणसपन्नेन ऋजुमार्गावलम्बिना अनुष्ठेयत्वेन अलसानामथर्ववेदोपदिष्टो मार्गो लघु क्षिप्रफलद ऐहिकसुख सपादक कश्चित्सासारिकशत्रुमथन-स्त्रीवशीकरणाद्यभीप्सितसपादनोपायभूयिष्ठ इति तत्र रुचिरविकाऽभूत्। तदभिचिन्त्य विद्वद्भिर्वैदिकै क्रमेणाथर्वण्यादरोऽभिनिवेश प्रचारश्च क्षपितो येनाथर्वण प्रचारो लुप्त । पुन कालवशाद्गादिष्वपि भक्तो ह्रीयमानाया भैरवादिमाहादेवमार्गावलम्बिन. वज्रयानशाखावलम्बिनो बौद्धाश्च रूपान्तरेणाथर्वणीं तामेव सिद्धिपद्धतिं गृहीत्वा भक्त्युपरञ्जिता ता जनेषु प्रचारयामासु । स्वमतख्यापनाय खेचरी, तिरस्करिणी विण्मूत्रसङ्गेनाधमलोहस्योत्तमलोहतापादन इत्यादि सिद्धिप्रकारै तन्त्रैर्लोक स्ववशे चकृश्च। त एव गोरक्षनाथादयो नाथपथानुसारिण मन्थान भैरवाद्य सिद्धा, नागार्जुनादयो बौद्धाश्च। तेषा च न कश्चित्क्रमबद्ध इतिहास क्वाप्युपलभ्यते। यद्यपि बौद्धा न वैदिका, अथापि सिद्धगोष्ठीषु तेषा समकक्षता वर्ण्यते। उत्तरापथे च बौद्धमतस्य वज्रयानीयशाखया चतुरशीतिसिद्धमण्डल गण्यते, तदन्तर्गतश्च गोरक्षनाथ नाथपथप्रवर्तक इति। पर नामावलीपरिशीलने केषाञ्चिच्छैवत्वेनाभिमतानामपि सिद्धाना तन्त्रान्तर्भाव इति तत्र प्रामाणिकत्व सशयग्रस्तम्। दक्षिणापथे च शैवपाशुपतादितन्त्रानुयायिनो माहेश्वरसिद्धा रसग्रथेषु भिन्नभिन्नयाऽऽनुपूर्व्या तत्र तत्र प्रतिपादिता इति तेषामपि इतिहासो नूनं दुरवगम । यथाऽऽनन्दकन्दे नव नाथा नव सिद्धाश्चोद्दिष्टा ॥

"आदिनाथं मीननाथं गोरक्षं कोङ्कणेश्वरम् ।
जालन्धरेशं कन्थनीशमोड्डीशं चिञ्चिणीश्वरम् ॥
चौरङ्गिमेतान्नाथाख्यान्नव सन्तर्पयेत्ततः ।
चौरङ्गिं चर्पटं घोडाचूलिं रामद्वयं ततः ॥
भोलगोविन्दसिद्धं च व्याडिं नागार्जुनं तथा ।
कोरण्डं शूर्पकर्णं च मुक्तायीं रेवणं तथा ॥
सिद्धं खुक्खुरपादं च शूर्पपादं कणेरिकम् ।
सिद्धं किङ्किणिकाख्यं च सिद्धान्षोडश तर्पयेत् ॥"

[अ. चि. चत्वा. ३. श्लो ४७-५१.]

अन्ये च केचन रसरत्नसमुच्चये पठयन्ते ।

आदिमश्चन्द्रसेनश्च लङ्केशश्च विशारदः ।
कपाली मत्तमाण्डव्यो भास्कर शूरसेनकः ॥
रत्नघोषश्च शंभुश्च तथाऽर्को नरवाहनः ।
इन्द्रदो गोमुखश्चैव केवलिर्व्याडिरेव च ॥
नागार्जुनस्सुरानन्दो नागबुद्धिर्यशोधनः ।
चण्डः कापालिको ब्रह्मा गोविन्दो लंपको हरिः ॥
सप्तविंशतिसंख्याका रससिद्धिप्रदायकाः ।
रसाङ्कुशो भैरवश्च नन्दी स्वच्छन्दभैरवः ॥
मन्थानभैरवश्चैव वाकचण्डेश्वरस्तथा ।
कामदेव ऋश्यशृङ्गः क्रियातन्त्रसमुच्चयी ।
रसेन्द्रतिलको योगो भालुकिर्मेलयाह्वयः ॥
महादेवो नरेन्द्रश्च वासुदेवो हरीश्वरः ।

[प्रथमेऽध्याये ।]

ग्रन्थिडेषु चागस्त्यादयोऽष्टादश सिद्धाः प्रकीर्त्यन्ते ।

१. नन्दी ।
२. श्रीमूलनाथः ।
३. कालाग्निनाथः ।
४. भोगः ।
५. कोङ्कणः ।
६. अगस्त्यः ।

७. पुलस्त्यः ।
८. भुशुण्डः ।
९. रोममुनिः ।
१०. धन्वन्तरिः ।
११. शट्टैमुनिः (घोडाचूलिः ?)
१२. मत्स्यमुनिः ।
१३. कण्वः ।
१४. पिण्डिनाक्कीशः ।
१५. गोरक्षः ।
१६. तेरयर् ।
१७. यूहिमुनिः ।
१८. इडैक्काडर् ।

तत्र शिवात्पार्वती सिद्धसंप्रदायमधिजगे पार्वत्या नन्दी नन्दिनश्चाश्विनौ, अश्विन्या विश्विनौ, विश्विन्या धन्वन्तरिः, धन्वन्तरेरगस्त्यः, अगस्त्यात्पुलस्त्यः, पुलस्त्यात्तेरयर्, तेरयात् यूहिरित्येनां संप्रदायानुवृत्तिं यूहिमुनिः स्वीये वादसाहस्र्यां (யூகி வாதகாவ்யம்) स्मरति । नन्दिनस्साक्षादधिगतविद्यमात्मानं स्मरति श्रीमूलनाथः । इत्थं सिद्धसंप्रदायाविष्कर्तृणां मध्ये न कस्यापि कालो निश्चयेन वक्तुं शक्यते । श्रूयन्ते ह्यनेके नागार्जुनाः प्राचीनेतिहासप्रसिद्धाः । चक्रपाणिः स्वकीये चक्रदत्ते रसायनाध्याये —

"नागार्जुनो मुनीन्द्रः शशास यल्लोहशास्त्रमतिगहनम् ।"

इति स्मरति । अन्यः कश्चिद्बौद्धनरपतिः काश्मीरीयो राजतरङ्गिण्यां कल्हणेन कीर्त्यते । अपरश्च बौद्धभिक्षुर्महायानाख्यबौद्धमतप्रतिष्ठापको माध्यमिको बौद्धेतिहासप्रसिद्धः । अन्यश्च सिद्धनागार्जुनः कक्षपुटरसरत्नाकरादिग्रन्थकर्ता प्रज्ञापारमितेति बौद्धमतप्रसिद्धदेवीनामस्मरणाच्च बौद्धत्वेन गण्यमानः । इतरश्च "प्रतिसंस्कर्तोऽपीह नागार्जुन एवे"ति डल्हणेन सुश्रुतसंहिताप्रतिसंस्कर्तृत्वेन व्यवह्रियमाणः । अत्र को वा नागार्जुनः सिद्धसंप्रदायानुवर्ती ? किमु सर्वे एकामेव व्यक्तिं परिचाययन्ति इतीदं क्षोदक्षमम् । अत एतत्संप्रदायस्य संप्रदायद्रष्टॄणां वा कालनिर्णये न प्रभवाम इत्येव वक्तुमर्हामः ।

चरकसुश्रुतयोः काले प्रायः सर्वेषां रसोपरसमहारसादीनां मुख्यतः—पारदस्य, गन्धक-माक्षिकाभ्रक-मल्ल ताल-शिलानां महारसानां, गैरिक-कासीस-तुत्थ स्रोतोऽञ्जन-सौवीराञ्जन-पुष्पाञ्जन शिलाजतु- सिन्दूर सौराष्ट्रो-कङ्कुष्ठानामुपरसानां वज्र-मुक्ता-प्रवाल-स्फटिक-वैडूर्य-मरकत-कर्केतन-गोमेदकानां रत्नानां, सुवर्ण-रजत-ताम्र-त्रपु-सीस-रीत्यर्यो-मण्डूराणां लोहानां शङ्खसमुद्रफेनादीनां च बाह्य आभ्यन्तरश्चोपयोगविधिश्चिकित्सायां लब्ध-

रसतन्त्रस्य परिनिष्ठितिः कदा ?

प्रचार आसीदिति चरकसुश्रुतसंहितयोर्बहुत्रावगच्छामः। मन्त्रालरचन्द्रगुप्तस्य सचिवोत्तमः कौटिल्यः स्वकीयेऽर्थशास्त्रे स्वर्णस्य रसविद्धं नाम कञ्चन भेदं स्मरति। अतो वैधान्तस्य रससंस्कारजातस्य परिनिष्ठितिस्मतः पूर्वमेवासीदिति ज्ञायते। चाणक्यस्य कालो वैक्रमशकारंभात्प्राक् द्वितीयायां तृतीयायां वा शताब्द्यां (B C 325) स्मर्यते॥

चरकसुश्रुतसंहितयोरन्यत्र वा तादृशेष्वायुर्वेदसंहिताग्रन्थेषु रसोपरसादीनां चिकित्सायां वादविधौ वा भूयसा व्यवहारदर्शनाभावे कारणं यद्येवमभ्यूह्यते— यत् दोषदूष्यसंमूर्च्छना. तद्विघटकैर्द्रव्यैः प्रतीकारः प्रकृत्यवस्थापरिपालनं च द्रव्यगतरसवीर्यविपाकप्रभावपरिज्ञानमवलंबन्ते इति स्वप्रतितन्त्रसिद्धान्तानुसारेण रसोपरसादीनां संस्कृतानामसंस्कृतानां वा रसवीर्यविपाकादिनिश्चायकस्य मार्गस्यापरिज्ञानात् चिकित्सायां समन्वये वा ते चरकादयो न प्रभवन्निति— तर्हि गरलादिविषये च— यत्र रसवीर्यविपाकप्रभावपरिज्ञानाय स्वोपयोगो न संभवति— रसवीर्यविपाकप्रभावपरिज्ञानं विनैव प्रयोगापादनमिति स्वपक्षव्याघातः। दिव्यदृष्ट्या स्वोपयोगमन्तराऽपि तेषां रसवीर्यादिपरिचय इति च रसोपरसादिष्वपि तत्संभवतीति समः समाधिः। अतः आयुर्वेदीयग्रन्थेषु रसोपरसादीनां प्रयोगाभावे न किमपि कारणमुन्नेतुं शक्यते। एवं भारते क्वचन रसतन्त्रस्य प्रचारः. क्वचन च न, क्वतो वा नेति च नाभ्यूहितुं शक्यते। तान्त्रिकसमुदाये रसोपरसादीनां, तदितरवैदिकसमूहे चरकादिदृष्टस्य आयुर्वेदस्य च प्रचार इति निश्चयो न निर्हेतुकः स्यात्॥

सर्वथा वैक्रमशकारंभात्प्रागेव रससंप्रदायस्य पूर्णतया परिनिष्ठितिरसीदियत्र नेतः प्रमाणान्यधिकान्यपेक्ष्यन्ते।

सामान्यतस्तन्त्राणामुत्पत्तिमेवमामनन्ति पण्डिताः। स्वप्ने जाग्रति तुरीयावस्थायां वा साधकैर्विशिष्टेन तपोयज्ञसिद्धयन्तरादिना साक्षात्कृता भैरवादयस्सिद्धपुरुषास्तेभ्यो यमुपदिशन्ति तत्वं, तदेव प्रपञ्च्यते तैस्तन्त्रात्मना इति। अत एव यत्तेषां स्वप्नजाग्रतोरुपदिष्टं योगलीनावस्थायां प्रतिभातं, तत्तथैवेश्वरोपज्ञतया शिवपार्वतीसंवादरूपतया, भैरव-भैरवीसंवादात्मकतया काकचण्डी-भैरवसंवादात्मकतया वा निर्दिष्टम्। न क्वचिदात्मनो मन्थकर्तृत्वाभिमानः प्रकटीकृतः। प्रकृते तु भैरव-भैरवीसंवा-

आनन्दकन्दस्य कर्ता, कालश्च।

दात्मकतया प्रवृत्तस्य ग्रन्थस्यास्य प्रणेता, कालो-वा न सुकर । उल्लासोपसंहारेषु भैरवकृत इति स्मरणमुपलभ्यते । कोऽसौ भैरव इत्यत्र न किमपि दृढतर प्रमाणमुपलभ्यते । [1]असिताङ्गादयो बहवो भैरवा श्रूयन्ते 'भैरवानसिताङ्गादीनि "त्यादिना (आ क पृ ३६) प्रत्याप्यमाना । रसरत्नसमुच्चय उल्लिख्यमानेषु सिद्धेष्वन्यतमो भैरव एव आनन्दकन्दस्य कर्ता स्यादित्यपि न निश्चयेन वक्तु पार्यते । अतो रचनाया स्वरूपे च रसार्णवाख्यं सुप्रसिद्धमाकरग्रन्थमनुसरन्नानन्दकन्दोऽपि भैरवमतानुयायिना केनापि तान्त्रिक्या शैल्या निर्मित इत्येतावदेवानुमातु शक्यते ॥

ग्रन्थकर्तुरनभिज्ञाने ग्रन्थनिर्माणकालस्यापि निश्चयो न सुकर । परं ग्रन्थप्रतिपाद्यवस्तुपरामर्शो - ग्रन्थान्तरसंवादसमुपलभ्यमवलम्ब्य पौर्वापर्यपरिमर्शो वा ग्रन्थनिर्माणकालनिर्णये बहूपकरोति । तत्र प्रतिपाद्यवस्तुपरामर्श प्रथमं संक्षेपेण निर्दिश्यते ।

१) रसार्णवरसरत्नाकराद्याकरग्रन्थेषु निशङ्किततयोपलभ्यमानानां विषयाणां क्रमं कञ्चनावलम्ब्य प्रतिपादन, तत्राप्रतिपादितरसोपरसादिशोधनमारणादिविविधनव्यविषयप्रस्तावश्च ॥

२) प्राचीनतमतया संप्रतिपन्नाद्रसार्णवादेकादश पटलमारभ्य पञ्चदशपटलपर्यन्त प्रतिपादितो रसस्य विशेषजारणाक्रमो मूलिकोदकरत्नादिबन्धविशेषश्च आनन्दकन्देऽमृतीकरणविश्रान्तौ पञ्चमोल्लासत्वेन त्रयोविंशचतुर्विंशोल्लासत्वेन शब्दतोऽर्थतश्च स्वीकृत्य संग्रथित ॥

३) विजयाहिफेनादीनामुपयोगविधि, यश्चैतिह्यसिद्धेरतिप्राचीने काले प्रचारे नासीदिति आमन्यते ॥

४) पेरोजसावुणीत्यादीना रसार्णवादिषदृष्टाना प्राकृतपदाना अत्रोपलब्धि ॥

इतीमानि चत्वारि प्रमाणानि भवन्ति आनन्दकन्दस्य रसार्णवादिभ्य अर्वाक्कालिकत्वे । रसरत्नसमुच्चय रसप्रकाशसुधाकर- रससङ्केतकलिकादि-

---

1 किमयमेव कालाग्नि इति द्रविडसंप्रदायप्रसिद्ध इति विमर्शनीयम् ।

भ्यो निबन्धग्रन्थेभ्य आयुर्वेदप्रकाश-रसकामधेन्वादिभ्यस्सङ्ग्रहग्रन्थेभ्य-श्चाख्यानर्वाचीनता चाधोनिर्दिष्टैः प्रमाणैरुपबृंहयितुं शक्यते ।

१) द्रुतीनां शास्त्रोपदिष्टानां दुष्करत्वं, तत्प्रयोगाणामनभिज्ञेयत्वं च कारणत्वेनोपजीव्य तन्निरूपणमेव त्यक्तं रसरत्नसमुच्चयकारेणायुर्वेदप्रकाश-कारेणान्यैश्च । तत्र तत्काले द्रुतिप्रमाणां लुप्तप्रचारता कारणं स्यात्। आनन्दकन्दे च तेषां प्रयोगा नैके प्रतीर्यन्ते ॥

२) रसरत्नसमुच्चयादर्वाचीन्न महारसोपरसभेदानिर्णयः ।

३) अर्वाचीनग्रन्थेषु लोहतया परिगणितस्य यशदस्य परामर्शाभावः । यद्यपि खर्पराात्सत्वाकर्षणं निरूप्यते, खर्परसत्वमेव यशद इति नव्याश्चारो-चते, अथापि खर्परसत्वमेव यशद इति, खर्परसत्वं लोहः इति वा न प्रतिपा-दितं क्वचित्। अन्यथाऽभ्रकसत्वस्यापि लोहेष्वन्तर्गणना कृता भवेत् ॥

अतश्च रसार्णवादिभ्य आकरग्रन्थेभ्योऽर्वाचीनो रसरत्नसमुच्चयादिभ्यो निबन्धग्रन्थेभ्यः आयुर्वेदप्रकाशादिभ्यस्सङ्ग्रहग्रन्थेभ्यश्च प्राक्तन आनन्द-कन्द इति सिद्ध्यति । यद्यप्यायुर्वेदप्रकाशे रसकामधेनौ च ग्रन्थान्तरवदस्यो-द्धारो न क्वचिदप्युपलभ्यते । तौ हि सङ्ग्रहग्रन्थावस्यर्वाचीनौ विषयमेकैक-मवलंब्य तत्र तत्रान्येषामाचार्याणां ग्रन्थान्तराणां चाशयानुपबृंहणतया एकल सङ्कृत्य प्रस्तवीतः । तथाऽपि तत्र तद्ग्रन्थकर्त्रोरानन्दकन्दापरिज्ञानमेव कारणं स्यात्। अतोऽस्य काले वैक्रमदशमत्रयोदशशताब्द्योर्मध्यपाती भवेदिति विश्वसिमः ॥

अथ ग्रन्थान्तरसंवादमीषत्परामृशामः । आनन्दकन्दे उपनिबद्धा बहवो विषया रसरत्नाकरादिषु बहुषु ग्रन्थेषु क्वचित्तेनैव पदसन्दर्भेण क्वचित्त-दर्थकसदृक्षपदसन्दर्भेण च निरूप्यन्ते । आनन्दकन्देन तत्र के दत्ता के गृहीता इति तु न निर्णेतुं शक्नुमः--केचन च भागा ग्रन्थान्तरेभ्यः स्वीकृत्य पश्चात्प्रक्षिप्ता इत्यप्यभ्यूहितुं शक्नुमः । आनन्दकन्दे निबद्धानां विषयाणां पार्वतीपुत्रनित्यनाथसिद्धविरचितस्य रसरत्नाकरस्य रस-रसायन-वादिखण्डेषु क्वचिच्छन्दतः क्वचिदर्थतश्च कमपि भेदं विनैव निबन्धो दृश्यते। तद्यथा :—

विषयाः ।	आनन्दकन्दे ।	रसरत्नाकरे ।		
	पृ.			
चारणयोग्यस्याभ्रकस्याभिषेकः	५३	वादिखण्डे	१२	उपदेशे
अभ्रकजारणे संस्काराः	६०	,,	,,	,,
लोहसंस्कारमन्त्रोपदेशः	१२८	रसखण्डे	९	,,
भूतकालान्तकरसः	१७३	रसायनखण्डे	३	,,
श्रीशैले देहसिद्धिः	१७६	,,	८	,,
ब्रह्मवृक्षादीनां कल्पः	२०५	,,	४	,,
उद्वर्तनकेशरञ्जनकल्पः	२६८	,,	५	,,
हिंगुलात्पारदाकर्षणविधिः	३८६	वादिखण्डे	२	,,
पारदमारणप्रकारा	३८८	रसायनखण्डे	२	,,
गन्धकपिष्टी	४६८	वादिखण्डे	४	,,
जलौकायोगाः	४७९	रसायनखण्डे	७	,,
गन्धकशोधनं	५२३	रसखण्डे	५	,,
तालकशोधनभस्मविधिः	५२७	,,	७	,,
माक्षिकशोधनभस्मविधिः	५३२	,,	७	,,
अभ्रकभस्मविधिः	५३८	,,	६	,,
स्वर्णशोधनभस्मविधिः	५६२	,,	८	,,
रजतशोधनभस्मविधिः	५६८	,,	,,	,,
ताम्रशोधनभस्मविधिः	५७२	,,	,,	,,
लोहशोधनभस्मविधिः	५८१	,,	९	,,
वङ्गनागशोधनभस्मविधिः	५८७	,,	८	,,
वज्रमारणविधिः	६०९	,,	५	,,
,,		वादिखण्डे	३	,,

रसार्णवस्य एकादशं पटलमारभ्य पञ्चदशं पटल यावत्प्रायः ७४० श्लोकास्तथैवानुपूर्व्याऽद्यापि पठ्यन्त इति इदं पूर्वमेवोक्तम्। मध्ये मध्येऽस्माद्रसार्णवे केचन बन्धा अधिका इति त्वकिञ्चित्करम्। एवं कान्तमहणविधिर्यन्त्रविशेषाः, जीवन्मुक्तिस्वरूपं, रसपूजाविशेषः, वज्रादिमारणद्रुतिप्रकारादयश्च यथायथमर्थतोऽनूदिता भिन्नैः पदसन्दर्भैः। लोह-

संस्कारविधिस्तदुपयोगी मन्त्रभागश्च चक्रदत्ते तथैवोपलभ्यते। एवं संवादनिरीक्षणेनेदमत्र निर्णेतुं शक्यते यदानन्दकन्दो रसरत्नाकरादिभ्योऽर्वाचीन इति।

ग्रन्थस्य मौलिकत्वमाभिज्ञापयितुं चान्यत्रानुपलब्धाः केचिदंशा आनन्दकन्दे विशिष्य वर्ण्यन्ते। यथा:—

१. आचार्यशिष्ययोर्दीक्षाविधिः।
२. रससन्ध्याविधिः।
३. अमरीकल्पः।
४. आरोटरससेवाक्रमः, तदर्थं क्षेवीकरणाय रसायनोपयोगश्च
५. पञ्चदशघुटिकाप्रकाराः।
६. विजयादिदिव्यमूर्छिकाकल्पाः।
७. उपःपानरसायनकल्पः।
८. वन्द्राकल्पः।
९ दिनचर्या ऋतुचर्या च।
१०. योगरसायनम्।
११. घुटीनिर्माणम्।

अत्र चाचार्यदीक्षाविधिः रससन्ध्याविधिः, अमरीकल्पः, वन्द्राकल्पश्च द्रविडसंप्रदाये भूयसा परिदृश्यन्ते। दिनचर्या ऋतुचर्या च चरकसुश्रुतादिसंहितानुसारिण्यौ भवतः॥

धन्वन्तरिनिघण्टौ राजनिघण्टौ च तत्र तत्र पठ्यमानो हिमजादिमहौषधिविवरणात्मको भाग आनन्दकन्दे क्रियाकरणविश्रान्तौ दृश्यमानत्वेनैकत्र सङ्कलितस्तेनैव पदसन्दर्भेण; यश्च नोपलभ्यते मैसूर

प्रक्षिप्तत्वेन संभाव्यमानाः केचिदंशाः।

ग्रन्थागाराल्लब्धे निखिलायुर्वेदमहामण्डलपत्रिकामकाशिते चानन्दकन्दे। अतः प्रक्षिप्त एषोऽध्याय इति वक्तुं शक्यते। एवमेव क्रियाकरणविश्रान्तेर्नवमोऽध्यायः. दिव्यौषधिवर्णनपरः तत्साहचर्यात्प्रक्षिप्त इति भाति, यत्रस पूर्णतः स्वीकृतो रसेन्द्रचूडामणितः। एवमेव अमृतीकरणविश्रान्तेरन्तिमाऽध्यायौ— परिभाषाध्यायः

यन्त्रादिवर्णनाध्यायश्च प्रक्षिप्तावितिं शङ्कयते यतस्तावध्यायौ सोमदेवस्य रसेन्द्रचूडामणावुपलभ्येते । तस्मात्परिगृहीताविति प्रतिज्ञाय रसरत्नसमुच्चये कीर्त्येते । पर रसरत्नसमुच्चय इव तयो सोमदेवोपज्ञता न स्मर्यते आनन्दकन्दे । प्रक्षिप्तत्वे चोपबृंहणतया कारणान्तराणि चाधो दीयन्ते ।

१) स्वग्रन्थेऽनुपयुक्तानामपि परिभाषाणा यन्त्रमूषादीना चोद्देशो लक्षण च निर्दिश्यते । यथा— ग्रासमानोत्पाटनपिञ्जरीप्रभृतीना आन्त राग्निस्तापिकाप्रस्तादियन्त्राणा च ।

२) ग्रन्थे समुल्लिखितानां परिभाषाणा यन्त्राणा च तत्रानुद्देशो-ऽनिर्वर्णनञ्च । यथाऽनुवासन-वासनामुखचारणाम्लवर्ग श्वेतपीतकृष्णवर्ग-नियामकयन्त्रसारणायन्त्रादीनाम् ॥

३) निरूपणीयार्थविरोधेनापि क्वचित्परिभाषण दृश्यते । यथा मूर्च्छनाख्य सस्कारो मर्दनादिष्टभैषज्ये कर्तव्य " इति (पृ ४९०) परि भाषाध्याये पठ्यते तद्विरुद्ध च सस्काराध्याये मूर्च्छनार्थं राजिकादीनि पृथगेव द्रव्याण्युपदिष्टानि दृश्यन्ते (पृ ४६) । परिभाषाध्याये च जारणस्य प्रपञ्चितौ द्वौ समुखनिर्मुखात्मकौ भेदौ । बीजप्रदानेन जारण समुखमिति, बीजखादानेन जारण निर्मुखमिति तयो स्वरूप च व्या-ख्यातम् । सस्काराध्याये तु जारणस्य समुखनिर्मुखात्मना भेद एव नोल्लिखित । नाप्येतद्द्वय जारणावान्तरसस्कारस्य चारणस्य भेदतया ऽभ्युपगन्तु शक्नुम । यतश्चारणे रसमुखकरणाय गन्धकस्यैव दान-मनुमतं न तु बीजभूतयो स्वर्णरजतयो ।

४) मैसूरलब्धमातृकाया यन्त्राध्याय एव नोपलभ्यते ।

अत सभाव्यते केनापि भैषज्ययोगाचार्येण स्वज्ञानवैशिष्ट्या-पादनाय कारिकासमुच्चयवद्ग्रन्थान्तरेभ्य समुञ्चितो भाग पुनर्गच्छता कालेन ग्रन्थान्तर्भूततया केनापि सभावित इति ।

इत परं ग्रन्थान्तरोक्तेभ्यो विषयेभ्य एतद्ग्रन्थप्रतिपादिताना विष याणा वैशिष्ट्यमस्ति वा ? अस्ति चेत्कीदृशम् ? इतीपदृिमृश्यते । इदमेकमादावबधेयं यद्रसहृदयादिभ्यो ग्रन्थान्तरेभ्य सङ्कलिता दुरूहा अपि विषया केचन विन्यासविशेषेणात्र सुलभावगाहा भवन्ति ।

ग्रन्थस्य मुख्यं हि ग्रन्थान्तरेभ्यो-ऽस्य वैशिष्ट्यम्। रसोत्पत्तिः।

प्रतिपाद्यं रसस्वरूपं, तत्संस्कारः, संस्कारप्रयोजनं, तत्फलं देहवेधो, जीवन्मुक्तिसाधनपिण्डस्थैर्यसिद्धिश्चेत्येतत्। तत्रादौ रसोत्पत्तिः प्रथमं चिन्तनामर्हति। शिवपार्वत्योः सुरते वह्निसन्निधानेन विरते विलक्षाच्छिवाच्च्युतश्चरमो धातुरग्निना, तस्माद्भुवा च नीतः पञ्चसु कूपेषु न्यपतत्, पञ्चाख्याश्चाभजद्गणंस्वरूपभेदेनेयमितिहासः सर्वत्र रसतन्त्रेषु समान एवोपलभ्यते। द्रविडसंप्रदायप्रवर्तृभिरप्ययमादृत एव। द्रविडसिद्धैः किल शिवगणगुप्तेभ्यो देवेभ्यस्तत्प्रसादेनैव रसः प्राप्य इत्यसकृदुदीर्यते। परं इतिहासोऽयं नव्यैरन्यथा संभाव्यते— यत् रसस्योत्पत्तिर्भौतिकी प्रकृतिसिद्धा। तद्याश्च रूपणविधयाऽऽख्यायिकाद्वारा प्रकाशनं तान्त्रिकाणां निसर्गसिद्धम्। आध्यात्मिका अपि बहवोऽशा एवमेव कामपि व्यावहारिकीं कथामन्तरा कृत्वा प्रतिपाद्यत इति प्रसिद्धम्। तत्रायं वास्तविको रसोत्पत्तिक्रमो भवितुमर्हति। यथा— शैवसमयप्रचारकैः क्रमाद्धिमवन्तमतिक्रम्य चीन-तिब्बत-ब्रह्मदेश-ईरानादिदेशानटितवद्भिः, तत्र तत्र देशान्तरदुर्लभान् दुरवगाहानध्येयान्बहून्विषयानधिगतवद्भिः स्वेनतिब्बतदेशादिषु पारद उपलब्ध उष्णोदस्रोतसां समीपे। ततस्तदुत्पत्तिस्थलं निरूपयद्भिः ज्वालामुख्याः प्रभोपाद्विदारिताया भूमेरुत्पत्तिरवगता। ज्वालामुख्या उत्पत्तेः प्राक् प्रथमं भूकंपः ततो विदारणं, विदीर्णाया भुवो मध्याद्धूमोत्पत्तिरततो भूकंपशमनं, धूमाविर्भावानन्तरं गिर्यन्तःस्थद्रुतगन्धकादिद्रव्यैस्साकं वह्नेरुज्जृंभणं द्रुतानां धातूनां शीतेषु नदीमुखेषु मिलितानां क्वचित्स्राते संभरणं, इत्यादि वस्तुतत्त्वं क्रमादवगतं तैः। तदनुसृत्य रसोत्पत्तौ शिवपार्वतीसुरतकल्पना कृता तैः इति। वस्तुतः कथायास्तस्या एवं समन्वयो रुचिर एव। सेयं रसस्योत्पत्तिरभिहिता।

रसगता दोषाः।

रसः स्वाभाविकैरौपाधिकैर्यौगिकैश्च दोषैर्दुष्टो भवतीति दोषापाकरणाय संस्काराः क्रियन्ते। संस्कारैर्दोषापनयने सत्येव शुद्धो रसो योगेषु वैद्येषु च योज्यो भवति। अतो दोषस्वरूपविज्ञानं नान्तरीयकम्। पार्थिवादयो नैसर्गिका दोषाः पञ्चदश समपञ्चं निरूपिताः (पृ. ४)। सर्वस्यापि भेषजोपयोगिनो द्रव्य-

जातस्य धेयक्तिकतया गुणदोषपरामर्शे द्रव्यगुणविज्ञानेन अंशांशतो दोषवत्त्वं निसर्गसिद्धं ज्ञायते। ते च दोषा द्विविधाः सहजा कृत्रिमाश्च। सहजा हि नैसर्गिकाख्यया पृथक्कीर्त्यन्ते। कृत्रिमाश्चौपाधिका यौगिकाश्चेति पृथक्कीर्त्यन्ते। एते नैसर्गिकाः पञ्चदश रसस्था दोषाः मुद्गादिना फलेनानुमीयन्ते। रसपद्धतौ तु विष-वह्नि-चापल्य-मलारयाश्चत्वारः, रसहृदये विषवह्निमलचापल्यारयाश्चत्वारः, रससङ्केतकलिकायां रसेन्द्रमङ्गले च विषवह्निचपलतामलगौरवाख्याः पञ्च, रसप्रकाशसुधाकरे मलविषवह्निमदर्पारयाः पञ्च, रसमञ्जर्यामायुर्वेदप्रकाशे च वह्निचाञ्चल्यासह्याग्निविषमलाख्याः पञ्च चेति दोषा आम्नायन्ते। वस्तुतः पञ्चदशसु आनन्दकन्दोक्तेषु दोषेषु एषामन्तर्भावः सुकरः। विषदोषस्त्वानन्दकन्दे यौगिकेषु गण्यते इति विशेषः। यौगिका औपाधिकाश्च दोषास्ते भवन्ति, ये गिरिपाषाणजलवङ्गनागताम्रलवणादीनां योगेनोपाधिना जायन्ते। आनन्दकन्दे औपाधिका इति सप्त, यौगिका इति त्रयश्च दोषाः पृथगाम्नायन्तेऽन्यत्र ग्रन्थेषु न तथा, यतो यौगिका इति क्वचिदौपाधिका इति क्वचिच्च ते पठ्यन्ते। एषामुद्देशं स्वरूपं निरुक्तिश्च रसग्रन्थेषु बहुविधं प्रपञ्चयत इति तन्निरूपणे मतिमीषद्वितराम्।

रसस्यौपाधिका दोषाः सप्त कालिका मलिनी कपोती रक्तकञ्चुका सलोमी गिरिजा पिङ्गलेति च कञ्चुकाख्यामौपाधिकाख्यां च भजन्ते।

कञ्चुकाः।

कञ्चुकानां भेदविनिर्णयोऽन्यत्र उपलभ्यते परिभाषाध्याये (पृ. ४९०-४९१) 'वार्यद्रिभूजकञ्चुकनाशनं' इति 'वङ्गाहिसंपर्वजकञ्चुकघ्न' मिति च कञ्चुकानां वार्यद्रिभूनागवङ्गौपाधिकतां व्यावृण्वन्निव। कञ्चुकाख्या कञ्चुकत्यत्पटलवत् पारदमावृणोतीति स्वरूपविकृतिज्ञापकतया, औपाधिकाख्या च वार्यद्रिभूनागवङ्गाख्योपाधिज्ञापकतया च प्रवृत्तेत्यध्यवसेयमाभाति। रसपद्धतौ तु--

सप्तात्र दोषा अमी
नागो वङ्गविषौ मलश्चपलता वह्निर्गिरेर्जन्मजा।
गण्डश्चित्रकमृत्युवान्तिचलतासन्तापजाड्यादय'
चैतेभ्य' क्रमशो भवन्ति विविधा रोगा दुराराधना॥

इति सप्तदोषस्वरूपप्रतिपादकं श्लोकं व्याख्यातवता श्रीमहादेवेन रसाचार्येण इयं कल्पना कृता, "नागवङ्गौ यौगिकौ दोषौ। चपलता विषवह्निमलजाश्च नैसर्गिका दोषाः गिरिभूमिजाश्चौपाधिकाः" इति। पश्चात्स दोषं वारिजमप्यौपाधिकं पठति। रसहृदये तु नागवङ्गजौ द्वावेव यौगिकौ दोषौ कथितौ। रसेन्द्रमङ्गले रससङ्केतकलिकायां च भूगिरिजलनागवङ्गजारसप्त कञ्चुकाः कीर्त्यन्ते। रसप्रकाशसुधाकरे तु— मृच्छैलजलशुल्वायोनागवङ्गसमुद्भवाः सप्त कञ्चुकाः पठ्यन्ते। रसेन्द्रचूडामणौ तु त एव सप्तौपाधिका दोषा मृण्मयः पाषाणमयो जलज इति मृदादिसंपर्के, कापाली कालीति यङ्गौपाधिकं वर्णभेदं, श्यामा कपालिकेति नागौपाधिकं वर्णभेदञ्च निमित्तीकृत्योद्दिश्यन्ते। दोषाणां कञ्चुकाख्यसाधारणनाम्ना व्यपदेशश्च कृतः। श्यामाख्यदोषस्य पञ्चवर्णत्वं कापाल्याख्यस्य सप्तवर्णत्वं च निर्दिश्यते। "पयसो यादृशौ सरा विज्ञातव्या कपालिका" इति कपालिकामाने च कञ्चुकस्वरूपं निगमितं दृश्यते। तदैव सकञ्चुकस्य मलिनस्य रसस्य सेवने दोषाश्च निरूपिताः। रसरत्नसमुच्चये तु नागवङ्गाख्यौ द्वौ यौगिकौ दोषौ, कञ्चुकाख्याश्च सप्त— पर्पटी पाटिनी भेदिनीति त्रयं भूगिरिवारिसंपर्के, द्रावी मलकारीति द्वयं नागसंपर्के, अन्धकारी ध्वांक्षीति द्वयं यङ्गसंपर्के, चोपाधीकृत्याम्नायन्ते। अत्र कञ्चुकानां व्यपदेशो दोषशक्तिं निमित्तीकृत्य प्रवृत्त इति विशेषः। तथा च कञ्चुकदुष्टस्य रसस्य सेवने दोषाः क्रमात्— पर्पटीरुजोपः, विदारणं, मलभेदः, धातूनां द्रवीकरणं, दोषवर्धनं, अन्धत्वजननं, काकयत्कर्कशस्वरोत्पादनं (कृष्णवर्णता वा) चेति नाम्नैवाम्नातं दोषस्वरूपमित्यभिप्रयन्ति केचन व्याख्यातारस्तत्र। नवीनतमो रसतरङ्गिणीनामको ग्रन्थो दोषगणनायां रसरत्नसमुच्चयं रससङ्केतकलिकाञ्चानुसरति। परं कञ्चुकव्यपदेशमेवं व्याख्याति—

"धातवो रससंश्लिष्टा यदा विष्णुपदामृतम्[1]।
गृह्णन्ति हि तदा तेषां कश्चिद्भागोऽवशीर्यते।
ततश्चूर्णत्वमापन्ना रसमाच्छादयन्ति ते।
तेनावरणसाम्येन धातवः सूतसङ्गताः।

---

1. Oxygen

कञ्चुकाख्यां भजन्तीति प्राच्यपाश्चात्यसंमति[1]।

वैश्चिदेते कञ्चुकाख्या दोषा औपाधिका. स्मृता " इति।

औपाधिकशब्दं च तत्रैव विवृणोति तत्व्याख्याता हरदत्त— औपाधिका वणिग्भिश्छलनार्थं मिश्रितैर्धातुभिः समुत्पन्ना एवैते दोषा इति।

अत्र सामञ्जस्यं समन्वयो वा विदुषां गंभीरां गवेषणां प्रतीक्षते। आनन्दकन्दोक्तं नैसर्गिकयौगिकौपाधिकत्वाख्यं दोषभेदकमुपाधित्रयमपि ग्रन्थान्तरोक्तैरसाकं समन्वयितुं दुष्कर प्रतिभाति। एतद्दोषजत्वेन निरूपिता विकाराश्च किमु ग्रन्थान्तरोपदिष्टेभ्यस्समाना इत्यपि विचारणीयमेवैतत्। परमेतावन्मात्रमत्र समन्वयितुं शक्यते यत्— रसस्य नैसर्गिकदोषतयाऽभिहितेषु पञ्चदशसु अग्निमलश्च प्रधानौ। अत्र यौगिकत्वेनाभिहितो विषद्रव्ययोगोत्पन्नो विषदोषश्च ताम्रवङ्गादिवत्पृथग्वस्तुत्वेनापृथक्करणीयत्वात्, नैसर्गिकतयाऽन्यत्र कथित। वङ्गनागताम्राय पाषाणादियोगजन्यदोषस्वरूपमेव कञ्चुकत्वेनोपाधिभेदाद्भिन्न कीर्त्यते बहुधा। कालिका मक्षिनीत्यायानन्दकन्दोक्त नामजातं सदृक्तदोषानुरूपंवर्णभेदमभिलक्षयति। पाटिनी भेदिनीत्यादि तु दोषशक्तिमभिव्यञ्जयति। मृण्मयपाषाणजेत्यादि तु दोषापाधिं व्यञ्जयति॥

अयञ्च विषयो भूयो भूयोऽनुसन्धेयस्तत्त्वान्वेषणाय।

संस्काराः॥

सस्कारा द्विविधा शोधनार्था वेधार्थाश्च। शोधनार्था संस्कारा नव आनन्दकन्देऽभिधीयन्ते।

स्वेदनं	उत्थापन	नियमनं
मर्दनं	पातनं	दीपनं
मूर्च्छन	निरोधनं	अनुवासनं चेति।

---

1 Impure mercury, when *shaken with air* yields a black powder caused by the oxidation of the metallic impurities, and the film of the oxide incloses a small globule of the liquid metal.

(Chemistry by H E Roscve and C Schorlemmer, F R S)

रसरत्नाकरे (वादिखण्डे) रसेन्द्रचूडामणावपीमे नवैव निर्दिश्यन्ते। रसहृदये रसपद्धतौ चानुवासनमेकमुज्झित्वा पठिता अष्टौ संस्काराः। रसहृदये च पातनमूर्ध्वपातनाख्यमेकविधमेव। रसार्णवे स्वेदनं मर्दन-मिति द्वावेव संस्कारावभिहितौ। पातनं नियामनं चाभिहितमपि न तयो-शोधनाङ्गतया निरूपणमुपलभ्यते। रससारे तु द्वादश संस्काराः कथ्यन्ते—

पट्टसारणं	मर्दनं	वीर्यानयनं
मर्दनं	मूर्च्छनं	दीपनं
धावनं	उत्थापनं	नियमन
स्वेदनं	पातनं	निरोधनमिति।

मर्दनञ्च द्विविधं; पातनमूर्ध्वपातनाख्यमेकविधमेव। वीर्यानयनं च बोध-नमित्यपि व्यवह्रियते। नियमनानन्तरं निरोधनमिति तु विशेषः। रस-मार्तण्डे सप्तदश संस्काराः कथ्यन्ते—

पट्टसारणं	मूर्च्छनं	वीर्यानयनं
मलापकर्षणं	उत्थापनं	नियामनं
स्वेदः	तिर्यक्पातनं	निरोधनं
शुद्धिः	ऊर्ध्वपातनं	दीपनं
मर्दनं	अधःपातनं	सुखीकरणमिति।
धावनं	शुचिः	

एवं ग्रन्थकाराणां संस्कारोद्देशे मतभेदो भूयान्दृश्यते। आनन्द कन्दस्य प्रकृतत्वात्तद्वर्णितातिरिक्तानां संस्काराणां ग्रन्थान्तरोद्दिष्टानां तद्वर्णितैश्चरितार्थतानिरूपणमात्रमस्माकं कर्तव्यं भवति। तथथा— पट्टसा-रणं मलापकर्षणं च स्वेदनात्मकर्तव्यत्वेन स्वेदाङ्गे भवतः। पट्टसारणं वस्त्रगालनापरपर्यायं स्थूलद्रव्यसंपर्कपृथक्करणाय क्रियते। मलापकर्षणं च धूमसारादिद्रव्यैस्साकं रसस्य पेषणेन संपाद्यते- नैसर्गिकमलशिथिल-तापादनाय, यच्चोद्दिष्टमानन्दकन्द एव स्वेदपूर्वाङ्गतया (पृ. ४४-४५) न तु पृथक्तया। धावनशुचिशुद्ध्याख्यास्तु स्वेदनमर्दनाद्यत्क्लिष्टानां विशिथिलितानां दोषाणां काञ्जिकोष्णोदकादिना प्रक्षालनमेवेति तेषामपि मलापोहनार्थकतया स्वेदनमर्दनाद्युत्तराङ्गत्वेन निर्देशः कृत एव। (पृ. ४५)

तिर्यगूर्ध्वाधःपातनानि तु पातनभेदाः पातनप्रकारत्वेन निर्दिश्यन्त एवात्र। (पृ. ४६-४८) बोधनापरपर्यायं धीर्यानयनं स्वेदभेदो निरोधनेऽन्तर्भवति। सुखीकरणं च दीपनस्यैवावान्तरभेदश्चारणसंस्कारोपयोगी। इति नवभिरेव तदतिरिक्तानां चरितार्थता संपन्ना। अनुवासनं चातपस्वेदात्मको दीपनभेद एवेति क्वचिन्न पृथग्लक्षितं तत्। यत्तु परिभाषाध्याये स्वेदनं सन्न्यास इति संस्कारद्वयमन्यदेव निरुक्तं, तन्नियमनस्यैव रूपभेदः॥

वस्तुतः संस्काराणाममीषां स्वरूपं त्रिधा परिगणयितुं शक्यते—स्वेदनं मर्दनं पातनं चेति। अन्ये सर्वे भेदा अत्रैवान्तर्भवन्ति। संस्कारव्यापारस्यैकरूपत्वेऽपि कस्यचित्संस्कारस्य पूर्वभावितां पश्चाद्भावितां च, संस्कारोपयोगिद्रव्यभेदश्चोपजीव्य नामभेदः सुवचः। इतीयान्शोधनाङ्गसंस्कारपरामर्शः।

अथ वेधार्थाः संस्काराः। ते च नवधा कथ्यन्त आनन्दकन्दे।

चारणं	वाह्यद्रुतिः	अनुसारणं
जारणं	रञ्जनं	प्रतिसारणं
गर्भद्रुतिः	सारणं	वेध इति।

रसरत्नाकरे चैवमेव। रसार्णवे तु—

चारणं	द्रावणं	सारणं
जारणं	रञ्जनं	क्रामणं इति

वेधस्तु लक्ष्यं फलमिति न संस्कारकोटौ गणना कृता तत्र। रसहृदये रसेन्द्रचिन्तामणौ च दश निर्दिश्यन्ते—

गगनग्रासप्रमाणं	वाह्यद्रुतिः	रञ्जनं
चारणं	जारणं	क्रामणं
गर्भद्रुतिः	सारणं	वेधः
		भक्षणमिति।

रसपद्धतौ तु चारणा जारणा सारणा मुखबन्धो वेधश्चेति पञ्चैव। रससारे जारणं रञ्जनं सारणं चेति चत्वारः संस्काराः। अत्रेदमवधेयं समन्वये। अभ्रकस्य चतुष्पष्टितमांशादारभ्य चतुःषष्टिगुणपर्यन्तं क्रमेण चारणाक्रम एव गगनग्रासप्रमाणमिति व्यपदिश्यते यश्च संस्कारश्चारणस्वरूप

एव। क्रामणं मुखबन्धश्च वेधाङ्गे। भक्षणं तु रसस्य सेवनप्रकारः, न तु पृथक्संस्कारः। मारणं त्वन्यः कोऽपि संस्कारो रसायनोपयोगी क्वचिच्च वेधोपयोगी।

वस्तुतस्तु जारणसारणवेधाख्यास्त्रय एव संस्काराः प्रधानाः। चारणगर्भद्रुतिवाह्यद्रुतिरञ्जनाख्या जारणावान्तरप्रक्रियाभेदाः, अनुसारण-प्रतिसारणे सारणाख्यावृत्त्या संपद्यमाने, क्रामणं वेधप्रक्रियान्तर्गतमिति समासः।

अथैतेषां संस्काराणां पृथग्विवेचना क्रियते। तप्ते खल्वे चूर्णगृहं धूमादीन्पृथग्रसषोडशांशान् दत्वा रसं च शोध्यं तत्र क्षिप्त्वा धान्याम्लेन दिनत्रयं मर्दयेदुष्णारनालेन प्रक्षालयेच्च, येन स्वेदनं मर्दनं च। स्थूला मला अपयान्ति। ततः प्रत्येकं रसषोडशांशान् पटु-राजी-त्रिकटुकादीन्धान्याम्लपिष्टान्वस्त्रेऽङ्गुलिमात्रं प्रलिप्य, तन्मध्ये रसं निक्षिप्य दोलामावध्य धान्याम्लपूरिते ताम्रजे पात्रे स्वेदयेत्पूर्णं दिनमेकं; तत उद्धृत्य रसं शरावके निक्षिप्य उष्णारनालेन प्रक्षालयेत्। पुनः पूर्ववत्स्वेदयेत्क्षालयेच्च। एवं एकविंशतिवारकरणेन स्वेदनाख्यः संस्कारः कृतो भवति। अनेन यौगिको विषाख्यो नैसर्गिकाश्चान्ये दोषाः शिथिलतामुपयान्ति। [पृ. ४४-४५]

शिथिलितस्य बहिर्मलस्य प्रणाशाय मर्दनाख्यो द्वितीयः संस्कारः क्रियते। स्थूलमलपोहनायोपदिष्टैश्चूर्णादिभिः सार्धं विशालराजवृक्षादीनां प्रत्येकं रसषोडशांशानां योगेन रसस्य तप्तखल्वे मर्दनं; दिवारात्रं, तत उष्णारनालेन क्षालनञ्चेत्येतत्कर्म एकविंशतिवारं करणान्मर्दनाख्यः संस्कारः संपादितो भवति। अयमेव च संस्कारः पश्चात् रसे स्वर्णरजताभ्रकादीनां जारणात्परं जीर्णग्रासस्य रसमयतासिद्धये रसस्य पुनर्ग्रासमर्दनपाटवसिद्धये चोपदिश्यते। [पृ. ४५-४६]

मूर्च्छनमपि मर्दनस्वरूपमेव। तथाऽपि मूर्च्छने सहोपयोज्यानि राजिकादीनि द्रव्याणि भिन्नानि। मर्दने सामान्येन मर्दनं, मूर्च्छने तु रसो नष्टपिष्टः— नष्टस्वरूप औषधतुल्यो— यथा भवति तथा खल्वे वेदगमिनि विशेषः। एवं नष्टपिष्टतामापादिते रसे, मूषायां निक्षिप्य मुखं

निरुध्य, भूधरयन्त्रे निधायोपरि कुक्कुटकपोतान्यतरपुटविधानेन स्वेदात् पुनः रसस्य स्वस्वरूपप्राप्तिः भवति। ततः पुनः राजिकाद्योषधिभिरेव मर्दनं भूधरे पाकश्चैकविंशतिवारं क्रियते येन मूर्च्छनाख्यः संस्कारः संपादितो भवति। भूधरयन्त्रे पाकश्च उत्थापनाख्यः संस्कारो भवति मूर्च्छितस्य नष्टस्वरूपस्य पुनः स्वरूपप्राप्त्युपकारी। उत्थापितं च रसं काञ्जिकेनोष्णोदकेन वा क्षालयेत्। [पृ. ४६]

मूर्च्छनं उत्थापनं च

क्वचिन्मर्दनादिष्टभैषज्यैरपि मूर्च्छनोपदिश्यते [पृ. ४९०]। क्वचिच्च विषवह्निमलादीनां पृथक्पृथग्दोषविनाशाय चित्रक विफला कुमार्यादिभिः पृथक् मूर्च्छना अभिधीयते [पृ. ३८९]। रसहृदयादावपि भूयांसः प्रकाराः मूर्च्छनाविधावभिधीयन्ते। अत्र च विशेषः कश्चिद्रससारे दृश्यते यथा—

विषैरिन्द्रफलया पूर्वं त्रिविषोपविषैस्तथा।
कर्कोटीक्षीरकन्दाभ्यां चित्रकैर्गृहकन्यया॥
एकैकेनापि संमर्द्य यामामेकं तु पारदम्।
किन्नरं यन्त्रमादाय ओषध्या लेपयेत्तलम्॥
नवसारयुतं तोयं यन्त्रमध्यगतं न्यसेत्।
दद्याद्रमोपरि श्रावं सन्धिलेपं दृढं मृदा॥
लवणेन च संपूर्यं द्वारं संरुध्य यत्नतः।
चुल्लिकोपरि संस्थाप्य दीपाग्निं ज्वालयेद्बुधः॥
यामैकाच्च समुत्तार्यं कर्तव्यः शीतलो रसः। इति।
[पञ्चमे पटले]

अदसीयकिन्नरयन्त्रस्वरूपं स्पष्टतया न कुत्राप्युपलभ्यते। अतस्तदधिकृत्य भूयो गवेषणा कर्तव्या भवति।

मूर्च्छना त्वन्योपदिश्यते 'मूर्च्छित्वा हरति रुज'मित्यादिना प्रघुष्यमाणा। सा तु रसे विशिष्टगुणस्वरूपाधानार्थां न तु शोधनार्थां। [पृ. ४०५] यस्याः स्वरूपं पृथक्त्वाद्विवेचयामः। उत्थापने अनन्तरमेवाभिधास्य-

मानेन पातनाविधानेनापि संपादयितुं शक्यते, यदा न तत्र पृथक् संस्कार-कोटौ गणना।

स्वेदनाद्याश्चेमे संस्काराः केषुचिद्ग्रन्थेषु त्रिवारं, क्वचित्सप्तवारं च करणीया इत्यभिधीयते। तद्विधानं तु भेषजयोगेषु योजनाय रससाधने प्रयुज्यते प्रायः। वेधान्तसंस्काराङ्गत्वेन निर्वा सप्तवारं वा तत्करणं नोद्दिष्ट-फलदं भवेदिति ध्येयम्।

आभ्यां संस्काराभ्यां, रसस्य स्वरूपनाशं यावन्मर्दनेन अणुशः अति-सूक्ष्मतया रसस्वरूपविभेदेन, तद्गतदोषाणां औषधिकल्केषु योगे संपन्ने स्वेदात्तेषां पृथक्करणं संपद्यते। चारिगिरिभूमिजकञ्चुकनाशनं फल-मनयोरभिधीयते।

पातनं त्रिविधमभिधीयते ऊर्ध्वाधस्तिर्यक्पातनाख्यप्रकारभेदेन। ऊर्ध्वपातनं च— पाठादीनां रसैः पिष्टं पादांशशुद्धताम्ररजोयुक्तं रसमूर्ध्व-पातनयन्त्रे दत्वा दिनमेकं विपचेत्। ततः स्वाङ्ग-शीते यन्त्रे ऊर्ध्वलग्नं रसमादाय पुनश्चतुर्थांशताम्र-पातनम्। रजोयोगेन पाठादीनां स्वरसैः पिष्ट्वा ऊर्ध्वपातन-विधानेन विपचेत्। एवं सप्तधा ऊर्ध्वपातनेन मर्दनेन च नागवङ्गाद्य-यौगिकदोषापकरणं क्रियते। यतः नागवङ्गाद्या लोहा रसे मिश्रिताः, ताम्र-संपर्केण रसात्पृथक्कृताः, अध. पातनायन्त्रे तिष्ठन्ति, रसश्चाग्नितापमसह-मानः ऊर्ध्वमुत्पतति शीते चोर्ध्वतले लगते इति यौगिकदोषपृथक्करणं सम्यग्जायते। [पृ. ४७)। क्वचिदर्धांशताम्ररजोयोगेनोर्ध्वपातनमुपदिश्यते, क्वचिच्चायोरजोयोगेनेति विशेषः। क्वचिच्च विद्याधरे डमरुयन्त्रे चक्र-यन्त्रे दीपिकायन्त्रे वा पातनमुपदिश्यते।

अधःपातनं च त्र्यूषणादीन् पृथक् सूतसमांशान् तप्ते खल्वे पिष्ट्वा रसञ्च दत्वा मर्दयेत्। तं कल्कमध.पातनयन्त्रस्योर्ध्वतले प्रलिप्य ऊर्ध्व-भाण्डोपरि लघुपुटं दद्यात्। यत उत्थितं तापमसहमानो रसः शीतस्थला-न्वेषी यन्त्राधो लगति। सप्तवारं चैवं पातनं कुर्यात्।

तिर्यक्पातनं च समधान्याम्लयोगेन नष्टपिष्टतां यावत् धान्याम्लेन मर्दि तच्चरसञ्च तिर्यक्पातनयन्त्रलगतस्य, चण्डाग्निना पाकः क्रियते। पाति-

तत्र रसस्य पुनरेवं अभ्रकमेलनेन पातनं त्रिवारं क्रियते। अनेन रसस्याग्निसहता संपद्यते। (पृ - ४६-४८)। एवं पातनेषु ताम्राभ्रकस्थाने शुद्धानां माक्षिकविमलस्वर्णरजतकान्ततीक्ष्णानामन्यतमस्य पादांशेन योगात्पातनं संयुक्ततत्तद्द्रव्यविशेषगुणाधायकत्वेन विशेषतया कीर्त्यते आनन्दकन्दे। रसहृदये रससारेच पातनमेकविधमेव पठ्यते ऊर्ध्वपातनाख्यम्। क्वचिच्च ऊर्ध्वपातनं त्रिवारं अधःपातनं सप्तवारं च करणीयमिति विशेषो दृश्यते। भेषजयोगोपयुक्ता अन्ये च पातनाप्रकारा बहव आनन्दकन्दे (पृ. ३८५) पठ्यन्तेऽन्यत्र च भेषजयोगग्रन्थेषु।

निरोधनम्।

स्वेदनान्मर्दनात्पातनाच्च कदर्थितस्य नष्टवीर्यस्य अत एव पण्डस्य रसस्य वीर्यानयनाय निरोधनं क्रियते। तच्च घटयन्त्रे आप्यायनाख्ये सलवणजलमध्ये रसं निक्षिप्य घटमुखं निरुध्योर्ध्वं लघुपुटनेन स्वेदात्संपाद्यते। तच्च सप्तवारं करणीयम्। सृष्ट्यंबुजाख्यवस्तुद्वययोगेन रोधनं रसहृदयेऽभिधीयते। तत्र सृष्टिर्नाम गोऽजाविमूत्रं नरशुक्रं नारीशोणितञ्चेति त्रयं वा स्त्रीपुंसो. शुक्रयुगलमप्रसूतारजस्तथा वेति मतद्वैविध्यं वर्तते। स्त्रीशुक्रस्य पृथगनुपलभ्यस्य संपादन तु चिन्त्यमेव। अत एव सृष्ट्यंबुजशब्दस्य लवणार्थकत्वं चूडामणिरभिदधाति। रसपद्धतौ तु काचकूप्यां नारिकेलान्तर्वा सलवणजलं रसं निरुध्य भूमौ त्रिदिनं रोधनमेव निरोधनाख्ययाऽभिधीयते। सौषधस्य भाण्डस्य भूमौ निखनितस्योपरि स्वेदः स्वेदनाख्यया, मन्दाग्नियुतचुल्यन्तःक्षेपेण स्वेदः सन्यासारयया च निरोधनस्यान्यौ प्रकाराविमावभिधीयेते परिभाषाध्याये। रससारे चास्य वीर्यानयनं बोधनमिति च सार्थकं नाम दीयते। तत्र च काचकूप्यां सटङ्कणस्य रसस्य निरोधः, भूगर्भे निधानमूर्ध्वं करीषाग्निना पाकः इति निधानं पठ्यते; यच्च रसहृदयव्याख्याता चतुर्भुजमिश्रो नियमनाख्यया वदति। वस्तुतश्चतुर्भुजमिश्रोक्तिश्चिन्त्यैवात्र। नियमन च निरोधभेद एव।

नियमनम्।

स्वेदनद्रवस्य स्वेदने सहोपयोज्यस्य ओषधिकल्कस्य च भिन्नता विशेषः। नियामकं यन्त्रं न यन्त्राध्याये लिख्यते। परं परिभाषाध्याये 'क्रियते यो घटे स्वेदः प्रोक्तं नियमनं हि तत्' इति निर्देशेन घटयन्त्रमेव नियामकयन्त्र

तयाऽभिप्रेतं स्यादिति भाति । रसपद्धतावन्यत्र च घटयन्त्रे स्वेदनमेव नियमनं इति निर्दिश्यते । यथा—

"यद्वा मृण्मयभाजनान्तरगतं पूर्वोक्तवारा रसं
रुद्धा भूवलये तुषानलपुटैरूर्ध्वं नियच्छेद्रसम् ।
भूगे पूरितपूर्ववारिणि रसं निक्षिप्य वस्त्रावृतं
भाण्डे योजितलोहखर्परमुखे चोर्ध्वं पुटे शोधयेत् ॥" इति ।

रससारे तु नियमनमन्यविधमुपदिश्यते । यथा—

रक्तसैन्धवखोटेन (व्योषैश्च) मूषाद्वन्द्वं मकल्पयेत् ।
तत्संपुटे रसं क्षिप्त्वा नवसारं सनिंबुकम् ॥

संपुटस्य प्रयत्नेन लेपयेत्सन्धिमुत्तमाम् ।
वज्रमृत्स्नां समादाय वेष्टयेत्तत्प्रयत्नतः ॥

छायाशुष्कं च तत्कृत्वा भूगर्ते स्थापयेत्ततः ।
अष्टाङ्गुलप्रमाणेन मूषोर्ध्वं तत्र पूरणम् ॥

त्रिसप्तदिनपर्यन्तं करीषाग्निं च कारयेत् ।
दिने दिने प्रकर्तव्या मूषा सैन्धवनूतना ॥

स्वेदयेत्तत्प्रयत्नेन भूगर्भे स्थापयेत्ततः ।
अथवा कूपिकामध्ये सूतं सैन्धवसंयुतम् ॥

भूगर्भे च ततः स्थाप्यमेकविंशद्दिनावधि ।
अयं नियामको नाम्ना महासुखकरो रसे ॥ इति ।

अत्रापि प्रकारमेनं निरोधकाख्यया व्यवहरति चतुर्भुजमिश्रो रसहृदयव्याख्याता इमानेव श्लोकान्पठित्वाऽन्तिमार्धं "अयं निरोधको नाम्ना" इति भिन्नेन पाठेनोदाहरन् । चिन्त्य एव पाठभेदः । रसार्णवे तु रसे स्वर्णं दत्वा मर्दयित्वा नियामकगणेन पिष्ट्वा स्वेदनमुपदिश्यते ।

पातनेन रोधनेन च रसे सञ्जायमानं तारल्यं, स्वाभाविकीं बहुयसहतां धूमगतिं कणिकाबुद्बुदामतां चायमपाकरोति संस्कारः ।

दीपनमनुवासनं च संस्कारद्वयं जारणकर्मणि बहूपकुरुतः। रसस्य जारणीयग्रासग्रहणपाटवं, तज्जरणाय दीपनञ्चाभ्यां संपद्यते। एवं संस्कृतो रसो दीपितो ग्रासं प्रतीक्षते। स्वर्णपुष्प्यादिद्रव्य-

दीपनम्।

कल्केनाम्लगणपिष्टेन साकं मर्दितस्य पारदस्य दोलायन्त्रे स्वर्णपुष्प्यादिद्रवे स्वेदो रसदीपनाय प्रभवति। क्वचिच्च दीपनद्रवे स्वेदमात्रं, क्वचिच्च दीपनद्रवैर्मर्दनमात्रमिति संस्कारव्यापारेषु विशेषोऽभिधीयते। चारणसंस्कारमध्योपदिष्टो मुखीकरणसंस्कारश्च दीपनभेद एव। दीपितस्य रसस्य मृत्पात्रस्थस्य सजंबीररसस्य सप्तदिनानि यावद्धर्मे भावनाऽनुवासना भवति। अयं च दीपन 'एवान्तर्भवति। क्वचिच्च दीपनाख्ययाऽस्यैव 'व्यवहारः। अत एव रसहृदये रसपद्धतौ चास्य पृथग्गणना न क्रियते। प्रतिदिनं भावनाद्रवस्य नूतनस्य दानमावश्यकम्।

अनुवासनम्।

इत्येते नव संस्काराः शोधनार्थाः कीर्त्यन्ते। अथ चैतान्नव संस्कारान्कर्तुमशक्तः स्वेदनमर्दनपातनाख्यैस्त्रिभिः संस्कारैः, अथवा मर्दनपातनाभ्यामेव रसं रसायनयोगेषूपयोगार्हतया शोधयितुं शक्नोति इति प्रकाशयितुमेव, पश्चात् रसायनार्हरससंस्कारविधानकाले (पृ. १३८) विशिष्टरससंस्कारोपदेशकाले (पृ. ३८५) च रसशोधनाय बहवः प्रकारा उपदिश्यन्ते।

अत्र केचिदेवं संशेरते। उक्ते संस्कारनवके, ग्रासग्रहणपाटवसाधकं दीपनमनुवासनं च विनाऽन्ये सप्त रसगतनैसर्गिकौपाधिकयौगिकादिबहुविधदोषापसारणाय क्रियन्ते। तेषां करणे यद्यशक्तिस्तर्हि संस्कारत्रिकेणापि इष्टापूर्तिरभिमतेति प्रागनुमतञ्च। एवमेव क्वचिद्धिङ्गुलाकृष्टं रसं संस्कारनवकसंस्कृतादप्युत्तमतयाऽभिप्रयन्ति केचित्। यथा चानन्दकन्द एव हिंगुलाद्रसाकर्षणविधौ (पृ. ३८६) लघुनैव प्रकारेण रसस्य दोषकञ्चुकवर्जनं उपदिश्यते। रसेन्द्रसारसङ्ग्रहे च—

वेधान्तसंस्कारसिद्धौ स्वेदादिसंस्कारनवकस्य नान्तरीयकतद्विमर्शः।

"अथ वा हिंगुलात्सूतं ग्राह्येत्तन्निगद्यते।"

"फञ्चुकैर्नागवङ्गाद्यैर्निर्मुक्तो रसकर्मणि ॥
विना कर्माष्टकेनैव सूतोऽयं सर्वकर्मकृत् ।"

इति कर्माष्टकेन समकक्षतामारोपितं हिङ्गुलाद्रसाकर्षणविधानम् । परं हिङ्गुलादाकृष्टस्य शुद्धौ योगवाहित्वे च मतभेदोऽपि दरीदृश्यते । यदि हिङ्गुलं कृत्रिमं अशुद्धरसगन्धकयोगमूर्च्छनात्संपाद्यते, तर्हि रसगन्धकगतदोषानपसारणमशक्यसंपादनमिति, कृत्रिमहिङ्गुलाकृष्टस्य दोषकञ्चुकवर्जितता न निश्चिता इति केचनाभिप्रयन्ति । ते हि तदुत्थस्य रसस्य पुनः शोधनमभिमन्यते । खनिजहिङ्गुलादुत्थितस्यैव रसस्य सर्वकर्मकृत्वं शुद्धत्वं चोपदिश्यते न तु कृतकहिंगुलादिति च केचिदत्र समादधते। अन्ये तु रसगतान्सर्वान्दोषानपनेतुं गौरीतेजो गन्धक एक एव शक्नोति इति तत्संयोगेन मूर्च्छितात्वनिजात्कृत्रिमाद्वा हिंगुलादाकृष्टो रसः सर्वथा शुद्ध एवेति विवदन्ति । अपरे तु प्राज्ञमानिनः, उपलभ्यमानमशुद्धमेव रसं शुद्धेन गन्धकेन मूर्च्छित्वा रससिन्दूरविधानेन सिन्दूरितं हिंगुलं संपाद्य पुनस्तस्मात्पातयन्ति रसं अधिकशुद्धिसंपादनसंभावनया । अपरे च नव्यैर्वैज्ञानिकरीत्या द्विधा सप्तधा वा तिर्यक्पातनेन शोधितं, तैः केवलं रसपरमाणुमात्रघटिततयोद्घुष्यमाणं पारदं दोषकञ्चुकवर्जितं स्वीकुर्वन्ति, गुणाधानाय योगानुसारेण दीपनमनुवासनं वा समाचरन्ति । कुत्रचिच्च भेषजयोगग्रन्थेषु रसपुष्पात्तथा रसकर्पूराच्च हिंगुलाकृष्टविधानेनोद्धियमाणो रसोऽनल्पवीर्यतया तीक्ष्णतया च क्वचनोत्तमभेषजयोगेषु ग्राह्यतयोपदिश्यते ।

अत्र चिन्त्यमेतत् । एवं बहुभिः प्रकारैः साध्यमानो रसः किमु एकगुण एव ? किमु तत्र दोषशुद्धिरेकप्रकारिका ? किमु ते सर्वे रसाः समानाः वीर्ये दोषराहित्ये वेधरसायनबन्धाद्युपयोगित्वे च ? अल्पसंख्याकै रससंस्कारैः सिद्धे रसे सर्वफलदे सर्वकर्मकरणयोग्ये च सुतो वा बहुसाधनसंपदेकसाध्ये बहुतरश्रमदे सकारनवकेऽभिमानः ? इति ।

अत्र ब्रूमः । विषयमिमं द्वेधा विभजामः । रसशोधनं रससंस्कार इति च । उभावपि भिन्नप्रस्थानौ । रसशोधनं तु अन्यलोहोपरसादिवद्रसस्य तद्गतदोषापनुत्त्यर्थं क्रियते । तदधिकृत्य भूयानुपदेशग्रामो नव्य-

ग्रन्थेषु क्वचिच्च प्राचीनेषु ग्रन्थेषूपलभ्यते । सुलभास्सुकराश्च मार्गा उप-दिश्यन्ते। रससंस्कारस्तु प्रस्थानमन्यदेव । संस्कारशब्दश्च तत्रैवोपयुज्यते यत्र न केवलं बाह्या शुद्धिरिष्यते, परमन्तरात्मनि गुणाधानमपि चौलो-पनयनादिवत्। अत्र न केवलया बाह्यशुद्धया अभीप्सितोऽर्थः सेत्स्यति। अतः संस्काराणां बहुविधानां आचार्योपदिष्टमार्गेणैवानुष्ठानं फलदं स्यात्, यत्र विचिकित्सा निरर्थिका। सिद्धार्योपबृंहणतयैव हि तत्र गवेषणा फलं दद्यात्। यत्र योगे शुद्धस्य रसस्य दानमुपदिश्यते, तत्र पूर्वोक्तेन लघुना प्रकारेण शोधितस्य रसस्य दानं न दोषाय। यदि तत्रैव संस्कृतो रसो दीयेत, गुणानल्पता सिद्धयेत्। यत्र संस्कृतस्यैव दानमिष्यते तत्र लघु-प्रकारशोधितरसदाने न सिसाधयिषितार्थसिद्धिः। अत एव वेधान्तसंस्कार प्रतिपादकेषु तन्त्रेषु संस्कारनवकमधिकृत्योपदेशः पूर्णो दृश्यते। यत्र केवलं भेषजयोगा उपदिश्यन्ते, तत्र शोधनप्रकाराः क्वचिन्नैवोपदिश्यन्ते-ऽल्पश्रमसाध्याः। इति समाधिः। वस्तुतः स्वेदादीनाममीषां नवानां संस्काराणामुत्तमगुणाधायकता युक्तियुक्तैवेति तत्त्वविदोऽभ्युपगच्छेयुरेव।

हिङ्गुलोद्धृतस्यापि रसस्य यदि वेधान्तकर्मण्युपयोग इष्यते तर्हि स्वेदाद्या नव संस्काराः करणीया एवेत्यत्र न सन्देहः। केवलपातनेन तादृशस्य गुणाधानस्यासंभाव्यमानत्वात्। कृते संस्कारनवके स रसो न केवलं वेधे, योगेषु चाचिन्त्यप्रभावो विलसेदेव। नव्यैर्वैज्ञानिकैः पातनेन सर्वशुद्धतयाऽभिमते पारदेऽपि कामं रसतन्त्रख्याता नागवङ्गौपाधिका दोषाः नश्यन्तु नाम; नैसर्गिकास्तु नैवापेयुरिति तस्य स्वेदाद्या. शुद्धि-प्रकाराः करणीया एव। हिंगुलोत्थिते रसेऽपि समानोऽयं न्यायः। अन्यच्च, रसकर्पूरात्, रसपुष्पात्, हिंगुलाद्वा संपन्नो रसो नैकगुणो भवितुमर्हति। गन्धकलवणादिविविधमूर्च्छनोपयोगिद्रव्यसंपर्कवशादाहितानां गुणभेदाना-मनिवार्यत्वात्। कदाचिन्नव्यवैज्ञानिकरीत्या विविधविभिन्नखनिजेभ्यो युक्त्या पातितो रसो रसाणुमात्रघटित इति न तद्रीत्या भूयान्विभेदो द्रव्ये संभाव्येत। परं संपर्कवशादाधीयमानो गुणभेदो रसगतो नापलपितुं शक्यते। योगानुसारेण तेषामुपयोगनिर्देशो, न तु सर्वत्र सर्वस्य। अत एव रस-तन्त्रेषु मुख्यतया रसंग्रहणाय, केवलरसखनिं दर्दुराख्यं रससिन्दूरं हिंगुलं वा श्रेष्ठं उपदिशन्ति। अथवा यदि रसमूलखनिपरिज्ञानमसंभवि, तर्हि

संस्काराष्टककरणं विना वेधोपयोगिता, स्वेदनपालनमर्दनाद्यान्विना योगोपयोगितया रसशुद्धिर्वा न संभवेदित्यध्यवसेयम्।

अथानुवासनान्तसंस्कारसंसिद्धे रसेऽभ्रकाद्या धातुलोहोपरसादयः चार्यन्ते जार्यन्ते च ग्रासात्मकतया। तेषां ग्रासात्मकानामभ्रकादीनां ग्रहणाय रसे मुखमुत्पाद्यते। तच्च मुखीकरणं दीपनभेदं चारणं जारणं च। संस्कारः, गन्धकस्येष्टकायन्त्रे रसे जारणेन, रसेन साकं भूनागस्य पुटनेन, दीपनतया दोलास्वेदेन, गन्धकाभ्रकयोरिष्टकायन्त्रेण जारणेन वा संपाद्यते। एवं मुखीकृते रसे चारणं समुखचारणमित्यभिधीयते। गन्धकस्य तुलायन्त्रे जारणेन रसे वासनामुखता संपद्यते, यत्रिमश्चारणं वासनामुखचारणमित्यभिधीयते विशेषेण। विनाऽपि मुखीकरणं चञ्चैकान्तभस्मसहितस्य रसस्य दिव्यौषधीभिः पेषणेन ग्रासग्रहणपाटवं संपाद्यते। एवं निर्मुखे चारणं निर्मुखचारणमित्यभिधीयते। एवं समुखनिर्मुखवासनामुखात्मना चारणीयो रसस्त्रेधाऽभिधीयते। [पृ. ५० ५३] रसे गन्धकस्य तुलायन्त्रे जारणेन जायमाना वासनामुखताऽपि समुखितायां अभिन्ना इति प्रायोऽन्येषु ग्रन्थेषु नास्याः पृथगुपदेशः। एवं रसे मुखीकरणाय च बहव प्रकारभेदा उपदिष्टा अन्यत्रोपलभ्यन्ते।

रसे अभ्रकं, गन्धक कान्तसत्त्वं तीक्ष्णं, द्रवन्ति बीजानि, पक्वबीजानि, रञ्जकबीजानि सारणबीजानि— इत्येतानि जार्यन्ते रसस्य बलाधानाय रागग्रहणाय वेधपाटवसिद्धये च। एतेषु कस्यचिद्बलाधाने, कस्यचित्स्थिररागग्रहणे, कस्यचिद्वेध इत्येवं विशिष्य प्रतिद्रव्यं शक्तिं निर्दिशन्त्याचार्याः। तेषां चारणे जारणे च क्रम एषोऽनुसन्धीयते। तत्र प्रथममभ्रकचारणा निर्दिश्यते।

चारणीयोऽभ्रको प्रथममभिषेकाख्येन संस्कारेण संस्कार्यः। [पृ. ५३] संशुद्धे द्रुते च गन्धके शुद्धमभ्रकं समांशं दत्वा विमर्द्य पिष्टीकुर्यात्।

चारणक्रमः।

दशनिष्कके चारणीये रसे द्विनिष्कमितं गन्धकाभ्रकपिष्टिं दत्वा मर्दयित्वा, तदुपरि हेमकर्मणि लक्ष्ये नागपिष्टया, रजतकर्मणि वङ्गपिष्टया, देहसिद्धौ ताम्रपिष्टया च वेष्टयेत्। तां पिष्टिं विद्रुते गन्धे दिवसत्रयं विमर्दयेत्।

एष तु गर्भक्रमनामकः प्रकारः। दीपिकायन्त्रेण पुनरधः पातितं पिष्टीगतं रसं, पूर्ववद्गन्धाभ्रकपिष्ट्या सह त्रिमर्द्य त्रिद्रुते गन्धे दिनत्रयं त्रिपचेत्। एष तु पिष्टीक्रमनामकः प्रकारः। ततो दीपिकायन्त्रे पुनरधः पातितं रसं, चारणीयमभिषिक्तं रसाच्चतुष्पष्टितमांशं अभ्रकं च दिनं दिव्यौषधैर्विमर्द्य चारणायन्त्रे चषकस्वरूपे जंबीररसान्विते निधाय दिनमेकमातपे तीव्रे स्थापयेत्। अयं च ग्रासक्रमः। एवं गर्भपिष्टीग्रासक्रमात्मकावस्थात्रय-निर्वर्त्यं चारणम्।

एव चारिताभ्रकं सूतं त्रिक्षारपञ्चलवणभूखगाम्लवेतसैः रसषोडशांशैः सह जंबीरवारिणा याममात्रं विमर्द्य विडान्विते कच्छपयन्त्रे निक्षिप्य दिनमेकं त्रिपचेत्। तेन रसो जीर्णग्रासो भवति।

जारणम्। जीर्णाद्ग्रासाच्छिष्टं मलभूत किट्टमपाकर्तुं, इष्टिकागृहधूम सैन्धवान् रसषोडशांशान् दत्वाऽम्लवर्गेण मर्दयित्वा प्रक्षाल्य वस्त्रेण शोषयेत्। एवं जीर्णे ग्रासे पुनर्ग्रासग्रहणाय पिण्डीभूतं त रसं वस्त्रे पोट्टलीकृत्याम्लवर्गेण भरिते भाण्डे दोलायन्त्रे स्वेदयेत्। यदि वस्त्रेण गालितेऽजीर्णो ग्रासो दृश्यते, पुनः कच्छपयन्त्रे रसस्य पाक इष्यते। एवं चारितस्याभ्रकस्य जारण संपद्यते।

एवं चतुष्पष्टितमांशेऽभ्रके जीर्णे, पुनर्द्वात्रिंशतांशेनाभ्रकग्रासश्चार्यते जार्यते च। एवं पुनः षोडशांशेनाष्टमांशेन चतुर्थांशेनार्धांशेन च ग्रासस्य चारणा जारणा निर्वर्त्यते। ततश्च क्रमेण रसात् द्विगुण चतुर्गुणाष्टगुण षोडशगुण द्वात्रिंशद्गुण चतु-

अभ्रकग्रास-प्रमाणम्। ष्पष्टिगुणाभ्रकस्य चारणा जारणा च निर्वर्त्यते। चतु-ष्पष्टितमांशेऽभ्रके जीर्णे रसो दण्डधरो भवति, वस्त्रान्न क्षरति च। द्वात्रिंशांशे तु जलौकाभः, षोडशांशे काकविष्ठातुल्यः, अष्टमांशे दधितुल्यः, चतुर्थांशे नवनीतसम. द्वितीयांशे गोलामश्च भवति। जीर्णस्याभ्रकस्य सितपीतासिताद्विवर्णभेदे रसेऽपि तद्वर्णसङ्क्रान्तिर्भवति।

एवं गन्धकस्याभ्रकस्य चारणेन जारणेन च रसस्य उत्पतनशीलता अग्नितापसहिष्णुता गौरव चापाक्रियते। रसो रागग्राही लघुर्निर्दुष्टश्च जायते। जारणीयेषु अभ्रकाद्भ्रकसत्व वरीयः तदभावे कान्तसत्वं तीक्ष्णं

वा जारणीयम्। तदपेक्षया द्वन्द्वानि ततः पक्वबीजानि बीजानि च। जारणाक्रमस्तु पूर्वोक्त एव।

एवं जीर्णे मासे प्रतिमासं शिलारुचकमाक्षिकादिना सह चणकाम्लेन मर्दितं रसं अपामार्गादिक्वाथेन लिप्तायां मूषायां निक्षिप्य रुध्वा स्वेदयेत्, येन गर्भस्थो मासो द्रुतो विलीनो रसमयो

गर्भद्रुतिः वाह्यद्रुतिश्च। भवति। य एष गर्भद्रुतिनामकसंस्कारः। (पृ. ८६) अथवा जारणीयानां बीजानां— यथा गर्भद्रुतिः सुकरा भवेत्तथा जारणापूर्वमेव संस्कारः कर्तुं शक्यते। [पृ. ८३-८४] अथवा. जारणीयानभ्रकस्वर्णरत्नादीन्बहिरेव द्रवीकृत्य द्रुतानामेव तेषां जारणा कर्तुं शक्यते। पृथग्वा द्रुतीनां मेलनेन द्वन्द्वीकृत्य वा। [पृ. ८७-८८]।

एवं चारण जारणं गर्भद्रुतिः वाह्यद्रुतिश्चेति चत्वारः संस्कारा व्याख्याताः।

विशेषश्चात्र। जारणा द्विविधाऽभिधीयते बालजारणा वृद्धजारणा चेति। वृद्धजारणा च बद्धजारणेत्यप्यभिधीयते यतो बद्धस्यैव रसस्य जारणा तत्र प्रकीर्त्यते। बालजारणा चाबद्धस्यैव रसस्य क्रियते। जारणे च द्वेधा क्रमोऽनुसन्धीयते।

"गगनं जारयेत्पूर्वं सर्वसत्वान्यतः परम्।
द्वन्द्वानि सर्वलोहानि पक्वबीजानि भैरवि!।
पद्मरागादि रत्नानि जारयेच्च यथाक्रमम्॥" [पृ. ६०]

इति कश्चन क्रमोऽनुसन्धीयते। पश्चाच्च

"गन्धकं जारयेदादौ सर्वसत्वान्यतः परम्।
ततः सर्वाणि लोहानि द्वन्द्वानि विविधानि च।
पक्वबीजानि रत्नानि द्रुतिसत्वे च जारयेत्॥" [पृ. १०४]

इति च कश्चन क्रमो विधीयते। पूर्वत्र गगनजारणा प्रथमं क्रियते, उत्तरत्र तु गन्धकजारणा प्रथममित्यनयोर्भेदः। अत्र च रसकामधेनुकारो-

ऽमुमेव सन्दर्भमुदाहरन्, पूर्वतनस्य क्रमस्य बालजारणापरत्वेन उत्तरतनस्य च वृद्धजारणापरत्वेन च समन्वयमभिलषति। विमर्शयोग्योऽयं विषय ।

जारणाया अन्यत् भेदकमुपाविद्वयमपि वर्ण्यते— अभ्रकादिबीजाना जारणेन बीजे रञ्जनेन च साध्या जारणा भूचरीति रत्नजारणाया रञ्जकरत्नबीजजारणेन च साध्या खेचरीति च।

रसेऽभ्रकादीना ग्रासचारणात्पर चारितमभ्रकादिक गालनेन न पृथक्कर्तुं शक्यते। परं पातनेन प्रथक्करण शक्यसपादमेव। जारणे च सपन्ने ग्रस्त वस्तु पातनेनापि न प्रथक्कर्तुं शक्यते। गर्भद्रुत्या द्रुते ग्रासे जीर्णग्रासप्रयुक्तमानाधिक्यमपि न सभवति।

जारणस्य चेदं लक्षण रसेन्द्रचिन्तामणौ पढयते। 'जारणा नाम गालनपातनव्यतिरेकेण घनहेमादिग्रासपूर्वकपूर्वावस्थाप्रतिप-नत्व' इति। आयुर्वेदप्रकाशकारेण तदेव लक्षणं व्याकुर्वता च जारणास्वरूपमित्थमभि धीयते— जारणा हि नाम गालनपातनव्यतिरेकेण ग्रस्तघनहेमादिरसस्य पूर्वावस्थाप्रतिपन्नत्वं' इति। अर्थाच्च वस्त्रपावनेन, ऊर्ध्वाधस्तिर्यक्पातनेन वा जीर्णस्याभ्रकादे पृथक्करण न शक्यते। न तावताऽपि समीहितार्थलाभ। जीर्णस्य द्रव्यस्य मानमपि नाधिकतयोपलभ्येत। अत एवोच्यते आयुर्वेद-प्रकाशे—

"अधिकस्तोलितश्चेत्स्यात्पुन स्वेद्य समावधि" रिति।

यथा बहु मिष्ट भुक्तवतो भुक्ते जीर्णे न स्वाभाविकमानवृद्धिरुपलभ्यते। परिभाषाध्याये च—

'ग्रास पिण्ड परिणामस्तिस्रश्चाख्या परा पुन'

इति प्रतिपादिताश्च त्रयो भेदा— ग्रासश्चारण, पिण्ड गर्भद्रुत्या रस मयतापादन, परिणाम ग्रस्तघनहेमादीना पृथक्करणानर्हतया रसात्म-कतापादन— इत्यर्थकतया व्याख्येया।

जारणा च पुनर्द्विविधा भेषजयोगोपयोगिनी वेधोपयोगिनी चेति। भेषजयोगोपयोगिनी च मूर्च्छित्वा हरति रुजमित्यादिन्यायानुसारेण केवल रोगहननेच्छया क्वचिच्च रसायनेच्छया गन्धतालमहाशिलास्वर्णरजतादीना

जारणेन संपाद्यते। सा च मूर्च्छनाधिकारे (पृ. ४०५) जारितरसमारण-विधानाधिकारे (पृ. १४१) च प्रपञ्च्यते। वेधोपयोगिनी तु पूर्वमेव प्रपञ्चिता।

चारणीया जारणीयाश्चात्र महारसोपरसादयः शुद्धा एव स्वीकार्याः। अन्यथाऽव्यापकः पतङ्गो रसायने वेधे वा नोपयोगी भवति। अभ्रकादभ्रकसत्वस्य तस्मादभ्रकद्रुतेः, ततो द्वन्द्वस्य बीजानां चोत्तमता स्मर्यते। अभ्रकादीनां चतुष्पष्टितमांशादारभ्य समांशपर्यन्तं चारणं जारणं च वेधपाटवसिद्धये चावश्यकत्वेन कीर्त्यते। ततो यथेच्छं शतसहस्रलक्ष-नियुतकोटिवेधादिमभीप्सितफलानुसारेण द्विगुणादि चतुष्पष्टिगुणावधि चारणं जारणं चोपदिश्यते। (पृ. १०३)

अभ्रकसत्वस्य च रसेन मेलनार्थं माक्षिकसयोगोऽतीवोपकारको भवति। अत एव केवलाभ्रकजारणाद्द्वन्द्वजारणाया वरीयस्त्वं प्रत्याप्यते। यतो द्वन्द्वानि अभ्रकस्य हेम-रजत-वङ्ग-नाग-ताम्र-तीक्ष्णायलोह-षट्केन सार्धं, ताप्य रसक सस्यक-शिला-ताळकादि- त्रिविधारिवर्गमेलना दभ्रकेन संपाद्यते। माक्षिकाद्यरिवर्गमेलनाद्रसे गर्भद्रुतिः सुकरा भवति। (पृ. ६२)।

द्वन्द्वीभूतानां चाभिषेको हेमकर्मणि नागद्वये रजतकर्मणि वङ्गद्वये च विधीयते। देहवेधे च नाग अभिषेको युक्तः शुद्धे रसे पुनर्नाग-वङ्गजौपाधिकदोषसम्भवात् इति रसहृदयकार आहेते।

अथ बीजानां स्वरूपनिवरणं क्रियते। बीजेषु त्रिशिष्य हेमबीजं रजत-बीजं च प्रधाने। अत्र च स्वर्णेन रजतेन वा संयोजितानामन्येषां महारसोपरसादीनां माक्षिकरसकादियोगेन ध्मानात्स्वर्णरजतावशेषं यथा-इतरेषां क्षयापादन संपाद्यते। द्वन्द्वेषु तु केवलं मेलनमात्रम्। अतो द्वन्द्वापेक्षया बीजानामुत्तमता रागेषु निरूप्यते। एतानि बीजानि हेमबीज रजतबीजं वङ्गबीज नागबीजं चेति चतुर्धा कथ्यन्ते। तत्र वङ्गनागबीजे तारकनकबीजयोरन्तर्हित एव। यतो नागे वङ्गे वाऽभ्रकरसकादीनां निर्वहणेन ध्मानान्नागे वङ्गे वाऽवशिष्टे तयोः स्वर्णे रजते वा यथायोगं निर्वहण स्वर्णरजतावशेषतया क्रियते। पर नागवङ्गसंयोगान्न तयोर्बीजयो-

रसायनोपयोगिता पर लोहवेधमात्रे उपयोग इति विशेषदर्शनार्थं नामभेद । [पृ ७६]

काष्ठौषध्यो नागे वङ्गेऽथ वङ्गमपि शुल्वे ।
शुल्व तारे तार कनके कनक च लीयते सूते ॥

इति गोविन्दभगवत्पादोपदिष्टरीत्या सर्वेषा धातूपधातूना हेम्नि निर्वहणेन विलयन सपाद्यतेऽनेन बीजविधानेन । तादृश च हेमबीज रसे जार्यते इति महान्गुणोऽनन रसस्य सपद्यते ।

रसस्य धूम चिटिचिटि-मण्डूकगति सकपारयाश्चतस्रोऽवस्था बीज-जारणान्तेन रससस्कारेणापयाति । रसो निष्कम्पो भवति ।

रसहृदये जारणाक्रमस्त्वित्थ वर्ण्यते । चारितग्रास रसं लवणक्षाराम्ल-सुरभिमूत्रकृतलेपे वस्त्रे भूर्जपत्रान्तर्निक्षिप्य दोला बध्वा सौवीरक्षारजल मूत्रान्यतमद्रवैरापूरिते कुभे दोलायन्त्रे पचेत् येन

जारणे ग्रन्थान्तर सवाद । चारितो ग्रासो जायते । तत उद्धृत्योष्णेन काञ्जिकेन प्रक्षाल्य, वस्त्रेण गालयित्वा तद्भृतजलाशशोषणायोष्णे लोहपात्रे दत्वा मर्दयेत् । पश्चाच्च चतुर्गुणेन वस्त्रेण पीडयेद्गालयेच्च । यद्यजीर्णो ग्रासो वस्त्रगालनेन प्रथग्भूतोऽस्तो लक्ष्येत तर्हि जीर्णग्रासप्रमाणाज्ञानात्पातनग्यन्त्रे पातयेत् । येनाजीर्णो ग्रास प्रथक्क्रियेत ।

अनेन क्रमेण चतुष्पष्टितम चत्वारिंशत्तम त्रिंशत्तम विंशतितमाशान् यावच्चतुरो ग्रासान् दोलायन्त्रे जारयेत् । तत षोडशाशप्रभृति अर्धांशपर्यन्त ग्रास कच्छपे यन्त्रे जारयेत् । षोडशाशादारभ्य विना गर्भद्रुतिं ग्रास-चारण न साधयितुं शक्यते । यत षोडशांशे जीर्णमात्र एव कठिनो रस छुरिक्या विच्छिद्य पृथक्कर्तव्यो भवति । गर्भद्रुत्या द्रुते द्रव्ये वस्त्रगालने नानयशिष्टे ग्रास समरसता यातमनगन्छेदिति ।

रससारे तु जारणाक्रमोऽन्यविध उपदिश्यते । रसे चतुष्पष्टितमाश ग्रास द्वात्रिंशाश क्षाराम्लगिडादिक च दत्वा, टङ्कणह्यग्रालादिद्रावकद्रव्य सहितं त रस यामद्वय तप्ते खल्वे विमर्दयेत् । येन ग्रासो द्रुतो रसेन

संमिलितो भवेत्। ततः सोमानले यन्त्रे स्वेदयन्त्रे दोलायन्त्रे वा स्वेदनेन ग्रासो जीर्यते।

एवं चतुष्पष्टितमांशतो द्वौ ग्रासौ, चत्वारिंशांशेन चत्वारो ग्रासाः, त्रिंशांशकेन षट्, विंशांशकेनाष्टौ इति चतुर्विधा ग्रासाः स्वेदयन्त्रे जार्यन्ते; षोडशांशेन दश ग्रासाश्चक्रयन्त्रे कच्छपे वा; द्वादशांशेन दश स्थलकच्छपे चक्रयन्त्रे वालुकायन्त्रे कूपीयन्त्रे वा; अष्टमांशेन नव जलकूर्मे स्थलकूर्मे वा; पादांशेन षोडश मूषायन्त्रे पुटेन च इत्येवं ग्रासमानानुसारेण जारणप्रकारेषु भेदो निरूप्यते रससारे। अनेन क्रमेणाभ्रकादीनां जारणा यावन्मानेनापेक्ष्यते तावत्साधयितुं शक्यते।

जारणायामुपयुज्यमानानां धातूपधातुरत्नादीनां जारणवशाद्रसे दृश्यमाना विभिन्ना विशेषा निरूप्यन्ते रससारे। नागजारणाद्रसे स्नेहो जायते, अभ्रकजारणाद्रसस्य बल पक्षच्छेदश्च, तीक्ष्णजारणेन रागः, ताम्रजारणेन स्नेहबलरागाश्चेति। एवं नागेन जारितः सूतः खोटभावं द्रुतं याति, लोहतां च परित्यजति।

जारितबीजवशाद्विधे च विशेष एवं लक्ष्यते। यदि कठिनानि बीजानि जार्यन्ते तर्हि नागं वङ्गं च वेधयितुं प्रभवति रसः। मृदुषु बीजेषु जीर्णेषु आरं शुल्वं च विध्यति। रागाधिकेषु बीजेषु जीर्णेषु तारं विध्यति स्वर्णतया परिणमयति च। रसोपरत्नादयो मौक्तिकवज्रादीनि रत्नानि श्वेतानि यदि जार्यन्ते तर्हि तस्य रसस्य तारकर्मण्युपयोग उपदिश्यते। एवं तत्र तत्र खोटबन्धरञ्जनादिबहुविधसंस्कारविशेषोपकारका जारणभेदा उपदिश्यन्ते।

द्वेधा रञ्जनमुपदिश्यते रक्तरञ्जनं श्वेतरञ्जनं चेति। रक्तरञ्जनं हेमकर्मणि, श्वेतरञ्जनं रजतकर्मणि चोपयुज्यते। हेमकर्मणि नागबीजं, रजतकर्मणि वङ्गबीजं च रञ्जनविधानेन रञ्जयित्वा, रञ्जितस्य बीजस्य रसे चतुष्पष्टितमांशमारभ्य षड्गुणं यावज्जारणेन रसे राग आधीयते। रसरञ्जकबीजयोगा नैकेऽभिधीयन्ते।

रञ्जनम्।

रससारे तु रंगाकृष्टिविधानं नाम पृथक् रञ्जकवस्तुनिर्माणविधिरभिधीयते— यश्चासौ च परिशिष्टे [पृ ६९६] प्रदीयते। रङ्गाकृष्टिविधानेन

गन्धकविद्रुमादीनां रागमाकृष्य, तेन रागेण शतवारं सहस्रवारं वा यथा-योगं जारणेन रसस्य नियतरागतासिद्धिर्भवतीति प्रपञ्च्यते रससारे। रागस्वरूपविज्ञानं, खनिजेभ्यो वस्तुभ्यः स्थिराणां रागाणां प्राप्तिः, अख-निजेभ्यः खनिजानां रञ्जनसाधनानां रागस्थिरीभावे श्रेष्ठता इत्यादि विषय-जातं हिमवत्पर्यन्तवासिभ्यो बौद्धेभ्योऽवगतं प्रथमत इत्यत्र रससारगतो रञ्जाकृष्टिविधिः प्रमाणीभवति। आधुनिकाश्चैतिहासिका भारते स्थिर-रञ्जनसाधनपरिचये बौद्धानेवाग्रगण्यानभिमन्वते।

अभ्रकादीनां रञ्जितबीजानां जारणेन रसे जायमाना गुणभेदा एवं निरूप्यन्ते। कृष्णाभ्रके जीर्णे कृष्णां छायां प्राप्नोति रसः। एवं सिताभ्रके सितां, पीते पीतां, रक्ते रक्तां चेति जारितवस्त्वनुरूपिणी छाया रसे संपद्यते। ताम्रजारणे तीक्ष्णजारणे च रसरक्तिः स्थिरा भवति. रसश्च रागं शीघ्रं गृह्णाति। अतः तीक्ष्णताम्रयोरेकत्र मिलितयोः पृथग्वा रक्तरञ्जनविधिना रञ्जितयोः जारणं रसे स्थिररागसिद्धये प्रभवति। उपरसेषु च, रञ्जिते गन्धके जीर्णे रागो बहिःप्रदेशमालक्ष्यापी भवति; मनःशिलातालकजस्तु रागश्चञ्चलो भवति; माक्षिकसत्वेन रसकसत्वेन वा जायमानो रागः स्थिरत्वाच्छ्रेष्ठतया गण्यते।

एवं जारणेन बन्धं प्राप्ते रसे, देहलोहवेधसिद्धये सर्वत्र प्रसृमरशक्ति-संपादनाय सारणा क्रियते। सारणायें साधनतया विशिष्टं वज्रबीजविधानं सारणोपयोगितैलविधानञ्चोपदिश्यते। [पृ. ९२.]

सारणा। गोस्तन्याकारान्धमूषा अन्या च नालमूषेति मूषाद्वयं सारणायन्त्राख्यया व्यवह्रियते। (पृ. ५१५)

गोस्तन्याकारायां मूषायां रसं ससारणातैलं निक्षिप्य, नालमूषायां बीजं द्रावयित्वाऽस्मिन् ढालयेत्। ततश्चोद्धृत्य जारणाविधानेन पुनर्जारयेत् इति सारणायाः क्रमः। अत्र बीजस्य रसाच्चतुष्पष्टितमांशादारभ्य षड्गुणं यावत्प्रक्षेपः क्रमेण विधीयते।

रसहृदये तु विशेष एवमभिधीयते सारणाविधौ। सतैले रसे द्रुतस्या-युष्मत्र बीजस्य सद्य एव निवापादुच्छलनं भवेदिति भिया सद्य एव

सारणातैलसिक्तेन पटेन रसस्योपर्याच्छादनं विधीयते। प्रकारान्तरमपि सुकरं तत्रैवोपदिश्यते— यत् धत्तूरकुसुमाकारायां मूषायां सतैलं रस निक्षिप्य, तस्या मूषाया अन्तरन्यां तादृशीं तन्वीं मूषां साधस्थिद्रां सुपिधेयां निक्षिप्य, तस्या मध्ये द्रुत वीजं ढालयेत्, तैलाद्रपटेनाच्छादयेच्चेति।

रससारे तु सारणायन्त्रविधानमेवमुपदिश्यते—

"मूषोर्ध्वं सपुटं कृत्वा सन्धिलेपं च कारयेत्।
सच्छिद्रे सपुटे नालमुन्मत्तकुसुमप्रभम्॥
अतियत्नेन तां मूषां करीषाग्नौ निधापयेत्।
हेमरक्तसमं नागं गालयित्वा विचक्षणः॥
मूषानाले विनिक्षिप्तं इत्थं सरति सूतकः।
ससारं प्रकर्तव्यं सारणं च महारसे॥" इति।

क्वचिच्च वीजजारणकालेऽरुणसितरञ्जनोपयोगितया नागपङ्कयोरपि दानमुपदिश्यते।

प्रतिसारणं अनुसारणे च।

सारणस्यैव द्विवारं करणं प्रतिसारणं इति, त्रिवारं करणं अनुसारणमिति च व्यपदेश आनन्दकन्दे दृश्यते। अन्यत्र रसहृदयादौ द्विगुणवीजजारणेन प्रतिसारणमिति, त्रिगुणवीजजारणेनानुसारणमिति च व्यपदेशो भूयसा दृश्यते। प्रतिसारणेऽनुसारणे च कृते कच्छपयन्त्रादौ जारणं कार्यमेव। सारणाकाले सारणायन्त्रस्य ससारणातैलरसस्य वीजक्षेपात्पूर्वं करीषाग्नौ तापः कार्यः सारणायासुकरतासिद्धये।

शृङ्खलिकाक्रमः।

शृङ्खलिका नाम कश्चन व्यपदेशः— एकवारं सारणं, सारितवीजस्य जारणमिति सारणजारणाख्यक्रियासमुच्चयस्य निर्देशकः प्रयुज्यते तत्र तत्र। अनेन क्रमेण दशशृङ्खलिकाविधानमिति [पृ. ४४५] सप्तशृङ्खलिकाविधानमिति च प्रयोगा बहवो रसतन्त्रेषु दृश्यन्ते। शृङ्खलिकाया अपरं नाम सङ्खलिकेति। शृङ्खलिकाविधाने कश्चन कश्चिद् प्रकारभेदो रसहृदये दृश्यते।

तत्र प्रथमं सारणा ततः प्रतिसारणा ततोऽनुसारणा एवं पुनरनुसारितस्य सारणा प्रतिसारणाऽनुसारणा च, एवं पुनः सारणा प्रतिसारणाऽनुसारणा चेति त्रिः सारणात्रयस्य कल्पनान्नवशृङ्खलिकाविधिः वेधे शतसहस्रायुत-कोटयादिवेधोपयोगी विधीयते सारणाववोधे। प्रतिसारणाभेदं च जारणा करणीया। शृङ्खलिकाश्च रसस्य वेधे सामर्थ्यमभिवर्धयन्ति।

सारणानन्तरं मुखवन्धः रसस्य खोटवन्धश्च विधीयते। [पृ ९३] वालजारणायां खोटवन्धः सारणानन्तरं क्रियते, वृद्ध (वद्ध) जारणायां तु जारणातः पूर्वमेवेत्ययं विशेषः। [पृ. ४४३] वद्ध-

वन्धः। जारणोपयोगिनो वन्धविशेषास्तु अमृतीकरणविश्रान्तौ त्रयोविंशचतुर्विंशोल्लासयोः कीर्त्यन्ते। रसस्य खोटत्व-सिद्धौ वेधोपयोगिता भवति॥

वेधश्च द्विविधो लोहवेधो देहवेधश्चेति। तत्र लोहवेधः देहवेधार्थं सिद्धस्य रसस्य सिद्धिसौष्ठवं परीक्षितुं प्रवर्तितोऽपि, देहवेधानुपयोगितया लोहवेधमात्रसाधकतया च रसतन्त्रप्रवर्तकैः वहुधा-

वेधः। ऽऽविष्कृतः। आनन्दकन्दे तु तस्य लोहवेधमात्रोपयो-गितयोपदेशोऽत्यल्प एव। उपदिष्टाश्च लोहवेधोपयो-गिनो योगाः देहवेधसिद्धिपरीक्षार्थका एव।

प्रतिक्षणं शीर्यते नश्यति इति शरीरमिति पदविदः। शरीरगताः अणुशो विभिन्नास्सर्वे भावा नश्वराः, प्रतिक्षणं नश्यन्ति। आपूर्यते च शरीरं प्रतिक्षणं नवनवतयोत्पद्यमानैर्भावैः। तदेत-

वेधसिद्धिस्वरूपम् ज्जीवनं नाम। तदिदं न स्थूलदृशां प्रत्यक्षम्। यदा शारीरभावनाश आपूर्यमाणापेक्षयाऽधिको भवति तदा जरा मरणं चान्ततः; यदा न्यूनो भवति तदा पुष्टियौँवनं च भवति। अजरामरणं हि शरीरं सपाद्यं जीवन्मुक्तिमभीप्सता। ततः शारीराणां अणु-मात्राणां सर्वेषां भावानां विशरणं यथा न भवति तथा प्रवृत्तिः कार्या मुमुक्षुणा। ततश्च प्रत्यणु विशरणविघटनं कर्तव्यमापतति। न हि क्वचिच्छरीरैकदेशे विशरणविघटने पिण्डस्थैर्यं संपद्येत। प्रत्यणुविशरण-विघटनं च तदैव संपद्यते, यदा शरीरघटकानामणूनां स्वभावनियतो

विशरणस्वभावो विहन्येत, स्वभाव एव विपरिणम्येत । तादृशाणु-स्वभावविपर्यास एव वेधान्तानां संस्काराणां परमं लक्ष्यम् ।

लोहवेधे च सिद्धिरीदृश्येव । प्रतिलोहं लोहस्वरूपगुणघटकानां लोह-परमाणूनां स्वभावो नियतसिद्धः । अतो लोहस्य लोहान्तरतापत्तिः न संभाव्यते । जघन्यास्ताम्रवङ्गनागादयो लोहाः स्वर्णापेक्षया नश्वरस्वभावाः । अत एव स्वर्णमनर्घं भवति । ताम्रवङ्गादीनां स्वर्णाद्युत्तमलोहता तदैव संभवेत्, यदैतल्लोहघटकानां परमाणूनां स्वरूपगुणपरिवर्तनं संपद्येत । स्वरूपपरिवर्तनं च क्वचिदेकदेशे संपद्यमानं न फलाय कल्पेत । अतः सेवनकाल एव सर्वं लोहावयवं शरीरावयवं वाऽऽक्रम्य तत्स्वरूपगुणपरिवर्तनं संपादयते-ऽनेन वेधाख्येन संस्कारेण ।

लोहवेधे देहवेधे वा वेधिरसस्य प्रत्यवयवं क्रामणाय क्रामणयोगाः उप-दिश्यन्ते। तत्र देहवेधे दिव्यौषधयो गन्धकं वा मुख्यतया क्रामणायोपयुज्यन्ते [पृ. ९४] लोहवेधे तु कर्वटमण्डूकादीनां वसा, भेकमहिष्यादीनां मलं स्त्रीस्तन्यं रक्तं चान्यदन्यदेव-क्रामणम् । विधमुपदिश्यते इति विशेषः [पृ. ९५] । देहवेधार्थं शरीरशुद्ध्यर्थं दोषशोधका योगाः [पृ. १०६] शरीरस्य क्षेत्रीकरणायाभ्रक-कान्तहेमयत्ररससिद्धरसायनोपयोगः [पृ १३७] पथ्यापथ्यविधानं च [पृ. ११३] उपदिश्यन्ते यथाक्रमम् ।

दिव्यदेहसिद्धौ वेधिरसोपयोगमन्तरा प्रकारान्तराण्यप्युपदिश्यन्ते; यत्र प्राथम्यमावहति भूतकालान्तकरसोपदेशः । [पृ. १७२.] । यत्स्वरूपं तु न विविच्य वक्तुं शक्यते । सर्वसिद्धिप्रदाश्च गुटिकाः पञ्चदश कान्तहेम-वज्राभ्रकरसानां यथायोगं मेलनेन सिद्धाः उपदिश्यन्ते । [पृ १६०] श्रीशैले सिद्धिलाभ इत्यधिकारे [पृ. १७६] तीर्थक्षेत्रमाहात्म्यात्सिद्धिलाभः ब्रह्मगृध्रनिर्गुण्डयादिदिव्यौषधिरसायनानि च दिव्यदेहसाधकानि बहूनि सिद्धिप्रदैर्मन्त्रैस्साकमाख्यायन्ते । [पृ. २०४]

सत्यपि प्रशस्तेषु रसायनेषु, धर्म्यस्य आचारस्य देहसिद्धावतुल-प्रभावो दृष्ट आचार्यैः । तदर्थमेव दिनचर्यायाः ऋतुचर्यायाः योगाचार-

रसायनस्य च तावता विस्तरेण प्रतिपादनमुपलभ्यतेऽत्र। उप'पान-रसायन चात्र निश्चिप्य दोपशोधकतया रसायनतयोपदिश्यते ।

एतावता वेधान्ताना सस्काराणामानन्दकन्दे प्रतिपादिताना ग्रन्थान्तर-सवादसमालोचनपूर्वक स्वरूपपर्यालोचना कृता। वेधान्ताष्टादशसस्कारकरणे-ऽशक्तस्य, अथवा दिव्यदेहत्वपर्यन्त' सिद्धिमप्रतीक्षमाणस्य वा रोगहनन मात्रोपयोगिनो रसशुद्धि मारण बन्ध मूर्च्छाप्रकारा कतिचन सविशेष मभिधीयन्ते त्रयोविंशोल्लासे। अमृतीकरणविश्रान्तावन्ते च द्वावध्यायौ परिभाषा यन्त्र-मूषा स्वरूपादिवर्णनपरौ प्रक्षिप्तौ भवत इतीदमुक्त प्रागेव।

क्रियाकरणविश्रान्तौ च उपरसा लोहा रत्नान्युपरत्नानि च स्वरूप-शुद्धिमारणसत्वपातनादिप्रक्रियाप्रदर्शनपूर्वक वर्ण्यन्ते । दिव्यौषधि महौ-षधिवर्णनपरौ च द्वावध्यायावन्ते प्रक्षिप्तौ। तत्र महारसा उपरसा इति च ग्रन्थान्तरेषु वर्गीकृताना समेषामत्रोपरसा इत्येव गणना कृता। तत्रापि छगणवालुकाकाचाम्लवेतस गोरोचन सर्जगुग्गुलु लाक्षादाना अन्यत्र रसोप-रसमहारसवर्गेष्वगणिताना परामर्शोऽत्र विशेष । लोहेषु अभ्रकसूत्वस्य गणना तस्य लोहतापरिचयमन्यत्राहृष्ट प्रत्यापयति। सस्यकविमलयोर्ग्रन्था-न्तरेषूपरसतया प्रत्यातयोरत्र उपरत्नतया गणन तु तयो स्वरूपविनिर्णये भूयो विभ्रममावहति।

इत्येतावता आनन्दकन्दे प्रतिपादिता सर्वेऽप्यस्मा ग्रन्थान्तरसवाद पूर्वक सङ्ग्रहेण समालोचिता ।

अथ रसशास्त्रे गवेषणा कथं कर्तव्या इत्यत्र किञ्चित्प्रस्तूयते। अत्र नव्यैरनेके मार्गा प्रस्तूयन्ते। पर प्राच्यै रसशास्त्रे विस्तारमाकलयद्भि

कीदृश पन्था आहृत इति समीक्षण प्राप्तकालम्।

रसशास्त्रे गवेषणा। सर्वरोगनिहन्तृत्व देहदार्ढ्यप्रदत्वमेवमन्यान्य च रसोपरसादिगत प्रभावमाकलयन्त प्राचीना तत्र द्रव्यगत रस वीय विपाक प्रभावानेव नियामकानि कारणानि ददृशु; रसवीर्यादिभिरेव दोषदूष्यविकाराभिनिर्वृत्तिं चाभ्युपागमन्। अतश्चायु-र्वेदस्य त्रिदोषरस वीर्य विपाक प्रभाव-सिद्धान्तमाधारीकृत्यैव सर्वत्र विस्तार

समाकलित आचार्यैः । अतो द्रव्यगतरस-वीर्य-विपाक-प्रभावनिर्धारणं तु कथं सपाद्यमित्यत्र प्रथमं गवेषणा कर्तव्या भवति । विना त्रिदोषरसादि-समन्वयं, कृता गवेषणाऽऽयुर्वेददृशा निष्फलैव भवेत् ।

रसशास्त्रविषयकान्वेषणारंभात्पूर्वं, अद्योपलभ्यमानं सर्वं रसशास्त्र-विषयकं साहित्यं एकत्र सपादनीयं भवति । तद्धि द्विधा संपाद्यम् । प्रथमं तत्र तत्रोपलभ्यमाना रसग्रन्थास्तथैव शोधयित्वा मुद्रापयितव्याः । अपरं च तथा संपादितानां ग्रन्थानां एकत्र विषयानुसारं समन्वयसङ्ग्रहाभ्यां प्रसिद्धिः । रसग्रन्थगता विषयास्त्रेधा विभक्तुं शक्यन्ते ।

१) रसोपरसस्नेहादीनां स्वरूपवर्णनं शोधनमारणादिप्रक्रिया च ।

२) वेधान्तसंस्कार घुटिका-खेचर्यादिसिद्धिप्रतिपादको भागः ।

३) रसोपरसादिभेषजयोगप्रतिपादको भाग ।

तत्र तृतीयभागगतो विषयः प्रायस्सङ्कलित एव महामहिम्ना श्रीहरि-प्रपन्नशर्मणा स्वकीये रसयोगसागरे । तत्रासङ्कलितानां भेषजयोगानामन्यतो-पलभ्यमानानां परिशिष्टतया प्रकाशनं सुकरमेव । आद्यौ द्वौ विभागा-विदानीं विषयानुसार सङ्कलनामर्हतः प्रथमम् । एष शास्त्रे गवेषणारूपः प्रथमः प्रकारः ।

द्वितीयस्तु कर्मपरिचयरूपः । द्रव्यसङ्ग्रहे द्रव्यनिर्णये, शोधन-मारणादिविविधसंस्कारेषु शास्त्रोक्तमार्गेण परिचयस्य सपादनं, प्रक्रिया-निर्धारणं चेति गवेषणामार्गोऽयं श्रममधिकमनुभावयेदेव । यथा वा—

१) द्रव्यनिर्णये— शोधनाद्यर्थं आदेयस्य द्रव्यस्य, स्वरूप-निर्णये, कृत्रिमाकृत्रिमत्व-उत्तमाधमत्व-साम्यादि निर्णये च आयुर्वेदोप-देशस्य परीक्षा, तत्प्रयोगपरिचयश्च । तत्र नव्यविज्ञानोपदिष्टानां प्रकाराणां चोपयोगितानुपयोगितानिर्धारणं च ।

२) द्रव्यशोधने— पूर्वोक्तप्रकारेण श्रेष्ठतया निश्चितस्य यौगिक-नैसर्गिकदोषापाकरणाय शास्त्रोक्तविधानेन शोधने क्रियमाणे, तत्रोपयुज्य-मानानां विविधलामोषधीनां, शोधनप्रक्रियाणां वा परस्परं तारतम्यविमर्शः ।

शोधने चलति, मध्ये मध्ये द्रव्यगतकाठिन्यमार्दवादिस्वरूपे वर्णकाठिन्यादौ चान्तरावेक्षण, भिन्नभिन्नाभि प्रक्रियाभि शोधने जायमान स्वरूपगुणभेद-विमर्श शोधनानन्तर सपिपादयिषिताना मारणादिसस्काराणा सौष्ठवापादने सौकर्ये श्रेष्ठत्वापादने चात्यन्तमुपयोगिन शोधनप्रकारस्य विनिर्णय तत्र च नव्यपद्धत्या परीक्ष्य स्वरूपगुणभेदपरामर्श इत्येतावान्विषयविमर्शो-ऽपेक्ष्यते ।

३) मारणविषये— ग्रन्थोक्तैर्भिन्नै प्रकारै, भिन्नभिन्नास्व-ग्निमात्रासु भिन्नभिन्नै पुटविशेषैर्मारिताना तव तत्रोल्लिखिताभि परी क्षाभि, सुमारितामारितत्वादिनिर्धारण फलदाने विशेषा मारणेन मूल द्रव्ये जायमानपरिणामस्य विमर्श, तस्य शरीरस्यान्तर्बहिर्वा परिमार्जने जायमान शारीरो द्रव्यगतश्च परिणाम, नव्यपद्धत्या मारितामारितस्वरूप-परामर्शश्चेत्येते विचार्या ।

४) सत्वपातनद्रुतिविषये— परीक्षितोत्तमसनिद्रव्यादानेन-भिन्नभिन्नविधाने सत्वपातने कृते कस्य वा प्रकारस्य अधिकोत्तमसत्व पातनशक्ति सुकरता चेति निर्धारण, पतितस्य सत्वस्य स्वरूपनिश्चय द्रुतस्य सर्वदा द्रवतासपादन, नव्यपद्धत्या द्रुतस्य सत्वस्य च स्वरूप-विनिश्चय ,

५) दिव्यौषधिविनिर्णये— विनाप्यरिष्टसपर्कं रसादिमारणे प्रसिद्धाना दिव्यौषधीना स्वरूपशक्तिविनिर्णय

६) देहवेधधातुवेधविषये— तत्र लघूनामलघूना बहु प्रकाराणा वेधविधानाना स्वरूपविमर्श देहवेधानुपयोगिना धातुवेधप्रकाराणा विशेषा, तत्र दिव्यौषधीना प्रभावपर्यालोचना वेधेन सपाद्यमानस्य स्वभाव नियतस्वरूपपरिवर्तनस्य वस्त्वन्तरेऽपि प्रयोगौचितीविनिर्णय, नव्य-विज्ञानप्रसिद्धस्य अणुविभेदस्य समन्वयविचिन्ता इत्येते विचार्या ।

इत्येवं कर्मपरिचये गवेषणैव रसशास्त्रस्य गवेषणाया मुख्यं स्थान-मावहेत् । भौतिक रसायनविज्ञानयो भारतीय स्वरूपमाविष्कर्तुमिय गवेषणा सहूपकुर्यात् ।

दक्षिणभारते चाल्यायुर्वेदस्य कश्चन संप्रदायः अगस्त्य-श्रीमूलनाथ-यूहि-भोग-तेरयर्-कालाङ्गादिभिः सिद्धैराविष्कृतः द्रविडभाषामयेषु ग्रन्थेषु प्रतिपादितः। सर्वे चैते सिद्धाः शैवसामयिकाः। तान्त्रिकमुदाचार-विशिष्टतया च तत्संप्रदायस्य क्रिया-चर्या-योग-ज्ञानाभिधचतुर्विधसोपानाधिरूढैरैतैः, साक्षान्नन्दि-भगवन्मुखादवगतः संप्रदाय एष इति जोषुष्यते तैः। त्रिदोष-पञ्चभूत-रस-वीर्य-विपाकादिसिद्धा-न्तान्, लोकोत्पत्तिव्याध्युत्पत्तितन्निवृत्तिविषयेषु

रसशास्त्रगवेषणायां द्रविडसंप्रदायस्य मुख्यं स्थानम्

सर्वात्मनाऽनुसरन्तस्ते सिद्धाः, द्रविडदेशमात्रसुलभानां बहूनां दिव्यौषधीनां साहाय्येन चैषान्तस्य रससंस्कारगणस्य करणे लघून्सुलभांश्च प्रकारान्ददृशुः।

अथ च किञ्चिद्द्रविडसंप्रदायस्य स्वरूपं पर्यालोचयामः। सङ्गृह्णीमश्च तद्गतान्विशेषान्। धातु-मूल-जीवात्मना त्रिधा भिद्यते कृत्स्नो हि लोकः। धातवो हि द्वादशोत्तरद्विशत (२१२) संख्याकाः ये षोढा वर्गीक्रियन्ते, लवणानि पाषाणा उपरसाः लोहाः रसो गन्धकश्चेति। लवणानि नाम ते ये जले विलीयन्ते, अग्नावुत्पतन्ति, स्फुटन्ति धूमायन्ते दह्यन्ते च। पाषाणा नाम ते येऽग्नौ धूमायन्ते, जले न विलीयन्ते। उपरसाश्च न जले विलयनशीला न वाऽग्नौ दह्यन्ते धूमायन्ते उत्पतन्ति वा। लोहाश्च अग्नौ द्रवन्ति स्थिरीभवन्ति च तत्, न जले विलीयन्ते वा। रसश्च मृदावन्नावप्युत्पतनशीलः अण्वाकारतया विभजनशीलः, सप्तभि-कञ्चुकैरावृतः पौरुषसत्वसमेतश्च। गन्धकस्तु वह्नौ धूमायते, दह्यते, उद्गुत्पतति च, जले न विलीयते, स्त्रीसत्वसंयुक्तश्च भवति। लवणानि पञ्चविंशतिः, पाषाणाश्चतुष्षष्टिः, उपरसा द्वादशोत्तरशत, लोहा नव, रस एको, गन्धक एक इत्याहत्य ते द्वादशोत्तरद्विशतसंख्याका भवन्ति। मूल-वर्गस्तु ओषधिवर्गाभिधः— षोढा विभिन्नो मधुरादिषड्रसाधारतया, पुन-श्षोढा, वृक्ष-गुल्म-लता-रस-नीरस-सधीर भेदेन। ते च त्रिशतोत्तरत्रि-सहस्रसंख्याका उत्पत्तिवैचित्र्येण। जीववर्गस्तु उत्पत्तिवैचित्र्येण चतुरशीति-लक्षसंख्याकस्वरूपभेदयुक्तः योनिभेदेषु चतुर्षु, षड्भिर्नीजविशेषैरुत्पन्नः।

द्रविडसंप्रदाय-समीक्षा।

अमीषा धातूना प्रत्येक स्वभावनियतो गुणविशेष प्रथक् जागर्त्येव। सिद्धस्तु तादृशस्वाभाविकगुणस्वरूपपरिवर्तने प्रयतते। यथा वा— लवणवर्गो जले विलयनशीलोऽग्नावुत्पतनशीलश्च, यस्य जलेऽविलयोऽग्नौ विद्रुत्य जलाकारता च सपाद्यते। पाषाणाश्चाग्नौ क्षयिष्णव जलेऽविलयनशीलाश्च, येषामग्निसहता जले विलयन च सपाद्यते। उपरसाश्च स्वभावतो नाग्नौ क्षीयन्ते न वा जले विलीयन्ते अतस्तेषा लवणस्वरूपविनिमय कर्तव्य। एवं स्वाभाविकस्वस्वरूपविनिमय एव सिद्धै क्रियते। बद्धस्य धातो पुनर्मारण क्षारीकरण वा क्रियते देहोपयोगसिद्धये॥

धातूना बन्धे ततो मारणे च ओषधीनामुपयोग उपदिश्यते। तासा चौषधीना ग्रहनक्षत्रसपर्कवशादुत्तमगुणाधायकता विशिष्टा दृश्यते। एवं स्वभावसिद्धगुणपरिवर्तनेनाधमाना धातूनामुत्तमता सपद्यते, तथैव शीर्यत शरीरस्य धारण च। स्वभावविनिमयेन शरीरे तेषा धातूना क्रामण सुकर भवति। नश्वरस्य कायस्य स्थैर्य कामयन् सिद्धपुरुषो वेधान्ता सिद्धिं तत्रोपयोगिनीं विज्ञाय, तत्सिद्धिपरीक्षायै धातुवेधे (वादे) प्रावर्तत। स्वर्णकरण च तेन, विना न यान्त्रा धनसपादने श्रम वा शरीरधारणोपयोग्याहारादिवस्तुसपादनाय स्वीकृतमेव। ताल मन शिला माक्षिक-स्वर्णरसादीनामन्योन्यबन्धसामर्थ्यं, तेन रसे वेधशक्त्युत्पत्ति च ज्ञातवद्भि सिद्धै स्पर्श-नाडीवेधपर्यन्ता सिद्धि प्राप्ता। वेधिरससपन्ना गुटिका आस्ये मणिबन्धे कण्ठे च धरता तेषा मनोविजिति सर्वसिद्धिप्राप्तिश्च सुलभा सुकराऽभूत्। येन सच्चिदानन्दात्मकशिवतत्त्वस्फुरण च जात तेषाम्।

धातु तदाकरगवेषणपरा सिद्धा, क्वचिच्च देशविशेषे जलस्यौषधिविशेषस्य वा धातुसंपर्काद्वेधोपयोगिता पश्यन्त, कृत्रिमधातुनिर्माणेऽपि प्रयतन्तस्तत्रापि सिद्धिमापु। धातुषु कस्यचिद्धातुस्य सश्लेषणेन विश्लेषणेन वा जायमानान्भेदानसकृदालोक्यन्त कृत्रिमानेव धातून्, युक्त्या स्वाभीष्टसिद्धिसाधकान्सपादयामासु। क्वचिच्च कृत्रिमाद्धातोरकृत्रिमस्य ज्यायस्त्व सिद्धगा परीक्ष्य, तदाकरान्वेषणे प्रयत्नमकुर्वन्त।

तान्विरससमुदाचारसहजपरिभाषाजटिलतया उपदेशपरंपराया लुप्तप्रायेण चाभवे तेषा बहवो ग्रन्था दुरूहार्था भवन्ति, अतएव लुप्तप्रचारा अपि।

सन्ति चाङ्गुलिगणनीयाः कतिपये तत्संप्रदायविदः। 'यूरेनियं' प्रभृतीनां नव्यधैज्ञानिकावगतानां बहूनां धातूनां स्वरूपपरिचयः, तन्मूलकधातुदेहवेधाणुविभेदादिप्रक्रियाजातोपदेशश्च सिद्धग्रन्थेषु तत्र तत्र प्रतिपाद्यते, यत्र भूयान्विमर्शश्चोपलभ्यते। परं क्रिया-चर्या-ज्ञानयोगादिबहुविधविषयान्तरसाहचर्यवशान्न तेषां विषयाणां सुकरोऽवगमः। अतस्तत्रापि विषयानुसारं ग्रन्थसङ्कलनेन मार्गशोधनं भूयसा कर्तव्यमापतति।

द्राविडसंप्रदाये गवेषणायां कृतायां, तल्लब्धज्ञानाधारेण रसशास्त्रस्य प्रतिसंस्कारश्च संपादनीयः। तादृशे प्रतिसंस्कारे कृत एव गवेषणाऽपि पूर्णा भवेत्। तत्र शैवसंप्रदायविद्भिरायुर्वेदविद्भिः आयुर्वेदीयद्राविडसंप्रदायविद्भिश्च संभूय बहु श्रान्तव्यमासिद्धिलाभम्।

एतादृशे गवेषणाप्रसङ्गे, प्रथमसंपाद्ये रसशास्त्रविषयकसाहित्यस्य प्रकाशने बहूपक्रियते सरस्वतीमहालयग्रन्थागारनिर्वाहाधिकृतैः मद्रासराज्याधिकृतैश्चाखानन्दकन्दस्य प्रकाशनेन। सन्त्यन्ये च बहवो ग्रन्थाः सरस्वतीमहालयग्रन्थागारे रसतन्त्रप्रस्थाने प्रकाशनीयाः, येषामचिरेण प्रकाशने तदधिकारिणामतुलं उत्साहो दिने दिने समेधत एव।

अस्य ग्रन्थस्य संपादनेनायुर्वेदस्य परमां सेवामाचरितुमवकाशं दत्तवते सरस्वतीमहालयमाननीयसचिवाय श्रीगोपालार्यमहोदयाय, गवेषणाचार्याय श्रीवासुदेवशास्त्रिमहोदयाय, समये समये पर्यालोचनाय स्वकीयग्रन्थागारगतरसमन्थजातप्रदानेन, अनर्घणोपदेशजातेन च बहूपकृतवते मम प्रयोगाचार्याय श्री वा वा. नटराजशास्त्रिमहोदयाय, महति दुर्वहेऽस्मिन्ग्रन्थसंपादने द्रविडभाषानुवादे (प्रूफ्) पत्रशोधने च श्रमलघूकरणेन मह्यं बहूपकृतवते श्रीरङ्गस्थ श्रीविलासमुद्रणालयाधिपतये पण्डित श्री सुन्दरराजाचार्यमहोदयाय च 'मदीयां हार्दीं कृतज्ञतां निवेदयन्, सर्वगतं विघ्नोन्मेषमनारतमाशंसद्भ्यो गुरुचरणेभ्यो मदीया अनन्ताः सविनतिनतितीः समर्पये।

भारत आयुर्वेदशाला
तेप्पकुलं, तिरुचिरापल्ली
१६—३—१९५२

इत्थं
भिषजां विधेयः
शो. वे. राधाकृष्णशास्त्री

॥ श्रीः ॥

॥ आनन्दकन्दस्य विषयानुक्रमणिका ॥

अमृतीकरणविश्रान्तिः ।

पृष्ठसंख्या

प्रथम उल्लासः ।

रसोत्पत्तिः, तत्पर्यायाः, रसदोषाः, रसावस्थाः, रस-
गतयश्च १-६

द्वितीय उल्लासः ।

रसोपदेशक शिष्यलक्षणं, काकिनीलक्षणं, रसशाला-
निर्माणं, रससन्ध्याविधिः, रसपूजाफलं, रस-
स्तोत्रं च । ७-३१

तृतीय उल्लासः ।

रसदीक्षाक्रमः, दीक्षाभेदाश्च । ३२-४३

चतुर्थ उल्लासः ।

रसस्य स्वेदन-मर्दन-मूर्च्छन-उत्थापन-पातन-निरोधन-
नियामन-दीपनानुवासन-चारण-जारण-गर्भद्रुति-
बाह्यद्रुति-रञ्जन-सारण-प्रतिसारणानुसारण-वेधा-
ख्याष्टादशसंस्कारविवरणं, तदर्थंकबीजद्रुतिसत्व-
पातनाद्युपदेशश्च । ४३-९६

पञ्चम उल्लासः ।

भूचरी-खेचर्यादिविशेषजारणाप्रकाराः । ९७-१०१

पृष्ठसंख्या

षष्ठ उल्लासः ।

देहवेधक्रम, तदर्थं शरीरशुद्धिः क्षेत्रीकरणं, रससेवायां पथ्यापथ्यं, अपथ्यजनितविकारप्रशमनोपाय, सप्तधातुवेधस्वरूपं च । १०५-११७

सप्तम उल्लासः ।

पद्मरागादिरत्नोत्पत्ति, यन्त्रभेद-संस्कार-रसायनद्रुति-भस्मादिप्रकारा, स्वर्णकान्ताभ्रकानां स्वरूपगुण-शोधनमारणद्रुत्यादिप्रकाराश्च ११७-१३५

अष्टम उल्लासः ।

रसायनसेवाक्रम । १३६-१३८

नवम उल्लासः ।

रसायनार्हरससंस्कार, क्षेत्रीकरणाय रसायनप्रकाराश्च । १३८-१५७

दशम उल्लास ।

पञ्चदशद्युटिकानिर्माणविधिस्तदुपयोगविधिश्च । १५८-११७

एकादश उल्लासः ।

जीवत एव दिव्यदेहसिद्धये भूतकालान्तरस । १७२-१७५

द्वादश उल्लासः ।

श्रीशैले सिद्धिलाभप्रकारा । १७६-१९४

त्रयोदश उल्लास ।

गन्धक, तत्संस्कारा गुणाश्च १९५-१९८

चतुर्दश उल्लासः ।

विष, तत्संस्कारा गुणाश्च । १९९-२०३

दश उल्लास ।

दिव्यौषधिरसायनानि । ब्रह्मवृक्ष मुण्डी देवदाली-श्वेतार्क-हस्तिकर्णी-रुदन्ती निर्गुण्डी-शुनकशाल्मली-

पृष्ठसंख्या

पथ्या- धात्री- विफला- शुण्ठी- पिप्पली- चित्रक- भल्लातक-भृकदंव-पुनर्नवा-भृङ्गराज-कुमारी- नीली- मुसली-इन्द्रवल्ली-ज्योतिष्मति-अश्वगन्धा-ज्योतिष्मती-गुग्गुलु-विजया-कञ्चुकी-कुक्कुटी- सोमलता- गुडूची- तुवरक-सोमराजी-वृद्धदारक-वल्लवल्ली-तिल-क्षीरिणिका-ब्राह्मीकल्पाः । २०४-२६३

षोडश उल्लासः ।

अङ्कोलकल्पः, अन्ये मूलिकाकल्पाः, अभ्यङ्गरसायनं, उद्वर्तनरसायनं, केशरञ्जनकल्पः, दिव्यौषधिग्रहणयोग्यस्थलनिर्देशः तद्ग्रहणविधिश्च । २६३-२७५

सप्तदश उल्लासः ।

उपःपानरसायनं, तत्र पथ्यापथ्यं जलाजीर्णलक्षणं तत्परिहारः, नासाजलपानरसायनं च । २७६-२८४

अष्टादश उल्लासः ।

सदाचाररसायनम् । प्रबोध-विण्मूत्रोत्सर्जन-शौचाचमन-दन्तशोधन-जिह्वाविलेखनाञ्जन-नस्य-गण्डूष-धूमपान-ताम्बूल-चर्वण-नेत्रप्रक्षालन- व्यायामोद्वर्तनाभ्यङ्गस्नान- नित्यकर्म- देहकेशधूपन- गन्धानुलेपन-पुष्परत्नकञ्चुकोष्णीपपादत्रधारण- भोजनानुपानशय्या-कामसेवा-निद्रा-सेवनप्रकाराः । २८५-३२८

एकोनविंश उल्लासः ।

ऋतुचर्या । कालविभागः-हेमन्तशिशिरवसन्तग्रीष्मवर्षाशरदाख्यर्तुषट्कस्य स्वरूपं तत्र चर्या, अन्नपाकक्रमो धातुमलाद्युत्पत्तिक्रमः पाचकाग्निस्वरूपं च । ३२८-३४८

पृष्ठसंख्या

विंश उल्लास. ।
योगरसायनं जीवन्मुक्तलक्षण योगसिद्धि आसन-
प्राणायाम प्रत्याहार ध्यान धारण समाध्याख्यषड्-
विधयोगाङ्गस्वरूपम्, योगाभ्यासफलञ्च । ३४८-३६६

एकविंश उल्लास ।
योगसिद्धिदकुटीनिर्माणविधि -अमरीकल्पश्च । ३६६ ३७५

द्वाविंश उल्लास ।
वन्दाकल्प । अश्विन्यादिषु नक्षत्रेषु वन्दाकविशे
षाहरणस्य फलञ्च । ३७६ ३८२

त्रयोविंश उल्लास ।
विशिष्टा रससंस्कारा । रसस्य शोधनविधि, भस्म-
विधि, गन्धपिष्टी— तत्तद्भस्म जारण मारणानि,
रसबन्धा वैक्रान्त-गन्धक मूलिकाबन्धा, रस
मूर्च्छना, मूलिकाबन्धा उदकबन्धा रसमूर्च्छना,
मूलिकाबन्धा घुटिकायोगा, रसायनकल्पा, बद्ध-
जारणाविधि द्रुतिबन्ध अन्ये वेधोपयोगिनो
बन्धा वज्रवेधद्वन्द्वमेलापनं च । ३८३ ४५९

चतुर्विंश उल्लास ।
वैक्रान्त बान्त चपल गन्धक तालकाद्यै रसबन्ध,
निगलबन्ध, जलूकाबन्धश्च । ४५९-४८०

पञ्चविंश उल्लास ।
परिभाषा । वैद्यभाग वज्रली पङ्करस पिष्टी कृष्टी वर
लोह रक्ती दल अयोनाग शुल्वनाग पिञ्जरी चन्द्रार्क
निर्वापण भरमलक्षण बीज उत्तारण ताडन धान्याभ्र
सत्व एककोलीसक कोकिल हिंगुलाकृष्टरस घोषाकृष्ट-

पृष्ठसंख्या

चङ्ग-शुल्वनाग-वरनाग-उत्थापन-ढालन-चपल-धौत-
द्वन्द्वान-भञ्जनी-फुल्लिका-पतङ्गीराग-आवाप- अभि-
षेक-निर्वाप-शुद्धावर्त-रेखावर्त-स्वाङ्गशीत-बहि शीत-
स्वेदन- मर्दन- मूर्च्छन- नष्टपिष्टि- उत्थापन- पातन-
निरोध नियमन-दीपन ग्रास-जारण- चारण- गर्भ-
द्रुति-बाह्यद्रुति-विड रञ्जन- सारण- वेध उत्पाटन-
स्वेदन सन्न्यासानां परिभाषाविवरणम् । ४८१-४९४

षड्विंश उल्लासः ।

यन्त्राणि । खल्व-खवलभी-पातन-कच्छपा-न्तरालिक-
तापिका-गर्भ-पालिका घटी-इष्टिका विद्याधर-डमरुक-
नाभि-ग्रस्त तुला-स्थाली-कोष्ठिका-वालुका लवण धूप-
कन्दुक ढेकी सोमानल नालिका पाताल दीपिका गंगा
सागरभट्टी डोला कोष्ठी-गर्भ-हंसपाक-मूषा स्तन-नाग-
मयूर-चक्र-खेचर-कापालि- वालुका लवण भूधर
नलिका पुट- पाताल धूपान्त पातनारयन्त्र विशे
षाणां, वज्र- योग- वज्रद्रावण- गार- स्वर्ण-रूप्य-
बिड- धृन्ताक- गोस्तनी- मल्ल- पक्व- गोल- मञ्जु-
मञ्जूषा-मुसल-प्रकाशान्ध भस्मारय मूषाविशेषाणां
आकर-पाताल-गाराख्यकोष्ठीविशेषाणां, महा गज-
वाराह-कुक्कुट-कपोत-गोवर-भाण्ड-वालुका भूध-
राख्यपुटविशेषाणां कूपिकादीनाञ्च स्वरूपम् । ४९५-५२१

क्रियाकरणविश्रान्तिः ।

प्रथम उल्लासः ।

उपरसाः । गन्धक-तालक-शिला-माक्षिक अभ्रक-हिंगुल-
गैरिक चपल-शिलाजतु-भूनाग हरिद्राद्रम-अग्निजार-

पृष्ठसंख्या

खपरी तुत्थ कट्टमुद्ग गिरिसिन्दूर टङ्कण कपिलक-
वत्सनाभि कासीस गौरीपाषाण तुवरी फटकी
पोटाशपुष्पी सिन्दूर रसाञ्जन नीलाञ्जन सौवीराञ्जन
स्रोतोञ्जन अहिफेन पुष्पाञ्जन शङ्ख शुक्ति कपर्द
सप्तगुणि नवसार सौराष्ट्री अम्बुपाषाण सर्जरस-
गुग्गुलु यवक्षार सर्जक्षार लवणक्षार यवक्षार
सामुद्रलवण सैन्धव-काचलवण बिडलवण सौव
र्चल अम्लवेतस काच चटगणाङ्गारसिकतारभ्या । ५२२-५६२

द्वितीय उल्लास ।

रसस्य शोधन मारणप्रकारा. ५६२ ५६७

तृतीय उल्लास ।

रजतस्य शोधनमारणप्रकारा । ५६८ ५७१

चतुर्थ उल्लास ।

ताम्रस्य शोधनमारणप्रकारा । ५७२ ५७८

पञ्चम उल्लास ।

कान्तलोहमुण्डलोहाना शोधनमारणप्रकारा । ५७८ ५८६

षष्ठ उल्लास ।

वङ्गनागयो शोधनमारणप्रकारा । ५८७ ५९१

सप्तम उल्लास ।

पित्तल कास्य वर्ताभ्रकसत्व मण्डूराणा शोधनमारण । ५९१ ६०३

अष्टम उल्लास ।

माणिक्य मुक्ता प्रवाल मरकत पुष्पराग वज्र नील गोमे
दक वैडूर्याणा सूर्यकान्त चन्द्रकान्त स्फटिक
वैक्रान्त राजावर्त गरुडोद्गार विमल पेरोजाख्योप
रत्नाना च शोधनमारणप्रकारा । ६०३ ६२७

पृष्ठसंख्या

नवम उल्लासः।

दिव्यौषधिप्रशंसा। सोमवल्ली महिषवल्ली-स्थल-पद्मिनी गोनसा उच्चटा ईश्वरी भूतकेशी कृष्णलता-लशुनवल्ली- रुदन्ती वाराही सप्तपत्री- नागिनी-सर्पिणी छत्रिणी गोशृङ्गी ज्योतिर्लता रक्तवल्ली- पद्म-वल्ली- फणिनी- चाण्डाली- ताम्रवल्ली- पीतवल्ली-विजया-महौषधी-देवदाली- नवनीतगन्धी- गरुड-वल्ली-तुंबिनी-भूतुंबिनी गन्धर्वा-व्याघ्रपादी-महौ-षधी गोमारी-त्रिशूली- रुतसी- बिदण्डी- भृङ्गवल्ली-चमरिका-करवीरलता-वज्रवल्ली-वारवल्ली-रोहिणी बिल्वनी-गोरोचनलता करीरी-अक्षरा-अपत्रा-कुट-जवल्लि-मूलकन्दा- ब्राह्मणी- मुनिवल्ली- निंबवल्ली-तिलकन्दा- अतसीवल्ली- वोविलता- मद्यगन्धा-कूर्मलता-माधवी-विशाला- महानागा मण्डूकलता-उदुंबरलता- चिन्नवल्लीस्वरूपवर्णनम्। ६२८-६४१

दशम उल्लासः।

महौषध्यः। हिमजा-कारवी कटुतुंबि-ज्योतिष्मती-लिङ्गि-नी-पातालगरुडी-गिरिकर्णी-अखुकर्णी-वाराही देव दाली ऐन्द्री गोजिह्वा काकतुण्डी- रक्तपादी पुनर्नवा-अम्लवर्णी-कर्कोटकी शरपुङ्खा भृङ्गराज गुडूची-मूर्वा-शङ्खपुष्पी-काकजङ्घा शतावरी गोक्षुर-काकमाची-आदित्यभक्ता- नाकुली क्षीरकन्द- सिंदुवार- अर-ण्यकार्पासी-कोकिलाक्ष बृहती कण्टकारी गुञ्जा- वृद्ध-दारक-वाकुची अपामार्ग प्रपुन्नाट विषमुष्टि काण्डीर-हस्तिकन्द समुद्रशोषी गोरक्षदुग्धी-भूपाटली अष्ट-वर्ग आदित्यभक्ता- हस्तिकर्णी- कपिकच्छू- कर्णस्फोटा-रुद्रजटा नीलिका कोशातकी जीवन्ती जतुका मुण्डी

आनन्दकन्दस्य विषयानुक्रमणिका ।

पृष्ठसंख्या

विष्णुक्रान्ता- घुमारी- भूम्यामली- वह्निचूडा- ब्राह्मी-
तण्डुलीयक-पाषाणभेद-हस्तिशुण्डी-क्षुद्राम्लिका ब्रह्म-
दण्डी-ताली खवल्ली सहदेवी लक्ष्मणा-भूकदंब-तैल-
कन्द- विष्णुकन्द- विकर्णिका- नागदन्ती- द्रोणपुष्पी-
अमृतस्रवा पुत्रदात्री-शाल्मलीकन्द-आवर्तकी- अम्ल
पत्र्याख्याष्टाशीतिमहौषधीनां स्वरूपगुणवर्णनम् । ६४१-६६७

रिशिष्टम् ।

रसनियामिकाः, निर्जीवकर्यः रसमारिकाः, (दिव्यौ-
षधिबीजानि) रसबन्धकर्यो रसद्राविकाः रसक्रामिकाः
रासायनिकाश्चौषध्यः । पञ्चरत्नं, क्षीरवर्गः, क्षार-
वर्गः, तैलवर्गः, अम्लवर्गः, अम्लवेतससन्धान-
क्रमः, मलवर्गः, मूत्रवर्गः, रक्तवर्गः, श्वेतवर्गः,
पीतवर्गः, कृष्णवर्गः, वसावर्गः, पित्तवर्गः, शोधन-
त्रयम्, मधुरत्रयम् मिलपञ्चकम्, लोहपर्पटी, तुला-
यन्त्रं, नियामकयन्त्रं, विद्याधरयन्त्रं, सारणायन्त्रं,
आवर्तितलोहादिस्वरूपं, आवर्तितलोहविशुद्धि-
लक्षणं, प्रतीवापनिवापाभिषेकसमयनिर्देशः, मृत-
रसपरीक्षा, रसबन्धप्रकाराः, सृष्टिः, वासनामुख-
चारणाप्रकाराः, ग्राह्याग्राह्यरसलक्षणं, सिद्धसार-
गर्भसार-परमानन्दमूर्ति पाताल-आकाश-रञ्जक-करु-
णाकर-चारुणी ज्योतिस्साध्य- स्थलकूर्म- जलकूर्म-
यन्त्रलक्षणं, पञ्चमृत्तिकाः हठमुद्रा, महामुद्रा, कूपि-
कापाकविधिः, चुल्लीविधानं, भावनामाला, विड-
माला, स्नेहाम्लादीनां गुणाः, तैलपातनविधिः,
शुक्तं, अम्लवाञ्जिकवर्गः, लवणवर्गः विगन्धकं,
रञ्जाकृष्टिः, तारारिष्टं, कपालीयोगाः, मूर्तिबद्ध-पट्ट-
बद्ध-गोटबद्ध-नागार्जीर्णशुद्ध- आरजीर्णशुद्ध- रसक-
र्जीर्णशुद्ध-रसलक्षणं च । ६६९-७०१

॥ श्रीः ॥

महाभैरवोक्तः

॥ आनन्दकन्दः ॥

अमृतीकरणं नाम प्रथमा विश्रान्तिः ।

कैलासशिखरासीनं कालकन्दर्पनाशनम् ।
प्रसन्नं परमेशान जगदानन्दकारणम् ॥ १ ॥
प्रणम्य परया भक्त्या भैरवी स्तुतिमातनोत् ।

देव्युवाच—

देवदेव महादेव जन्मदारिद्र्यनाशन ॥ २ ॥
प्रसीद करुणामूर्ते प्रसन्न परमेश्वर ।
दिव्यागमरहस्यानि कुलकौळादिकानि च ॥ ३ ॥
जाने तव प्रसादेन मायामङ्गळविग्रह ।
श्रोतुमिच्छामि सर्वेश तव दिव्यरसायनम् ॥ ४ ॥
जराजन्मामयघ्न च खेचरत्वादिसिद्धिदम् ।
दारिद्र्यदुःखशमन ब्रह्मत्वादिवरप्रदम् ॥ ५ ॥

ईश्वर उवाच—

साधु साधु महाभागे सर्वलोकोपकारिणि ।
तत्सर्वं जायते सूताच्छुद्धात्मात्माणवल्लभे ॥ ६ ॥
सर्वलोकोपकारार्थं गुह्यात् गुह्यतमं हितम् ।
रसेन्द्रस्य समुत्पत्ति लक्षणं च सुरार्चिते ॥ ७ ॥
तत्सर्वं सम्प्रवक्ष्यामि शृणु भैरवि सम्प्रति ।

रसोत्पत्तिः ॥

सुरेन्द्रैर्मुनिभिर्दिव्यैः गन्धर्वोरगकिन्नरैः ॥ ८ ॥
प्रार्थितोऽहं भवत्यां तु कुमारोत्पत्तिमिच्छुभिः ।
तारकासुरनाशाय लोकानां रक्षणाय च ॥ ९ ॥
तदा हिमालयगिरेः गुहायां सुचिरं प्रिये ।
संक्रीडमानयोः कालो गतो नः पुत्रलिप्सया ॥ १० ॥
त्रिजगत्क्षोभि सुरतं त्याजितुं प्रेषितः सुरैः ।
कपोतरूपमास्थाय वह्निः प्रागाद्ववाञ्छतः ॥ ११ ॥
तं दृष्ट्वा लज्जया देवि विसृष्टं सुरतं मया ।
निक्षिप्तं वदने वह्नेरावयोस्तेज उज्ज्वलम् ॥ १२ ॥
तेन दन्दह्यमानोऽग्निर्गङ्गायां तन्न्यमज्जयत् ।
तेन गङ्गाऽपि संतप्ता तद्वह्निर्विससर्ज च ॥ १३ ॥
तत् द्विधाऽभूद्वह्निः प्राप्य चैकं स्कन्दमसूतये ।
अन्यच्चक्षुद्धरसो जातो ह्यापदंबुधिपारदः ॥ १४ ॥
शतयोजननिम्नेषु पञ्चकूपेषु संस्थितः ।
तन्मला धातवो जाता मण्यो दिव्यवस्तु च ॥ १५ ॥
तत्तत्क्षेत्रविशेषेण नामवर्णादिकान् गुणान् ।
भिन्नः प्राप्तो रसेन्द्रोऽयं जन्मदारिद्र्यमंजनः ॥ १६ ॥
ते कूपाः प्रलये पञ्च संज्ञा जातादि वै मुखाः(?) ।
ससंचवर्णा निवृत्त्या निक्षिप्ता नियुतानि हि(?) ॥ १७ ॥
पञ्चवर्णानि देवेशि ! सर्वसत्त्वयुतानि च ।
पूर्वस्यां पारदः श्वेतो नानावर्णैर्गदापहः ॥ १८ ॥
चञ्चलो दक्षिणस्यां तु रसेन्द्रो नीलवर्णवान् ।
दोषहीनोऽतिरूक्षश्च सुतरां चपलः प्रिये ॥ १९ ॥
तेन जाता भुजङ्गेन्द्रा जराजन्मगदोज्झिताः ।

पश्चिमस्यां तु सूताख्यः पीतवर्णोऽतिरूक्षकः ॥ २० ॥
सर्वदोषयुतोऽसौ तु शुद्धोऽष्टादशकर्मभिः ।
सर्वसिद्धिप्रदो देवि देहलोहादिसिद्धिदः ॥ २१ ॥
उत्तरस्या दिशो रक्तः सर्वदोषविवर्जितः ।
रसायनं तु तेनैव देवा जन्मजरोज्झिताः ॥ २२ ॥
मध्ये तु मिश्रको ज्ञेयः सर्ववर्णसमन्वितः ।
बहिश्चन्द्रार्कसच्छायो रसो दोषसमन्वितः ॥ २३ ॥
स चाष्टादशसंस्कारैः शुद्धस्सिद्धिप्रदो भवेत् ।
अमराणां स्वरूपं तु रसेन्द्रो हि महेश्वरः ॥ २४ ॥
पूरयामासतुस्तौ च स्तोकतो ह्यतिदुर्लभौ ।
अन्येषु सर्वकार्येषु सिद्धिदोऽपि हि कर्ममिः ॥ २५ ॥
अष्टादशभिरत्यन्तं शुद्धः सिद्धिप्रदो द्रुतम् ।
रसावतारं यो वेत्ति स तु धार्मिकसत्तमः ॥ २६ ॥
आयुष्यसुखसंतानश्चनारोग्यमवाप्नुयात् ।

रसपर्यायाः—तन्निरुक्तिश्च ॥

जन्मरोगजरामृत्युदारिद्र्यांभोनिधे. परम् ॥ २७ ॥
पारं ददाति तेनैव पारदः परिकीर्तितः ।
रसोपरसलोहादिकर्तृत्वाच्च रसेन्द्रक. ॥ २८ ॥
मम प्रत्यङ्गसूतत्वात् सूत इत्यभिधीयते ।
सूते यस्मात्सर्वसिद्धिं तस्मात्सूत इति स्मृतः ॥ २९ ॥
मम देहरसो यस्मात् रसस्तस्माच्प्रकीर्तितः ।
जरामरणदारिद्र्यरोगनाशाय शस्यते ॥ ३० ॥
तस्माद्रस इति प्रोक्तो धातुत्वाच्च वरानने ।
सर्वधातूरसत्येषः तस्माच्च रस ईरितः ॥ ३१ ॥
मित्रकारी सवर्णत्वात्सर्वसिद्धिप्रदायकः ।

पारदो व्याधिसहर्ता रसेन्द्रो रसकर्मणि ॥ ३२ ॥
धातुकर्मसु सूतस्यात् रसेन्द्रो रससाधने ।
सर्वकर्माहिततया सर्वरूपतया प्रिये ॥ ३३ ॥
सर्वसिद्धिप्रदो देवि मिथकोऽयमुदाहृत ।

रसगता दोषा ॥

अमोघसिद्धिममल सर्वसिद्धिप्रद रसम् ॥ ३४ ॥
आलोक्य विदधात्सर्वं ब्रह्मविष्णुपुरोगमा ।
मामभिप्रार्थयामासु स्तोत्रैश्च विविधै प्रिये ॥ ३५ ॥
" रसेन्द्रदर्शनादेव नरपक्षिमृगादय ।
सिद्धि नानाविधा याति तन्निवारय शकर " ॥ ३६ ॥
तसात् त्रिधा कञ्चुकाभिर्दोषैश्चासौ नियोजित ।
तदा प्रभृति दोषैश्च कञ्चुकाभिश्च वर्जित ॥ ३७ ॥
शुद्धोऽष्टादशसंस्कारसूतो भवति सिद्धिद ।

रसावस्था ॥

धूमश्चिटिचिटिश्चैव मण्डूकप्लुतिरेव च ॥ ३८ ॥
सर्पश्च विकृपश्च पञ्चावस्था रसस्य तु ।

रसगतय ॥

रसस्य गतय पञ्च जले खाज्जलवद्गति ॥ ३९ ॥
धूमे धूमगतिस्तूल स्तरणे हसवद्गति ।
किट्टे किट्टनिभा देवि पञ्चमी जीववद्गति ॥ ४० ॥
चतस्रो गतयो दृश्या अदृश्या पचमी गति ।
यन्त्रौषधाद्यै रोद्धव्याश्चतस्रो गतय प्रिये ॥ ४१ ॥
ध्यानमन्त्रौषधाद्यैश्च रोद्धव्या पञ्चमी गति ।

नैसर्गिका दोषा. ॥

पार्थिवश्च तथैवाप्य आग्नेयश्चानिलस्तथा ॥ ४२ ॥

नाभसो गजचर्माख्य· पुण्डरीको विसर्पकृत् ।
हारिद्रो रक्तचर्माख्यो नारङ्गो रक्तनिन्दुक. ॥ ४३ ॥
असह्याग्निश्च मण्डूको मला नैसर्गिका. स्मृताः ।

औपाधिका दोषाः ॥

कालिका मलिनी चैव कपोती रक्तकञ्चुका ॥ ४४ ॥
सलोमी गिरिजा चैव पिङ्गली सप्त कञ्चुकाः ।
औपाधिका इमा ज्ञेया. पारदे कीर्तिता. प्रिये ! ॥ ४५ ॥

यौगिका दोषाः ॥

विष नागश्च वङ्गश्च यौगिकश्च त्रय स्मृता. ।

दोषाणां स्वरूपम् ॥

भौम. कुष्ठकरश्चाप्यो दोषोद्रेक करोति स ॥ ४६ ॥
आग्नेय कुरुते दाह वायव्यश्शूल कृद्भवेत् ।
वार्धिर्यं नाभसो दोषो गजत्वग्गजचर्मकृत् ॥ ४७ ॥
पुण्डरीको दद्रुकरो विसर्पश्च विसर्पकृत् ।
हारिद्र. पाण्डुकृत् प्रोक्तो रक्तचर्माक्षिपाटलम् ॥ ४८ ॥
नारङ्गो दुम्बर कुष्ठ रक्तबीजो मसूरिका ।
असह्याग्निर्मोहकारी मण्डूकश्चर्मकीलकृत् ॥ ४९ ॥
मलो मूर्च्छाकरो देवि ! ख्याता दोषोद्भवास्तथा ।
कालिका कृष्णवर्णं च मलिनी मलसम्भवम् ॥ ५० ॥
कपोती स्रवसादं च विस्फोट रक्तकञ्चुका ।
सलोमी वमनं कुर्यात् गिरिजा जाड्यकारिणी ॥ ५१ ॥
पिङ्गळी नेलरूपश्च दोषा कचुकजास्स्मृता ।
विषं मृत्युप्रदो नागो जाड्य वङ्गस्सुरार्चिते ! ॥ ५२ ॥

कुरुते पूतिगन्धत्वं गदा यौगिकसम्भवाः ।
रसस्य स्थानान्तरगतिः ॥
प्रथमार्तवसुस्नाता सुरूपा शुभलक्षणा ॥ ५३ ॥
शुद्धाम्बरधरा माल्यगन्धलिप्ता सुभूषिता ।
उत्तमाश्वसमारूढा रतिसङ्गविवर्जिता ॥ ५४ ॥
अभ्यर्च्य गणनाथं च भैरवं च गुरुं पुरा ।
रसेन्द्रभैरवं ध्यात्वा कूपस्थं पारदं प्रिये ! ॥ ५५ ॥
पश्येच्छीघ्रं ततो गच्छेत् न पुनः पृष्ठमीक्षयेत् ।
एकयोजनमात्रेण कुमारी ह्यसाधना ॥ ५६ ॥
तदानीमाहरेत्तु कुमारीं संजिघृक्षया ।
कूपमध्यात्समुत्पत्य सोऽनुधावति तां प्रति ॥ ५७ ॥
यावद्योजनमागत्य पुनः कूपे विशेत्क्षणात् ।
परित. कृतगर्तेषु तेषु तेषु च संस्थितम् ॥ ५८ ॥
तं रसेन्द्रं शुचिर्भूत्वा गृह्णीयाद्रससदेशिकः ।
गौरवादग्निवदनात् पतितो दरदाह्वये ॥ ५९ ॥
देशे स सूतो भूलीन. तन्त्रज्ञै रसकोविदः ।
निक्षिप्य मृत्तिकायन्त्रे पातनाख्ये समागतः ॥ ६० ॥
पारदो गृह्यते देवि ! दोषहीनस्स उच्यते ।
एवमेवं तत्र तत्र सिद्धविद्याधरैस्सदा ॥ ६१ ॥
निक्षेपित. पारदेन्द्रो विद्यते देवि ! सिद्धिदः ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमलीकरणविश्रान्तौ प्रथमोल्लासः ॥

॥ द्वितीयोल्लासः ॥

श्रीभैरवी—

रसोपदेशदातारं तच्छिष्यं कौलिनीप्रियम् ।
रसपूजां तु पृच्छामि यथावत् कथयस्व मे ॥ १ ॥

श्रीभैरवः—

रसोपदेशलक्षणम् ।

शृणु भैरवि ! तत्सर्वमपूर्वं कथयामि ते ।
आचार्यो ज्ञानवान्दक्षः शीलवान्गुणवान्शुचि ॥ २ ॥
धर्मज्ञस्सत्यसन्धश्च रसशास्त्रविशारदः ।
वेदवेदान्ततत्वज्ञो निर्मलश्शिववत्सलः ॥ ३ ॥
देवीभक्तस्सदा शान्तो रसमण्डपकोविदः ।
मन्त्रसिद्धो महावीरो देवतायागतत्परः ॥ ४ ॥
रसदीक्षाविधानज्ञो मन्त्रौषधमहारसान् ।
रागसंख्या बीजकल्पं द्वन्द्वमेलापनं विडम् ॥ ५ ॥
रञ्जनं सारणां तैलं दळानि क्रामणानि च ।
वर्णोत्कर्षं मृदुत्वं च जारणं बालवृद्धयोः ॥ ६ ॥
खेचरीं भूचरीं चैव यो वेत्ति स गुरुर्भवेत् ।

शिष्यलक्षणम् ।

गुरुभक्तस्सदाचारो लोभमायाविवर्जितः ॥ ७ ॥
निस्पृहो निरहङ्कारो सत्यवाङ्नियमस्थितः ।
निरालस्यस्स्वधर्मज्ञः षट्कर्मनिरतस्सुधीः ॥ ८ ॥
दम्भहिंसादिनिर्मुक्तः शिवाचारेषु दीक्षितः ।
अत्यन्तसाधकश्शान्तो मन्त्रानुष्ठानतत्परः ॥ ९ ॥

दान्तश्चिप्यस्य विज्ञेय शक्तिमान् गतमत्सर ।

काकिनीलक्षणम् ।

आकुञ्चितस्निग्धकेशा पद्मपलाशायतेक्षणा ॥ १० ॥
दीर्घोत्तुङ्गमाणकेशा विद्रुमाधरशोभिता ।
दाडिमीबीजदशना कम्बुग्रीवोन्नतस्तनी ॥ ११ ॥
शिरीषमालामृदुलबाहुपाशविराजिता ।
सङ्कीर्णोरुस्थला निम्ननाभि सूक्ष्मा चलाङ्गका ॥ १२ ॥
तलोदरी रोमराजिवलित्रयविभूषिता ।
विशालजघनोपेता रम्भोरु सुभगा प्रिया ॥ १३ ॥
कादलीपमच्छाया च पाटलाभिसरोरुहा ।
शोणामलनखोपेता राजहंसगतिद्युभा ॥ १४ ॥
कलकोकिलनिध्वानकलकण्ठादिमञ्जुला ।
पिप्पलच्छदसङ्काशसारमन्दिरमण्डिता ॥ १५ ॥
युवती श्यामला स्निग्धा सुरूपा शुभलक्षणा ।
चुम्बनस्पर्शनालेपरतिकर्मविचक्षणा ॥ १६ ॥
बहुले या पुष्पवती पक्षे सा काकिनी स्मृता ।
स्वसवर्णसमुद्भूता ग्रह्या वाऽप्यन्यवर्णजा ॥ १७ ॥
रसकर्मणि दीक्षाया प्रयोगे च रसायने ।

काकिनीत्वापादनम् ।

काकिन्यभावे तरुणी सुरूपाऽन्याऽथवा भवेत् ॥ १८ ॥
गन्धकं गोघृतोपेत निष्क त्रिसप्तवासरम् ।
प्रातर्दद्यात्तु सा नारी काकिनीसदृशा भवेत् ॥ १९ ॥
धार्मिक पापभीरुश्च बलवान् ज्ञानचित्तम ।

न्यायश्रेष्ठस्सर्वसमो रसागमविशारदः ॥ २० ॥
भूपतिश्चास्य मन्त्री च सर्वशास्त्रविशारदः ।
सर्वधर्मरतः श्रेष्ठो न्यायमार्गप्रवर्तकः ॥ २१ ॥

रसशालानिर्माणम् ।

रसशालां प्रवक्ष्यामि रसेन्द्रस्य वरानने ।
निर्णयेच्च निरातंके देशे च निरुपप्लवे ॥ २२ ॥
आस्तिकप्राणिसुभगे धनधान्यसमाकुले ।
सौराज्ये पूर्णविभवे निरपाये ह्यनिन्दके ॥ २३ ॥
नगरे सर्ववर्णाढ्ये महामाहेश्वरावृते ।
तत्रापि विजये स्थाने पवित्रे च सुरक्षिते ॥ २४ ॥
सव्यालपशुपक्ष्यादिसंबाधपरिवर्जिते ।
समस्थले च प्राकारपरिघार्गळभूषिते ॥ २५ ॥
नारङ्गदाडिमडह(?)जंबीरफलपूरके ।
तालहिन्तालवकुलनारिकेलाम्लपाटले ॥ २६ ॥
अशोकजंबूपनसप्रियालपुन्नागमण्डिते ।
कपित्थपूगसरळदेवदारुसुबिल्वके ॥ २७ ॥
धात्रीन्यग्रोधचरणमधूकाम्रातमण्डिते ।
केतकीमल्लिकाजातीयूथिकामालतीयुते ॥ २८ ॥
मागधीकुन्दकुरवतिलके शतपत्रके ।
कुमुदोत्पलकल्हारपुण्टरीकांबुजोत्पले ॥ २९ ॥
हंससारसकारण्टचक्रवाकविराजितैः ।
सरोभिश्शीतलजले परितः परिवेष्टिते ॥ ३० ॥
शीतानिलाभिलुठितललितप्रसवाञ्चिते ।
चित्रोद्यानेऽतिरुचिरे रसशालां प्रकल्पयेत् ॥ ३१ ॥
षोडशस्तम्भरुचिरां चतुरश्रां समायताम् ।

मनोज्ञां देवदेवेशि ! मत्तवारणसंयुताम् ॥ ३२ ॥
वातायनसमोपेतां कवाटार्गलरक्षिताम् ।
कक्षापताकासंयुक्तां सर्वोपकरणोज्ज्वलाम् ॥ ३३ ॥
समालिखितदिक्पालां समर्चितविनायकाम् ।
प्रतिष्ठितोमामाहेशां द्वारपालैश्च रक्षिताम् ॥ ३४ ॥
भेरीकाहलघण्टादिदिव्यवाद्यविनादिताम् ।
वास्तुलक्षणसंयुक्तां रसशालां प्रकल्पयेत् ॥ ३५ ॥
शालायां वेदिका कार्या सुदृढा दर्पणोपमा ।
इष्टकैः खचिता रम्या ससोपाना सलक्षणा ॥ ३६ ॥
कपिलागोमयालिप्ता हिरण्यकलशावृता ।

रसेन्द्रपूजाविधिः ।

वेदिकायां रसेन्द्रस्य भद्रपीठं प्रकल्पयेत् ॥ ३७ ॥
भद्रपीठे लिखेत्सम्यक् सिन्दूरेण द्विहस्तकम् ।
षट्कोणं वसुपत्रं च तद्बहिश्चाष्टपत्रकम् ॥ ३८ ॥
कमलं चतुरश्रं च चतुर्द्वारोपशोभितम् ।
रसलिङ्गं न्यसेद्यन्त्रे पुष्पाद्यैश्च समर्चयेत् ॥ ३९ ॥

रससन्ध्या ॥

अथ सन्ध्यां प्रवक्ष्यामि रसकर्मफलप्रदाम् ।
प्रविशेद्रससालां च स्नातश्शुद्धोऽनुलेपितः ॥ ४० ॥
शुक्लमाल्याम्बरधरः संयतात्मा जितेन्द्रियः ।
यतवाग्भक्तश्च सत्यवादी दृढव्रतः ॥ ४१ ॥
उपविश्य समाचामेत् मृदुस्थे चित्रकम्बले ।
वाङ्मयाश्रीयुतं तोयमात्मविद्याशिवात्मकम् ॥ ४२ ॥
तत्त्वं च शोधयामीति त्रिवारं विधिवत्पिबेत् ।
ध्यायेद्भरद्गायत्री त्रिवारं प्रजपेत्प्रिये ॥ ४३ ॥

रसभैरवगायत्रीं शृणु भैरवि! तत्वतः।
" ऐं रसेश्वराय विद्महे रसाङ्कुशाय धीमहि।
तन्नस्सूतः प्रचोदयात् ॥ "
कोटिसूर्यप्रतीकाशं दशकोटीन्दुसन्निभम् ॥ ४४ ॥
शुभ्रं पञ्चमुखं देवं त्रिणेत्रं चन्द्रशेखरम्।
अष्टादशभुजं शान्तं पञ्चकृत्यपरायणम् ॥ ४५ ॥
शुक्लमाल्यांबरधरं नागयज्ञोपवीतिनम्।
शुद्धस्फटिकसङ्काशं प्रेतारूढं रसेश्वरम् ॥ ४६ ॥
नीलकण्ठं च सर्वज्ञं सर्वाभरणभूषितम्।
वरदं रसशास्त्रं च पारदं भुजगं सुधाम् ॥ ४७ ॥
शङ्खभैषज्यकोदण्डशूलखड्गाङ्गसायकम्।
डमरुं करवालं च गदां पावकमीश्वरि! ॥ ४८ ॥
आरोग्यं दिव्यमालां च ह्यभयं द्विभुजैः करैः।
रसाङ्कुशीं निजोत्सङ्गे बिभ्राणं वृषवाहनम् ॥ ४९ ॥
कर्पूरभाररुचिरं मन्दहासाननं शिवम्।
रसभैरवमाचिन्त्य तस्योत्सङ्गे रसांकुशीम् ॥ ५० ॥
अङ्कुशं चाक्षमालां च दधतीं दक्षहस्तयो।
पाशाभयं च बिभ्राणां दक्षिणेतरहस्तयोः ॥ ५१ ॥
चतुर्भुजां रक्तवर्णां त्रिणेत्रामिन्दुशेखराम्।
रक्ताम्बरधरां देवीं कम्बुग्रीवां कृपामयीम् ॥ ५२ ॥
रत्नालङ्काररुचिरां मन्दहासविराजिताम्।
ध्यायेद्रसाङ्कुशीं देवीं देवस्याभिमुखीं शिवाम् ॥ ५३ ॥
ततो भस्म समादाय वामहस्तेन धारयेत्।
नैवाधःपतितं पात्रे गृहीत्वा गोमयं सुधीः ॥ ५४ ॥"

विशोष्य प्रदहेत्कुण्डे क्रमेण धारयेत्प्रिये ! ।
पुनरुद्धारणं चैव सद्योजातादिभिर्भवेत् ॥ ५५ ॥
निरीक्षणं प्रोक्षणं च ताडनाभ्युक्षणं तथा ।
सद्योजातादिभिर्मन्त्रैरभिमन्त्र्य च तत्पुनः ॥ ५६ ॥
मूर्ध्नि वक्त्रे च हृदये गुह्ये चरणयोः क्रमात् ।
ईशानाद्यैः पञ्चमन्त्रैस्तत्तत्स्थानेषु निक्षिपेत् ॥ ५७ ॥
सर्वाङ्गोद्वलनं कुर्यात् भस्मना पञ्चभिर्यथैः ।
संकल्पं विधिवत्कुर्यात् रसाचार्यो महेश्वरः ॥ ५८ ॥
प्राणायामत्रयं कृत्वा मूलमन्त्रेण पार्वति ! ।
प्रोक्षयेन्मन्त्रितं तोयं मूर्ध्नि वामकरस्थितम् ॥ ५९ ॥
आचम्य च पुनस्तोयं मूलमन्त्रेण मन्त्रितम् ।
त्रिधा दक्षिणहस्तस्थं पिबेदाचमनं ततः ॥ ६० ॥
अर्घ्यं मूलेन दत्त्वा त्रिः पुनराचम्य पार्वति ! ।
अष्टोत्तरशतं जप्त्वा मूलमन्त्रमुदारधीः ॥ ६१ ॥
समर्पयेच्च सूताय रससन्ध्येयमीश्वरि ! ।
त्रिकालमेवं कुर्वीत सन्ध्यां सर्वाघनाशिनीम् ॥ ६२ ॥

रसांकुशरसांकुशी- मूलमन्त्रोद्धारः ॥

वक्ष्येऽहं मूलमन्त्रस्य शृणूद्धारक्रमं प्रिये ! ।
वाग्भवा कमला चाथ चतुर्थ्यन्तो रसेश्वरः ॥ ६३ ॥
ततो महाकालपदं महाबलपदं ततः ।
अघोरभैरवपदं वज्रवीरपदं ततः ॥ ६४ ॥
क्रोधकालपदं चैतत्सर्वं संबुद्धिसंयुतम् ।
कपर्दयुगांतयुतस्साधो(स्यादौ ?)दन्तस्सबिंदुकः ॥ ६५ ॥
इदं पञ्चाक्षरं कूटं ततः कर्पणसंयुतः ।
सविसर्गोऽप्ययं कूटश्चतुर्वर्णात्मकः प्रिये ॥ ६६ ॥

रसेन्द्रभैरवस्यायं मन्त्रो द्वात्रिंशदर्णक ।
गोपितस्सर्वतन्त्रेषु रहस्योऽत्यन्तदुर्लभ ॥ ६७ ॥
रसाकुशामन्त्रमहं वक्ष्यामि शृणु भैरवि ! ।
वाग्भवा भुवनेशी च रमा मकरकेतन ॥ ६८ ॥
रसाकुशा चतुर्थ्यां च नमोन्तो द्वादशार्णक ।
मन्त्रो रसाङ्कुशायाश्च तव देव्या प्रकीर्तित ॥ ६९ ॥
रसभैरवमन्त्रस्य छन्दोऽनुष्टुप् प्रकीर्तित ।
नन्दिकेश ऋषि प्रोक्तो देव. श्रीरसभैरव ॥ ७० ॥
रं बीज ल भवेत्कीलं अन्त्यार्णेशशक्तिरीरित ।
रसाकुशायास्स्कन्दस्याद् बीजं कीलक रस. ॥ ७१ ॥
नमश्शक्तिरिति ख्यातं रहस्यं मन्त्रमुत्तमम् ।

रसलिङ्गार्चना ।

रसलिङ्गार्चन वक्ष्ये भैरवि ! शृणु तत्वत ॥ ७२ ॥
वामपाद पुरस्कृत्य प्रविशेद्यागमन्दिरम् ।
आसने मृदुले स्थित्वा शुचिस्सयतमानस ॥ ७३ ॥
प्राणानायम्य सकल्प्य श्रीगुरुं शिरसि स्थितम् ।
शुद्धस्फटिकसकाश प्रशान्त वरदाभयम् ॥ ७४ ॥
स्मरेत्तन्नाम पूर्वं च तदनुज्ञामवाप्य च ।
दिवि स्थिताश्च ये भूता भूमिस्था विघ्नकारिण ॥
पाताळे ये महाभूता ते नश्यन्तु शिवाज्ञया ।
अनेनैव च मन्त्रेण दिग्विदिक्ष्वक्षतान् क्षिपत् ॥ ७६ ॥
पुष्पमस्त्राय फडिति निक्षिपेदन्तरिक्षके ।
सर्वशत्रुप्रमथनी चेति दक्षिणपाणिकाम् ॥ ७७ ॥
त्रिवार घातयेद्भूमौ प्राणायामो भवेत्पुन ।
रसेन्द्रभद्रपीठस्य दक्षिणे चतुरश्रक ॥ ७८ ॥

मण्डलं हस्तमात्रं च सार्वं कुर्यात्सुशोभनम् ।
त्रिकोणवृत्तषट्कोणचतुरश्रं भवेत्क्रमात् ॥ ७९ ॥

इन्द्रादिलोकपालांश्च ततन्नामपुरस्सरम् ।
प्रणवादिनमोऽन्तैश्च पूजयेत्कुसुमाक्षतैः ॥ ८० ॥

वाग्भायाकमलार्चाभैर्हृदयादीन्प्रपूजयेत् ।
प्राच्यामवाच्यां क्रमशः प्रतीच्योत्तरयोरिशवे ! ॥ ८१ ॥

ईशानलासुरमरुत्कोणे नेत्रे प्रपूजयेत् ।
अस्त्रं सर्वासु काष्ठासु चतुर्थ्यन्तं फडन्तकम् ॥ ८२ ॥

छोटिका दर्शयेदष्ट पश्चादाधारमाहरेत् ।
तत्रैवावाहयेदग्निमण्डलं बीजमूलकम् ॥ ८३ ॥

अग्नेर्दश कलास्तत्र पूज्या गन्धाक्षतैः क्रमात् ।
ततः पात्रं समादाय भावयेत्सूर्यमण्डलम् ॥ ८४ ॥

मार्तण्डद्वादशकलास्तत्रार्च्याश्चन्दनाक्षतैः ।
गन्धोत्तमान्वितं तोयं पूरयेदर्घ्यपात्रकम् ॥ ८५ ॥

चिन्तयेदैन्दवं बिम्बं तत्कलास्तत्र पूजयेत् ।
मध्ये त्रिकोणमालिख्य शक्तिबीजं समुल्लिखेत् ॥ ८६ ॥

तत्र क्षिपेत् गन्धपुष्पं मूलमन्त्रं त्रिधा जपेत् ।
पूर्वादिदिक्षु चतसृषु चतुष्पालाणि धारयेत् ॥ ८७ ॥

पूरयेत्पूर्ववत्तानि गन्धपुष्पाक्षतैर्यजेत् ।
प्रोक्षयेन्मूलमन्त्रेण. मध्यपात्रोदकेन च ॥ ८८ ॥

पालाणि निजगात्राणि पूजाद्रव्याणि सर्वतः ।
स्वागतश्चतुरश्रं च मण्डलं परिकल्पयेत् ॥ ८९ ॥

पूर्ववत्पञ्चपालाणि पूरयेच्छुद्धवारिणा ।
निक्षिपेन्मध्यमे सूतं रत्नं दक्षिणके क्षिपेत् ॥ ९० ॥

स्वर्णं तद्वामपात्रे च तत्समीपे कुशं न्यसेत् ।
रत्नपात्रसमीपस्थे पात्रे स्यादष्टगन्धकम् ॥ ९१ ॥
प्रतिपात्रे त्रिकोणं च लिखेन्मायासमन्वितम् ।
न्यसेद्गन्धाक्षतं पुष्पं त्रिधा मूलेन मन्त्रयेत् ॥ ९२ ॥
सप्तधा रसपात्रं च मूलमन्त्रेण मन्त्रयेत् ।
रसपात्रोदकेनैव पूजाद्रव्याणि चात्मनः ॥ ९३ ॥
शरीरमुत्तमाङ्गं च प्रोक्षयेत्पीठदीपकम् ।
आसनस्य ऋषिर्मेरुः सुतलं छन्द ईरितम् ॥ ९४ ॥
कूर्मरूपी तु भगवान् देवता परिकीर्तिता ।
" पृथ्वि ! त्वया धृता लोका देवि ! त्वं विष्णुना धृता ॥
त्वं च धारय मां देवि ! पवित्रं कुरु चासनम् " ।
अनेनैव तु मन्त्रेण चासने कुसुमं क्षिपेत् ॥ ९६ ॥

॥ भूतशुद्धिः ॥

भूतशुद्धिं प्रवक्ष्यामि पृथ्वी पीता सवज्रका ।
कठिना लंबीजयुता जान्वन्ताङ्गुष्टमूलतः ॥ ९७ ॥
ध्येया जान्वादिकटयन्तं उपर्यस्यार्धचन्द्रका(गा) ।
शुभ्रा वं बीजसहिता विचिन्त्या द्रवरूपिका ॥ ९८ ॥
कट्यादि हृदयान्तं च वह्निर्ध्येयस्त्रिकोणगः ।
रं बीजं रक्तवर्णश्च स्वस्तिकेन विभूषितः ॥ ९९ ॥
हृदादिकण्ठपर्यन्तं वायुः स्मर्योऽञ्जनप्रभः ।
यं बीजसहितो देवि ! षड्बिन्दुपरिभूषितः ॥ १०० ॥
षट्कोणः कर्णदेशाच्च ब्रह्मरन्ध्रान्तमीश्वरि ! ।
वर्तुलं हंबीजयुतं महाकृष्णं वियत्स्मरेत् ॥ १०१ ॥
पृथिवीमप्सु च तास्त्वग्नौ स च वायौ स सोऽम्बरे ।
मेळयित्वा द्वादशान्ते स्थापयेत्परमेश्वरि ! ॥ १०२ ॥

यं बीजेनात्मनो देहं मूलाधाराद्विशोषयेत् ।
षडाधाराणि निर्भिद्य यावत् ब्रह्मबिलं प्रिये ! ॥ १०३ ॥
र बीजेन दहेद्देहं सर्वमाप्लावयेत्तत ।
वबीजेन द्रवीभूतं ब्रह्मरन्ध्रेन्दुमण्डलात् ॥ १०४ ॥
स्यन्दमानामृतेनैव तनुमाप्लावयेच्छिवे ! ।
आकाशाद्वायुमादद्यात्तस्माद्वह्निं समाहरेत् ॥ १०५ ॥
वह्नेरापस्समादेयास्ताभ्यो भूमिं समाहरेत् ।
एवं पञ्च च भूतानि स्वस्वस्थाने नियोजयेत् ॥ १०६ ॥
वामकुक्षिस्थित पापपुरुष कृष्णरूपिणम् ।
ध्यायेत्त निर्गतं देवि ! खड्गचर्मधरं परम् ॥ १०७ ॥
न्यास रसाङ्कुशेनैव कृत्वाऽङ्गुलिहृदादिषु ।

" ऐं ह्रीं श्रीं क्ष्मौं क्ष्म हा ह्रीं हूं है हौं ह फट् रसेश्वराय महा-कालभैरवाय शिखायै वषट् । रौद्ररूपाय कृष्णपिङ्गललोचनाय अवतर (२) अवतारय (२) जल्प (२) जल्पय (२) शुभाशुभ कथय (२) कथापय (२) मम महारक्षा कुरु कुरु कारय (२) मम रससिद्धि देहि देहि १८८८ ॥

महाकालभैरवाय हृदयाय नम. । पूर्ववन्महाबलभैरवाय शिरसे स्वाहा । पूर्ववत् अघोरभैरवाय शिखायै वषट् । पूर्ववत् वज्रवीरभैरवाय कवचाय हुं । पूर्ववत् क्रोधभैरवाय नेत्रत्रयाय वौषट् । पूर्ववत् कालभैरवाय अस्त्राय फट् एवमङ्गुलिन्यास ॥

प्रतिबीजैस्समुच्चार्य चतुर्थ्यन्तं रसाङ्कुशम् ॥ १०८ ॥
हृदादिपञ्चस्थानेषु विन्यसेद्बीजपञ्चकम् ।
ततश्चास्त्राय फडिति चोटिका दिक्षु दर्शयेत् ॥ १०९
मातृका च कलान्यास पाद्यो(बीज ?)न्यास च कोष्ठकम्
प्रकुर्वीत ततो देवि ! चान्तर्यजनमाचरेत् ॥ ११० ॥

कुम्भकेन हृदम्भोज सफुल्लं विदधाति हि ।
हत्पद्मकर्णिकाया च रसमूर्तिं च चिन्तयेत् ॥ १११ ॥

मानसैर्गन्धपुष्पाद्यैरुपचारै प्रपूजयेत् ।
स्वदेहं गन्धपुष्पाद्यैरलङ्कुर्याद्यथासुखम् ॥ ११२ ॥

अन्तर्यजनमेव स्यात् बहिर्यजनमाचरेत् ।
अस्त्रेण लिङ्ग सम्प्रोक्ष्य लिङ्गशुद्धि विधाय च ॥

वस्त्रपूतेन तोयेन पूरिता वर्धनीं प्रिये ! ।
दक्षपार्श्वे समिनेद्य पूजयेत्ता विधानत ॥ ११४ ॥

पीठे सिन्धूरजसा विदध्याच्चतुरश्रकम् ।
षट्कोण विलिखेत्तस्मिन् ऋजु स्वर्णशलाकया ॥

वसुपत्र चाष्टपत्र सच्चतुर्द्वारभूगृहम् ।
चतुरश्रं बहिर्भागे दिक्पालान्पूजयेत्प्रिये ! ॥ ११६ ॥

नन्दिन च महाकाल भृङ्गि रिटि महाबलम् ।
कुम्भकर्णं च सुग्रीव भृङ्गक च हृदायुधम् ॥ ११७ ॥

चतुर्द्वारि तु विन्यस्य द्वौ द्वौ प्रागादिपूजितौ ।
रुक्म रौप्य ताम्रसीस वङ्गकान्नराठ क्रमात् ॥ ११८ ॥

प्रागादिद्वारपु सपूज्य क्रमाद्वै द्वे महेश्वरि ।
भूगृहाभ्यन्तरे प्राच्या शुक्रमन्त्रौ ग्रह यजेत् ॥ ११९ ॥

दक्षिणस्या यजेद्भुद्रमासुरे च समीरणम् ।
पश्चिमस्या शिव वह्नि वायव्यामुत्तरे हयुमाम् ॥ १२० ॥

यजेत्पावकमैशान्या ततश्चाष्टदलाग्रके ।
प्रागादौ गन्धक ताळ कासीसं च मनश्शिलाम् ॥

कुङ्कुष्ट माक्षिक चैव नृपावर्तं च गेरिकम् ।
लेपिका क्षेपिका चैव कामिका रजिका तथा ॥ १२२ ॥

लोहटी बन्धकारी च भूचरी मृत्युनाशिनी ।
विभूतिः खेचरी चैव दश दृत्यः क्रमेण च ॥ १२३ ॥

पूज्यास्त्वष्टदले पद्मे हृद्यूर्ध्वाधस्ताद्दलेषु च ।
माणिक्यमुक्तागैर्द्यनीलगारुडविद्रुमाः ॥ १२४ ॥

गोमेदः पुष्परागश्च मण्यस्तत्सर्वसिद्धिदाः ।
द्वितीयचतुपत्रस्य दलाग्रेषु प्रपूजयेत् ॥ १२५ ॥

अष्टादशभुजा रुद्राः पञ्चवक्त्रास्त्रिनेत्रकाः ।
चन्द्रार्धशोभिमकुटाः नीलग्रीवा वृषध्वजाः ॥ १२६ ॥

स्वस्ववर्णधरास्सर्वे स्वष्टविद्येश्वरास्तु ते ।
पूजनीया महेशानि ! द्वितीयेऽष्टदलाम्बुजे ॥ १२७ ॥

रसकं विमलं ताप्यं चपलं तुत्थमञ्जनम् ।
षट्कोणस्य दलाग्रेषु सख्यस्त्युस्सर्वसिद्धिदाः ॥ १२८ ॥

वज्रवैकान्तवज्राभ्रकान्तपाषाणटङ्कणम् ।
भूनागसारकश्चैता. षडश्रेषु प्रपूजयेत् ॥ १२९ ॥

हिंगुळं सस्यकं चैव शिलाजत्वग्निजारकम् ।
तत्कर्णिकायां पूर्वादौ पराशक्तिचतुष्टयम् ॥ १३० ॥

हिंगुळ मालिनी शक्ति परा शक्तिश्च सस्यकम् ।
शिलाजत्वपरा शक्तिरग्निजार परापरा ॥ १३१ ॥

प्रणवादिनमोऽन्तैश्च तत्तन्नामपुरस्सरम् ।
मचतुर्थ्यां यजेदेतान् रसावरणसंस्थितान् ॥ १३२ ॥

मध्ये तु दिव्यशक्तीनां पूजयेद्रसगौरवम् ।
सप्तविंशतिनिष्के तु द्राविते शुद्धसूतके ॥ १३३ ॥

नवनिष्कं सूतराजं दिव्यलेप्यैकमानसः ।
सप्तच्छिद्रकृते यन्त्रे लिङ्गाकारे सुलक्षणे ॥ १३४ ॥

निष्टप्ते हाटके सूतं प्रतप्ते श्वभ्रपेच्छिले ! ।
मुहूर्तस्थाज्झरीतं तं रसलिङ्गं पयोऽन्तरे ॥ १२५ ॥

स्थापयेत पुनरादाय हयुपरिस्थं मलं हरेत् ।
संशुष्य च समीकृत्य लिङ्गं संप्रोक्षयेत्ततः ॥ १२६ ॥

एव रौप्यादिलोहैर्वा व्यस्तैर्वाऽथ समस्तकैः ।
अभ्रकादिमसत्वैर्वा लिङ्गं कुर्यात्स्वशक्तितः ॥ १२७ ॥

रसलिङ्गं द्विधा प्रोक्तं सकलं निष्कलं प्रिये ! ।
पूर्वोक्तं सकलं लिङ्गं निष्कलं केवलो रस. ॥ १२८ ॥

बुभुक्षूणा हि सकलं निष्कलं मोक्षमिच्छताम् ।
रसलिङ्गं हेमबद्धं ब्रह्मविष्ण्वीशवह्नय ॥ १२९ ॥

अपूजयन् रूप्यबद्धं गणेशस्कन्दनन्दिन ।
त्वयाऽभ्रसत्वसंबद्धं रसलिङ्गं प्रपूजितम् ॥ १३० ॥

ताम्रबद्धं रमावाणीकुबेरेन्द्रजलाधिपा ।
कान्तबद्धं यममरुन्नैऋतास्समपूजयन् ॥ १३१ ॥

वङ्गबद्धं सिद्धसाध्यविद्याधरमहर्षय. ।
नागबद्धं नागयक्षगन्धर्वोरगकिन्नरा ॥ १३२ ॥

तीक्ष्णबद्धं भद्रकाळीयक्षभूतपिशाचका ।
मुण्डबद्धं च दुर्गाम्बा चाप्सरोगुह्यकासुरा· ॥ १३३ ॥

निष्कळं रसलिङ्गं तु भृंग्याद्या योगिनोऽर्च्चयन् ।
उक्तानि रसलिङ्गानि मानवा फलकाक्षिण. ॥ १३४ ॥

पूजयेयु: प्रयत्नेन नित्यं सर्वार्थसिद्धये ।
उक्तानां रसलिङ्गानां प्राणसंस्थापनं शृणु ॥ १३५ ॥

प्राणानायम्य विधिवत् प्राणशक्तिं स्मरेच्छिवे ! ।
शोणिताम्भोधिमध्यस्थरक्ताम्भोजासनां पराम् ॥ १३६ ॥

रक्तांबरधरा रक्ता नानारत्नकिरीटिनीम् ।
विमलेन्दुकराजूटा रविवह्नीन्दुलोचनाम् ॥ १४७ ॥

कर्णतादङ्ककिरणारणीदृतकपोलकाम् ।
श्रीपर्णीकुसुमाकारनासावंशविराजिताम् ॥ १४८ ॥

प्रवाळपद्मरागाभबिम्बाधरविराजिताम् ।
कुरुविन्ददलाकारश्लक्ष्णदन्ताभिशोभिताम् ॥ १४९ ॥

शङ्खाभिरामकण्ठस्थमुक्ताहारविराजिताम् ।
अङ्गुलीयककेयूरकटकादिविभूषिताम् ॥ १५० ॥

पाशाङ्कुशेक्षुकोदण्डपुष्पबाणाभयप्रदाम् ।
रुधिरापूर्णपात्रेण शोभमानकराम्बुजाम् ॥ १५१ ॥

पीनस्तनतटोद्भासिहारकुङ्कुममण्डिताम् ।
काञ्चीमञ्जीरकटकपादाङ्गुलिविभूषिताम् ॥ १५२ ॥

प्राणप्रतिष्ठा लिङ्गस्य कुर्वीतैकाग्रमानस ।
सणि म(णि')ञ्च पाशश्च हस सोहमिति प्रिये ' ॥

अमुष्य लिङ्गस्य प्राण इह प्राण । अमुष्य लिङ्गस्य जीव इह स्थित । अमुष्य लिङ्गस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षु श्रोत्रजिह्वाघ्राणा इहागत्य सुख चिर तिष्ठन्तु सोऽहं हस स्वाहा । यत्किञ्चपसहों ॥ मों ह्रीं आ ॥

एतन्मन्त्र समुच्चार्य प्राणानावाहयेत्प्रिये ! ।

" अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषय. । ऋग्यजुस्सामानि छन्दासि । श्रीपराशक्तिर्देवता । आ बीजम् । ह्रीं शक्ति । —कम् । अमुष्य लिङ्गस्य प्राणप्रतिष्ठाया विनियोग ॥

आसन पूजयेत्पूर्वं गन्धपुष्पाक्षतादिभि. ॥ १५४ ॥

ह्रां आधारशक्तये नमः। ह्रीं कूर्माय नमः। ह्रूं अनंताय नमः। ह्रैं पृथिव्यै नमः। ह्रौं कन्दाय नम। अंकुराय नाळाय कर्णि(न्द)केभ्यः दलेभ्यः केसरेभ्यः कर्णिकायै तन्मध्ये धर्माय ज्ञानाय वैराग्याय ऐश्वर्याय अधर्माय अज्ञानाय अवैराग्याय अनैश्वर्याय नमः।

हृदंभोजस्थितं देवं सह देव्या महेश्वरि!।
आवाहयेत्सावरणं साङ्गशक्तिसमन्वितम् ॥ १५५ ॥
पीठे संस्थापयेल्लिङ्गं मूलेनार्घ्यं कुशोदकैः।
पाद्यं गन्धोदकैर्दद्यात् हैमेनाचमनं भवेत् ॥ १५६ ॥
रत्नोदकैर्भवेत्स्नानं सर्वं मूलेन शांभवि!।
एकादशेन रुद्रेण पवमानेन पार्वति! ॥ १५७ ॥
चमकैः पुरुषसूक्तैश्च फलैः पञ्चामृतैरपि।
नालिकेरेक्षुसलिलैः सुगन्धोदकवारिणा ॥ १५८
संस्नाप्य च ततो लिङ्गं पीठे संस्थापयेच्छिवे!।

लिङ्गस्य परित.— ॐ वामदेवाय नमः, ज्येष्ठाय, रुद्राय, कालाय, कलविकरणाय, बलाय, बलविकरणाय, बलप्रमथनाय, सर्वभूतदमनाय इत्यष्टासु दिक्षु मनोन्मनाय इति शिवसन्निधौ पुष्पैरभ्यर्च्य। ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुं ॥ ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्। ह्रां ईशानाय नम। ह्रीं तत्पुरुषाय नमः। ह्रूं अघोराय नमः। ह्रैं वामदेवाय नम। ह्रौं सद्यो जाताय नमः ॥

मूलमन्त्रेण देवाय दद्यात्पुष्पांजलिं प्रिये! ॥ १५९ ॥
मूलमन्त्रषडङ्गेन न्यासं कुर्याच्छिवस्य च।
लिङ्गस्य दक्षिणे भागे ऋगादीन्निगमानपि ॥ १६० ॥
ब्रह्माणं पृथिवीं तोयं विष्णुं रुद्रं हुताशनम्।
ईश्वरं पवनं चैवमाकाशं च सदाशिवम् ॥ १६१ ॥

श्रीकण्टममृतांशुं च भैरवं भास्करं तथा ।
परं शिवं परात्मानं पूजयेन्मतिमान् क्रमात् ॥ १६२ ॥

लिङ्गस्य वामपार्श्वे तु ब्राह्म्यादीस्तत्र मातरः ।
महालक्ष्मीं महाकालीं दुर्गां स्कन्दविनायकौ ॥ १६३ ॥

योगिन्यः क्षेत्रपालाश्च शक्तयश्चादिपीठकाः ।
ओड्याणशक्तिर्जालन्धरी तथा पूर्णा गिरिः प्रिये ! ॥

कामेश्वरीति संपूज्या रुद्रशक्तिस्सुरार्चिते ! ।
लोपामुद्रा कुब्जिका च कालसंकर्षणी तथा ॥ १६५ ॥

मधुरादिरसा गन्धाः सर्वधान्यानि पार्वति ! ।
दिव्यौषध्यस्सुधा हाला विषं चर्मादिधातवः ॥ १६६ ॥

इन्द्रियाणि मनो बुद्धिरहङ्कारश्च चेतनः ।
शब्दाद्या विषयाः पूज्या देहाङ्गानि च शाम्भवि ! ॥

लिङ्गस्य पश्चिमे भागे समुद्रास्सरितो नदा. ।
पर्वता मेरुमुख्याश्च भास्कराद्या नव ग्रहा. ॥ १६८ ॥

ज्योतिश्चक्रं ध्रुवश्चैव शिशुमारः प्रजापतिः ।
कलाः काष्ठाश्च घटिका मुहूर्ताः प्रहरा दिनम् ॥ १६९ ॥

रात्रि. पक्षश्च मासश्च ऋतुकालायनानि च ।
संवत्सरा युगाः कल्पा दिशस्तारास्तिथिस्तिस्रो ! ॥

पाताळानि च नागेन्द्रास्तथा कालाग्निरुद्रकाः ।
यक्षाः पिशाचभूताश्च राक्षसा दनुजास्तथा ॥ १७१ ॥

गुह्यका दुष्टवेताला राजयक्ष्मादयो गदाः ।
मन्त्राश्शस्त्राणि चास्त्राणि संपूज्य क्रमशः प्रिये ! ॥

लिङ्गस्य पूर्वभागे तु संपूज्या गुरुपंक्तयः ।
सिद्धास्साध्याश्च मुनयो योगिनो ब्रह्मवादिनः ॥ १७३ ॥

विद्याधरा किन्नराश्च गन्धर्वश्चाश्विनौ तथा ।
वसवोऽप्सरसा मुख्या शृङ्गारादिरसा नव ॥ १७४ ॥

गीत नृत्तानि तद्भेदा काश्यपाद्यास्तथा दश ।
रुद्रा समनव पूज्या भास्करा वह्नयस्त्रय ॥ १७५ ॥

विश्वे देवाश्च पितरो मातर पितृदेवता ।
कुलाचार्या रसाचार्या पूर्वाचार्या शिवार्चका ॥ १७६॥

मत्स्यादिदशजन्मानि जिनो लोकायतस्तथा ।
नरकाद्यास्सर्वलोका गरुडा गरुडाण्टका ॥ १७७ ॥

ब्रह्माण्डा खेचरास्सर्वे भूचराश्च जलेचरा
सम्पूज्य देवताम्सर्वा प्रणवादिनमोऽन्तकै ॥ १७८ ॥

तत्तन्नामचतुर्थ्यंतै पुष्पगन्धाक्षतै प्रिये ! ।
देवाय वस्त्रयुगल उपवीतद्वय तथा ॥ १७९ ॥

मधुपर्कं दिव्यगन्धमक्षतान् कुसुमानि च ।
सदा कैतकवर्ज्यानि दिव्यानि विदलानि च ॥१८०॥

तत्पुष्पाणि च कह्लारकमलोत्पलकैरपि ।
जातीचम्पकपुन्नागपूगनागञ्चकैः ॥ १८१ ॥

मागधीमाधवीमल्लीयूथिकाम्बुजानि च ।
दमनी मरुवं चैव रसेन्द्राय समर्पयेत् ॥ १८२ ॥

धूप दद्यान्न दीपञ्चापूपान्न घृतपायसम् ।
सपडूसानि शाकानि शुद्धगन्धोदमान्वितम् ॥ १८३ ॥

लेह्यं चोष्यादि नैवेद्य पारदेन्द्राय दर्शयेत् ।
हस्तप्रक्षालन देवि ! दद्याद्गन्धोदकेन च ॥ १८४ ॥

सुवासितानि पूगानि घनसारयुतानि च ।
अखण्डतानि सामाणि नागवल्लीदलानि च ॥ १८५ ॥

मुक्ताफलोद्भवं चूर्णं ताम्बूलं च समर्पयेत् ।
दर्पणं चामरद्वन्द्वं छत्रं नृत्तं च गीतकम् ॥ १८६ ॥

उपचारेषु सर्वेषु दद्यादाचमनं प्रिये ! ।
सर्वोपचारान्मूलेन दद्यात्स्तोत्रं जपेच्छिवे ! ॥ १८७ ॥

रसेन्द्रभैरवं देवं ध्यात्वा देवीं रसांकुशाम् ।
माहेश्वरांश्च विनतां गन्धपुष्पादिभिर्यजेत् ॥ १८८ ॥

अङ्गुष्ठानामिकाभ्यां च दद्याद्गन्धोत्तमान्वितम् ।
बिन्दुमूलेन देवाय देव्यै च गुरुपंक्तये ॥ १८९ ॥

क्रमादावरणस्थेभ्यो देवीभ्योऽपि च तर्पयेत् ।

"ह्रीं आनन्दशिवमूर्तिमाराधयामि । ह्रीं परानन्दशिवमूर्तिमाराधयामि । ह्रीं परापरानन्दशिवमूर्तिमाराधयामि । श्रीं आनन्दसिद्धमूर्तिमाराधयामि । श्रीं परानन्दसिद्धमूर्तिमाराधयामि । श्रीं परापरानन्दसिद्धमूर्तिमाराधयामि । क्लीं आनन्दगुरुमूर्तिमाराधयामि । क्लीं परानन्दगुरुमूर्तिमाराधयामि । क्लीं परापरानन्दगुरुमूर्तिमाराधयामि ॥"

तेभ्यो दत्वा प्रसादं च तैरनुज्ञापितस्स्वयम् ॥ १९० ॥
कुण्डल्यामात्मतत्त्वं च विद्यातत्त्वं च नाभिगम् ।
हृदये शिवतत्त्वं च सर्वतत्त्वं हि तालुगम् ॥ १९१ ॥
त्रितत्त्वमेवं सञ्चिन्त्य प्रसादं च समन्त्रकम् ।
ततः प्रज्वलितं स्मृत्वा ज्योतिरन्तर्गतं प्रिये ! ॥ १९२ ॥
स्वीकुर्वीत प्रसादं च यथेष्टं सुरसेविते ! ।
प्रीणन्ति पितरो हृष्टास्तृप्त्या सर्वदेवताः ॥ १९३ ॥
अज्ञाना ँ ह वमीतिः स एवाहं न संशयः ।

॥ रसेन्द्रबलिक्रमः ॥

गन्धोत्तमौदनं शुद्ध(?)क्षतजं च घृतं मधु ॥ १९४ ॥

संयोज्य पञ्चखण्डं च कृत्वा दद्यात्क्रमेण च ।
दक्षिणोत्तरपूर्वासु पश्चिमायां च मध्यमे ॥ १९५ ॥
तांस्तान्मन्त्रान्समुच्चार्य बलिं दद्यात्ततो नरः ।
प्रणवं मायां कमलां देवीं पुनमदं ततः ॥ १९६ ॥

ततो चटुकनाथाख्यं, कपिलं जटाभारभासुरं च, तत पिगळ त्रिणेत्र इमां बलि पूजां गृह्ण गृह्ण स्वाहा । ॐ ह्रीं श्रीं सिद्धयोगिनीभ्यस्सर्वमातृभ्यो नमः । ॐ ह्रीं श्रीं सर्वभूतेभ्यस्सर्वभूतपतिभ्यो नम । ॐ ह्रीं श्रीं स्थानक्षेत्रपाल इमां बलिं पूजां गृह्ण गृह्ण स्वाहा । ॐ ह्रीं श्रीं रसेन्द्र क्षेत्रपाल राजराजेश्वर इमां बलिं पूजा गृह्ण गृह्ण स्वाहा ॥

बलिं दद्यादिति शिवे सर्वविघ्नोपशान्तये ।
ततश्चाष्टोत्तरशत जपेन्मूल रसामृत ॥ १९७ ॥
ततः स्तोत्र जपेद्देवि रसभैरवतुष्टये ।
संतुष्टा सर्वदेवा. स्यु तुष्टे तु रसभैरवे ॥ १९८ ॥
अयं नित्यार्चनविधि प्रोक्तस्सर्वत्र दुर्लभ. ।

पारदपूजाफलम् ।

विद्धि मां पारदं देवि तत्स्मर्तां मत्सम प्रिये ॥
पारदस्त्वधिको मत्तो मदीयत्वाच्च सारत ।
रसस्य स्मरण पुण्यं दर्शनं स्पर्शनं तथा ॥ २०० ॥
पूजनं भक्षणं दानं गोदा पुण्यमुदीरितम् ।
सात्विकं राजसं चैव तामस त्रिविधं वपु ॥ २०१ ॥
सात्विकं मुक्तिदं शुभ्र बालं द्विभुजमण्डितम् ।
पूर्णपात्रं सूक्ष्मदण्डं द्विनेत्र किंकिणीस्रजम् ॥ २०२ ॥
राजसं भुक्तिदं रक्तं किरीटशशिशेखरम् ।
चतुर्भुजं च तरुण नीलकण्ठं त्रिलोचनम् ॥ २०३ ॥

सर्वैश्वर्यमदं ध्यायेत् शूलपात्रवरामयम् ।
तामसं कृष्णवर्णं च ज्वलद्दूर्ध्वशिरोरुहम् ॥ २०४ ॥

अष्टादशभुजं व्यक्षं पूर्वोक्तं चिन्तयेद्रसम् ।
सर्वसिद्धिप्रदं देवि सर्वकामफलप्रदम् ॥ २०५ ॥

स्मरणं रसराजस्य सर्वोपद्रवनाशनम् ।
हृदम्भोजस्थितं ध्यायेल्लक्ष्यन्त्येनांसि भैरवि ॥ २०६ ॥

दर्शनं पारदेन्द्रस्य हन्ति पापं त्रिकालजम् ।
सेतुकेदारपर्यन्तदिव्यलिंगौघदर्शने ॥ २०७ ॥

यत्पुण्यं लभते मर्त्यः तत्कोटिगुणितं भवेत् ।
पृथिव्यां सर्वतीर्थेषु सागरान्तेषु दर्शनात् ॥ २०८ ॥

स्नानपानादिभिः पुण्यं तत्कोटिगुणितं भवेत् ।
गोहत्यानियुतं देवि भ्रूणहत्याशतानि च ॥ २०९ ॥

ब्रह्महत्यासहस्राणि नश्यन्ति रसदर्शनात् ।
गवां कोटिप्रदानेन स्वर्णकोटिशतेन च ॥ २१० ॥

अश्वमेधसहस्रेण यत्पुण्यं तच्च दर्शनात् ।
रसस्य स्पर्शनं हन्यादगम्यागमनं प्रिये ॥ २११ ॥

परद्रव्यापहारं च पापं प्राणिवधार्जितम् ।
सप्तद्वीपे धरण्यां च पाताळे गगने दिवि ॥ २१२ ॥

यान्यर्चयंति लिंगानि तत्पुण्यं रसपूजया ।
स्वायंभुवेषु लिङ्गेषु दिव्येषु कृतपूजया ॥ २१३ ॥

यत्पुण्यं रसलिङ्गस्य पूजया तत्फलं भवेत् ।
योगिनोऽष्टाङ्गनिरता यत्पदं ब्रह्मवादिनः ॥ २१४ ॥

तत्पदं समवाप्नोति रसलिङ्गस्य पूजया ।
कुंकुमागरुकस्तूरीकर्पूरान्तर्गतं रसम् ॥ २१५ ॥

मूर्छितं रसलिङ्गाय दद्यादिष्टार्थसिद्धये ।
भक्षणाद्रसराजस्य सर्वपापं विनश्यति ॥ २१६ ॥

अनादिमायामलिनमात्मानं च विशोधयेत् ।
भवरोगं हरेच्छीघ्रं त्रितापं च विनाशयेत् ॥ २१७ ॥

रसराजस्य दानेन चतुरब्ध्यंतमेदिनीम् ।
महामेरुसमं स्वर्णं दत्वा यत्तत् फलं भवेत् ॥ २१८ ॥

ब्रह्मरूपी शुद्धरसो विष्णुरूपी स मूर्छितः ।
भस्मीकृतो रुद्ररूपी बद्धसूतस्सदाशिवः ॥ २१९ ॥

कामरूपी जलूकाभः कालरूपी च दोषवान् ।
मूर्छितो भस्मितो बद्धः पारदेन्द्रो महेश्वरि ॥ २२० ॥

व्याधिमृत्युदरिद्रत्वं हरतेऽसौ कृपाकर ।

रसेन्द्रस्तोत्रम् ।

ददासि त्वं रसेन्द्राशु शब्दस्पर्शनधूमत. ॥ २२१ ॥

स्वर्णमर्बुदकोट्यन्तं लाहि खेचरसिद्धिद ।
नमस्ते कालकालाय नमस्सर्वगुणात्मने ॥ २२२ ॥

वलीपलितनाशाय महावीर्यप्रदायिने ।
नमश्शास्त्रमहन्त्रे च मायांभोनिधिपारद ॥ २२३ ॥

पारदेन्द्र नमस्तुभ्यं कामिनीकेलिमन्मथ ।
सुधारूप त्रिदोषघ्न नमस्ते षट्रसात्मने ॥ २२४ ॥

घनत्वात्पृथिवीरूप द्रवत्वाज्जलरूपिणे ।
तेजोऽधिकत्वात्तेजस्विन् चाग्नेयत्वाद्वायुरूपिणे ॥

सूक्ष्मत्वाद्गगनरूपाय नमस्ते शून्यरूपिणे ।
नमस्ते योगयोग्याय सर्वादिसुरवन्दित ॥ २२६ ॥

वेदगोद्विजराजेन्द्रगुरुवीरादिहिंसया ।
सम्भूतक्षयकुष्ठादीन् रोगान् हरसि पावन ॥ २२७ ॥

नष्टेन्द्रियार्थानज्ञानान् त्राता त्वमसि पारद ।
सर्वौषधीभ्योऽप्यधिको ह्यणुमात्रोपयोगतः ॥ २२८ ॥

एकोऽपि सर्वदोषघ्नोऽरुचिनाशन ते नमः ।
त्वया सृष्टा महेन्द्राद्या सुरा ब्रह्मादयः कलाः ॥

चन्द्रार्कमहनक्षत्रशिवभैरवशक्तयः ।
ज्ञानाज्ञानगुणा लोका गन्धर्वोरगराक्षसाः ॥ २३० ॥

दिव्यौषधानि सर्वाणि सर्वसिद्धिकराण्यपि ।
सूतेन्द्र भवतः श्रीमन् कलां नार्हन्ति षोडशीम् ॥

प्रत्यक्षशंभो सूतेन्द्र किमन्यैर्भवति स्थिते ।
अणिमादिगुणोपेते नानासिद्धिप्रदायके ॥ २३२ ॥

योगिनो हेममुख्यानि लोहान्यक्षयतां सदा ।
अमृतत्वं प्राप्नुवन्ति सेवया तव कोज्वल(१) ॥

दृश्यादृश्यस्वरूपं त्वां भोगमोक्षप्रदं परम् ।
यो न जानाति सूतेन्द्र स मां वेत्ति कथं नर. ॥

गुरुर्माता पिता भ्राता धनं विद्या गतिस्सुहृत् ।
रस त्वमेव भूतानां त्वतः कोऽन्यो हितंकरः ॥

रसेन्द्र तव योगे च शास्त्रे स्तोत्रे रसायने ।
यस्तु भक्तियुतो लोके स एवाहं न संशयः ॥ २३६ ॥

ब्रह्मज्ञानेऽपि निष्णातो यस्त्वां निन्दति पारद ।
त्याज्योऽसौ सर्वलोकेषु नैवाहं रक्षितुं क्षमः ॥ २३७ ॥

यस्त्वां नास्तीति च वदेत् तस्य सिद्धिर्न कुत्रचित् ।
यस्त्वामस्तीति च वदेत्तस्य सिद्धिर्भवेत्सदा ॥ २३८ ॥

रसेन्द्रं यस्तु लोकेऽस्मिन्कुलीनो वाऽधमान्वयः ।
संस्कृतं कुरुते सूत त्वामष्टादशकर्मभिः ॥ २३९ ॥
स पुण्यस्त्रती धन्यः स श्लाघ्यस्स च बुद्धिमान् ।
स पुमान्स च सर्वज्ञः स सिद्धस्स च दैवतम् ॥
तत्कुलं पावनं भूमिः पुण्या राजा जयान्वितः ।
तत्पुर सोत्सवं नित्यं कृतार्था च तदम्बिका ॥ २४१ ॥
तस्य सन्दर्शनं पुण्यं स्पर्शनं भाषणं तथा ।
प्रत्यक्षादिप्रमाणेन पारद त्वं सदाशिवः ॥ २४२ ॥
त्वत्तो देहादि लोहानि वज्रत्वं यान्ति हेमताम् ।
रसेन्द्र त्वत्प्रसादेन मानिन्यो मृगलोचना. ॥ २४३ ॥
चक्रवाकसमोत्तुङ्गपीनवृत्तस्तनोज्ज्वलाः ।
चञ्चला मन्मथासक्ता विद्रुमाधरशोभिताः ॥ २४४ ॥
शुकतुण्डप्रतीकाशनखतीक्ष्णनखांकुरा· ।
शिरीषमालासुभुजाः चम्पकस्रक्समप्रभा. ॥ २४५ ॥
निम्ननाभिसमुद्भूतरोमराजिविराजिताः ।
सर्वांगसौष्ठवाः कान्ता· स्निग्धा वश्या भवन्ति च ॥
सूतेन्द्र शुष्ककाष्ठानां राशिमग्निर्यथा दहेत् ।
तथैव जन्मदारिद्र्यमृत्युदु.खमहामयान् ॥ २४७ ॥
जारणार्थेऽग्निमध्ये त्वां धारयेत्कति वासरान् ।
तावत्कल्पसहस्राणि शिवलोके सुखं वसेत् ॥ २४८ ॥
तव कार्येषु सूतेन्द्र किंचिद्द्रव्यं व्ययेन्नरः ।
तेषां ददासि तद्द्विगं कोटिकोटिगुणाधिकम् ॥ २४९ ॥
परमा पारदी विद्या सर्वलोकेषु दुर्लभा ।
भोगमोक्षप्रदा पुण्या पुत्रारोग्यप्रवर्धनी ॥ २५० ॥

ये त्वां निन्दन्ति सूतेन्द्र मार्जालखरवायसाः ।
जम्बूकाः ऋक्षमाः श्वानः वलीवान्व्यधिरा जटाः ॥
मूकाः कुब्जाः पङ्गवश्च व्यङ्गा वन्ध्याश्च रोगिणः ।
कैवर्ताः पापकर्माणो जायन्तेऽनेकजन्मसु ॥ २५२ ॥
भवतो निन्दकैस्सार्धं भाण्डपक्वान्नमिश्रणम् ।
यः कुर्यादासनं शय्यां भोजनालापसंगतिम् ॥ २५३ ॥
स पापिष्ठो भवेत्त्याज्यः सर्वधर्मबहिष्कृतः ।
इति स्तोत्रं मया प्रोक्तं पारदेन्द्रस्य भैरवि ॥ २५४ ॥
यः पठेत् शृणुयाद्भक्त्या त्रिसन्ध्यं रससिद्धये ।
ब्रह्महत्यादिपापैश्च पातकैरुपपातकैः ॥ २५५ ॥
त्रिकर्मकलिभिर्देवि मुच्यते नात्र संशयः ।
घोरे युद्धे महारण्ये दिग्भ्रमे शत्रुसंकटे ॥ २५६ ॥
नदीप्रतरणे देवि चोरव्याघ्रादिसङ्कटे ।
जपेत्स्तोत्रमिदं देवि ध्यात्वा श्रीरसभैरवम् ॥ २५७ ॥
इति स्तुत्वा सूतराजं सर्वं कर्म समर्पयेत् ।
रसो दाता रसो भोक्ता रसः कर्ता च कारणम् ॥
रसो होता च हव्यं च सर्वव्यापी रसः सदा ।
अनेनैव च मन्त्रेण रसेन्द्राय समर्पयेत् ॥ २५९ ॥
ततो न्यासं च मूलेन कुर्याद्ध्यात्वा च पूर्ववत् ।
संहारमुद्रां कृत्वाऽथ वहेन्नद्यां रसेश्वरम् ॥ २६० ॥
हृत्पद्मे स्थापयेद्देवं सांगावरणशक्तिकम् ।
शिवोऽहमिति सद्भावं चिन्तयेद्रसदेशिकः ॥ २६१ ॥
पूजास्थानं च संमार्ज्य प्रोक्षयेदुदकेन च ।
ततो होमालयं प्राप्य समाचम्य च देशिकः ॥ २६२ ॥

शालायामग्निदिग्भागे योनिकुण्डे त्रिमेखलम् ।
दर्भं प्रागुदगग्रैश्च परिस्तीर्णं यथाविधि ॥ २६३ ॥
न्यासं मूलेन संकल्प्य प्राणायामं विधाय च ।
पञ्चभूसंस्कृतं कृत्वा स्रुस्रिया वा द्विजेन वा ॥ २६४ ॥
आनीय वह्निं निक्षिप्य कुण्डे प्रज्वालयेत्ततः ।
वह्निं पिङ्गजटाजूटं त्रिणेत्रं शुक्लवाससम् ॥ २६५ ॥
रक्ताम्भोजस्थितं देवं माल्याभरणभूषितम् ।
सप्तहस्तं चतुश्शृङ्गं द्विशीर्षं च त्रिपादकम् ॥ २६६ ॥
त्रिधा बद्धं च नयनं शक्त्याद्यायुधधारिणम् ।
ध्यात्वा तस्यार्घ्यपाद्यादि कुर्यात्सर्वोपचारकम् ॥ २६७ ॥
गन्धाक्षतसुपुष्पैश्च पूजयेज्जातवेदसम् ।
तस्मिन्नावाहयेद्देवं संचिन्त्य रसभैरवम् ॥ २६८ ॥
न्यासं देवस्य कुर्वीत मूलमन्त्रेण होमयेत् ।
तिलाज्यव्रीहिभिर्मन्त्रं शतमष्टोत्तरं प्रिये ॥ २६९ ॥
अष्टाविंशति वा कुर्यात् मूलात्पूर्वाहुतिं हुनेत् ।
प्राणायामं ततो न्यासं कृत्वा च हृदि धारणम् ॥
एवं नित्यार्चनविधिः प्रोक्तस्तव सुरार्चिते ॥ २७० ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ द्वितीयोल्लासः ॥

॥ तृतीयोल्लासः ॥

रसदीक्षाक्रमः ।

अथ दीक्षां प्रवक्ष्यामि सर्वसिद्धिप्रदायिनीम् ।
सा च पञ्चविधा प्रोक्ता समयादिविभेदतः ॥ १ ॥

समया प्रथमा दीक्षा साधकाख्या द्वितीयका ।
निर्वाणाख्या तृतीया च चतुर्थ्याचार्यसंज्ञका ॥ २ ॥

पञ्चमी सिद्धसंज्ञा च प्रायशो दुर्लभा नृणाम् ।
पूर्वोक्तलक्षणोपेतः शिष्यो भक्तिनतश्शुचिः ॥ ३ ॥

गुरुं प्रणम्य चाष्टाङ्गं स्तुत्वा च बहुधा ततः ।
अनुगृह्णीष्व मे दीक्षामिति विज्ञापयेद्गुरुम् ॥ ४ ॥

दीक्षां च विधिवत्प्राप्य शिष्यस्सर्वार्थदृग्भवेत् ।

दीक्षायोग्याः शुभतिथ्यादयः ।

अश्विनीमूलरेवत्यो मृगः पुष्यः पुनर्वसुः ॥ ५ ॥

रोहिणी श्रवणो मैत्रं हस्तस्यादुत्तरात्रयम् ।
मघाश्विनी श्रेष्ठतमा दीक्षाकर्मणि तारकाः ॥ ६ ॥

तृतीया पञ्चमी चैव सप्तमी च चतुर्दशी ।
अष्टमी पौर्णमासी च दशमी च त्रयोदशी ॥ ७ ॥

एतास्तु तिथयो मुख्या. सौम्येन्दुगुरुभार्गवाः ।
आदित्य इति वारेषु रसदीक्षा सुशोभना ॥ ८ ॥

समयादीक्षाक्रमः ।

शुक्लपक्षे सुयोगे च करविष्टिविवर्जिते ।
चन्द्रताराबलोपेतविषुवायनसंक्रमे ॥ ९ ॥

ग्रहणे शिवरात्रे च जन्मर्क्षे सुमुहूर्तके ।
शुभग्रहे सिद्धयोगे दद्याद्दीक्षां गुरूत्तमः ॥ १० ॥

रसशालां प्रविश्याथ सर्वोपकरणोज्ज्वलाम् ।
पुष्पमालासमाकीर्णामुत्तोरणपताकिनीम् ॥ ११ ॥

नित्यपूजाग्निकार्यं च कृत्वा दीक्षाक्रमं भजेत् ।
देवस्य दक्षिणे पार्श्वे विस्तरे तण्डुलान् श्रितान् ॥ १२ ।

चतुरश्रं च तन्मध्ये क्षिपेत्प्रस्थं सुतण्डुलम् ।
तदूर्ध्वं विन्यसेत्कुम्भं सितसूत्रेण वेष्टितम् ॥ १३ ॥

वासोभ्यां वेष्टितं सूतपंचरत्नसमन्वितम् ।
पञ्चमृत्पल्लवत्वग्भिः पावितं जलपूरितम् ॥ १४ ॥

दूर्वागन्धोत्तमतिलहेमदर्भाक्षतान्वितम् ।
शिवसंज्ञमिदं कुम्भं शिवरूपं विचिन्तयेत् ॥ १५ ॥

तद्वामभागे संस्थाप्य वर्धनीसंज्ञकं घटम् ।
शक्तिरूपं च पूर्वोक्तसर्वद्रव्यसमन्वितम् ॥ १६ ॥

परितस्सर्वतोभद्रं श्रीगौरीतिलकं लिखेत् ।
नन्द्यावर्तं स्वस्तिकं च पञ्चवर्णविराजितम् ॥ १७ ॥

प्रक्षाल्य पादौ पाणी च समाचम्य गुरूत्तम. ।
निजासनं समासाद्य प्राणायामत्रयं तथा ॥ १८ ॥

शिष्यस्यास्यायुरारोग्यसंपत्सन्तानवृद्धये ।
मुक्तये चाष्टसिद्धयै च सङ्कल्प्याभ्यर्चयेच्छिवम् ॥ १९ ॥

गन्धपुष्पाक्षतैर्धूपदीपैर्नैवेद्यदर्शनैः ।
शिवकुम्भं वर्धनीं च पूजयेत्सोपचारकम् ॥ २० ॥

रसांकुशीं मूलमन्त्रं प्रजपेच्च सहस्रकम् ।
तद्दशांशं हुनेत्कुण्डे त्रिकोणे लक्षणान्विते ॥ २१ ॥

फलं त्रिमधुसंयुक्तं ततो गन्धोत्तमान्वितम् ।
क्रमादाहुतिदेवांश्च चतुर्थ्यां स्वस्वनामकम् ॥ २२ ॥

आहान्तं प्रणवादिं च समुच्चार्य हुनेद्धविः ।
शिवत्रयं पुरा देवि ततस्सिद्धत्रयं यजेत् ॥ २३ ॥

ततो गुरुत्रयं देवि कुलवृद्धान् गुरूत्तमः ।
योगिनीं पूजयित्वा तु लब्धानुज्ञो गुरुस्ततः ॥ २४ ॥

स शक्तिमानन्दशिवमूर्तिमाराधयामि च ।
तथा परानन्दशिवमूर्तिमाराधयामि च ॥ २५ ॥

एवं त्रिसिद्धमूर्तिं च श्रीबीजसहितं यजेत् ।
एवं त्रिगुरुमूर्तिं च मारबीजयुतं यजेत् ॥ २६ ॥

तत्त्रयं गृहीत्वा च पुनर्न्यासं समाचरेत् ।
स्वयं शिवतनुर्भूत्वा शिवोऽहमिति भावयेत् ॥ २७ ॥

हृष्टं शक्तियुतं शिष्यं शिवद्रष्टा विलोकयेत् ।
स्ववामपार्श्वे संस्थाप्य तन्मूर्धनि विनिक्षिपेत् ॥ २८ ॥

मूलाभिमन्त्रितं भस्म तन्नेत्रं वस्त्ररोधितम् ।
कृत्वा तन्मूर्ध्नि संप्रोक्ष्य शिववर्धनिवारिणा ॥ २९ ॥

त्रिधा स्वदक्षिणे हस्ते शिवं सावरणं यजेत् ।
विज्ञेयश्शिवहस्तोऽयं भवपाशनिकृन्तन. ॥ ३० ॥

अङ्कुशीमूलमन्त्रं च त्रिवारं च समुच्चरेत् ।
शिष्यदक्षिणकर्णे च कुर्यान्मन्त्रोपदेशकम् ॥ ३१ ॥

पूर्वं गणपतेर्मन्त्रं क्षेत्रपालमनुं ततः ।
ऋषिस्तु गणकश्छन्दो न्यूचिद्गायत्रिका स्मृतम् ॥ ३२ ॥

देवो गणपतिर्ज्ञेयो न्यासं बीजाक्षरेण च ।
आदिवर्गतृतीयार्णं सार्धचन्द्रं गणाख्यकम् ॥ ३३ ॥

पतिं चतुर्थ्या सयुक्त नमोऽन्त मनुमुच्चरेत् ।
पाशाकुश मोदक च बिभ्राण स्वविषाणकम् ॥ ३४ ॥

गजानन प्रवाळाभ मकुटेन्दुकलाधरम् ।
तुन्दिल गणनाथ च ध्यात्वा लक्ष जपेन्मनुम् ॥ ३५ ॥

दशाश तर्पण होम सगुड सतिल हुनेत् ।
कपर्दिन्दुयुत क्षेत्रपाल च सचतुर्थिकम् ॥ ३६ ॥

नमोऽन्त मनुमुच्चार्य न्यास बीजाक्षरेण च ।
छन्द पङ्क्तिर्मुनिर्जेयो भृगुर्देवश्च भैरव ॥ ३७ ॥

चतुर्भुज शूलपात्रवरदाभयशोभितम् ।
कालाम्बुदनिभ नागभूषण किंकिणीस्रजम् ॥ ३८ ॥

त्रिणेत्र वक्रदृष्ट्र च ध्यात्वा लक्ष जपेन्मनुम् ।
दशाश तर्पणं होम पायस त्रिमधुप्लुतम् ॥ ३९ ॥

हुनेदिति समादिश्य सामयाचारिक भजेत् ।
देवतापरिचर्यां च शुश्रूषा च गुरो कुरु ॥ ४० ॥

अतन्द्रितो जप कुर्यात् शास्त्रश्रवणमादरात् ।
पूर्वोक्ताचारमार्गेण निरतो भव संततम् ॥ ४१ ॥

अद्य कृताजलिर्भूत्वा करिष्यामि तथा प्रभो ।
धन्योऽह कृतकृत्योऽस्मि श्रीनाथ त्वत्प्रसादत ॥ ४२ ॥

इति विज्ञापयेच्छिष्य समयाचारवृंहित ।
प्रातस्तरा समुत्थाप्य गुरुश्च शिरसि स्मरेत् ॥ ४३ ॥

निवेद्यावश्यक कर्म स्नातस्तरध्या समाचरेत् ।
नद्यास्तीर्थे तटाके वा पुष्करिण्या शुचौ जले ॥ ४४ ॥

उपस्पृश्य च सकल्प्य नित्यतर्पणमाचरेत् ।
आदौ शिवत्रय विघ्ननाथ क्षेत्राधिप हरिम् ॥ ४५ ॥

ब्रह्माणं भास्करादींश्च महान् दुर्गां च मातृकाः ।
भैरवानसितांगादीन् ततस्सिद्धत्रयं वदेत् ॥ ४६ ॥

आदिनाथं मीननाथं गोरक्षं कोंकणेश्वरम् ।
जालन्धरेशं कन्थनीशमोड्डीशं चिंचिणीश्वरम् ॥ ४७ ॥

चौरङ्गिमेतानाथाख्यान्सर्व संतर्पयेत्ततः ।
चौरङ्गि चर्पटिं घोडाचूळि रामद्वयं ततः ॥ ४८ ॥

भोलगोविन्दसिद्धं च ज्वाडिनागार्जुनं तथा ।
कोरण्डं शूर्पकर्णं च मुक्तायीं रेवणं तथा ॥ ४९ ॥

सिद्धं कुक्कुरपादं च शूर्पपादं कणेरिकम् ।
सिद्धं किंकिणिकाख्यं च सिद्धान् षोडश तर्पयेत् ॥

ततो गुरुत्रयं तर्प्य मातरं पितरं गुरुम् ।
आचार्यं भ्रातरं मित्रं तर्प्य चान्योन्कुलोद्भवान् ॥ ५१ ॥

तर्पयेद्विधिनाऽऽचम्य देवताराधनं ततः ।
नद्यास्तीरे तटाके वा गोष्ठे देवालये तथा ॥ ५२ ॥

शुचिस्थले वा संस्तीर्य सैकतं वर्तुलाकृतिम् ।
आवाहयेद्दिनाधीशं पाटलं शिवरूपिणम् ॥ ५३ ॥

द्विनेत्रपद्मयुगळधारिणं द्विभुजं परम् ।
रक्तस्रगम्बरालेपभूषापद्मासनोज्ज्वलम् ॥ ५४ ॥

ध्यात्वार्चयेद्रक्तपुष्पैस्ततो विघ्नेशभैरवौ ।
ध्यात्वा पूर्वोक्तवर्तौ द्वौ रक्तपुष्पैस्समर्चयेत् ॥ ५५ ॥

अष्टाङ्गदण्डप्रणतिं कुर्यात् द्वादशवारकम् ।
पुनस्संस्थापयेत्स्वान्ते सेवायै स्वगुरोर्व्रजेत् ॥ ५६ ॥

इत्युक्ता समया दीक्षा

साधकदीक्षा ।

साधका कथ्यतेऽधुना ।

समयाचारनिरतं सच्छिष्यं पक्वमानसम् ॥ ५७ ॥

दीक्षयेत्सुदिने लग्ने दीक्षया साधकाख्यया ।

कुर्यान्नैमित्तिकीं पूजां शिष्यमावाहयेद्गुरुः ॥ ५८ ॥

स्वयं शिवतनुश्शिष्यं गौरीगर्भगतं स्मरेत् ।

भूमौ विभूतिं संस्तीर्य तस्मिन्कोणत्रयं लिखेत् ॥

तत्रोपवेश्य शिष्यं च बन्धयित्वा विलोचने ।

गर्भाधानं पुंसवनं सीमन्तोन्नयनं ततः ॥ ६० ॥

जातकर्म च दीक्षाङ्गं नामधेयं च कल्पयेत् ।

जातकर्मणि सम्प्रोक्ष्य मूलमन्त्रेण भस्मना ॥ ६१ ॥

गौरीपुत्रं भावयित्वा तस्य दीक्षां प्रकल्पयेत् ।

शिवहस्त्या विलोक्यामुं शिवभस्म च मूर्धनि ॥ ६२ ।

निधाय मूलमन्त्रञ्च पूजयेद्दशवारकम् ।

तस्य दक्षिणकर्णे च उपदिश्याद्दशाक्षरम् ॥ ६३ ॥

रसगायत्री ।

रसेन्द्रभैरवं मन्त्रं गायत्रीं रससंज्ञिकाम् ।

स बिन्दुहुतभुग्बीजं रसेन्द्रस्य पदं ततः ॥ ६४ ॥

भैरवं च चतुर्थ्यन्तं कर्मास्त्रं च दशांशकम् ।

वह्निबीजं दीर्घयुक्तं करन्यासं समाचरेत् ॥ ६५ ॥

अघोराख्यो ऋषिश्छन्दो विराड्देवो महेश्वरः ।

पूर्वसेवाजपं लक्षं दशांशं होमतर्पणम् ॥ ६६ ॥

तिलाज्यव्रीहिभिः कुर्याद्धोमं निश्चलमानसः ।

पूर्वोक्तां रसगायत्रीं जपेल्लक्षं च तर्पणम् ॥ ६७ ॥

हुनेद्दशाशमाज्येन सतिलव्रीहिमि प्रिये ।
दद्याच्छिष्यायाक्षमाला रसलिङ्ग रसागमम् ॥ ६८ ॥

पूर्वोक्ताचारवान् भूत्वा रसलिङ्ग समर्चयेत् ।
स्वशास्त्रार्थावगमन कुर्यात्सूतेन्द्रसस्तुतिम् ॥ ६९ ॥

गुरुसेवारत नित्य शिष्यमाज्ञापयेदिति ।
शिष्यो बद्धाञ्जलिर्नम्रस्तवाज्ञामाचराम्यहम् ॥ ७० ॥

इत्युक्ता साधका दीक्षा

निर्वाणदीक्षा ।

निर्वाणाख्या प्रवक्ष्यते ।
कृतनित्यक्रिय पूर्वं कृतनैमित्तिकार्चन ॥ ७१ ॥

पूर्ववच्छिवकुम्भादि वर्धनी स्थापयेत्क्रमात् ।
स्वग्नौ भस्म सस्तीर्य षट्कोणं भूगृह लिखेत् ॥
शिष्य सवेश्य कुम्भस्थजलै सप्रोक्षयेद्गुरु ।
मूलाभिमन्त्रित भस्म तस्य मूर्धनि निक्षिपत् ॥ ७२ ॥

गन्धपुष्पाक्षत दद्यात् बध्नीयाद्दक्षिणे करे ।
कङ्कण चरणाङ्गुष्ठरन्ध्रान्तमानकम् ॥ ७३ ॥

सूत्र तन्मूलमन्त्रेण मन्त्रित सुरभीकृतम् ।
शिवहस्तं च तन्मूर्ध्नि निधाय गुरुसत्तम ॥ ७४ ॥

रसाकुशा द्वादशाणां उपदिश्यान्मनु परम् ।
रसभैरवदेवत्य दद्याच्छिष्याय देशिक ॥ ७५ ॥

ऋषिश्छन्दो देवता च न्यास पूर्वोक्तवत्प्रिये ।
तर्पण चाथ होम च ध्यान कुर्याच्च पूर्ववत् ॥ ७६ ॥

उत्थाय च गुरु नत्वा बहुशस्स्तोत्रमुच्चरेत् ।
गुरुश्शिष्याय वै दद्याद्व्याघ्रचर्मासन च यत् ॥ ७७ ॥

भस्त्रिकां वस्त्रसंपूर्णां दद्याद्वैपज्यभस्त्रिकाम् ।
रसागमं पाठयित्वा भव शिष्य चिकित्सकः ॥ ७९ ॥
रुद्ररूपी भवान् जातः सर्वभूतहितो भव ।.
इत्यादिशेद्गुरुश्शिष्यं शिष्यो हृष्टमनास्ततः ॥ ८० ॥
कृतकृत्योऽस्मि पूतोऽस्मि तीर्णसंसारसागरः ।
इति विज्ञापयेच्छिष्यः स्तुत्वा च बहुधा गुरुम् ॥ ८१ ॥
प्रोक्ता निर्वाणदीक्षेयं

आचार्यदीक्षा ।

अथाचार्याभिषेचनम् ।

निर्वाणदीक्षितस्यास्य शिष्यस्यापि महात्मनः ॥ ८२ ॥
आचार्यदीक्षां कुर्वीत यथावद्गुरुसत्तमः ।
यथा निर्वाणदीक्षायास्तथा सर्वं प्रकल्पयेत् ॥ ८३ ॥
विशेषाच्छिवकुम्भन्यो. पुरतस्स्थापयेद्घटम् ।
रूप्यगन्धादिलोहाशा(?)दिव्यौषधगणान्वितम् ॥ ८४ ॥
शिवकुम्भवदन्यच्च सर्वमस्मिन्विनिक्षिपेत् ।
गुरुकुम्भं जपेत्स्पृष्ट्वा मूलमष्टोत्तरं शतम् ॥ ८५ ॥
गुरुकुम्भमिमं विद्धि गुरुमन्त्रेण पूजयेत् ।
आवाहनासनार्घ्याद्यैरुपचारैश्च षोडशैः ॥ ८६ ॥
शिवादिपंक्तिं तत्रैव पूजयेद्गुरुणा सह ।
यथापूर्वं समासीनं शिष्यं चैकाग्रमानसम् ॥ ८७ ॥
पूर्ववच्छिवकुम्भन्योरम्बुना परिषेचयेत् ।
पूर्ववच्छिवहस्तं च मूलमन्त्रोपदेशकम् ॥ ८८ ॥
कृत्वा तदुत्तमाङ्गे च गुरुपंक्तिं गुरुं तथा ।
आवाहनाद्यैस्संपूज्य गन्धाक्षतधूपदीपकैः ॥ ८९ ॥

फलगन्धोत्तमोपेतैर्नवैद्यै पूजयेत्क्रमात् ।
गुरु कुम्भजलै कुर्यात्प्रोक्षणं पञ्चपल्लवै ॥ ९० ॥
मूलमन्त्रेण शतधा शिवपञ्च्या त्रिसप्तधा ।
तथैव सिद्धपञ्च्या च गुरुपञ्च्या तथैव च ॥ ९१ ॥
शिष्याय गुरुभक्ताय शक्तियुक्ताय धीमते ।
हारकेयूरकटकमुद्रिकामुकुटानि च ॥ ९२ ॥
वाहनासनसच्छत्रचामरव्यजनानि च ।
मणिकुण्डलयुग्म च भूत्याढ्य पालमक्षयम् ॥ ९३ ॥
सशिरस्त्राणमुष्णीष पङ्क्तिकृपाणमुत्तमम् ।
योगपट्ट योगदण्ड तथैवोड्डाणबन्धनम् ॥ ९४ ॥
दद्यात्तस्मै तथैवाज्ञा त्वमाचार्योऽसि संप्रति ।
ईश्वरोऽस्यद्य धन्योऽसि सर्वेषा देशिको भव ॥ ९५ ॥
रसागमाना दिव्याना व्याख्याता भव तत्ववित् ।
इत्यादिशेद्गुरुश्शिष्य प्रणत गुरुवत्सलम् ॥ ९६ ॥
इति चाचार्यदीक्षेय

सिद्धदीक्षा ।

सिद्धदीक्षाद्य कथ्यते ।
नद्याह्नि सप्तरात्र वा पञ्चरात्रं त्रिरात्रकम् ॥ ९७ ॥
धीरा शक्तियुता पूज्या एकविंशति चान्वहम् ।
तत्सङ्ख्या योगिन पूज्या कुमारा कन्यका स्त्रिय ॥
गन्धपुष्पाक्षते पुष्पै फलगन्धोत्तमार्पणे ।
तोषयित्वा प्रदद्याच वस्त्राभरणदक्षिणा. ॥ ९९ ॥
अथासनसमासीन शिष्यं भक्तियुतं शुचिम् ।
स्पृष्ट्वा करभ्या तच्छीर्षं दक्षिणे श्रवणे मनुम् ॥ १०० ॥

वह्नि सबीज शीताशु सविसर्ग च दीक्षयेत् ।
मूलाधारात्समुद्भूत रेफ वह्निशिखोपमम् ॥ १०१ ॥

षडाधाराम्बुज तीर्त्वा ब्रह्मरन्ध्रान्तग स्मरेत् ।
ब्रह्मरन्ध्राद्द्रवीभूतं सकार सोमरूपिणम् ॥ १०२ ॥

आप्लावयन्त सर्वाङ्ग सिद्धम्सञ्चिन्तयेन्मनुम् ।
उच्छ्वासनिश्वासमव सहारस्थितिकारणम् ॥ १०३ ॥

ज्ञात्वेत्थ मनसा नित्य सर्वमन्त्रात्मक सदा ।
सर्वदेवमय पुण्य सर्वसिद्धिप्रदायकम् ॥ १०४ ॥

जीवतो मुक्तिद शुद्ध शिवशक्त्यात्मक परम् ।
रसमन्त्रमिम विद्धि चाग्नीषोमात्मक भज ॥ १०५ ॥

एकविंशतिसाहस्रषट्शताधिकसख्यकम् ।
प्रवर्तित दिवारात्र मनस्तत्र निधेहि च ॥ १०६ ॥

मन्त्रस्यास्य ऋषिर्जीवश्छन्देत्युक्ता (?)प्रकीर्तिता ।
रसो देवस्तु र बीज स शक्तिस्तु प्रकीर्तित ॥

रेफर्दीर्घयुत कुर्यात्कराङ्गन्यासमाचरेत् ।
ध्यायेच्छुदम्बुजे देवि कोटिसूर्येन्दुसन्निभम् ॥ १०८ ॥

शुद्धस्फटिकसकाश रस ससारपारदम् ।
एव निष्कलरूप त ध्यात्वा तन्मयता व्रजेत् ॥ १०९ ॥

निष्कलरसस्तोत्रम् ॥

त्व रसस्त्व शिवस्त्व हि शक्तिस्त्व भैरवेश्वर ।
त्व ब्रह्मा त्व हि रुद्रश्च सूर्यस्त्व शीतदीधिति ॥

त्व भूस्त्व सलिलस्त्व च वह्निस्त्व च सदा गति ।
त्व व्योम त्व पराकाश त्व जीवस्त्व परा गति ॥

त्वं सिद्धस्त्वं प्रबुद्धस्त्वं सुगन्धस्त्वं च मन्मथः ।
त्वं लोकपालस्त्वं तारा मातृकास्त्वं गजाननः ॥ ११२ ॥
त्व स्कन्दस्त्वं गुरुस्त्वं च त्वं सर्वजनकः शुचिः ।
त्वं यज्वा त्वं हरिस्त्वं च त्रेताग्निस्त्वं च ऋत्विजः ॥
येन त्वमर्च्यसे तेन पूजितास्सर्वदेवताः ।
त्वयि तुष्टे च सन्तुष्टा ब्रह्मविष्णुमहेश्वराः ॥ ११४ ॥
त्वत्पादोदकपानेन सर्वतीर्थफलं लभेत् ।
यस्त्वां पश्यति सद्भक्त्या तमालोक्यते शिवः ॥
यस्त्वा संकीर्तयेत्तस्य सर्वमन्त्रफलं भवेत् ।
यत्र त्वं क्षणमात्रे च पुण्यक्षेत्रं तदुच्यते ॥ ११६ ॥
त्वं यं पश्यति सिद्धेन्द्र ! स ब्रह्मा विष्णुरीश्वरः ।
यत्र मुंक्षेऽन्नकबळ तत्र त्रैलोक्यमत्ति हि ॥ ११७ ॥
येन त्वं स्त्रि(भ्रि)यसे नाथ त्वयायं स्त्रि(भ्रि)यतेक्षणम् ।
स एव चित्सदानन्दः परमात्मा ध्रुवं भवेत् ॥ ११८ ॥
एवं निश्चितचित्तस्य सिद्धस्य तव योगिनः ।
वर्णाश्रमसदाचाराः कृत्याकृत्यविवेकतः ॥ ११९ ॥
पापं पुण्यं सुखं दुःखं शीतमुष्णं प्रियाप्रिये ।
स्नानास्नानहानिवृद्धी शुद्धाशुद्धं भयाभयम् ॥
माद्यामाद्यं क्षुधा तृष्णा न किंचिदिह विद्यते ।
स्वेच्छाहारविहारश्च सुखी संहृष्टमानसः ॥ १२१ ॥
निर्ममस्सर्वकार्येषु कलत्रादिषु बन्धुषु ।
एवमाचार्यवचनमङ्गीकृत्य च दीक्षितः ॥ १२२ ॥
अद्य प्रभृति बन्धस्त्वं मा कुरु प्रणतिं क्वचित् ।
मत्समानोऽसि सिद्धोऽसि जीवन्मुक्तोऽसि संप्रति ॥

इत्युक्ताऽऽचार्यवर्योऽपि सिद्धमालिङ्ग्य च क्षणम्।
सिद्धदीक्षेयमाख्याता शिवसायुज्यदायिनी ॥ १२४ ॥

दुर्लभा सर्वतन्त्रेषु तव प्रीत्या प्रकाशिता।
देवीत्थमेव मन्तव्यं दुर्लभं समयेषु च ॥ १२५ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ तृतीयोल्लासः ॥

॥ चतुर्थोल्लासः ॥

रससंस्काराः ॥

श्री भैरवी—

रससंस्कारमीश त्वं यथावत्कथयस्व मे।

श्री भैरवः—

अष्टादश स्युस्संस्कारा रसस्य परमेश्वरि ! ॥ १ ॥

तान्सिद्धसाधकाभ्यर्च्यं यथावत्कथयामि ते।
अथादौ स्वेदनं कर्म द्वितीयं मर्दनं प्रिये ॥ २ ॥

मूर्छा तृतीयमुत्थानं चतुर्थं पातनं शिवे।
पञ्चमं रोधनं षष्ठं नियामं सप्तमं स्मृतम् ॥ ३ ॥

दीपनं चाष्टमं देवि नवमं चानुवासनम्।
दशमं चारणं देवि जारणं रुद्रसंख्यकम् ॥ ४ ॥

गर्भद्रुतिर्द्वादशी स्यात् बाह्यद्रुतिस्त्रयोदशी।
चतुर्दशं स्याद्रागाख्यं सारणा दशपञ्चमी ॥ ५ ॥

अनुसारणा षोडशी च विख्याता प्रतिसारणा।
सप्तदशी चाष्टदशं वेधनं देहलोहयोः ॥ ६ ॥

रससंस्कारप्रकारः ।

अथ वक्ष्यामि संस्कारान् रसराजस्य पार्वति ! ।
लिङ्गस्य दक्षिणे भागे लिखेत् षट्कोणमण्डले ॥ ७ ॥

तद्बहिश्चाष्टपत्रं च कमलं चतुरश्रकम् ।
दिग्द्वारशोभितं तस्य कर्णिकायां न्यसेच्छिवे ! ॥ ८ ॥

ताम्रजं कान्तजं वाऽपि खल्वं तु स्वर्णरेखितम् ।
तन्मध्ये रसराजं तु पलानां शतमालकम् ॥ ९ ॥

तदर्धं वा तदर्धं वा क्षिप्त्वा भक्त्या प्रपूजयेत् ।
साधको रसराजस्य ततस्संस्कारमाचरेत् ॥ १० ॥

१. स्वेदनम् ।

धान्याम्लसन्धानप्रकारः ।

यवगोधूमकलमशालिमुद्गचणादिभि. ।
श्यामाकोद्दालकैश्च नानाधान्यैश्च निस्तुषै ॥ ११ ॥

धान्यं चतुर्गुणजले मृद्घटे निक्षिपेत्त्रिये ।
प्राप्नोति यावदम्लत्वं तावद्यत्नेन रक्षयेत् ॥ १२ ॥

तन्मध्ये हंसपादीं च मीनाक्षीं द्विपुनर्नवाम् ।
चित्रकं भृङ्गराजञ्च विष्णुक्रान्ता शतावरीम् ॥ १३ ॥

सर्पाक्षीं गिरिकर्णीं च मुण्डीञ्च सहदेविकाम् ।
त्रिफलां रक्तशा. कृत्वा सर्वमेतान्निनिक्षिपेत् ॥ १४ ॥

धान्यस्य च चतुर्थांशान् धान्याम्लमिदमुत्तमम् ।
स्वेदनादिषु कार्येषु पारदस्य विशिष्यते ॥ १५ ॥

आतप्ते कान्तजे खल्वे रसराजं विनिक्षिपेत् ।
चूर्णं च गृहधूमं च चित्रकं त्रिफलां गुडम् ॥ १६ ॥

दग्धोर्णामिष्टका कन्या लवण वृहतीद्वयम् ।
मागधी राजिका चैव वन्ध्या कर्कोटकी तथा ॥ १७ ॥

एतान्कलाशान्सूतस्य तस्मिन्क्षिप्त्वा विमर्दयेत् ।
दत्वा दत्वाऽथ धान्याम्लमेव कृत्वा दिनत्रयम् ॥ १८ ॥

सम्यक् सोष्णारनालेन रस प्रक्षालयेत्प्रिये ।
पटु राजी त्रिकटुक मूलक चित्रक वराम् ॥ १९ ॥

पुर्ननवा मेषशृङ्गी मेघनाद दुरालभाम् ।
आर्द्रक रजनी नागबला च नवसारकम् ॥ २० ॥

सम धान्याम्लके पिण्डं श्लक्ष्ण वस्त्रे प्रलेपयेत् ।
यावदङ्गुलिमात्र च तस्मिन्पूर्वरस क्षिपत् ॥ २१ ॥

रुद्ध्वा ताम्रके पात्रे क्षिप्त्वा धान्याम्लपूरिते ।
घटे दोलाख्ययन्त्रे च स्वेदयेत्तमहर्निशम् ॥ २२ ॥

समुद्धृत्य पुनस्तोष्णैरनालैर्दशरावके ।
प्रक्षालयेत्सूतराजमेव कुर्यात्त्रिसप्तधा ॥ २३ ॥

प्रस्वेदित सूतराज तत्समदयेत्प्रिये ।

२ मदनम् ।

अथातो मदन कर्म वक्ष्यामि शृणु भरवि ! ॥ २४ ॥

चूर्णादिपूर्ववद्द्रव्य त्रिशाला रात्र्यकम् ।
अर्कोल कृष्णधुत्तूर त्रिकटु च सम समम् ॥ २५ ॥

सर्वं सूतकराज च तत्सर्वत्रे रस क्षिपत् ।
मर्दयेत्पूर्वधान्याम्लदिवारात्र पुनश्च तम् ॥ २६ ॥

क्षालयेन्मृण्मये पात्रे तत सोष्णारनालकैः ।
न क्षालन चैवमेकविंशतिवासरम् ॥ २७ ॥

एवं विमर्दितं सूतं समादायाथ मूर्छयेत् ।
अभ्रजीर्णोऽथवा बीजजीर्णस्मूतोऽपि मर्द्यते ॥ २८ ॥

चूर्णादिपूर्वद्रव्यैश्च रागान् गृह्णाति निर्मल. ।

३ मूर्छा ।

अथ मूर्छां प्रवक्ष्यामि शृणु त्वं सावधानत. ॥ २९ ॥

राजिका मेषशृङ्गी च चित्रकं च फलत्रयम् ।
क्षीरकन्दं सूरणं च सर्पाक्षी काकमाचिका ॥ ३० ॥

नीला वचा बला कन्या कृष्णोन्मत्तस्तथाकुली ।
श्वेताऽपराजिताङ्कोलं गोजिह्वा गरुडी तथा ॥ ३१ ॥

एतेषा स्वरसैर्मर्द्यो रविर्क्षीरेण पारदः ।
व्यस्ताना वा समस्तानां रसैरेषां दिनावधि ॥ ३२ ॥

मर्दयेत्तत्सलवे च मूषायां तं रसं क्षिपेत् ।
निरुध्य मूषरे यन्त्रे विपचेत्तं पुनः म्रिये ॥ ३३ ॥

राजिकाद्यौषधभवै रसैस्तिस्रसप्तवासरम् ।
मर्दन मूषरे पाकं कुर्यात्संमूर्छितो रस ॥ ३४ ॥

भवेत्तदुत्थानविधि प्रकुर्वीत सुरार्चिते ।

४. उत्थापनविधिः ।

एवं संमूर्छितं सूतं क्षालयेत्काजिकेन च ॥ ३५ ॥

सोष्णेन वारिणा वाऽपि सूतमुत्थापयेत्म्रिये ।
पातनायन्त्रयोगे वा रसस्योत्थापनं भवेत् ॥ ३६ ॥

५. पातनम् ।

पातनं त्रिविधं प्रोक्तं रसराजस्य पार्वति ! ।
ऊर्ध्वपातमध.पातं तिर्यक्पातनमुच्यते ॥ ३७ ॥

ऊर्ध्वपातनविधिः ।

रसस्य पातनं वक्ष्ये पाठा ब्राह्मी च चित्रकम् ।
शाङ्गेरी काकमाची च मण्डूकी गिरिकर्णिका ॥ ३८ ॥

कुमारी च जया भृङ्गी गोजिह्वा शङ्खपुष्पिका ।
भूपाटली च निर्गुण्डी काकजङ्घा शतावरी ॥ ३९ ॥

आर्द्रकं देवदाली च तिलपर्णी च नीलिका ।
आरग्वधः क्षीरकन्दमङ्कोलो देवदारु च ॥ ४० ॥

एषां रसैस्समस्तानां व्यस्तानां वा दिनं रसम् ।
मर्दयेत्तत्खल्वे तत् शुल्वं सूतचतुर्थकम् ॥ ४१ ॥

तं पिष्ट्वा पातयेद्यन्त्रे ह्यूर्ध्वपातनके दिनम् ।
ऊर्ध्वलग्नं रसं शुद्धं तमादायाथ मर्दयेत् ॥ ४२ ॥

पूर्वोदितौषधरसै· पूर्ववत् शुल्वसंयुतम् ।
पातयेन्मर्दयेदेवं समधैवं पुनः पुन. ॥ ४३ ॥

ऊर्ध्वपातनसंशुद्धं पारदं पातयेदधः ।

अधःपातनविधिः ।

अधाध.पातनं वक्ष्ये ह्यूर्पणं लवणं वराम् ॥ ४४ ॥

चित्रकं राजिकां शिग्रुं सर्वं सूतसमं क्षिपेत् ।
मर्दयेत्तत्खल्वे च रसं धान्याम्लकेन च ॥ ४५ ॥

तत्कल्केन लिपेदूर्ध्वं भाण्डं सम्यक् निरोधयेत् ।
ऊर्ध्वभाण्डस्य पृष्ठे तु दद्याल्लघुपुटं ततः ॥ ४६ ॥

इत्यध.पातनं कुर्यात्सप्तवारं पुनः पुनः ।
अधःपातनशुद्धस्य तिर्यग्पातनमाचरेत् ॥ ४७ ॥

तिर्यक्पातनविधिः ।

वक्ष्यामि तिर्यक्पतनं सूतं धान्याभ्रकं समम् ।
धान्याम्लैर्मर्दयेद्याम तिर्यक्पातनयन्त्रके ॥ ४८ ॥

चण्डाग्निना पचेदेवं सप्तवारं पुन. पुन ।
एवं त्रिधा पातितं च ततस्तूतं निरोधयेत् ॥ ४९ ॥

अभ्रकं वाऽथ गन्धं वा माक्षिकं विमलमपि ।
स्वर्णं वा रजतं वाऽपि क्रान्तं वा तीक्ष्णमेव वा ॥ ५० ॥

प्रत्येकं शोधितं देयं ताम्रवत्पादमात्रकम् ।
पाठादिकरसै. कुर्यान्मर्दनं पातनं क्रमात् ॥ ५१ ॥

यद्यद्द्रव्यान्वितस्सूतस्तत्तद्द्रव्यगुणप्रद ।
पातने ताम्रयोगेन नागवङ्गौ त्यजेद्रस ॥ ५२ ॥

अथवा दीपिकायन्त्रे शुद्ध. स्यात्पातितो रस ।

६. निरोधनम् ।

कदर्थितो भवेत्सूत स्वेदाद्यै पञ्चकर्मभि ॥ ५३ ॥

आप्यायनार्थं सूतस्य कर्म कुर्यान्निरोधनम् ।
अथ कर्म निरोधाख्यं वक्ष्येऽहंणं जले ॥ ५४ ॥

स्थालीमध्ये रसं क्षिप्त्वा तदूर्ध्वं लवणं क्षिपेत् ।
किंचिज्जले न निर्वर्तं शरावेण रोधयेत् ॥ ५५ ॥

कुर्यात्सम्यक् सन्धिलेप तदूर्ध्वञ्च पुटेत्पचु ।
एवं निरोधनं कर्म विदध्यात्सप्तधा प्रिये ॥ ५६ ॥

आप्यायिनो भवेत्सूतोऽनेन षडत्यवर्जित ।
निरोधकर्मसिद्धोऽसौ वीर्यवान्मुनिरुच्यते ॥ ५७ ॥

७. नियामनम्।

अथो नियामनं कर्म कथयामि चरानने।
यवचिञ्चा क्षीरकन्दं सर्पाक्षी पटु भृङ्गराट् ॥ ५८ ॥
चन्द्या कर्कोटकी निंबः सर्वं धान्याम्लपेषितम्।
कृत्वाऽऽलोड्यारनाळेन तद्द्रवैः स्वेदयेद्दिनम् ॥ ५९ ॥
यन्त्रे नियामके सप्तवासरं तच्च दीपयेत्।

८. दीपनम्।

अथातो दीपनं कर्म वदामि तव पार्वति ॥ ६० ॥
स्वर्णपुष्पी च मरीचं त्रिक्षारं पञ्चपुष्पिका[1]।
भृङ्ग. पञ्चलवणं राजिका शिग्रुमूलकम् ॥ ६१ ॥
कासीसं चिञ्चया कन्या पातालगरुडी कणा।
क्षीरकन्दं च कर्कोटी गिरिकर्णी जया मधु ॥ ६२ ॥
चित्रकं काकजंघा च सर्वमम्लगणेन च।
कल्कयेत्सारदं तेन मर्दयेच्चद्द्रवैरपि ॥ ६३ ॥
दोलायन्त्रे पचेदेकदिनमेवं च सप्तधा।
मर्दनं पाचनं कुर्यात् मासार्धं दीपितो रस ॥ ६४ ॥
एवं प्रदीपितं सूतं शुद्धं तमनुवासयेत्।

९. अनुवासनम्।

अथानुवासनं कर्म सूतराजे दीपितं रसम् ॥ ६५ ॥
क्षिप्त्वा जम्बीरजद्रावैस्तीव्रमेवमनुवासयेत्।
एवं सप्तदिनं कुर्यात्तदधारणमाचरेत् ॥ ६६ ॥

---

1. 'जाती जयन्ती श्वेतश्वो भृङ्गस्य शुम्भक' इति पञ्चपुष्पाणि। शङ्खपुष्पीति कश्चित्पठ्यते।

नवभिस्स्वेदनाद्यैश्च शुद्धः स्यात्कर्मभिः प्रिये ।
पारदस्सर्वरोगघ्नः सप्तकंचुकवर्जितः ॥ ६७ ॥

श्रीभैरवी—

स्वेदनादीनि कर्माणि श्रुतानि वद शङ्कर ।
त्वत्प्रसादादसन्देहं संशृण्वे चारणादिकम् ॥ ६८ ॥

श्री भैरवः—

साधु पृष्टं महाभागे ! शृणु तच्चारणादिकम् ।

१०. चारणविधिः ।

अथाभ्रचारणं कर्म वक्ष्यामि परमेश्वरि ! ॥ ६९ ॥

समुखे वा निर्मुखे वा रसे वा वासनामुखे ।
गगनं चारयेद्धर्मपिष्टिप्रासक्रमैः क्रमात् ॥ ७० ॥

समुखचारणम् ।

अत्रादौ कथ्यते देवि ! समुखं चारणं स्फुटम् ।
समुखो ग्रसति ग्रासं निर्मुखो ग्रसनाक्षमः ॥ ७१ ॥
तस्मात्परं रसेन्द्रस्य मुखीकरणमाचरेत् ।

[प्रथमो मुखीकरणप्रकारः ।]

इष्टकागध्यभागे तु गम्भीरं वर्तुलं समम् ॥ ७२ ॥
गर्तं कृत्वा तत्र सूतं प्रक्षिपेदनुवासितम् ।
निरुन्ध्यात्स्वच्छवस्त्रेण रसस्य दशमांशकम् ॥ ७३ ॥
गन्धं तदूर्ध्वं निक्षिप्य शरावेण निरोधयेत् ।
तत्पृष्ठेऽल्पपुटं दद्यात् गन्धे जीर्णे पुनः पुनः ॥ ७४ ॥
क्षिप्त्वा क्षिप्त्वा शतगुणं चारयेत्पातयेदिति ।
चतुर्गुणे सान्द्रवस्त्रे गालयेत्तं रसेश्वरम् ॥ ७५ ॥

44063

चेणौ क्षिप्त्वा निरुद्धयास्यं पचेद्गोमूत्रपूरिते ।
भाण्डे त्रिसप्तदिवसं पुनस्तत्तत्खल्वके ॥ ७६ ॥

जम्बीरमातुलुङ्गाम्लवेतसैर्भृंखगैस्त्र्यहम् ।
भूनागैश्च त्र्यह मर्द्यं तं पश्चादिष्टकोदरे ॥ ७७ ॥

एकैक गर्तमादद्याद्धान्याभ्र गन्धकं तथा ।
प्रत्येक दशनिष्कं च याम जम्बीरमर्दितम् ॥ ७८ ॥

अनेन लेपयेद्गर्तद्वयमेकेष्टकान्तरे ।
गर्ते क्षिप्त्वाऽथ तं सूतं विंशन्निष्क तदूर्ध्वत ॥ ७९ ॥

अपरामिष्टकान्दद्यात्तत्सन्धि लोणमृत्स्नया ।
दृढं लिप्त्वाऽथ दीपाग्नौ पचेत्सप्तदिनावधि ॥ ८० ॥

इष्टका स्वाङ्गशीता ता अवतार्य हरेद्रसम् ।
किट्टहीन पुनरपि कुर्यादित्थ त्रिवारकम् ॥ ८१ ॥

एव कृते रसेन्द्रस्य मुख स्याद्देवसंज्ञकम् ।

[द्वितीयो मुखीकरणप्रकार ।]

पुनरन्यं प्रवक्ष्यामि मुखीकरणमुत्तमम् ॥ ८२ ॥

रसेन्द्रं जीवभूनाग सम संमर्दयेल्र्यहम् ।
तत्क्षिपेत् भूलतालिप्तमूषाया सन्निवेशयेत् ॥ ८३ ॥

तदूर्ध्वं भूलताकल्कं क्षिप्त्वा रुध्वा विशोषयेत् ।
आर्द्रगोमयलिप्ता ता पादमग्ना निवेशयेत् ॥ ८४ ॥

तद्गर्ते च पुट देयं तुषकारीषवह्निना ।
दिनान्ते तत्समुद्धृत्य पूर्ववन्मर्दयेत्सचेत् ॥ ८५ ॥

निश्चारं पुन कुर्यादित्थं वह्निमुखो रस ।
असते गुह्यसूतोऽयं सर्वसिद्धिप्रदो भवेत् ॥ ८६ ॥

[तृतीयो मुखीकरणप्रकारः ।]

पुनरन्यं प्रवक्ष्यामि मुखीकरणमुत्तमम् ।
गोमूलपूरिते भाण्डे डोलायन्त्रे पचेद्रसम् ॥ ८७ ॥

त्रिस्सप्तवारं सम्यक्च रन्धितं वेणुनाळके ।
मुखं भवति सूतस्य चारणाहं वरानने ॥ ८८ ॥

[चतुर्थो मुखीकरणप्रकारः ।]

इष्टकाद्वयमध्ये च गर्तं तु चतुरङ्गुलम् ।
दशनिष्कं शुद्धगन्धं धान्याभ्रं दशनिष्ककम् ॥ ८९ ॥

जम्बीरनीरैस्संमर्द्य यामं कल्केन तेन च ।
गर्तद्वयं समांशेन लिप्त्वा गर्ते विनिक्षिपेत् ॥ ९० ॥

वासितं रसराजं तं विंशन्निष्कं तदूर्ध्वत ।
इष्टकामपरा न्यस्य श्लक्ष्णमृल्लवणेंदृढम् ॥ ९१ ॥

लेपयेदथ दीपाग्निमध. प्रज्वालयेत्प्रिये ।
अनुस्यूतं ससप्तरात्रं स्वाङ्गशीतं समुद्धरेत् ॥ ९२ ॥

किट्टं विहाय तं सूतं पूर्ववच्च त्रिवारकम् ।
कुर्यादेवं हि सूतस्य मुखं भवति शोभनम् ॥ ९३ ॥

निर्मुखचारणाप्रकारः ।

दिव्यौषधिप्रभावेन रसश्चरति निर्मुख. ।
अथवा वज्रवैक्रान्तस्पर्शादभ्रादिकं चरेत् ॥ ९४ ॥

पारदस्य चतुष्पष्टिनिष्कं वैक्रान्तभस्म च ।
चतुर्निष्कं वज्रभस्म निष्कं दिव्यौषधिद्रवै. ॥ ९५ ॥

सर्वं सप्तदिनं मद्य स रसोऽभ्रादिकं चरेत् ।

वासनामुखचारणम् ।

गन्धकं जारयेत्सूते दोलाख्ये पूर्वभागिते ॥ २६ ॥

यन्त्रे च षोडशगुण रस स्याद्वासनामुख. ।

॥ अभ्रकाभिषेकः— चारणीयाभ्रकस्य संस्कारः ॥

चारणार्हाभ्रकस्याहमभिषेक वदामि ते ॥ ९७ ॥

[प्रथम प्रकार]

मृतमभ्र तु रुधिरै क्षारैर्जलकणैरपि ।

संष्टिलयैस्तुंबुरुभिर्मर्दयेदम्लवर्गकै ॥ ९८ ॥

सप्ताह तच्चरेत्सूत समुखो निर्मुखोऽथवा ।

[द्वितीय प्रकार]

मृतमभ्र च कदली मूलकञ्च शतावरी ॥ ९९ ॥

पुनर्नवा मेघनादो यवचिञ्चा च शिग्रुक ।

सूरण च रसैरेषा मर्दयेद्भावयेत्प्रिये ॥ १०० ॥

सप्ताह तच्चरेत्सूत समुखो निर्मुखोऽथवा ।

[तृतीय प्रकार]

शुल्वपात्रे तु लवणसर्जिजटङ्कणभूखगान् ॥ १०१ ॥

क्षिप्त्वाऽऽरनाळ त्रिदिनं कुर्यात्पर्युषित यथा ।

तस्मिन्नागं तु विद्राव्य ढालयेच्छतधा प्रिये ॥ १०२ ॥

रौप्यकर्मणि वङ्गस्य तद्वद्वैर्भावयेद्धनम् ।

सप्ताह तच्चरेत्सूत समुखो निर्मुखोऽथवा ॥ १०३ ॥

[चतुर्थ प्रकार]

धान्याभ्रमर्कक्षीरेण मर्दयेदेकवासरम् ।

निरुद्ध्य संपुटे पच्यात्कपोताख्ये पुटे पुनः ॥ १०४ ॥

चतुर्वारं पुटैरेवं मर्दयेच्च पुनस्तथा ।
रम्भाद्रवैस्त्रिधा मर्द्यं मूलकस्य द्रवैस्त्रिधा ॥ १०५ ॥

काकमाची मेघनादो मत्स्याक्षी च पुनर्नवा ।
अपामार्गश्चित्रकं च विदारी भृङ्गराण्मुनिः ॥ १०६ ॥

चतुर्वारं पचेदेवं मर्दयेच्च पुनस्तया ।
एतैरेकैकधा मर्द्यं पुटपाकं पृथक् पृथक् ॥ १०७ ॥

तदभ्रकं भावयेच्च मुसली यवचिञ्चिकाः ।
तण्डुली कदली शिग्रुर्वरी चार्क. पुनर्नवा ॥ १०८ ॥

एकैकैश्च द्रवैर्भाव्यमेकैकं दिवसं पृथक् ।
तदभ्रकं पारदेन्द्रश्वरत्येव सुरार्चिते ॥ १०९ ॥

[पञ्चमः प्रकारः]

धान्याभ्रं रविदुग्धेन मर्दयेद्यामयामकम् ।
तदभ्रं संपुटे रुध्वा कपोताख्यपुटे पचेत् ॥ ११० ॥

वारांश्चतुर्दशैवं स्यात्ततो रम्भार्कपीलुकाः ।
नागबल्ली च मुसली कुबेराक्षी च शिग्रुकः ॥ १११ ॥

तुम्बी तुंबुरुरंकोलबलापामार्गकाः प्रिये ।
गृहीत्वैषामेकरसं सव्योषं च सकांजिकम् ॥ ११२ ॥

भाण्डमध्ये विनिक्षिप्य डोलायन्त्रे पचेन्नयहम् ।
पूर्वाभ्रं च ततस्तस्मात्समुद्धृत्याथ साध(शोष ?)येत् ॥

टङ्कणं तुवरी सिन्धु कासीसं च समं समम् ।
अभ्रकस्य दशांशं तु सर्वमेतद्विमर्दयेत् ॥ ११४ ॥

तदभ्रकं चरेत्सूतः समुखो निर्मुखोऽथवा ।

[षष्ठः प्रकारः]

मुण्डीद्रवे तु शतधा द्रुतं नागं प्रढालयेत् ॥ ११५ ॥

तद्द्रवेण च धान्याभ्रं मर्दयेत्संपुटे क्षिपेत् ।

रुध्वा पचेत्कपोताख्ये पुटे चैवं तु सप्तधा ॥ ११६ ॥

आर्द्रकस्य द्रवैरेवं सप्तधा चिलकद्रवैः ।

तत्समं गन्धकं दत्वा मर्दयेद्भावयेत्क्रमात् ॥ ११७ ॥

प्रागुक्तमुण्डीस्वरसैर्बीजपूरसेन च ।

स्तन्यैरेकदिनं भाव्यं तदभ्रं च चरेद्रसः ॥ ११८ ॥

एवं सर्वाणिबीजानि सत्व(ज)ध्याभ्रकस्य च ।

स्वर्णादिसर्वलोहानि सत्वानि विविधानि च ॥ ११९ ॥

द्रव्याणि सर्वरत्नानि यद्यत्स्याच्चारणार्हकम् ।

तत्तत्पिष्ट्वाऽभ्रवत्कार्यं तत्तच्चरति पारदः ॥ १२० ॥

[सप्तमः प्रकारः]

तिलपर्णीरसैः पिष्ट्वा धान्याभ्रं पुटयेत् त्रिधा ।

सप्तधा भावयेदस्य मर्दनेन च पारदः ॥ १२१ ॥

पिष्टता याति सहसा गगनं चरति क्षणात् ।

[अष्टमः प्रकारः]

त्रिक्षारं पञ्चलवणं कांक्षी कासीसटङ्कणम् ॥ १२२ ॥

भूखगं हेममाक्षीकं सौराष्ट्री वत्सनाभकम् ।

तुवरी वेतसाम्लं च सर्वमेतत्समांशकम् ॥ १२३ ॥

तत्समांशं तु धान्याभ्रं धान्याम्लैर्मर्दयेद्दिनम् ।

अर्कक्षीरं भृङ्गराजो मेघनादः पुनर्नवा ॥ १२४ ॥

मूलकं चित्रकं रंभा काकमाची शतावरी ।
अपामार्गस्तालमूली विदारी तण्डुली मुनिः ॥ १२५ ॥

मीनाक्षी शिग्रु बृहती कुमारी यवचिञ्चिका ।
बला तुम्बी कुबेराक्षी व्योषं तुंबुरुपीलुनी ॥ १२६ ॥

अङ्कोलः फणिवल्ली च सर्वमेतत्समांशकम् ।
संपेष्य कल्कयेद्देवि धान्याम्ले तच्चतुर्गुणे ॥ १२७ ॥

द्रुतं नागं शतं वारान्क्षिपेत्तस्मिन्पुनः पुनः ।
कल्कद्रवेण पूर्वाभ्रं यामं संमर्दयेद्दृढम् ॥ १२८ ॥

कपोताख्ये पुटे पच्यादेवं विंशतिवारकम् ।
तत्तुल्यं गन्धकं दत्वा पूर्वोक्तैरौषधद्रवैः ॥ १२९ ॥

सप्तन्यैर्बीजपूरोत्थैर्द्रवैर्भाव्यं त्रिधा सरम् ।
एतदभ्रं तु सूतस्य चारणे परमं हितम् ॥ १३० ॥

न्द्रितं व्योमसत्वं च बीजानि विविधानि च ।
मादिसर्वलोहानि रत्नानि विविधानि च ॥ १३१ ॥

न्द्रितं वज्रबीजं च चारणायां विधीयते ।
मस्तमेतत्पूर्वोक्तप्रकारेणैव कारयेत् ॥ १३२ ॥

दा रसेन्द्रश्चरति तत्सर्वं चारणोचितः ।

[नवमः प्रकारः]

ल्वपत्रि तु कासीसं कांक्षी माक्षीकगन्धकम् ॥ १३३ ॥

रतयं पञ्चलोणमम्लयुक्तं क्षणं क्षिपेत् ।
व्यामिपेकयोगोक्तं शतधा दोलयेदहिम् ॥ १३४ ॥

ं धान्येन वस्तूनि चारणार्हाणि भावयेत् ।
ी पुनर्नवा रेणु गवाक्षी यवचिञ्चिका ॥ १३५ ॥

शिग्रुका मेघनादश्च रसैरेषां विभावयेत् ।
चन्नाभ्रकं क्रमेणैव सप्ताहं सुरवन्दिते ॥ १२६ ॥

तदभ्रकं नागवल्या कोवेर्या शिग्रुकस्य वा ।
वाणाङ्कोलचलारेमास्फोतानां पीलुकस्य वा ॥ १२७ ॥

अलम्बुपाहिमरु(लमु ?)चामुसलीबुम्बुरोरपि ।
अथवा खरमञ्जर्यास्तिक्तशाकस्य वा प्रिये ॥ १२८ ॥

एकेनैषां रसेनैव व्योमसर्पसंयुतम् ।
स्विन्नं त्रिदिवसं कुर्याच्चस्मिन् टङ्कणसैन्धवम् ॥ १२९ ॥

कासीसं तुवरीं क्षिप्त्वा पूर्वाभिषवयोगतः ।
एतदभ्रं चरेत्सूतः समुखो निर्मुखोऽथवा ॥ १४० ॥

तदभ्रकप्रभावेन गोळकस्सिद्धिदो भवेत् ।

[दशमः प्रकारः]

धान्याम्लैरम्लवर्गैश्च स्वेदयेदभ्रकं दिनम् ॥ १४१ ॥

ततस्स्नुक्क्षीरतो मर्द्य कपोतारव्ये पुटे दहेत् ।
मुनित्रयं मेघनादं रम्भाकन्दं च मूलकम् ॥ १४२ ॥

मत्स्याक्षी शृङ्गिवेरं च काकमाची पुनर्नवा ।
अपामार्गस्त्वरूपूगश्चैतेषां तु रसेन च ॥ १४३ ॥

एकैकेन पुनर्दद्यादेकैकं पूर्वमभ्रकम् ।
डोलायन्त्रे स्नुद्दीक्षीरयुक्तमेकदिनं पचेत् ॥ १४४ ॥

ततश्छायागते शुष्के घनेऽस्मिन्नवसारकम् ।
निंबं वचाञ्च कासीसं चणकाम्लं पृथक्पृथक् ॥ १४५ ॥

अभ्रस्य षोडशांशं च निक्षिपेत्ताम्रभाजने ।
वर्षयेत्तच्चरेत्सूतो लेहपालस्य योगतः ॥ १४६ ॥

[एकादशः प्रकारः]

धान्याभ्रं मर्दयेत्सोमवल्लीतोयेदिनं दृढम् ।
पुटेदेवं त्रिधा पश्चात् सोमवल्ल्या रसेन च ॥ १४७ ॥

भावयेत्सप्तधा देवि रसश्चरति तद्धनम् ।

[द्वादशः प्रकारः]

सारनाले तु शतधा निषिच्य तमनेन च ॥ १४८ ॥

शतधा प्लावयेदभ्रं ताम्रवासनया सह ।
सलल्यां तच्चरेत्सूतो नात्र कार्या विचारणा ॥ १४९ ॥

गन्धकभावना ॥

चारणार्थस्य गन्धस्य भावनां शृणु पार्वति ।
सौराष्ट्रं चाजमोदं च सर्जीं क्षारीसमेव च ॥ १५० ॥

मर्दयेच्छ्लुतोयेन गन्धकं तेन भावयेत् ।
सप्ताहं मर्दितं गन्धं चारयेत्पारदस्य च ॥ १५१ ॥

रागं धत्ते रसेन्द्रस्य बीजानां पाकजारणे ।
पक्षच्छेदे रसेन्द्रस्य श्रेयस्स्यात्सर्वकर्मणि ॥ १५२ ।

पलाशपुष्पस्वरसैः शाकवृक्षच्छदद्रवैः ।
विष्णुक्रान्ताद्रवैर्गन्धं भावयेत्सप्तवासरम् ॥ १५३ ।

तं गन्धं चारयेत्सूते इष्टकायन्त्रयोगतः ।

अभ्रचारणे श्रेष्ठा दिव्यमूल्यः ॥

अथाभ्रचारणे श्रेष्ठा दिव्यमूलीर्वदामि ते ॥ १५४ ।

वज्री रंभा हंसपदी चिञ्चिका व्याघ्रपादिका ।
मण्डूकी वृहती पुष्पा कुमारी लाङ्गली तथा ॥ १५५ ॥

सर्पाक्षी चाग्निधमनी शङ्खपुष्पीन्द्रवारुणी ।
षण्ड(खण्ड)जारी च कार्कोटी विख्याता दिव्यमूलिका ॥

गन्धकाभ्रकचारणम् ।

अथातश्चारणं कर्म प्रवक्ष्यामि समासतः ।
धान्याभ्रकं द्रुते गन्धे समं क्षिप्त्वा नियोजयेत् ॥
ख्यातो गन्धाभ्रयोगोऽयं श्रेष्ठश्चारणकर्मणि ।
समुखं निर्मुखं वापि पारदं दशनिष्ककम् ॥ १५८ ॥
गन्धाभ्रयोगनिष्के द्वे पिष्टं कुर्याद्यथा तथा ।
तं पिष्टं नागपिष्टयाऽथ समया परिवेष्टयेत् ॥ १५९ ॥
हेमकर्मणि वङ्गस्य पिष्ट्या रजतकर्मणि ।
ताम्रपिष्ट्या देहसिद्धौ वेष्टयेत्परमेश्वरि ! ॥ १६० ॥
तां पिष्टिं विद्रुते गन्धे विपचेद्दिवसत्रयम् ।
तां पिष्टिं दीपिकायन्त्रे पाचयेत्पातयेदधः ॥ १६१ ॥
तं रसं पूर्ववत्पिष्टिं कुर्याद्वेष्टनवर्जिताम् ।
त्रिदिनं विद्रुते गन्धे विपचेत्पातयेदधः ॥ १६२ ॥
तं रसं तत्खल्वे तु चतुष्पष्टिगुणं क्षिपेत् ।
भागैकमभ्रपिष्टाभ्रं मर्द्यं दिव्यौषधैर्दिनम् ॥ १६३ ॥
तत्क्षिपेच्चारणायन्त्रे जम्बीररससंयुते ।
तीव्रातपे दिनं स्थाप्यं सूतश्चरति तद्भनम् ॥ १६४ ॥
एवं पुनः पुनर्गर्भपिष्टीग्रासक्रमात्मकम् ।
पलाभ्रचारणं प्रोक्तमेवं सत्वाभ्रचारणम् ॥ १६५ ॥
एवं कुर्याद्यथाशक्यं चारणं परमेश्वरि ! ।
रसेऽभ्रं चारयेत्पूर्वं चतुष्पष्टितमांशकम् ॥ १६६ ॥

द्वात्रिंशत्तमभागं स्याच्चदेतत्षोडशांशकम् ।
अष्टमांश चतुर्थांशं द्वितीयांशं समं क्रमात् ॥ १६७ ॥

द्विगुणं चतुर्गुणं चाष्टगुण षोडशकं गुणम् ।
द्वात्रिंशद्गुणमेव स्यात् चतुष्पष्टिगुण क्रमात् ॥ १६८ ॥

पक्षच्छेदस्त्वदोषत्वं लघुता भासयोग्यता ।
मुखिताग्निसहत्व च व्यापित्व गतिहीनता ॥ १६९ ॥

रसेन्द्रस्यानवस्थत्वं च भवेदभ्रकचारणात् ।

जारण ॥

यस्याहमपि तुष्ट स्या तस्य सूतेन्द्रजारणे ॥ १७० ॥

मतिर्भवेन्न सन्देहो जारणा मुक्तिमुक्तिदा ।
दुर्लभा जारणा देवि विना भाग्य न लभ्यते ॥ १७१ ॥

जारणा द्विविधा बालजारणा वृद्धजारणा ।

जारणे क्रम. ॥

गन्धं न जारयेत्पूर्वं सर्वसत्वान्यत परम् ॥ १७२ ॥

द्वन्द्वानि सर्वलोहानि पक्वबीजानि भैरवि ! ।
पद्मरागादिरत्नानि जारयेच्च यथाक्रमम् ॥ १७३ ॥

जारणाय अभ्रकसत्वनिर्माण प्रकार ॥

[प्रथम प्रकार]

जारणार्हं व्योमसत्व रसराजस्य वक्ष्यते ।
धान्याभ्रक च विधिवन्मारयेद्वज्रसज्ञकम् ॥ १७४ ॥

अभिषेक पूर्ववत्स्यात्तन्मिस्ताप्य दशांशकम् ।
पञ्चमाहिषगव्यैश्च मर्दयेत्कर्पसन्निभा ॥ १७५ ॥

कुर्यात वटिका कोष्ठीयन्त्रे सत्व निपातयेत् ।
सत्वस्य च चतुर्थांश ताप्य मूषागत धमेत् ॥ १७६ ॥

एव कृत्वा चतुर्वारं तत्सत्व रसजारणे ।
रसायने च भैषज्ये श्रेष्ठ सकलकर्मणि ॥ १७७ ॥

[द्वितीय प्रकार]

मृताभ्र तच्चतुर्थांश नाग तत्पादमाक्षिकम् ।
पञ्चभिर्माहिषैर्गव्यै पातयेत्सत्वमुज्ज्वलम् ॥ १७८ ॥

तत्सत्व तच्चतुर्थांशं माक्षिकं तत्समा शिलाम ।
धमेत्पत्रिसमूपाया सत्व स्याद्धेमसन्निभम् ॥ १७९ ॥

एव कुर्याच्चतुर्वार तत्सत्व ग्रसते रस ।

[तृतीय प्रकार]

मृताभ्रक षोडशाश तच्चतुर्थांशक नपु ॥ १८० ॥

तत्सम तालक क्षिप्त्वा पञ्चमाहिषगव्यत ।
सत्व निपातयेच्च चतुर्थं हरितालकम् ॥ १८१ ॥

क्षिप्त्वा क्षिप्त्वा चतुर्वारं तत्सत्व ग्रसते रस ।

[चतुर्थ प्रकार । अभ्रकसत्वमृदूकरणम्]

चञ्चमूपागत कृत्वा घनसत्व च तत्समम् ॥ १८२ ॥

कच च टङ्कण क्षिप्त्वा रुध्वा तीव्राग्निना धमेत् ।
तत्क्षिपेदम्लवर्गेण चिञ्चाबीजं स्नुहीदलम् ॥ १८३ ॥

पिष्ट्वा तस्मिन्पुनस्तद्वत्कचटङ्कणयोगत ।
धमेदेव ससवार सेचन च पुन पुन ॥ १८४ ॥

तदभ्रसत्व शुभ्र स्यान्मृदु स्याच्चारणोदितम् ।

[पञ्चमः प्रकारः]

रसेन्द्रं टङ्कणं ताप्यं भागैकैकं पृथक्पृथक् ॥ १८५ ॥
त्रिभागं शोधितं नागं मृताभ्रं दशभागकम् ।
यवक्षारं च दग्धोणौ सर्जक्षारं च गुग्गुलुम् ॥ १८६ ॥
अजापञ्चाङ्गसंयुक्तं अम्लमूलगणैर्युतम् ।
मर्दयेत्पूर्ववत्सत्वं पातयेन्मृदु निर्मलम् ॥ १८७ ॥

द्वन्द्वमेलापनाय मूषालेपः ॥

[प्रथमः प्रकारः]

द्वन्द्वमेलापने मूषा लेपं वक्ष्यामि पार्वति ! ॥ १८८ ॥
मेषशृङ्गं खुरं गुञ्जा टङ्कणं च विषं समम् ।
स्थूलमेकस्य वसया पिष्ट्वा मूषां प्रलेपयेत् ॥ १८९ ॥
मिलन्ति सर्वसत्वानि मूषायां चूर्णितानि च ।
गुग्गुलुं धातकीपुष्पं गुडं क्षारत्रयं समम् ॥ १९० ॥
स्तन्यैः पिष्ट्वाऽथ मूषायां लेपनं द्वन्द्वमेलनम् ।

[द्वितीयः प्रकारः]

अश्मभेदी लाङ्गली च भूलता च मरीचकः ॥ १९१ ॥
कार्पासस्य फलं शङ्खपुष्पैतांश्च मर्दयेत् ।
नारीस्तन्येन तेनैव मूषामन्तः प्रलेपयेत् ॥ १९२ ॥
तस्यां मिलन्ति सत्वानि सर्वाणि च महारसाः ।
हेममुख्यानि लोहानि चण्डाग्निधगनेन च ॥ १९३ ॥

[तृतीयः प्रकारः]

चुचुन्दर्याश्च पिशितं टङ्कणं च विषं समम् ।
मर्दयित्वा च मूषान्तर्लेपयेत्तत निक्षिपेत् ॥ १९४ ॥

द्वन्द्वयोग्यं तु यद्यत्स्यात्तत्सर्वं धमनान्मिलेत् ।

[चतुर्थः प्रकारः]

भस्मीकृतमपामार्गं कटुतैलमर्दितम् ॥ १९५ ॥

मूषायां लेपयेत्तेन द्वन्द्वद्रव्यं विनिक्षिपेत् ।
मिलेत्तीव्राग्निधमनात्तन्मारकत्वापनात् ॥ १९६ ॥

द्वन्द्वमेलापनम् ॥

अत एव प्रवक्ष्यामि द्वन्द्वमेलापनं शृणु ।
वर्षाभूकदलीकन्दकाकमाचीपुनर्नवम् ॥ १९७ ॥

स्वर्णं नरकपालं च गुञ्जा टङ्कणमभ्रकम् ।
सत्वं मूषागतं ध्मातं हेमाभ्रं मिलति क्षणात् ॥१९८॥

अभ्रकं चूर्णयित्वा तु काकमाचीरसप्लुतम् ।
कपित्थतोयसंयुक्तं सूतटङ्कणसंयुतम् ॥ १९९ ॥

वङ्गपत्रान्तरे न्यस्तं ध्मातं वङ्गाभ्रकं मिलेत् ।
आवर्त्य कटुतैलेन भस्मापामार्गजं क्षिपेत् ॥ २०० ॥

हेनाभ्रं नागताप्येन ताराभ्रं हरितालकात् ।
गन्धकेन तु शुल्वाभ्रं तीक्ष्णाभ्रं सिन्धुहिङ्गुलात् ॥

वङ्गाभ्रं हरितालेन नागाभ्रं शिलया मिलेत् ।
लाङ्गली चमरीकेशाः कार्पासास्थि कुलत्थकम् ॥

मूलता चाश्मदमनी स्त्रीस्तन्यं सुरगोपकः ।
द्वन्द्वे प्रलिप्तमूषाया सुध्मातास्तीव्रवह्निना ॥ २०२ ॥

कान्ताभ्रशैलविमलाः मिलन्ति सकलाः क्षणात् ।
अथ चुच्छुन्दरीमांसं विपटङ्कणयोजितम् ॥ २०४ ॥

मूषाप्रलेपार्थकुरुते सर्वद्वन्द्वेषु मेलनम् ।
जौर(?)भ्रमरशृङ्गं च मण्डूकस्य वसामिषम् ॥ २०५ ॥

गुञ्जादङ्कणलेपेन सर्वसत्वेषु मेलनम् ।
टङ्कणोर्णागिरिजतुकर्णाक्षीमलकर्कटैः ॥ २०६ ॥

मिलन्ति सर्वद्रव्याणि स्त्रीस्तन्यपरिपेषितैः ।
धातकीगुग्गुलुगुडसर्जयावकटङ्कणैः ॥ २०७ ॥

स्त्रीस्तन्यपेषितं शस्तं द्वन्द्वं स्यात्तु रसायने ।
सूक्ष्मचूर्णं तु यत्किञ्चित्पूर्वकल्केन संयुतम् ॥ २०८ ॥

अन्धमूषागतं ध्मातं संकरं मिलति क्षणात् ।
वापितं ताप्यरसकस्यकैर्दरदेन च ॥ २०९ ॥

स सत्वं स्यादनिर्दिष्टं दृढं ध्मातं मिलेत्तत· ।
रसोपरसलोहानि सर्वाण्येकत्र मेलयेत् ॥ २१० ॥

[प्रथमः प्रकारः]

अन्योन्यं द्वन्द्वतां यान्ति द्रवन्ति सलिलं यथा ।
वज्राभ्रसत्वचूर्णं तु यत्किञ्चिल्लोहचूर्णकम् ॥ २११ ॥

द्वयं समं तयोस्तुल्यमरिवर्गं विनिक्षिपेत् ।
द्वन्द्वमेलनमूषायां धमनान्मेलनं भवेत् ॥ २१२ ॥

[द्वितीयः प्रकारः]

मर्दयेट्टङ्कणं रम्भाकन्दलोयेन लेपयेत् ।
मूषां श्वेताभ्रकं वङ्गं धमनान्मिलति प्रिये ॥ २१३ ॥

[तृतीयः प्रकारः]

वनशिग्रुष्टङ्कणश्च गुञ्जा च नृकपालकम् ।
पिष्ट्वा योषित्स्तन्यनीरैस्तेन मूषां प्रलेपयेत् ॥ २१४ ॥

वङ्गं श्वेताभ्रसत्वं च चूर्णयित्वा क्षिपेद्धमेत् ।
असंशयं मिलन्त्येव श्रेष्ठं रजतकर्मणि ॥ २१५ ॥

[चतुर्थः प्रकारः]

श्वेताभ्रसत्वं सचूर्ण्यं तच्चतुर्थांशपारदम् ।
सूततुल्यं टङ्कणं च मर्दयेत्कार्कमाक्षिजैः ॥ २१६ ॥
द्रवैस्तद्गोलकं कृत्वा वङ्गपत्रेण वेष्टयेत् ।
श्वेताभ्रसत्वतुल्येन लिप्तमूषागतं धमेत् ॥ २१७ ॥
भवेत्संमेलनं सम्यक् मुख्यः स्याद्रूप्यकर्मणि ।

वङ्गहेममेलापने मूषालेपः ॥

[प्रथमः प्रकारः]

अथातो वङ्गकनकद्वन्द्वमेलाप्रलेपनम् ॥ २१८ ॥
गुञ्जा कान्तमुखं तुल्यं द्वन्द्वयोर्द्विगुणं चरिम् ।
स्तन्येन योपितां पिष्ट्वा मूषायामन्तरे तथा ॥ २१९ ॥
मेलयेद्वङ्गमेलापलेपोऽयं कथितो मया ।

[द्वितीयः प्रकारः]

शिलाधातु. कान्तमुखं शशदन्ताश्च गन्धक. ॥ २२० ॥
अम्लवेतसकं तुल्यं पिष्ट्वा मूषां प्रलेपयेत् ।
हेमवङ्गं मिलत्येव मूषायां नात्र संशय. ॥ २२१ ॥

[तृतीयः प्रकारः]

चुल्लीरास्थि शिलाधातु महिषीकणटङ्कणम् ।
टङ्कणोर्णासमं सर्वं कान्तास्तन्येन मर्दयेत् ॥ २२२ ॥
अनेन लेपयेन्मूषां हेमवङ्गं मिलत्यलम् ।

[चतुर्थः प्रकारः]

कान्तास्यं टङ्कणं बालवत्सविड्भ्रमराश्रिय च ॥
मनुष्यचिकुरास्थीनि स्त्रीस्तन्येन विमर्दयेत् ।
अनेन लिप्तमूषायां हेमवज्रं मिलेद्ध्रुवम् ॥ २२४ ॥

[पञ्चमः प्रकारः]

ताप्यटङ्कणभूनागकान्तकाचमधूनि च ।
कुलीराभ्रि स्नुहीक्षीरमर्कक्षीरं समं समम् ॥ २२५ ॥
स्तन्येन मर्दयेत्सर्वं मूषालेपं तु कारयेत् ।
मूषालेपो भवेदेष वज्रहाटकमेलनः ॥ ॥ २२६ ॥
वज्रं भस्मीभवेद्यैस्तैर्मूषामन्तर्विलेपयेत् ।
धर्मेत्तीव्राग्निना हेमवज्रमेलापनं भवेत् ॥ २२७ ॥

वज्रहेममेलापनम् ॥

[प्रथमः प्रकारः]

अथातो मेलनं वक्ष्ये वज्रहेम्नोस्सुरेश्वरि ! ।
स्वर्णं द्वादशभागं स्यात्तदर्धं शुद्धपारदम् ॥ २२८ ॥
रसेन्द्रार्धं नागभस्म नागार्धं मृतवज्रकम् ।
मृतच्चतुष्टयं चाम्लैर्मर्दयेत्तत्तगवल्वके ॥ २२९ ॥
उद्धृत्य द्वन्द्वमेलापे मूषायां रोधयेद्धगेत् ।
हठात्तच्च मिलत्येतन्नात्र कार्या विचारणा ॥ २३० ॥

[द्वितीयः प्रकारः]

भावयेच्छारिवाक्षीरि मृतं वज्रं दिनं ततः ।
मर्दयेद्गोलकं कृत्वा शोषयेच्चैकभागकम् ॥ २३१ ॥
त्रिभागं रसराजं च चतुर्भागं सुवर्णकम् ।
अम्लेन मर्दयित्विष्टिं कृत्वा तद्वज्रगोलकम् ॥ २३२ ॥

तत्पिष्ट्वा वेष्टयेत्तच्च भूर्जपत्रेण वेष्टयेत् ।
पक्षं न्यसेद्धान्यराशौ तदुद्धृत्य पुनः पुनः ॥ २३३ ॥
धमेद्धठान्मिलत्येव नात्र कार्या विचारणा ।

[तृतीयः प्रकारः]

वज्रं षोडशभागेन हेमपत्रेण वेष्टयेत् ॥ २३४ ॥
तत्क्षिप्तल्लिसमूपायां स्वर्णांशं श्वेतकाचजम् ।
चूर्णं वा नृकपालं वा चूर्णं कृत्वा विनिक्षिपेत् ॥
निरुध्य च धमेत्तीव्रमेवं कुर्यात्पुनः पुनः ।
क्षिप्त्वा क्षिप्त्वा श्वेतकाचं नृकपालमथापि वा ॥२३६॥
सप्तधैवं मिलत्येव पुनरेवं विधीयते ।
अस्य हेम. षोडशांशं गृतं वज्रं विनिक्षिपेत् ॥
पूर्ववल्लिसमूपायां काचं वा नृकपालकम् ।
क्षिप्त्वा क्षिप्त्वा धमेत्तीव्रं सप्तवारं मिलत्यलम् ॥
एवं तृतीयवारं च कुर्यादेवं चतुर्थकम् ।

द्वन्द्वितानामभिषेकः ॥

अथातो द्वन्द्वितानां च प्रवक्ष्याम्यभिषेचनम् ॥ २३९ ॥
कासीसं पञ्चलवणं माक्षीकं गन्धकं तथा ।
कांक्षी क्षारत्रयं तुल्यमारनालेन मर्दयेत् ॥ २४० ॥
तत्कल्कमातपे ताम्रपात्रे संस्थापयेत्र्यहम् ।
तस्मिन्क्षिपेद्द्रुतं नागं शतधा तद्द्रुतं द्रुतम् ॥२४१॥
ताम्रपात्रस्यसौवीरैर्भावयेच्छतवारकम् ।
द्वन्द्वितं तच्चरेत्सूतो यत्किंचिज्जारणार्हकम् ॥ २४२ ॥
रूप्यकर्मणि यद्वंगं स्यान्नागं स्याद्धेमकर्मणि ।

पक्वबीजविधानम् ॥

अथातस्संप्रवक्ष्यामि पक्वबीजं सुरार्चिते ॥ २४३ ॥

[प्रथमं विधानम्]

सुवर्णं विद्रुते तुल्यं नागाभ्रं द्वन्द्विते प्रिये ।
वाहयेद्द्वादशगुण स्वर्णशेषं यथा धमेत् ॥ २४४ ॥
पक्वबीजमिदं ख्यातं जारयेत्पारदे क्रमात् ।

[द्वितीयं विधानम्]

पीताभ्रसत्वं स्वर्णं च समांशं द्वन्द्विते धमेत् ॥ २४५ ॥
वाहयेद्द्वादशगुणं स्वर्णशेषं यथा धमेत् ।
पुन. पीताभ्रसत्वं च वाहेद्दशगुणं शनै ॥ २४६ ॥
स्वर्णशेषं भवेद्यावत्पक्वबीजमिदं भवेत् ।

[तृतीयं विधानम्]

नागार्कव्योमरसकं चतुस्तिलद्वयंकभागिकम् ॥ २४७ ॥
चूर्णयेल्लिप्तमूषायामन्धयेच्च धमेद्दृढम् ।
माक्षिकेण च तत्खोट संपेष्याम्लै पुटे पचेत् ॥
पुनस्तत्सममाक्षीकमम्लै पिष्ट्वा पुटे पचेत् ।
एवं पञ्चपुटं दत्वा तद्द्रुते हेम्नि वाहयेत् ॥ २४९ ॥
धमेद्दशगुणं यावत्तावत्स्यात्पक्वबीजकम् ।

चतुर्बीजक्रमः ॥

अथातस्सम्प्रवक्ष्यामि चतुर्बीजं वरानने ॥ २५० ॥
हेमतारारितुत्रिलबीजान्येतानि तत्वत ।
हेमबीजं नागबीजं क्षयते हेमकर्मणि ॥ २५१ ॥

तारबीजं वङ्गबीजं कथिते रूप्यकर्मणि ।
हेमबीजं तारबीजं भवेतां च रसायने ॥ २५२ ॥

नागबीजं वङ्गबीजं न रसायनकर्मणि ।
चत्वार्येतानि बीजानि भवेयू रोगशान्तये ॥ २५३ ॥

अन्यथा नैव योज्यानि बीजान्येतानि शाम्भवि ।

हेमबीजविधानम् । [प्रथमं हेमबीजम्]

गन्धकं सस्यकं वाऽपि माक्षीकं वाऽथ तालकम् ॥
शिलां च विमलां वापि वैक्रान्तं वाङ्गनं च वा ।
खर्परं वा कान्तमुखं वा चूर्णयित्वा समांशकम् ॥
शतवारान्द्रुते हेम्नि वाहयेच्च पुनः पुन ।

[द्वितीयं नागभस्मसिद्धं हेमबीजम्]

मृतहिगुलकुष्ठलोहपर्पटिकाभ्रकम् ॥ २५६ ॥
मृतार्कमाक्षीकशिलाविमलांश्च समाशकान् ।
एतान्नागकलाभागान् स्नुह्यर्कपयसा प्रिये ॥ २५७ ॥
मर्दयेत्तेन पत्राणि शुद्धनागस्य लेपयेत् ।
पुटेद्द्वात्रिंशतिपुटे नागो भस्मति तद्वहेत् ॥ २५८ ॥
समं समं च शतधा विद्रुते पूर्ववाहिते ।
सुवर्णं च तथा हेमशोषं तावद्भवेद्दृढम् ॥ २५९ ॥

[तृतीयं वङ्गभस्मसिद्धं हेमबीजम्]

अथवा भस्मयेद्वङ्गं तालशङ्खाभ्रपारदैः ।
चिञ्चाक्षारैस्त्रपु(म्ताप्य ?)सैः स्नुह्यर्कक्षीरमर्दितैः ॥
पुटेत्षोडशभिस्तच्च शतधा हेम्नि वाहयेत् ।

[चतुर्थं ताम्रभस्मसिद्धं हेमबीजम्]

अथवा मारयेच्चुल्यमूर्ध्वाधो गन्धकं समम् ॥ २६१ ॥
क्षिप्त्वा पुटेदष्टवारं ताम्रं हेम्नि वाहयेत् ।

[पञ्चमं तीक्ष्णभस्मसिद्धं हेमबीजम्]

अथवा मारयेत्तीक्ष्णं तीक्ष्णतुल्यं च हिंगुलम् ॥
स्त्रीस्तन्यैर्मर्दयित्वा तु पुटेदथ कलांशकम् ।
तीक्ष्णस्य हिंगुलं दत्वा मर्दयेत्पुटयेत्क्रमात् ॥ २६३ ॥
एवं तत् षोडशपुटैः तत्तीक्ष्णं हेम्नि वाहयेत् ।
शतधा हेम तदिशं(?) निद्रुते हेम्नि वाहयेत् ॥

[षष्ठं हेमबीजम्]

तद्धेम्नि द्विगुणं ताप्यं चूर्णितं तद्धमेद्दृढम् ।
तच्चूर्णयेद्द्वित्रिपुटैः पञ्चभिर्मारितं भवेत् ॥ २६५ ॥
तद्वाहयेद्दशगुणं द्रुते हेम्नि धमन्धमन् ।
तदेव जायते दिव्यं सर्वसिद्धिप्रदायकम् ॥ २६६ ॥
हेमबीजमिदं ख्यातं हितं स्याद्रसजारणे ।

[सप्तमं हेमबीजम्]

सस्यकाम्रकवैकांतसत्वं स्वर्णमहिं रविम् ॥ २६७ ॥
तीक्ष्णं च चूर्णयेल्लिसमूषायां चांग्नितं धमेत् ।
पुनः प्रकटमूषायां धमेत्तस्मिन्द्रुते सति ॥ २६८ ॥
माक्षिकं निक्षिपेत्किंचित्किंचिद्दत्वा पुनः पुनः ।
यावत्स्वर्णायुशेषं स्यात्ततस्तस्मिन्विनिक्षिपेत् ॥ २६९ ॥
स्वर्णं नागं रविं तीक्ष्णं पूर्ववच्च धमेत्क्रमात् ।
वाहयेन्माक्षिकं तद्वद्धमेत्स्वर्णावशेषकम् ॥ २७० ॥

हेमबीजमिदं ख्यातं हितं स्याद्रसजारणे ।

[अष्टमं हेमबीजम्]

समांगं चूर्णयेदभ्रं सत्वं ताम्रमयं शुभम् ॥ २७१ ॥

अभ्रकाद्द्विगुणं धौतं ताप्यं सर्वं धमेद्धठात् ।
मूषायां द्वन्द्वलिप्तायां तत्खोटं चूर्णयेत्ततः ॥ २७२ ॥

मद्यं दिव्यौषधिरसैः संपुटे रोधयेद्दृढम् ।
पचेद्गजपुटे तद्वच्चूर्णयेन्मर्दयेत्पुटेत् ॥ २७३ ॥

एवं पञ्चपुटैः पक्वं तद्धेत्कनके द्रुते ।
यावद्दशगुणं तावन्मूषायां प्रकटे धमेत् ॥ २७४ ॥

ततस्तस्मिन्शुद्धताप्यं क्षिप्त्वा क्षिप्त्वा धमेद्धमेत् ।
यावत्स्वर्णावशेषं स्यात्स्वर्णबीजमिदं प्रिये ॥ २७५ ॥

[नवमं हेमबीजम्]

तीक्ष्णार्कनागभस्मानि ताप्यचूर्णं समं समम् ।
एतद्द्रुते धहेद्धेम्नि यावद्दशगुणं भवेत् ॥ २७६ ॥
तावत्स्वर्णावशेषं स्यात्स्वर्णबीजमिदं प्रिये ।

[दशमं हेमबीजम्]

मृततारार्कतीक्ष्णायः समं सर्वं धमेद्धृढम् ॥ २७७ ॥

मूषायां द्वन्द्वलिप्तायां तत्खोटं चूर्णयेत्ततः ।
तच्चूर्णं द्राविते स्वर्णे वाहयेच्च शनैश्शनैः ॥ २७८ ॥

यावद्दशगुणं पश्चात्ताप्यचूर्णं क्षिपन्क्षिपन् ।
धमेत्स्वर्णावशेषं स्याद्धेमबीजमिदं प्रिये ॥ २७९ ॥

[एकादशं हेमबीजम्]

नागमेकं चतुस्ताम्रं सत्वं रसकसम्भवम् ।
मूषायां द्रवलिप्तायां सर्वं धमतं विचूर्णयेत् ॥ २८० ॥
तच्चूर्णं वाहयेत्स्वर्णे विद्रुते षड्गुणं शनैः ।
स्वर्णशेषं भवेद्यावत्तावत्स्यात्स्वर्णबीजकम् ॥ २८१ ॥

[द्वादशं हेमबीजम्]

ताप्येन मारयेत्ताम्रं तन्नागे वाहयेच्छनैः ।
यावच्छत(दश ?)गुणं ताप्यं चूर्णं क्षिप्त्वा धमन्धमन् ॥
तद्वाहयेद्धमेद्धेम्नि क्रमाद् द्वात्रिंशतं गुणम् ।
स्वर्णशेषं भवेद्यावत् तावत्स्याद्धेमबीजकम् ॥ २८२ ॥

[त्रयोदशं हेमबीजम]

भागैकं खर्परीसत्वं द्विभागं चाभ्रसत्वकम् ।
त्रिभागं ताम्रचूर्णं च लिप्तमूषागतं धमेत् ॥ २८४ ॥
तत्खोटं चूर्णयेत्ताप्यं तुल्यमम्लैर्विमर्दयेत् ।
तल्लिप्तसंपुटे रुध्वा पुटेल्लघुपुटे पुनः ॥ २८५ ॥
एवं पञ्चपुटैः पक्वं तच्चूर्णं वाहयेद्द्रुते ।
सहस्रगुणितं हेम्नि यावत्स्वर्णावशेषितम् ॥ २८६ ॥
तावत्ताप्यं वदेद्युक्त्या स्यादिदं हेमबीजकम् ।

[चतुर्दशं हेमबीजम]

भागैकमभ्रसत्वं च द्विभागं शुद्धताम्रकम् ॥ २८७ ॥
चूर्णयेल्लिप्तमूषायां क्षिप्त्वा रुध्वा धमेद्दृढम् ।
ततस्तं चूर्णयेत्ताप्यं तुल्यमम्लेन मर्दयेत् ॥ २८८ ॥

तद्रुध्वा संपुटे पच्यात्पुटे तच्चूर्णयेत्पुनः ।
पूर्ववन्माक्षिके क्षिप्त्वा मर्दयेत्पातयेत्प्रिये ! ॥ २८९ ॥

एवं पञ्चपुटे कार्ये तच्चूर्णं वाहयेत्प्रिये ! ।
स्वर्णं शतगुणं यावत्तावत्स्याद्धेमबीजकम् ॥ २९० ॥

[पञ्चदशं हेमबीजम्]

माक्षिकं गन्धपाषाणं हरिताळं मनश्शिलाम् ।
वैक्रान्तकं कांतमुखं सस्यकं विमलांजने ॥ २९१ ॥

रसकं चापि शतशश्चूर्णितं हेम्नि वाहयेत् ।
लोहपर्पटिकाताप्यकंकुष्ठविमलाभ्रकैः ॥ २९२ ॥

मृतगुल्वशिलासूतम्नुह्यर्कक्षीरहिंगुलैः ।
नागो निर्जीवतां याति पुटयोगैः पुनः पुनः ॥ २९३ ॥

रसतालकशुद्धाभ्रचिचाक्षौरैस्तथा लघु ।
मृतं नागं मृतं वङ्गं शुल्वं तीक्ष्णं च वा मृतम् ॥

एकैकमुत्तमे हेम्नि वाहयेत्सुरवन्दिते ! ।
निरुद्धे पन्नगे हेम्नि निर्व्यूढे शतसंगुणैः ॥ २९५ ॥

हेम्नि नागादिनिर्वाहणेन वर्णव्यत्यासः ॥

नागजीर्णं रोचनागं हारीतं ताम्रवाहितम् ।
तीक्ष्णजीर्णं रविसमं वङ्गजीर्णं जपानिभम् ॥ २९६ ॥

[प्रथमं तारबीजम्]

श्वेताभ्रसत्वं तीक्ष्णं च ताप्यं च विमलां तथा ।
खर्परं च समं सर्वं कुटिले च चतुर्गुणम् ॥ २९७ ॥

धमेत्सर्वं चूर्णयेच्च भस्मयेत्पुटपञ्चकैः ।
तारेऽद्भुते शतगुणं वाहयेच्च शनैश्शनैः ॥ २९८ ॥

तारबीजमिदं ख्यातं जारणे परमं हितम् ।

[द्वितीयं तारबीजम्]

यथा ताप्येन कुटिलं तथा तार्प्येन मारयेत् ॥ २९९ ॥

तद्भागं च समं तालं तत्समं रजते द्रुते ।
त्रिंशद्गुणं भवेद्यावत् तावद्वाह्यं क्रमेण च ॥

तारबीजमिदं ख्यातं पारदे तच्च जारयेत् ।

[तृतीयं तारबीजम्]

तीक्ष्णं वङ्गं च विमलं समांशं चूर्णयेत्प्रिये ! ॥

द्वन्द्वमेलोपलिप्तायां धमेत्तत्खोटकं भवेत् ।
तत्खोटं चूर्णयेदम्लैर्मर्दयेत्पुटयेदिति ॥ ३०२ ॥

पञ्चधारं प्रमुञ्चति भस्म तज्जायते प्रिये ! ।
तद्भस्म विद्रुते तारे वाह्येच्च समं समम् ॥ ३०३ ॥

भ्रमन्भ्रमन्दशगुणं यावद्भवति भैरवि ! ।
तारबीजमिदं श्रेष्ठं रसराजस्य जारणे ॥ ३०४ ॥

[चतुर्थं तारबीजम्]

श्वेताभ्रसत्वं कुटिलं तारमाक्षीकसत्वकम् ।
लयं समांशं संचूर्ण्य लिप्तमूषागतं धमेत् ॥ ३०५ ॥

तच्चूर्णं वाह्येत्तारे तारतुल्यं विनि(पं ?)क्षिपेत् ।
यावद्दशगुणं तावत्तारमाक्षीकवापतः ॥ ३०६ ॥

तारबीजमिदं प्रोक्तं जारणे परमं हितम् ।

[पञ्चमं तारबीजम्]

त्रिंशैकभागान्देवेशि तीक्ष्णतालमलान्कमात् ॥ ३०७ ॥

चूर्णितान् लिप्तमूषायां क्षिप्त्वा तीव्राग्निना धमेत् ।
तत्खोटं चूर्णयेदम्लैर्मर्दयेत्पुटयेदिति ॥ ३०८ ॥
ससधा तद्द्रुते तारे वाह्यं दशगुणं ततः ।
क्षिप्त्वा क्षिप्त्वा ताळचूर्णं तारशेषं यथा धमेत् ॥
तारबीजमिदं श्रेष्ठं जारणे परमं हितम् ।

[षष्ठं तारबीजम्]

खर्परी ताळशुभ्राभ्रसत्वकं तारमाक्षिकम् ॥ ३१० ॥
तुल्यं सर्वसमं वङ्गं सर्वं मूषागतं धमेत् ।
चूर्णयेन्मर्दयेदम्लैः पुटेदेवं तु ससधा ॥ ३११ ॥
तच्चूर्णं वाहयेत्तारे द्रुते दशगुणं धमन् ।
तारशेषं भवेद्यावत्तावत्स्यात्तारबीजकम् ॥ ३१२ ॥

[सप्तमं तारबीजम्]

श्वेताभ्रसत्वं वङ्गं च द्वन्द्वं कुर्याच्च पूर्ववत् ।
तच्चूर्णे ताळकं दत्वा पादमम्लैर्विमर्दयेत् ॥ ३१३ ॥
पुटेत्तस्मिन्क्षिपेत्ताळं पूर्ववन्मर्दनं पुटम् ।
एवं पञ्चपुटं कुर्यात्तच्चूर्णं वाहयेद्द्रुते ॥ ३१४ ॥
रजते द्वादशगुणं तद्भवेत्तारबीजकम् ।

[अष्टमं तारबीजम्]

श्वेताभ्रसत्वं वङ्गञ्च वङ्गार्धं तीक्ष्णचूर्णकम् ॥ ३१५ ॥
तीक्ष्णांशा तारविमला सर्वं मूषागतं धमेत् ।
ततस्तच्चूर्णयेदम्लैः पिष्ट्वा रुध्वा पुटेत्पचेत् ॥ ३१६ ॥
पञ्चवारं पुनस्तच्च वाहयेद्रजते द्रुते ।
यावच्छतगुणं तावत्ताळकं च क्षिपन् धमेत् ॥ ३१७ ॥

तारशेषं भवेद्यावत् तावत्स्याद्वारवीजकम् ।

ताम्रवीजम् ॥

ताम्रवीजं प्रवक्ष्यामि जारणार्थं रसस्य तु ॥ ३१८ ॥
स्वर्णं ताम्रं समं देवि तयोस्तुल्यं च माक्षिकम् ।
ऊर्ध्वाधो निक्षिपेल्लिप्तमूषायां तद्धमेद्दृढम् ॥

धमेदेवं च दश(शत ?)धा दत्वा दत्वाऽथ माक्षिकम् ।
ताम्रवीजमिदं ख्यातं भास्करिकरणसंनिभम् ॥ ३२० ॥

प्रथमं नागवीजम् ॥

अग्रकं रसकं तुल्यं नागभस्म चतुर्गुणम् ।
धमयेच्चूर्णयेत्तच्च माक्षिकेण च मारयेत् ॥ ३२१ ॥
एतत्समं शिलाचूर्णमेकीकृत्याथ वापयेत् ।
तद्धमेत्सदृशे हेम्नि विद्धुते शतधा प्रिये ॥ ३२२ ॥
नागवीजमिदं प्रोक्तमेतत्सूते तु जारयेत् ।

द्वितीयं नागवीजम् ॥

नागवीजं प्रवक्ष्यामि श्रेष्ठं तद्रसजारणे ॥ ३२३ ॥
रसकाभ्रकताम्रेऽर्हि भागवृद्ध्या धमेत्ततः ।
माक्षिकेण हृतं तच्च वीजं निर्वाहयेत्प्रिये ॥ ३२४ ॥
द्वात्रिंशांशगुणं हेम्नि वङ्गं ताप्यहृतं वहेत् ।
त्रिंशद्गुणं शिलावाप्यं नागवीजमुदाहृतम् ॥ ३२५ ॥

वङ्गवीजक्रमः ॥

वङ्गवीजं प्रवक्ष्यामि वङ्गं तालं च तार्प्यकम् ।
समं धमेच्चूर्णयेच्च तत्समं ताप्यतालकम् ॥ ३२६ ॥

मर्दयेत्पुटयेदम्लैर्भस्म स्यात्षोडशैः पुटैः ।
चारे द्रुते शतगुणं वाहयेद्वह्नभस्म च ॥ ३२७ ॥

तचारे ताळकं देवि द्वात्रिंशद्गुणमावहेत् ।
चञ्चत्बीजमिदं ज्ञेयमेतत्सूते तु जारयेत् ॥ ३२८ ॥

जारणे विडयोगाः ॥

विडयोगान्प्रवक्ष्यामि जारणार्हान्सुरार्चिते ! ।

[१. षडग्नलविडः]

सौवीरं गन्धकं क्षांक्षी कासीसं व्योषसैन्धवम् ॥

सौवर्चलं सर्जिका च सालतीतीरसम्भवम् ।
शिग्रुमूलरसैस्सर्वं भावयेत्सप्तवासरम् ॥ ३३० ॥

विडोऽयं जारणे श्रेष्ठो नाम्ना च षडग्नलः ।

[२. वैश्वानरविडः]

अर्कक्षीरैर्दग्धशङ्खं भावयेत्पुटयेत्प्रिये ! ॥ ३३१ ॥

शतधाऽयं विडः प्रोक्तो नाम्ना वैश्वानरो महान् ।

[३. ज्वालामुखविडः]

गन्धकं शङ्खचूर्णं च सैन्धवं च विषं समम् ॥ ३३२ ॥

शतवारं गवां मूत्रैः शिग्रुमूलरसैस्तथा ।
भावितोऽयं विडः प्रोक्तो नाम्ना ज्वालामुखस्स्मृतः ॥

[४. अग्निजिह्वकविडः]

पलाशस्य रसैर्भाव्यं टङ्कणं शतधा प्रिये ! ।
लोहानां जारणे श्रेष्ठो विडो नाम्नाऽग्निजिह्वकः ॥

[५. षड्बामुखविडः]

कान्तास्यं गन्धकं चूल्यै चैकैकं लोहजारकम् ।
चूलीगन्धकसिन्धूत्थतालमूलगटङ्कणान् ॥ ३३५ ॥

सक्षारमूत्रैर्विपचेन्नाम्नाऽयं बटवामुखः ।

[६. महावैश्वानरो विडः]

देवदालिं मोक्षकं च निचुळं च पुनर्नवाम् ॥ ३३६ ॥

पलाशं काञ्चनं वासामेरण्डं वास्तुकं तिलम् ।
कदलीमपि सर्वाङ्गं खण्डितं नाति शोषयेत् ॥ ३३७ ॥

मूलवर्गं चाष्टगुणे प्रक्षिपेत्तदनन्तरम् ।
समूलं मूलकं दग्ध्वा तिलकाण्डं च तत्समम् ॥

क्षारद्वयं पूर्वरसे क्षिप्त्वा स्याप्यं त्र्यहं खरे ।
आतपे तद्वस्त्रपूतं लोहपात्रे द्रवं पचेत् ॥ ३३९ ॥

बहवो बुद्बुदा वाप्या उद्भवन्ति यदा यदा ।
त्रिक्षारं त्रिकटुं गन्धं कासीसं लोणपञ्चकम् ॥ ३४० ॥

सौराष्ट्रीं रामठं चूर्णि समं चूर्णीकृतं क्षिपेत् ।
प्रचालयेल्लोहदर्व्या गुडपाको यथा भवेत् ॥ ३४१ ॥

समुत्तार्य क्षिपेल्लोहसंपुटे समवासरम् ।
भूगर्भे धान्यराशौ च सप्ताहं धारयेत्पुनः ॥ ३४२ ॥

सप्ताहं धारयेद्धर्मे महावैश्वानरो विडः ।

[७. वह्निविडः]

जम्बीराम्लेन शतधा वनशिग्रुरसेन च ॥ ३४३ ॥

गन्धकं भावयेदेष विडस्याद्वह्निसंज्ञक ।
नवसारोपि च तथा गन्धवत्स विडो भवेत् ॥ ३४४ ॥

[८. चित्रभानुविडः]

गन्धकं निचुळक्षारं गुंजाबीजं च टङ्कणम् ।
मूलबीजं देवदाल्यास्समं सर्वं च भावयेत् ॥ ३४५ ॥

तिक्तकोशातकीनीरैस्सप्तधाऽम्लगणैस्तथा ।

विडोऽयं चित्रभानुस्स्यात्प्रधानं हेमजारणे ॥ ३४६ ॥

[९. महाविडः]

मूलकं शृङ्गिबेरं च वह्निं दग्ध्वा त्रयं समम् ।
गोमूत्रे निक्षिपेत्तच्च वस्त्रपूतं च कारयेत् ॥ ३४७ ॥
अनेन भावितो गन्धः शतधा स्यान्महाविडः ।

[१०. अन्यो महाविडः]

ताळं शिला टङ्कणं च शङ्खं लवणशुक्तिके ॥ ३४८ ॥
मूलाम्लैर्विपचेन्मन्दं वह्नावेष विडो महान् ।

[११ वज्रानलविडः]

अर्कक्षीरैर्दग्धशङ्खं शतधा भावयेत्तत· ॥ ३४९ ॥
मर्दयित्वाऽम्लवर्गेण रुध्वा पञ्चपुटै· पचेत् ।
तत्समं टङ्कणक्षारं क्षिप्त्वाऽम्लगणभावितम् ॥ ३५० ॥
कृत्वा मनश्शिलां गन्धं दरदं विद्रुमं तत. ।
नृपावर्तं तु पञ्चानां शंखचूर्णं समं प्रिये ! ॥ ३५१ ॥
भावयेदम्लवर्गेण त्रिदिनं स्यान्महाविडः ।
नाम्ना वज्रानलः प्रोक्त. खोटस्मूतस्य जारणे ॥
द्वन्द्वमेळापमूषायां सारणे योजयेत्सदा ।
पारदस्तु क्षणादेव वज्रादीन्यपि जारयेत् ॥ ३५३ ॥

[१२. अन्यो विडः]

निर्दग्धशङ्खचूर्णं च रविक्षीरशताप्लुतम् ।
पुटितं बहुशो देवि ! मतस्तो जारणे विड· ॥ ३५४ ॥

[१३. षडवामुखो विडः]

शतशो वा प्लुत चूर्णं गन्धकस्य गवां जले. ।

निर्दग्धशङ्खचूर्णं तु शिग्रुमूलाम्बुभावितम् ॥ ३५५ ॥
शतशो विषसिंधूत्थसंयुतं वटवामुखः ।

[१४. सर्वजारकविडः]

गन्धकं भावयेत्कन्याधुत्तूरकरवीरजैः ॥ ३५६ ॥
द्रवैस्तु शतधा घर्मे विडोऽसौ सर्वजारकः ।

[१५. अन्यो विडः]

ताम्रवल्लीदलरसैः प्लावयेद्गन्धसैन्धवम् ॥ ३५७ ॥
सप्ताहेन भवेदेतं नियुंज्याद्धेमजारणे ।

[१६. सिद्धविडः]

सैन्धवं कुनटी गन्धं प्रत्येकं च पलं पलम् ॥ ३५८ ॥
भूलता त्रिपलं सर्वं मर्दयेच्छोपयेत्पचेत् ।
एवं कुर्यादष्टवारं अयं सिद्धविडस्स्मृतः ॥ ३५९ ॥

अभ्रकजारणम् ॥

अथाभ्रजारणं कर्म वक्ष्यामि शृणु पार्वति ! ।
तप्तखल्वे चतुष्पष्टिनिष्कसूतं सुचारितम् ॥ ३६० ॥
भावितं गगनं चैकं निष्कं तत्र विनिक्षिपेत् ।
त्रिक्षारं पञ्चलवणं भूखगाम्लरजवेतसान् ॥ ३६१ ॥
षोडशांशान् रसेन्द्रस्य क्षिपेज्जम्बीरवारिणा ।
मर्दयेद्याममात्रं तु कूर्मयन्त्रे विडान्विते ॥ ३६२ ॥
पचेद्दिनं विनिक्षिप्य जीर्णमासो भवेद्रसः ।
एतत्सूतं तप्तखल्वे क्षिप्त्वा राजीगुडोर्णकम् ॥ ३६३ ॥
इष्टिकां गृहधूमं च सैन्धवं पारदस्य तु ।
एतत्सर्वं षोडशांशं मर्दयम्लगणैर्दिनम् ॥ ३६४ ॥

चण्डातपे पिण्डितं तद्रसे बद्धाऽथ पोटलम् ।
अम्लवर्गेण भरिते डोलायन्त्रे पचेदिनम् ॥ ३६५ ॥

अतिग्रासे त्विदं कुर्यात्पुनर्ग्रासमपेक्षते ।
ग्रासोऽजीर्णो यदि भवेत्पाच्यः कच्छपयन्त्रके ॥ ३६६ ॥

एवं ग्रासक्रमेणैव जारयेद्गगनादिकम् ।
चतुष्पष्टितमांशादि चतुष्पष्टिगुणावधि ॥ ३६७ ॥

रसेन्द्रे जारयेद्ग्रासं दत्वा दत्वा पुनः पुनः ।

जीर्णाभ्रकरसलक्षणम् ॥

चतुष्पष्ट्यंशके सूतो व्योमसत्वे तु जारिते ॥ ३६८ ॥

दण्डधारी जलूकाभो वैप द्वानिंशदंशके ।
षोडशांशे वायसस्य विष्ठातुल्योऽष्टमांशके ॥ ३६९ ॥

दधिमण्डसमो देवि ! चतुर्थांशे तु जारिते ।
नवनीतसमो ब्यंशो गोळाभो जारितो भवेत् ॥ ३७० ॥

अभ्रके समजीर्णे तु शतवेधी भवेद्रस ।
घने द्विगुणजीर्णे तु सहस्रांशेन वेधयेत् ॥ ३७१ ॥

चतुर्गुणेऽभ्रके जीर्णे त्वयुतायुर्भवेत्प्रिये ! ।
गगनेऽष्टगुणे जीर्णे ब्रह्मायुर्लक्षवेधक· ॥ ३७२ ॥

विष्ण्वायुष्षोडशगुणे जीर्णेऽभ्रे कोटिवेधक ।
द्वात्रिंशद्गुणिते जीर्णे रुद्रायुर्दशकोटिभि. ॥ ३७३ ॥

चतुष्पष्टिगुणे जीर्णे नित्यायु शतकोटिभि· ।
अभ्रके समजीर्णे तु रसो दोषान्विमुञ्चति ॥ ३७४ ॥

जहाति खगतान्सर्वान् सर्वलोहानि भक्षयेत् ।
यन्नाधो न पतति नैवोत्पतति चोर्ध्वत ॥ ३७५ ॥

नोद्धारी कपिलो वर्णे यद्दी तिष्ठति निश्चलः ।
विषुवो मुच्यते देवि ! छिन्नपक्षो भवेद्रसः ॥ २७६ ॥

समजीर्णे तु बालस्याद्युवा जीर्णचतुर्गुणः ।
व्योमषड्गुणजीर्णस्तु वृद्धसंज्ञो भवेद्रसः ॥ २७७ ॥

बालो विध्यति कल्केन युवा पत्रप्रलेपतः ।
जारितस्तु रसेन्द्रोऽयं वृद्धो लोहानि विध्यति ॥

बालस्सूतो रुजं हन्ति न समर्थो रसायने ।
युवा रसायने दक्षो वृद्धस्याद्देहलोहयोः ॥ २७९ ॥

अन्यजारणाप्रकारः ॥

अभावे घनसत्वस्य कान्तसत्वं प्रदीयते ।
तदभावे भवेत्तीक्ष्णमेवं द्वन्द्वानि जारयेत् ॥ २८० ॥

घनजीर्णस्य सूतस्य ततो द्वन्द्वानि जारयेत् ।
रसेन्द्रो द्वन्द्वरहितं न चरेदभ्रसत्वकम् ॥ २८१ ॥

तस्माद्धेमादिलोहेन युक्तमभ्रं चरेद्ध्रुवम् ।
नागाभ्रं वाऽपि वङ्गाभ्रं ताम्राभ्रं वा सुरार्चिते ! ॥२८२॥

ताराभ्रं वापि हेमाभ्रं ताप्याभ्रं वापि जारयेत् ।
घनसत्वं यथा जीर्णं तथा द्वन्द्वानि जारयेत् ॥

द्वन्द्वबीजरसस्याथ पक्वबीजानि जारयेत् ।

जारणाफलम् ॥

खल्वन्तु पीठिका देवि ! रसेन्द्रो लिङ्ग उच्यते ॥

मर्दनं चन्दनं तस्य ग्रासः पूजा विधीयते ।
क्षीयमाणे पातकौघे सुलभा रसजारणा ॥ २८५ ॥

जारणायां च लब्धायां ज्ञानं कैवल्यदं भवेत् ।
तावन्मुक्तिः कुतः कान्ते ! यावन्नो वेत्ति जारणाम् ॥

जारणा साधकेन्द्रस्य मुक्तिव्यक्तिकरा प्रिये ! ।
जारणार्थं रसो यावद्दिनं वह्नौ तु धार्यते ॥ ३८७ ॥

शिवलोके सुखं भुङ्क्ते तावत्कल्पसहस्रकम् ।
धारयेद्यो रसं वह्नावेकाहं वा तदर्धकम् ॥ ३८८ ॥

क्षीयन्ते तस्य पापानि बहुजन्मार्जितानि च ।
सुवर्णरितसो मित्रं स्वर्णदेहस्तथा रसः ॥ ३८९ ॥

असहत्वं सूतवह्नौ तोये नैनं सुवर्णतः ।
चतुर्गुणेन वस्त्रेण पीडितो निर्मलश्च सः ॥ ३९० ॥

गाळनक्रियया ग्रासे सति निश्शेषनिर्गते ।
स भवेद्दण्डधारी च जीर्णग्रासस्तदा रसः ॥ ३९१ ॥

ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् रसेश्वराय सर्वसत्त्वोपहाराय ग्रासं ह्र गृह्ण ह्रीं स्वाहा ॥

१२. गर्भद्रुतिः ॥

गर्भद्रावणयोग्यबीजसिद्धिः ।

[प्रथमः प्रकारः]

गर्भद्रुतिं प्रवक्ष्यामि जारितस्य रसस्य च ।
गर्भद्रावणयोग्यानि बीजानि शृणु भैरवि ! ॥ ३९२ ॥

नागभस्म च माक्षीकं गन्धकं च समं समम् ।
चूर्णितं वाह्येत्स्वर्णं त्रिगुणं द्राविते धमन् ॥ ३९३ ॥

पूतिबीजमिदं सूतगर्भे द्रवति तत्क्षणात् ।

[द्वितीयः प्रकारः]

स्वर्णं नागं समावर्त्य शिलाचूर्णं क्षिपन्क्षिपन् ॥

नागक्षये पुनर्नागं दत्वा दत्वा त्रिवारकम् ।
स्वर्णद्रोपं भवेद्यावत्तावद्ध्याम्यं पुनः पुनः ॥ ३९५ ॥

एतद्बीजं द्रवत्येव रसगर्भे तु मर्दनात् ।

[तृतीयः प्रकारः]

सुवर्णं ताप्यसत्वं तु समं मूषागतं धमेत् ॥ ३९६ ॥

तस्मिन्द्रुते ताप्यचूर्णं तुल्यं तुल्यं क्षिपन्क्षिपन् ।
माक्षीकसत्वं त्रिगुणमेवं वाच्यं पुनः पुनः ॥ ३९७ ॥

एतद्बीजं रसेन्द्रस्य गर्भे द्रवति मर्दनात् ।

[चतुर्थः प्रकारः]

सुवर्णस्य समं ताप्यसत्वमावर्तयेत्ततः ॥ ३९८ ॥

कुर्यात्कण्टकवेध्यानि पत्राणि च विलेपयेत् ।
लवणेनाम्लपिष्टेन गन्धतुल्येन पार्वति ! ॥ ३९९ ॥

तानि पत्राणि च पुटे पचेद्वैमावशेषितम् ।
एतद्बीज रसेन्द्रस्य गर्भे द्रवति मर्दनात् ॥ ४०० ॥

[पञ्चमः प्रकारः]

ताप्यतुल्यं च सिन्धूत्थं मर्दयेदम्लकेन च ।
तत्संपुटे पुटे पच्यात्पुनस्संमर्दयेत्पुटेत् ॥ ४०१ ॥

पुनः पुनर्द्विपञ्चारमस्य तुल्यं च नागजम् ।
भस्म संमर्दयेदम्लैरनेन स्वर्णपत्रकम् ॥ ४०२ ॥

लिप्त्वा लिप्त्वा धमेत्सप्तवारं तद्वाह्येत्तत ।
द्रुतं तं वापयेत्पूर्वं कल्कितैस्सप्तवारकम् ॥ ४०३ ॥

एतद्बीजं रसेन्द्रस्य गर्भे द्रवति मर्दनात् ।

[षष्ठः प्रकारः]

कासीसं टङ्कणं गन्धं ताप्यं सौवर्चलं शिलाम् ॥

तुल्यं संमर्दयेत्सर्वांश्चणकाम्लैर्दिनावधि ।
एतद्बीजं रसेन्द्रस्य गर्भे द्रवति मर्दनात् ॥ ४०५ ॥

गर्भद्रावणे मूषायन्त्रसिद्धिः ॥

सुवर्चलं च कासीसं यवक्षारं च टङ्कणम् ।
माक्षिकं सैन्धवं चुल्ली सामुद्रं राजिका तथा ॥
तुल्यं कांक्षीं च कर्पूरमर्कस्नुक्क्षीरमर्दितम् ।
अनेन लेपयेन्मूषां षिडेनांगुलमालकम् ॥ ४०७ ॥
मूषायन्त्रमिदं श्रेष्ठं गर्भद्रावणकर्मणि ।

गर्भद्रुतिप्रकाराः ॥

[प्रथमः प्रकारः]

स्वर्णं ताम्रं मृत तीक्ष्णं रञ्जितं पक्वबीजकम् ॥ ४०८ ॥
गर्भद्रावणबीजं च सर्वमावर्तयेद्दृढम् ।
द्रुतेऽस्मिंस्ताप्यचूर्णं च क्षिप्त्वा क्षिप्त्वा धमन्धमन् ॥
यावत्क्षयं गते ताम्रतीक्ष्णे तावत्सुरेश्वरि ! ।
एतद्बीजं रसेन्द्रस्य गर्भे द्रवति मर्दनात् ॥ ४१० ॥

[द्वितीयः प्रकारः]

हेम गन्धद्रुतं नाग पक्वबीजस्य साधनम् ।
तद्द्वयं लिप्तमूषायां अन्धयित्वा धमेद्दृढम् ॥ ४११ ॥
तच्चूर्णमभिषिक्तं च रसगर्भे द्रवत्यलम् ।

[तृतीयः प्रकारः]

सुवर्णं विद्रुते शुल्वं मृतं तीक्ष्णं शनैश्शनैः ॥
वाहयेत् षड्गुणं यावत्तद्गरो द्रवति प्रिये ! ।

[चतुर्थ प्रकार]

महारसाननुरसान्क्षीणलोहानि चाक्षये ॥ ४१३ ॥

समाश समभाक्षीकगन्धकावापयोगत ।
शतशो वाहयेदेतदक्षीणाशावशेषितम् ॥ ४१४ ॥

समाशं रसराजस्य गर्भं द्रवति निश्चितम् ।

[पञ्चम प्रकार]

जारितस्य रसेन्द्रस्य चतुष्पष्टितमाशकम् ॥ ४१५ ॥

गर्भद्रावणबीज च तत्खल्वे विनिक्षिपेत् ।
शिलारचकमाक्षीकगन्धकासीसटङ्कणै ॥ ४१६ ॥

मर्दयेच्चणकाम्लेन सर्वमेतद्दिनावधि ।
रसम्यैतत्पोडशाश दत्वा वीज च दापयेत् ॥ ४१७ ॥

मुच्यते यत्र यत्रैव तत्तद्द्रवति तत्क्षणात् ।

[षष्ठ प्रकार]

अपामार्गपलाशोत्थभस्मक्षार समाहरेत् ॥ ४१८ ॥

टङ्कण सयवक्षार कासीसं च सुवर्चलम् ।
साम्भुद्र सैन्धव राजीं माक्षिक नवसारकम् ॥ ४१९ ॥

कर्पूर माक्षिक तुल्य स्नुहीकक्षीरमर्दितम् ।
मूषालेपमनेनैव कृत्वा युर्यादुविडेन च ॥ ४२० ॥

लेपमङ्गुलमानेन शोषयित्वा च निक्षिपेत् ।
रुध्वा स्वेद्य दिनैक तु करीषाग्नौ द्रवत्यलम् ॥

इत्येव द्रावित जार्यं यावद्बीजन्तु षड्गुणम् ।

१३ वाह्यद्युति ॥

शिवे ! वक्ष्यामि ते वाह्यद्युतिकर्म यथाक्रमम् ॥

येनोपायेनाभ्रकाद्द्रुतिर्भवति तच्छृणु ।

अभ्रकद्रुतिः ॥

अथाभ्रकद्रुतिं वक्ष्ये कंचुकीनन्दमेव च ॥ ४२३ ॥

कपितिन्दौ केशतैले प्रत्येकं तु त्रिधा वपेत् ।

मूषाया द्रावयित्वा तदभ्रसत्वं द्रुतिर्भवेत् ॥ ४२४ ॥

स्वर्णद्रुतिः ॥

फलपाशुर्देवदाल्याः शकगोपोऽरुणालका. ।

टङ्कणं जालिनीनीरैर्भावयेद्धुधा प्रिये ! ॥ ४२५ ॥

द्रावयेत्काञ्चनं तत्र वपेत्सूतसमा द्रुति ।

सर्वरत्नद्रुतिः ॥

निक्षारं चणकाम्लं च रामठं चाम्लवेतसम् ॥ ४२६ ॥

तथा ज्वालामुखीक्षारं स्थलकुम्भीरसेन च ।

पिष्ट्वा स्नुह्यर्कयो क्षीरैस्तद्गोळे मृदु हीरकम् ॥

निक्षिपेत्तच्च जम्बीरे डोलायन्त्रे त्र्यहं पचेत् ।

एवं कृते हीरकस्य द्रुतिर्भवति सूतवत् ॥ ४२८ ॥

पद्मरागादिरत्नाना द्रुतिरेव कृते भवेत् ।

द्रुतिमेलापनम् ॥

द्रुतीनां मेळनं वक्ष्ये शृणु भैरवि ! तत्त्वत ॥ ४२९ ॥

कृष्णागस्त्र्य कस्तूरी ब्रह्मबीजं च माक्षिकम् ।

नारीपुष्पं विष हिंगु लशुन टङ्कणं निशा ॥ ४३० ॥

एतैस्समं द्रुतिं सूत तप्तखल्वे विमर्दयेत् ।

पाठा वन्ध्या तालमूली नीली त्रिविधचित्रकम् ॥

पद्मकन्दं क्षीरकन्दं वला गुडूचामृतार्द्रकम् ।
अश्वत्थाख्य निम्बपत्रं स्त्रीस्तन्यं च समं समम् ॥

एतेषां आहृयेत्स्वच्छं रसं वस्त्रेण गालितम् ।
एतद्द्रुतियुते सूते क्षिप्त्वा क्षिप्त्वा विमर्दयेत् ॥४३३॥

मिलन्ति द्रुतयस्सर्वाः पारदे नात्र संशयः ।
द्रुतयो मिलिता येन यन्त्रं तेनैव कच्छपम् ॥ ४३४ ॥

लिम्पेच्च विट्योगेन मेलयेज्जारयेत्क्रमात् ।
इत्येवं रसराजस्य षड्गुणां जारयेद्द्रुतिम् ॥ ४३५ ॥

१४. रञ्जनम् ॥

द्रुतिजीर्णस्य सूतस्य रञ्जनं शृणु पार्वति ! ।
तस्माद्रञ्जकबीजानां रञ्जनं च वदामि ते ॥ ४३६ ॥

रञ्जकतैलविधिः ॥

पलाशपुष्पं मञ्जिष्ठा लोहितं करवीरजम् ।
पुष्पं च खदिरं रक्तचन्दनं कुक्कुटी तथा ॥ ४३७ ॥

निशाद्वयं च सरलं देवदारुं जपासुमम् ।
अन्यानि रक्तपुष्पाणि लाक्षातोयेन मर्दयेत् ॥ ४३८ ॥

एतच्चतुर्गुणं तैलं तैलाद्रक्तप्रसूनजम् ।
द्रवं चतुर्गुणं देयं तैलशेषं यथा भवेत् ॥ ४३९ ॥

तस्मिन्निपेचयेद्बीजं एकविंशतिवारकम् ।
रञ्जयेत्पक्वबीजानि सर्वाण्येवं सुरार्चिते ! ॥ ४४० ॥

नागबीजरञ्जनम् ॥

खर्परे नागमादाय चण्डाग्निं ज्वालयेदधः ।
पलाशपर्णबीजानि क्षिपेत्तस्मिन्प्रचालयेत् ॥ ४४१ ॥

मलाशदण्डेनामर्दं चतुर्यामेन भस्मति ।
तद्भस्म गन्धक तुल्यमम्ले यामं प्रपेषयेत् ॥ ४४२ ॥

रुद्ध्वा पुटेद्वजपुटे साङ्गशीतं तदुद्धरेत् ।
तच्चतुर्थांशकं गन्धं दत्वा पिष्ट्वा पुटे पचेत् ॥ ४४३ ॥

एवं द्विसप्तवारेण नागं स्याद्रक्तवर्णकम् ।
चाशापश्चाङ्गचूर्णं च तच्चूर्णं कङ्कुभस्य च ॥ ४४४ ॥

शिग्रुकिंशुककोरण्डशाकपुष्पाणि नागिनीम् ।
अहिमारं कुमारीं च नागकन्यां च चूर्णयेत् ॥ ४४५ ॥

एतत्सर्वं चैकभागं द्विभागं च मनश्शिलाम् ।
भाण्डे सर्वं विनिक्षिप्य गवां मूत्रे चतुर्गुणे ॥ ४४६ ॥

पचेत्पादावशेषं तु पूर्वनागे क्षिपन्क्षिपन् ।
चुल्ल्यां पचेद्वह्नदण्डैश्चालयेत्सप्तवासरम् ॥ ४४७ ॥

इदं नागं पक्वबीजे द्रुते निर्वाहयेत्त्रिधा ।
रञ्जितं जायते बीजं मुख्यं स्याद्रसरञ्जने ॥ ४४८ ॥

बीजरञ्जनप्रकारः ।

ताप्यसत्वं च कृष्णाभ्रसत्वचूर्णं घमेत्समम् ।
तस्मिन्द्रुते ताप्यचूर्णं मृतशुल्वं क्रमाद्धरेत् ॥
त्रिगुणं तद्भवेद्बीजं रञ्जकं परमेश्वरि ! ।

[अन्यः प्रकारः]

चुनटी माक्षिकं गन्ध दरद पेषयेत्समम् ॥ ४५० ॥

रक्तवर्गस्य गोमूत्रे पेषितस्य रसे प्रिये ! ।
पेषयेच्छोषयेत्सप्तवारं तच्चूर्णयेत्क्षिपेत् ॥ ४५१ ॥

द्रवद्रुते तीक्ष्णताम्रे च तुल्य क्षिप्त्वा घमेद्दृढम् ।
ज्योतिष्मतीतैलयुक्ते रक्तवर्गे निषेचयेत् ॥ ४५२ ॥

पुनश्च पूर्वचूर्णं तु तुल्यं क्षिप्त्वा धमेत्त्रिये ! ।
सेचयेत्सप्तधा त्वेवं स्यादूर्वीजं रसरञ्जकम् ॥ ४५३ ॥

[अन्यः प्रकारः]

तारं च विमलासत्वं समांशं द्रावयेत्ततः ।
सरक्तवर्णं गोमूत्रे भावितं दरदं त्रिधा ॥ ४५४ ॥
तत्तुल्यं निक्षिपेत्तस्मिन्धमेदेवं तु सप्तधा ।
क्षिप्त्वा क्षिप्त्वा च दरदं स्याद्बीजं रसरञ्जकम् ॥

[अन्यः प्रकारः]

घनसत्त्वमहिं स्वर्णं समांशं द्वन्द्वितं धमेत् ।
खपरि रक्तवर्णं च माक्षिकं गैरिकं शिलाम् ॥

समं संचूर्णयेत्तस्मिन्वापयेच्च समं समम् ।
दशवारं भवेदेतद्बीजं सूतेन्द्ररञ्जकम् ॥ ४५७ ॥

[अन्यः प्रकारः]

यवक्षारसमांन्या रक्तवर्णा मनश्शिला ।
विशुद्धारं प्रयत्नेन तेन कल्केन लेपयेत् ॥ ४५८ ॥

नागपत्रं पुटे पच्यावच्चूर्णमुपागतम् ।
रसकस्य तु भागांस्त्रीन्नागैकं दरदस्य च ॥ ४५९ ॥

शिलागन्धविषाणां च त्रयाणामेकभागकम् ।
सेचयेन्मातुलुङ्गाम्लैः तेन कल्केन लेपयेत् ॥ ४६० ॥

भूपागर्भे क्षिपेत्तत्तत्पूर्वनागं धमेत्ततः ।
द्रुतं यावत्समुद्भूत्य लिप्त्वा भूपां पुनर्धमेत् ॥ ४६१ ॥

इत्येवं सप्तधा धाम्य नागं स्वर्णनिभं भवेत् ।

[अन्यः प्रकारः]

पी(सि?)ताभ्रकस्य सत्वं तु पूर्वेनागं च तत्समम् ॥

द्वन्द्वितं पूर्वयोगेन ह्यभिषिक्तं च कारयेत् ।
अनेन द्वन्द्वयोगेन वापो देयो द्रुतस्य च ॥ ४६३ ॥
पक्वबीजस्य वारांस्त्रीन् तद्बीजं रञ्जितं शुभम् ।

तारबीजरञ्जनम् ॥

अथातस्तारबीजानां रञ्जनं शृणु पार्वति ! ॥ ४६४ ॥
नानामूरुहसंभूतश्वेतपुष्परसे प्रिये ! ।
चतुर्भागे चैकभागं कटुतैलकं क्षिपेत् ॥ ४६५ ॥
तैलावशेषं विपचेत्तारबीजानि तत्र वै ।
भूयो भूयो द्रावयित्वा सेचयेदेकविंशतिम् ॥ ४६६ ॥
बीजानि रञ्जितान्येवं भवेयू रसरञ्जने ।
एवं वङ्गस्य बीजानि रञ्जयेत्परमेश्वरि ! ॥ ४६७ ॥

रञ्जनक्रमः ॥

द्रुतिजीर्णस्य सूतस्य चतुष्पष्टितमांशकम् ।
निक्षिपेद्रञ्जकं बीजं तप्तखल्वे दिनावधि ॥ ४६८ ॥
मर्दयेत्तप्तखल्वे तु पचेत्कच्छपयन्त्रके ।
एवं ग्रासक्रमेणैव षड्गुणं जारयेत्प्रिये ! ॥ ४६९ ॥

१५-१७. सारणात्रयम् ॥

सारणार्थं वङ्गबीजसाधनम् ।

[प्रथमः प्रकारः]

रञ्जितस्य रसेन्द्रस्य प्रवक्ष्ये सारणात्रयम् ।
सारणा योग्यबीजानि दिव्यानि च सुरार्चिते ! ॥
स्वर्णं द्वादशभागं स्याद्तदर्धं शुद्धपारदम् ।
रसेन्द्रार्धं नागभस्म चतुर्भागं गृतं यविम् ॥ ४७१ ॥

एतच्चतुष्टयं चाम्लैर्मर्दयेत्तत्सखल्वके ।
उद्धृत्य द्वन्द्वगोळापमूषायां रोधयेद्धमेत् ॥ ४७२ ॥
हठात्तच्च मिळत्येव वज्रबीजमिदं प्रिये ! ।

[द्वितीयः प्रकारः]

भावयेच्छारिबाक्षीरैर्मृतं वज्रं दिनं ततः ॥ ४७३ ॥
मर्दयेद्गोळकं कृत्वा शोषयेच्चैकभागकम् ।
त्रिभागं रसराजं च चतुर्भागं सुवर्णकम् ॥ ४७४ ॥
अम्लेन मर्दयेत्पिष्टिं कृत्वा तद्वज्र(च)गोळकम् ।
तत्क्षिप्त्वा वेष्टयेत्तच्च भूर्जपत्रेण वेष्टयेत् ॥ ४७५ ॥
पक्षं न्यसेद्धान्यराशौ तदुद्धृत्य पुनः प्रिये ! ।
धमेद्धठान्मिळत्येव वज्रबीजमिदं भवेत् ॥ ४७६ ॥
वज्रषोडशभागेन स्वर्णपत्रेण वेष्टयेत् ।
तत्क्षिप्त्वा लिसमूषायां स्वर्णांशं श्वेतकाचजम् ॥
चूर्णं वा नृकपालं वा चूर्णं कृत्वा विनिक्षिपेत् ।
निरुध्य च धमेत्तीव्रमेवं कुर्यात्पुनः पुनः ॥ ४७८ ॥
क्षिप्त्वा क्षिप्त्वा श्वेतकाचं नृकपालमथापि वा ।
सप्तधैवं मिलत्येव वज्रबीजमिदं भवेत् ॥ ४७९ ॥

[सारणातैलम्]

अतः परं सारणायां प्रवक्ष्ये तैलसाधनम् ।
ज्योतिष्मतीकरंजाक्षकटुतुम्बीसमुद्भवम् ॥ ४८० ॥
तैलं कूर्मवराहादिमेषमत्स्यसमुद्भवम् ।
जलूकाभेकजाता च वसा ग्राह्या विधानतः ॥ ४८१ ॥
रक्तवर्गः पीतवर्गः काथ्यः क्षीरैश्चतुर्गुणैः ।
पुष्पाणां रक्तपीतानामनेकानां द्रवं हरेत् ॥ ४८२ ॥

पाटलीकाकतुण्ड्युत्थमहाराष्ट्रीद्रवं तथा ।
एकांशं तैलमेकांशा वसा क्वाथश्चतुर्गुणः ॥ ४८३ ॥

त्र्यंशैः पुष्पद्रवैर्द्व्यंशान्पाटल्यादिद्रवानपि ।
सर्वं ताम्रमये पात्रे मृदुना वह्निना पचेत् ॥ ४८४ ॥

तस्मिन्क्षिपेत्षोडशांशं भूस्तामलताप्यकम् ।
विख्यातं सारणातैलं रसराजस्य जारणे ॥ ४८५ ॥

रञ्जितं रसराजं तु सारणातैलसयुतम् ।
निक्षिपेत्सारणायन्त्रे नाळमूषां गतं द्रुतम् ॥ ४८६ ॥

चीजं तु दाल्येत्सूते चतुष्पष्टितमांशकम् ।
उद्धृत्य तत्खल्वे तु पट्वम्लैर्मर्दयेद्दिनम् ॥ ४८७ ॥

ततः कच्छपयन्त्रे तु सविव्ये(?)पाचयेद्दिनम् ।
इत्येवं षड्गुणं सार्यं सारितो जायते रसः ॥ ४८८ ॥

एवं द्वितीयवारे तु कृते सूतोऽनुसारितः ।
तथा तृतीयवारे तु रसस्स्यात्प्रतिसारित. ॥ ४८९. ॥

१८. वेधः ॥

सारितस्य रसेन्द्रस्य हरिताळं समांशकम् ।
मर्दयेद्भूर्ततैलैश्च दिनं दिव्यौषधिद्रवैः ॥ ४९० ॥

ततोद्धृत्य क्षिपेद्भ्रमूषायां विपचेद्दिनम् ।
करीषाग्नाविति पुनर्मर्द्यं पाच्यं त्रिधा प्रिये ! ॥ ४९१ ॥

अनेन कर्मणा देवि ! सूतो बद्धमुखो भवेत् ।
बद्धवक्त्रस्य सूतस्य भागमेकं सुरार्चिते ! ॥ ४९२ ॥

सुतारताम्रतीक्ष्णानां चूर्णानामेकभागकम् ।
सर्वं संमर्दयेद्देवदालीनीरैर्दिनं ततः ॥ ४९३ ॥

मध्वाज्यैश्च दिनं मर्दं तेन कुर्यात्सुगोलकम् ।
निक्षिपेद्भस्मपायां रुध्वा तीव्राग्निना धमेत् ॥ ४९४ ॥

स रसः खोटवद्धस्याच्चत्खोटं काचटङ्कणैः ।
तेजःपुञ्जो भवेद्यावत्तावत्कुर्याद्धमन्धमन् ॥ ४९५ ॥

तं रसं योजयेद्देहे लोहे रोगे च पार्वति ! ।

देहवेधक्रमः ॥

देहवेधं प्रवक्ष्यामि सावधानं शृणु प्रिये ! ॥ ४९६ ॥

पाचनस्नेहनस्वेदवमनारेचनैः क्रमात् ।
शरीरं शोधयेल्लोणक्षाराम्लादिविवर्जितः ॥ ४९७ ॥

ततस्त्वारोटकं सूतं भक्षयेत्परमेश्वरि ! ।
क्षेत्रं कृत्वा शरीरं तु ततस्सिद्धरसं क्षिपेत् ॥ ४९८ ॥

शतवेधिरसं पूर्वं ततस्साहस्रवेधकम् ।
दशसाहस्रवेधं च लक्षवेधकरं रसम् ॥ ४९९ ॥

वेधकं दशलक्षस्य कोटिवेधं सुरार्चिते ! ।

गन्धकेन युतं सूतं क्रमेणानेन सुव्रते ! ॥ ५०० ॥

स रसः क्रमते देहे सिद्धयस्सम्भवन्ति हि ।
रसायने तु याः प्रोक्ता मूलिका देहसिद्धिदाः ॥

ताभिर्युक्तो रसेन्द्रस्तु देहे सङ्क्रमते प्रिये ! ।
क्रामति तनौ हि सूतो जनयति पुत्रांश्च देवतागर्भान् ॥

खे गमनेन च नित्यं सञ्चरणं सकलभुवनेषु ।
धाता भुवनत्रितये स्रष्टाऽऽद्यो ब्रह्मयोनिरिव ॥ ५०२ ॥

विष्णुरिव पालनार्थे संहर्ता रुद्रदेववत्सत्कलम् ।

लोहवेधक्रमः ॥

क्रामणं लोहवेधस्य वक्ष्यामि शृणु भैरवि ! ॥ ५०४ ॥

दरदं माक्षिकं क्रान्तं शिलां गन्धं विषं घनम् ।
रसकं भूलतां हिङ्गु कांतास्यं टङ्कणं प्रिये ! ॥ ५०५ ॥

गन्धकेन हतं ताम्रं भुजङ्गं शिलया हतम् ।
दरदेन हतं तीक्ष्णं महिषीकर्णसम्भवम् ॥ ५०६ ॥

मलं वायसविष्ठां च प्रथमार्तवरक्ततः ।
अनेन वेष्टयेत्सिद्धसूतं लोहेषु वेधयेत् ॥ ५०७ ॥

तारकृष्टचष्टनवतिः स्वर्णमेकं तथा रसः ।
शतवेधी तु विख्यातस्त्वेवं साहस्रवेधकः ॥ ५०८ ॥

वेधयेद्दशसाहस्रं लक्षं कोटिमथार्बुदम् ।
जारणायां बलं यावत्तावल्लोहानि वेधयेत् ॥ ५०९ ॥

[१. क्रामणयोगः]

माक्षिकं भूलतां सूतं धुनटीं टङ्कणं तथा ।
स्त्रीस्तन्यरक्तं संपिष्टं क्रामणं क्षेपलेपयोः ॥ ५१० ॥

[२. क्रामणयोगः]

हिङ्गुलं रसकं कान्तं इन्द्रगोपं विषं तथा ।
मर्दयेत्तैलरक्ताभ्यां क्रामणं क्षेपलेपयोः ॥ ५११ ॥

[३. क्रामणयोगः]

गण्डोलविषभेकास्यमहिषीनेलजं मलम् ।
रुधिरेण समायुक्तं रससङ्क्रामणे हितम् ॥ ५१२ ॥

[४. क्रामणयोगः]

रोचनं गुग्गुलुं स्तन्यं इन्द्रगोपं विषं तथा ।

सर्वं संमर्दयेद्देवि ! रससङ्क्रामणे हितम् ॥ ५१३ ॥

[५. क्रामणयोगः]

विष्णुक्रान्ता मधूच्छिष्टं माहिषं कर्णजं मलम् ।
मूलता काकविष्ठा च खञ्जली द्विपदी रजः ॥ ५१४ ॥
नररक्तं ब्रह्मसोमा सुरसा शैलजं प्रिये ! ।
शृङ्गी च लक्ष्मणा गृध्रकर्णी च क्रामणं परम् ॥

[६. क्रामणयोगः]

श्वेतार्कनिर्गुण्डीनिर्यासस्त्रीस्तन्यविषटङ्कणैः ।
गोघृतेन समायुक्तो लोहे सङ्क्रामते रसः ॥ ५१६ ॥

[७. क्रामणयोगः]

परमं क्रामणं वङ्गं मृगनाभं च पार्वति ! ।
मातुलाह्वं कुलीरश्च शङ्खाभ्यन्तरजो मलः ॥ ५१७ ॥
तथा कपित्थनिर्यासो रससङ्क्रामणं परम् ।
क्रामणं रसराजस्य वेधकाले प्रदापयेत् ॥ ५१८ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ चतुर्थोल्लासः ॥

॥ पञ्चम उल्लासः ॥

॥ विशेषजारणाक्रमः ॥

श्रीभैरवी—

सामान्यजारणा प्रोक्ता त्वया पूर्वं सदाशिव ! ।
विशेषजारणं ब्रूहि यथा जानाम्यहं प्रभो ! ॥ १ ॥

श्रीभैरवः—

शृणु[1] देवि ! प्रवक्ष्यामि भूचराख्यं तु जारणम् ।

भूचरी जारणा ॥

कृष्णं पीतं तथा[2] रक्तं शुल्बे तीक्ष्णे च मेळयेत् ॥

शुल्बं[3] शुद्धं यदा जीर्णं द्वाविंशनिगुणं मते[4] ।
गन्धनाग तनोऽर्धं तु क्रमेणैव तु मेळयेत् ॥ ३ ॥

हेम्ना तु सह दातव्यं सूतकेन षोडश ।
गन्धनागं यदा जीर्णं तदा बद्धो भवेद्रस ॥ ४ ॥

हेम्नि जीर्णे ततोऽर्धेन मृतल्लोहेन रञ्जयेत् ।
गन्धकेन हतं शुल्बं माक्षिकं दरदायसम् ॥ ५ ॥

पुटेन मारयेच्छुद्धं हेम दद्यात्तु षड्गुणम् ।
सूतके हेमबीजं च यदा जीर्णं चतुर्गुणम् ॥ ६ ॥

चद्दराग विजानीयाद्धेमाभो जायते रस ।
मारणायल्वमध्यस्थ तेनैव सह मारयेत् ॥ ७ ॥

निभाग सारिते कृत्वा पुनस्तेनैव जारयेत् ।
जारित. सारितश्चैव पुनर्जारितमारित· ॥ ८ ॥

---

1 स्वर्गखे एकादशे षष्ठे एते जारणाप्रयोगाः अनुक्रमेण पाठेन लभ्यन्ते । सम्प्रोक्ष्यमाणाः पाठभेदा इमे ।

2. रक्तम् । 3 शुल्बे तीक्ष्णं । 4. सिद्धे ।

सप्तशृङ्खलिकायोगात्कोटिवेधी भवेद्रसः ।
भूचरी जारणा प्रोक्ता खेचरीं जारणां शृणु ॥ ९ ॥

खेचरी जारणा ॥

हीन[1]रागानि रत्नानि रसोच्छिष्टानि कारयेत् ।
कटुतुंबस्य बीजानि तस्यार्धेन तु दापयेत् ॥ १० ॥

महाजारसमायुक्तं कल्कं कुर्याद्विचक्षणः ।
वज्रमूषामुखे चैव तन्मध्ये स्थापयेद्रसम् ॥ ११ ॥

कतकं कनकं चैवमेकीकृत्य विमर्दयेत् ।
पद्मरागप्रलेपं तु[2] रसे ग्रासं तु दापयेत्[3] ॥ १२ ॥

भक्षितव्यं प्रयत्नेन नत्वा च गुरुदेवयोः ।
सर्वसिद्धान्नमस्कृत्य देवताश्च विशेषतः ॥ १३ ॥

मूर्च्छाऽङ्गदाहश्च ततो जायते नात्र संशयः ।
आत्मानमुत्थितं पश्येद्दिव्यदेहो महाबलः ॥ १४ ॥

शङ्खकाहलनिर्घोषैस्सिद्धविद्याधरैस्सह ।
इच्छया विचरेल्लोकान् कामरूपी विमानगः ॥ १५ ॥

देवा वै यत्र लीयन्ते सिद्धस्तत्रैव लीयते ।

अन्यो जारणाप्रकारः ॥

पुनरन्यं प्रवक्ष्यामि जारणायोगमुत्तमम् ॥ १६ ॥

सुशुष्कं पातितं सूतं सर्वदोषोज्झितं ततः ।
शाकपल्लवसारेण विष्णुक्रान्तारसेन च ॥ १७ ॥

---

1. हीरमुख्यानि रत्नानि । 2. पद्मरागं प्रयत्नेन ।
3. इतः परमयमंशोऽधिकः । एकादशगुणं यावत्पद्मरागं तु सूतके । रागजीर्णस्तु देवेशि ! लिङ्गाकारो भवेद्रसः । रक्षितव्यं प्रयत्नेन लोकपालाष्टकेन च । षड्भागं सूतकेन्द्रस्य तेषु सर्वेषु दापयेत् ।

पालाशपुष्पतोयेन भावित गन्धक समम् ।
सम कृष्णाभ्रसत्व च रसक चाष्टक गुणम् ॥ १८ ॥
तीक्ष्णशुल्बोरग चैव कूर्मयन्त्रेण जारयेत् ।
काञ्चन जारयेत्पश्चाद्विडयोगेन पार्वति ! ॥ १९ ॥
ततस्सिद्ध विजानीयाद्वैध शुल्बस्य दापयेत् ।
कर्मसख्याप्रमाणेन नागो भवति काञ्चनम् ॥ २० ॥

अत पर प्रवक्ष्यामि जारणाक्रममुत्तमम् ।
बीजचूर्णानि तैलेन भावयित्वा पुन पुन ॥ २१ ॥
षोडशांशेन त भासमङ्गुल्या मर्दयेच्छनै ।
आर्द्रकादि ततो योगाद्दातव्य षोडशांशत ॥ २२ ॥
भूर्जे दत्वा ततो देय डोलायन्त्रे विनिक्षिपेत् ।
अहोरात्रेण तद्बीज सूतको ग्रसति प्रिये ! ॥ २३ ॥

समुद्धृत्य रस देवि ! खल्वे समर्दयेत्तत ।
ततो यन्त्रे विनिक्षिप्य दिवारात्र दृढाग्निना[1] ॥ २४ ॥

तप्त समुद्धृत यन्त्रात्तप्तखल्वे विमर्दयेत् ।
मर्दयित्वार्द्रके पिण्डे क्षिप्त्वाऽथ[2] त्रिपुट दहेत् ॥

ततो गर्भे पतत्याशु जरते तत्सुग्वेन तु ।
डोलायन्त्रे ततो दद्यादार्द्रपिण्डेन सयुतम् ॥ २६ ॥

तृतीयदिवसे सूतो जरते ग्रसते तत ।
समजीर्णं ततो यावत् डोलायन्त्रे विचक्षण ॥ २७ ॥

पश्चात्कच्छपयन्त्रेण समजीर्णं तु पार्वति ! ।
ताम्राश[3]द्वादशांशेन कच्छपेन तु जारयेत् ॥ २८ ॥

1 तुषाग्निना । 2 तत्र पुट दद्यात् ।
3 सै ग्रासद्वादशांशेन ।

प्राग्वदार्द्रकयोगं च गर्भद्रावणमेव च ।
पश्चात्तं देवि ! निक्षिप्य पुटं दद्याद्विचक्षणः ॥ २९ ॥

अष्टांशेन ततो ग्रासं गर्भद्रावं च पूर्ववत् ।
कन्दोदरे सूरणस्य तं विनिक्षिप्य सूतकम् ॥ ३० ॥

पुटयेद्वार्तिक[1]स्तावत् यावत्कन्दो न दह्यते ।
पादांशेन तु मूषायां ग्रासस्सूते विधीयते ॥ ३१ ॥

पूर्ववच्च बिडं दद्याद्गर्भद्रावणमेव च ।
एवं चतुर्गुणे जीर्णे सूतको बलवान् भवेत् ॥ ३२ ॥

ततश्शलाकया ग्रासमग्निस्थो ग्रसते रसः ।
ततो रत्नानि जार्याणि वक्ष्यमाणक्रमेण तु ॥ ३३ ॥

अभ्रकं ग्रामकं चैव शङ्खनाभिं तथैव च ।
रसानुपरसान्दत्वा महाजारसमन्वितम् ॥ ३४ ॥

[2]वज्रकन्दलता ब्राह्मीमेषशृङ्ग्यमृतायसम् ।
कट्वङ्गस्य बीजानि सूतलोहानि पाचयेत् ॥ ३५ ॥

सर्वाणि समभागानि शिखिशोणितमर्दितम् ।
तावत्तं मर्दयेत्प्राज्ञो यावत्कर्म दृढं भवेत् ॥ ३६ ॥

मूषा मल्लाकृतिश्चैव कर्तव्याऽऽच्छादनैस्सह ।
मध्ये स्थापयेत्सूतमधोवातेन धामयेत् ॥ ३७ ॥

दौ तावत्कर्तव्यं वज्रमौषधलेपितम् ।
ते नात्र सन्देहो यथा तीव्रहुताशने ॥ ३८ ॥

लिशादि भवेद्दग्धं करीषा तेन मर्दयेत् ।
दिकादशगुणं कुलिशं जारयेद्बुध. ॥ ३९ ॥

---

1. तावित्यावत् । 2. वज्रकन्दं वज्रलता ।
कुलिशेन पुटे दग्धे कर्पेऽग्नौ तेन मर्दयेत् ।

अमृतीकरणविश्रान्तौ—पञ्चमोल्लासः ।

सन्दग्धा शङ्खनाभिश्च मातुलुङ्गरसप्लुता ।
मुक्ताफलं ततो देयं वज्रजीर्णं तु सूतके ॥ ४० ॥

अनेन क्रमयोगेन ह्येकादशगुणं भवेत् ।
केवलं शिखिपित्तं च नीलीनिर्यासमिश्रितम् ॥ ४१

नीलोत्पलानि स्निग्धानि निक्षिप्तानि तु सूतके ।
रसः पिबेन्महारागान्हीनरागान्परित्यजेत् ॥ ४२ ॥

रक्ता(क्ष)नि शिखिपित्तं च महारक्त(क्ष)समन्वितम् ।
सद्रत्नं लेपयेत्तेन प्रक्षिपेद्रसमध्यतः ॥ ४३ ॥

रजनी चैव कंकुष्ठं ब्रह्मनिर्यासभावितम् ।
जारणं पुष्परागस्य तेनैव सह दापयेत् ॥ ४४ ॥

बहुरत्नेषु जीर्णेषु भृङ्गराजेषु सुव्रते ! ।
रसेन्द्रो दृश्यता देवि ! नीलपीतारुणच्छवि ॥ ४५ ॥

धूमवेधीरसः ॥

शुद्धानि हेमपत्राणि शतांशेनानुलेपयेत् ।
पुटेन मारयेदेतदिन्द्रगोपनिभं भवेत् ॥ ४६ ॥

सप्तधाद्विधयेत्सर्वं इदं हेम मृतं प्रिये ! ।
त्रिभागं सूतकेन्द्रस्य तेनैव सह का(सा ?)रयेत् ॥
मूषामध्ये स्थिते तस्मिन्पुनस्तेनैव जारयेत् ।
धूमवेधी भवेद्देवि ! पुन[1] पुनः प्रसारितः ॥ ४८ ॥

अनेन क्रमयोगेन यदि जीर्णा त्रिशृङ्खला ।
वेधयेन्नात्र सन्देहो गिरिपाषाणभूतलम् ॥ ४९ ॥

पार्श्वे ज्योतिः प्रदृश्येत ऊर्ध्वं दृश्येत तेन(नैव)वै ।
भूचरं तं विजानीयाद्रसेन्द्रं नात्र संशय ॥ ५० ॥

1. पुनः संस्कारितः ।

तेनाश्वान्तगतिर्देवि ! योजनानां शतं व्रजेत् ।
दिव्यतेजा महाकायो दिव्यदृष्टिर्महाबलः ॥ ५१ ॥

सर्वरोगविनिर्मुक्तो जीवेच्चन्द्रार्कतारकम् ।
तस्य मूलपुरीषं तु सर्वलोहानि विध्यति ॥ ५२ ॥

अन्ये वेधप्रकाराः ॥

समजीर्णेन वज्रेण हेम्ना च सहितेन च ।
अग्निस्थो जारयेल्लोहान् बन्धमायाति सूतकः ॥ ५३ ॥

सारयेत्तेन बीजेन सहस्रमपि वेधयेत् ।
सारितं जारयेत्पश्चात् लेप्यं क्षेप्यं सहस्रतः ॥ ५४ ॥

सारयेत्तेन बीजेन लक्षवेधमवाप्नुयात् ।
अनेन क्रमयोगेन कोटिवेधी भवेद्रसः ॥ ५५ ॥

केवलं तु यदा वज्रं समजीर्णं तु कारयेत् ।
बद्धस्सूतस्तदा ज्ञेयो निष्कंपो निरुपद्रवः ॥ ५६ ॥

अग्निस्थो जायते सूतः शलाकां ग्रसते क्षणात् ।
हठाग्निना धाम्यमानो ग्रसते सर्वमादरात् ॥ ५७ ॥

ग्रसते जरते सूतं आयुर्दैर्घ्यप्रदायकः ।
मूषास्थं धमयेत्सूतं हठाग्नौ नैव कंपयेत् ॥ ५८ ॥

जारयेत्सर्वरत्नानि बद्धः खेचरतां नयेत् ।
अष्टलोहेऽष्टगुणिते जीर्णे स्याद्रसबन्धनम् ॥ ५९ ॥

लोहानि सर्वाण्यिगुणं[1] त्रिगुणं कनकं तथा ।
धूमावलोके वेधी स्यात् भवेन्निर्वाणदोऽम्बरः ॥ ६० ॥

आदावष्टगुणं जार्यं व्योमसत्वं महारसे ।
समं हेमदशांशेन वज्ररत्नानि जारयेत् ॥ ६१ ॥

---

1. सत्वं त्रिगुणं ।

समं च जारयेद्वज्रं तदासौ खेचरो रसः ।
क्रमे प्रदक्षिणावर्तैः कोटिवेधी च जायते ॥ ६२ ॥

जीर्णद्रव्यमानमेदात् वेधे विशेषः ॥

समे तु पन्नगे जीर्णं दशवेधी भवेद्रसः ।
द्विगुणे शतवेधी स्यात्सहस्रं त्रिगुणे भवेत् ॥ ६३ ॥

चतुर्गुणेऽयुतं देवि ! क्रमेणानेन वर्धयेत् ।
उत्तरोत्तरवृद्ध्या तु जारयेत्तत्र पन्नगम् ॥ ६४ ॥

कुटिलं पन्नगं जार्यं नवसंख्याक्रमेण तु ।
दत्त्वा क्रमेण देवेशि ! कोटिवेधी भवेद्रसः ॥ ६५ ॥

गन्धकादिमपाषाणे षड्गुणे जीर्णतां गते ।
रोगहर्ता रसः स्यातु समुखे तदा(?) भवेत् ॥ ६६ ॥

तस्मिन् शतगुणे जीर्णे रुग्जरामृत्युहा भवेत् ।
अभ्रकादिमपाषाणसत्त्वान्यात्मसमं असन् ॥ ६७ ॥

रुग्जरा मरणं जित्वा शतवेधी रसो भवेत् ।
शतायुर्द्विगुणे जीर्णे सूतस्साहस्रवेधकः ॥ ६८ ॥

चतुर्गुणे सहस्रायुः पारदोऽयुतवेधकः ।
रसश्चाष्टगुणे जीर्णे लक्षायुर्लक्षवेधकः ॥ ६९ ॥

ब्रह्मायुष्षोडशगुणे कोटिवेधी भवेद्रसः ।
द्वात्रिंशद्गुणिते जीर्णे खेचरत्वादिसिद्धिदः ॥ ७० ॥

विष्णोरायुर्बलं दत्ते पारदस्स्पर्शवेधकः ।
चतुष्षष्टिगुणे जीर्णे शिवायुर्दशब्दवेधकः ॥ ७१ ॥

षड्गुणाभ्रकजारणेन सर्वदोषनाशः ॥

रसस्य सर्वदोषास्तु षड्गुणेनाभ्रकेण तु ।
जीर्णेन नाशमायान्ति नात्र कार्या विचारणा ॥ ७२ ॥

तदा मसति लोहानि त्यजेच्च गतिमात्मन ।
धूमश्चिटिचिटिश्चैव मण्डूकप्लुतिरेव च ॥ ७३ ॥

सकपश्च विकपश्च पञ्चावस्था रसस्य तु ।
समजीर्णो भवेद्बालो यौवनस्थश्चतुर्गुण ॥ ७४ ॥

वृद्धश्चषड्गुणजीर्णस्तु सर्वकर्मकरक्षम ।

जारणे क्रम. ॥

गन्धक जारयेदादौ सर्वसत्वान्यत परम् ॥ ७५ ॥

ततस्सर्वाणि लोहानि द्वन्द्वानि विविधानि च ।
पञ्चबीजानि रत्नानि द्युतिसत्वेऽच जारयेत् ॥ ७६ ॥

चतुष्पष्ट्यसके पूर्वं द्वात्रिंशांशे द्वितीयक ।
तृतीयश्चोडशांशे तु चतुर्थश्चाष्टमेन च ॥ ७७ ॥

पञ्चमोऽथ चतुर्थांशे षष्ठो द्व्यशे प्रकीर्तित ।
शतांशे सप्तमो ज्ञेयो ग्रासमान रसस्य तु ॥ ७८ ॥

ग्रासमानभेदेन स्वरूपभेद ॥

चतुष्पष्ट्यशके ग्रासे दण्डधारी भवेद्रस ।
जलूकामो द्वितीये तु ग्रासयोगे सुरेश्वरि ! ॥ ७९ ॥

ग्रासे रसास्तृतीये च काकविष्ठासमो भवेत् ।
चतुर्थो गोलकाकार पञ्चमे दहनप्रभ ॥ ८० ॥

षष्ठे सूर्यप्रभस्सूतस्तेज पुजश्च सप्तमे ।
रसराजस्य देवेशि ! क्रमाज्जीर्णस्य लक्षणम् ॥ ८१ ॥

समांश द्विगुण ग्रासं ततस्सूते चतुर्गुणम् ।
तथा चाष्टगुण देवि ! जारयेच्च कलागुणम् ॥ ८२ ॥

द्वात्रिंशद्गुणित देवि ! चतुष्पष्टिगुण क्रमात् ।

संस्कारैर्जायमाना गुणाः ॥

सौम्यत्वं जनयेत्स्वेदादमलत्वं च मर्दनात् ॥ ८३ ॥

मूर्च्छनाद्दोषराहित्यमुत्थानात्पूतिनाशनम् ।
रसायनं पातनेन रोधादाप्यायनं भवेत् ॥ ८४ ॥
अचापल्यं नियमनाद्दीपनात्सम्मुखो ज्वलेत् ।
वासनायोगसांगत्यं चारणाद्बलचारिता ॥ ८५ ॥

जारणाद्बन्धनं सम्यगेकत्वं द्रावणाद्भवेत् ।
रक्तत्वं रञ्जनात्तस्य व्यापित्वं सारणान्नयात् ॥ ८६ ॥

क्रामित्वं क्रामणाद्देहलोहेष्वपि च वेधनात् ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ पञ्चमोल्लासः ॥

॥ षष्ठ उल्लासः ॥

॥ देहवेधक्रमः ॥

प्रणम्य शिरसा शम्भुं पप्रच्छ गिरिजात्मजा ।

श्रीभैरवी—

देहवेधस्त्वया पूर्वं संक्षेपात्कथितः प्रभो ! ॥ १ ॥
तं देहवेधमाचक्ष्व सम्यक् जानाम्यहं यथा ।

श्रीभैरवः—

शृणु देवि ! प्रवक्ष्यामि देवानामपि दुर्लभम् ॥ २ ॥
योगिनां भोगयुक्तानां देहवेधं सुरेश्वरि ! ।
पाचनादि प्रकुर्वीत पञ्चकर्मविधानतः ॥ ३ ॥

पञ्चकर्माणि ॥

[१. पाचनम्]

लवणादिसमुत्कृष्टान्दोषान्संशोधयेत्क्रमात् ।
ततो जीर्णरसं चाद्यात्क्रमादेवं सुरेश्वरि ! ॥ ४ ॥

लघ्वाहारो दिवा भूत्वा क्षुद्राधान्याकनागरम् ।
एतत्त्रयं पलोन्मेयं उदकेप्वबलोडयेत् ॥ ५ ॥

अष्टावशिष्टं संक्वाथ्य प्रतिरात्रं पिबेत्त्र्यहम् ।
अनन्तरं यवाकाशं पूर्ववत्त्रिदिनं पिबेत् ॥ ६ ॥

इति पाचनमातन्यादथ स्नेहनमाचरेत् ।

[२. स्नेहनम्]

घृतोदनं छागरसं दिवा भुञ्जीत मात्रया ॥ ७ ॥
आज्यान्नं वा मुद्गरसं लघ्वाशी स्यादिने सुधीः ।
रात्रौ पिबेद्घृतं गव्यं सैन्धवेन समन्वितम् ॥ ८ ॥

निष्कमेकं सैन्धवं च घृतं निष्कचतुष्टयम् ।
भृङ्गामलकतैलेन सर्वाङ्गमभिषेचयेत् ॥ ९ ॥

एवं सप्तदिनं कुर्यात्स्नेहनं परमं हितम् ।

[३. स्वेदनम्]

मत्स्यमांसं माषतिलयवजाम्बलसक्तवः ॥ १० ॥
सर्वमेतद्गृहेत्स्थमेकाष्ठीलागरुबला ।
राला व्याघ्री घनापत्रं कौशिकातिविषा निशा ॥ ११ ॥
सर्वमेतद्द्वयपलं तक्रक्षीराम्बुकाञ्जिकम् ।
द्व्याढके निक्षिपेत्सर्वं मृत्पात्रे क्वाथयेत्सुधीः ॥ १२ ॥
कुर्यात्तस्योष्मणा गात्रं स्विन्नं द्विघटिकावधि ।
एवं सप्तदिनं कुर्यात्स्वेदनं परमं हितम् ॥ १३ ॥

[४. वमनम्]

मदनस्य फलं चैकं पाठा षोडशिकं जलम् ।
पादावशिष्टं संक्वाथ्य तज्जले वस्त्रशोधिते ॥ १४ ॥

पिप्पलीन्द्रयवा यष्टिलवणं कर्षमात्रकम् ।
निक्षिपेच्च पिबेत्प्रातर्वान्तिस्स्यात्सर्वरोगहा ॥ १५ ॥

[५. विरेचनम्]

सूतटङ्कणगन्धाश्म त्रिकटुं त्रिफलां समम् ।
एतैस्समं तु जेपालं श्लक्ष्णं तत्परिमर्दयेत् ॥ १६ ॥

गुञ्जाद्वितयमात्रं तु गुडेन सह भक्षयेत् ।
विरेचनमिति प्रोक्तं सर्वव्याधिविनाशनम् ॥ १७ ॥

पञ्चकर्मेति कथितं क्रमात्कुर्याद्विरेचने ।

दोषशोधकयोगाः ॥

केतकीस्वनजम्बीरं प्रत्यहं कुड्डुभं पिबेत् ॥ १८ ॥

सप्तवासरपर्यन्तं प्राप्तलवणदोषहृत् ।
सलिले षोडशपले त्रिफलैकपलं क्षिपेत् ॥ १९ ॥

क्वाथयेत्पादशेषं तत्तस्मिन् शीते मधो: पलम् ।
पिबेत्प्रभाते त्रिदिनं क्षारदोषहरं परम् ॥ २० ॥

विडङ्गं सवचाकुष्ठं केतकीस्तनसंयुतम् ।
क्वथितं त्रिदिनं पीतमम्लदोषहरं पिबेत् ॥ २१ ॥

अथवा तिन्तिणीक्षारसलिलं पलमात्रकम् ।
यवक्षारसिताकर्षं संयोज्य त्रिदिनं पिबेत् ॥ २२ ॥

अम्लदोषविनाशोऽयं कथितश्च रसायने ।
वचाविडङ्गपालाशबीजजन्तुघ्नकर्षकम् ॥ २३ ॥

कर्षं गुडं च तत्सर्वं भक्षयेदुष्णवारि च ।
पिबेन्मासत्रिदिवसं भवेत्तत्किमिपातनम् ॥ २४ ॥

श्यामावह्निविडङ्गानि वाशा त्र्यूषं फलत्रयम् ।
सैन्धवं देवदारुं च मुस्ता चैतत्समं समम् ॥ २५ ॥
घृतैः कर्षं लिहेन्मातः सप्ताहात्सर्वरोगजित् ।
एवं कृत्वा देहशुद्धिं शाल्यन्नं क्षीरभोजनम् ॥ २६ ॥

सम्यग्जातबलो भूत्वा ततः कुर्याद्रसायनम् ।

रसायनोपयोगः ॥

क्षीराज्यामलकरसक्षौद्रैस्सुरतरुद्भवम् ॥ २७ ॥

तैलं निर्मथ्य तत्सर्वं द्विपलं प्रत्यहं पिबेत् ।
मासेन कान्तिर्मेधा च गवल्येव न संशयः ॥ २८ ॥
द्वितीयमासि पूर्वोक्तं तत्पिबेच्चतुःपलम् ।
तेन शाम्यन्ति दोषाश्च विकारा नेत्रसम्भवाः ॥ २९ ॥

पुनस्तृतीये मासे तु सेव्यं षट्पलमात्रकम् ।
तेनामरवपुर्मूर्त्यान्महातेजा भवेद्ध्रुवम् ॥ ३० ॥

आरोटरससेवाक्रमः ॥

अथारोटरससेव्यः क्रमेण परमेश्वरि ! ।
अयश्शुल्बाभ्रताप्येभ्यः पातितो मारितः क्रमात् ॥
अयमारोटकरसो देहसिद्धिकरः परः ।
स्वेदनाद्यैश्च संस्कारैस्सप्तभिस्संस्कृतो रसः ॥ ३२ ॥

मूर्च्छितो रंजितो देवि ! सूतस्त्वारोटकः स्मृतः ।
रसायने रोगशान्त्यां श्रेष्ठस्सर्वगुणप्रदः ॥ ३३ ॥

कान्ताभ्रसत्वारोटाश्च समं गुञ्जाद्वयोन्मितम् ।
मध्वाज्यत्रिफलाभिश्च मासमेकं भजेदिति ॥ ३४ ॥

एवं क्रमेण संसेव्यं द्वित्रिवेदेषुपट्क्रमात् ।
एवं षोडशमासान्तं गुञ्जाषोडशमात्रकम् ॥ ३५ ॥
आरोटकरसे चैत्थं कुर्यान्मत्प्राणवल्लभे ! ।
चलीपलितनिर्मुक्तो जीवेच्च शरदश्शतम् ॥ ३६ ॥

अरोटरसः ॥

कान्तसत्वाभ्रसत्वं च स्वर्णजीर्णरसस्तथा ।
सर्वमेतत्समीकृत्य भजेदारोटकं तथा ॥ ३७ ॥

क्षेत्रीकरणमेतद्धि सहस्रायुष्यकारकम् ।
अभ्रौ योजितस्सूतो न प्ररोहति कुत्रचित् ॥ ३८ ॥
तस्मात्क्षेत्रमकृत्वैव योजयेद्यस्तु सूतकम् ।
न प्ररोहेदशुद्धस्य शुभं बीजमिवोषरे ॥ ३९ ॥

खोटबद्धरससेवाक्रमः ॥

पूर्वोक्तखोटबद्धस्य सूतस्य विधिमुत्तमम् ।
क्रामणं च क्रमाद्वक्ष्ये तथा विधिनिषेधनम् ॥ ४० ॥

शृणु पार्वति ! यत्नेन त्वत्प्रीत्या कथयाम्यहम् ।
कान्ताभ्रस्वर्णवज्राणि रसस्य क्रामणं परम् ॥ ४१ ॥

क्रामणेन विना सूतो न सिद्ध्येद्देहलोहयोः ।
गुञ्जामात्रं खोटबद्ध क्रामणक्षौद्रसंयुतम् ॥ ४२ ॥

मासमेकं भजेदित्थं पुनर्विधिक्रमेण वै ।
मासषोडशपर्यन्तं यथाऽऽरोटरसस्तथा ॥ ४३ ॥

स शतायुष्यमाप्नोति सर्वरोगविवर्जितः ।

पलमात्रोपयोगेन व्याधिभिर्नाऽभिभूयते ॥ ४४ ॥

द्वितीये शुक्रवृद्धिस्यात्तृतीये बलवान् भवेत् ।
चतुर्थे पलितं हन्ति वलिं जयति पञ्चमे ॥ ४५ ॥

षष्ठे श्रुतिधरो वाग्मी सप्तमे नेत्ररोगहृत् ।
अष्टमे तार्क्ष्यदृष्टिस्याद्ब्रह्मायुर्ब्रह्मविक्रमः ॥ ४६ ॥

उपयुंज्यान्नवपलं सिद्धिमेलापकं भवेत् ।
विनियुञ्ज्याद्दशपलं द्वितीयश्शङ्करो भवेत् ॥ ४७ ॥

सहस्रायुष्यकरं सूतं मापमात्रं भजेन्नरः ।
अयुतायुष्करं सूतं यवमात्रं भजेत्प्रिये ! ॥ ४८ ॥

लक्षायुष्यकरं सूतं व्रीहिमात्रं भजेत्सुधीः ।
कोट्यायुष्यं भजेत्सूतं खादयन्मुद्गमालकम् ॥ ४९ ॥

एतत्सर्वं रसानां तु क्रमणं पूर्ववद्भवेत् ।
सहस्रायुःप्रदस्सूतो ब्रह्मत्वं विदधाति सः ॥ ५० ॥

अयुतायुष्करस्सूतो विष्णुतां प्रददाति च ।
लक्षायुष्यकरस्सूतो रुद्रत्वमुपपादयेत् ॥ ५१ ॥

कोट्यायुष्यप्रदस्सूतश्शिवत्वं विदधाति च ।
माक्षीकजीर्णसूतस्तु धनदत्वं ददाति वै ॥ ५२ ॥

इन्द्रत्वं विमलाजीर्णस्त्वभ्रजीर्णोऽर्कतां ददेत् ।
ब्रह्मतां शुल्वजीर्णश्च विष्णुतां तारजारितः ॥ ५३ ॥

रुद्रता हेमजीर्णे स्यादीशत्वं वङ्गजारिते ।
सदाशिवत्वं च ददेत्पारदो द्युतिजारितः ॥ ५४ ॥

सच्चिदानन्दरूपत्वं सूतको बीजजारितः ।
सामान्येन तु तीक्ष्णेन रुद्रत्वं प्राप्नुयान्नरः ॥ ५५ ॥

एव यो लोहजीर्णं तु भक्षयेद्धस्मसूतकम् ।
जलेन जलरूपी स्यात्स्थलेन स्थलता व्रजेत् ॥ ५६ ॥

तेजस्त्व तेजसा देवि ! वायुना वायुरूपभाक् ।
कर्ता हर्ता स्वय साक्षाच्छापानुग्रहकारक ॥ ५७ ॥

यत्र मूलपुरीष तु साधकस्तु परित्यजेत् ।
पाषाण मृण्मय तत्र स्पृष्ट भवति काचनम् ॥ ५८ ॥

प्रस्वेदात्तस्य गात्रस्य लोहान्यष्टौ च वेधयेत् ।
तत्सर्वं कनक दिव्य भक्षिते द्वादशे पले ॥ ५९ ॥

अथवा तारजीर्णं तु भक्षयेद्धस्मसूतकम् ।
शुल्वार वङ्गघोष च तत्स्वेदाच्चारता भवेत् ॥ ६० ॥

अथवा तीक्ष्णजीर्णं तु भक्षयेद्धस्मसूतकम् ।
मूत्रेण तस्य स्पृष्ट तु वङ्ग व्रजति तारताम् ॥ ६१ ॥

एकैकेन निषेकेन स्तम्भन नागवङ्गयो ।
गुञ्जामात्र रस देवि ! हेमजीर्णं तु भक्षयेत् ॥ ६२ ॥

द्विगुञ्जं तारजीर्णस्य रविजीर्णस्य च त्रयम् ।
तीक्ष्णाभ्रकातमाक्षीक गुञ्जका द्वेऽथवा भवेत् ॥ ६३ ॥

वङ्गवैक्रान्तजीर्णं तु भक्षयेत्सर्पपोन्मितम् ।
नागवङ्गवसाकीटविषोपविषसयुतम् । ६४ ॥

मूलयुक्त दृढाद्धृत्वं त्यचेत्कल्क रसायने ।
हेमतारप्रवेशेन जातो योऽग्निसह क्रमात् ॥ ६५ ॥

वद्धश्च रसराजोऽय देहसिद्धिप्रदो भवेत् ।
वङ्गायस्कातमाक्षीकवैक्रान्ताभ्रकाचनम् ॥ ६६ ॥

एतैर्जीर्णो यथालाभं रसश्शस्तो रसायने ।
षडेतोपरसाश्चैव भक्षणार्थं रसायने ॥ ६७ ॥

भस्मनस्तीक्ष्णजीर्णस्य पलमेकं तु भक्षयेत् ।
दशवर्षसहस्राणि वज्रकायस्स जीवति ॥ ६८ ॥

एवञ्च द्वादशपलं तीक्ष्णजीर्णस्य भक्षयेत् ।
एवं जीवन्महाकल्पं प्रळयान्ते शिवं व्रजेत् ॥ ६९ ॥

भस्मनश्शुल्वजीर्णस्य पलेन ब्राह्ममायुषम् ।
द्विपले वैष्णवायुष्यं रुद्रायुस्त्रिपलेन तु ॥ ७० ॥

चतुर्थे तु पले देवि ! शिवत्व प्राप्नुयान्नरः ।
हेमजीर्णे भस्मसूते त्रिपले भक्षिते क्रमात् ॥ ७१ ॥

अष्टाशीतिसहस्राणि योगिन्यो मददर्पिताः ।
तस्य तिष्ठन्ति किंकर्यः कामरूपी भवेन्नरः ॥ ७२ ॥

यद्यद्भावयते रूपं तत्तद्रूपधरो भवेत् ।
यत्र यत्र विलीयन्ते सिद्धिस्तत्रैव लीयते ॥ ७३ ॥

मिते पले द्वादशभिर्हेमभस्मनि भक्षिते ।
गुंजैकमात्रं देवेशि ! ज्ञात्वा चाग्निबलं निजम् ॥ ७४ ॥

घृतेन मधुना चाद्याताम्बूलं कामिनीं भजेत् ।
एको हि दोषस्सूक्ष्मोऽपि भक्षिते भस्मसूतके ॥ ७५ ॥

त्रिस्सप्ताहाद्वरारोहे कामान्धो जायते नरः ।
कामिनीनां सहस्रं तु क्षोभयेद्दिवसान्तरे ॥ ७६ ॥

नारीसङ्गाद्वरारोहे देहे क्रामति सूतकम् ।
नारीसङ्गाद्विना देवि ! ह्यजीर्णं तस्य जीर्यते ॥ ७७ ॥

मैथुनाच्चलिते शुक्ले त्रिसप्ताहादधः कृतात् ।
जायते प्राणसन्देहस्तावत्तन्मैथुनं त्यजेत् ॥ ७८ ॥

युवत्या जल्पनं कार्यं युवत्या चाङ्गमर्दनम् ।
यस्यास्स्पर्शनमात्रेण रसः क्रामति विग्रहे ॥ ७९ ॥

यथा तथा ह्लादयते सुस्त्रीरूपनिरीक्षणम्।
तथा क्रामति देवेशि! सूतकोऽसौ ततः क्षणात् ॥८०॥

अश्वत्थसदृशो यस्या आधारश्च समेक्षुभः।
तादृशस्तु भगो देवि! भाजनं तु रसायने ॥ ८१ ॥

निर्मांसश्चैव दीर्घश्च भगश्शुष्कगिरास्तथा।
दुःखदारिद्र्यकर्तारं वर्जयेत् रसायने ॥ ८२ ॥

पक्षे शुक्ले शुभदिने चन्द्रताराबलान्विते।
सुमुहूर्ते चिन्त्य शिवानलविप्रगुरून्द्विज ॥ ८३ ॥

सन्तुष्टस्सुमना भूत्वा रसं सेवेत सिद्धिदम्।
पयसा हेमशुण्ठीभ्यां नस्य कामणमुत्तमम् ॥ ८४ ॥

हेमादि षड्लोहकृतमञ्जन कामणं परम्।

रससेवायां पथ्यापथ्यम्॥

अत परं प्रवक्ष्यामि रससेवाहिताहितम् ॥ ८५ ॥

रक्तशाल्यन्नगोधूम गव्य क्षीर घृतं दधि।
जागल पललं मुद्ग शर्करा मधु सैन्धवम् ॥ ८६ ॥

हसोदक वास्तुक च मेघनाद पुनर्नवा।
पटोलालाबुकदलीधान्यकेक्षुकदाडिमम् ॥ ८७ ॥

नालिकेराम्बु घिस्व च सदा ताम्बूलचर्वणम्।
गन्धसार कुङ्कुमं च मृगनाभि विलेपयेत् ॥ ८८ ॥

सुरभीणि सुपुष्पाणि मृदुशय्येष्टकागिनी।
शिवात्मज्ञानकथनं मृदुभाषा सुखासिका ॥ ८९ ॥

दिव्याम्बराणि शुद्धानि छाया चाल्पविपर्यस्तम्।
मृत्युञ्जयजपो हर्षो मन्दहासश्च शुद्धता ॥ ९० ॥

नर्तनालोकनं गीतश्रवणं शिवपूजनम् ।
देवाग्निगुरुविप्राणां वन्दनं श्रुतिपालनम् ॥ ९१ ॥

समाधिः प्राणिकरुणा सत्यवाक्यं हितं प्रियम् ।
वाग्देहमनसां चेष्टा यथा दु.खनिरोधिनी ॥ ९२ ॥

एतत्सर्वं रसेन्द्रस्य क्रामणं कथितं प्रिये ! ।
अहितं रससेवायाः कथयामि शृणु प्रिये ! ॥ ९३ ॥

अत्यशनं चातिपानमतिनिद्राऽतिजागरम् ।
अकाले भोजनं स्त्रीणामतिसङ्गोऽप्यसङ्गिता ॥ ९४ ॥

अस्थानमदहासाश्च हर्ष. कोपोऽधिकस्पृहा ।
बहुजल्पो जलक्रीडा दु खमत्यन्तचिन्तनम् ॥ ९५ ॥

कलिङ्गं कारवेल्लं च कूष्माण्ड. कर्कटी तथा ।
काकमाची कुलुत्थं च कार्कोटी च कुसुम्भिका ॥ ९६ ॥

तिलातसीतैलमापकपोतकमसूरकाः ।
तक्रभक्तं च सौवीरं तिक्तकटूम्ललावणम् ॥ ९७ ॥

क्षारं क्षौद्रं पिच्छिलं च पित्तलं च परूषकम् ।
माहिषीः क्षीरविकृतीर्विदरं सहकारकम् ॥ ९८ ॥

नारङ्गबिल्वलिकुचशिग्वनैवेद्यभोजनम् ।
अग्निस्पर्शनमंघ्रिभ्या ताटनं गोद्विजन्मनो. ॥ ९९ ॥

कुमारीबालतुरगपथ्यादीना च ताडनम् ।
पातकं प्राणिहिंसा च छेदनं मूरुहामपि ॥ १०० ॥

अक्षादिसतव्यसनं छायाश्वत्थकपित्थयो. ।
लिङ्गस्त्रीनरखट्वानां तथा द्वीपिचिभीतयोः ॥ १०१ ॥

चतुष्पथातिनिर्विक्तस्थाने विण्मूत्रमोचनम् ।
शिवद्विजगुरुस्त्रीणां वीरयोनियुतात्मनाम् ॥ १०२ ॥

समयश्रुतिसूतानां नदीतीर्थाम्भसां नृणाम् ।
पलाण्डुहिंगुलशुनर्राजिकावृहतीद्वयम् ॥ १०३ ॥

निष्पावलङ्घनोद्वर्तिनिशाशाभरणन्दिता(?) ।
सुप्तिर्मद्यासवौ ताम्रचूडश्च जलजामिषम् ॥ १०४ ॥

तीक्ष्णोष्णगुरुविष्टंभिरूक्षशुष्कामिषं मधु ।
कदलीपत्रकांस्येषु भोजनं घर्मसेवनम् ॥ १०५ ॥

एतानि द्रव्यजालानि निषिद्धानि रसायने ।

अपथ्यजनिता रोगाः ॥

सेवेत चेत्प्रमादेन विकृतिर्जायते क्षणात् ॥ १०६ ॥

रसाजीर्णे भवेत्कान्ते ! शोषो मूर्च्छा भ्रमो ज्वर ।
क्लमः कंपः शकृन्मूत्ररोधनं शूलवेपथुः ॥ १०७ ॥

अनिद्रालस्यहिक्का च कासश्वासविजृम्भिकाः ।
अरोचकातिसारश्च लिंगस्तम्भोऽक्षिकुक्षिषु ॥ १०८ ॥

वक्ष कर्णोदरांघ्रौ च मेढ्रे शिरसि सन्धिषु ।
दाहोऽङ्गभङ्गस्सर्वेऽन्ये व्याधयस्संभवन्ति वै ॥ १०९ ॥

रसाजीर्णप्रशान्त्यर्थं योगोऽयं कथ्यते मया ।
राजकोशातकी पुङ्खा गरुडी कारवल्लिका ॥ ११० ॥

कार्कोटी काकमाची च देवदाली पराजिता ।
सर्वमेतच्चैकपलं गोमूत्रे तु चतुष्पले ॥ १११ ॥

क्वाथयेत्पादशेषं तु कार्षिकं स्वच्छसैन्धवम् ।
निक्षिपेत्तत्पिबेत्क्वाथं रसाजीर्णे हितंकरम् ॥ ११२ ॥

सुखीभवेत्तिदिवसे रसस्य क्रामणं भवेत् ।
रसो व्यथयते तत्तदङ्गं संपरिमर्दयेत् ॥ ११३ ॥

वा स्तनेन च तत्त्वज्ञया निर्व्यथः क्रमते रसः ।

सप्तधातुवेधः ॥

त्वग्वेधः प्रथमं देवि ! रक्तवेधो द्वितीयकः ॥ ११४ ॥
तृतीयो मांसवेधस्यान्मेदोवेधश्चतुर्थकः ।
अस्थिवेधः पञ्चमः स्यात्षष्ठो मज्जात्मको भवेत् ॥
सप्तमश्शुक्रवेधस्स्यात् नाडीवेधस्तथाऽष्टमः ।
नवमश्चक्षुषो वेधो दशमस्सर्ववेधकः ॥ ११६ ॥
रसवेधेन भुजगः स्वर्णं स्याद्रक्तवेधतः ।
त्रपु स्वर्णं भवेन्मांसवेधात्तीक्ष्णं च कांचनम् ॥ ११७ ॥
मेदोवेधेन शुल्बं तु स्वर्णं स्यादस्थिवेधतः ।
रूप्यं स्वर्णं भवेन्मज्जवेधाल्लोहानि कांचनम् ॥ ११८ ॥
शुक्रवेधेन मृत्पात्रं काञ्चनं भवति प्रिये ! ।
वज्रजीर्णो वीर्यवेधी मज्जाभ्रकजारितः ॥ ११९ ॥
हेमजीर्णस्त्वस्थिवेधी रूप्यजीर्णो रसं प्रिये ! ।
मेदोवेधी ताप्यजीर्णो मांसवेधी तु पारदः ॥ १२० ॥
शुल्बजीर्णो रक्तवेधी कान्तजीर्णो रसात्मकः ।
तीक्ष्णवङ्गेन नीलाभस्ताम्रेणारुणसप्रभः ॥ १२१ ॥
रजतेनेन्दुसंकाशो हेम्ना काञ्चनसप्रभः ।
धूमावलोकी वक्त्रस्थो मासात्खेचरतां नयेत् ॥ १२२ ॥
स्पर्शवेधी तु वक्त्रस्थो द्विमासात्सिद्धिदायकः ।
शतकोटिस्तिमिर्मासैश्चतुर्भिर्दशकोटिकृत् ॥ १२३ ॥
पञ्चभि. कोटिवेधी स्यादष्टभिश्चायुतं पुनः ।
साहस्रं नवभिर्मासैर्दशमासे शतं पुनः ॥ १२४ ॥

तस्य मूत्रपुरीषैस्तु श्लेष्मणाङ्गमलैस्तथा ।
लेपाद्धेमत्वमायान्ति यानि लोहानि भूतले ॥ १२५ ॥

चतुष्पष्ट्यंशतो वेधी मासमेकादशस्य तु ।
द्वात्रिंशकवेधी तु वर्षाद्देहं तु वेधयेत् ॥ १२६ ॥

सर्वरोगैर्विनिर्मुक्तो वलीपलितवर्जितः ।
नासौ छिद्येत शस्त्रैश्च पावकेन न दह्यते ॥ १२७ ॥

वायुवेगी महातेजा कामदेव इवापरः ।
इच्छया जायते दृश्योऽप्यदृश्यश्चैव जायते ॥ १२८ ॥

यस्य संस्पर्शमात्रेण सर्वलोहानि काञ्चनम् ।
तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे ॥ १२९ ॥

देवा यत्र विलीयन्ते सिद्धस्तत्रैव लीयते ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ षष्ठ उल्लासः ॥

॥ सप्तमोल्लासः ॥

पद्मरागादिरत्नोत्पत्तिः ॥

पुरा कैलासशिखरे गह्वरेऽद्रिसुतेश्वरौ ।
चिरमास्तां क्रीडमानौ जिगूषू तौ परस्परम् ॥ १ ॥

तदा रेतस्सूतरूपप्रवाहोऽभूत्तयोर्महान् ।
तत्प्रवाहप्रभावेन वेधिता दृषदोऽभवन् ॥ २ ॥

पद्मरागादिमणयो लोहा हेमादयस्तथा ।
गन्धकाद्याश्च पाषाणा दिव्या ओषधयो स्मृताः ॥ ३ ॥

नानावर्णा बहुविधा नानासिद्धिप्रदायकाः ।
पूर्वोक्तानां समस्तानां वज्रं श्रेष्ठतमं महत् ॥ ४ ॥

तज्जातिलक्षणं देवि ! संस्कारं भजनं फलम् ।
क्रमाद्वक्ष्यामि ते देवि ! सावधानं शृणु प्रिये ! ॥ ५ ॥

वज्रलक्षणं वज्रभेदाश्च ॥

द्विजन्मानश्च राजन्या ऊरव्या वृषलाः क्रमात् ।
शुभ्रशोणहरिद्राभाः काला नानाविधास्तथा ॥ ६ ॥

स्त्रीपुन्नपुंसकाश्चैव ज्ञातव्यास्ते क्रमात्प्रिये ! ।
शुक्लाः फलकसंपूर्णा ज्योतिष्मन्तो महत्तराः ॥ ७ ॥

पुमांसस्ते तु विज्ञेया रेखाबीजविवर्जिताः ।
बलाढ्यास्सत्वसहिता लोहक्रमणहेतवः ॥ ८ ॥

रसबन्धकराः क्षिप्रं सर्वेषां सिद्धिदायकाः ।
रसायनकरास्स्थूला ह्यष्टसिद्धिप्रदायकाः ॥ ९ ॥

षट्कोणबीजरेखाभिरुज्ज्वलास्तास्त्रियः स्मृताः ।
देहज्योतिःप्रजनना भोगकान्तिसुखप्रदाः ॥ १० ॥

दीर्घास्व्यथाश्च तनवो निबोद्धव्या नपुंसकाः ।
क्षीणसत्वास्स्वल्पवीर्याः क्रामकास्सुरनायिके ! ॥ ११ ॥

बलीना नपुंसके स्त्रीणां स्त्रियस्सर्वहिता नराः ।
जात्यानुरूपाश्चोत्साहं यथा सत्वं तथा गुणम् ॥ १२ ॥

यथा कान्तिस्तथा शीलं कुर्वन्त्येवं द्विजातयः ।
बलीपलितरोगघ्नाः क्षत्रिया मृत्युहारिणः ॥ १३ ॥

देहस्थैर्यकरा वैश्या लोहानां वेधकारिणः ।
वयस्तंभकराश्शूद्रा नानामयविनाशनाः ॥ १४ ॥

वज्रसंस्कारः ॥

वज्रसंस्कारमधुना कथयामि शृणु प्रिये ! ।
श्यामा शमी मेघनादा वर्षाभूधूर्तकोद्रवाः ॥ १५ ॥

मेषशृङ्ग्याखुकर्णी च कुलत्थं चाम्लवेतसः ।
मदनागस्त्यनिर्गुण्डी चैतेषां स्वरसैर्युते ॥ १६ ॥

डोलायन्त्रे पाचयेच्च व्याघ्रीकन्दगतं दिनम् ।
उद्धृत्य गाहिषशकृल्लिप्तं कारीषवह्निना ॥ १७ ॥

दहेद्रात्रौ चतुर्यामं राज्यन्ते परिषेचयेत् ।
हयमूत्रस्नुहीक्षीरकुलत्थकरसैस्तथा ॥ १८ ॥

पाचयेद्दाहयेदेवं सेचयेत्सप्तवारकम् ।
एवं द्विजातिजातीयाश्शोधितास्स्युश्च सिद्धिदा ॥१९॥

वज्ररसायनम् ॥

रसायनाहँ वक्ष्यामि वज्रभस्म सुरेश्वरि ! ।
वैक्रान्ततार्क्ष्यगन्धाश्मशिलामाक्षिकतालकम् ॥ २० ॥

कान्तास्यटङ्कणक्षारकुलीरास्थीनि षेपयेत् ।
स्तन्येन गोलके क्षिप्त्वा मूषायां निक्षिपेच्चतः ॥ २१ ॥

धमेद्दृढतरं पूर्वं पश्चाद्वज्रपुटे पचेत् ।
तदेव वज्रमादाय तस्मिन्षोडशमात्रके ॥ २२ ॥

एकांशं पारदं तस्मिन्पक्वबीजेन जारितम् ।
स्तन्येन मर्दयेत्तौ द्वौ पुनर्वज्रपुटे पचेत् ॥ २३ ॥

वज्रभस्मगुणाः ॥

वज्रभस्म यथा तद्वद्द्युतिमार्दवयोरपि ।
भवेद्भस्म वरारोहे जरादारिष्यमृत्युजित् ॥ ४५ ॥

रसायने भवेत्सौख्यं भस्म द्युतिमृदूद्भवम् ।
रसायने तु स्त्रीपुंसौ क्रामणे तु नपुंसकः ॥ ४६ ॥

षड्सं हिमवीर्यं च सर्वामयविनाशनम् ।
सर्वदोषप्रशमनं सर्वसौख्यं रसायनम् ॥ ४७ ॥

विद्युत्प्रभां देहदार्ढ्यं स्वच्छं स्निग्धं च लेखनम् ।
सौन्दर्यं बलमायुष्यं महालक्ष्मीविनाशनम् ॥ ४८ ॥

शुद्धिर्मृदुद्युतीभस्म वैक्रान्तस्य तु वज्रवत् ।

स्वर्णम्— तद्भेदाः ॥

अथ वक्ष्ये श्रेष्ठतमं शृणु हेमरसायनम् ॥ ४९ ॥

हेमोत्पत्तिः पुरा प्रोक्ता तथाऽपि त्रिविधा भवेत् ।
रसवेधाद्भवेच्चैकं इतरक्षेत्रसम्भवम् ॥ ५० ॥

लोहसङ्करजं चान्यच्छ्रेष्ठमध्यकनीयसः ।
क्रमेण पीतरक्ते च पीतरक्तं च वर्णतः ॥ ५१ ॥

निकषच्छेददाहेषु कुङ्कुमश्वेतशोणितम् ।

स्वर्णशुद्धिः ॥

दिव्यमेवंविधं स्वर्णं पट्टकं कणशः कृतम् ॥ ५२ ॥

हरिनीकेसुकीकन्दस्नुग्र्कौग्निकरञ्जकम् ।
धूर्तगुञ्जेङ्गुदीनीरमूलतालाश्वगन्धकाः ॥ ५३ ॥

पिष्ट्वेन्द्रवारुणी चैषां मूलानि मथितेन वै ।
लेपयेत्स्वर्णपट्टानि तापयेज्जातवेदसि ॥ ५४ ॥

गोमूत्रे मथिते तैले कुलुत्थाम्भसि काञ्जिके।
जम्बीरार्कपयोमध्ये प्रत्येकं सप्तधा क्षिपेत् ॥ ५५ ॥

लेपयेत्तापयेत्सञ्च्याद्भूयो भूयोऽपि सप्तधा।
वल्मीकमृद्धूमसारमिष्टकापटुगैरिकम् ॥ ५६ ॥

पिष्ट्वा जम्बीरनीरेण लिप्त्वा पत्रं पुटीकृतम्।
चतुर्वर्णाभ्रकं ताप्यं दरदं तालकं शिलाम् ॥ ५७ ॥

कान्तकङ्कुष्ठरसकविमलासूतमूलतः।
पिष्ट्वाऽम्लेन वटीं कुर्यान्निष्कमात्रास्सुरेश्वरि ! ॥ ५८ ॥

पलादूनं न कर्तव्यमधिकं च चतुष्पलात्।
पुटितं हेम शुल्बं च द्रावयेच्च समीकृतम् ॥ ५९ ॥

तन्मध्ये तद्द्रवीभूते चैकैकां वटिका क्षिपेत्।
स्वर्णाद्दशगुणा वाह्या वटिकाः शोषिता क्रमात् ॥

यावच्छ्वेतं भवेत्स्वर्णं तावदेवं धमेच्छनैः।
शुद्धं तज्जायते दिव्यं जरामरणरोगहृत् ॥ ६१ ॥

स्वर्णभस्म ॥

चिञ्चापत्रनिभं स्वर्णं पत्रं शुद्धं च पारदम्।
एकान्तं मर्दयेदम्लैस्तत्पिष्टिमपि लेपयेत् ॥ ६२ ॥

समगन्धकताप्याभ्यां पिष्टिं मूषागतां धमेत्।
षोडशांशं सूतभस्म हेमचूर्णे विनिक्षिपेत् ॥ ६३ ॥

अम्लेन मर्दयेद्गाढं पचेत्तद्भूधरे पुटे।
एवं षोडशपर्यन्तं रसं प्रतिपुटं क्षिपेत् ॥ ६४ ॥

निरत्थं हेमभस्मेदं जायते सर्वसिद्धिदम्।

हेमरसायनम् ॥

विरेकवमनाद्यैश्च शुद्धदेहश्शुभे दिने ॥ ६५ ॥

अर्चयेदीशविप्राग्निगुरुवैद्यपुरस्सरान् ।
सेवेत शुद्धहृदयो दिव्यं हेमरसायनम् ॥ ६६ ॥

कान्ताभ्रयोस्सत्वभस्म चैकगुञ्जाप्रमाणकम् ।
मापोन्मितं हेमभस्म वरामध्वाज्ययुग्लिहेत् ॥ ६७ ॥

पूर्वोक्तवद्वज्र(विधौ ?)मासपोडशिकावधि ।
पूर्वोक्तवद्विधिन्त्याज्यं प्रकुर्वीत रसायनी ॥ ६८ ॥

शृणु चिलां गिरिसुते ! सेवां हेमरसायने ।
पलमात्रोपयोगेन सर्वरोगविवर्जितः ॥ ६९ ॥

ततो द्विपल्योगेन वलीपलितवर्जितः ।
वाक्सिद्धिर्दिव्यदृष्टिश्च त्रिपलेन भवेत्प्रिये ! ॥ ७० ॥

चतुष्पलोपयोगेन विपव्याघ्राहिभीर्न हि ।
तथा पञ्चपलेनैव दिव्यात्मज्ञानिता भवेत् ॥ ७१ ॥

देवि ! षट्पलयोगेन सिद्धसाध्यपदं भवेत् ।
तथा सप्तपलेनापि विद्याधरपदं भवेत् ॥ ७२ ॥

तथाऽष्टपलयोगेन स्वेच्छाविहरणे पटु. ।
पलेन नवमेनापि चाष्टैश्वर्यगुणान्वित. ॥ ७३ ॥

तथा दशपलेनापि महेन्द्रत्वमवाप्नुयात् ।
एकादशपलैर्देवि ! ब्रह्मत्वं नात्र संशय. ॥ ७४ ॥

द्वादशभिः पलै. कान्ते ! विष्णुत्वं समुपैति च ।
त्रयोदशपलेनापि रौद्रं पदमवाप्नुयात् ॥ ७५ ॥

तथा चतुर्दशपलैरैश्वरं लभते पदम् ।
पलै. पञ्चदशैरेति सदाशिवपदं परम् ॥ ७६ ॥

तथा स्यात्षोडशपलैः सच्चिदानन्दविग्रहः ।
सर्वज्ञस्सर्वकर्ता च हर्ता गोप्ता स सर्वगः ॥ ७७ ॥

हेमद्रुतिः ॥

हेमद्रुतिं प्रवक्ष्यामि शृणु संप्रति पार्वति ! ।
फलपांशुर्देवदाल्याश्चकगोपोऽश्वलालिका ॥ ७८ ॥

टङ्कणं जालिनीनीरैर्भावयेद्दुधा प्रिये ! ।
द्रावयेत्काञ्चनं तत्र वपेत्सूतसमा द्रुतिः ॥ ७९ ॥

इमां द्रुतिं काञ्चनवद्भस्म सेवाञ्च कल्पयेत् ।
स्वादु तिक्तं कषायं च शीतमुष्णं रसायनम् ॥ ८० ॥

हृद्यं कान्तिप्रदं शुद्धं चक्षुष्यं गुरु लेखनम् ।
धृतिस्मृत्यायुरारोग्यनयवाक्सिद्धिदायकम् ॥ ८१ ॥

क्षयोन्मादादिरोगाणां नाशनं दोषशान्तिकृत् ।
स्निग्धं रुच्यं दीप्तिकरं वीर्यकृद्बलवर्धनम् ॥ ८२ ॥

कान्तम्— तद्भेदा लक्षणञ्च ॥

अथ कान्ते ! प्रवक्ष्यामि कान्तं कान्तरसायनम् ।
दिव्या औषधयस्सन्तु सर्वसिद्धिप्रदायिका ॥ ८३ ॥

तेभ्य कान्तं श्रेष्ठतमं वलीपलितापहम् ।
कल्पान्ते ताण्डवं शम्भुश्शर्वाणीसहितस्स्वयम् ॥ ८४ ॥

उद्दण्डं व्यतनोच्चल सञ्जातास्स्वेदबिन्दव ।
तत्र तल गतास्तेऽपि क्षयस्कान्तत्वमाययुः ॥ ८५ ॥

जाङ्गले बहवो जाता देशे साधारणे क्वचित् ।
जलप्रायेऽस्ति वा नास्ति जात्या पञ्चविधास्स्मृता. ॥

आमकं चुम्बकं देवि ! कर्षकं द्रावकं तथा ।
रोमकं च तथैकद्वित्रिचतुस्सर्वतोमुखा ॥ ८७ ॥

तेषां पञ्चविधाना तु पीतं कृष्ण च शोणितम् ।
मिश्रं पृथक्पृथक्तेषां क्रमात्पुरुषदेवता. ॥ ८८ ॥

ब्रह्मविष्ण्वीशभूतात्ममातृकाः परिकीर्तिताः ।
पीतवर्णं स्पर्शविधि कृष्णं श्रेष्ठं रसायने ॥ ८९ ॥

रसबन्धकरं रक्तं मिश्रं सर्वरुजापहम् ।
रोमकं ग्रहभीतिघ्नं द्रावकं चोत्तमोत्तमम् ॥ ९० ॥

उत्तमं मध्यमं नीचं कर्षकं चुम्बकं क्रमात् ।
आमकं लक्षणं वच्मि लोहन्तु भ्रामयेत्ततः ॥ ९१ ॥

तस्माद्भ्रामकमित्युक्तं चुम्बकं लोहचुम्बकम् ।
कर्षकं कर्षयेल्लोहं द्रावकं द्रावयेच्चतः ॥ ९२ ॥

स्फुटनाद्रोमजननं तद्रोमकमुदाहृतम् ।
अत्युत्तमं बहुमुखं चतुःपञ्चास्यमुत्तमम् ॥ ९३ ॥

मध्यमं स्याद्द्वित्रिमुखं नीचमेकमुखं भवेत् ।
भ्रामकं चुम्बकं सर्वरोगाणां नाशने हितम् ॥ ९४ ॥

कर्षकं द्रावकं श्रेष्ठं रसयोगे रसायने ।
रसद्विपांकुशमिदं कान्तं पञ्चविधं प्रिये ! ॥ ९५ ॥

समीरणातपस्पृष्टं न ग्राह्यं तत्कदाचन ।
हस्तद्वये समुत्खाय कान्तं ग्राह्यं वरानने ! ॥ ९६ ॥

कान्तसत्वपातनम् ॥

आदौ संपूज्य दुर्गां च गणेशं भैरवं प्रिये ! ।
तीव्राग्निना दहेत्कान्तं सेचयेत्त्रिफलांबुना ॥ ९७ ॥

तत्कान्तं चूर्णयेत्सूक्ष्मं काचसामुद्रटङ्कणैः ।
लाक्षागुग्गुलुगुञ्जाभिरर्णाज्यमधुसिक्थकैः ॥ ९८ ॥

दाशार्थिक्षुद्रमीनैश्च भल्लातिलकल्ककैः ।
सर्जक्षारयवक्षाररालैश्चिरगुडे(?)स्तथा ॥ ९९ ॥

न्यङ्कुसैरिभदन्तीनां विषाणैश्च समांशकैः ।
एतत्समांशं तत्कान्तमजाक्षीरेण मर्दयेत् ॥ १०० ॥

मेलयेत्पञ्चमाहिष्यैर्दध्याद्यैर्गोमयान्तकैः ।
श्लक्ष्णं पिष्ट्वा वटीः कुर्यात्कर्षमात्रास्सुरेश्वरि ! ॥१०१॥

कोष्ठीयन्त्रे वङ्कनाले खदिराङ्गारकैर्दृढम् ।
पञ्च पञ्च वटीस्तत्र निक्षिपेच्च शनैश्शनैः ॥ १०२ ॥

त्रियाममथनादेव कान्तात्सत्वं पतेच्छुचि ।
तत्सर्वं कणशः कृत्वा काचाद्यैरौषधैस्समैः ॥ १०३ ॥

मूषागतं धमेत्तीव्रमेवं धाम्यं त्रिधा प्रिये ! ।
एवं कृतं तु तत्कान्तसत्वं सत्वतमं भवेत् ॥ १०४ ॥

कान्तस्वरूपम् ॥

कान्तलोहस्य पात्रस्थजले तैलस्य बिन्दवः ।
न सर्पन्ति चणास्त्वेता. कृष्णास्स्युर्नात्र संशयः ॥१०५॥

घृष्टहिंगोर्न गन्धस्यात्क्षीरोर्मिश्शिखराकृतिः ।
न कदाचिद्भुवि पतेच्छिवा मुञ्चति तिक्तताम् ॥१०६॥

तल्लोहक्षिप्तमुष्णांबु शीतलं भवति क्षणात् ।

लोहशुद्धिः ॥

ऊनं पञ्चपलान्नैव नोर्ध्वं पञ्चदशात्पलात् ॥ १०७ ॥

त्रिफला षोडशपला तच्चतुर्गुणमम्बु च ।
क्वाथयेत्पादशेषं तु तस्मिन्पत्राणि ढालयेत् ॥ १०८ ॥

शशरक्तप्लुतानि शोषयेदातपे पुन. ।
तापितानि पुनस्तक्रतैलसौवीरसर्पिषि ॥ १०९ ॥

क्षौद्रार्कक्षीरजम्बीर कुलत्थकरसेष्वपि ।
लेपनं शोषणं दाहं सेचनं च क्रमात्त्रये ॥ ११० ॥

प्रत्येकं सप्तधा कुर्याद्गिरिदोषं त्यजेदयः ।

लोहसंस्कारमन्त्राः ॥

आदौ मन्त्रस्ततः कर्म कर्तव्यो मन्त्र उच्यते ॥ १११ ॥

उद्भवोद्भवशब्दस्याचतुर्थ्यन्तोऽमृतात्परः ।
स्वाहान्तः प्रणवश्चादौ मन्त्रोऽयं मर्दने स्थितः ॥११२॥

ॐ अमृतोद्भवोद्भवाय स्वाहा ।

रक्षायै लोहनरयोरयमेकोद्भवो मनु. ।
विना स्वाहापदं स्थाने फडन्तं यत्समुच्चरेत् ॥ ११३ ॥

" ॐ अमृतोद्भवाय फट् "

प्रणवोर्ध्वन्नमश्चण्डवज्रपाणय इत्यपि ।
ततः परं महायक्षसेनाधिपतये नमः ॥ ११४ ॥

द्विरुक्तं सुरुशब्दस्य महाविद्याबलाय च ।
ततस्स्वाहेति मन्त्रोऽयं बलिकर्मणि कीर्तितः ॥ ११५ ॥

ॐ नमश्चण्डवज्रपाणये महायक्षसेनाधिपतये नमः
सुरु सुरु महाविद्याबलाय स्वाहा ॥

लोहभस्म ॥

एतानि लोहपत्राणि सूक्ष्मं सञ्चूर्णयेत्ततः ।
अय.पात्रे कान्तचूर्णं निक्षिप्य त्रिफला रसैः ॥ ११६ ॥

सेचयेत्तदयोदव्यां चालयन्पाचयेदिति ।
पिण्डीभूतं तदादाय मृत्तिकापटले शुभे ॥ ११७ ॥

सम्पुटे निक्षिपेत्सम्यक् षोडशाङ्गुलगर्तके ।
निधायारण्यकारीषमध्यगं कारियं दहेत् ॥ ११८ ॥
अहोरात्रं प्रकुर्वीत वातातपविवर्जितम् ।
पुनः प्रातस्समादाय चराकाथेन मर्दयेत् ॥ ११९ ॥
स्थालीसंपुटयोरेवं कुर्यात्पाकपुटैः क्रमात् ।
एवं विदध्यात्सप्ताहं तस्मिन्क्षेप्यं च हिंगुलम् ॥१२०॥
लोहस्य षोडशांशं च नारीस्तन्येन मर्दयेत् ।
स्थाल्या पाकं सपुटे च पुटं कुर्वीत षोडश ॥ १२१ ॥
निरुत्थं तद्भवेद्भस्म देवि ! योज्यं रसायने ।

लोहभस्मनोऽमृतीकरणम् ॥

यावत्स्यात्त्रिफला तस्माद्भवेद्वारि चतुर्गुणम् ॥ १२२ ॥
अष्टावशेषं कथयेत्क्वाथस्य सदृशं घृतम् ।
घृततुल्यं कान्तभस्म ताम्रपात्रे पचेत्प्रिये ! ॥ १२३ ॥
लोहदर्व्या प्रचलयन्यावच्छुष्यति तद्रसः ।
तावन्मृद्वग्निना पाच्यं लोहतुल्यां सितां क्षिपेत् ॥
अमृतीकरणमित्युक्तं सर्वयोगवहं परम् ।

लोहपाकभेदाः ॥

लोहपाकं प्रवक्ष्यामि तद्भवेत्त्रिविधं प्रिये ! ॥ १२५ ॥
मृदुमध्यखराः प्रोक्ता जम्बीरसदृशो मृदु ।
मध्यमः पिण्डसदृशो चालुकासदृश खर ॥ १२६ ॥

कान्तलोहरसायनसेवाक्रमः ॥

अथ सेवां प्रवक्ष्यामि कान्तलोहस्य भस्मन ।
सुमुहूर्ते शुभदिने पूजितेशादिदेवत ॥ १२७ ॥

सेवेत सिद्धिदं दिव्यं कान्तभस्म रसायनम् ।
शुद्धदेहो विरेकाद्यैरभ्रसं घृत प्रिये ! ॥ १२८ ॥

मासमेकं तु सेवेत तस्माच्छुद्धवपुर्भवेत् ।
मापमात्रं कान्तभस्म गुञ्जामात्राभ्रभस्म च ॥ १२९ ॥

द्विनिष्कं त्रिफलाचूर्णं मधुसर्पिस्समन्वितम् ।
लिहेन्मातर्विशुद्धात्मा स्नानदानादिकर्मभिः ॥ १३० ॥

अनुपेयं ततो लोहाद्द्व्यं षष्टिगुणं पयः ।
धारोष्णं तदभावे तु कृत्वा क्षीरं समाक्षुकम् ॥१३१ ॥

यावत्क्षीणजलं काथ्यं क्षीरं चानुपिबेदिमये ! ।
तदसाल्ये वराक्वाथं गुडूच्या वा कषायकम् ॥१३२॥

इत्येकमासं सेवेत क्रमाद्द्वित्रिचतुष्टयम् ।
प्रतिमासं मापगुञ्जावृद्धिः कान्ताभ्रभस्मनोः ॥ १३३ ॥

एवं षोडशमासान्तं वृद्धिष्षोडशमालकाः ।
पूर्वोक्तवद्विधिं त्याज्यं कुर्यात्सिद्धिमवाप्नुयात् ॥१३४॥

अस्य वत्सरयोगेन क्षुद्रामयविनाशनम् ।
एतद्द्विवर्षयोगेन महारोगप्रणाशनम् ॥ १३५ ॥

त्रिवर्षात्पलितं हन्ति चतुर्वर्षाद्वलिं हरेत् ।
पञ्चमादपमृत्युघ्नं षष्ठे स्यादायुषश्शतम् ॥ १३६ ॥

सप्ताब्दे सूर्यवद्दीप्ति दशमे सिद्धिमेलनम् ।
वैयाधृं समाप्नोति वर्षे चैकादशे प्रिये ! ॥ १३७ ॥

त्रयोदशाब्दे देवत्वमिन्द्रत्वं च चतुर्दशे ।
तथा पञ्चदशाब्दे च सर्वलोकप्रियो भवेत् ॥ १३८ ॥

षोडशाब्देऽष्टसिद्धिस्स्यात्सत्यं सत्यं महेश्वरि ! ।

कान्तद्युतिक्रमः ॥

सुवर्णद्युतिवत्कान्तद्युतिस्स्यात्पूर्ववस्प्रिये ! ॥ १३९ ॥

कान्तद्युतिर्भवेद्वस्म कान्तलोहस्य भस्मवत् ।

लोहभेदास्तद्गुणाश्च ॥

किट्टं मुण्डं तथा तीक्ष्णं कान्तं पूर्वोत्तरोत्तरम् ॥१४०॥

गुणाढ्यास्त्युर्दशशतसहस्रं लक्षकं क्रमात् ।
शताधिको भवेत्कान्तस्त्वौषधानां रसायनम् ॥ १४१ ॥

त्रिदोषशमनं दिव्यं सर्वरोगापहारकम् ।
कान्तिं रुच्यं च चक्षुष्यं हयमायुष्यदं शुचि ॥१४२॥

स्थैर्यं दाढर्यं च धातूनां बलवच्च रसायनम् ।

अभ्रकोत्पत्तिः—तद्भेदा लक्षणञ्च ॥

अथाभ्रकं प्रवक्ष्यामि तदुत्पत्त्यादिकं क्रमात् ॥१४३॥

पुराऽऽदिशक्तिर्भवती श्वेतद्वीपे मनोरमे ।
इन्द्राणीकमलावाणीगायत्रीमुखैस्सह ॥ १४४ ॥

अरुन्धतीमुखैर्दिव्यमुनिदारैश्च संयुता ।
संचिक्रीडे महामाया चित्सदानन्दरूपिणी ॥ १४५ ॥

आनन्दाश्रुकणा क्षौमे न्यपतन्बहवो दृशोः ।
तदा ऋतुमती जाता ततस्स्वादु सरित्पतेः ॥ १४६ ॥

तीरे त्यक्त्वा च तद्वस्त्रं स्नात्वा कैलासमाययौ ।
वात्यावशेन तद्वस्त्रं क्षीराब्धौ न्यपततदा ॥ १४७ ॥

देवासुरैर्मथ्यमानात्तस्मात्क्षीराम्बुधेस्तदा ।
समभूत्तद्रजोवस्त्रं चतुर्धाऽभ्रकसंज्ञकम् ॥ १४८ ॥

कृष्णाभ्रकं साञ्जनाभं पीतं देव्यञ्जलेपनात् ।
रक्तं तस्य रजोरूपं क्षौमं श्वेतमभूदिति ॥ १४९ ॥

चतुर्विधं तदालोक्य रसबन्धनकारणम् ।
रसायनं रोगहरं सर्वसिद्धिप्रदायकम् ॥ १५० ॥

इत्यूचिरे सुरास्सर्वे साक्षादमृतसंमितम् ।
श्वेतं रजतकार्येषु त्रयमन्यत्सुवर्णके ॥ १५१ ॥

सर्वं रसायने योज्यं रक्तपीतसितासितम् ।
श्वेताच्छतगुणं रक्तं रक्तात्पीतं सहस्रकम् ॥ १५२ ॥

पीताभ्रशतगुणं कृष्णं ज्ञेयं लोहे रसायने ।
प्रत्येकं तानि जायन्ते चतुर्धा जातितः क्रमात् ॥१५३॥

पिनाकं दर्दुरं नागं वज्रं चेति चतुर्विधम् ।
वज्रं समाहरेन्मुख्यं त्रीण्यन्यानि विवर्जयेत् ॥ १५४ ॥

पिनाकमग्निनिक्षिप्तं मुञ्चते दलसञ्चयम् ।
तत्सेवितं मलं बद्ध्वा मारयेद्रोगकारणम् ॥ १५५ ॥

दर्दुरं वह्निनिक्षिप्तं कुरुते भेकनिस्वनम् ।
तदुत्पादयते रोगमश्मर्याख्यमसाध्यकम् ॥ १५६ ॥

नागगन्धौ विनिक्षिप्तं फूत्कारं वितनोति यत् ।
तत्सेवया महाकुष्ठं मण्डलाख्यं भवेद्ध्रुवम् ॥ १५७ ॥

वाह्यलक्षणम् ॥

एतत्त्रितयसेवाभिर्जायते रोगसञ्चयः ।
वह्निस्थितं तु वज्राभ्रं विकारान्नाचरेत्क्वचित् ॥ १५८ ॥

तस्माद्वज्राभ्रकं सेव्य वलीपलितमृत्युजित् ।
राजहस्तात्परं मात्र्यं खनित्वेन तदाकरात् ॥ १५९ ॥

भारयुक्तं पृथुदलं स्निग्धं मोच्यदलं सुखम् ।
काचचन्द्रकिट्टाभं न योज्यं तत्कदाचन ॥ १६० ॥

धान्याभ्रकम् ॥

पूर्वोक्तलक्षणयुतं वज्राभ्रं धमयेद्दृढम् ।
अर्कक्षीरारनाले च गोमूत्रे त्रिफलारसे ॥ १६१ ॥
मेघनादरसे चेत्थं निक्षिपेत्तेषु तत्त्रिधा ।
सम्यग्दलं मोचयित्वा मेघनादाम्लयोर्द्वयैः ॥ १६२ ॥

भावयेदातपे तीव्रे श्लक्ष्णं पिष्ट्वाऽथ वस्त्रके ।
निक्षिप्य धान्यसहितं बद्ध्वा तत्काञ्जिके पुनः ॥१६३॥

कराभ्यां घट्टयेद्गाढं सूक्ष्मं तत्काञ्जिके स्रवेत् ।
तत्कुर्यादातपे शुष्कमेतद्धान्याभ्रकं स्मृतम् ॥ १६४ ॥

अभ्रकसत्वपातनम् ॥

कान्तवत्सत्वपतनमभ्रकस्य भवेत्प्रिये ! ।
हेम रूप्यं माक्षिकं च वैक्रान्तं मधु टङ्कणम् ॥ १६५ ॥

गुञ्जा गुडं घृतं भल्ल(बिल्व)मेकैकं दशनिष्ककम् ।
पिष्ट्वाऽर्कपयसा कार्या वटिकाः कर्षमात्रकाः ॥ १६६ ॥

शतनिष्केऽभ्रसत्वेऽस्मिन्विद्रुते वटिकाः क्षिपेत् ।
एकैकघटिकामात्रं वट्यः क्षेप्याश्शनैश्शनैः ॥ १६७ ॥

यावत्तत्सत्वशेषं स्याद्यावद्धाम्यमतन्द्रितैः ।
इदमभ्रकसत्वं तु देवयोग्यं रसायनम् ॥ १६८ ॥

अभ्रकसत्वभस्म ॥

चूर्णीकृत्याभ्रसत्वं तन्मेघनादः पुनर्नवा ।
सूरणोऽर्कदलं मुस्ता जम्बीरस्त्वालमूलिका ॥ १६९ ॥

त्रिफला वज्रवल्ली च शाङ्केरी मरिचं तथा ।
अम्लवर्गो वटजटा कार्पासमुनिशिग्रुकम् ॥ १७० ॥

एकवीरा कोकिलाक्षी सर्पाक्षी तुलसी वचा ।
पेटारी वाकुची कन्या चैकैकस्य रसैः पृथक् ॥१७१॥

मर्दनं घर्मपाकं च स्थालीपाकं पुटं क्रमात् ।
एकैकाहं प्रकुर्वीत ततो दरदमास्किके ॥ १७२ ॥

सत्वषोडशभागेन योज्यं पेष्यं वरारसैः ।
पुटषोडशपर्यन्तं कुर्यादेवं हि भैरवि ! ॥ १७३ ॥

पूर्वोक्तवत्स्यादमृतीकरणं कान्तसत्ववत् ।
निरूत्थं भस्म भवति चायुरारोग्यदायकम् ॥ १७४ ॥

अभ्रकसत्वसेवाक्रमः ॥

अथ सेवां प्रवक्ष्यामि धनसत्वरसायने ।
वमनादिविशुद्धात्मा पूजितस्त्वेष्टदेवतः ॥ १७५ ॥

गुञ्जामात्राभ्रसत्वं च द्विनिष्कं त्रिफलारजः ।
मध्वाज्याभ्या लिहेन्मासमेकं भजेदिति ॥ १७६ ॥

एवं षोडशमासान्तं मासवृद्धिक्रमेण वै ।
गुञ्जावृद्धिर्भवेद्देवि ! सेवैतेत्थं रसायनम् ॥ १७७ ॥

पूर्वोक्तवद्विधिं त्याज्यं प्रकुर्वीत सुरेश्वरि ! ।
वर्षेण देहशुद्धिस्स्याद्द्विवर्षादमयाच्युतः ॥ १७८ ॥

त्रिवत्सरान्महारोगनाशनं भवति ध्रुवम् ।
चतुर्वर्षान्महाकान्तिबलवीर्यप्रवर्धनम् ॥ १७९ ॥

पञ्चवर्षाद्देहदार्ढ्यं षष्ठे वांछितसिद्धिगेति हि ।
सप्तमे दिव्यदृष्टिस्स्यादष्टमे विषनाशनम् ॥ १८० ॥

नवाब्दे सिद्धतामेति ततो विद्याधरो भवेत् ।
एकादशाब्दे त्विन्द्रत्व द्वादशे मरुता भवेत् ॥१८१॥
त्रयोदशाब्दे विष्णुत्व रुद्रत्व च चतुर्दशे ।
ईशत्व पञ्चदशके षोडशाब्दे सदाशिव ॥ १८२ ॥
अणिमादियुतस्त्वैरी सर्वज्ञस्सर्वकृद्भवेत् ।

अभ्रकद्रुति ॥

अथाभ्रकद्रुतिं वक्ष्ये कन्चुकीकन्द एव च ॥ १८३ ॥
कपितिन्दौ केशतैले प्रत्येक तु त्रिधा वपेत् ।
मूषाया द्रावयित्वा तदभ्रसत्वद्रुतिर्भवेत् ॥ १८४ ॥
भस्मीकुर्यात्प्रयत्नेन द्रुतिमभ्रकसत्ववत् ।

अभ्रकगुणा ॥

षड्रसस्सर्वरोगघ्नस्त्रिदोषशमन पर ॥ १८५ ॥
वीर्यायुष्यबलप्रज्ञाकान्तिरूपविवर्धन ।
वपुर्दार्ढ्यस्थैर्ययुक्तो वलीपलितमृत्युहा ॥ १८६ ॥
रुच्यो वृष्यो लघुश्शीतो मेध्यस्स्निग्धो रसायनम् ।
अभ्रक दीपन ग्राहि श्रेष्ठ पारदबन्धनम् ॥ १८७ ॥
पक्षजित्सूतराजस्य भस्मीभूताभ्रसत्वक ।
अभ्रस्य पत्र रोगघ्न तच्च सत्व दृढङ्करम् ॥ १८८ ॥
चेतसत्व(?) मृदु हरेद्द्रुतिस्ताश्च दरिद्रताम् ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ सप्तमोल्लास ॥

॥ अष्टम उल्लासः ॥

रसायनसेवा ॥

सूतो वज्रं सुवर्णं च कान्तलोहं तथाऽभ्रकम् ।
पञ्चैतान्यमृतानि स्युः कल्पितानि नृणां मया ॥ १ ॥

मत्तकाशिनि ! यो वेत्ति सोपि साक्षान्महेश्वरः ।
अहं रसो रसश्चाहमावयोरन्तरं न हि ॥ २ ॥

तेन युक्तास्तु वज्राद्यास्सिद्धिदास्स्युर्न संशयः ।
पुरुषं रससेवाहं वदामि शृणु पार्वति ! ॥ ३ ॥

स्त्रीक्लीबबालकानां च न हि योज्यं रसायनम् ।
बालाः पञ्चदशाब्दा ये कुमारास्त्रिंशदब्दकाः ॥ ४ ॥

पञ्चाशद्वर्षदेशीया युवानः परिकीर्तिताः ।
अतः परं च स्थविराः भवेयुस्ते रसायने ॥ ५ ॥

यथोक्तकाले सिद्धिस्स्यात्कुमारस्य रसायनात् ।
तस्माद्द्विगुणकालेन यूनस्सिद्धिर्भवेद्ध्रुवम् ॥ ६ ॥

तस्मात्त्रिगुणकालेन वृद्धस्सिद्धिमवाप्नुयात् ।
ज्ञातव्याः क्रमशो देवि ! ह्युत्तमो मध्यमोऽधमः ॥ ७ ॥

रसायनसेवाक्रमः ॥

पूर्वमभ्रकमश्नीयात्ततः कान्तरसायनम् ।
अथ कान्ताभ्रकं देवि ! पश्चाद्धेमरसायनम् ॥ ८ ॥

अथाभ्रकं स्वर्णयोगं कान्तहेमरसायनम् ।
घनकान्तस्वर्णयोगं ततो वज्ररसायनम् ॥ ९ ॥

अथागवज्रसेवा च कान्तवज्रागत परम् ।
घनायस्कान्तहीरं च हेमवर्म ततो भवेत् ॥ १० ॥

पश्चादभ्रसुवर्णवज्र कान्ताष्टापदवज्रकम् ।
घनकान्त हेमवज्रमत पारदभक्षणम् ॥ ११ ॥

तथाऽभ्ररसयोग स्याच्चत कान्तरसं भवेत् ।
घनकान्तरस देवि ! पश्चाद्धेमरस भवेत् ॥ १२ ॥

घनहेमरसं पश्चात्कान्तहेमरसं तत ।
घनकान्त हेमसूतमतो वज्ररसं भवेत् ॥ १३ ॥

घनवज्ररस देवि ! कान्तवज्ररसं तत ।
घनकान्तं वज्रसूतं हेमवज्ररसं तत ॥ १४ ॥

घनहेमपर्पीसूत कान्तहेमपर्पीरसम् ।
घनकान्तसुवर्णवज्ररसमभ्रसारं न हि ॥ १५ ॥

उत्तरोत्तरतस्सर्वे चैते सर्वगुणोत्तरा ।
रसायनानि पञ्च स्युरेकैकानि वरानने ! ॥ १६ ॥

रसा द्विव्यौषधभवास्त्रिव्यौषधभवा दश ।
चतुश्चतुर्भवा पञ्च स्वेक पञ्चौषधोद्भव ॥ १७ ॥

एकत्रिंशद्वरारोहे ! रसायनमिति प्रिये ! ।
घन कान्त हेम वज्र पारदश्चेतरेतरम् ॥ १८ ॥

पूर्वोत्तरोत्तरगुणा भवन्ति प्राणवल्लभे ! ।
रसस्य त्रामणं वज्र हेमकान्तघन भवेत् ॥ १९ ॥

चभ्रसत्रामणं हेम कान्तं व्योम भवेत्प्रिये ! ।
हेम कान्तभवं योज्यं कान्तस्य त्रामणं घनम् ॥ २० ॥

अभ्रस्य त्रामण चाभ्रसत्व सिद्धिप्रद यत ।
एकैकौषधसेवाया यथोक्तं त्रामण भवेत् ॥ २१ ॥

युक्तो द्विचिचतुःपञ्चभैषज्यैः कामणं न हि ।
त्रिफलामधुसर्पींषि सामान्यकामणं भवेत् ॥ २२ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ अष्टमोल्लासः ॥

॥ नवम उल्लासः ॥

रसायनार्हरससंस्कारः ॥

[प्रथमः प्रकारः]

श्रीभैरवी—

रसायनार्हं सूतस्य संस्कृतिं वद मे विभो ! ।

श्रीभैरवः—

शृणु पार्वति ! यत्नेन संस्कारं शोधनादिकम् ॥ १ ॥

पुनर्नवारसैः पेष्यं धान्याभ्रं पारदं समम् ।
तप्तखल्वे दिनं देवि ! वज्रमूषागतं रसम् ॥ २ ॥

पचेद्भूधरयन्त्रे च पुनस्संमर्दयेच्च तम् ।
पूर्ववद्वैर्यथापूर्वं मर्दनं पाचनं पुनः ॥ ३ ॥

कृत्वैवं दशवारं तं पारदं पातनयन्त्रके ।
शुद्धस्सात्पारदो देवि ! योज्यो योगे रसायने ॥ ४ ॥

[द्वितीयः प्रकारः]

दशमांशं रसाद्गन्धं तप्तखल्वे विनिक्षिपेत् ।
वराजम्बीरकल्काग्निद्रवैर्यामं विमर्दयेत् ॥ ५ ॥

पातयेत्पातनायन्त्रे कुर्यादेवं तु सप्तधा ।
सगन्धकं मर्दनं च पातनं भवति प्रिये ! ॥ ६ ॥
शुद्धस्स्यात्पारदो देवि ! योग्यो योगे रसायने ।

[तृतीयः प्रकारः]

तिलतैलैर्माहिषिकैर्मूत्रैर्मद्याम्लकेन च ॥ ७ ॥
गोमांसैर्हिङ्गुलं पाच्यं लोहपात्रे क्रमाग्निना ।
सप्ताहं लोहदण्डेन चालयन्सद्रवं मुहुः ॥ ८ ॥
सार्द्रमायूरपित्तेन भावयेदातपे दिनम् ।
पाचयेत्पातनायन्त्रे दरदं खरवह्निना ॥ ९ ॥
शुद्धो भवेच्चतुर्थांशात्पारदस्स्याद्रसायने ।
रसभस्मक्रमः ॥

[प्रथमः प्रकारः]

ऊर्ध्वाधस्तात्खजीर्णस्य सूतस्य समगन्धकम् ॥ १० ॥
निक्षिपेत्पक्वमूषायां गर्ते द्वाभ्यां चतुर्गुणम् ।
काकमाचीद्रवं दत्वा निरुध्यैनां क्रमाग्निना ॥ ११ ॥
पचेद्गुण्ड(ल्कन्दु)कयन्त्रस्थां मूर्ध्नां यामचतुष्टयम् ।
भस्मसाज्जायते सूतो योजयेत्तु रसायने ॥ १२ ॥

[द्वितीयः प्रकारः]

खजीर्णसूतं स्नुक्क्षीरैस्समं गन्धं विमर्दयेत् ।
दिनं ततो गर्भयन्त्रे पुटे भसति पूर्ववत् ॥ १३ ॥

[तृतीयः प्रकारः]

खजीर्णसूतं तुल्यांशं लाक्षोर्णामधुटङ्कणम् ।
गुञ्जां भृङ्गरसैस्सर्वं दिनमेकं विमर्दयेत् ॥ १४ ॥

अन्धितं वज्रमूषायां धमेद्भस्मति पारदः ।

[चतुर्थः प्रकारः]

घनजीर्णं रसं गन्धं त्र्यहं तुल्यं विमर्दयेत् ॥ १५ ॥

अहिमार्या रसैर्वाऽथ ह्वजामार्या रसेन वा ।
रसेन कीटमारिण्याः श्वेतांकोलरसेन वा ॥ १६ ॥

दिवारात्रं करीषाग्नौ मृण्मये संपुटे दहेत् ।
तुषाग्निना वा त्रिदिनाद्भस्मीभवति पारद. ॥ १७ ॥

[पञ्चमः प्रकारः]

तप्तखल्वे वज्रभस्म जीर्णे सूते समं त्र्यहम् ।
हंसपादीरसैर्मर्द्यं धीजैर्दिव्यौषधोद्भवैः ॥ १८ ॥

लेपयेद्वज्रमूषाया तत्र पूर्वं रसं क्षिपेत् ।
त्र्यहं तुषाग्निना पाच्य हंसपादीद्रवै· पुन ॥ १९ ॥

मर्दयेत्त्रिदिनं गाढं तद्गोलं पूर्ववत्पचेत् ।
भस्मीभवति सूतेन्द्र शङ्खकुन्देन्दुसन्निभः ॥ २० ॥

जारितरसमारणम् ॥

[प्रथमः प्रकारः]

अथ वक्ष्यामि देवेशि ! जारितं रसमारणम् ।
प्रथमं जारणं कुर्यात्सबीजं सुरनायिके ! ॥ २१ ॥

अजारितं रसं मूढः प्रमादान्मारयेद्यदि ।
मम द्रोही स पापिष्ठो महापातकवान् भवेत् ॥ २२ ॥

भ्रूणहा गुरुघाती च गोघ्नस्त्रीबालघातक· ।
तस्मात्सर्वप्रयत्नेन कुर्याज्जारणपूर्वकम् ॥ २३ ॥

मारणं रसराजस्य मम बीजस्य पार्वति ! ।
धरायां गोमयं देवि ! स्थापयित्वा ततोपरि ॥

पक्वमूषां विनिक्षिप्य तन्मध्ये कटुतुम्बिजम् ।
तैलं निधाय सूतं च निक्षिपेच्च ततोपरि ॥ २५ ॥

काकमाचीरसो देयस्तैलतुल्यो वरानने ! ।
शुद्धं गन्धं वीहिमात्रं दत्वा मूषां निरोधयेत् ॥ २६ ॥

तदूर्ध्वं खादिराङ्गारपूरितं श्रावकं न्यसेत् ।
ज्वालयेत्तत्साङ्गशीतस्थं पुनर्गन्धं च तैलकम् ॥ २७ ॥

काकमाचीद्रवं दत्वा वह्निमेवं पुन पुन ।
अधस्ताद्गोमय सान्द्रमुपरिष्टाच्च पावकम् ॥ २८ ॥

काकमाचीद्रवस्सूतस्तैलं चैतत्त्रयं समम् ।
जारयेत्षड्गुण गन्ध रसस्येत्थं मुखीकृति ॥ २९ ॥

दिनं जम्बीरनीरेण मर्दयेत्तं रसं पुन ।
चतुष्पट्यशकं हेम्न पत्रं कण्टकभेदनम् ॥ ३० ॥

मयूरपित्तं तैलं च लिपेत्सर्षपसंभवम् ।
अभावे तैलपित्तस्य चूलिकालवणं बलिम् ॥ ३१ ॥

जम्बीरस्य रसैर्मर्द्यं तं रसं हेमपत्रकम् ।
पाचयेत्पूर्ववद्वह्नौ जम्बीरस्य रसै पुन ॥ ३२ ॥

संपूर्णां रोधयेन्मूषां पूर्ववज्जारयेत्पुन ।
द्वात्रिंशदंशक हेम षोडशांशं ततोपरि ॥ ३३ ॥

मर्दयेज्जारयेदेव ततस्सूतस्य मारणम् ।
समूलां कुम्भिमादाय गवां मूत्रेण पेषयेत् ॥ ३४ ॥

त्रिनमेकं तद्रसेन मर्दयेत्पारदं सुधी ।
सपुटे कान्तजे क्षिप्त्वा चोर्ध्वाधश्च नियामकान् ॥

चुल्ल्यां मृद्वग्निना पाच्यं दिनं भस्म भवेद्रसः ।
अक्षीणो मृत्युनाशी स्याज्जरादारिद्र्यनाशनः ॥ ३६ ॥

[द्वितीयः प्रकारः]

वासितं पारदं कर्षमष्टगुञ्जास्सुवर्णकम् ।
मृतं वज्रं चतुर्गुञ्जं मर्द्यं हंसपदीरसैः ॥ ३७ ॥
तत्खल्वे वज्रमूषागतं कृत्वा निरोधयेत् ।
पचेद्भूधरयन्त्रे च पुनरादाय तं रसम् ॥ ३८ ॥
हंसपादीद्रवैर्मर्द्यं तत्खल्वे दिनत्रयम् ।
पूर्ववद्भूधरे यन्त्रे पचेत्सूतं पुनः पुनः ॥ ३९ ॥
एवं शतपुटं कृत्वा भस्म स्याद्रक्तवर्णकम् ।
एतानि रसभस्मानि शस्तानि च रसायने ॥

रसायनयोगाः ॥

[अभ्रकरसायनम्]

एकद्वित्रिचतुष्पथ्ययोगयुक्तं रसायनम् ।
क्रमाद्वक्ष्यामि देवेशि ! तत्राप्यभ्रकसेवनम् ॥ ४१ ॥
वमनादिविशुद्धात्मा त्यक्तक्षाराम्लकादिकः ।
पूर्ववद्भस्मयेद्व्योमसत्वं भृङ्गवरारसैः ॥ ४२ ॥
त्रिस्सप्तधा भावनीय मार्तगुञ्जाद्वयं भजेत् ।
ससितं तदनु क्षौद्रं घृतैस्सत्रिफलं लिहेत् ॥ ४३ ॥
द्वात्रिंशद्गुञ्जका वृद्धिः क्रमणं कर्षमात्रकम् ।
एवं षोडशमासान्ते सर्वरोगाद्विमुच्यते ॥ ४४ ॥
स भवेत्कान्तसंघर्षस्त्वेवमभ्रकसेवया ।

[कान्तरसायनम्]

पूर्ववद्भस्मयेत्कान्तं वरानिर्गुण्डिभृङ्गजैः ॥ ४५ ॥

रसैस्त्रिसप्तवाराणि मर्दयेद्भावयेत्क्रमात् ।
क्षौद्राज्याभ्यां लिहेत्प्रातर्नित्यं गुञ्जाद्वयोन्मितम् ॥४६॥

अनु भक्ष्यं सिन्दुवारवराभृङ्गभवं रज. ।
मध्वाज्याभ्यां कर्षमात्रं शुद्धाङ्गो वमनादिभिः ॥ ४७ ॥

द्वात्रिंशद्गुञ्जिका वृद्धिः परमावधिरीश्वरि ! ।
भवेत्षोडशमासान्ताज्जराव्याधिभिरुज्झितः ॥ ४८ ॥

कान्तस्य सेवया पश्चाद्भवेत्कान्ताभ्रकार्हकः ।

[कान्ताभ्ररसायनम्]

मृतं कान्तं घनं तुल्यं धात्रीभृङ्गपुनर्नवा. ॥ ४९ ॥

द्रवैरेषां पृथङ्मर्द्यं कल्ये गुञ्जाद्वयं लिहेत् ।
शर्करामधुसर्पिर्भिश्शुद्धात्मा वमनादिभि. ॥ ५० ॥

भृङ्गामलकवर्षाभूचूर्णं क्रामणमुत्तमम् ।
मध्वाज्यैरनु लेह्यं तद्द्वात्रिंशद्गुञ्जकावधि ॥ ५१ ॥

मासषोडशयोगेन वलीपलितजिद्बली ।
कान्ताभ्रसत्त्वभजनाद्धेमसेवार्हको भवेत् ॥ ५२ ॥

[स्वर्णरसायनम्]

पूर्ववद्वस्मयेत्स्वर्णं दशमूलकषायतः ।
एकविंशतिवारं तं मर्दयेद्भावयेत्प्रिये ! ॥ ५३ ॥

मध्वाज्याभ्यां मुद्गमानं लिहेत्प्रातर्विशुद्धधीः ।
गुडूचीत्रिफलाक्वाथं पलं चानुपिबेत्सुधीः ॥ ५४ ॥

अष्टगुञ्जावधिर्वृद्धिर्भवेत्षोडशमासतः ।
तेजस्वी बलवान्धीमांश्चक्षुष्मान्रोगवर्जित. ॥ ५५ ॥

वलीपलितनिर्मुक्तस्त्रिकालमिपजिद्भवेत् ।

[स्वर्णाभ्रकरसायनम्]

पूर्ववन्मारयेत्स्वर्णं तस्माद्द्विगुणमभ्रकम् ॥ ५६ ॥
दशमूलवराभृङ्गीवचाधैर्माक्षिकं त्रिससंधा ।
प्रातर्मापत्रयं लेह्यं मध्वाज्य क्षामणं लिहेत् ॥ ५७ ॥
पलं गुडूचीत्रिफलाक्वाथं तदनु पार्वति ।
चतुर्विंशतिगुञ्जाऽस्य वृद्धिस्स्यात्परमावधि ॥ ५८ ॥
मासषोडशयोगेन दिव्यतेजा महाबल ।
घनकाञ्चनयोगेन स्वर्णकान्तार्हको भवेत् ॥ ५९ ॥

[स्वर्णकान्तरसायनम्]

पूर्ववन्मारयेत्स्वर्णं कान्तं स्वर्णद्विभागकम् ।
धात्रीफले द्विसप्तैव भावयेन्मर्दयेत्क्रमात् ॥ ६० ॥
सशर्करं भजेत्प्रातस्त्रिमाप च पिबेदनु ।
धात्रीसत्व घृत क्षौद्र कर्षमात्र सुरेश्वरि ! ६१ ॥
चतुर्विंशतिका गुञ्जा वृद्धिस्स्यात्परमावधि ।
मासषोडशयोगेन वलीपलितवर्जित ॥ ६२ ॥
तप्तकाञ्चनसच्छाय पश्यमाण इवापर ।
हेमकान्तास्वादनेन कान्ताभ्रकनकार्हक ॥ ६३ ॥

[स्वर्णाभ्रकान्तरसायनम्]

पूर्ववन्मारयेत्स्वर्णं कान्तसत्वाभ्रसत्वकम् ।
समानि त्रीणि चैतानि भावयेच्च त्रिससकम् ॥ ६४ ॥
मुण्डिनिर्गुण्डिकाभृङ्गवरानीरेण पार्वति ! ।
मापत्रयोन्मित प्रातर्लिहेत्क्षौद्रघृताप्लुतम् ॥ ६५ ॥

मुण्डीचूर्णं कर्षमात्रं मध्वाज्याभ्या लिहेदनु ।
गोक्षीर पलमात्र च पिबेत्तदनु पार्वति ! ॥ ६६ ॥

चल्लद्वादशसंख्याता परा वृद्धिर्भवेत्प्रिये ! ।
मासषोडशयोगेन दिव्यकायो भवेन्नर ॥ ६७ ॥

हेमाभ्रकान्तभजनाद्योग्यस्त्याद्वज्रभक्षणे ।

[वज्ररसायनम्]

पूर्ववद्रसमेयेद्वज्रं धात्रीनीरेण मर्दयेत् ॥ ६८ ॥

भावयेत्सप्तधा धीमान्वीहिमात्र लिहेत्प्रिये ! ।
घृतक्षौद्रयुत चानुपिबेद्धात्रीरस परम् ॥ ६९ ॥

चल्लावधिर्भवेद्वृद्धिर्मासषोडशयोगत ।
चिरजीवी वज्रकायो दिव्यदृष्टिर्महाबल ॥ ७० ॥
वज्रस्य सेवया योग्यो भवेद्वज्राभ्रभक्षणे ।

[वज्राभ्ररसायनम्]

पूर्ववन्मारयेद्व्योम वज्र वज्राच्चतुर्गुणम् ॥ ७१ ॥

घन धान्याम्लशतावर्या रसैर्भाव्य त्रिसप्तधा ।
यवमात्र लिहेत्प्रातर्मध्वाज्याभ्या लिहेदनु ॥ ७२ ॥

धात्रीशतावरीनीर क्रामण पलमात्रकम् ।
चतुर्गुञ्जा परा वृद्धिर्भवेत्षोडशमासत ॥ ७३ ॥

चाक्षिसद्धिर्दिव्यदृष्टिस्त्याद्देवतासदृशप्रभ ।
सेवया घनवज्रस्य कान्तवज्रार्हको भवेत् ॥ ७४ ॥

[कान्तवज्ररसायनम्]

पूर्ववद्रसमेयेद्वज्र कान्त वज्राच्चतुर्गुणम् ।
कान्त त्रिसप्तधा भाव्यमश्वगन्धावरारसै ॥ ७५ ॥

वलीपलितनिर्मुक्तस्त्रिकालत्रिपजिद्भवेत् ।

[स्वर्णाभ्रकरसायनम्]

पूर्ववन्मारयेत्स्वर्णं तस्माद्द्विगुणमभ्रकम् ॥ ५६ ॥
दशामूलवराभृङ्गीक्वाथैर्भाव्यं त्रिसप्तधा ।
मातर्मापत्रयं लेह्यं मध्वाज्यैः क्रामणं लिहेत् ॥ ५७ ॥
पलं गुडूचीत्रिफलाक्वाथं तदनु पार्वति !
चतुर्विंशतिगुञ्जाऽस्य वृद्धिस्स्यात्परमावधिः ॥ ५८ ॥
मासषोडशयोगेन दिव्यतेजा महाबल. ।
घनकाञ्चनयोगेन स्वर्णकान्तार्हको भवेत् ॥ ५९ ॥

[स्वर्णकान्तरसायनम्]

पूर्ववन्मारयेत्स्वर्णं कान्तं स्वर्णद्विभागकम् ।
धात्रीफलैर्द्विसप्तैव भावयेन्मर्दयेत्क्रमात् ॥ ६० ॥
सशर्करं भजेत्प्रातस्त्रिमाषं च पिबेदनु ।
धात्रीसत्वं घृतं क्षौद्रं कर्षमात्रं सुरेश्वरि ! ६१ ॥
चतुर्विंशतिका गुञ्जा वृद्धिस्स्यात्परमावधि. ।
मासषोडशयोगेन वलीपलितवर्जित. ॥ ६२ ॥
तप्तकाञ्चनसच्छाय· पश्चबाण इवापरः ।
हेमकान्तास्वादनेन कान्ताभ्रकनकार्हक· ॥ ६३ ॥

[स्वर्णाभ्रकान्तरसायनम्]

पूर्ववन्मारयेत्स्वर्णं कान्तसत्वाभ्रसत्वकम् ।
समानि त्रीणि चैतानि भावयेच्च त्रिसप्तकम् ॥ ६४ ॥
मुण्डिनिर्गुण्डिकाभृङ्गवरानीरेण पार्वति ! ।
मापत्रयोन्मितं प्रातर्लिहेत्क्षौद्रघृताप्लुतम् ॥ ६५ ॥

मुण्डीचूर्णं कर्षमात्रं मध्वाज्याभ्यां लिहेदनु ।
गोक्षीरं पलमात्रं च पिबेत्तदनु पार्वति ! ॥ ६६ ।
चतुर्द्वादशसंख्याता परा वृद्धिर्भवेत्प्रिये ! ।
मासषोडशयोगेन दिव्यकायो भवेन्नरः ॥ ६७ ॥
हेमाभ्रकान्तभजनाद्योग्यस्त्याद्वज्रभक्षणे ।

[वज्ररसायनम्]

पूर्ववद्रसमेयेद्वज्रं धात्रीनीरेण मर्दयेत् ॥ ६८ ॥
भावयेत्सप्तधा धीमान्मौहिमात्रं लिहेत्प्रिये ! ।
घृतक्षौद्रयुतं चानुपिबेद्धात्रीरसं पलम् ॥ ६९ ॥
चतुरब्धिर्भवेद्वृद्धिर्मासषोडशयोगत. ।
चिरजीवी वज्रकायो दिव्यदृष्टिर्महाबल ॥ ७० ॥
वज्रस्य सेवया योग्यो भवेद्वज्राभ्रभक्षणे ।

[वज्राभ्ररसायनम्]

पूर्ववन्मारयेद्व्योम वज्रं वज्राच्चतुर्गुणम् ॥ ७१ ॥
घनं धान्याशतावर्या रसैर्भाव्यं त्रिसप्तधा ।
यवमात्रं लिहेत्प्रातर्मध्वाज्याभ्यां लिहेदनु ॥ ७२ ।
धात्रीशतावरीनीरं क्रामण पलमात्रकम् ।
चतुर्गुणा परा वृद्धिर्भवेत्षोडशमासत ॥ ७३ ॥
चाविसद्धिर्दिव्यदृष्टिस्त्यादेवतासदृशप्रभ ।
सेवया घनवज्रस्य कान्तवज्राहको भवेत् ॥ ७४ ॥

[कान्तवज्ररसायनम्]

पूर्ववद्रसमेयेद्वज्रं कान्तं वज्राच्चतुर्गुणम् ।
कान्तं त्रिसप्तधा भाव्यमश्वगन्धावरारसै ॥ ७५ ॥

यवमात्रं क्षौद्रघृतैर्युक्तं लेह्यं दिनोदये ।
अश्वगन्धावराचूर्णं कर्षं गोपयसा पिबेत् ॥ ७६ ॥

चतुर्गुञ्जावधिर्ज्ञेया वृद्धिस्स्यात्परमावधिः ।
मासषोडशयोगेन बालसूर्यसमद्युतिः ॥ ७७ ॥

महाबलो महातेजा वाक्सिद्धस्सिद्धतां व्रजेत् ।
सेवया वज्रकान्तस्य वज्रकान्ताभ्रकार्हकः ॥ ७८ ॥

[वज्राभ्रकरसायनम्]

पूर्ववन्मारयेद्वज्रं कान्ताभ्राणि च हीरकात् ।
चतुर्गुणे च कान्ताभ्रे वराभृङ्गकुरण्डजैः ॥ ७९ ॥

रसैस्त्रिसप्तधा भाव्यं यवमात्रं लिहेत्प्रिये ! ।
समध्वाज्यं भृङ्गवराकुरण्डकरजोयुतम् ॥ ८० ॥

पलं पिबेच्च गोक्षीरं चतुर्गुञ्जापरावधिः ।
मासषोडशयोगेन गृध्रदृष्टिर्महाबलः ॥ ८१ ॥

अव्याहतगतिर्धीरस्सिद्धसंघेन वर्तते ।
कान्ताभ्रवज्रभजनाद्योग्यस्स्याद्धेमवज्रयोः ॥ ८२ ॥

[स्वर्णवज्ररसायनम्]

पूर्ववन्मारयेद्वज्रं स्वर्णं वज्राद्द्विभागकम् ।
सुवर्णवज्रं वर्षाभूरसैर्भाव्यं त्रिसप्तधा ॥ ८३ ॥

व्रीहिमेयं लिहेत्क्षौद्रघृताभ्यां च पुनर्नवाम् ।
कर्षं पलं च गोक्षीरमनुपेयं सुरेश्वरि ! ॥ ८४ ॥

द्विगुञ्जावधि वृद्धिस्स्यान्मासषोडशयोगतः ।
चिरकालं भवेज्जीवी वलीपलितवर्जितः ॥ ८५ ॥

वज्रहेमोपयोगेन स्वर्णाभ्रकुलिशार्हकः ।

[स्वर्णाभ्रवज्ररसायनम्]

पूर्ववद्भस्मयेद्धेमघनवज्राणि पार्वति ! ॥ ८६ ॥
हीरकाद्द्विगुणं स्वर्णं स्वर्णादभ्रं द्विभागकम् ।
मुसलीकन्दसारेण भावनीयं त्रिसप्तधा ॥ ८७ ॥
यवमात्रं लिहेत्प्रातर्मध्वाज्याभ्यां पिबेदनु ।
कर्षं स्यान्मुसलीचूर्णं गोक्षीरं पलमात्रकम् ॥ ८८ ॥
चतुर्गुञ्जावधिर्वृद्धिर्मासषोडशयोगतः ।
मृत्युं जयेज्जराहीनो वज्रकायो महाबलः ॥ ८९ ॥
एतस्य सेवया वज्रहेमकान्तार्हको भवेत् ।

[स्वर्णवज्रकान्तरसायनम्]

वज्रकान्तसुवर्णानि पूर्ववन्मारितानि च ॥ ९० ॥
वज्रात्सुवर्णं द्विगुणं स्वर्णात्कान्तं द्विभागकम् ।
धात्रीभृङ्गरसैर्मर्द्यमेकविंशतिवारकम् ॥ ९१ ॥
यवमात्रं लिहेत्प्रातर्मध्वाज्याभ्यां पिबेदनु ।
धात्रीभृङ्गभवं चूर्णं कर्षं गोदुग्धकं पलम् ॥ ९२ ॥
गुञ्जाचतुष्टयी वृद्धिर्मासषोडशयोगतः ।
वलीपलितनिर्मुक्तो दिव्यतेजा महाबल ॥ ९३ ॥
एतस्य सेवया कान्तस्वर्णवज्राभ्रकार्हकः ।

[स्वर्णकान्तवज्राभ्रकरसायनम्]

भस्मयेत्स्वर्णकान्ताभ्रवज्राणि च यथोक्तवत् ॥ ९४ ॥
ज्योतिष्मतीरसैर्भाव्यमेकविंशतिवारकम् ।
यवमात्रं लिहेत्प्रातर्मध्वाज्याभ्यां पिबेदनु ॥ ९५ ॥

अश्वगन्धाकन्दचूर्णं कर्षं गोदुग्धकं पलम् ।
गुञ्जाचतुष्टयी वृद्धिः परमावधिरीश्वरि ! ॥ ९६ ॥

मासषोडशयोगेन साक्षादिन्द्रसमो भवेत् ।
एतस्य सेवया देवि ! रसं सेवितुमर्हति ॥ ९७ ॥

रसभस्म ॥

धान्याभ्रं पारदं मर्द्यं तत्खल्वे दिनत्रयम् ।
त्रिफलाऽऽरग्वधनिशाकुमारीकृष्णधूर्तजैः ॥ ९८ ॥

पुनर्नवाग्निजंबीरभवैर्नीरैर्विमर्दयेत् ।
पातयेत्पातनायन्त्रे स्वेदं मर्दनपातनम् ॥ ९९ ॥

कुर्यात्त्रिवारं शुद्धस्स्यात्पारदो दोषवर्जितः ।
नियामकैर्मर्दयेत्तं मूषालेपं नियामकैः ॥ १०० ॥

कृत्वा तं मर्दितं सूतं मूषायां निक्षिपेत्सुधीः ।
अन्धयित्वा भूधरारूये यन्त्रे पाच्यं सुरेश्वरि ! ॥१०१॥

एवं च सप्तधा कुर्यान्मर्दनं पुटपाचनम् ।
रसभस्म भवेच्छुभ्रं योज्यं योगे रसायने ॥ १०२ ॥

आरोटकरसाः ॥

अभ्रकजीर्णरसभस्म ॥

अथ चारोटकरसं देहसिद्ध्येककारणम् ।
मात्रमात्रं लिहेत्प्रातर्मध्वाज्यत्रिफलैस्सह ॥ १०३ ॥

धारोष्णं गोपयः पेयं पलमात्रमनु प्रिये !'।
अष्टगुञ्जावधिं वृद्धिं कृत्वा षोडशमासकम् ॥ १०४ ॥

वलीपलितनिर्मुक्तो जीवेदाचन्द्रतारकम् ।
एतस्य सेवया देवि ! ह्यभ्रसूतार्हको भवेत् ॥ १०५ ॥

मुखीकृते रसे देवि! चतुष्पष्टिकनिष्ककै ।
अभ्रसत्वं निष्कमात्रं क्षिप्त्वा जम्बीरजैर्द्रवैः ॥ १०६ ।
तत्सत्वे मर्दयेच्च दिनं कच्छपयन्त्रके ।
सबिडं च पचेत्पश्चात्तमादाय विमर्दयेत् ॥ १०७ ॥

अभ्रसत्वं द्विनिष्कं च जम्बीराम्लेन पार्वति ! ।
तत्सत्वे कच्छपाख्ये यन्त्रे पचनकर्म च ॥ १०८ ।
तृतीये च चतुर्निष्के चतुर्थे पञ्चमे क्रमात् ।
अष्टनिष्काभ्रसत्वं च दद्यात्पचनपातने ॥ १०९ ॥

घनपोडशनिष्कं च षष्ठे द्वात्रिंशदंशकम् ।
घनसत्वं सप्तमे स्यात्समभेव हि पार्वति ! ॥ ११० ॥

पारदेऽभ्रकसत्वस्य जारणा भवति प्रिये ! ।
एवं जारितसूतेन्द्रं भस्मीकुर्याच्च पूर्ववत् ॥ १११ ॥

पलं चैतत्सूतभस्म व्योमसत्वं चतुष्पलम् ।
भृङ्गराजद्रवैर्मर्द्यं मूषायामन्धयेद्दृढम् ॥ ११२ ॥

कुक्कुटाख्ये पुटे पच्यात्स्वाङ्गशीतं समाहरेत् ।
त्रिफलाभृङ्गजैर्नीरैर्भावयेत्तत्रिसप्तधा ॥ ११३ ॥

मध्वाज्याभ्यां गुञ्जमात्रं लिहेत्प्रातर्विशुद्धधीः ।
पिबेदनु वराक्वाथं पलं नियतमानसः ॥ ११४ ॥

गुञ्जाषोडशिका वृद्धिः सेव्यं षोडशमासतः ।
आचन्द्रतारकं जीवेद्वलीपलितवर्जितः ॥ ११५ ॥

एतस्य सेवया कान्तसूतसेवार्हको भवेत् ।

कान्तजीर्णरसभस्म ॥

मुखीकृते सूतराजे यथाऽभूदभ्रजारणा ॥ ११६ ॥

तथैव कान्तसत्वस्य जारणा भवति प्रिये ।
मारयेत्पूर्ववल्लूतं कान्तसत्वेन जारितम् ॥ ११७ ॥

एवंविधं सूतभस्म भागमेकं समेत्सुत ।
चतुर्भागं कान्तभस्म मर्दयेत्त्रिफलाम्बुना ॥ ११८ ॥

मूषायामन्वयेत्पश्चात्पचेत्कौपकुटिके पुटे ।
तमादाय वरानीरैर्मर्दयेच्च त्रिसप्तधा ॥ ११९ ॥

मध्वाज्याभ्यां लिहेद्गुञ्जामात्रं मातरतन्द्रितः ।
अनुपेयं च गोक्षीरं पथ्यान्नं सुरेश्वरि ! ॥ १२० ॥

गुञ्जापोडशिका वृद्धिर्मांसपोडशयोगतः ।
दिव्यदृष्टिं खेचरत्वं प्राप्नुयादैन्द्रकं पदम् ॥ १२१ ॥

एतस्य सेवया सूतघनकान्तार्हको भवेत् ॥
सुवीकृतरसे कुर्यात्पूर्ववन्व्योमजारणम् ॥ १२२ ॥

कान्ताभ्रकजीर्णरसभस्म ॥

समं सूतस्य देवेशि ! पश्चात्कार्यं विचक्षणैः ।
पूर्ववत्कान्तसत्वस्य जारणा सूतराट्समा ॥ १२३ ॥

कान्तसत्वाभ्रसत्वाभ्यां जारितं पारदो यदि ।
स रस. पक्षहीनस्याच्चाञ्चल्यरहितदिव्यं ॥ १२४ ॥

तं रसं पूर्ववद्दिव्यैरौषधैर्मारितं रसम् ।
पलं तद्द्विगुणं व्योमसत्वसत्वं च तत्समम् ॥ १२५ ॥

भस्म वैकान्तसत्वस्य मर्धमेव त्रयं त्रिधा ।
भृङ्गधात्रीफलरसे ततो लघुपुटे पचेत् ॥ १२६ ॥

भृङ्गधात्रीफलरसैश्छायायां भावयेद्रसम् ।
त्रिफलामधुसर्पिर्भिर्गुञ्जामात्रं लिहेदनु ॥ १२७ ॥

पिबेत्पलं च गोक्षीरं वृद्धिप्पोऽशगुञ्जिका।
मासषोडशयोगेन जीवेद्दाचन्द्रतारकम् ॥ १२८ ॥

एतस्य सेवया सूतस्वर्णसेवार्हको भवेत्।

स्वर्णजीर्णरसभस्म ॥

हेमजीर्णं सूतराजं भस्मीकुर्याच्च पूर्ववत्॥ १२९ ॥

एवंविधं सूतभस्म पलं स्वर्णपलद्वयम्।
भृङ्गधात्रीफलरसैर्दशधा भावयेत्त्रिधा॥ १३० ॥

रुध्वा तं संपुटे पच्यात्कुक्कुटाख्ये पुटे पचेत्।
पुनस्त्रिसप्तधा भृङ्गधात्रीनीरैश्च भावयेत्॥

मापमात्रं लिहेन्मात्रं मध्वाज्याभ्यां शुतं रसम्।
अनुपेयं च गोक्षीरं वृद्धिप्पोऽशमापकम् ॥ १३२ ॥

मासषोडशयोगेन देवतुल्यश्चिरायुषः।
सेवया स्वर्णसूतस्य घनहेमरसार्हकः ॥ १३३ ॥

स्वर्णाभ्रकजीर्णरसभस्म ॥

मृतीकृतरसे चाभ्रसत्वं जार्यं समं पुरा।
ततस्वर्णं समं जार्यं तं सूतं भस्मयेत्ततः॥ १३४ ॥

पूर्वोक्तवत्सूतभस्म पलं स्वर्णपलद्वयम्।
चतुष्पलं व्योमसत्वभस्म चैकत्र योजयेत् ॥ १३५ ॥

नीलीपत्ररसे मर्द्यं त्रिराकाथे दिनं प्रिये।
रुध्वा तं सपुटे पच्यादन्यैर्विंशतिगोमयैः॥ १३६ ॥

नीलीरसत्रिराकाथैर्भावयेत्तं त्रिसप्तधा।
गुञ्जोन्मेयं लिहेत्कल्ये मध्वाज्याभ्यां पिबेदनु ॥१३७॥

पलमात्रं वराक्वाथं वृद्धिन्योऽशगुञ्जिका ।
मासपोऽशयोगेन जीवेदाचन्द्रतारकम् ॥ १३८ ॥

एतस्य सेवया कान्तहेमसूतार्हको भवेत् ।

स्वर्णकान्तजीर्णरसभस्म ॥

समुखे पारदे कान्तसत्वं जार्यं यथोक्तवत् ॥ १३९ ॥

जारयेच्च तथा स्वर्णं द्वाभ्यां जीर्णं समं समम् ।
विधिना भसयेत्सूतं कान्तहाटकजारितम् ॥ १४० ॥

तं रसं पलमेकं च हेमभस्म पलद्वयम् ।
चतुष्पलं कान्तसत्वभस्म युञ्ज्याद्यथाविधि ॥ १४१ ॥

शतावरीवरानीरैर्दिनं संमर्द्य संपुटे ।
रुध्वा तं कुक्कुटपुटे पचेदादाय तं रसम् ॥ १४२ ॥

त्रिंसप्तधा शतावर्या रसैर्भाव्यं वरारसैः ।
गुञ्जामात्रं घृतक्षौद्रयुक्तं लेह्यं पिबेदनु ॥ १४३ ॥

शतावरीरसः पेयः पलमात्रं सुरेश्वरि ! ।
गुञ्जापोऽशिका वृद्धिर्मासपोऽशयोगतः ॥ १४४ ॥

वलीपलितनिर्मुक्तः प्रलयान्तं च जीवति ।
एतस्य सेवया स्वर्णकान्ताभ्ररसभुग्भवेत् ॥ १४५ ॥

स्वर्णकान्ताभ्रजीर्णरसभस्म ॥

घनकान्तसुवर्णानि चैकैकानि समानि वै ।
मुखीकृतस्य सूतस्य जारयेत्क्रमशः प्रिये ! ॥ १४६ ॥

घनादिजारितं सूतं मारयेत्पूर्ववत्सुधीः ।
तस्माद्वस्मीकृतात्सूताद्द्विगुणं हेमभस्म च ॥ १४७ ॥

हेमतुल्यं मृतं कान्तं कान्ततुल्यं मृतं घनम् ।
एतत्सर्वं घराक्वाथमुण्डीभृङ्गरसैर्दिनम् ॥ १४८ ॥

मर्दयेत्संपुटे रुध्वा पचेत्कौक्कुटिके पुटे ।
तदादाय वराभृङ्गमुण्डिनीरैश्च भावयेत् ॥ १४९ ॥

त्रिस्सप्तवारं छायायां शातर्गुञ्जोन्मितं लिहेत् ।
शर्करामधुसर्पिर्भिरनुपेयं च गोपयः ॥ १५० ॥

गुञ्जापोडशिका वृद्धिर्मांसपोडशयोगतः ।
वलीपलितनिर्मुक्तो जीवेदाचन्द्रतारकम् ॥ १५१ ॥

एतस्य सेवया सूतवज्रसेवार्हको भवेत् ।

वज्रजीर्णरसभस्म ॥

समुखे पारदे कुर्यात्पूर्ववद्वज्रजारणाम् ॥ १५२ ॥

वज्रजीर्णं रसं देवि ! भस्मीकुर्याच्च पूर्ववत् ।
भस्मीभूतरसाद्वज्रभस्म च द्विगुणं प्रिये ! ॥ १५३ ॥

कन्याभृङ्गवरानीरैर्दिनं मर्द्यं च संपुटे ।
कुक्कुटाख्ये पुटे पच्यात्तमादायाथ भावयेत् ॥ १५४ ॥

कन्याभृङ्गवरानीरैर्भावयेच त्रिसप्तधा ।
यवमात्रं लिहेत्प्रातर्मध्वाज्याभ्यां पिबेदनु ॥ १५५ ॥

गोक्षीरं पलमात्रं तु वृद्धिर्गुञ्जाचतुष्टयम् ।
मासषोडशयोगेन जीवेदाचन्द्रतारकम् ॥ १५६ ॥

एतस्य सेवया वज्रसूतव्योमार्हको भवेत् ।

वज्राभ्रकजीर्णरसभस्म ॥

घनजीर्णं वज्रजीर्णं भस्मीकुर्याद्रसं सुधी. ॥ १५७ ॥

भस्मीभूताद्रसाद्वज्रं द्विगुणं व्योमभस्म च ।
चतुर्गुणं च तत्सर्वमेकीकृत्य विमर्दयेत् ॥ १५८ ॥

वराक्वाथे भृङ्गरसैर्दिने संपुटके पचेत् ।
कृते लघुपुटे पश्चाद्भाव्यं भृङ्गचरासैः ॥ १५९ ॥

त्रिसप्तधा समघ्याज्यं मापमात्रं पिवेदनु ।
गव्यं क्षीरपलं पेयं वृद्धिर्गुञ्जाष्टकावधिः ॥ १६० ॥

एवं षोडशमासेन जीवेदाचन्द्रतारकम् ।
एतस्य सेवया कान्तवज्रसूतार्हको भवेत् ॥ १६१ ॥

कान्तवज्रजीर्णरसभस्म ॥

कान्तं वज्रं समं जार्यं समुखे पारदे प्रिये ! ।
कान्तहीरकजीर्णं तं पारदं मारयेत्सुधीः ॥ १६२ ॥

पूर्वोक्तविधिना कान्ते ! एतत्पारदभस्म च ।
पारदाद्द्विगुणं वज्रं घञ्जात्कान्तं चतुर्गुणम् ॥ १६३ ॥

पलाशपुष्पस्वरसैर्दिनं मर्दं न संपुटे ।
रुध्वा कुक्कुटके पश्चात्समादायाथ भावयेत् ॥ १६४ ॥

पलाशपुष्पनीरेण भावयेत्तं त्रिसप्तधा ।
समघ्याज्यं मापमात्रं लिहेदनु पिबेत्पयः ॥ १६५ ॥

अष्टगुञ्जावधिर्वृद्धिर्भवेत्षोडशमासतः ।
वलीपलितनिर्मुक्तो जीवेदाचन्द्रतारकम् ॥ १६६ ॥

एतस्य सेवया वज्ररसकान्ताभ्रकार्हकः ॥

कान्तवज्राभ्रकजीर्णरसभस्म ॥

समुखे पारदे व्योमकान्तवज्राणि च क्रमात् ॥१६७॥

समानि जारयेत्पश्चाज्जीर्णं तं मारयेद्रसम् ।
पूर्ववत्पारदाद्वज्रं समं चज्रचतुर्गुणम् ॥ १६८ ॥

कान्तं कान्तसमं व्योमसत्वं चैतानि मर्दयेत् ।
त्रिफलाभृङ्गजरसै रुध्वा संपुटके पचेत् ॥ १६९ ॥

लघुनाऽग्निपुटेनैव तमादायाथ भावयेत् ।
वराभृङ्गरसैरेकविंशतिं वारमातपे ॥ १७० ॥

माषमात्रं समध्वाज्यं लिहेत्प्रातर्विशुद्धधीः ।
अनुपेयं च गोक्षीरं वृद्धिर्गुञ्जाष्टकं भवेत् ॥ १७१ ॥

मासषोडशयोगेन जीवेदाचन्द्रतारकम् ।
एतस्य सेवया हेमवज्रसूतार्हको भवेत् ॥ १७२ ॥

स्वर्णवज्रजीर्णरसभस्म ॥

समुखे पारदे तुल्ये हेम वज्रं च जारयेत् ।
तं रसं भस्मयेद्देवि ! रसं वज्रं समं समम् ॥ १७३ ॥

तयोस्सम मृतं हेम वराक्वाथेन मर्दयेत् ।
तत्सर्वं संपुटे क्षिप्त्वा भूधराख्ये पुटे पचेत् ॥ १७४॥

तमादाय वराक्वाथैर्भावयेच्च त्रिसप्तधा ।
माषमात्रं लिहेत्प्रातस्तिलाज्यमधुसंयुतम् ॥ १७५ ॥

गोक्षीरमनुपेयं स्यादष्टगुञ्जावधि क्रमात् ।
मासषोडशपर्यन्तं जीयादाचन्द्रतारकम् ॥ १७६ ॥

एतस्य सेवया व्योमहेमवज्ररसार्हकः ।

स्वर्णवज्राभ्रकजीर्णरसभस्म ॥

समुखे पारदे व्योमहेमवज्राणि जारयेत् ॥ १७७ ॥

पारदस्य समांशानि ततस्सूतं विमारयेत् ।
रसतुल्यं मृतं वज्रं तयोस्तुल्यं च हाटकम् ॥ १७८ ॥

सर्वतुल्यं रसं व्योम तत्सर्वं ब्रह्मबीजकैः ।
तैलैस्त्र्यहं पेषयित्वा संपुटेद्भूधरे पुटे ॥ १७९ ॥

तं पलाशकषायेण भावनाश्चैकविंशति. ।
तं रसं मापमात्रं च तैलं ब्रह्मद्रुबीजकम् ॥ १८० ॥

कर्षमात्रं पिबेच्चानु यावद्गुञ्जाष्टकावधि ।
मासषोडशयोगेन सिद्धो भवति शाश्वतः ॥ १८१ ॥

एतस्य सेवया कान्तहेमवज्ररसार्हकः ।

स्वर्णकान्तवज्रजीर्णरसभस्म ॥

मुखीकृते सूतराजे कान्तं स्वर्णं समं समम् ॥ १८२ ॥

जारयेद्धसयेत्तं च तत्समं वज्रभस्म च ।
तयोस्तुल्यं मृतं हेम कान्तं सर्वसमं प्रिये ! ॥ १८३ ॥

वराभृङ्गरसे पिष्ट्वा भूधरे संपुटे पचेत् ।
ततो भृङ्गवरानीरैरेकविंशतिभावनाः ॥ १८४ ॥

वराक्षैर्द्वैर्लिहेत्प्रातर्मापमात्रं रसं सुधीः ।
गव्यं पय पलं पेयं वृद्धिष्षोडशमापिका ॥ १८५ ॥
मासषोडशयोगेन भवेत्सिद्धसमः प्रभु. ।
एतस्य सेवया व्योमकान्तहेमपवीरसम् ॥ १८६ ॥

सेवितुं जायतेऽहोऽसौ संयताला महेश्वरः ।

स्वर्णकान्तवज्राभ्रकजीर्णरसभस्म ॥

घनकान्तस्वर्णवज्रं जारयेत्समुखे रसे ॥ १८७ ॥

प्रत्येकं पारदसममेवं कार्यं सुरेश्वरि ! ।
ततस्त मारयेद्युक्त्या रसतुल्य मृतं पचिम् ॥ १८८ ॥

तयोस्तुल्यं मृतं हेम सर्वतुल्यं मृतं घनम् ।
घनतुल्यमयस्कान्तं सर्वतुल्यं सुरद्रुजै ॥ १८९ ॥

तैलैस्ततस्सपुटे च क्षिप्त्वा भूधरके पचेत् ।
गुञ्जामानं रस चैत लिहेत्प्रातश्शुचिस्सुधी ॥ १९० ॥

देवदारुजतैलेन कर्षमात्र तु पार्वति ! ।
धारोष्णं गोपय पेयं पलमात्रमनु प्रिये ! ॥ १९१ ॥

गुञ्जापोडशपर्यन्तं मासषोडशयोगत. ।
य इमं पारद दिव्य सेवते पथ्यभुक्सदा ॥ १९२ ॥

व्याधिजन्मजरामृत्युवर्जितस्सर्वसिद्धिभाक् ।
सर्वज्ञस्सर्वगस्सिद्धस्सृजतीव पितामह ॥ १९३ ॥

विष्णुवल्लायते विश्वं हरतीव हरस्स्वयम् ।
वाञ्छितार्थान्स्वय दत्ते कल्पद्रुम इवापर ॥ १९४ ॥

कन्दर्प इव कामाक्षीस्सहस्र रमयेत्क्षणात् ।
सच्चिदानन्दरूपोऽयं रससेवी भवेद्ध्रुवम् ॥ १९५ ॥

घनादिपञ्चयोगोत्थमेकत्रिंशद्रसायनम् ।
भवत्स्नेहेन कथितं रहस्यं देवदुर्लभम् ॥ १९६ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ नवमोल्लास ॥

॥ दशम उल्लासः ॥

घुटिकासिद्धिः ॥

प्रणम्य परया भक्त्या भैरवं भैरवी शिवम् ।
उवाच विनयेनेदं लोकानां हितकांक्षिणी ॥ १ ॥

श्रीभैरवी—

देवदेव कृपामूर्ते! सर्वानुग्राहक प्रभो! ।
त्वत्प्रसादान्मया ज्ञातं रहस्यमतिदुर्लभम् ॥ २ ॥
कान्ताभ्रहेमकुलिशरसभस्म रसायनम् ।
अत परं महादेव! श्रोतुमिच्छामि भैरव! ॥ ३ ॥
एतैर्घनाद्यै रचितघुटिकानां रसायनम् ।
श्रुत्वा सविनयं वाक्यं भैरव्यास्त्वादिभैरवः ॥ ४ ॥
स्थित्वेत्युवाच वचनं तद्वक्ष्यामि रसायनम् ।

श्रीभैरवः—

१. मृतसञ्जीवनी घुटिका ॥

शृणु पार्वति! यत्नेन सावधानेन साम्प्रतम् ॥ ५ ॥
प्रथमं जारणं कार्यं पश्चात्पारदबन्धनम् ।
तस्माज्जारणबीजानि घनादीनां वदामि ते ॥ ६ ॥

गन्धतालशिलालुत्थखर्परीहिङ्गुलामलाः ।
भूनागताप्यकासीसद्रुपावर्ताभ्रगौरिकम् ॥ ७ ॥

क्षान्तत्रिक्षारवैकान्तास्त्वेते चूर्णसमांशकाः ।
सिद्धचूर्णमिदं ख्यातं श्रेष्ठं स्याद्बीजकर्मणि ॥ ८ ॥

द्वन्द्वमेलोपलिप्ताया मूषाया निक्षिपेत्प्रिये ! ।
कृष्णसत्त्वाभ्रसत्त्व च द्रावयेत्समशुल्वकम् ॥ ९ ॥

समिलपञ्चक तस्मिन्सिद्धचूर्णं मुहुर्मुहु ।
घनाद्दशगुण क्षेप्य घमेद्दाढ वरानने ! ॥ १० ॥

घनसत्त्वावशिष्ट स्याद्भमनीय च तावता ।
कालेनेद व्योमसत्त्वबीज जार्यं रसायने ॥ ११ ॥

समुखे पारदे बीज चतुष्पष्टचशके क्षिपेत् ।
तत्खल्वेऽम्लवर्गेण मर्दयेद्दिवसत्रयम् ॥ १२ ॥

त सूत कच्छपे यन्त्रे सनिडे जारयेत्प्रिये ! ।
ततो द्वात्रिंशदश च षोडशाश रसस्य तु ॥ १३ ॥

अष्टमाश चतुर्थांश द्व्यश चैव समाशकम् ।
पारदे जारयेदेव क्रमाद्बीज सुरेश्वरि ! ॥ १४ ॥

सूतमेवविध व्योमसत्त्व बीजसम प्रिये ! ।
तत्खल्वेऽम्लवर्गेण मर्दयेदेकवासरम् ॥ १५ ॥

पिष्टिं पारदराज त जम्भीरान्तर्विनिक्षिपेत् ।
दोलायन्त्रेऽम्लयुक्ते त विपचेत्सप्तवासरम् ॥ १६ ॥

तमादाय बलिं क्षिप्त्वा सिद्धचूर्णेन पार्वति ! ।
ततस्त भूधरे यन्त्रे पचेल्लघुपुटेन च ॥ १७ ॥

यावत्कठिनता याति तावत्कार्यं मुहुर्मुहु ।
दोलापाक सिद्धचूर्णलेप भूधरके पुटम् ॥ १८ ॥

मृतसञ्जीवनी नाम्ना घुटिका सर्वसिद्धिदा ।
वक्त्रान्तरे गले मूर्ध्नि बाहौ कर्णेऽथवा वहेत् ॥ १९ ॥

हेम्ना सुवेष्टिता सम्यग्वलीपलितनाशिनी ।
वक्त्रस्था मृत्युहा वर्षाद्विपविग्रहनाशिनी ॥ २० ॥

शुद्धं गन्धं कर्षमात्रं गव्यं क्षीरं पलं पिबेत् ।
अनेन क्रमणैनैव सूतसंक्रमते तनुम् ॥ २१ ॥

२. दिव्या घुटिका ॥

कान्तम्लेच्छमुखं रूप्यं लिप्तमूपान्तरे समम् ।
द्रावयित्वा सिद्धचूर्णं कान्ताद्दशगुणं शनैः ॥ २२ ॥

वहेन्मुहुर्मुहुर्द्राव्यं यावत्कान्तोऽवशिष्यते ।
कान्तबीजमिदं प्रोक्तं श्रेष्ठं जार्यं रसायने ॥ २३ ॥

समुखे पारदे चेदं बीजं चार्यश्च पूर्ववत् ।
चतुष्पष्ट्यंशकं पूर्वं समांशं तं क्रमेण वै ॥ २४ ॥

एवंविधं सूतराजं कान्तबीजं द्वयं समम् ।
मर्दयेत्तत्खल्वे च साम्लवर्गे दिनत्रयम् ॥ २५ ॥

पिष्टीभूतं च जंबीरे क्षिप्त्वाऽम्लगणपूरिते ।
दोलायन्त्रे पचेत्सम्यगेवमासप्तवारकम् ॥ २६ ॥

समादाय लिहेद्वाह्ये सिद्धचूर्णेन भैरवि ! ।
ततो दिव्यौषधैर्लिप्ते संपुटे भूधरे पचेत् ॥ २७ ॥

यावत्कठिनतां याति तावत्कुर्यात्क्रमेण च ।
दोलापाकं सिद्धचूर्णलेपं भूधरपाचनम् ॥ २८ ॥

पुटे तौ जारयेद्दिव्यनाम्नाऽथ परमेश्वरि ! ।
वक्त्रान्तरे गले मूर्ध्नि बाहौ कर्णेऽथवा वहेत् ॥ २९ ॥

हेम्ना सुवेष्टितं धार्यं वलीपलितनाशनम् ।
पूर्ववत्फलदा पुण्या धार्या यत्नेन मानवैः ॥ ३० ॥

पूर्ववत्कामणं कार्यं देहे सद्धुमते रसः ।

३. कामेश्वरी घुटिका ॥

समुखे पारदे व्योमकान्तबीजं च मारयेत् ॥ ३१ ॥
प्रत्येकं पारदसमं पूर्ववच्च शनैश्शनैः ।
चतुष्पञ्चांशकं चादौ समांशं तं क्रमाद्रसे ॥ ३२ ॥
अस्य सूतस्य तुल्यांशं कान्तबीजाभ्रबीजकम् ।
तत्सर्वेऽम्लवर्गेण मर्दयेद्वासरत्रयम् ॥ ३३ ॥
पिष्टीकृतं च अंबरि क्षिप्त्वा दोलागतं पचेत् ।
पुनरादाय तां पिष्टिं सिद्धचूर्णेन लेपयेत् ॥ ३४ ॥
दिव्यौषधिगणैर्लिप्ते संपुटे भूधरे पचेत् ।
यदा कठिनतां याति द्विधा कुर्यात्क्रमेण तु ॥ ३५ ॥
दोलास्वेदं चूर्णलेपं कृत्वा भूधरपाचनम् ।
कामेश्वरीयं घुटिका वक्तस्था सर्वसिद्धिदा ॥ ३६ ॥
पूर्ववत्कामणं कार्यं रसेन्द्र कामते तनुम् ।

४. हेमसुन्दरी घुटिका ॥

स्वर्णं रूप्यं म्लेच्छमुखं कान्तसत्वाभ्रसत्वकम् ॥ ३७ ॥
द्वन्द्वमेलोपलिप्तायां मूषायां तद्विनिक्षिपेत् ।
तस्मिन्द्रुते सिद्धचूर्णं स्वर्णाद्दशगुणं क्षिपेत् ॥ ३८ ॥
यावत्स्वर्णावशेषं स्यात्तावद्द्राव्यं शनैश्शनैः ।
हेमबीजमिदं ख्यातं श्रेष्ठं रसरसायने ॥ ३९ ॥

समुखे पारदे देवि ! बीजं रससमं क्रमात् ।
जारयेत्पूर्ववद्देवि ! चतुष्पञ्चांशकादिकम् ॥ ४० ॥

एतद्रसं हेमबीजं सम खल्वे च तापिते ।
मर्दयेदम्लवर्गेण त्र्यहात्पिष्टिर्भवेद्रस ॥ ४१ ॥

पिष्टिं जंबीरजां कृत्वा दोलायन्त्रेऽम्लपूरिते ।
पचेद्देवि ! सिद्धचूर्णप्रलेपनम् ॥ ४२ ॥

तथा संपुटलेपं च तथा भूधरपाचनम् ।
यावत्कठिनतां याति तावत्कुर्याच्च पूर्ववत् ॥ ४३ ॥

इयं तु घुटिका दिव्या विख्याता हेमसुन्दरी ।
चक्रस्था सिद्धिदा नृणां जरामृत्युविषापहा ॥ ४४ ॥

पूर्ववत्कामणं कार्यं सूतस्संक्रमते पुनः ।

५. मदनसुन्दरी घुटिका ॥

सुखीकृते रसे व्योमबीजं हाटकबीजकम् ॥ ४५ ॥

समं समं क्रमाज्जार्यं चतुष्पष्टयंशकादिकम् ।
इत्येवं जारितं सूतं बीजं गगनलक्षयोः ॥ ४६ ॥

मर्दयेत्सारदसमं तत्सर्वेऽम्लवर्गतः ।
त्रिदिनाज्जायते पिष्टिः पुनर्जंबीरगां कुरु ॥ ४७ ॥

दोलायन्त्रेऽम्लभरिते पचेत्तां सप्तवासरम् ।
लेपनं सिद्धचूर्णस्य तथा संपुटलेपनम् ॥ ४८ ॥

तथा भूधरपाकश्च यावत्कठिनतां व्रजेत् ।
सिद्धिदा घुटिका ह्येषा नाम्ना मदनसुन्दरी ॥ ४९ ॥

आस्यान्तरस्थिता कुर्यात्सर्वसिद्धीश्चिरायुषः ।
व्यालव्याघ्रगजादीनां राज्ञां वश्यं स्त्रियामपि ॥ ५० ॥

पूर्ववत्कामणं कार्यं कायमाक्रामते रसः ।

६. खेचरी घुटिका ॥

सुखीकृते रसे कान्तहेमबीजं समं समम् ॥ ५१ ॥

रसोन्मिते पृथक्जार्यं चतुष्पष्टयंशकादिकम् ।
इत्थ जीर्णं रस वीज कान्तहेम्नो रसोन्मितम् ॥ ५२ ॥

पूर्ववत्पिष्टिका कृत्वा दोलायन्त्रे च पाचनम् ।
यावत्कठिनता याति तावत्कार्यं मुहुर्मुहु ॥ ५३ ॥

घुटिका जायते नाम्ना खेचरी सर्वसिद्धिदा ।
पूर्ववत्कामण कार्यं सुगन्ध गोपय पिबेत् ॥ ५४ ॥

तेन सक्रमते देहं घुटिकान्तर्गतो रस ।

७. वज्रेश्वरी घुटिका ॥

समुखे पारदे व्योमकान्तहेम्ना सम समम् ॥ ५५ ॥

बीजं पृथकपृथक्जार्यं चतुष्पष्टयंशकादिकम् ।
इत्थंभूतस्य सूतस्य सम व्योमादिबीजकम् ॥ ५६ ॥

त्रय तापितखल्वेन त्र्यहमम्लेन मर्दयेत् ।
स सूत पिष्टिमाप्नोति ता पिष्टिं पूर्ववत्प्रिये ! ॥ ५७ ॥

दोलापाक सिद्धचूर्णलेप भूधरपाचनम् ।
यावत्कठिनता याति तावत्कार्यमतन्द्रितै ॥ ५८ ॥

वज्रेश्वरीति घुटिका वक्त्रस्था सर्वसिद्धिदा ।
पूर्ववत्कामण कार्यं गात्रं व्याप्नोति पारद ॥ ५९ ॥

८. महावज्रेश्वरी घुटिका ॥

शुद्ध स्वर्णं वज्रभस्म लोहचूर्णाभ्रसत्वकम् ।
एतच्चतुस्सम नागं मूषाया चान्भ्रितं धमेत् ॥ ६० ॥

द्वन्द्वमेलोपलिप्तायां पुनरादाय तं प्रिये ! ।
एकीभूत च मूषाया प्रकटं च धमेत्पुन ॥ ६१ ॥

धौतसत्वं माक्षिकं च स्वल्पं स्वल्पं मुहुः क्षिपेत् ।
वज्रहेमावशेषं तु यावत्स्यात्तत उद्धरेत् ॥ ६२ ॥

एतस्मिन्व्योमसत्वायश्चूर्णनागांश्च पूर्ववत् ।
द्वन्द्वमेलोपलिप्तायामन्भयित्वा दृढं धमेत् ॥ ६३ ॥

एकीभूतं समादाय मूषायां प्रकटं धमेत् ।
हेमवज्जावशेषं स्याद्यावत्तत्पुनराहरेत् ॥ ६४ ॥

व्योमसत्वमयश्चूर्णं नागं वाह्यं पुनः पुनः ।
पूर्ववत्क्रमयोगेन माक्षिकं धौतसत्वकम् ॥ ६५ ॥

मुहुः क्षिप्त्वा धमेत्तं तु वाह्यमेवं तु षड्गुणम् ।
वज्रबीजमिदं श्रेष्ठं जार्यं रसरसायने ॥ ६६ ॥

समुखे पारदे जार्यं वज्रबीजं रसोन्मितम् ।
चतुष्पष्ट्यंशकार्धं च क्रमात्सङ्क्रामयेत्प्रिये ! ॥ ६७ ॥

इत्थं जारितसूतस्य समं कुलिशबीजकम् ।
तप्तखल्वेऽम्लवर्गेण मर्दयेद्दिवसत्रयम् ॥ ६८ ॥

स पिष्टिर्जायते सूतस्तां पिष्टीं च समाहरेत् ।
दोलापाकसिद्धचूर्णलेपस्सम्पुटमूधरम् ॥ ६९ ॥

कुर्वीत पूर्ववत्सर्वं यावत्कठिनतां व्रजेत् ।
महावज्रेश्वरी नाम्ना गुटिका सिद्धिदायिनी ॥ ७० ॥

वक्त्रस्था क्रामणं कार्यं पूर्ववत्क्रामते रसः ।

९. वज्रखेचरी गुटिका ॥

मुखीकृते रसे व्योमवज्रबीजं रसोन्मितम् ॥ ७१ ॥

पृथक् पृथग्जारणीयं चतुष्पष्ट्यंशकादिकम् ।
अमुष्य जीर्णसूतस्य समं वज्राभ्रबीजकम् ॥ ७२ ॥

तत्खल्वेऽम्लवर्गेण त्रिदिनं मर्दयेद्दृढम् ।
स रसो जायते पिष्टिस्तां पुनः पूर्ववत्प्रिये ! ॥ ७३ ॥

दोलास्वेदं सिद्धचूर्णलेपं मूधरपाचनम् ।
यावत्कठिनतां याति तावदेवं मुहुर्मुहुः ॥ ७४ ॥

घुटिका जायते दिव्या नाम्नेयं वज्रखेचरी ।
चक्रस्था सिद्धिदा नृणां पूर्ववत्कामणं प्रिये ! ॥ ७५ ॥

१०. कालविध्वंसिनी घुटिका ॥

मुखीकृते रसे कान्तवज्रबीजं रसोन्मितम् ।
पृथक्पृथक्जारणीयं चतुष्पष्टयंशकादिकम् ॥ ७६ ॥

अस्य जीर्णस्य सूतस्य समं कुलिशकान्तयोः ।
बीजं सन्तप्तखल्वेऽम्लवर्गे मर्द्यं दिनत्रयम् ॥ ७७ ॥

पिष्टिर्भवत्येष सूतः पिष्टिं तां पुनराहरेत् ।
दोलास्वेदस्सिद्धचूर्णलेपस्संपुटभूधरम् ॥ ७८ ॥

यावत्कठिनतां याति तावदेवं मुहुर्मुहुः ।
कालविध्वंसिनी नाम्ना घुटिका जायते शुभा ॥ ७९ ॥

मुखस्था सिद्धिदा दिव्या पूर्ववत्कामणं विचेत् ।

११. गगनेश्वरी घुटिका ॥

मुखीकृते सूतराजे वज्रकान्ताभ्रबीजकम् ॥ ८० ॥

पृथक्पृथक्सूतराजे चतुष्पष्ट्यंशकादिकम् ।
रसस्य तस्य सदृशं वज्रबीजाभ्रबीजकम् ॥ ८१ ॥

तत्खल्वेऽम्लवर्गेण त्र्यहात्पिष्टिस्सुमर्दनात् ।
दोलापाकस्सिद्धचूर्णलेपस्संपुटभूधरम् ॥ ८२ ॥

यावत्कठिनतां याति तावत्कुर्यान्मुहुर्मुहुः ।
गगनेश्वरीयं घुटिका वक्त्रस्था सर्वसिद्धिदा ॥ ८३ ॥

पूर्ववत्क्रामणं कार्यं देहे क्रामति सूतकः ।

१२. वज्रघण्टेश्वरी घुटिका ॥

मुखीकृते सूतराजे बीजं वज्रसुवर्णयोः ॥ ८४ ॥

पृथक्पृथक्समं जार्यं चतुष्पष्ट्यंशकादिकम् ।
अस्य सूतस्य सदृशं हेम्नो वज्रस्य बीजकम् ॥ ८५ ॥

तत्खल्वेऽम्लवर्गेण त्र्यहात्पिष्टिर्भवेद्रसः ।
ता पिष्टिं पुनरादाय पूर्ववत्परिकल्पयेत् ॥ ८६ ॥

दोलापाकं सिद्धचूर्णलेपं भूधरपाचनम् ।
यावत्कठिनतां याति तावत्कुर्यान्मुहुर्मुहुः ॥ ८७ ॥

वज्रघण्टेश्वरी ह्येषा घुटिका सिद्धिदायिनी ।
मुखस्था सिद्धिदा दिव्या पूर्वोक्तं क्रामणं पिबेत् ॥८८॥

१३. वज्रभैरवी घुटिका ॥

मुखीकृते सूतराजे हेमवज्राभ्रबीजकम् ।
पृथक्पृथक्समं जार्यं चतुष्पष्ट्यंशकादिकम् ॥ ८९ ॥

अस्य सूतस्य सदृशं हेमवज्राभ्रबीजकम् ।
मर्दयेदम्लवर्गेण तत्खल्वे दिनत्रयम् ॥ ९० ॥

पिष्टिर्भवेत्पुनस्तां च समादाय ततः प्रिये ! ।
दोलापाकं सिद्धचूर्णलेपं भूधरपाचनम् ॥ ९१ ॥

यावत्कठिनतामेति तावत्कार्यं मुहुर्मुहुः ।
घुटिका जायते दिव्या नाम्नेयं वज्रभैरवी ॥ ९२ ॥

मुखस्थिता सिद्धकरी क्रामणं पूर्ववत्प्रिये ! ।

१४. त्रिपुरभैरवी घुटिका ॥

मुखीकृते रसे कान्तवज्रहाटकबीजकम् ॥ ९३ ॥
जार्यं पृथक्सूतसमं चतुष्पष्टयंशकादिकम् ।
जीर्णसूतसमं कान्तवज्रकाञ्चनबीजकम् ॥ ९४ ॥
तत्सर्वेऽम्लवर्गेण मर्दयेद्दिवसत्रयम् ।
जायते पारदः पिष्टिः पूर्ववत्तां समाहरेत् ॥ ९५ ॥
दोलापाकं सिद्धचूर्णलेपं भूधरपाचनम् ।
यावत्कठिनतामेति तावत्कार्यं मुहुर्मुहुः ॥ ९६ ॥
घुटिका जायते दिव्यानाम्ना त्रिपुरभैरवी ।
मुखस्था सिद्धिदा ह्येषा पूर्ववत्क्रामणं प्रिये ! ॥९७॥

१५. महाभैरवी घुटिका ॥

मुखीकृते रसे कान्तवज्राभ्रस्वर्णबीजकम् ।
पृथक्सूतसमं जार्यं चतुष्पष्टयंशकादिकम् ॥ ९८ ॥
अस्य सूतस्य जीर्णस्य समं व्योमादिबीजकम् ।
मर्दयेदम्लवर्गेण तत्सर्वे दिनत्रयम् ॥ ९९ ॥
पिष्टिर्भवति सूतेन्द्रस्तां पिष्टिं पुनराहरेत् ।
दोलापाकं सिद्धचूर्णलेपं संपुटभूधरे ॥ १०० ॥
यावत्कठिनतामेति तावत्कार्यं मुहुर्मुहुः ।
नाम्ना महाभैरवीयं घुटिका सर्वसिद्धिदा ॥ १०१ ॥
धारयेन्मुखमध्ये तत्पूर्ववत्क्रामणं पिबेत् ।

क्रामणानि ॥

त्रिफला मुसली मुण्डी भृङ्गराजश्च बाकुची ॥ १०२ ॥

नीली कन्या काकमाची हयगन्धा शतावरी ।
उत्तरा वारुणी देवदाली चित्रा पुनर्नवा ॥ १०३ ॥

निर्गुण्डी सहदेवी च रुदन्ती गजकर्णिका ।
भूतावरातभल्लातकाकतुण्डामृतालताः ॥ १०४ ॥

पलाशः कुक्कुरुटश्च धात्रीफलरसः पयः ।
पलाशबीजकं तैलं घृतं मधु शिवाम्बु च ॥ १०५ ॥

बिल्वमज्जा च तैलं च तैलं ज्योतिष्मतीभवम् ।
एतानि क्रामणार्हाणि चौषधानि भवन्ति हि ॥१०६॥

एते चाष्टार्धगदिताः क्रामणार्थे प्रयोगतः ।
रसभस्मप्रयोगे च घुटिकानां रसायने ॥ १०७ ॥

पञ्चदशघुटिकाफलम् ॥

प्रिये ! पञ्चदशानां च घुटिकानां फलं शृणु ।
अभ्रबीजेन रचितघुटिका रससंयुता ॥ १०८ ॥

मुखस्थिता द्वादशाब्दं सर्वरोगविनाशनी ।
स जीवेद्वत्सरशतं पुमांश्च परमेश्वरि ! ॥ १०९ ॥

क्रान्तबीजेन रचिता घुटिका रससंयुता ।
आस्यस्था सर्वरोगघ्नी द्वादशाब्दं वरानने ! ॥ ११० ॥

धातुदार्ढ्यप्रजननी सहस्रायुष्यदायिनी ।
क्रान्ताभ्रबीजरचिता रसयुग्घुटिका शुभा ॥ १११ ॥

द्वादशाब्दं मुखान्तस्था जरामयविनाशिनी ।
अयुतायुष्यदा दिव्या महाबलविवर्धिनी ॥ ११२ ॥

हेमबीजयुता सूतघुटिका मुखमध्यगा ।
आद्वादशाब्दं देहस्य वलीपलितरोगहा ॥ ११३ ॥

लक्षायुष्यप्रदा पुण्या नागायुतबलप्रदा ।
हेमाभ्रबीजघटिता घुटिका युक्तपारदा ॥ ११४ ॥

चक्रस्थिताऽकसंख्याब्दं दशलक्षाब्दजीवदा ।
दिव्यबुद्धिप्रजननी दिव्यमत्वप्रदायिनी ॥ ११५ ॥

कान्ताकाञ्चनबीजाभ्यां ससूता घुटिका कृता ।
द्वादशाब्दं मुखान्तस्था कोट्यायुष्यविवर्धिनी ॥

महातेज प्रजननी बिलनिध्यादिदर्शिनी ।
कान्ताभ्रहेमघटिता घुटिका रससंयुता ॥ ११७ ॥

मुखस्था द्वादशाब्दान्ताद्दशकोट्यब्दजीवदा ।
खलाट्लादिसवर्तखेचरत्वप्रदायिनी ॥ ११८ ॥

निर्मुक्तवज्रबीजेन रसयुग्घुटिका शुभा ।
मुखस्था द्वादशाब्दान्तं सर्वलोकगतिप्रदा ॥ ११९ ॥

यावद्भूमि स्थिरतरा तावदायु प्रवर्धिनी ।
तरुणस्सर्वदा काम कान्ताना सुरतक्षम ॥ १२० ॥

वज्राभ्रबीजरचिता घुटिका रसगर्भिता ।
घुटिका रससख्याब्दं मुखस्था सर्वसिद्धिदा ॥ १२१ ॥

ब्रह्मायुष्यप्रदा पुंसां जगत्स्रष्टुं क्रमात्प्रभु ।
पूज्यते ब्रह्मवद्देवैर्वेदवेदाङ्गपारग ॥ १२२ ॥

सरस्वत्या च सावित्र्या सेव्यते सर्वलोकग ।
अष्टाभिस्सिद्धिभिर्युक्तो ह्यणिमादिभिरीश्वरि ! ॥ १२३ ॥

वज्रकाञ्चनबीजेन ससूता घुटिका कृता ।
मुखस्था द्वादशाब्दान्त विष्ण्वायुष्यप्रदा नृणाम् ॥

स च विष्णुत्वमाप्नोति विष्णुवत्पालितु क्षम ।
सेव्यते सनकाद्यैश्च श्रिया युक्तो महाबल ॥ १२५ ॥

स्वेच्छागतिर्महेन्द्राद्यैर्निर्जरैस्सेव्यते सदा ।
हेमाभ्रवज्रबीजेन रचिता घुटिका प्रिये ! ॥ १२६ ॥
सपारदा मुखान्तस्था द्वादशाब्दं वरानने ! ।
रुद्रायुष्यप्रदा नृणां रुद्रत्वं सा ददाति हि ॥ १२७ ॥
संहर्ता रुद्रवल्लोकं विष्ण्विन्द्राद्यैश्च सेव्यते ।
अणिमाद्यैश्च सहितस्सर्वज्ञस्सर्वलोकगः ॥ १२८ ॥
सेव्यते प्रमथश्रेष्ठैर्दिव्यशक्त्या समन्वितः ।
योगीन्द्रैर्ध्यायते धीरो महातेजा महाबलः ॥ १२९ ॥
कान्तकाञ्चनवज्राणां बीजैस्सूतयुता कृता ।
घुटिका भानुसंख्याब्दं मुखस्था सिद्धिदा नृणाम् ॥
ईश्वरायुष्यमाप्नोति खेचरत्वं च मानवः ।
तिरोधत्ते स्वयं लोकाञ्छक्रेन्द्राद्यभिवन्दितः ॥ १३१ ॥
कोटिसूर्यप्रतीकाशो महामारुतसत्त्ववान् ।
महाकल्पान्तकालेऽपि विनाशं न व्रजेद्ध्रुवम् ॥ १३२ ॥
योगक्रीडाऽनुपक्तात्मा ध्यायते योगवित्तमैः ।
कान्ताभ्रहेमवज्राणां कृता बीजै रसात्मिका ॥ १३३ ॥
घुटिका रविसंख्याब्दवक्त्रस्था यस्य भैरवि ! ।
सदाशिवायुस्स भवेत्सर्वानुग्राहकः प्रभुः ॥ १३४ ॥
सदाशिवत्वमाप्नोति देवानामधिपस्तथा ।
वह्नौ वह्निर्जले वारि मारुते मारुतात्मक. ॥ १३५ ॥
पृथिव्यां पृथिवीरूप. शून्ये शून्यात्मको भवेत् ।
तस्याक्षिणीन्दुपर्ज्यर्का ब्रह्मेन्द्राद्याश्च सेवकाः ॥१३६॥
गायका नारदाद्याश्च नर्तक्यश्चाप्सरोऽङ्गनाः ।
तदाज्ञयैव ब्रह्मेन्द्रास्सृष्टिस्थितिविनाशकाः ॥ १३७ ॥

सच्चिदानन्दकरशक्तस्सर्वगस्सर्वचिच्चित्व ।
पराशक्तियुत पुण्यो निर्मायो निष्कल परम् ॥१३८॥

एव गुणा प्रकथिता वुटिकाना मया प्रिये ! ।
शस्त्रस्तम्भकरश्चासा सर्वासामपि विद्यते ॥ १३९ ॥
रसायनस्य सर्वस्य सिद्धिदोऽय महेश्वरि ! ।

घुटिकासिद्धौ मन्त्रप्रयोग ॥

वक्ष्यते मन्त्रराजोऽय सर्वसिद्धिप्रदायक ॥ १४० ॥

ऐं ह्रीं श्रीं वर्लीं सौ अमृतेश्वरभैरव अमृत कुर कुर अमृतेश्वरभैरवाय । सौ वर्लीं श्रीं ह्रीं ऐं हु फट् स्वाहा । सौ वर्लीं श्रीं ह्रीं ऐं ।

पुमाननेन मन्त्रेण शीघ्र सिद्धिमवाप्नुयात् ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ दशमोल्लास ॥

॥ एकादश उल्लासः ॥

जीवत एव दिव्यदेहसिद्धिः ॥

भूतकालान्तकरस ॥

श्रीभैरवी—

देवदेव महादेव ! कथितानि त्वयाऽधुना ।
रसायनानि दिव्यानि सिद्धिदानि महेश्वर ! ॥ १ ॥

चिरकालेन देहाना कल्पाना सिद्धिदानि हि ।
सद्यस्सिद्धिर्यथा देव ! जायते परमेश्वर ! ॥ २ ॥

तद्ब्रूहि न्यूनाभ्यधिकहीनक्षीणाङ्गिनामपि ।
अथ गद्गदमूकाना खुञ्जानामथ कुष्ठिनाम् ॥ ३ ॥

अन्धपङ्गबलाना च जराजर्जरितात्मनाम् ।
सदा रोगार्तपिण्डाना क्लेशाना भ्रान्तचेतसाम् ॥ ४ ॥

भूतप्रेतपिशाचापस्मारोन्मत्तयुजामपि ।
प्रमादाज्जीवशेषाणा देहसिद्धिप्रद नृणाम् ॥ ५ ॥

श्रीभैरव —

श्रुत्वा तद्भैरवी वाक्य साधु पृष्टं त्वया प्रिये ! ।
तथाविधा प्रवक्ष्यामि देहसिद्धि वरानने ! ॥ ६ ॥

पञ्चभूतात्मिका पञ्च कर्तव्या घुटिका प्रिये ! ।
जीवात्मिका भवेत्षष्ठी घुटिका पिण्डकोष्टयुक् (१) ॥

ऋतुकाले तु या कन्या कुर्यात्सभोगमायतम् ।
तद्वराङ्गस्थित रक्त शुक्ल स्याद्योमसत्वकम् ॥ ८ ॥

तस्यास्सद्यः प्रसूतस्य विष्ठा पुलस्य मारुतम् ।
तत्वं स्यात्केवलं तस्या रजस्तेजात्मसत्वकम् ॥ ९ ॥

तदपत्यस्य रुधिरं जलतत्वं प्रकीर्तितम् ।
तत्सूतस्य वपुस्सर्वं पार्थिवं तत्वमुच्यते ॥ १० ॥

सूतसेवकशुक्लं च जीवतत्वं भवेत्प्रिये ! ।
कोटिवेधकरं सूतं कर्षं कर्षं नियोजयेत् ॥ ११ ॥

एकैकतत्वमध्ये तु प्रत्येकं तानि मर्दयेत् ।
तेषां च गोलकान्कृत्वा षड्सं स्थापयेत्पृथक् ॥ १२ ॥

नृमानमुन्नतं कायमायामं तु तदर्धकम् ।
कटाहं ताम्रघटितं पिण्डस्थौल्यं षडङ्गुलम् ॥ १३ ॥

चतुर्मुखमयं कोष्ठं तस्योपरि कटाहकम् ।
धारयेन्निश्चलं सम्यक्तदन्तः पूरयेत्प्रिये ! ॥ १४ ॥

गोघृत च महातैलं समभागमिदं द्वयम् ।
अर्चयेद्दशदिक्पालान्योगिनीश्च कुमारिकाम् ॥ १५ ॥

श्रीगुरुं सिद्धचक्रं च भैरवं भैरवीं तथा ।
गणाधिपं क्षेत्रपालं निजेष्टदैवतं तथा ॥ १६ ॥

नवग्रहाग्निविप्रांश्च दैवज्ञान् भिषगुत्तमान् ।
तथाऽन्तरायकर्तॄंश्च भूतप्रेतपिशाचकान् ॥ १७ ॥

यक्षराक्षसगन्धर्वान्मन्त्रज्ञान्स्वजनानपि ।
तर्पयेन्मद्यमांसैश्च वस्त्रभूषणकाञ्चनैः ॥ १८ ॥

ततस्त्रियकरैर्दिव्यैर्बलिं दिक्षु विनिक्षिपेत् ।
चतुर्भिर्वह्निनालेह्य घमयेत्खदिराग्निना ॥ १९ ॥

फेनहीनमधूमश्च सन्तप्तं च यदा भवेत् ।
श्रीगुरुं निजदेवं च चन्द्रसूर्याग्नितारकाः ॥ २० ॥

भुवनानि नमस्कृत्य कटाहे निक्षिपेत्तनुम् ।
ज्ञात्वा सम्यद्भुत देहं पार्थिवाख्य रसं क्षिपेत् ॥ २१ ॥

धमेद्दाढं प्रयत्नेन तत्कल्कं च यदा भवेत् ।
ततोऽम्लवाख्यरसकं निक्षिपेद्रक्तता नयेत् ॥ २२ ॥

तेजस्तत्वरस पश्चात्क्षिपेच्चन्मांसतां व्रजेत् ।
निक्षिपेद्वायुतत्वाख्यं रसं तत्र विनिक्षिपेत् ॥ २३ ॥

शुभ्रवर्णत्वमाप्नोति ततश्चाकाशतत्वकम् ।
निक्षिपेज्जीवतत्वाख्यं रसतत्त्वं च पार्वति ! ॥ २४ ॥

रम क्षिपेत्त्वन्धितस्य स्वर्णस्य तत्समं भवेत् ।
सजीवो जायते सिद्धो हुंकारत्रयमुच्चरेत् ॥ २५ ॥

यथोदितो भानुबिम्बो महाबुद्धिपराक्रमः ।
महावपुर्महातेजा नागायुतमहाबलः ॥ २६ ॥

मन्मथोपमरूपाढ्यो वाचा वागीश्वरीसमः ।
बुद्ध्या जीवसमश्रीमान्विष्णुवद्बन्दोपमः ॥ २७ ॥

त्यागे रोषे च कालाग्निर्गाम्भीर्येण महोदधिः ।
स्रष्टा हर्ता च गोप्ता च सर्वानुग्राहक प्रभुः ॥ २८ ॥

दिव्यदृष्टिर्वज्रदेह स साक्षाद्भैरवस्स्वयम् ।
अर्धयोजनविस्तीर्णहेमकिंकिणिमण्डितम् ॥ २९ ॥

चलच्चमरसंशोभं नानामाणिक्यमण्डितम् ।
हेममालापरिष्वक्तं घण्टानादमनोहरम् ॥ ३० ॥

दिव्यदीसमहानादिशङ्खकाहलसङ्कुलम् ।
वीणावेणुमृदङ्गाद्यैर्वादित्रैर्मुरजैस्समम् ॥ ३१ ॥

तालैर्बहुविधैश्चान्यैर्दिव्यघोषैस्समाकुलम् ।
गायत्किन्नरगन्धर्वैस्तथा किंपुरुषैर्युतम् ॥ ३२ ॥

लसन्माणिक्यकेयूरहारकङ्कणमुद्रका. ।
काचनू पुरसयुक्ता दिव्याभरणभूषिता ॥ ३३ ॥

दिव्यमालापरिष्कारा दिव्यगन्धानुलेपना ।
दिव्याम्बराश्चारुरूपा मत्तमन्मथविह्वला ॥ ३४ ॥

दिव्याङ्गनास्तदा चेन समाश्रित्य ब्रुवन्ति च ।
किं कर्म सिद्धसखेदास्त्वादेशो देव ! दीयताम् ॥

उपासते सिद्धकन्या परश्शतसहस्रकम् ।
यत्र यास्यति तत्रैव चानुयामो वय वृता ॥ ३६ ॥

दिव्यालयाश्च विविधान्हेममाणिक्यमण्डितान् ।
दिव्यानि खानपानानि स्वीकुर्वाणो मुहुर्मुहु ॥ ३७ ॥

वज्रचादिसर्वलोकेषु स्वेच्छया विहरत्यसौ ।
पूज्यते देवसिद्धौघै .यथाऽय.भैरवस्तथा ॥ ३८ ॥

भुञ्जानस्सर्वभोगाश्च क्षुत्पिपासाविवर्जित ।
योगिनीशतसाहस्र भोक्ता सञ्चिन्तयन्सुखम् ॥ ३९ ॥

महाकल्पान्तकालेऽपि प्रक्षीणेऽस्मिन्वरानने ! ।
लीयते परमे व्योम्नि लीयन्ते यत्र देवता ॥ ४० ॥

भूतकालान्तको नाम रसस्यास्य प्रभावत ।
अभेद्योऽयमखण्डश्च त्वदाह्यो भवति प्रिये ! ॥ ४१ ॥

रसायनस्य सर्वस्य सिद्धिदोऽय महेश्वरि ! ।
वक्ष्यते मन्त्रराजोऽय रससिद्धिप्रदायक ॥ ४२ ॥

ऐं ह्रीं श्रीं क्लीं सौ श्रीभैरव ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ एकादशोल्लास ॥

॥ द्वादश उल्लासः ॥

श्रीशैले सिद्धिलाभः ॥

श्रीभैरवी—

श्रीशैले विविधा सिद्धिस्सद्यः प्रत्ययकारिणी ।
सुलभा श्रूयते देव ! तां ब्रूहि विविधां प्रभो ! ॥ १ ॥

श्रीभैरवः—

वक्ष्यामि शृणु तत्सर्वं सद्यस्सिद्धिकरं प्रिये ! ।
कैलासान्मन्दरान्मेरोर्विन्ध्याद्रेश्च हिमालयात् ॥ २ ॥

महेन्द्रान्मलयाद्रेश्च सह्याद्दर्यगिरेरपि ।
श्रेष्ठश्रीपर्वतो दिव्यो सिद्धियोगीन्द्रसेवितः ॥ ३ ॥

तत्र तीर्थानि सर्वाणि सरांसि सरितः प्रिये ! ।
सिद्धिप्रदानि लिङ्गानि लतापाषाणपादपाः ॥ ४ ॥

मृत्तिकाकन्दतोयानि पत्रपुष्पफलानि च ।
एवमादीनि विद्यन्ते सर्वसिद्धिकराणि च ॥ ५ ॥

श्रीपर्वतोऽहमीशानि ! त्वहं साक्षात्स पर्वतः ।
स्थावरं मामकं रूपं विद्धि तं सुरसेवितम् ॥ ६ ॥

अस्मिन्यदस्ति नान्यत्र यदन्यत्र स्थितं च तत् ।
दिव्यलिङ्गस्पर्शनीयं ज्योतिर्लिङ्गमनामयम् ॥ ७ ॥

श्रीमल्लिकार्जुनमिति ख्यातं परमेश्वरि ! ।
वामपार्श्वेऽस्य लिङ्गस्य घण्टासिद्धेश्वरस्थितः ॥ ८ ॥

घण्टा विलम्बते द्वारे तीर्थकुण्डं च विद्यते ।
उपोषितैस्त्रिभिः कार्यं जागरूकैरतन्द्रितैः ॥ ९ ॥

निशि कृष्णचतुर्दश्यामजस्रं स्थापयेच्छिवम् ।
एकस्मानयेत्तोय कुण्डस्थमपर, प्रिये ! ॥ १० ॥
घण्टा निनादयेदन्यश्चलुर्यामावधि प्रिये ! ।
घण्टासिद्धेश्वरस्तुष्टो दद्यात्तेभ्योऽपि खे गतिम् ॥ ११ ॥
घण्टासिद्धेश्वरस्यास्य दक्षिणे निम्ननेत्प्रिये ! ।
जानुदघ्न तु तत्रैव दृश्यते रोचनप्रभा ॥ १२ ॥
मृत्तिका ता समाहृत्य कर्षमात्रं पिबेत्प्रिये ! ।
क्षीरयुक्ता च सप्ताहं स साक्षादमरो भवेत् ॥ १३ ॥
श्रीगिरीशस्य पुरतो गजाकारा महाशिला ।
भवत्येव दिवारात्र दिव्यगन्ध सुगुग्गुलुम् ॥ १४ ॥
त गृहीयात्पलाशस्य दर्व्याऽऽढ्यकपालके ।
प्रक्षिपेद्दन्यकयुत भक्षयेत्कर्षमानकम् ॥ १५ ॥
प्रत्यह मासपर्यन्तं ततस्सिद्धिमवाप्नुयात् ।
सदानन्दो युवा धीरो जीवेदाचन्द्रतारकम् ॥ १६ ॥
विद्युते म्लेच्छवदने गुग्गुलु तं विनिक्षिपेत् ।
कोटिमंशं ततस्ताम्र दिव्यं भवति काञ्चनम् ॥ १७ ॥
मल्लिकार्जुनदेवस्य चन्द्रवाप्यास्ति पश्चिमे ।
वैशाखपूर्णिमाया तु साधयेत्साधकोत्तम ॥ १८ ॥
निर्भयो निर्विकल्पश्च वसंस्तोयसमीपत ।
जपेन्मृत्युञ्जयं मन्त्र रात्रौ वासोविवर्जित ॥ १९ ॥
निशीथे चन्द्रसलिलं चन्द्रस्पृष्टं भवेद्यदा ।
तत्तीर्थच्छिद्रदेशे च स्वाञ्जलिं प्रक्षिपेदत ॥ २० ॥
स्पृष्ट्वा चन्द्रो यदा गच्छेत्तदा तत्तोयमाहरेत् ।
पिबेच्च सहसा धीरो जीवेदाचन्द्रतारकम् ॥ २१ ॥

वज्रकायस्सौम्यरूपश्शान्तात्मा स भवेन्नरः ।
पूर्वद्वारे श्रीगिरेस्तु विद्यते त्रिपुरान्तकः ॥ २२ ॥

देवस्य निकटे देशे चोत्तरे तिन्त्रिणीतरुः ।
दृश्यते तत्र मूले तु स्वयं श्रीभैरवः प्रभुः ॥ २३ ॥

नृमालां निखनेद्भूमिं तदग्रे दृश्यते तदा ।
तप्तकुण्डं नीलजलं दिव्यसिद्धिप्रदायकम् ॥ २४ ॥

तत्तिन्त्रिणीकपत्राणि वस्त्रे बद्ध्वा विनिक्षिपेत् ।
कुण्डे तस्मिंस्तदा तानि स्थूलमीना भवन्ति च ॥२५॥

गृहीत्वा तिन्त्रिणीकाष्ठैः पचेदेवं क्रमात्सुधीः ।
तेषां शिरःकण्टकानि पुच्छानि च विवर्जयेत् ॥ २६ ॥

भक्षयेच्छेषमखिलं साधकस्सिद्धिकांक्षया ।
क्षणमात्रं भवेन्मूर्च्छा तेन पश्चाद्विबुध्यते ॥ २७ ॥

वसुधायां बिलं पश्येज्जीवेद्दिव्यायुताब्दकम् ।
पश्चिमे त्रिपुरान्तस्य गव्यूतिद्वयमात्रके ॥ २८ ॥

मणिपल्लिरिति ग्रामस्तस्य पश्चिमभागतः ।
विद्यते कश्चन गिरिस्तत्पश्चादेकवाटकम् ॥ २९ ॥

दृश्यते प्रविशेत्तत्र पूर्वास्यश्च ततो व्रजेत् ।
दक्षिणाभिमुखः पश्चाद्दशचापान्तमात्रकम् ॥ ३० ॥

तत्र चाम्रफलाकारान्पाषाणाञ्ज्वलनप्रभान् ।
गृहीत्वा बन्धयेद्वस्त्रे तद्वस्त्रं रक्ततां व्रजेत् ॥ ३१ ॥

पाषाणयुक्तं तद्वस्त्रं क्षीरमध्ये विनिक्षिपेत् ।
ततः क्षीरं रक्तवर्णं खादेत्साधकोत्तमः ॥ ३२ ॥

सप्ताहाज्जायते सिद्धिर्वज्रकायो महाबलः ।
जीवेदाचन्द्रतारं च कल्पमविल्पकम् ॥ ३३ ॥

त्रिपुरान्तस्योदग्भागे कोकिलाभिरमुत्तमम् ।
जगत्प्रकाश तत्रास्ते कृत्वा देहविशोधनम् ॥ ३४ ॥

साधको वमनाद्यैश्च तद्बिल प्रविशेत्सुधी ।
दशचापावधिस्थान पाषाणा कोकिलोपमा ॥ ३५ ॥

सन्ति गृहीत्वा तत्पृष्ठे निला क्षिप्तास्फुटन्ति च ।
इत्येतत्प्रत्ययं दृष्ट्वा ताश्च गृह्य परस्परम् ॥ ३६ ॥

दुग्धान्त प्रक्षिपेत्ताश्च तत्क्षीरे कृष्णता व्रजेत् ।
तत्क्षीर मासमात्रं च पिबेद्दिव्यतनुर्भवेत् ॥ ३७ ॥

ब्रह्मणस्त्रिदिन जीवेद्वत्सरपलितवर्जित ।
वेगे समीरसदृशरिद्र पश्यति भूतले ॥ ३८ ॥

त्रिपुरान्तस्य पूर्वस्या दिशि योजनमात्रके ।
अस्ति स्वर्गपुरीनाथो देवस्तस्यामन खनेत् ॥ ३९ ॥

जानुमात्र च वसुधा तत्र सर्पफणोपमा ।
स्पर्शसज्ञास्तु पाषाणा निर्गच्छन्ति वरानने ! ॥ ४० ॥

त्रिपुरान्तकदेवस्य पश्चिमेऽर्धार्धयोजने ।
अस्ति दिव्यबिल्वद्वार तत्र चापत्रयान्तरम् ॥ ४१ ॥

भजेत्खर्जूरवृक्षोऽस्ति कृष्णवर्ण फलान्वित ।
तत्फलाना रस पीत्वा तेन मूर्च्छा भवेत्क्षणम् ॥ ४२ ॥

प्रबुद्धोऽसौ भवेत्सिद्धो जीवेदाचन्द्रभास्करम् ।
श्रीगिरेर्दक्षिणद्वारे वज्रेश्वरसुरेश्वरौ ॥ ४३ ॥

तिष्ठतो निखनेद्भूमिं तल श्रीफलसन्निभा ।
पाषाणास्पर्शभेदास्युस्समाख्यास्ते सुरेश्वरि ! ॥ ४४ ॥

तत्र रामेश्वराख्योऽस्ति निखनेत्तस्य सन्निधौ ।
रुद्राक्षाकारपाषाणास्स्पर्शभेदा भवन्ति ते ॥ ४५ ॥

ज्योतिस्सिद्धवटस्थाने दक्षिणे चैकपादपः ।
तिष्ठत्यावर्तको नाम तदासन्ने तु पश्चिमे ॥ ४६ ॥

पर्वतो विद्यते तत्र खनेत्तालफलोपमाः ।
पाषाणास्तान्धमेद्गाढं तत्सर्वं काञ्चनं भवेत् ॥ ४७ ॥

तस्यैव दक्षिणे द्वारे विद्यते कुण्डलेश्वरः ।
तन्निकृष्टे जानुमात्रं खनेद्भूमिं समुद्धरेत् ॥ ४८ ॥

रक्ताभाः श्रीफलाकाराः पाषाणास्स्पर्शवेधकाः ।
पुरुषेश्वरदेवस्य समीपे कुण्डमस्ति हि ॥ ४९ ॥

गुञ्जारिड्ढौ च विद्येते वृक्षौ तत्पल्लमश्नियात् ।
सप्ताहाज्जायते सिद्धो जरामरणवर्जितः ॥ ५० ॥

तत्र हस्तिशिला दक्षे खनेद्धस्तप्रमाणतः ।
तल जंबूफलाकारा माद्यास्ते स्पर्शसंज्ञकाः ॥ ५१ ॥

ख्याता हस्तिशिरोनाम्ना ख्याता हस्तिशिलेति सा ।
एकयोजनमात्रे तु तस्या दक्षिणभागतः ॥ ५२ ॥

शिवरूपं शिवप्रोक्तं छायाच्छत्रं तु विद्यते ।
वर्तुलं शतहस्तं तु छिद्रं तस्याप्यधो व्रजेत् ॥ ५३ ॥

न कैश्चिद्दृश्यते सोऽपि सिद्धो भवति तत्क्षणात् ।
यदृच्छया रुद्रतुल्यः क्रीडत्येव जगत्त्रये ॥ ५४ ॥

सिद्धचष्टकं साधयेद्वा सर्वसिद्धिप्रदायकः ।
कान्ताभ्रसत्वकनकसूताः क्रमगुणोत्तराः ॥ ५५ ॥

अम्लेन मर्दयेद्गाढं गोलं कृत्वा तु वेष्टयेत् ।
तद्गोलं दीर्घवंशाग्रे बद्ध्वा श्रीकालिकामनुम् ॥ ५६ ॥

जपेन्निवेशयेत्तत्र छायाच्छत्रेण तेन च ।
वंशाग्रबद्धगोलान्तर्जायते घुटिका-शुभा ॥ ५७ ॥

चक्रान्तर्धारयेत्तां तु तत्क्षणात्खेचरो भवेत् ।
शिलां लालं वस्त्रबद्धं कृत्वा वंशाग्रवेष्टितम् ॥ ५८ ॥

छायाच्छत्रे निवर्त्यैतत्ताभ्यां नेत्रे समञ्जयेत् ।
निधिं पश्यति भूमिस्थं नात्र कार्या विचारणा ॥ ५९ ॥

वंशाग्रबद्धराङ्गं च छायाच्छत्रे विनिक्षिपेत् ।
मन्त्रयेत्कालिकामन्त्रं तं खड्गं धारयेत्करे ॥ ६० ॥

त्रैलोक्यविजयी धीरो भवेद्वीरो जगत्त्रये ।
वंशाग्रे रोचनं बद्ध्वा छायाच्छत्रे निवेशयेत् ॥ ६१ ॥

ललाटे तिलकं तेन कृत्वा लोकं यथं नयेत् ।
स्रोतोऽञ्जनाञ्जने तद्वच्छायाच्छत्रे निवेशयेत् ॥ ६२ ॥

तेनाञ्जनेनाञ्जितोऽसौ देवैरपि न दृश्यते ।
पादुके पूर्ववद्बद्ध्वा छायाच्छत्रे निधापयेत् ॥ ६३ ॥

पादाभ्यां पादुके धृत्वा यत्र यत्राभिवाञ्छति ।
प्रयातु तत्र तत्रैव नयतस्त च पादुके ॥ ६४ ॥

पूर्ववद्रक्तवस्त्रं च छायाच्छत्रे निवेशयेत् ।
आवेष्टयेत्त च पटमदृश्यो भवति क्षणात् ॥ ६५ ॥

समुज्झिते पटे पश्चाद्दृश्यतेऽसौ न संशय ।
चान्तं व्योम हेम सूतमेकीकृत्य विमर्दयेत् ॥ ६६ ॥

गोलीभूतं तु वस्त्रेण वंशाग्रे बन्धयेत्सुधीः ।
छायाच्छत्रे स्थापयेत्कालीमन्त्रेण मन्त्रयेत् ॥ ६७ ॥

स्पर्शवेधी भवेदेतत्सत्यं सत्यं वरानने ! ।
श्रीशैलपश्चिमद्वारे देवो ब्रह्मेश्वरस्थित ॥ ६८ ॥

दुर्गा देवी च तत्स्था सोपान नवमं च यत् ।
तुङ्गभद्राया च नद्या ततो ब्रह्मेश्वरस्य च ॥ ६९ ॥

द्वारदेशे सुद्वर्णं चत्वारस्पर्शका अमी ।
चिञ्चायलं च नैर्ऋत्ये स्थितं ब्रह्मेश्वरस्य हि ॥ ७० ॥

कुण्डं च विद्यते तत्र चिञ्चाधश्चण्डिका स्थिता ।
एकपादेन सततं तच्चिञ्चापलमाहरेत् ॥ ७१ ॥

वस्त्रेण बन्धयेत्कुण्डे क्षिप्त्वा स्नानं समाचरेत् ।
स्नानान्ते तानि गृह्णीयात्तावन्मत्स्या भवन्ति हि ॥७२॥

तदिन्धनैः पचेत्तांश्च ह्यस्थिपुच्छशिरस्त्यजेत् ।
दद्यादृदेवायैकमंशमतिथीनां द्वितीयकम् ॥ ७३ ॥

तृतीयांशं स्वयं भक्षेन्मूर्च्छितो भवति क्षणात् ।
दिव्यो भवति सिद्धोऽयं विलं पश्यति भूतले ॥ ७४ ॥

जरामरणनिर्मुक्तो ह्यवध्यो निर्जरैरपि ।
अलंपुरोत्तरे ग्रामो विद्यते भीमपादुक ॥ ७५ ॥

पार्श्वे तु तस्य ग्रामस्य हस्तमात्रं धरां खनेत् ।
पाषाणा हि फणाकारास्पर्शसंज्ञा भवन्ति ते ॥ ७६ ॥

योगीश्वरीति देव्यस्ति तत्रालंपुरदेवता ।
तस्याग्रतो रम्यगुहा तस्या मध्ये सनेद्भुवम् ॥ ७७ ॥

पाषाणा भेद(क)सङ्काशा ग्राह्या मार्जालविष्ठया ।
संमिश्र्य निक्षिपेद्वह्नौ द्रुते तत्तारतां व्रजेत् ॥ ७८ ॥

मध्वाज्याभ्यां पिबेतांश्च पाषाणान्साधकोत्तमः ।
दिव्यो भवति सिद्धोऽयं वलीपलितमृत्युजित् ॥ ७९ ॥

श्रीपर्वतोत्तरद्वारे देवो नाम्ना महेश्वरः ।
तिष्ठति भ्रमराग्रश्च तत्र तत्फलमाहरेत् ॥ ८० ॥

स्फोटयेच्च तदन्तस्था निर्यान्ति भ्रमरास्तथा ।
सजीवा अथ तान्सर्वान्भ्रमरांस्तान्विवर्जयेत् ॥ ८१ ॥

तत्फलानि पचेत्क्षीरे यावच्छुष्यं पयं पिबेत् ।
क्षण मूर्च्छा भवेत्तेन मूर्च्छान्ते च पयं पिबेत् ॥८२॥

एवं कुर्यात्प्रयत्नेन चैकविंशतिवासरम् ।
तेन वज्रशरीरस्याद्वलीपलितवर्जित ॥ ८३ ॥

वेदवेदाङ्गतत्वज्ञो जीवेदादित्यतारकम् ।
तरसा वायुना तुल्यस्तत्क्षणाद्भवति प्रिये ! ॥ ८४ ॥

तदाम्रस्य फलेनैव त्यक्तभ्रमरकेन च ।
वङ्गस्य पलसाहस्रं द्रावित रजत भवेत् ॥ ८५ ॥

रन्ध्रमापादयेदाम्रफले भृङ्ग विवर्जयेत् ।
तन्मध्ये निक्षिपेत्सूत कर्षं कृष्णाभ्रसत्वकम् ॥ ८६ ॥

निरुद्ध्य वक्त्रं समृदा गोमयेन च लेपयेत् ।
छायाया शोषयेत्काष्ठैस्तदीयै प्रहर पचेत् ॥ ८७ ॥

स्वभावशीतल हृत्वा वक्त्रस्था कारयेत्सुधी ।
खेचरत्वमवाप्नोति वलीपलितवर्जित ॥ ८८ ॥

जीवेच्चन्द्रार्कपर्यन्त वाग्मित्व ब्रह्मणा समम् ।
सूत कृष्णाभ्रसत्व चाम्रफले पूर्ववत्क्षिपेत् ॥ ८९ ॥

प्रलिप्य गोशकृन्मृद्भ्या पुटेदारण्यकोपलै ।
सशीत पारद भाक्ष्य मधुसर्पिर्युत लिहेत् ॥ ९० ॥

गुञ्जामात्र च मासान्त वालो भवति मानव ।
नवनागोपमस्सत्वे जीवेद्ब्रह्मैकवासरम् ॥ ९१ ॥

उत्तरे श्रीगिरीशस्य विद्यते शुक्लपर्वते ।
पञ्चोपचारैस्सपूज्य त्रिषु लोकेषु विश्रुत ॥ ९२ ॥

ॐ हु फट्कारमन्त्रेण निर्विकल्पेन साधक ।
पश्येत्पश्चिमदिग्भागमन्तरिक्षे विमानकम् ॥ ९३ ॥

दिव्यं चनेकरुचिरं सद्यः प्रत्ययकारकम् ।
ततः पश्चिमदिग्भागे व्रजेत्तीर्त्वा महानदीम् ॥ ९४ ॥

दृश्यते च गुहा तत्र प्रविशेत्पश्चिमानन: ।
त्रियोजनं व्रजेत्तत्र विभीरिकोऽविकल्पकः ॥ ९५ ॥

कदलीकाननं तत्र दृश्यते पञ्चयोजनम् ।
अच्छोदपूर्णा सरसी तन्मध्ये भद्रपीठकम् ॥ ९६ ॥

तत्पीठं तु महद्दिव्यं पश्येत्स्फटिकसन्निभम् ।
उच्चारयेन्मन्त्रमिमं दण्डवत्प्रणतिं भजेत् ॥ ९७ ॥

" ॐ ह्रीं विद्यावागीश्वराधिपतये ह्रीं ॐ स्वाहा "

तत्र स्नात्वा जपेन्मन्त्रं लक्षमेकं वरानने ! ।
कन्दमूलाशनो भूत्वा यथेष्टं साधकः प्रिये ! ॥ ९८ ॥

सिंहासनान्तरे देवं पश्येत्स्फटिकसन्निभम् ।
चतुर्भुजं त्रिणेत्रं च विशदेन्दुकलाधरम् ॥ ९९ ॥

नीलग्रीवं नागभूषं परश्वयमृगायुधम् ।
वराभयं वरेण्यं तं विशिष्टविबुधार्चितम् ॥ १०० ॥

नमस्कुर्याच्च साष्टाङ्गं मन्त्रैस्स्तोत्रैर्मुहुर्मुहुः ।
ततः प्रसन्नस्स शिवो वरं दत्ते यथेप्सितम् ॥ १०१ ॥

शतमायतनं तत्र कूपं नवशतं यथा ।
आरामाश्चापि तावन्ति नन्दनानि वनानि च ॥१०२॥

वाप्यो नवशतं सन्ति विवरं चैव तत्समम् ।
कल्पवृक्षाश्च तावन्ति एते सर्वेऽपि सिद्धिदाः ॥१०३॥

तत्रास्ते मोहली नाम्ना प्रथिता यक्षिणीष्टदा ।
व्रते सा देहि मे भुक्तिं सिद्धिं त्वं यदि वाञ्छसि ॥

देवि ! दास्याम्यह भुक्तिं वक्तव्यमिह चामुना ।
कन्दमूलं फल तस्यै पायसं वा समर्पयेत् ॥ १०५ ॥

सा यक्षिणी पुनर्ब्रूते यावद्भुञ्जे सुत मम ।
धारयेर्ल्क्षसा तावद्वर दास्यामि ते महत् ॥ १०६ ॥
विसृजेस्त्व यदि तदा भवन्तं हन्मि निर्दया ।
एव गतभयो वीर कुर्याच्चेत्सिद्धिभाग्भवेत् ॥ १०७ ॥

व्रजेदुदीचीदिग्भागे तत्सरो योजनार्धके ।
तत्रास्ते नन्दनं दिव्यं पुष्पपूर्णं महेश्वरि ! ॥ १०८ ॥

तत्पुष्पाघ्राणमात्रेण क्षुत्पिपासा न बाधते ।
भक्षयेदथवा तस्य फलमेक यथोचितम् ॥ १०९ ॥

चञ्चत्कायो भवेत्तस्य भक्षणादेव मानव ।
सरोदक्षिणदिग्भागे गच्छेद्योजनपादकम् ॥ ११० ॥

नन्दन दृश्यते तत्र दाडिमीवृक्षसङ्कुलम् ।
तत्फल भक्षयेद्यस्तु जीवेद्युगसहस्रकम् ॥ १११ ॥

तस्यैव सरस पूर्वभागे क्रोशार्धमात्रकम् ।
गच्छेद्धात्रीफलैर्युक्त विद्यते नन्दन वनम् ॥ ११२ ॥

अश्नीयात्तत्फल धीरो जीवेत्सवर्तकल्पम् ।
सरसस्तस्य भागे च पश्चिमे योजन व्रजेत् ॥ ११३ ॥

तत्र श्रीफलसम्पूर्णं नन्दन विद्यते वनम् ।
अद्यते तत्फल येन जीवत्याचन्द्रतारकम् ॥ ११४ ॥

तत्रैव नन्दनवने लिङ्ग स्यान्नीलवर्णकम् ।
तस्योद्गच्छारमार्गेण विशेन्नागो महाबल ॥ ११५ ॥

तत्र सप्तफणोपेतस्तूमभीतिकरो महान् ।
एवविध महानाग हुङ्कार वदन्मुहु ॥ ११६ ॥

नमस्कुर्यात्प्रयत्नेन साधकसिद्धिकांक्षया ।
वदत्येवं महानागस्त्वद्दृश्यत्वं ददामि ते ॥ ११७ ॥

याहि त्वं पश्चिमद्वारं दिव्या कन्याऽस्ति तत्र वै ।
समुच्चरन्महामन्त्रं व्रजेत्तत्रैव साधकः ॥ ११८ ॥

ददाति हारं सा कन्या प्रवेशं न ददाति च ।
हारं गले धारयेत्तं तेन सारस्वत भवेत् ॥ ११९ ॥

तस्माद्दक्षिणदिग्द्वारे व्रजेद्भीतिकरं परम् ।
तत्र पश्येन्मुक्तकेशं जिह्मनेत्रं दिगम्बरम् ॥ १२० ॥

गदाहस्तं नीलवर्णं दृष्ट्वा श्रीक्षेत्रपालकम् ।
वन्देत मन्त्रमुच्चार्य स्तोत्रैर्विघ्ननिवारणम् ॥ १२१ ॥

हाहाहेहेहुंहुंकारं फट् हुं स्वाहान्तमेव च ।
क्षेत्रपालोऽप्यनेनैव मन्त्रेणाशु प्रसीदति ॥ १२२ ॥

खगत्व वितरत्येष प्रवेशं न ददाति हि ।
अथ व्रजेत्पूर्वदिशो द्वारं तत्र गणाधिपम् ॥ १२३ ॥

स्थितं प्रपूजयेत्तत्र प्रविशेत्साधकोत्तम. ।
दृश्यते दिव्यलिङ्गं च चापस्तत्र मनोहर ॥ १२४ ॥

ॐ हुङ्कारेण मन्त्रेण पूजयेच्च तमीश्वरम् ।
उपवासेन तत्रैव निवारात्रं जपेत्सुधी ॥ १२५ ॥

प्रत्यक्षो भवतीशानो ददाति हि वरं परम् ।
इत्येवमादयस्सन्ति सिद्धय कदलीवने ॥ १२६ ॥

तत्रैव सरस. पूर्वभागे योजनमात्रके ।
अक्षरैर्लिखितं द्वारि तत्र पद्मावतीबिलम् ॥ १२७ ॥

वमनाद्यैर्विशुद्धात्मा प्रविशेत्तत्र साधक ।
तत्र चापान्तरशतं गच्छेत्तत्र मृदङ्गकम् ॥ १२८ ॥

आलोक्य वादयेत्तं च तद्ध्वनिश्रवणाच्चदा ।
पद्मावती स्वयं याति ह्यमृतं च ददाति च ॥ १२९ ॥

तस्य पानेन सिद्धोऽयममरत्वं लभेत च ।
ततस्तैनं समागम्य प्रार्थयेत्त्वं ममान्तिकम् ॥ १३० ॥

समागच्छालये दिव्ये कन्यापञ्चशताकुले ।
स्थित्वा मम पतिर्भूया ब्रह्मायुष्यावधि प्रभो ! ॥१३१॥

तदन्ते शाश्वतं स्थानं गमिष्यसि न संशयः ।
तस्य पूर्वतटाकस्य चाग्नेय्यां दिशि विद्यते ॥ १३२ ॥

कदम्बेश्वरदेवोऽपि वृक्षः कादम्बकोऽमतः ।
तत्र पत्राणि चादाय कटुतैलेन लेपयेत् ॥ १३३ ॥

तद्बीजसंभवैस्तैलैर्लिंपेद्वाऽथ पचेत्सुधीः ।
तत्काष्ठैस्तानि मत्स्यास्युस्ताम्रपात्रे विनिक्षिपेत् ॥१३४॥

वर्जयमस्थि शिरः पुच्छं क्षौद्रसर्पिर्युतं भजेत् ।
तत्सेवया भवेत्सिद्धो रुद्रतुल्यो महाबल. ॥ १३५ ॥

तद्वृक्षश्च नदीतीरे कुण्डलेशस्य सन्निधौ ।
विद्यते पूर्ववद्युक्त्या सिद्धिर्भवति नान्यथा ॥ १३६ ॥

अस्त्युत्तरे पुष्पगिरि. कपोतेशश्च विद्यते ।
त्रिः प्रदक्षिणमातन्वात्तस्य मूर्धानमाव्रजेत् ॥ १३७ ॥

खेचरत्वं भवेत्तस्य साधकस्य न संशयः ।
तस्य पूर्वोत्तरे भागे छेदिकीद्वारकं स्थितम् ॥ १३८ ॥

उदङ्मुखं विशेत्तत्र त्रिचापान्तरमादरात् ।
मूषिकाकारपाषाणं तत्र दृष्ट्वा विचेष्टरः ॥ १३९ ॥

क्षिप्रं मूर्च्छां भवेत्तस्य जीवेद्ब्रह्मदिनत्रयम् ।
वेधयेत्सर्वलोहानि स्पर्शमात्रान्न संशयः ॥ १४० ॥

उपोष्य च दिवा नक्तं देवाग्रे सिद्धिमाप्नुयात् ।
विद्यते देवतायुग्मं कपोतेश्वरदक्षिणे ॥ १४१ ॥

आनाभिमात्रं निखनेद्देवताद्वयमध्यतः ।
गोरोचनोपमास्तत्र पाषाणास्सन्ति तान्हरेत् ॥ १४२ ॥

पिष्ट्वा क्षौद्रघृताभ्यां च पिबेद्यस्सोऽमरो भवेत् ।
कपोतेशस्य वायव्ये निखनेद्धस्तमात्रकम् ॥ १४३ ॥

तत्र पारावताकारपाषाणास्स्पर्शसंज्ञकाः ।
देवताराधनं कृत्वा तेषामेकं समाहरेत् ॥ १४४ ॥

ऐशान्यां श्रीगिरीशस्य ह्यस्त्येव भृगुपातनम् ।
तत्समीपे दिव्यकुण्डं मृदं तस्मात्समाहरेत् ॥ १४५ ॥

गव्यपञ्चकयुक्तां तां धमेत्खदिरवह्निना ।
तस्माल्लोहं पतेन्नीलं मध्वाज्याभ्यां प्रतापितम् ॥१४६॥

तत्सेचयेत्ससर्पौते तद्गोलं निक्षिपेन्मुखे ।
विष्णुतुल्यो भवेत्सिद्धस्सर्वज्ञस्सर्वगस्सुखी ॥ १४७ ॥

भृगुपातनशैलाग्रात्कोशे दधिकवाटकम् ।
अच्छतैलगिरिर्नाम्ना तदग्रे विद्यते सदा ॥ १४८ ॥

बिलं तत्पश्चिमे ह्यस्ति तन्मध्ये चापपञ्चके ।
गते पश्येत्तत्र कुण्डं तत्र लाक्षासमं रसम् ॥ १४९ ॥

अलाबुपात्रे गृह्णीयात्ससूतः कोटिवेधकः ।
प्राकारश्चन्द्रगुप्तस्य श्रीगिरीशस्य पश्चिमे ॥ १५० ॥

तन्मध्ये विद्यते वेश्म चैत्यं तत्पूर्वतस्स्थितम् ।
चैत्यात्पूर्वे शिला दिव्या मुद्गाभा स्पर्शसंज्ञका ॥१५१॥

तत्रास्ते मोहनो दन्ती समारुह्य समाहितः ।
पृष्ठात्तस्य तृणं ग्राह्यं तत्सर्वं काञ्चनं भवेत् ॥ १५२ ॥

तद्गजस्योत्तरे पार्श्वे जानुदघ्नां खनेद्धराम् ।
जम्बूफलाभाः पाषाणास्स्पर्शसंज्ञा भवन्ति ते ॥ १५३ ॥

क्षितिं खनेद्गजस्याधो जानुमात्रं लभेत्ततः ।
लक्षवेधकरा सिद्धा त्रिकोणे घुटिका परा ॥ १५४ ॥

मल्लिनाथस्य वायव्ये नाम्ना देवह्रदः परः ।
तीर्थं तत्रास्ति पाषाणा मुद्गाभास्स्पर्शसंज्ञकाः ॥१५५॥

लिङ्गं कूर्मोपमं तत्र स्पर्शसंज्ञं शुभं प्रिये ! ।
पूर्णिमायां कृत्तिकायां पूजयित्वा समाहरेत् ॥ १५६ ॥

तस्माद्व्यूतियुगलात्स्मृता नीलवती परा ।
तस्या लिङ्गं च सलिलं नीलवर्णं प्रशस्यते ॥ १५७ ॥

अश्वाम्रकाकसङ्काशाः पाषाणास्स्पर्शवेधकाः ।
देवालयान्तर्निखनेज्जानुमात्रान्तराद्धराम् ॥ १५८ ॥

मूषिकाकारपाषाणास्स्पर्शसंज्ञा भवन्ति ते ।
श्रीगिरीशस्य नैर्ऋत्यां ख्याता गुण्डीप्रभाख्यया ॥१५९॥

तस्याग्रगर्तं पीताभां मृत्तिकां च पुटे दहेत् ।
तस्मान्निस्सरति स्वर्णं शुद्धदेवार्हकं परम् ॥ १६० ॥

तलास्ते भृङ्गचूतोऽपि पूर्ववत्सिद्धिदायकः ।
तथा तंबीपुरे चास्ति तीर्थं च विपुले शुभम् ॥१६१॥

सदाफलं तु विख्यातं तस्याः पूर्वोत्तरे सुधीः ।
श्रीगिरेर्नैर्ऋते भागे महानन्देति विश्रुतः ॥ १६२ ॥

अब्जेद्धुष्टापथेनैव तस्य पूर्वोत्तरे सुधीः ।
तलास्ते कालकण्ठेशो नाम्नाऽग्रे तस्य कुण्डकम् ॥१६३॥

तत्रेन्द्रगोपसङ्काशं सिद्धिस्सूतस्य विद्यते ।
भवन्ति सप्त लोहानि स्वर्णं तप्तानि सेकतः ॥ १६४ ॥

नैऋत्यां श्रीगिरीशस्य चास्ति श्रीमालिनीश्वरः ।
तस्योत्तरदिशि ख्यातस्तुम्बापर्वतसंज्ञकः ॥ १६५ ॥

तस्याग्रे च त्रिशूलाभास्सन्ति दर्भाङ्कुराः ।
तद्घो निखनेन्नाभिमात्रं नीलां मृदं हरेत् ॥ १६६ ॥

अक्षकाष्ठै पचेत्तां च देवाग्न्यग्नये क्रमात् ।
एकैकभागं कल्पेत चतुर्थांशं स्वयं भजेत् ॥ १६७ ॥

जीवेत्कल्पायुतं सिद्धो महाबलपराक्रमः ।
इलेश्वरस्य निकटे तव कोटीश्वरः स्थितः ॥ १६८ ॥

पुष्पं पत्र तदग्रेऽस्ति स्पर्शवेधकरं भवेत् ।
तलाचलेश्वरो देवस्स्पर्शवेधकरः परः ॥ १६९ ॥

तस्य योजनमात्रे च दक्षिणे चामरेश्वरः ।
ततस्स्वर्णशिला चास्ति तदूर्ध्वं नरमांसकम् ॥ १७० ॥

गोमांसं वा क्षिपेत्काष्ठैर्वांदैर्ज्वालयेत्सुधी ।
प्रातः काञ्चनसङ्काशा दृश्यते सा शिला तदा ॥ १७१ ॥

प्रत्यग्रपुष्पवत्याश्च रजसा भाविताशुकम् ।
लोडयेत्तच्छिलाया च क्षिपेदस्याम्बुपात्रके ॥ १७२ ॥

तस्य स्पर्शमात्रेण लोहस्स्यात्काञ्चनं परम् ।
श्रीगुरौ यत्र तलापि पिण्डभूमिस्थितोपला. ॥ १७३ ॥

कर्षमात्रं तु तच्चूर्णं भक्षयेत्त्रिफला समम् ।
वलीपलितजिन्मासाज्जीवेदाचन्द्रतारकम् ॥ १७४ ॥

श्रीगिरीन्द्रस्य नैर्ऋत्यां पदाह्वकर्ण ईश्वरः ।
तस्य पूर्वोत्तरे भागे पञ्चविंशतिचापके ॥ १७५ ॥

द्विहस्तमात्रोर्ध्वशिला खनेत्तत्र द्विहस्तकम् ।
शरावसंपुटाकारान्दृषदस्तान्समाहरेत् ॥ १७६ ॥

कुर्यात तानग्निवर्णान्सिच्यात्कूष्माण्डजैर्द्रवैः ।
तन्मध्यान्नवनीतं तु दद्याद्देवाय भागकम् ॥ १७७ ॥
भागैकमतिथेर्देयं भागमेकं स्वयं लिहेत् ।
दिवा नक्तं भवेन्मूर्च्छा विनिद्रो भवति स्वयम् ॥१७८॥
वलीपलितसंवर्ज्यो जीवेद्वर्षायुतं नरः ।
स्पर्शकान्तस्य सोपानं द्वितीयं भवति प्रिये ! ॥ १७९ ॥
तदेवपार्श्वयोस्सर्वे पाषाणाश्चेतपीतकाः ।
स्पर्शास्सर्वा भवन्त्येते तेषु चैकं समाहरेत् ॥ १८० ॥
प्राच्यां हि तस्य देवस्य समीपे कूपमस्ति च ।
मण्डूकाभाश्च पाषाणास्सन्ति च स्पर्शसंज्ञकाः ॥१८१॥
तस्येश्वरस्य चोदीच्यां लिङ्गाद्रिर्विद्यते महान् ।
तदुत्तरस्यां दिश्यस्ति तटिनी पूर्ववाहिनी ॥ १८२ ॥
तटिन्या पश्चिमाशायां पिङ्गाभं लिङ्गमस्ति हि ।
पूर्णशैलोदकं कुण्डं तत्र स्यात्क्षणवेधकम् ॥ १८३ ॥
द्वियोजने महेशस्य दक्षिणे चण्डिका स्थिता ।
पिण्डिकाख्या सुविख्याता तस्या वायव्यकोणतः ॥
अन्धुरस्ति हि तन्मध्ये मुद्गवर्णास्तथोपलाः ।
केचित्पथ्यानिमास्सन्ति ते सर्वे स्पर्शसंज्ञकाः ॥१८५॥
अत्रत्यानां च सर्वेषां स्पर्शानां विधिरुच्यते ।
यदि स्थूलं पेषयेत्तं श्लक्ष्णं मूषान्तरेण हि ॥ १८६ ॥
कुर्यात्सर्वाणि लोहानि तस्यामावर्तयेत्प्रिये ! ।
तत्सर्वं जायते स्वर्णं कुर्यादेवं यथेष्टकम् ॥ १८७ ॥
सूक्ष्मश्चेत्सर्वलोहानां द्रुतानामन्तरे क्षिपेत् ।
तत्स्पर्शात्सर्वलोहानि काञ्चनत्वं प्रयान्ति हि ॥ १८८ ॥

वायव्यां मल्लिनाथस्य तीर्थं सर्वेश्वराल्यकम् ।
तस्य दक्षिणदिग्भागे राजमार्गे द्वियोजने ॥ १८९ ॥

गते डोंगलिका तत्र दृश्यते तस्य मूर्धनि ।
कृष्णधात्रीफलान्येव सन्ति तानि च भक्षयेत् ॥१९०॥

सप्तवासरपर्यन्तमातृप्तिं वज्रविग्रहः ।
जरामरणनिर्मुक्तो जीवेत्कल्पशतत्रयम् ॥ १९१ ॥

तस्माच्च दक्षिणे भागे काकलारीमहावने ।
तलास्ते स्तम्बकदली प्रविशेत्तत्र साधकः ॥ १९२ ॥

क्रोशार्धमात्रं गच्छेच्च रसकुण्डं च दृश्यते ।
अलाबुपात्रे संस्थाप्य कोटिवेधी भवेत्तु सः ॥ १९३ ॥

शिलामयो नीलवर्णशिखण्डी तत्र दृश्यते ।
तन्मुखाग्रेऽस्ति कुण्डं वितस्तिमात्रास्तिनीलकम् ॥१९४॥

शुष्कवंशं च तन्मध्ये क्षणं क्षिप्तं नवं भवेत् ।
पत्रं पुष्पं दिनैकेन भवत्येव न संशयः ॥ १९५ ॥

तत्र प्रस्थं रसं क्षिप्त्वा तावन्मात्रं जलं हरेत् ।
मधुतुल्यं पिबेत्तं च मूर्च्छा भवति तत्क्षणात् ॥ १९६ ॥

क्षणेन लब्धज्ञानस्याज्जीवेद्युगसहस्रकम् ।
श्रीगिरेर्वह्निदिग्भागे घटिकासिद्धखेचरः ॥ १९७ ॥

अस्ति तस्य पुरो भूमौ पद्महस्तं खनेत्सुधीः ।
बदराकारपाषाणा विद्यन्ते खगतिप्रदाः ॥ १९८ ॥

एकं वक्त्रे सदा धार्यं सिद्धैः खेगतिलिप्सुभिः ।

सिद्धिक्रमः ॥

श्रीशैले सर्वसिद्धीनामुक्तानां विधिरुच्यते ॥ १९९ ॥

मन्त्रन्यासं पुरा कृत्वा पश्चाल्लक्षं जपेन्मनुम् ।
अघोरान्तेन चैव क्षीरं तत्तत्सिद्धिमवाप्नुयात् ॥ २०० ॥

अथ न्यासः ॥

ॐ ह्रीं महापर्वतवासिन्यै हृदयाय नम । ॐ ह्रीं ज्येष्ठायै शिरसे स्वाहा । ॐ ह्रीं रौद्र्यै शिखायै वषट् । ॐ ह्रीं कनककुण्डलिन्यै कवचाय हुम् । ॐ ह्रीं सञ्जीविन्यै नेत्रेभ्यो वौषट् । ॐ ह्रीं मालिन्यै अस्त्राय फट् ॥ इत्यङ्गषट्कं कुर्यात् ॥

ॐ हु शिवाय नम - पादयोर्न्यसेत् । ॐ वं वाग्मदेवाय नम - जङ्घ-यो. । ॐ प पद्मिन्यै नम - गुह्ये । ॐ का कन्याकुमार्यै नम - नाभौ । ॐ म्लौं नम - कुक्षौ । ॐ द्रा ह्रीं दुर्गायै नम. - उरसि । ॐ हु विन्ध्य-वासिन्यै नम - कण्ठमूले । ॐ ल नम - भीषाया । ॐ ह्रीं श्रीं अष्ट-भुजायै नम - भुजयो । ॐ हु सर्वतोमुखिन्यै नम. मुखे । ॐ प्रकाशिकायै नम - नेत्रयो । ॐ महिषमर्दिन्यै नम - कर्णयो । ॐ ह्रा सर्वाङ्गसुन्दर्यै नम मूर्ध्नि न्यसेत् ॥

एव अङ्गरक्षा कृत्वा क्षेत्र पूजयेत् ॥

ॐ ह्रीं श्रीं नमो भगवति सर्वेश्वरि देवि नमो मण्डलवासिनि क्रां क्रीं क्रूं हन हन पच पच मथ मथ शीघ्रमावेशय शीघ्रमावेशय एह्येहि भुवन वन्दिते स्वाहा । अनेन मन्त्रेण देवतामावाहयेत् ॥

ॐ ह्रा ह्रीं ह्रूं त्रिभुवनेश्वर्यै नम सान्निध्य कुरु कुरु स्वाहा । अनेन मन्त्रेण तत्क्षेत्रदेवता पूजयेत् ॥

ॐ कृष्णवर्णिनि अपरामुख्यै नम - पूर्वस्मिन् । ॐ सुधावर्षिण्यै नम - आग्नेये । ॐ पर्वताकृष्णवर्णिनीरौद्रमुख्यै नम दक्षिणे । ॐ बालार्कवर्णिनीमहालक्ष्म्यै नम - नैर्ऋत्ये । ओं ग्व रक्तपर्वतवर्णिनी

महामहिषासुरमर्दिन्यै नमः - पश्चिमे । ओं मां सर्ववर्णिनीहुङ्कारवाग्देव्यै नमः - वायव्ये । ओं सिद्धवाहिन्यै नमः - उत्तरे । ओं शिवाशिवाशिवा त्रिशूलहस्तायै नमः - ऐशान्ये । ओं ह्रां ह्रीं वर्लीं मनोन्मन्यै नमः - आकाशे । ओं ह्रां ह्रीं महामोहिन्यै नमः - पाताले । ओं ह्रां ह्रीं हूं ह्रूं ह्रौं ह्रौं ह्रः महाचिदे जंभय जंभय मोहय मोहय दर्शय दर्शय मूर्च्छय मूर्च्छय वर्लीं मथ मथ आकर्षयाकर्षय हुं फट् स्वाहा । गन्धे च पूजयेत् ॥

एवं न्यासं रक्षां पूजां कृत्वा तत्कर्मणि लक्षमेकमघोरं जपेत् । ततः सिद्धिमवाप्नोति ॥

मन्त्रं यथा—

ओं ह्रां ह्रीं हूं अघोरतर स्फुर स्फुर प्रकट प्रकट कह कह शम शम जात जात दह दह पातय पातय ओं हूं ह्रां हूं अघोरास्त्राय फट् अमुं मन्त्रं लक्षं जपेत् ॥

ततः स्वप्ने प्रत्यक्षीभूय देवता वरं ददाति ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविधान्तौ द्वादशोल्लासः ॥

॥ त्रयोदश उल्लासः ॥

गन्धकः ॥

श्रीभैरवी—

प्रणम्य शिरसा शम्भुमस्तौषीत्परमेश्वरी ।
श्रुतं तव प्रसादेन दिव्य सर्वरसायनम् ॥ १ ॥

उत्पत्तिं गन्धकस्यापि जातिं संशोधनं तथा ।
सेवां रसायनफलं क्रमाद्ब्रूहि महेश्वर ! ॥ २ ॥

श्रीभैरवः—

देवि ! शृणु प्रवक्ष्यामि गन्धकस्य रसायनम् ।
श्वेतद्वीपे पुरा देवि ! लताकल्पद्रुमोज्ज्वले ॥ ३ ॥

नानामणिगणाकीर्णे नानापुष्पफलाकुले ।
सिद्धविद्याधरस्त्रीभि किन्नर्यप्सरसां गणैः ॥ ४ ॥

अनेकनिर्जरस्त्रीभि क्रीडन्ती त्वं मदोत्कसा ।
वेणुवीणाविनोदेन वाद्यनादैर्मनोहरैः ॥ ५ ॥

तालैर्झल्लरिकाढक्यानिनादैः करतालकैः ।
अत्यानन्देन देवेशि ! नृत्यन्ती त्वं सुरार्चिते ! ॥ ६ ॥

तदा ऋतुमती जाता सुस्राव च रजो महत् ।
सुगन्धिना तद्रजसा त्वद्वस्त्रं रक्ततां ययौ ॥ ७ ॥

विहाय तद्रक्तवस्त्रं स्नात्वा क्षीरमहोदधौ ।
अनेकामरकान्ताभिर्वृता कैलासमाव्रजः ॥ ८ ॥

वायुना तद्रजो वस्त्रं क्षिप्तं क्षीरमहोदधौ ।
मग्नं तत्रैव तद्वस्त्रं चिरकालं सुरेश्वरि ! ॥ ९ ॥

मथ्यमानान्महांमोधेरमृतेन सहोद्भवम् ।
श्लाघ्येन निजगन्धेन मोदयन्नसुरान्सुरान् ॥ १० ॥

तेनैव नाम्ना ऊचुस्ते शक्राद्यास्सुरपुङ्गवाः ।
गन्धकोऽयं भवत्वस्य नाम्ना जातं तु मल्लिये ! ॥११॥

चतुर्विधं शोणितं ते दिव्यं बलकरं परम् ।
समर्थोऽयं गन्धकस्तु रसबन्धे च जारणे ॥ १२ ॥

रसेन्द्रे ये गुणास्सन्ति ते गुणास्सन्ति गन्धके ।
इत्यूचुरिन्द्रप्रमुखा हृष्टा गन्धकगन्धतः ॥ १३ ॥

तदा प्रभृति लोकेऽस्मिन्ख्यातोऽयं गन्धकः प्रिये ! ।
जपाकुसुमसङ्काशः क्षत्रियश्चोत्तमः प्रिये ! ॥ १४ ॥

पीतो वैश्यो मध्यमस्याच्छ्वेतो विप्रोऽधमस्स्मृतः ।
कृष्णवर्णो भवेच्छूद्रः प्रिये ! स्यादधमाधमः ॥ १५ ॥

रक्तवर्णं लोहवेधि पीतवर्णं रसायनम् ।
श्वेतवर्णं च भैषज्ये कृष्णं कुष्ठादिलेपने ॥ १६ ॥

गन्धकशुद्धिः ॥

अथ वक्ष्ये गन्धकस्य शोधनं सिद्धिदायकम् ।
तिलपर्ण्यंजमोदाश्च ब्राह्मी भृङ्गी च धुत्तुरः ॥ १७ ॥

एतेषां च रसैर्भाव्यं चूर्णितं गन्धकं दिनम् ।
काचपात्रे विनिक्षिप्य समांशाज्येन पाचयेत् ॥ १८ ॥

मृद्वग्निना तु तत्पक्वं छागक्षीरे विनिक्षिपेत् ।
गोक्षीराज्यै. किञ्चिदूनं स्थाल्या वक्त्रं तु बन्धयेत् ॥

स्वच्छागुकेन बद्धस्य चूर्णं तदुपरि क्षिपेत् ।
तदूर्ध्वं श्रावक रुद्ध्वा तस्थाप्य गर्तकान्तरे ॥ २० ॥

वनोत्पलैर्मृदुपुट दत्वा द्रवति गन्धकम् ।
पुनश्च तिलपर्ण्याद्यैर्भावयेच्छोषयेत्त्रिधा ॥ २१ ॥

द्रावयेत्तत्समादाय मत्स्यपित्तेन सप्तधा ।
भावयेज्ज्वालिनीबीजचूर्णैस्तत्परिपेषयेत् ॥ २२ ॥

ततो मृन्नद्रवैर्भाव्य ससकृत्वस्तपे खरे ।
जलै प्रक्षाल्य तत्सम्यक्छोषयेत्तत्पुन पचेत् ॥ २३ ॥

मृद्वग्निना कान्तपात्रे घृताक्ते तु क्षण तत ।
मृन्नराजद्रवे क्षिप्त्वा शुद्ध तद्गन्धक भवेत् ॥ २४ ॥

रसे रसायने योगे योज्य सुखकर भवेत् ।

गन्धकरसायनम् ॥

पूर्वोक्तवद्देहशुद्धिं कुर्याद्भान्तिविरेचनै ॥ २५ ॥

सुमुहूर्ते सुनक्षत्रे पूजयित्वा पर शिवम् ।
गणाधिप क्षेत्रपाल श्रीगुरु मिपज क्रमात् ॥ २६ ॥

निष्कैक त्रिफलाचूर्णं निष्कमेक च गुग्गुलुम् ।
गुञ्जोन्मेय शुद्धगन्ध लिहेदेरण्डतैलत ॥ २७ ॥

गुञ्जावृद्धिक्रमेणैव सेव्य तत्प्रतिवासरम् ।
दिनषोडशपर्यन्त गुञ्जाषोडशमात्रकम् ॥ २८ ॥

तदा षोडशघस्रान्ते सेव्य तत्प्रतिवासरम् ।
गुञ्जाषोडशिकोन्मेयमपूर्वं त्रिफला परम् ॥ २९ ॥

एतस्मादधिका वृद्धिर्न कार्या सिद्धिलिप्सुना ।
एव मासप्रयोगेण कुष्ठमष्टादश हरेत् ॥ ३० ॥

तथा मेहान्गुल्मानि कासश्वासक्षयज्वरान् ।
व्रणान्भगन्दरार्शश्चाशीतिवातोद्भवान्गदान् ॥ ३१ ॥

मासद्वयप्रयोगेण बहुकान्तिं प्रयच्छति ।
सर्वव्याधिप्रशमन भवेन्मासत्रयात्प्रिये ! ॥ ३२ ॥

ततष्षण्मासयोगेन वृद्धो यौवनमाप्नुयात् ।
एवमब्दप्रयोगेण सिद्धो भवति शाभवि ! ॥ ३३ ॥

तन्मूलमल्पयोगेन तामे काञ्चनतां व्रजेत् ।
विधिं च प्रतिषेधं च कुर्यात्पूर्वोक्तवत्सुधी ॥ ३४ ॥

रसादि पुण्यममल यस्सेवेत रसायनम् ।
स एव कृतकृत्यस्स्यादैवतैरपि पूज्यते ॥ ३५ ॥

सर्वतीर्थेषु सस्नात सर्वव्रतफलान्वित ।
अश्वमेधादियज्ञाना सर्वेषा फलमाप्नुयात् ॥ ३६ ॥

धन्य पुण्यतमश्रेष्ठदर्शनीयो मनीषिभि ।
स योगविज्ज्ञस्सर्वज्ञस्सर्वानुग्राहक प्रभु ॥ ३७ ॥

शुद्धस्सर्वगतश्शान्तश्शूरस्सत्वगुणोज्ज्वल ।
तस्य देहल्यो नास्ति हृदयविशवता व्रजेत् ॥ ३८ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ त्रयोदशोल्लास ॥

॥ चतुर्दश उल्लासः ॥

विषम् ॥

[विषोत्पत्ति. ।]

श्रीभैरवी—

श्रुत सर्वं मया देव ! दिव्यं सर्वरसायनम् ।
विषोत्पत्ति च जातिं च सेवां वद च तत्फलम् ॥ १ ॥

श्रीभैरव —

क्षीरोदधौ मथ्यमाने मन्थनीकृतमन्दरे ।
सिद्धकिन्नरगुह्यचेन्द्रपिशाचोरगराक्षसैः ॥ २ ॥
ब्रह्माद्यैरखिलैर्देवैरेकतो दनुजाधिपैः ।
दैत्यैरन्यत्र विपुलैर्महाबलपराक्रमैः ॥ ३ ॥

ततो जातानि रत्नानि कौस्तुभादीनि कामगौ ।
कल्पवृक्षो महालक्ष्मीरैरावतमहागजः ॥ ४ ॥

उच्चैःश्रवास्तथा चेन्दुर्धन्वन्तरिभिषग्वरः ।
अमृतं च लता दिव्या दिव्यसिद्धिप्रदायका ॥ ५ ॥

मन्दरभ्रमणश्रान्तनागराजमुखात्तत ।
विषज्वाला समुत्पन्ना तीव्रा लोकभयङ्करी ॥ ६ ॥

ममज्ज क्षीरजलधावत्यन्तमथनात्पुनः ।
कालकूट महाश्वेल कल्पान्तयमसन्निभम् ॥ ७ ॥

सवर्ताग्निप्रतीकाश वीक्ष्य भीताम्सुरास्तदा ।
समान्तिक समाजग्मुस्तुवन्तो दीनमानसा ॥ ८ ॥

स्वामिन्सर्वोत्तम ! त्राहि शरणागतपालक ! ।
इत्यादि बहुधा स्तोत्रं कुर्वाणास्ते सुरासुराः ॥ ९ ॥

अहं स्मितमुखं कृत्वा कालकूटं तदाऽपिबम् ।
तत्र तलावशिष्टं तद्बहुधा समभूद्भुवि ॥ १० ॥

क्वचिन्मूलस्वरूपेण क्वापि त्वग्रूपतः प्रिये ! ।
कुत्रापि पर्णरूपेण तोयरूपेण कुत्रचित् ॥ ११ ॥

एवं बहुविधं जातं तत्र तत्र विषं गतम् ।
तेषां श्रेष्ठं कन्दविषमष्टादशविषं प्रिये ! ॥ १२ ॥

[विषभेदाः ।]

क्रमाद्भेदं प्रवक्ष्यामि कालकूटं च दर्दुरम् ।
हालाहलं मेषशृङ्गं मोहदं ग्रन्थि कर्कटम् ॥ १३ ॥

रक्तशृङ्गि हरिद्रं च केसरं दशमं स्मृतम् ।
एते दशविधाः श्वेला न प्रयोज्या रसायने ॥ १४ ॥

श्वेतशृङ्गी वत्सनाभं सर्षपं शृङ्गि वालुकम् ।
मुस्तक सक्तुकं देवि ! चाष्टमं कर्दमं भवेत् ॥ १५ ॥

रसायने योजनीयास्त्वष्टौ भेदाः प्रकीर्तिताः ।
कालकूटं काकचञ्चुप्रभं दर्दुरसन्निभम् ॥ १६ ॥

दर्दुरं नीलवर्णं च हालाहलविषं समम् ।
मेषशृङ्गी तु मेषस्य शृङ्गाभं मोहदं पुनः ॥ १७ ॥

रक्तनीलप्रभं देवि ! ग्रन्थिकं ग्रन्थिसंयुतम् ।
कर्कटं कपिलाभं च रक्तशृङ्गि महाविषम् ॥ १८ ॥

कृष्णपिङ्गं च रक्ताभं हरिद्राभं हरिद्रकम् ।
केसरं पद्मकिञ्जल्कप्रभं दशविधन्त्विति ॥ १९ ॥

श्वेतशृङ्गीभदन्ताभ वत्सनाभ च पाण्डुरम् ।
सर्पपाकृतिभिर्युक्त बिन्दुभिस्सर्षपं भवेत् ॥ २० ॥

शृङ्गी शृङ्गाकृतिर्ज्ञेयो वालुक वालुकाकृति ।
मुक्ताकृतिर्मुस्तक स्याच्छ्वेतवर्णं तु सक्तुकम् ॥ २१ ॥

मधूच्छिष्टाकृतिर्देवि ! कर्दमे विषमुत्तमम् ।
विषखण्डेषु भग्नेषु दृश्यन्ते येषु बिन्दव ॥ २२ ॥

श्वेतरक्तपीतवर्णा कृष्णा विप्रादय क्रमात् ।
श्वेता रसायने रक्ता वश्ये पारदकर्मणि ॥ २३ ॥

क्षुद्रकर्मणि पीतास्स्यु कृष्णवर्णास्तु मारणे ।
विष युक्त्याऽमृत देवि ! तदयुक्त्या विष भवेत् ॥

तस्माद्युक्तया विष सेव्यमयुक्तया न कदाचन ।
रसाम्रहेमकान्ताना वीर्येण सदृश विषम् ॥ २५ ॥

[विषशुद्धि ।]

रक्तसर्षपतैलेन लिप्ते वस्त्रे च बन्धयेत् ।
त्रिदिनान्ते समुद्धृत्य टङ्कणेन सग विषम् ॥ २६ ॥

मर्दयेच्छ्लक्ष्णचूर्णं तत्कारयेच्च विशुद्ध्यति ।
रोगे रसायने योज्य सिद्धिद स्याद्वरानने ! ॥

[विषरसायनम् ।]

शुद्धदेहो विरेकाद्ये पथ्याशी विषभुग्भवेत् ।
क्रमेण सेवनीय तत्सर्षप राजसर्षपम् ॥ २८ ॥

मुद्गवीहियवा माषा गुञ्जामात्र पराधि ।
शर्करासहित सेव्य श्वेत तदमृत भवेत् ॥ २९

पटोलीं गिरिपर्णीं वा नृमूत्रैर्विषजित्पृथक् ।
लायावाह्याचतुर्वर्णगर्दभ सपुटीकृतम् ॥ ४१ ॥

स्तम्भस्तोभननिर्वाहनिर्विषीकरण तथा ।

"ला म्रों ला" अनेन मन्त्रेण स्तम्भनम् । शीतजलघट अभिमन्त्र्य विषातुरस्य मस्तके जल ढालयेत् । विष नाक्रामति ।

"या म्रों या" अनेन स्तोभनमन्त्रेण विषातुरस्य शिखिनमन्धयेत् ।

"वा म्रों वा" अनेन निर्वाहमन्त्रेणार्कदण्ड वा धुत्तूरकाष्ठदण्डं वाऽभिमन्त्र्य विषातुरस्य सर्वाङ्ग स्पृष्ट्वा विष निर्वाहयेत् ॥

"हा म्रों हा" अनेन निर्विषीकरणमन्त्रेण निर्विषीकरणार्थं विषातुरस्य सर्वांग दण्डेनापामार्जयेत्, स्वस्थो भवति ॥

जीर्णं श्वेत शरीरे चेत्पिचान्त वमन प्रिये ! ॥ ४२ ॥

आमान्त रेचन कार्यं तण्डुलीयकमूलभुक् ।
सेवेत मास सघृत विषदोषहर भवेत् ॥ ४३ ॥

पूर्वोक्तमात्रासेवी यो महाव्याधेर्विमुच्यते ।
देवि ! षण्मासयोगेन जरापलितखण्डनम् ॥ ४४ ॥

सवत्सरोपयोगेन जीवेच्चन्द्रार्कतारकम् ।
हिमशीतवसन्तेषु योज्य विषरसायनम् ॥ ४५ ॥

ग्रीष्मवर्षशरत्स्वेतन्न प्रयोज्य कदाचन ।
वातस्थविरगर्भिण्य क्षुत्तृड्घर्मश्वपीडिता ॥ ४६ ॥

नपुसका गदक्षीणा पित्तक्रोधाधिकास्तथा ।
यक्ष्मिणो नैव योग्यास्स्युस्सदा विषरसायने ॥ ४७ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ चतुर्दशोल्लास ॥

॥ पञ्चदश उल्लासः ॥

दिव्यौषधिरसायनानि ॥

श्रीभैरवी—

मलमायाविहीनेश ! जराजन्मगदापह ! ।
त्वत्प्रसादेन विदितं रसादीनां रसायनम् ॥ १ ॥

इत परमपि स्वामिन्! शुश्रूषे किमपि प्रभो ! ।
सुखोपायोपयोग्यं च दिव्यौषधिरसायनम् ॥ २ ॥

ब्रूहि मे तद्विधं दिव्यं सर्वसिद्धि प्रदायकम् ।

श्रीभैरव —

१. ब्रह्मकल्पः ॥

[ब्रह्मवृक्षतैलकल्प.]

वक्ष्यामि ब्रह्मवृक्षादि दिव्यौषधिरसायनम् ॥ ३ ॥

तत्रादौ ब्रह्मवृक्षस्य शृणु देवि ! रसायनम् ।
ब्रह्मवृक्षस्य बीजानि विदध्यान्निस्तुषाणि च ॥ ४ ॥

परिशोष्यातपे तीव्रे सूक्ष्मचूर्णानि कारयेत् ।
धात्रीफलेन सप्ताहं भावयेत्पयसाऽथवा ॥ ५ ॥

चक्रयन्त्रे क्षिपेच्चानि ततस्तैलमाहरेत् ।
इत्थमुत्थापितं तैल दीपघ्नं च रसायनम् ॥ ६ ॥

ब्रह्मबीजजतैलस्य प्रस्थमाज्य च तत्समम् ।
निक्षिप्त स्निग्धभाण्डे च धान्यराशौ विनिक्षि
मासार्धमासं देवेशि ! तस्मात्तैल समाहरेत् ।
शुद्धदेहो विरेकाद्यैरर्चितागिनगुरुद्विज. ॥ ८ ॥

द्विपलं च गवां क्षीरं तत्तैलं निष्कमात्रकम् ।
संमिश्र्य च पिबेत्प्रातः पथ्याशी स्याज्जितेन्द्रियः ॥

एवं द्वितीयेऽपि दिने ह्येकाहान्तरिते क्रमात् ।
निष्कवृद्धिर्भवेदेवं यावत्षोडशनिष्ककम् ॥ १० ॥

एतत्तैलस्य परमा मात्रा ह्यस्यैवमीरिता ।
पीतमात्रे क्षणं मूर्च्छां जायते सिञ्चयेन्मुखम् ॥ ११ ॥

भवुद्धे सघृतं दद्याद्धुम्यान्नं शर्करान्वितम् ।
एवं तैलोपयोगेन मासाज्ज्ञानी भवेन्नरः ॥ १२ ॥

सकृद्ग्राही मुक्तान्तश्च षोडशाब्द इव स्थितः ।
द्वितीये नागबलवान् सर्वव्याधिविवर्जितः ॥ १३ ॥

इन्द्रोपमबलो धीरश्चतुर्थे मासि च क्रमात् ।
वज्रदेहो दिव्यदृष्टिः पञ्चमे खेचरो भवेत् ॥ १४ ॥

अणिमादिगुणोपेतस्सर्वगस्सर्वकालिक. ।
षष्ठे मासि स्वयं स्रष्टा भोक्ता हर्ता त्रिमूर्तिवत् ॥१५॥

वर्षैकसेवनाद्देवि ! भवेत्साक्षात्सदाशिवः ।
यावत्तैलोपजीवी स्यात्तावत्क्षीरौदनाशनः ॥ १६ ॥

वमनादिविशुद्धाङ्गः कृत्वा वैद्यद्विजार्चनम् ।
प्रातर्गोक्षीरकुडुवं तैलं किंशुकबीजजम् ॥ १७ ॥

कुडुवं पूर्ववज्जातमेकीकृत्य द्वयं पिबेत् ।
तत्पानमात्रे मूर्च्छां स्यात्कुर्यात्तं भस्मशायिनम् ॥ १८ ॥

सप्तरात्रे प्रबुद्धस्याद्भुद्धवच्छयने स्थितः ।
नाङ्गानि चालयेदेष जायते विचलेक्षणः ॥ १९ ॥

तैले जीर्णे समापन्ने संज्ञा भवति भैरवि ! ।
गोक्षीरं तस्य दातव्यं प्रत्यहं दशवासरम् ॥ २० ॥

एवमेकाब्दयोगेन शुभंयुर्दर्शनश्रुचिः ।
जीवेद्वत्सरादिनं ज्ञानी वलीपलितवर्जितः ॥ ४२ ॥

[ब्रह्मवृक्षपञ्चाङ्गकल्पः ।]

पञ्चाङ्गं ब्रह्मवृक्षस्य विधिवत्तत्समाहरेत् ।
छायाशुष्कं प्रकुर्वीत चूर्णितं पटशोधितम् ॥ ४३ ॥

कर्षमात्रं लिहेच्छुद्धः क्षौद्राज्याभ्यां दिनोदये ।
वलीपलितनिर्मुक्तो वत्सराज्जायते नरः ॥ ४४ ॥

[ब्रह्मवृक्षमूलगुग्गधात्रीकल्पः ।]

अतिस्थूलतरं दीर्घं भेदयेद्ब्रह्मभूरुहम् ।
मूले त्रिहस्तशेषं च तदग्रे गर्तमारचेत् ॥ ४५ ॥

धात्रीफलानि पक्वानि तत्र संपूरयेत्क्षिपेत् ।
तच्छिन्नकाष्ठशेषेण तद्गर्तं च निरोधयेत् ॥ ४६ ॥

कुशैस्संवेष्टयेत्सम्यगामूलाग्रं च लेपयेत् ।
मृद्गोमयाभ्यां मतिमांस्ततो वस्त्रेण वेष्टयेत् ॥ ४७ ॥

पुनर्मृद्गोमयाभ्यां च लेपयेच्छोपयेत्सुधी ।
सम्यक्छुष्के च परितः करीषैः परिपूरयेत् ॥ ४८ ॥

दहेत्तु शीतलीभूते सान्द्रं तत्फलमाहरेत् ।
भाण्डे क्षौद्राज्यभरिते क्षिपेद्धात्रीफलं च तत् ॥ ४९ ॥

भूगृहे वा निवाते वा प्रदेशे च वसन्सुखी ।
यथेष्टं भक्षयेन्नित्यं क्षीराहारी जितेन्द्रियः ॥ ५० ॥

षण्मासात्पश्यति छिद्रं निधानानि च भूतले ।
त्यजेत्त्वचं सर्प इव जीवेद्ब्रह्मयुगं नरः ॥ ५१ ॥

२. श्वेतब्रह्मवृक्षकल्पः ॥

[श्वेतब्रह्मवृक्षपञ्चाङ्गकल्पः ।]

चूर्णयेच्छ्वेतपालाशपञ्चाङ्गं शोषयेत्प्रिये ! ।
छायाया वस्त्रगलितं मधुना च लिहेत्प्रिये ! ॥ ५२ ॥

कर्षमात्रं निमासान्तर्जरामृत्युं जयेन्नरः ।
संवत्सराच्च ब्रह्मायुस्सिद्धः सर्वगतो भवेत् ॥ ५३ ॥

[श्वेतब्रह्मबीजकल्पः ।]

श्वेतपालाशबीजानि चैकैकानि समाहरेत् ।
अजाघृतेनानुदिनं मासान्मृत्युं जरां जयेत् ॥ ५४ ॥

सवत्सराद्ब्रह्मयुग जीवेत्सिद्धिपुरोगम· ।
ये प्रोक्ता रक्तपालाशतैलत्वक्पर्णकादिषु ॥ ५५ ॥
ते गुणाश्वेतपालाशे सन्ति साधकसिद्धिदा ।

[ब्रह्मवृक्षकल्पसिद्धि· ।]

वक्ष्यामि ब्रह्मवृक्षस्य कल्पसिद्धिप्रद मनुम् ॥ ५६ ॥

ॐ ह्रीं अमृत कुरु कुरु अमृतमालिन्यै नम. ॥

पूर्वं विंशतिसाहस्रं पुरश्चरणमाचरेत् ।
सुधाकुम्भवराक्षस्रग्जानमुद्रा करावुभै ॥ ५७ ॥

बिभ्राणां मौक्तिकं पाश ध्यायेदमृतमालिनीम् ।
अहूणेऽष्टोत्तरशत भक्षयेत्ससवारकम् ॥ ५८ ॥

चन्द्रसूर्योपरागादिकालेष्वष्टसहस्रकम् ।
मन्त्र विना न सिद्धिस्यात्कल्पकोटिशतैरपि ॥ ५

समन्त्रे शीघ्रसिद्धिस्याच्चरेन्मन्त्रपुरस्सरः ।

३. मुण्डीकल्पः ॥

अथ मुण्डीं प्रवक्ष्यामि साधकेष्टार्थदायिनीम् ॥ ६० ॥

चतुर्विधा भवेत्सा च रक्ता पीता सिताऽसिता ।
पुष्यार्के पूर्णमास्यां वा रेवत्यां श्रवणेऽपि वा ॥ ६१ ॥
उपरागादिकाले वा सिद्धयोगेषु वा हरेत् ।
कैदारीं मुण्डिनीं तां च बलिपूजनपूर्वकम् ॥ ६२ ॥

समाहरेत्कृतस्नानो मौनी मन्त्रं समुच्चरन् ।

ॐ अमृतोद्भवाय अमृतं कुरु कुरु स्वाहा ह्रीं सः ॥

मन्त्रं द्वादशसाहस्रं पुरश्चर्यां समाचरेत् ॥ ६३ ॥

मूल नालं फलं पुष्पं पत्रं पञ्चाङ्गमीरितम् ।
स पञ्चाङ्गं हरेन्मुण्डीं सम्यक्छीतेन वारिणा ॥ ६४ ॥

प्रक्षाल्य शोषयेत्ता च छायाया चूर्णयेत्ततः ।
वस्त्रेण शोधयेत्कुम्भे नूतने स्थापयेत्क्रमात् ॥ ६५ ॥

विशुद्धदेहस्तच्चूर्णं कर्षं गोपयसा सह ।
पिबेज्जीर्णे च भैषज्ये घृतमादौ पिबेन्नरः ॥ ६६ ॥

ततो भुञ्जीत लवणतैलाम्लादिविवर्जितम् ।
घृतपक्वं समधुरं यष्टिकान्नं पयोऽधिकम् ॥ ६७ ॥

षण्मासाज्जायते सिद्धिस्त्वचं सर्प इव त्यजेत् ।
पलितादिविनिर्मुक्तो दिव्यदृष्टिर्दृढं वपुः ॥ ६८ ॥

मत्तनागबलो धीरो युवा कन्दर्पविग्रहः ।
संवत्सरात्सर्वसिद्धिर्भवेद्दृढमायुषो नरः ॥ ६९ ॥

घृतोपयुक्ता सा मुण्डी पूर्ववत्फलदा भवेत् ।

४ देवदालीकल्प ॥

अथ वदयाम्यह देवि ! देवदालीरसायनम् ॥ ७० ॥

श्वेता कृष्णा च पीता च देवदाली त्रिधा मता ।
श्वेता रोगप्रशमनी कृष्णा पीता विशेषत ॥ ७१ ॥
रसायने च फलदा लोहकर्मणि पार्वति ! ।
चन्द्रसूर्योपरागेषु पूर्णिमाया सुरार्चिते ! ॥ ७२ ॥

त्रयोदश्या कृष्णपक्षे पञ्चम्या वा यथाविधि ।
शुभाहे शुभनक्षत्रे चाहरेन्मन्त्रपूर्वकम् ॥ ७३ ॥

ॐ अमृतगणरुद्रगणान्ताय स्वाहा ।

अष्टोत्तरशत जप्त्वा बलिपूर्वं समाहरेत् ।

ॐ नमो भगवते रुद्राय फट् स्वाहा ॥

साधकस्य शिखाबन्धनमन्त्र ।

देवदाल्याश्च पञ्चाङ्ग छायाया शोषयेत्सुधी ॥ ७४ ॥

वस्त्रेण शोधयेत्सम्यग्जल्पक्षीरेण भक्षयेत् ।
पचेत्ता लोहपात्रेण ततो मन्दाग्निना सुधी ॥ ७५ ॥

मध्वाज्याभ्या लिहेत्कर्षं शुद्धात्मा सप्तवासरम् ।
तस्य दिव्या भवेत्प्रज्ञा रोगहन्माससेवया ॥ ७६ ॥

द्विमासभक्षणेनैव निध्यादि पश्यति ध्रुवम् ।
धात्रीफलरस क्षौद्र देवदालीरस घृतम् ॥ ७७ ॥

प्रत्येक कर्षमात्र स्यात्प्रत्यह च पिबेन्नरः ।
एकविंशद्दिनादूर्ध्वं मेधावी श्रुतधारक ॥ ७८ ॥

पश्चाद्र चूर्णयेद्देवदाल्या वस्त्रेण शोधयेत् ।
शिवाम्बुना वा पयसा गोमूत्रेर्वा पिबेत्सदा ॥ ७९ ॥

पूर्ववत्सिद्धिदा सा स्यात्सर्वकुष्ठापहारिणी ।
कामिलाप्लीहपवनशूलं हन्ति भगन्दरान् ॥ ८० ॥
तद्रसो गन्धकोपेतो सर्वलोहं विलापयेत् ।
वध्नाति च रसं सम्यक् समं मूर्च्छति तत्क्षणात् ॥
गन्धबलजागान्धारीदेवदालीरसैस्तथा ।
लेपनं मेषतैलेन स्तम्भयेदग्निमुज्ज्वलम् ॥ ८२ ॥
बीजानि देवदाल्याश्च सगुडानि च मर्दयेत् ।
तेन वर्तिं प्रकुर्वीत अर्शोघ्नी स्याद्गुदाङ्कुरे ॥ ८३ ॥
रसेन देवदाल्याश्च नयनं त्वञ्जयेन्नरः ।
पश्यत्यसौ भूतजालं तस्मै सर्वं प्रयच्छति ॥ ८४ ॥
घृतं धात्रीफलरसे देवदालीरसे मधु ।
रसं च लक्ष्मणायाश्च सर्वमेकपलं पिबेत् ॥ ८५ ॥
त्रिदिनं ऋतुकाले तु स्त्रीणां पुत्रप्रदायकम् ।
देवदालीरसं क्षीरं मध्वाज्याभ्यां समं लिहेत् ॥ ८६ ॥
पुंसां कोमलबीजानां बीजं गर्भप्रदं भवेत् ।
भृङ्गराड् वाकुची वह्निस्सर्पाक्षी देवदालिकम् ॥ ८७ ॥
शिवांबुना चानुदिनं पिबेत्कर्षं महेश्वरि ! ।
धरित्र्याः पश्यति छिद्रं वर्षान्मृत्युं जरां जयेत् ॥८८॥
पुनर्नवादेवदाल्योः पलं क्षीरयुतं पिबेत् ।
शिवाम्बुना देवदालीं ससर्पाक्षीपलं पिबेत् ॥ ८९ ॥
पूर्ववज्जायते सिद्धिः शीघ्रमेव वरानने ! ।
शिवांबुना देवदाल्या निर्गुण्ड्याश्च पलं पिबेत् ! ॥
संवत्सराज्जरां हन्याज्जीवेद्दाचन्द्रतारकम् ।
" ॐ अमृते कुरु कुरु अमृतेश्वराय स्वाहा "

एतन्मन्त्रं जपेदादौ देवदार्व्युपयोगके ॥ ९१ ॥

५. श्वेतार्ककल्पः ॥

[श्वेतार्कमूलकल्पः ।]

अथ श्वेतार्कमूलस्य कल्पं वक्ष्याम्यहं शृणु ।
श्वेतार्कमूलं पुष्यार्कं गृहीत्वा काष्ठवर्जितम् ॥ ९२ ॥
शुद्धां त्वचं च छायायां शोषयेत्पटशोधितम् ।
चूर्णं कृत्वा कर्षमेकं सेव्यं गोपयसा सह ॥ ९३ ॥
पलद्वयेन षण्मासात्सर्वव्याधीञ्जरां हरेत् ।
संवत्सराद्ब्रह्मदिनत्रयं जीवेन्न संशयः ॥ ९४ ॥

[श्वेतार्कपर्णकल्पः ।]

श्वेतार्कपर्णस्वरसं भृङ्गराजरसं समम् ।
एकीकृत्यातपे शोष्यं यावच्चूर्णत्वमाप्नुयात् ॥ ९५ ॥
चतुर्गुणे गवा क्षीरे तत्पचेन्मृदुवह्निना ।
यावत्पिण्डं भवेत्तावत्सेव्यं तत्कर्षमात्रकम् ॥ ९६ ॥
गवां क्षीरं पलं पेयं पूर्ववत्फलमाप्नुयात् ।
"ॐ आं हंसमालिनि स्वाहा" अयं भक्षण मन्त्रः ॥

६. हस्तिकर्णीकल्पः ॥

[हस्तिकर्णीपलकल्पः]

अथेन्दुवारसंयुक्तत्रयोदश्यां समाहरेत् ॥ ९७ ॥
हस्तिकर्णीपलाशानि छायाशुष्काणि चूर्णयेत् ।
पलं सेव्यं गवां क्षीरं वर्षान्मृत्युं जरां जयेत् ॥ ९८ ॥
जीवेद्ब्रह्मायुषं मर्त्यस्सिद्धसाध्यादिसेवितः ।

[हस्तिकर्णीपञ्चाङ्गकल्पः ।]

पञ्चाङ्गं हस्तिकर्ण्याश्च कुर्याच्छायाविशोषितम् ॥९९॥

मासैकमुदकैस्सार्धं कपं प्रत्यहमश्नुयात् ।
सौवीरदधिदुग्धाज्यतक्षौद्रैर्यथाक्रमम् ॥ १०० ॥
एकैकं प्रतिमासं च सेव्य वर्षाच्च सिध्यति ।
जीवेद्ब्रह्मदिन सिद्धो वज्रकायो महाबल. ॥ १०१ ॥

" ॐ अमृताय अमृतं गृह्णामि स्वाहा ॥ "
अय ग्रहण मन्त्र. ॥

" अमृतकुटीजाताना अमृतं कुरु कुरु स्वाहा ॥ "
अनेन मन्त्रेण पूजयेत् ॥

" ॐ अमृतोद्भवाय अमृतं कुरु कुरु नित्य नमो नम. ॥ " अय भक्षणमन्त्र ॥

७. रुदन्तीकल्पः ॥

अथ वक्ष्याम्यह दिव्य रुदन्तीकल्पमुत्तमम् ।
चणपत्रोपमै पत्रैः पुष्पैरपि च तादृशै ॥ १०२ ॥

रुदन्ती नाम विख्याता ह्यधस्ताज्जलवर्षिणी ।
रोदितीव जनान्दृष्ट्वा म्रियमाणान्गदाकुलान् ॥ १०३ ॥

चतुर्विधा च सा ज्ञेया पीता रक्ता सिताऽसिता ।
शुक्लपक्षे शुभदिने रुदन्तीं ता समाहरेत् ॥ १०४ ॥

समूला शोपयेद्धीमान् छायाया चन्त्रशोधिताम् ।
विशुद्धदेहस्सेवेत विडालपदमात्रकम् ॥ १०५ ॥

क्षौद्राज्याभ्यामनुदिनं भुक्ति. क्षीराज्यसयुता ।
जीर्णायां सप्तमी भूत्वा वर्षाज्जेजोबलान्वित. ॥ १०६ ॥

परमायुर्भवेन्मर्त्यो जराव्याधिविवर्जित ।
तैल कतकमूलोत्थ कुर्यात्पातालयन्त्रके ॥ १०७ ॥

गर्भयन्त्रेऽथवा क्षाल्य पञ्चाशद्वारमम्बुना ।
नालिकेराबुना वाऽथ कृत्वेत्थ तैलशोधनम् ॥ १०८ ॥

पश्चाच्च च रदन्त्याश्च छायाशुष्क विचूर्णयेत् ।
तदर्धं मुसलीचूर्णं मुसल्यर्धपलत्रयम् ॥ १०९ ॥

एतत्त्रिचूर्णं समिश्र कर्षं कतकतैलत् ।
लिहेदनुदिन शुद्धस्तद्वृद्धिस्स्यात्पलावधि ॥ ११० ॥

सवत्सराद्वज्रकाय स जीवेद्ब्रह्मणो दिनम् ।

८ निर्गुण्डीकल्प ॥

[निर्गुण्डीमूलकल्प ।]

अथ वच्मि शुभ दिव्य निर्गुण्डीकल्पमुत्तमम् ॥ १११ ॥

स्नात पुष्यरवौ ग्राह्या निर्गुण्डीमूलसभवा ।
त्वक्छोपणीया छायाया तच्चूर्णं कर्षमात्रकम् ॥११२॥

पलमाजमूत्रेण पिबेच्छुद्धोऽनुवासरम् ।
षण्मासाद्दिव्यदेहस्स्यान्मत्तनागबलान्वित ॥ ११३ ॥

मध्याह्नक्षीरलुलित तच्चूर्णं स्निग्धभाण्डके ।
पिधाय धान्यराशौ तु मासमेक तु निक्षिपेत् ॥११४॥

मासान्ते तत्समुद्धृत्य शुद्धाङ्गो द्विपल सदा ।
सेवेत वर्षपर्यन्त जीवेदाचन्द्रतारकम् ॥ ११५ ॥

अथवाऽर्धपल चूर्णं तदीय सघृत पिबेत् ।
पूर्ववज्जायते सिद्धिर्निरारोगविधिर्नृ ॥ ११६ ॥

वचासुण्ठीनिम्बरागुडूचीभृङ्गराड्समा ।

एषां समांशं संयोज्य निर्गुण्डीमूलचूर्णतः ॥ ११७ ॥
क्षौद्राज्याभ्यां लिहेद्भक्षादन्वहं पलमात्रकम् ।
आयुर्विरिञ्चित्रिदिनं भवेन्मृत्युजरोज्झितम् ॥ ११८ ॥
निर्गुण्डीमूलचूर्णं तु क्रिमिघ्नकटुकैस्समम् ।
पलमात्रमजाक्षीरैर्नित्यं शुद्धः पिबेद्बुधः ॥ ११९ ॥
वलीपलितनिर्मुक्तो निर्गदस्स्यात्त्रिमासतः ।

[निर्गुण्डीपत्रकल्पः ।]

निर्गुण्डीपत्रजद्रावं भाण्डे मृद्वग्निना पचेत् ॥ १२० ॥
गुडवत्पाकमापन्नं तं पिबेन्निष्कमात्रकम् ।
दिने दिने निष्कवृद्धिर्यावद्द्विपलिकं भवेत् ॥ १२१ ॥
तेनवान्तिर्विरेकस्स्यान्निर्यान्ति क्रिमयः परम् ।
अपानतो देहगता मुखनासाक्षिकर्णतः ॥ १२२ ॥
क्षयकुष्ठादिरोगाश्च नश्यन्ति मुनिवासरात् ।
मासत्रये जरां हन्ति जीवेद्वर्षशतत्रयम् ॥ १२३ ॥

[निर्गुण्डीपञ्चाङ्गकल्पः ।]

पञ्चाङ्गचूर्णं निर्गुण्ड्यास्तिलतैलेन सेवितम् ।
निष्कादिपलपर्यन्तं त्रिमासेन जरां जयेत् ॥ १२४ ॥
अशीतिं वातजान्रोगान् कुष्ठानपि गलामयान् ।
आस्यार्त्युपकुशादींश्च जयेत्तत्पर्णचर्वणात् ॥ १२५ ॥
सिन्धुवारकपञ्चाङ्गचूर्णं मधुघृतप्लुतम् ।
पलमात्रं लिहेन्मातस्ततो जीर्णं गवां पयः ॥ १२६ ॥
पिबेद्यथाऽनलबलं भुञ्जीतान्नौ क्रमेण च ।
निर्व्रति निवसेद्धीमान्सिद्धिमाप्नोति वत्सरात् ॥१२७॥

सिद्धदेहस्य मूत्रेण मिश्रेते विषपारदौ ।
काले काले यथा प्राप्त पञ्चाङ्ग सिन्धुवारकात् ॥
छायाया शोषित चूर्ण त्रिमधुत्रिफलायुतम् ।
स्निग्धभाण्डे धान्यराशौ त्रिमास स्थापयेत्तत ॥१२९॥
निष्कादिपलपर्यन्त सेवेताकर्षक सुधी ।
सर्वव्याधिविनिर्मुक्तो जरामरणवर्जित ॥ १३० ॥
"ॐ नमो मायागणपतये कुबेराय स्वाहा"
अय भक्षणमन्त्र ॥

९ शुनकशाल्मलीकल्प ॥

अथ वक्ष्यामि देवेशि ! कल्प शुनकशाल्मले ।
अष्टम्या कृष्णपक्षस्य स्नात्वा रात्रौ समाहित ॥१३१॥
आवेष्टय कृष्णसूत्रैश्च वृक्ष शुनकशाल्मलिम् ।
तत्राघोर जपेद्वीरस्सहस्रवसुसमितम् ॥ १३२ ॥

[शुनकशाल्मलीमूलकल्प ।]

तन्मूलवल्कल ग्राह्य छायाया शोषयेत्तत ।
चूर्ण कृत्वा तु मध्वाज्यै खादेत्प्रात पल पलम् ॥
वर्षाद्विलिजरामुक्तस्स जीवेद्वत्सराणो दिनम् ।

[शुनकशाल्मलीपुष्पकल्प ।]

तस्याष्टादश पुष्पाणि गोक्षीरेऽष्टपले पचेत् ॥ १३४ ॥
पुष्पवर्ज्यं पिबेत्क्षीरमेव च प्रतिवासरम् ।
मासेन दिव्यदेहस्स्याज्जीवेद्वत्सरादिनत्रयम् ॥ १३५ ॥

[शुनकशाल्मलीफलकल्प ।]

तत्फल तु गवा क्षीरे पाचयेत्कान्तपात्रके ।
फल त्यक्त्वा पिबेत्क्षीर दीप्तेऽग्नौ क्षीरभोजनम् ॥

मासषट्कप्रयोगेण दिव्यदेहो भवेन्नरः ।
जीवेत्कल्पान्तपर्यन्तं वायुवेगी महाबलः ॥ १३७ ॥
तस्य मूलपुरीषाभ्या शुल्वं स्वर्णं भवेद्ध्रुवम् ।

१०. पथ्याकल्पः ॥

[पथ्योत्पत्तिः]

अथातस्संप्रवक्ष्यामि पथ्याकल्पमनूपमम् ॥ १३८ ॥
येन रोगा विनश्यन्ति सिध्यन्ति च मनोरथाः ।
पीत्वाऽमृतं शचीनाथः प्रीत्या शच्यै समार्पयत् ॥
तयोर्हृष्टसुखाभोजगलितामृतबिन्दव. ।
समधा भुवि ते जाता महावीर्यास्थिरायुषः ॥ १४० ॥
ते समदेशेषूत्पन्नास्समधा नाम धारकाः ।
विन्ध्यदेशे कान्यकुब्जे सौराष्ट्रे हिमवद्गिरौ ॥१४१॥
गङ्गातटे च काश्मीरे वैन्यदेशे यथाक्रमम् ।
विजया रोहिणी चैव पूता स्यात्पृताऽमृता ॥१४२॥
जीवन्ती त्वभया जाता देशे देशे यथाक्रमम् ।
उत्तमा मध्यमा नीचास्त्वय पक्वास्तु शोभनाः ॥
हरीतक्या रसा पञ्च विद्यन्ते लवणोज्झिताः ।
स्वाद्वम्लतिक्तकटुकक्षुवराश्च यथाक्रमम् ॥ १४४ ॥
स्युर्मज्जरसयुक्तत्वाद्भासेषु क्रमशो (सा)ः ।
अलाबुकर्णी वृत्ता च चतुरङ्गुलचर्मका ॥ १४५ ॥
पञ्चास्ता मासला स्वर्णवर्णा कृष्णा स्मृताः क्रमात् ।
या मज्जन्ती जले प्राह्या गुर्वी स्निग्धा घनाघना ॥
द्विकर्षमात्रा सा श्रेष्ठा कर्षमात्रा तु मध्यमा ।
अर्धकर्षा भवेन्नीचा पथ्या फलमुदाहृतम् ॥ १४७ ॥

क्रिमिजुष्टा वह्निदग्धा नष्टा पङ्कजलार्दिता ।
स्फुटिता चोपरस्था च वर्जनीया हरीतकी ॥ १४८ ॥

[पथ्याकल्प ।]

शुद्धदेशे पुण्यदिने ग्रहणे चन्द्रसूर्ययो ।
गन्धाद्यै पूजयित्वाऽऽदौ प्रार्थयित्वा जपेत्सुधी ॥

गायत्रीशतमावृत्त्य पथ्यामेव समाहरेत् ।
गुण्ठ्या वाऽथ गुडेनापि सैन्धवेनाथवा शिवाम् ॥

सेवेत दीपन तेन करोत्यामविनाशनम् ।
क्षौद्रेण वा गुडेनापि पिप्पल्या नागरेण वा ॥ १५१ ॥

सैन्धवेनाथवा सेव्या शुद्धाङ्ग प्रतिवासरम् ।
द्वे द्वे पथ्ये द्वादशाब्द तेन जीवेच्छत समा ॥

द्विनिष्कचूर्णं पथ्याया निष्कैक लोहभस्म च ।
लोडयित्वा गोघृतेन कान्तपात्रे च लेपयेत् ॥ १५३ ॥

अधोमुखीकृत पात्र स्थापयेत्तद्दिवानिशम् ।
प्रातश्शुद्धवपुर्लेह्य जरां मृत्यु जयेत्सुधी ॥ १५४ ॥

शाल्मली छिद्रयित्वाऽऽदौ तदन्तर्निक्षिपेच्छिवा ।
आपण्मास परस्तास्तु ग्राह्या चैकैकशोऽन्वहम् ॥१५५॥

सेवेत पथ्या शुद्धाङ्गस्तस्य मृत्युर्नरा न हि ।

११ आमलकीकल्प ॥

अथ वक्ष्यामि देवेशि ! कल्पमामलकीभवम् ॥१५६॥

चैलादौ ग्राहयेद्धात्र्यास्सुपक्वानि फलानि च ।
हरीतकीवद्ग्राह्याणि छायाशुष्काणि चूर्णयेत् ॥१५७॥

कर्षं जलेन वाऽऽज्येन मधुना वा फलं निशि ।
वर्धयेज्जाठरं वह्निमिन्द्रियाणां प्रसादकृत् ॥ १५८ ॥

धात्रीचूर्णं लोहभस्म क्षौद्राज्याल्लिप्तं लिहेत् ।
वलीपलितमृत्युघ्नं वत्सरात्पूर्ववद्विधिः ॥ १५९ ॥

क्षीरपक्वं च तद्भक्ष्यं पूर्ववत्सिद्धिदायकः ।
धात्रीचूर्णं भृङ्गचूर्णं मध्वाज्यसहितं लिहेत् ॥ १६० ॥

वलीपलितनिर्मुक्तो वत्सराद्भवति ध्रुवम् ।
निशामलकयोश्चूर्णं मध्वाज्यसहितं लिहेत् ॥ १६१ ॥

पूर्ववच्च फलं देवि! नात्र कार्या विचारणा ।

१२. त्रिफलाकल्पः ॥

अथ ब्रवीमि ते देवि! त्रिफलाया रसायनम् ॥१६२॥

एकं हरीतकीभागं द्विभागं च विभीतकम् ।
चतुर्भागं तथा धात्री सर्वमेकत्र चूर्णयेत् ॥ १६३ ॥

पिप्पल्या वा तुगाक्षीर्या सैन्धवैर्मधुकेन वा ।
क्षौद्रेण वा सर्पिषा वा वचया सितयाऽथवा ॥ १६४ ॥

सुवर्णै रजतैश्शुल्वैर्वंगैर्नागैस्तथाऽऽयसैः ।
संयुक्ता त्रिफला लीढा जरामरणनाशिनी ॥ १६५ ॥

त्रिफलायास्समांशास्तु योज्याश्चैकैकशस्तु ताः ।
पिप्पल्याद्यास्तु सौवर्णभस्मादीनां च कथ्यते ॥ १६६ ॥

सौवर्णं पणमात्रं च द्विपणं राजतं भवेत् ।
पणार्धं शुल्वचूर्णं च द्विपणं नागवङ्गजम् ॥ १६७ ॥

चूर्णं तथाऽऽयसं प्रोक्तं पणपञ्चकमात्रकम् ।
एवं यस्त्रिफलासेवी जीवेदाचन्द्रतारकम् ॥ १६८ ॥

एकां हरीतकीं प्रातर्भुक्तेः प्राग् द्विविभीतकम् ।
चतुरामलकं रात्रौ सर्वं ते घृतपाचिताः ॥ १६९ ॥

सेवेतावत्सरं धीमान् वलीपलितवर्जितः ।
अन्नोदकेन संपेष्य कान्तपात्रे लिहेन्निशि ॥ १७० ॥

सक्षौद्रं तल्लिहेत्मातरायुरारोग्यवर्धनम् ।
त्रिफलां भावयेत्पूर्वं खदिरासनयूपतः ॥ १७१ ॥

त्रिस्सप्तवारं देवेशि ! ततः क्षौद्रघृताप्लुताम् ।
सेवेतानुदिनं कर्षं वर्षादिन्द्रायुषो भवेत् ॥ १७२ ॥

विडङ्गभृङ्गखदिरत्रिलवृक्षरसैः पृथक् ।
पृथक्सप्तदिनं घर्मे भावयेत्त्रिफलां प्रिये ! ॥ १७३ ॥

भक्षयेद्गुडसर्पिर्भ्यां कर्षं वर्षास्सुरोपमः ।
त्रिफलायाश्शतफलं चूर्णं भृङ्गरसै. पुरा ॥ १७४ ॥

त्रिस्सप्तवासरं भाव्यं लिहेन्मधुघृतान्वितम् ।
पलार्धं प्रत्यहं प्रातर्जीर्णेऽद्याद्घृतभक्तकम् ॥ १७५ ॥

वर्षात्प्रसन्नदृष्टिश्च जीवेत्पट्छतवत्सरम् ।
महाबलः कृष्णकेशस्स्मृतिबुद्धिसमन्वितः ॥ १७६ ॥

युवा शतस्त्रीरन्ता च धीरस्स सुभगो भवेत् ।

१३. शुण्ठीकल्पः ॥

अथ वक्ष्यामि गिरिजे ! दिव्यं शुण्ठीरसायनम् ॥

श्रेष्ठं नागरमादाय चूर्णयेत्पटगालितम् ।
गुडं चास्य समं योज्यं मधुना गोघृतेन च ॥ १७८ ॥

स्निग्धभाण्डे विनिक्षिप्य धान्यराशौ सुयन्त्रितम् ।
द्विमण्डलात्समाहृत्य शुद्धाङ्गः पुण्यवासरे ॥ १७९ ॥

जीवेद्वर्षशतं पूर्णं वलीपलितवर्जितः।

१५. चित्रकल्पः॥

अथ चित्रककल्पं ते वक्ष्यामि शृणु पार्वति! ॥१९१॥

चित्रकस्त्रिविधो ज्ञेयः कृष्णो रक्तस्सितश्शिवे!।
कृष्णो रसायने रक्तो लोहे रोगे सितो भवेत्॥१९२॥

श्रेष्ठमध्यकनीयांसो न हेमन्ते समाहरेत्।
वसन्ते कृष्णपक्षस्थां कृष्णाम्बरधरश्शुचिः॥ १९३॥

कृष्णगन्धाक्षतैः पुष्पैः पूजयेत्कृष्णसूत्रकैः।
परिवेष्ट्य च पूर्वेद्युर्दद्यात्कृष्णोदनं बलिम्॥ १९४॥

प्रातर्मौनी खनेच्छुद्धस्समूलं चित्रकं हरेत्।
न गोघ्रातं पदा स्पृष्टं शुचौ देशे विनिक्षिपेत्॥१९५॥

क्षिप्तं क्षीरान्तरे कृष्णं वह्नौ क्षीरं तु कृष्णति।
रक्तचित्रं परीक्ष्यैवं क्षीरं रक्तत्वमाप्नुयात्॥ १९६॥

एवं च रक्तचित्रस्य रक्तपुष्पाक्षतादिभिः।
कृष्णं वा लोहितं वाऽपि समूलमपि खण्डयेत्॥१९७॥

समधाऽऽमलकांभोभिर्भावयेच्छोषयेत्क्रमात्।
सञ्चूर्ण्य तार्क्षीताळत्वक्चित्रकत्रिफलास्समाः॥१९८॥

एषां समं चाग्निचूर्णं सर्वं भाण्डे नवे क्षिपेत्।
ततश्शुद्धशुभदिने निष्कं निष्कं घृताप्लुतम्॥१९९॥

भक्षयेन्मासमात्रेण व्रणकुष्ठादिकृन्तनम्।
दन्तकेशनखा यान्ति पतनं च पुनर्भवम्॥ २००॥

वलीपलितनिर्मुक्तो जीवेच्च शरदश्शतम्।
एवं च रक्तचित्रस्य योजना च फलं तथा॥ २०१॥

१६. भल्लातकीकल्पः ॥

अथ भल्लातकीकल्पं शृणु वक्ष्यामि पार्वति ! ।
पक्वं नवं सुतीक्ष्णं च भल्लातफलं हरेत् ॥ २०२ ॥
गोक्षीरे फलमेकं तु सूचीभिन्नं पचेल्लघीः ।
मध्वाज्यशर्करायुक्तं फलं त्यक्त्वा पयः पिबेत् ॥२०३॥
एकद्वित्रिक्रमेणैवं वर्धयेदेकविंशतिम् ।
फलानि च दिनान्येकविंशतिः क्रमशः प्रिये ! ॥२०४॥
सर्वे रोगा विनश्यन्ति षण्मासाद्दिव्यविग्रहः ।

१७. भूमिकदम्बकल्पः ॥

अथ भूमिकदम्बस्य कल्पं वक्ष्यामि पार्वति ! ॥२०५॥
त्रिविधस्स तु विज्ञेयश्श्वेतो रक्तश्च मेचकः ।
शुक्लपक्षे च पुष्यार्के विधिवत्तं समाहरेत् ॥ २०६ ॥
समूलं शोषयेत्तं च छायायां चूर्णयेत्ततः ।
तच्चूर्णं कर्षमाज्येन लिहेच्छुद्धवपुः प्रिये ! ॥ २०७ ॥
तस्मिञ्जीर्णे प्रकुर्वीत क्षीरान्नं विजितेन्द्रियः ।
नश्यन्ति वलयस्तस्य षण्मासात्पलितानि च ॥ २०८ ॥
संवत्सरप्रयोगेण जीवेद्वर्षशतत्रयम् ।

१८. पुनर्नवाकल्पः ॥

दिव्यं पुनर्नवाकल्पं वक्ष्यामि शृणु पार्वति ! ॥ २०९ ॥
पुनर्नवाख्या द्विविधा लोहिता धवला तथा ।
रसे रसायने श्वेता रोगे रक्ता प्रशस्यते ॥ २१० ॥
पुष्यार्के श्वेतशोफघ्नीं समूलामाहरेत्सुधीः ।
छायाशुष्कं चूर्णयित्वा गोक्षीरेण पलार्धकम् ॥ २११ ॥

पलं वाऽथ पिबेन्मातश्शुद्धाङ्गो वत्सरावधि ।
युवा भवति वृद्धोऽपि स जीवेच्छरदश्शतम् ॥ २१२ ॥

गोक्षीरेण च तन्मूल क्षीरक्षीण पचेत्प्रिये ! ।
चूर्णीकृत्य च तन्मूल पक्वीकृतगुडे समम् ॥ २१३ ॥

गोघृत च क्षिपेत्तत्र त्वेकीकृत्यावतारयेत् ।
पल चानुदिन लेह्य क्षीराशाशी जितेन्द्रिय ॥ २१४ ॥

सवत्सरप्रयोगेण वलीपलितवर्जित ।
तत्सेवकस्य नश्यन्ति विषाणि विविधानि च ॥२१५॥

त्वग्दोष कफपाण्ड्वाद्या औदरा गुल्मपायुजा ।
नश्यन्ति सकला रोगाश्छर्दिहिक्काक्षिकर्णजा ॥

पुष्पिता फलिता पक्वामादाय च पुनर्नवाम् ।
खण्डिता नागरक्वाथसुस्विन्ना क्षीरपेषिताम् ॥ २१७ ॥

पिबेद्दिवा च चूर्णान्ते निशि क्षीरघृताशन ।
षण्मासात्सिद्धिमाप्नोति योषिच्छतरतो भवेत् ॥२१८॥

१९. भृङ्गराजकल्प ॥

अथ श्रीभृङ्गराजस्य कल्प वक्ष्मि महेश्वरि ! ।
समूल तच्च पुष्यार्के समाहृत्याथ शोषयेत् ॥ २१९ ॥

छायाया चूर्णित कृत्वा कर्षं सौवीरलोडितम् ।
प्रात पिबेच्छुद्धदेहो मासाद्रोगान्व्यपोहति ॥ २२० ॥

तत्षण्मासयोगेन वलीपलितखण्डनम् ।
घृतक्षीराशनो नित्य जीवेद्वर्षशतत्रयम् ॥ २२१ ॥

युक्त कृष्णतिलैर्धैर्भृङ्गराजस्य पल्लवम् ।
उपयुञ्जीत षण्मास वलीपलितकृन्तनम् ॥ २२२ ॥

भृङ्गराजफलं पुष्पं पत्रं मूलं च चूर्णयेत् ।
एतच्चूर्णस्य सदृशांश्चित्राद्यान्परिकल्पयेत् ॥ २२३ ॥

चिलचिञ्चकणाबिल्वपथ्याधात्रीविडङ्गकम् ।
मरीचं व्याघिघातं च चक्रमर्दस्य बीजकम् ॥ २२४ ॥

लोध्रसर्पपराज्यश्च चूर्णिताश्च समाहृताः ।
एकीकृत्यैव भृङ्गस्य रसेन परिभावयेत् ॥ २२५ ॥

समधा च ततस्सर्वं चूर्णीकृत्य पुनः प्रिये ! ।
कर्षं गोपयसा सार्धं शुद्धकोष्ठो लिहेत्प्रिये ! ॥२२६॥

षण्मासाज्जायते सिद्धिर्वलीपलितवर्जितः ।
पूर्वोक्तवद्विधिः प्रोक्तस्स्वर्णभृङ्गस्य पार्वति ! ॥ २२७ ॥

" ॐ नमो भगवते रुद्राय तिष्ठ तिष्ठ संगृह्णाण स्वाहा ॥"

अयं ग्रहणमन्त्र ॥

" ॐ नमो रुद्राय अमृतात्मने स्वाहा "

अयं आलोडनमन्त्रः ॥

ॐ उत्तिष्ठोत्तिष्ठ कल्याणि स्वाहा " ॥

अयं भक्षणमन्त्रः ॥

२०. कुमारीकल्पः ॥

अथ वक्ष्याम्यहं देवि ! कुमारीकल्पमुत्तमम् ।
नदीतीरेऽथवा ग्रामे नगरेऽथितटेऽथवा ॥ २२८ ॥

मृदुकर्णफलानि पीतान्यहिसमानि च ।
प्रवालसमपुष्पाणि सचलेदहरितानि च ॥ २२९ ॥

यस्यां. पत्राणि तिष्ठन्ति सा कुमारीति कथ्यते ।
शुचिः पुण्यदिने कन्यां सोपवासस्समाहरेत् ॥ २३० ॥

अर्चयित्वा बलिं दत्वा कुमारीं सिद्धिदायिनीम् ।

शुद्धकोष्ठः प्रगे खादेच्चतुरङ्गुलमालतः ॥ २३१ ॥

एवं मासं ततः खाद्यं यथा वृद्धिरगैरदग्नैः ।
अत्यन्तं वर्जयेन्मध्यं खाद्यं भवति सर्वदा ॥ २३२ ॥

स्वशक्त्यनुगुणं सेव्यं स्वेच्छाहारविहारवान् ।
स्निग्धैर्मांसरसक्षीरैर्युक्त्या सेव्या कुमारिका ॥ २३३ ॥

हरत्यखिलरोगांश्च राजयक्ष्मादिकान्प्रिये ! ।
किन्नरैस्सदृशं गायेद्गृध्रदृष्टिर्महाबलः ॥ २३४ ॥

स्निग्धकेशश्च मतिमान्बालादित्यसमप्रभः ।
दशनागबलोपेतस्समीरसदृशो गतौ ॥ २३५ ॥

वलीपलितनिर्मुक्तो षोडशाब्दवया भवेत् ।
एवं वर्षप्रयोगेण भवत्येतैर्गुणैर्युत ॥ २३६ ॥

यस्तु द्वादशवर्षान्तं सेवेत स सुरासुरैः ।
महोरगैरवध्यश्च त्रिंशन्नागबलान्वितः ॥ २३७ ॥

मयूरदृष्टिर्सर्वज्ञस्सर्वशास्त्रविशारद. ।
विद्याधरो भवेन्मर्त्यो नात्र कार्या विचारणा ॥ २३८ ॥

कुमार्या दलमादाय हस्तर्क्षे साधकेऽहनि ।
प्रातः प्रत्यहमाखाद्य शुचिरग्निबलं यथा ॥ २३९ ॥

तन्मज्जां वा लिहेच्चत्तु मध्वाज्यव्योषसंयुताम् ।
मासं सेवेत नियमात्सर्वरोगैः प्रमुच्यते ॥ २४० ॥

षण्मासमुपयुञ्जानो वलीपलितवर्जितः ।
तस्याः कल्कं समानीय व्योषक्षौद्राज्यसंयुतम् ॥ २४१ ॥

स्विन्नं मृद्वग्निना सेव्य क्षीराहारो जितेन्द्रियः ।
मासाद्रोगा विनश्यन्ति द्विमासाद्दृढविग्रहः ॥ २४२ ॥

दिव्यदृष्टिश्च तेजस्वी द्विमासाद्विपहद्भवेत् ।
षण्मासयोगाद्वृद्धोऽपि युवा स्यात्सत्यमीश्वरि ! ॥ २४३ ॥
एवं वर्षोपयोगेन जीवेद्वृद्धिशतवत्सरम् ।
तस्या दलं युगैस्सार्धं भक्षयेच्छुद्धकोष्ठवान् ॥ २४४ ॥
वलीपलितनाशस्स्याद्वत्सरान्नात्र संशय ।

२१. नीलीकल्पः ॥

अथ देवि ! प्रवक्ष्यामि महानीलीरसायनम् ॥ २४५ ॥
पुष्यार्के शुचिरादद्यान्महानीलीं विधानतः ।
मूलपुष्पफलोपेता छायायां शोषयेत्प्रिये ! ॥ २४६ ॥
पटचूर्णं द्विनिष्कं स्यान्निष्कमभ्रं च योजयेत् ।
सर्वं च मधुनाऽऽलोड्य स्निग्धभाण्डे विनिक्षिपेत् ॥
धान्यराशौ न्यसेन्मास उद्धृत्य च ततः प्रिये ! ।
शुद्धकोष्ठो लिहेत्प्रातर्बिडालपदमात्रकम् ॥ २४८ ॥
षण्मासाज्जायते मर्त्यो वलीपलितवर्जितः ।
महानीलीं च कृष्णाभ्र मुसलीममृतालताम् ॥ २४९ ॥
समांशं चूर्णितान्कृत्वा मधुना कर्षमालिहेत् ।
एवं वर्षोपयोगेन जीर्णोऽपि तरुणायते ॥ २५० ॥
वलवान्मतिमान्धीरो जीवेद्वर्षशतद्वयम् ।
अभ्रकं च कुमारीं च काकजङ्घां शतावरीम् ॥ २५१ ॥
एतत्समां महानीलीं चूर्णयेत्स्निग्धभाण्डके ।
मधुना सहितं सप्ताह्यन्ते च समुद्धरेत् ॥ २५२ ॥
कर्षं लिहेत्क्षीरभोजी वर्षाद्वलिजरा जयेत् ।

२२. मुसलीकल्पः ॥

अथ ब्रवीमि देवेशि ! मुसलीकल्पमुत्तमम् ॥ २५३ ॥

स्वर्णपुष्पी च खर्जूरपल्लवत्पत्रशोभिता ।
अन्तश्श्वेता च नाराचमूला सा मुसली स्मृता ॥२५४॥

तन्मूलं च समुद्धृत्य छायाशुष्कं च चूर्णयेत् ।
कर्षं मध्वाज्यलुलित प्रातश्शुद्धतनुर्लिहेत् ॥ २५५ ॥

जीर्णे दुग्धान्नभोजी स्याद्रूक्षान्न वर्जयेत्प्रिये !
षष्ठे मासि भवेद्बालो वृद्धोऽपि बलबुद्धिमान् ॥ २५६ ॥

पयसा मुसलीचूर्णं दध्ना चाऽपि पिबेच्छुचि ।
वर्षाद्यौवनमाप्नोति शतस्त्रीगमने पटुः ॥ २५७ ॥

२३. इन्द्रवल्लीकल्पः ॥

अथेन्द्रवल्लीकल्पं च व्याख्यामि शृणु पार्वति ! ।
मयोदिता सुरेन्द्रस्य दैत्याना विजयाय च ॥ २५८ ॥

तदा प्रभृति लोकेषु ख्याता सा चेन्द्रवल्लिका ।
तामिमा भजता पुंसा देहसिद्धिर्भवेद्ध्रुवम् ॥ २५९ ॥

समूलां ता समुद्धृत्य छायाशुष्का विचूर्णयेत् ।
तच्चूर्णं द्वादशपलं वचाचूर्णं च तत्समम् ॥ २६० ॥

व्रणघ्नीचूर्णमेतस्य समाश त्रिकट्वद्भवम् ।
षट्पलं सर्वमेकत्र कृत्वा भाण्डे विनिक्षिपेत् ॥ २६१ ॥

कर्षं कर्षं मधुयुत प्रात प्रातर्लिहेत्सदा ।
षण्मासात्सर्वरोगघ्न वत्सरादेहसिद्धिदम् ॥ २६२ ॥

भूयो भूयश्च षण्मासान्नव चूर्णं प्रकल्पयेत् ।

२४ ज्योतिर्द्रुमकल्पः ॥

अथ ज्योतिर्द्रुमस्यापि पञ्चाङ्गं न्याहरेत्प्रिये ! ॥ २६३ ॥

एतानि समभागानि चूर्णयित्वा च कोविद ।
तत्तैल षोडशपल तच्चूर्ण पलमात्रकम् ॥ २७४ ॥

एकीकृत्यावलोड्याथ स्नेहभाण्डे विनिक्षिपेत् ।
त्रिस्सप्तवासर धान्यराशौ भाण्डे विनिक्षिपेत् ॥ २७५ ॥

दशाहमथवा त्रिंशत्षष्टिं वा नवतिस्तथा ।
अधिक वा यथायोग पश्चात्तेल समाहरेत् ॥ २७६ ॥

शुद्धकोष्ठश्शुभदिने कृतदेवद्विजार्चन ।
सूर्योदये पिबेद्धीरो विन्दुवृद्धया क्रमात्त्रिये ॥२७७॥

पलान्त साधकस्तेन निस्सङ्गत्वमवाप्यते ।
मन्द मन्द लब्धसञ्ज्ञो मुहु क्रन्दति नन्दति ॥ २७८ ॥

रोदित्येव मुहु कृच्छ्रालब्धसञ्ज्ञो भवेन्नर ।
गोक्षीर पाययेत्पश्चात्सक्षौद्र श्रान्तचेतसे ॥ २७९ ॥

क्रमादेव भवेत्स्वस्थस्साधकोऽसौ न सशय ।
षष्टिकान्न सगोक्षीर तैले जीर्णे च भोजनम् ॥ २८० ॥

एव कुर्यात्प्रतिदिन मासमेक निरन्तरम् ।
मासात्सूर्यसमस्साक्षात्तेजसा मन्त्रशास्त्रवित् ॥ २८१ ॥

साङ्गोपाङ्गश्रुतिं वेत्ति त्वनधीतोऽपि मानव ।
मध्याह्ने भास्कर पश्येत्पूर्णचन्द्रमिवापरम् ॥ २८२ ॥

वैनतेयसमा दृष्टिर्दिवा पश्यति तारका ।
अन्नमज्जीर्यते क्ष्वेल सुप्तोऽप्याकर्णयेद्ध्वनिम् ॥२८३॥

अष्टादशविध कुष्ठ सर्वरोगान्विनाशयेत् ।
फल द्वितीयमासस्य शृणु वक्ष्यामि भैरवि ॥ २८४ ॥

गन्धर्वोरगरक्षोभिस्सेव्यते तैलसेवक ।
महापातककर्तारो देवतापितृनिन्दका ॥ २८५ ॥

समयाचाररहितास्त एते मुक्तकिल्बिषा. ।
अमुष्य सेवया मुक्ताः प्रयान्ति परमां गतिम् ॥ २८६ ॥

फलं तृतीयमासस्य शृणु पार्वति ! वक्ष्यते ।
देवाश्च दिव्या ऋषयो वसवोऽष्टौ महोरगाः ॥ २८७ ॥

अमुष्य सेवा कुर्वन्ति प्रियं नित्यहितं तथा ।
तस्य मूत्रं ताम्रघटे पूरयित्वा खनेद्भुवम् ॥ २८८ ॥

तद्धृतं विहितं कृत्वा षण्मासात्कनकं भवेत् ।
चतुर्थमासस्य फलं शर्वाणि ! शृणु सांप्रतम् ॥ २८९ ॥

अदृश्योऽसौ भवेन्मर्त्यस्सर्वैश्वर्ययुतो बली ।
दशब्रह्मदिनं जीवेत्सर्वलोकगतौ पटुः ॥ २९० ॥

तन्मूत्रमलघमाँवृद्धर्तनैस्ताम्रलेपनम् ।
कुर्याद्धस्तौ प्रतपनं तच्छुल्वं काञ्चनं भवेत् ॥ २९१ ॥

अथ पञ्चममासे तु सदेहः खेचरो भवेत् ।
साक्षाद्ब्रह्मा भवेद्देवि ! शृणु पाण्मासिकं फलम् ॥२९२॥

महासिद्धैः परिवृतः सर्वलोकान्यदृच्छया ।
विचरेच्छिवतुल्यस्स्यान्महातेजा महायशा. ॥ २९३ ॥

अथ सप्तममासस्य फलं कल्याणि ! वक्ष्यते ।
जितारिपड्वर्गगनाः सर्वभूतहिते रत. ॥ २९४ ॥

विष्ण्वायुष्यमवाप्नोति पुण्यापुण्यविवर्जितः ।
विचरेच्च महावीर्यश्रीमान्विष्णुरिवापरः ॥ २९५ ॥

अष्टमासफलं वच्मि शृणु त्वं सर्वमङ्गले ! ।
मत्प्रियो दिव्यकर्मा च सर्वज्ञो मुक्तिमाप्नुयात् ॥२९६॥

फलं नवममासस्य शृणु कात्यायनि प्रिये ! ।
द्वितीयचिन्तामणिवद्वीरोऽसौ कामरूपवान् ॥ २९७ ॥

ब्रह्मविष्ण्विन्द्रचन्द्राणा रूप सृजति साधक ।
मनसा चिन्तित यद्यत्तत्कर्तुं स्वय प्रभु ॥ २९८ ॥

एतद्रसायन दिव्य सुकरं मोक्षसाधनम् ।
पुण्यं परमगुह्य च गोपनीय त्वया प्रिये ! ॥ २९९ ॥

एतस्य सदृश नास्ति देवानामपि दुर्लभम् ।
बहुनाऽत्र किमुक्तेन स्वस्मियार्थं मयोदितम् ॥ ३०० ॥

रसायनमिद दिव्य न कुर्वन्ति च मानवा ।
अज्ञानोपहृता केचित्केचिन्नास्तीति शङ्कया ॥
अन्तरायेण केचिच्च तदलाभेन केचन ।
तत्कल्पान्नानत केचित्केचिद्गुरुविवर्जिता ॥ ३०२ ॥

केचिद्रोगाकुला देवि ! त्वित्य तैरपि विघ्निता ।
यत्र ज्योतिष्मती वल्ली सा भूमि पुण्यभूमिका ॥३०३॥

तत्रैव सर्वतीर्थानि सिद्धयो विविधा अपि ।
ज्योतिष्मतीफलभव सेव्य दिव्यरसायनम् ॥ ३०४ ॥

२७ गुग्गुलुकल्प ॥

अथ गुग्गुलुकल्प च शृणु त्व चण्डिकेऽधुना ।
चतुर्विधो गुग्गुलुस्सगुग्गुलु पद्मकन्तथा ॥ ३०५ ॥

महिषाक्ष च हेमाख्यस्तत्तद्वर्णसमुज्वल ।
हेमाख्य च मनुष्याणा रसायनमुदाहृतम् ॥ ३०६ ॥

कणशो गुग्गुलु कृत्वा गोघृतेन शनै पचेत् ।
डोलयन्त्रे युक्तिपरो घृतमर्दितमासक्त् ॥ ३०७ ॥

पथ्याविभीतकौ धात्री गन्धस्थ पृथक्पृथक् ।
समाश दार्विचूर्ण्यैव एतत्सर्वसम पुरम् ॥ ३०८ ॥

शुद्धकोष्ठो लिहेत्प्रातस्तैलं धेरण्डसंभवम् ।
लोलयित्वा निष्कमात्रं वृद्धिः कर्षावधिर्भवेत् ॥ २०९ ॥

एवं वर्षप्रयोगेण शीतवातव्रणास्तथा ।
पिडकागण्डमालाद्या विनश्यन्ति महारुजः ॥ २१० ॥

द्वादशाब्दप्रयोगेण वज्रकायो भवेन्नरः ।
यद्यद्द्रव्यं च सात्म्यं स्यात्तत्तद्द्रव्येण वा भजेत् ॥

यस्य यस्य च रोगस्य यद्यद्भेषजमीरितम् ।
तैस्तैस्सहैव सेवेत तत्तद्रोगहरं भवेत् ॥ २१२ ॥

२८. विजयाकल्पः ॥

[विजयोत्पत्तिः ।]

श्रीभैरवी—

देवदेव जगन्नाथ सुरासुरनमस्कृत ! ।
पञ्चकृत्यप्रधानेश नमस्तुभ्यं परात्पर ! ॥ २१३ ॥

सर्वेऽप्यौषधकल्पाश्च मत्प्रीत्या कथितास्त्वया ।
आश्चर्यं भूतदेवेश ! सद्यस्सिद्धिप्रदायकम् ॥ २१४ ॥

सुखसेव्यं सुखकरं ज्ञानदं मुक्तिदं शुचिम् ।
अस्मत्सायुज्यदं ब्रूहि प्रीत्या मम रसायनम् ॥ २१५ ॥

ततस्स्मितमुखो भूत्वा शङ्करो लोकशङ्करः ।

श्रीभैरवः—

देवि ! वक्ष्याम्यहं कल्पं स्पृहणीयं सुरासुरैः ॥ २१६ ॥

सिद्धैश्च मुनिभिस्तज्ज्ञैस्सर्ववर्णैश्च योगिभिः ।
बालैर्वृद्धैश्च रुग्णैश्च षण्ढैश्च बहुयोषितैः ॥ २१७ ॥

शृणु त्वममृतोद्भूतं सावधानेन चेतसा ।
आग्नेयो मामकोंऽशस्स्यात्सौम्यांशस्तावकः प्रिये ! ॥

अग्नीषोमात्मकं सर्वमौषधं जलधौ सुराः ।
असुराः प्राक्षिपंश्चक्रुर्मथनं मन्दराद्रिणा ॥ ३१९ ॥

अतीव मथनात्तत्र देव्याग्नेयो ममांशकः ।
ज्वलन्महाविषं घोरं जातं हालाहलाख्यकम् ॥ ३२० ॥

तेन व्याकुलिता म्लाना गतवेगास्सुरासुराः ।
कृपया तन्मया सर्वं विषं च कवलीकृतम् ॥ ३२१ ॥

ततो देवा दितिसुता ममन्थुर्हृष्टमानसाः ।
ततो लक्ष्मीप्रभृतयः प्रादुरासंस्ततोऽमृतम् ॥ ३२२ ॥

तदुद्भूतं परं दिव्यं जरामरणकृन्तनम् ।
तदा तदा महाविष्णुर्मम हस्ताम्बुजेऽर्पयत् ॥ ३२३ ॥

त्रिवारं बिन्दवो दत्ताः परस्मै परमात्मने ।
पराशक्तियुजे पश्चात्तुभ्यं दत्ते मया प्रिये! ॥ ३२४ ॥

।पीतं त्वया च मे दत्तं मधुसूक्तमुदीर्यं च ।
स्वीकृतं च मया कान्ते! चिदानन्दात्मकामृतम् ॥

सान्द्रानन्देन च मया स्फूत्कृतिर्लज्जया कृता ।
पतिता बिन्दवस्सूक्ष्मास्तेभ्यो जाता महौषधिः ॥

तामालोक्य शुभां दिव्यां मुदिताः पर्यपालयन् ।
मत्करांबुजनीतेन पीयूषेण विवर्धितम् ॥ ३२७ ॥

तस्मात्त्रिशूलसदृशपर्णं च पटलं बहु ।
तस्मान्महौषधिर्जाता मदादिष्टैर्गुणैर्वृता ॥ ३२८ ॥

कदाचिद्भैरवो दृष्ट्वा हृष्टस्तां प्रार्थयन्मया ।
दत्ता तस्मै भैरवोऽपि योगिनीभ्यः समर्पितः ॥

ताश्च प्रीतास्स्वभक्तेभ्यो भक्तेभ्यः प्रददुश्च ते ।
निन्युश्च भूतलं दिव्यामौषधिं सर्वसिद्धिदाम् ॥ ३३० ॥

[विजयाभेदा. ।]

श्रीभैरवी—

किताम्नी सा कथवीर्या सेवनीया कथ प्रभो ! ।
कीदृग्वर्णा कियद्भेदा कीदृग्रूपगुणा च सा ॥ ३२१ ॥

कथ वा सिद्धिदा सा स्यात्कमान्मे ब्रूहि वल्लभ ! ।

श्रीभैरव —

अथ तस्याश्चतुर्वर्णा युगधर्माश्रिता प्रिये ! ॥ ३२२ ॥

शुक्लवर्णा कृतयुगे त्रेताया शोणितप्रभा ।
द्वापरे पीतवर्णा च नीलवर्णा कलौ युगे ॥ ३२३ ॥

एकपर्णा त्रिपर्णा च पञ्चपर्णा मुनिच्छदा ।
दशपर्णा रुद्रपर्णा त्रयोदशदलान्विता ॥ ३२४ ॥

नवपर्णेति विज्ञेया भेदा ह्येते सुरेश्वरि ! ।

[विजया लक्षणम् ।]

स्त्रीरूपा सफला वल्ली पुरुषा च द्रुमाकृति ॥३२५॥

सफला तु मद मूर्च्छां सुरत सत्व करोति च ।
योगवाहा तिक्तरसा सा कटुश्चूमगन्धिनी ॥ ३२६ ॥

शिवमूली च विजया भङ्गी गञ्जा विमर्दिनी ।
दिव्या सिद्धा सिद्धिदा च सिद्धमूली मनोन्मनी ॥

मधुद्रवा चिदाह्लादा पशुपाशविनाशिनी ।
कालघ्नी सर्वरोगघ्नी सामान्येतानि पार्वति ! ॥ ३२८॥

शिवो मूल भवेद्यस्याद्दिशवमूलीति कथ्यते ।
त्रिलोकानरिषड्वर्गान्विजयाख्या जयेदिति ॥ ३२९ ॥

तापत्रयादिदु खाना भञ्जनाद्भङ्गिनी स्मृता ।
गञ्जेति मादयत्येषा मदिरास्थानकारिणी ॥ ३३० ॥

सदश मर्दन यस्यास्सैव प्रोक्ता विमर्दिनी ।
क्रीडामोदद्युतिमदकान्तिदत्वाच दिव्यका ॥ ३४१ ॥

स्वतस्सिद्धेति सिद्धाख्या दिष्टसिद्धिप्रदायिका ।
सिद्धिदेति महासिद्धैस्सा नीता सिद्धमूलिका ॥ ३४२ ॥

मनश्चिन्तितकार्याणा साधनाच्च मनोन्मना ।
संविदानन्ददत्वाच्च चिदाह्लादेति कीर्तिता ॥ ३४३ ॥

ब्रह्मरन्ध्रस्थितसुधाद्रावणाच्च मधुद्रवा ।
जन्तूना पाशनाशत्वात्पशुपाशविनाशिनी ॥ ३४४ ॥

मृत्युञ्जयत्वात्कालघ्नी रोगघ्नी सार्थनामिका ।

[विजयावर्धनक्रम ।]

वर्धनक्रममाचक्षे शृणु लोकशिवङ्करि ! ॥ ३४५ ॥

शिलालोष्ठादितो वर्ज्या वालुकाशर्करादित ।
भूमि कृष्णा पासुला च मृदुला सकरीपका ॥ ३४६ ॥

भुजङ्गमाससहिता तत्र बीजानि वापयेत् ।
अहिवक्त्रेषु सत्वञ्च स्निग्धानि च गुरूणि च ॥

पुष्यार्के सिद्धयोगे वा श्रवणे शुक्लपक्षके ।
स्नातो लिप्ततनुर्गन्धै कृतन्यासजपार्चन ॥ ३४८ ॥

उदङ्मुख प्राङ्मुखो वा ध्यात्वा च गुरुपादुकाम् ।
सक्षीराङ्कोलतैलेन जलेन परिषेचयेत् ॥ ३४९ ॥

अङ्कुरे च समुत्पन्ने सिञ्चेत्सघृतवारिणा ।
पर्णे कीटे समुत्पन्ने सामुद्र वारि सेचयेत् ॥ ३५० ॥

ततोऽस्या विततायां च शिरश्छित्वा च रन्ध्रयेत् ।
तत्र सूत क्षिपेन्निष्क निष्क मत्येकमादरात् ॥ ३५१ ॥

निरोधयेत्तन्मुखानि कौशिकेन प्रयत्नतः ।
पुष्पिते फलिते मद्यमांसाद्यु च निषेचयेत् ॥ ३५२ ॥

एकैकपक्षपर्यन्तं क्षीरादि परिषेचयेत् ।
असां बध्वा जटामांसीं सक्षौद्रं वारि सेचयेत् ॥

शेषं मद्येन वा वारा वर्द्धनीया महौषधिः ।
आदौ वा परमं मन्त्रं पश्चात्सेवनमन्त्रकम् ॥ ३५४ ॥

" ॐ क्षां क्षीं क्षूं क्षेत्रपालाय नमः सवीर्यं कुरु कुरु सिद्धिं देहि देहि स्वाहा ॥ "

अयं स्थापनमन्त्रः ॥

" ॐ श्रीं ह्रीं क्लीं यरलवशषसह अमृतेश्वरि अमृतं कुरु कुरु आं ह्रां क्रों स्वाहा ॥ "

अयं सेवनमन्त्रः ॥

फाल्गुने कृष्णपक्षस्य चतुर्दश्यां च साधकः ।
स्नातश्शुद्धाम्बरो गन्धपुष्पभूषणसंयुतः ॥ ३५५ ॥

अर्चयेद्भैरवं तत्र नन्दीशं च क्रमेण च ।
मद्यमांसोपहारेण रक्तपीतसितासितैः ॥ ३५६ ॥

तन्तुभिर्वेष्टयेद्देवि ! तन्मन्त्रं च निगद्यते ।

" ॐ ग्लौं सौं ह्रीं खेचरभूचरदिव्ययोगिनि इमां रक्ष रक्ष सर्वशत्रुममथिनि स्वाहा ॥ "

अयं तन्तुबन्धनमन्त्रः ॥

सहस्रं प्रत्यहं जप्यमघोरं मन्त्रनायकम् ॥ ३५७ ॥

एवं सप्तदिनं कार्यं पञ्चम्यामृतेश्वरीम् ।
ध्यात्वा कुन्देन्दुकर्पूरसङ्काशां धवलांबराम् ॥ ३५८ ॥

पक्षद्वयं धान्यराशौ निधाय प्रत्यहं जपेत् ।
सहस्रं वा यथाशक्त्या महावटुकमन्त्रकम् ॥ ३६९ ॥

" ह्रीं श्रीं महाकालाग्निभैरवाय सर्वसिद्धिमातृब्रह्मा
लिङ्गितविग्रहाय सर्वापदां शोषकाय हुं फट् ठम् ॥ "

अयं अग्निपाक मन्त्रः ॥

मासादुद्धृत्य विधिवद्भस्मेदामलकोपमम् ।
निवातमन्दिरे स्थायी क्षीराहाराी जितेन्द्रियः ॥३७०॥

गुरूपदिष्टदेवं वा तत्त्वं वा परमं स्मरेत् ।
द्विकाल वा त्रिकालं वा यथा सेवाबलं क्रमात् ॥३७१॥

एवं त्रिवर्षाज्जरया वलीभिश्च विवर्जितः ।
भूचरीसिद्धिमाप्नोति जीवेत्त्रिशतवत्सरम् ॥ ३७२ ॥

वाराही त्रिफला चित्रमश्वगन्धा क्रमेण च ।
एवं द्वित्रिचतुर्भागमश्वगन्धादि योजयेत् ॥ ३७३ ॥

एतत्समा च विजया मधुना लोलयेत्सुखम् ।
आतपे पक्षपर्यन्तं स्थापयेत्प्रतितापयेत् ॥ ३७४ ॥

धात्रीफलोपमं सेव्यं सूर्यांभश्चाष्टमासतः ।
साधको जायते वर्षाज्जरामरणवर्जितः ॥ ३७५ ॥

जपन्मन्त्रमिमं भक्त्या देहसिद्धचै सुरेश्वरि ! ।

" ह्रीं श्रीं महाव्योमभास्कराय दीपिमातृकालिङ्गित-
विग्रहाय तेजसां निधिं कुरु कुरु ठम् ॥ "

इति सूर्यपाकमन्त्रः ॥

पलत्रयं जयायाश्च यष्टीचूर्णं पलद्वयम् ॥ ३७६ ॥

पलमेलाभद्रचूर्णं चित्रमूलं पलार्धकम् ।
श्रीखण्डचूर्णं च पलं चैतत्सर्वसमा सिता ॥ ३७७ ॥

स्वर्णचूर्णं च निष्कार्धं निष्कं च हिमवालुकम् ।
सर्वमाज्येन लुलितं ज्योत्स्नायां निक्षिपेत्सुधीः ॥३७८॥

शुक्लपञ्चमिमारभ्य पक्षान्तं शशिभावना ।
विधिवत्पूजयित्वा तु शुद्धकोष्ठो लिहेत्प्रिये ! ॥३७९॥
अस्य मन्त्रं पुनर्वक्ष्मि सर्वसिद्धिप्रदायकम् ।

" ह्रीं श्रीं महाशशाङ्ककिरणविस्फारभैरवाय अमृतेश्वरी मातृकालिंगितविग्रहाय विस्फुरणं कुरु कुरु हुं फट् ठम् ॥ "

इति चन्द्रपाकमन्त्र. ॥

एवंविधस्य कल्पस्य त्रिविधं मन्त्रमीरितम् ॥ ३८० ॥
एकैकमन्त्रमयुतं पुरश्चरणमाचरेत् ।
चन्द्रिपाकं चतुर्मासेष्वाषाढादिषु तन्यते ॥ ३८१ ॥
फाल्गुनादौ प्रकुर्वीत रविपाकं सुरेश्वरि ! ।
कार्तिकादिषु चन्द्रस्य पाकस्यात्सिद्धिदायक ॥३८२॥

मुण्डीचित्रकनिर्गुण्डीसहिता कुष्ठनाशिनी ।
ब्राह्मी कुमार्या युक्ता चेदपस्मारविनाशिनी ॥ ३८३ ॥

जया वराव्योपयुता क्षयस्य क्षयकारिणी ।
जया कार्पासमत्स्याक्षीपत्रयुक्ता च पित्तनुत् ॥ ३८४ ॥

स्नुक्षर्कपलक्षारेण संयुता गुल्मशूलहृत् ।
वचादूर्वारजोयुक्ता ज्ञानवृद्धिप्रदायिनी ॥ ३८५ ॥

यष्टीगन्धकसंयुक्ता कुष्ठनुत्पुष्टिदायिनी ।
शाल्मली पिच्छसंयुक्ता सासिता वीर्यवर्धिनी ॥ ३८६ ॥

पाठातिक्तात्रिकटुकैर्युक्ता कफगदापहा ।
शुक्लगुञ्जायुता नृणां महाविषविनाशिनी ॥ ३८७ ॥

व्याघातचूर्णसंहिता कुष्ठरोगविनाशिनी ।
आरण्यमरिचैरण्डयुक्ता वातविनाशिनी ॥ २८८ ॥

एते द्वादशयोगाश्च मासेषु द्वादशेषु च ।
मन्त्रत्रयं च प्रजपेत्प्रतिमासेषु साधक ॥ २८९ ॥

साधकोऽनेन योगेन जरामरणवर्जित ।
भवत्येव न सन्देहस्सत्यं सत्यं वरानने ! ॥ २९० ॥

रसत्रिगन्धकृष्णाभ्रुद्राक्षस्वर्णभस्म च ।
जयारसेन संमर्द्य पक्षमेकं तु भावयेत् ॥ २९१ ॥

मूषरे सपुटे यन्त्रे मुद्रयेच्चूर्णयेत्तत. ।
एतच्चतुर्गुणजया शर्कराघृतसयुता ॥ २९२ ॥

सेव्या निष्कप्रमाणेन प्रातस्सायन्तनेऽथवा ।
महावटुकमन्त्र च जपेल्लक्षावधि प्रिये ! ॥ २९३ ॥

षण्मासे भवेत्सिद्धिर्जरामरणवर्जित ।
वर्षान्मनोजवगतिर्नागायुतबलो भवेत् ॥ २९४ ॥

वज्रकायश्च सिद्धोऽसौ जीवेदाचन्द्रतारकम् ।
वटाङ्कुरस्य चूर्णेन सिताघ्याज्यसंयुता ॥ २९५ ॥

त्रिपक्षात्सेवितजया सर्वलोकवशङ्करी ।
अपामार्गरजोयुक्ता जया घृतसमन्विता ॥ २९६ ॥

मन्त्रजापी भवेन्नित्यं षण्मासादमरो भवेत् ।
वरा सितजया चित्रस्त्रिवृता त्रिकटुर्वृषा ॥ २९७ ॥

दूर्वा भृङ्गो मरीचश्च मधुकाजाजिसैन्धवम् ।
कर्पूरं च कचोरं च सर्वतुल्य जयारजं ॥ २९८ ॥

मधुत्रयेण लुलितं स्निग्धभाण्डे विनिक्षिपेत् ।
कर्षं प्रभाते सेवेत मण्डलात्सिद्धिभाग्भवेत् ॥ २९९ ॥

स्याद्वर्षाद्विवसद्वशो जीवेद्वेवदिनत्रयम् ।
अश्वगन्धा वचा व्योषं जयाचूर्णं च तत्समम् ॥४००॥

लिहेत्तिमधुरैर्युक्तं त्रिवर्षाद्विवतासमः ।
गञ्जाचूर्णं चाष्टभागं चतुर्भागा च मुण्डिका ॥ ४०१ ॥

ब्राह्मीरजो द्विभागं स्याद्वाजिगन्धैकभागिका ।
द्विभागस्त्र्यूषणस्यापि वराभागद्वयं तथा ॥ ४०२ ॥

भागमेकं शिलायाश्च भागैकं गन्धकस्य च ।
रसराडेकभागंस्यात्तदर्धं स्वर्णभस्म च ॥ ४०३ ॥

तत्समं मौक्तिकं योज्य मुक्तातुल्यं प्रवालकम् ।
मध्वाज्याभ्या विलुलित स्निग्धभाण्डे विनिक्षिपेत् ॥

सप्तरात्रं धान्यपाकं कृत्वा लक्षलयं जपम् ।
निष्कमात्रवटी सेव्या क्षीराहारो जितेन्द्रिय ॥४०५॥

मण्डलात्सर्वरोगघ्न त्वन्द्रात्पुष्पवदग्निभाक् ।
अर्धवर्षाद्भैरवस्त्याज्जीवेदाचन्द्रतारकम् ॥ ४०६ ॥

त्रिसुगन्धिवराव्योषैस्समांशा शिवमूलिका ।
मध्वाज्याभ्यां युता लेह्या कासघ्नी वह्निवर्धनी ॥ ४०७ ॥

मधुरम्लायभोजी चेत्सकासश्वासरोगजित् ।
हरिद्रया च सहिता सर्वमेहविनाशिनी ॥ ४०८ ॥

मण्डूकपर्ण्या सहिता वचया वाग्मतिप्रदा ।
द्राक्षा सिता वल्लकी च खर्जूरी दुग्धपिण्डिका ॥

सहिता कन्दलीनीरैस्सर्वस्वादुरिति स्मृतः ।
नारिकेलोदकयुक्ता कर्पूरसुरभीकृता ॥ ४१० ॥

सर्वस्वादुयुता सिद्धा पित्तघ्नी वीर्यवर्धनी ।
स्वादोश्चतुर्गुणं क्षीरं मधुपाकं यथा भवेत् ॥ ४११ ॥

तद्वस्त्रगालितं कृत्वा कर्पूरं तत्र निक्षिपेत् ।
दुग्धं च सर्वमधुरं जयां च पिचलस्ततः ॥ ४१२ ॥

शतस्त्रीगमने शक्तिः पित्तहत्पुष्टिवर्धनम् ।
समांशुपयसि क्षिप्त्वा जयाबीजं सवस्त्रकम् ॥ ४१३ ॥

अवशिष्टं चतुर्थांशं पचेन्मृद्वग्निना प्रिये ! ।
तद्घनीकृत्य विधिवन्मन्थयेत्तत उद्धरेत् ॥ ४१४ ॥

नवनीतं क्षिपेत्तत्र कर्पूरैला सिता मधु ।
पुष्ट्यायुष्यद्युतिकरं बलारोग्यविवर्धनम् ॥ ४१५ ॥

शतधा स्तन्यधौतं तच्छुद्धघृतमितीरितम् ।
नागकेसरकच्छूरलवङ्गैलागरुं तथा ॥ ४१६ ॥

कर्पूरचन्दनमृगनाभितक्कोलकुङ्कुमम् ।
एतत्समं जयाबीजं गोक्षीरेण च मर्दयेत् ॥ ४१७ ॥

निष्कनिष्कप्रमाणेन विदध्याद्वटिकास्सुधीः ।
सुपुष्पवासिताः कृत्वा सताम्बूलं मुखे क्षिपेत् ॥ ४१८ ॥

प्रसेकमुखवैरस्यमलपूतिहरी शुचिः ।
सौगन्ध्यवैशद्यकरी चित्तहर्षप्रदायिनी ॥ ४१९ ॥

गोक्षीरे चार्धसलिले धातकीकुसुमं क्षिपेत् ।
जातीफलं नागरं च तत्सर्वसदृशं जयाम् ॥ ४२० ॥

क्षीरावशिष्टं वस्त्रेण गालयेत्तन्मधुप्लुतम् ।
सिद्धयोग इति ख्यातो वृष्यायुष्यबलप्रदः ॥ ४२१ ॥

अजमोदयुता वापि निशारजोयुताऽथवा ।
तन्मालसेविता चूर्णा पामाकिट्टिभनाशिनी ॥ ४२२ ॥

जया तालयुता हन्यात्प्रदरं श्वयथुं तथा ।
कण्डूभ्रमनी ज्ञेया विजया शिलया युता ॥ ४२३ ॥

तैलेन भावयेत्स्थाल्यां जयां पश्चाच्च फाणिते ।
सान्द्रपाके भवेद्धीमान्सघृतं भक्षयेत्सदा ॥ ४२४ ॥

साक्षात्पर्यायमदनोऽनेकयोषित्सुखप्रदः ।
पथ्या भल्लातकगुडं तिलाश्चैते समांशिन. ॥ ४२५ ॥

तत्समा विजया हन्ति गुदकीलांश्च पञ्चधान् ।
यवानी जीरकयुगमजमोदा समांशिन ॥ ४२६ ॥

घृतत्समा च विजया सर्पिषा सेव्यतां बुधै ।
सन्धिवातं भ्रम छर्दिमुन्मादं मस्तकव्यथाम् ॥ ४२७ ॥

सर्करां मधु शिग्रुं च मागधीं तत्समां जयाम् ।
कृत्वाऽऽज्यगलितां गोलीमिमां पश्चागदं विदु ॥४२८॥

हृद्रोगप्लीहजठरभगन्दरनिकृन्तनीम् ।
सचित्रका वह्निकरी सवरा शूलभञ्जिनी ॥ ४२९ ॥

सव्योषा वातसंहर्त्री पित्तघ्नी शर्करायुता ।
श्वेतार्द्रकर्णिकाबीजं विजयां खरमूत्रत ॥ ४३० ॥

नस्येनापस्मृतिहरा भूतप्रेतादिभञ्जनी ।
जयाचूर्णं समध्वाज्यं भजेदामलकोपमम् ॥ ४३१ ॥

वाक्पाटवं वीर्यवृद्धिं कुरुते विजया परम् ।
मधुनाऽऽज्येन वा धान्या मुस्ताया खरसेन वा ॥४३२॥

उपयुक्ता जया रात्रौ दृक्प्रसादकरी नृणाम् ।
यौवनस्थैर्यमातन्यादायुष्यं परमं भवेत् ॥ ४३३ ॥

गुडोऽभया च विजया दुर्नामकुलभञ्जनी ।
जयाकाष्ठेन दन्तानां शोधनं दन्तदार्ढ्यकृत् ॥ ४३४ ॥

तैलाक्तविजयाकाष्ठाद्रसज्ञाशोधनं यदि ।
जिह्वापूतिमलान्हन्याद्यथार्थां स्याद्रसज्ञता ॥ ४३५ ॥

नालिकेरमवक्षीरे पचेन्मृद्वग्निना जयाम् ।
त्रिमध्यक्तां पिवेद्रात्रौ ततो रामाशतं भजेत् ॥ ४३६ ॥

शुण्ठी हरीतकी तुल्ये तत्समा च जया तथा ।
सर्वतुल्या सिता योज्या योगस्त्रैलोक्यमोहनम् ॥
ञ्यूषणं मधुकं चव्यं चातुर्जातं फलं वरा ।
गोस्तनी पिप्पलीमूलं समांशं परिकल्पयेत् ॥ ४३८ ॥

प्रियालमज्जा तैस्तुल्या चैतत्सर्वसमा जया ।
त्रिगुणेन गुडे पक्वे तेषां चूर्णं क्षिपेच्छिवे ! ॥४३९॥

आलोड्य मोदकान्कुर्यात्कामी कन्दर्पमोदकान् ।
सर्वरोगोपशमनांस्त्रिदोषघ्नान्बलप्रदान् ॥ ४४० ॥

वृष्यान्पुष्टिकरान्धीमांस्त्रिसन्ध्यमनुवासरम् ।
भक्षयेच्छुद्धकोष्ठे तु निर्वर्षाल्सिद्धिरीदृशी ॥ ४४१ ॥

सदैवमुपयुञ्जानो जरामरणवर्जितः ।
मरीचं पिप्पली शुण्ठी त्वगेलां पत्रकं समम् ॥४४२॥

एतैश्च विजया तुल्या समगोधूमपिष्टकैः ।
द्विगुणेन गुडेनैव मोदकान्परिकल्पयेत् ॥ ४४३ ॥

कर्षमात्रान्प्रतिदिनं भक्षयेन्नियतेन्द्रियः ।
बलपुष्टियुतो वर्षाद्वलीपलितवर्जितः ॥ ४४४ ॥

चणकैर्माषकैर्मुद्गैराढकैर्वा तिलैस्तथा ।
निष्पावैर्विंतुषैराज्यभर्जितैर्गुडसंयुतैः ॥ ४४५ ॥

सत्रिजातैश्च सव्योषैस्सर्जरैस्समभागतः ।
संयोज्य विजयां कुर्यान्मोदकान्कर्षमात्रकान् ॥ ४४६ ॥

एकैकं प्रत्यहं खादेत्सायं प्रातर्विशुद्धधीः ।
सर्वरोगहरान्पृष्ट्यान्पुंस्त्रीन्द्रियबलप्रदान् ॥ ४४७ ॥

तक्कोलं चन्दनं सेव्यं कर्पूरं नागकेसरम् ।
एलालवङ्गमधुकं पिप्पली मरिचं तथा ॥ ४४८ ॥
सर्वैस्समांशा विजया सिता सर्वसमा शुभा ।
पञ्चबाणाभिधानोऽयं चूर्णं सर्वरुजापहम् ॥ ४४९ ॥
द्वादशाब्दोपयोगेन वलीपलितहा भवेत् ।
वरा त्रिजातकश्चन्द्रखण्डबीजं कटुत्रयम् ॥ ४५० ॥
एतैस्समा सिद्धमूली सर्वतुल्या च शर्करा ।
मधुना लोलिता लीढा दीपनी देहसिद्धिदा ॥ ४५१ ॥
शतावर्युत्तमाव्योपमुसलीद्विगुणान्वितः ।
जया समा समसिता वृष्यायुष्यबलप्रदा ॥ ४५२ ॥
आयुर्घृतयुता धत्ते प्रातश्शुण्ठीसितायुता ।
क्षीरसिद्धा जया वृष्या वल्या च निशि सेविता ॥
मधुना सेविता भुक्तेः पूर्वं सा वाजिगन्धया ।
बलपुष्टिकरा सिद्धा रसायनमिदं परम् ॥ ४५४ ॥
निस्त्वङ्मर्कटिकाबीजं मापचूर्णं समा जया ।
क्षीरे च माहिषे पक्त्वा रात्रौ सेव्याऽतिवृष्यकृत् ॥
विधिवच्छाल्मलीपिच्छवरीभृङ्गामृतारसैः ।
कान्तपात्रे प्रतिरसैस्सप्तधा सप्तधाऽऽतपे ॥ ४५६ ॥
कुर्वीत भावनां पश्चाच्चूर्णयेत्तत्समां जयाम् ।
मधुना च लिहेत्कर्षं जरामरणनाशिनी ॥ ४५७ ॥
पञ्चाङ्गं शाल्मलेर्ग्राह्यं तत्समं विजयारजः ।
मध्वाज्याभ्यां लिहेत्कर्षं वलीपलितखण्डनम् ॥ ४५८ ॥
अथ पुष्यरवौ हस्तिकन्दं ग्राह्यं समूलकम् ।
अनातपे च संशोष्य चूर्णयेत्तत्समां जयाम् ॥ ४५९ ॥

मधुनाऽऽलोडयेत्पश्चात्किण्वभाण्डे विनिक्षिपेत् ।
एकविंशदिनं धान्यराशौ स्थाप्यं ततोद्धरेत् ॥ ४६० ॥

प्रत्यहं पलमेकं तु भक्षयेन्मण्डलद्वयम् ।
कट्वम्लौ वर्जयेत्तावन्मृदु यूषान्नभोजनम् ॥ ४६१ ॥

मधुरं लघु पित्तघ्नं पललं जाङ्गलं हितम् ।
बालार्कभश्च मतिमान्पिकालापो बलान्वितः ॥ ४६२ ॥

शतयोजनपर्यन्तं दिनेनैकेन गच्छति ।
मुण्डीचूर्णं जयाचूर्णं समं मधुघृतान्वितम् ॥ ४६३ ॥

कार्षं प्रातः प्रतिदिनं लिह्येद्वत्सरपुष्पिकृत् ।
द्वादशाब्दं तु सेवेत भुञ्जीत घृतसंयुतम् ॥ ४६४ ॥

गोक्षीरं पथ्यिकान्नं च लोणाम्लक्षारहीनकम् ।
भवेद्बलिजराहीनो दृश्यस्यात्लघुदेहवान् ॥ ४६५ ॥

पत्रं पुष्पं फलं श्वेतब्रह्मवृक्षस्य चाहरेत् ।
छायायां शोषयेच्चूर्णं तत्समं विजयारजः ॥ ४६६ ॥

मध्वाज्याभ्यां लिहेत्कर्षमब्दाद्यौवनमाप्नुयात् ।
जयाबीजानि च तिलान्भर्जयेत्सगुडान्भिषे ! ॥ ४६७ ॥

विधाय लड्डुकान्प्रातर्भक्षयेद्गोघृताप्लुतान् ।
मनस्संमोहनकरान्कान्तासङ्गमसाधकान् ॥ ४६८ ॥

पाकर्हव्यञ्जनैस्सार्धं जयापत्राणि पाचयेत् ।
भर्जयेद्गोघृतेनैव गुडैलातीक्ष्णजीरकैः ॥ ४६९ ॥

संस्कृतस्सुखसेव्योऽयं नाम्ना व्यञ्जनयोगराट् ।
तण्डुलान्विजयाबीजं मुद्गं च विगतत्वचः ॥ ४७० ॥

सुरम्यनालिकेरान्तः क्षिपेद्रन्ध्रं निरोधयेत् ।
बहिर्गोमयमृल्लिप्तं शोषयेन्मृदुवह्निना ॥ ४७१ ॥

पाचयेन्नालिकेरस्थं समज्जं तत्समाहरेत्।
मधुत्रयेण सहितं भुञ्जीत च यथाबलम् ॥ ४७२ ॥

महावृष्यकरो योगप्पण्डानामपि पुंस्त्वदः।
गोक्षीरे विजयाबीजं वस्त्रबद्धं विनिक्षिपेत् ॥ ४७३ ॥

अर्धावशिष्टे तत्क्षीरे व्यजनानिलशीतले।
वाराहीमर्कटीबीजकर्पूरैलालवङ्गकम् ॥ ४७४ ॥

त्रिमधु त्रिसुगन्धं च निक्षिपेच्च समांशतः।
एकीकृत्य पिबेद्रात्रौ महावृष्यकरः परः ॥ ४७५ ॥

वाराहीयोग एषोऽयं षण्डत्वादिनिकृन्तनः।
क्षीरशृतं च तद्बीजं पेषयेच्छिलया तनु ॥ ४७६ ॥

रसेनोत्तमकन्यायाः कांस्यपात्रे प्रलेपयेत्।
तीव्रातपे धारयेत्तं तस्मात्स्नेहं समाहरेत्॥ ४७७ ॥

स्नेहान्तरयुजा तेन नस्यकर्म समाचरेत्।
जत्रूर्ध्वगतरोगांश्च कासश्वासादिकान्हरेत् ॥ ४७८ ॥

यस्य यस्य च रोगस्य विहितं यद्यदौषधम्।
तेन तेन युता सिद्धा तत्तद्रोगहरा भवेत् ॥ ४७९ ॥

गुणा मया च कथ्यन्ते तान्शृणुष्व महेश्वरि!।
जिह्वार्द्रता मनस्सौख्यं तृप्तिस्सङ्कल्पसिद्धता ॥ ४८० ॥

वाक्पटुत्वं मुखोल्लासो भवेद्व्यायामपेशलः।
स्नानध्यानार्चनपरो मधुरास्वादलोलुपः ॥ ४८१ ॥

मृष्टान्नाशी शीतवारि पिबन्नालापतत्परः।
यथेष्टालोकनपरः कामिनीसङ्गलोलुपः ॥ ४८२ ॥

सर्वभूतदयाविष्टस्तत्त्वज्ञानविलीनधीः।
कवितास्यानविज्ञानोपन्यासैकपरायणः ॥ ४८३ ॥

वादेषु विजय कुर्यात्सङ्गमे मल्लसङ्करे ।
अन्येऽपि बहवस्सन्ति गुणास्त्वन्यत्र दुर्लभा ॥ ४८४ ॥

[विजयाव्यापत्तिस्थौ ।]

एतस्यासिद्धिमूल्याश्च भक्षणे लघिके सति ।
जायन्ते हि विकाराश्च शृणु तान्परमेश्वरि ! ॥ ४८५ ॥

रक्तलोचनदशुष्कजिह्वौष्ठपुटतालुक ।
प्रथमे शुष्कनासाग्र उष्णकृच्छ्वासपार्श्वयो ॥ ४८६ ॥

द्वितीयेऽक्षिनिमीलत्व पटलीभूतविग्रह ।
तृतीये पादहस्ताक्षिदाहकृद्गद्गदध्वनि ॥ ४८७ ॥

चतुर्थे क्षुत्पिपासार्तो निद्रावूर्णितलोचन. ।
पञ्चमे गद्गदा वाणी स्वमोक्त विस्मरेत्क्षणात् ॥ ४८८ ॥

षष्ठे विकारे सञ्जाते चित्तापस्मृतिकारणम् ।
सप्तमे परसादश्च देहे च रुचिरायते ॥ ४८९ ॥

महोर्मय इवोल्लासा जायन्ते च पुन पुन ।
अष्टमे दिग्भ्रमश्चान्तिर्भ्रूभङ्गश्चातिरोदनम् ॥ ४९० ॥

नवमे श्रोत्रहुङ्कारो मूर्च्छापस्मृतिकातर ।
उद्गार फूत्कृतं मूर्ध्नो लुठन दैन्यभाषणम् ॥ ४९१ ॥

अन्यथा भाषण गुह्यं ब्रवन्सौख्य न वेत्ति च ।
दु ख च मृदुफलोऽप्य म्रियताञ्चेत्र भवेत्प्रिये ! ॥

अन्ये विकारा बहवस्सन्ति तेषा चिकित्सनम् ।
विरेकोऽम्लरसश्शीर्षस्नान शीतांबुना तत ॥ ४९३ ॥

चन्दनोशीरकर्पूरहिमाबुपरिलेपनम् ।
सुगन्धिशीतलीभूतमालाङ्कृतविग्रह ॥ ४९४ ॥

मल्लिकाजातिचांपेयकमलोत्पलधारिणा ।
मृणालवलयोद्वासिशय्या च कदलीदलम् ॥ ४९५ ॥

कर्पूरैलालवङ्गाश्च तक्कोलं कर्टुकीफलम् ।
चर्वयेत्सहताम्बूलं तालवृन्तेन वीजनम् ॥ ४९६ ॥
सूक्ष्मकापायवस्त्राणि सुगन्धीनि च धारयेत् ।
कङ्कणे चन्द्रमापश्यञ्ज्योत्स्नायां द्विमुहूर्तकम् ॥४९७ ॥

पीनोत्तुङ्गकुचद्वन्द्वगाढालिङ्गनतत्परः ।
शयीत शर्कराक्षीरघृतमांसरसादिकम् ॥ ४९८ ॥

पानकं मुद्गयूषं वा पेयं वा शार्करं मधु ।
केवलं शयनं कुर्यादयच्छीतं भजेच्च तत् ॥ ४९९ ॥

२९. कञ्चुकीकल्पः ॥

अथ वक्ष्यामि देवेशि ! कञ्चुकीकल्पमुत्तमम् ।
सप्ताष्टच्छदसंयुक्ता मूलकोपमकन्दुका ॥ ५०० ॥

क्षीरान्विता मेषशब्दाज्जायन्ते पल्लवान्यपि ।
सा ज्ञेया पीतरक्ताभकाण्डा श्वेततनुः प्रिये ! ॥ ५०१ ॥

आषाढे कार्तिके मासे चैत्यदेशे प्ररोहति ।
पिष्टं पलाष्टके क्षीरे त्वङ्मुष्टद्वयमात्रकम् ॥ ५०२ ॥

कुटीप्रवेशं कृत्वाऽऽदौ पीत्वा पश्चात्पयः पिबेत् ।
जीर्णे क्षीरं पुनः पेयं पेयो वा स्नेहवर्जितम् ॥५०३॥

स्तोकोष्णलवणाम्लां तां न स्पृशेच्छीतलं जलम् ।
एवं सप्तदिनं सेव्यं खित्तकुष्ठं विनाशयेत् ॥ ५०४ ॥

द्वितीये सप्तरात्रेण नश्यन्ति निखिला गदाः ।
तृतीये सप्तरात्रेण भुजङ्गः कञ्चुकं तथा ॥ ५०५ ॥

त्वक्केशनखदन्ताश्च स त्यजेत्स्वयमेव हि ।
जीवेत्पञ्चशतं वर्षं रूपमेधाबलान्वितः ॥ ५०६ ॥

चूर्णितं कञ्चुकीकन्दं तत्क्षीरेण विभावितम् ।
कर्षं गोक्षीरकुडुबैः पिष्ट्वा खण्डं पलं क्षिपेत् ॥ ५०७ ॥

नखकेशास्थिदन्तस्थान् रोगान्भानेन नाशयेत् ।
कञ्चुक्यास्तु पलं चूर्णं प्रस्थगोक्षीरवापितम् ॥ ५०८ ॥

चूर्णशेषं पचेत्तावद्गोघृतेन च भर्जयेत् ।
सितया मधुना लिह्यात्क्षीरान्नो मण्डलावधि ॥ ५०९ ॥

महागजबलोपेतो द्विरष्टवयसोज्ज्वलः ।
जीवेत्पञ्चशतं वर्षान्कामिनीकेलिमन्मथः ॥ ५१० ॥

३०. कुक्कुटीकल्पः ॥

अथ वक्ष्यामि ते देवि ! कुक्कुटीकल्पमुत्तमम् ।
सुरासुरैर्मथ्यमानादब्धेरमृतबिन्दवः ॥ ५११ ॥

पतितास्तेभ्य उत्पन्ना कुक्कुटी निर्जरत्वदा ।
पत्रैर्मरतकच्छायैर्खर्जूरीदलसन्निभैः ॥ ५१२ ॥

कन्दैश्च कुक्कुटास्याभैरीषत्कटुकपिच्छिलैः ।
लक्षिता कुक्कुटी ज्ञेया महारोगहरा परा ॥ ५१३ ॥

विशेषाद्वातरोगांश्च गुदकीलविषाणि च ।
घृतेन भर्जयेत्कन्दं शुद्धकोष्ठः कुटीं व्रजेत् ॥ ५१४ ॥

गुञ्जामात्रं मृगे सेव्यं धारोष्णं गोपयः पिबेत् ।
जीर्णे क्षीरान्नमश्नीयाज्जलान्नं वा विचक्षणः ॥ ५१५ ॥

यथाबलं प्रतिदिनं वर्धयेन्मण्डलावधि ।
जन्वूर्ध्वरोगान्पाण्डादीन्क्षयकुष्ठादिकान्हरेत् ॥ ५१६ ॥

स्थिरकेशद्विजनखो वलीपलितवर्जितः ।
जीवेद्वर्षशतं च मेधाधैर्यबलान्वितः ॥ ५१७ ॥

शुक्लप्रतिपदारभ्य चैकैकं घृतवर्जितम् ।
कन्दं प्राश्नीय पर्वान्तं वर्धयेत्तद्यथाबलम् ॥ ५१८ ॥

तथैवासितपक्षादि नूनं कुर्यादिनादिनम् ।
भुक्ते प्रागुपयुञ्जीत पश्चात्क्षीराशनो भवेत् ॥ ५१९ ॥

दर्शान्तमेवं सेवेत प्रतिमासं पुनः पुनः ।
त्रिवर्षात्सिद्धिमाप्नोति जीवेद्वर्षायुतत्रयम् ॥ ५२० ॥

कुमुदीकन्दचूर्णं च गोक्षीरेण यथाबलम् ।
जीर्णे पिबेद्यवागूञ्च मासात्सिद्धिः प्रजायते ॥ ५२१ ॥

नानाविधगदान्हन्ति जीवेद्वर्षशतद्वयम् ।

३१. सोमलताकल्पः ॥

अथ सोमलताकल्पं दिव्यं वक्ष्यामि शङ्करि ! ॥ ५२२ ॥

सोमस्वयं मनुष्याणां हितायावनिमण्डलम् ।
प्रतिपेदे च तन्नाम्ना ख्याता सोमलता भुवि ॥ ५२३ ॥

चतुर्विंशतिधा प्रोक्ता स्थाननामादिभेदतः ।
पूर्वप्रतिपदारभ्य पूर्णान्तं प्रतिवासरम् ॥ ५२४ ॥

एकैकं जायते पर्णं तथैवासितपक्षके ।
पतति क्रमशः पर्णं दर्शे सैकावशिष्यते ॥ ५२५ ॥

पूर्णिमायां पञ्चदशच्छदोपेता सदा भवेत् ।
नानाविधदलोपेतात्प्रपञ्चदशकान्विका ॥ ५२६ ॥

क्षीरशुक्लतया सन्धा मन्मिसोमलतामृता ।
गुणाद्रावर्बुदे च साम्ने देवगिरौ तथा ॥ ५२७ ॥

पूर्वेद्युर्देवि ! विप्राग्निसिद्धसामयिकान्गुरून् ।
योगिनीश्च कुमारीश्च बालकान्सिद्धसन्ततिम् ॥ ५४० ॥

गन्धपुष्पाक्षतादैश्च धूपैर्दीपैश्च पूजयेत् ।
भोजनैर्दक्षिणाभिश्च तोषयेच्च विधानत ॥ ५४१ ॥

क्षीरमशुमत. कन्दात्स्वर्णसूत्र्या विभेदितात् ।
हेमपात्रे समादाय तत्क्षीरं कुडुवं पिबेत् ॥ ५४२ ॥

सकृदेव पिबेत्सर्वं पीतशेष जले क्षिपेत् ।
दिवा सुहृद्भिर्विहरेद्वाग्यतश्च वशी भवेत् ॥ ५४३ ॥

द्रव्यदेहोपदेशज्ञै· कुटयामास्तिकबुद्धिभि ।
उपवासी जपरतस्सायं सन्ध्यार्चनापर ॥ ५४४ ॥

प्रसुप्याद्दर्भशयने कृष्णाजिनतिरोहिते ।
पिपासितोऽपि पानीयं शीतल मात्रया पिबेत् ॥ ५४५ ॥

प्रभाते च समुत्थाय कृतशौचेतनक्रम. ।
विना सोम तथाऽऽसीत जीर्णे क्षीरे सशोणितम् ॥

पित्तावसानं सकृमि वमनं भवति प्रिये ! ।
शृतशीत च गोक्षीरं साय पेयं सुसाधकै ॥ ५४७ ॥

विरेको जायते तस्य तृतीयदिवसे महान् ।
तेन प्रमुच्यते मर्त्य पूर्वकैर्दुष्टभोजनै ॥ ५४८ ॥

स्नान कुर्यादिनान्ते स शृतशीत पिबेत्तय ।
दर्भशय्या सुमक्षौमच्छादिताया शयीत स ॥ ५४९ ॥

ततश्चतुर्थे दिवसे श्वयथुस्तस्य जायते ।
अङ्गेभ्य क्रिमयो बह्व्यस्सूक्ष्मा निर्यान्ति तद्दिने ॥

गोनिर्भस्समयीं शय्या शोधिता मृदुला सुखी ।
अधिशेत पिपासा चेच्छृतशीतं जल पिबेत् ॥ ५५१ ॥

साय गव्य शृत क्षीरं पीत्वा शिष्यसुहृद्धृत ।
यथासुख प्रसुप्याच्च निशि पञ्चमपर्णयो ॥ ५५२ ॥

अह्नो विधिरय कार्यो द्विकाल पायसेत्यय. ।
सप्तमे दिवसे देहस्त्वगस्थिस्नायुशोपित ॥ ५५३ ॥

मासरक्तविहीनस्स्यात्सोमप प्राणशोपित ।
सुखोष्णैस्सिञ्चयेत्क्षीरैर्गव्यैरेतस्य विग्रहम् ॥ ५५४ ॥

श्रीखण्डतिलयष्ट्याह्वै पिष्टैस्त परिलेपयेत् ।
क्षीराशी कटशायी च क्षौमवस्त्रा शयीत स ॥ ५५५ ॥

अष्टमेऽह्नि नख श्मश्रु त्वक्केशा रदना अपि ।
पतन्ति सद्योजातस्य देहवज्जायते वपु ॥ ५५६ ।

क्षीराशी स्यात्तु नवमेऽणुतैराभ्यङ्गमाचरेत् ।
सायात्सोमलताकल्प क्वथितेन जलेन च ॥ ५५७ ॥

ततस्तु नवमे त्वक्च स्थिरता प्रतियाति च ।
तस्यैवैकादशदिनं प्रारभ्य षोडश दिनम् ॥ ५५८ ॥

अभ्यङ्ग नाचरेत्तान सोमवल्ककपायजम् ।
दिनात्सप्तदशादूर्ध्वं चतुर्विंशतिकावधि ॥ ५५९ ॥

स्थिरत्व त्वगवाप्नोति दन्ता वज्रनिभोज्ज्वला ।
स्थिरा दृढतरा स्निग्धा जायन्ते समपङ्क्तय ॥५६०॥

पञ्चविंशतमे घस्रे षष्टयन्न गोपयोऽन्वितम् ।
भुञ्जीत नवनीतस्य शुकचञ्चुनिभोज्ज्वला ॥५६१॥

त्वगस्य जायते स्निग्धा नीलोत्पलसमद्युति ।
सुलक्षणातसीपुष्पवेह्यंबुदसन्निभा ॥ ५६२ ॥

मासादनन्तर कुर्यात्तिलोशीरकचन्दनै ।
पिष्टै प्रलेपन पश्चात्पयसा स्नपनक्रिया ॥ ५६३ ॥

रोहन्ति चिकुरास्तस्य गमराजनमन्निभा ।
मासमात्रदिनाद्यं द्वितीयावरणस्थिति ॥ ५६५ ॥

पुनस्तृतीयावरणे निष्ठितस्तो मुहूर्तकम् ।
तुरीं विशेद्यथापूर्वं बलातैलाज्यलेपनम् ॥ ५६५ ॥

तुर्यादिनत्रय पश्चाद्यन्त्रादिस्नानमाचरेत् ।
करीषभस्मनोद्वल्य देहं कल्कैर्विलेपयेत् ॥ ५६६ ॥

अनश्वगोत्थगुग्गुलुसम्भवं कोष्णजलेन च ।
चन्दनोशीरकर्पूरैर्मिश्रो मुद्वर्तनं भवेत् ॥ ५६७ ॥

यूषैर्माषान्नमश्नीयात्क्षीरैर्घृतयुतैर्युते ।
घृतेन वा द्वितीये तु वसेदावरणे सुधी ॥ ५६८ ॥

दिवस पञ्चकं तत्र किञ्चिद्वातातप सुधी ।
मध्ये मध्ये च सेवेत तथैव दशवासरम् ॥ ५६९ ॥

सोदवातातपस्तस्मात्तृतीयावरण भवेत् ।
एकविंशदिन तिष्ठन् स्थिरीकृतमनास्समुत् ॥ ५७० ॥

ततो द्वाविंशतिदिने देहसिद्धि प्रजायते ।
बहिर्निर्गत्य च तदा पूजयेद्भैरव पुरा ॥ ५७१ ॥

गुर्वग्निद्विजसिद्धाना चेतासि परिमोदयन् ।
सर्वत्र स्वेच्छया नित्य विहरेद्दु खवर्जित ॥ ५७२ ॥

वर्षायुत नव दिव्य वपुर्धत्ते सुकान्तिमत् ।
बल गजसहस्राणा भवेदस्य न सशय ॥ ५७३ ॥

विषाग्नितोयशस्त्रास्त्रमृगादिभ्यो भय न हि ।
ब्रह्मलोकादिलोकेषु विचरेत्स्वेच्छया सदा ॥ ५७४ ॥

कान्त्या द्वितीयश्चन्द्रस्त्यागेन मकरध्वज ।
सर्वाह्लादकरश्शान्तस्सघट्टपदनमान् ॥ ५७५ ॥

वेदान्वेत्ति च शास्त्राणि भूलोकगतिनिर्जरः ।
ह्रस्वशाखाप्रतानायास्सोमवल्ल्यास्समाहरेत् ॥ ५७६ ॥

काण्टान्द्वात्रिंशति स्वर्णपात्रे पुण्ये यथाविधि ।
रौप्ये पात्रेऽथवा योज्य द्विपल गोपयस्तथा ॥ ५७७ ॥

सोमवल्लीरस तद्वन्मेलयित्वा पिबेच्च न ।
कुटीप्रवेश पथ्य च पूर्ववत्समुदाहृतम् ॥ ५७८ ॥

अणिमाद्यष्टसिद्धिम्स्यात्स साक्षादमरो भवेत् ।

३२ गुडूचीकल्प ॥

अथामृतरसाकल्प वक्ष्यामि शृणु भैरवि ! ॥ ५७९ ॥

साक्षात्सुधामृतरसा व्याधिजन्मजरापहा ।
अमृतायाश्शतपल निमन्थे मधुरत्रयम् ॥ ५८० ॥

चूर्णं लिह्यात्कर्षमात्रमेव मयःसरावधि ।
सर्वव्याधिप्रशमन जीवेच्च शरदश्शतम् ॥ ५८१ ॥

अथ छिन्नरुहाचूर्णं पञ्चविंशत्पलं सिता ।
द्विगुणा च तयक्षीरी चात्मगुप्ताऽश्वगन्धिका ॥ ५८२ ॥

पुनर्नवाज्य प्रत्येकं शुल्व्याद्दशपल प्रिये ! ।
मृद्वीकाष्टपला यष्टी तत पञ्चपला तथा ॥ ५८३ ॥

एकीकृत्य च तत्सर्वं स्निग्धभाण्डे विनिक्षिपेत् ।
पक्षमेक धान्यराशौ निधाय प्रतिवासरम् ॥ ५८४ ॥

पल पल प्रयुञ्जीत मास स्याद्व्याधिवर्जित ।
षण्मासाद्गुग्रहष्टिम्स्याद्वपुं जीवेच्छतायुषम् ॥ ५८५ ॥

अमृतायाश्शतपल चूर्णं यष्टिपल मधु ।
चत्वारिंशत्पल सर्पिर्द्विमास धान्यराशिगम् ॥ ५८६ ॥

प्रत्यहं पलमात्राशी मासात्सर्वगदान्हरेत् ।
दिव्यदृष्टिश्शत जीवेन्मेधाबलमहाद्युति ॥ ५८७ ॥

३३. तुवरककल्पः ॥

अथ वक्ष्याम्यहं देवि ! कल्प तुवरकस्य च ।
वृक्षा पश्चिमवारीशतटे तिष्ठन्ति सन्ततम् ॥ ५८८ ॥

तरङ्गानिलसङ्क्षुब्धशीकारार्द्रितपल्लवा ।
वर्षर्तौ च सुपक्वानि तत्फलानि समाहरेत् ॥ ५८९ ॥

शोषयित्वाऽथ मच्चूर्ण्य तिलतैलमाहरेत् ।
अथवैरण्डतैल प्रयत्नेन समाहरेत् ॥ ५९० ॥

पुनर्वह्नौ पचेत्तैल यावदभ्र क्षय भवेत् ।
तत्कर्षं निक्षिपेत्पक्ष ततोद्धृत्य प्रयत्नत ॥ ५९१ ॥

चतुर्भक्तविहीनम्सन् शुद्ध कर्षं पिबेत्प्रिये ! ।
शङ्खचक्रगदापाणिस्त्वामाज्ञापयदच्युत ॥ ५९२ ॥

मन्त्रेणानेन सेवेत सर्वो दोषो विनश्यति ।
एव पञ्चदिन सेव्यमहितानि च वर्जयेत् ॥ ५९३ ॥

मास मुद्गरसाशी स्यात्सर्वकुष्ठविवर्जित ।
तत क्षौद्रघृताभ्या च लिहेत्पाण्मासिकावधि ॥ ५९४ ॥

वलीपलितहीनश्च जीवेद्वर्षशतद्वयम् ।
ततैल दिनपञ्चाश नस्येद्धीरकवद्द्विज ॥ ५९५ ॥

वलीपलितनिर्मुक्तश्रुतधारी दृढाङ्गवान् ।
जीवेद्द्विशतवर्षं च मेधावी गृध्रलोचन ॥ ५९६ ॥

३४ सोमराजीकल्प. ॥

अथ वक्ष्याम्यहं देवि ! सोमराजीरसायनम् ।

सम्महेता पुष्यरवावातपे शोषयेत्तत ॥ ५९७ ॥
चूर्णिता कोष्णसलिले पिबेत्प्रातर्विशुद्धये
त्रिदिवं च तत क्षौद्रै कर्षमात्र लिहेत्ततो ॥ ५९८ ॥
मासेन रोगा नश्यन्ति षण्मासात्सिद्धिमाप्नुयात् ।

३५ वृद्धदारुककल्प ॥

अथ ब्रवीमि देवेशि ! वृद्धदारुककल्पकम् ॥ ५९९ ॥
नागबल्लीदलक्षौद्रै सदुग्धैर्मृदुरोमकै ।
पत्रैर्युतापि सफला रक्तपुष्पा प्रतानिका ॥ ६०० ॥
तिक्तोषणा काकुतेति महिपाख्यलता स्मृता ।
तुलोन्मित च तन्मूल चूर्णित सर्पपायुतम् ॥ ६०१ ॥
धान्यराजो न्यसेत्पक्ष उद्धृत्योन्मितकर्षकम् ।
अनुपय च गोक्षीर जीर्णे क्षीरान्नभोजनम् ॥ ६०२ ॥
वृद्धोऽपि तरुणो भूयाद्वर्षात्सर्वगदोज्झित ।
एव द्वादशवर्षाणि सेवेनालस्यवर्जित ॥ ६०३ ॥
जीवेत्पट्शतवर्षं च वलीपलितवर्जित ।
वृद्धदारकचूर्णं च शुद्धं शतपलोन्मितम् ॥ ६०४ ॥
वाजिगन्धाकन्दचूर्णं शतत्रयपलं घृतै ।
आलोड्य भक्षयेत्कर्षं स जीवेच्छरदा शतम् ॥ ६०५ ॥
तुरङ्गमसमो वेगे बले दन्तवलोपम ।
कान्त्या हिमाशुसदृशस्तेजसा भास्करोपम ॥ ६०६ ॥
शतावर्यश्वगन्धा च गोक्षुरो वृद्धदारुक ।
सपाशमक्षिकं सर्पिर्युक्त कर्षं च खादयेत् ॥ ६०७ ॥
सप्ताहादिकवस्थानो वत्सरात्सिद्धिभाग्भवेत् ।

वृद्धदारुकमूल च मरीचरसपेषितम् ॥ ६०८ ॥

कर्षं पिबेद्वत्सर यत्स जीवेच्छरदश्शतम् ।
वृद्धदारुकचूर्णं च धात्रीस्वरसभावितम् ॥ ६०९ ॥

एकविंशतिधा प्रातर्मध्याज्याभ्या तु कर्षकम् ।
लिहेदब्द स जीवेच्च वर्षाणि च शतद्वयम् ॥ ६१० ॥

योवसापलधा(?)जीवेन्नीरुजस्स महान्भवेत् ।
गोदुग्धेन च तन्मूल रस धात्र्याश्च समितम् ॥६११॥

पिबेत्सवत्सर यस्तु स जीवेच्छरदश्शतम् ।
तस्मिन्न सपिरश्नीयात्पूर्ववत्फलमाप्नुयात् ॥ ६१२ ॥

पुनर्नवा वरी शुण्ठी मागधी रजनीद्वयम् ।
एतत्सर्वं सम वृद्धदारुक काञ्जिकान्वितम् ॥ ६१३ ॥

पल प्रात पिबेद्धीमान् दच्छदाद्धारमाचरेत् (१) ।
मासात्सर्वामयान्हन्ति वर्षादायुश्शत भवेत् ॥ ६१४ ॥

द्वीपी शौण्डी वरा विश्व मुस्तमेला समाशकम् ।
एतत्सयोज्य सिद्ध तच्चूर्णं वेल्लरिक भवेत् ॥ ६१५॥

क्षौद्राज्यलुलित खादेत्कर्षं वर्षेण सिद्ध्यति ।
तत्फलं स्वरस कर्षं घृत क्षौद्र च तत्समम् ॥ ६१६ ॥

पिबेदनु गवा क्षीर माहिष वा पलोन्मितम् ।
मासेन सर्वरोगघ्नं वर्षाज्जीवेच्छतायुषम् ॥ ६१७ ॥

चूर्णं वेल्लरिकामूल फल पिप्पलिकाभवम् ।
समवेल्लरिकामूलफलजैश्च रसैस्तथा ॥ ६१८ ॥

गुडूचीस्वरसेनापि भावयेदेकविंशतिम् ।
शुष्क घृतप्लुत भाण्डे स्निग्धे धान्यचये स्थित ॥

त्रिसप्ताहात्तदुद्धृत्य कर्षं प्रातर्लिहेद्वरः ।
वर्षाद्वर्षसहस्रायुस्सर्वरोगविवर्जितः ॥ ६२० ॥

३६. वज्रवल्लीकल्पः ॥

अथ व्याख्याम्यहं देवि ! वज्रवल्लीरसायनम् ।
वज्रवल्लीं समूलं च छायाशुष्कां विचूर्णयेत् ॥ ६२१ ॥
वरा व्रणारिमूलं च प्रत्येकं भास्करं पलम् ।
रोगानशेषान्पण्मासाद्धन्यात्सच्चत्सराद्भवेत् ॥ ६२२ ॥
देहसिद्धिश्च षण्मासाच्चूर्णमन्यत्प्रकल्पयेत् ।

३७. तिलक्षीरिणिकाकल्पः ॥

तिलक्षीरिणिकाकल्प कथयिष्यामि शांभवि ! ॥ ६२३ ॥
तिलक्षीरिणिकामूलं मौनेनोत्पाट्य साधकः ।
कोष्णेन वारिणा पिष्ट्वा माङ्मुखोदङ्मुखः पिबेत् ॥
गिलेद्वा गुलिकां कृत्वा क्षीराज्यानाशयेच्छुचिः ।
क्रमेणार्धद्वित्रिनिष्कं सेवेताब्दं स सिद्धिभाक् ॥६२५॥
दशाहाच्छुक्लवृद्धिस्स्यान्निमासात्सर्वरोगजित् ।
षण्मासात्सिद्धिमाप्नोति नात्र कार्या विचारणा ॥६२६॥

३८. ब्राह्मीकल्पः ॥

अथ वक्ष्यामि देवेशि ! ब्राह्मीकल्पमनुत्तमम् ।
समूलामुद्धरेद्ब्राह्मीं प्रक्षाल्य सलिलेन च ॥ ६२७ ॥
उलूखले कुट्टयित्वा पात्रे तत्र समाहरेत् ।
जुहुयाच्छारदामन्त्रैस्तद्दशैश्च सहस्रकम् ॥ ६२८ ॥
अर्चयित्वा गुरून्विप्रान्प्राश्नीत हुतशेषकम् ।
पलमात्रं तद्रसं च जीर्णे क्षीरान्नभोजनम् ॥ ६२९ ॥

एवं सप्तदिनं सेव्यं ब्रह्मचारी जपे रतः ।
मेधावी ब्रह्मवर्चस्वी वाग्विशुद्धः प्रजायते ॥ ६३० ॥

ऊर्ध्वं सप्तदिनात्सेव्यं प्रबध्नातीच्छया अपि ।
विस्मृतानपि वेत्त्येव श्रुतं शीघ्रं च धारयेत् ॥ ६३१ ॥

द्वितीये सप्तमादूर्ध्वं पूर्ववत्तद्रसं पिबेत् ।
सकृच्छ्रुतं श्लोकशतं सहस्रमपि धारयेत् ॥ ६३२ ॥

एवं त्रिसप्तदिवसं पिबेद्ब्राह्मीरसं शुचिः ।
देहाढ्यलक्ष्मीर्निर्याति वाणी विशति शाश्वती ॥ ६३३ ॥

भवेत्पुंरूपवाग्देवी सर्वशास्त्रार्थवेदिनी ।
वेदवेदान्तविद्धीमान्जीवेत्पञ्चशताब्दकम् ॥ ६३४ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ पञ्चदशोल्लासः ॥

॥ षोडश उल्लासः ॥

१. अङ्कोलकल्पः ॥

अथ ब्रवीम्यहं देवि ! कल्पमङ्कोलबीजकम् ।
चतुर्भिस्साधकैर्धीरैर्विशुद्धैश्शुद्धिकांक्षिभिः ॥ १ ॥

समवेतस्साधकेन्द्रैः पुण्यर्क्षेप्वारभेच्च तत् ।
अङ्कोलमूलं वितृणं कृत्वा संमार्ज्य शोधनम् ॥ २ ॥

तत्र लिङ्गं च संस्थाप्य तदग्रे स्थापयेद्घटम् ।
एकसूत्रेण बध्नीयाल्लिङ्गाङ्कोलघटान्प्रिये ! ॥ ३ ॥

गन्धपुष्पादिभिः पूजामघोरेण प्रकल्पयेत् ।
प्रतिमासं दिवा नक्तं पुष्पादि फलितावधि ॥ ४ ॥

गृहीत्वा तत्फलं पक्वं पूरयेत्तद्घटं फलैः ।
योगिनीभैरवीप्रीत्यै महापूजां विधाय च ॥ ५ ॥

आनीय तद्घटं गेहे शोषयेदातपे फलम् ।
वितुषाणि च बीजानि कुर्यात्तन्मुखघर्षणम् ॥ ६ ॥

कुर्यात्ततो विशाल्याम्ये पात्रे मृच्चूर्णलेपनम् ।
एकैकशश्चोर्ध्वमुखं रोपयेद्भुजगाकृति ॥ ७ ॥

ततस्तु टङ्कणं तद्वत्तत्तद्वक्त्रेषु लेपयेत् ।
तत्पात्रं काचपात्रे च स्थापयेत्तदधोमुखम् ॥ ८ ॥

आतपे धारयेद्धीमान्पलालैश्च तिरोदधेत् ।
दिने दिने च्युतं तैलं गृह्णीयादिनपञ्चकम् ॥ ९ ॥

ततैलं काचकुप्यन्तस्थापयेच्च सप्तकम् ।
अर्धमालाढकोलतैलं द्विगुणं तिलतैलकम् ॥ १० ॥

नासारन्ध्रद्वये नस्यं जरामृत्युविनाशनम् ।
स जीवेत्त्रिशतं वर्षं सर्वामयविवर्जितः ॥ ११ ॥

रोगादिजलपाशाद्यैर्भ्रमाद्यैश्च विषेण च ।
गतासूना नृणा नस्यं कुर्यात्पुंशुक्रमिश्रितम् ॥ १२ ॥

मृतसूतं च तैलं ते जीवन्ति च न संशयः ।
मृतसञ्जीवनी विद्या पूर्वोक्ता कथिताऽनघे ! ॥ १३ ॥

अन्ये रसायनकल्पाः ॥

गुडूच्या वचा काकतुण्डीकल्पसंस्कृतः ।
सहदेवी निम्बपत्रं लाङ्गलीकन्दमेव च ॥ १४ ॥

समांशं शोषयेच्चूर्णं पाताले तैलमाहरेत् ।
ततैलं नस्यमादद्यात्ससाहान्तरितं प्रिये ! ॥ १५ ॥

एवं वर्षे कृते नस्ये सहस्रायुर्भवेन्नरः।
नीलिकामूलसंयुक्तं तैलं चार्धपलं पिबेत् ॥ १६ ॥

वत्सराज्जायते सिद्धो वलीपलितवर्जितः।
जीवेद्ब्रह्मदिनं व्यब्दाद्वायुवेगो महाबलः ॥ १७ ॥

भृङ्गीरसं कृष्णजीरं प्रस्थं प्रस्थं प्रकल्पयेत्।
नीलोत्पलञ्च मधुकं प्रस्थार्धं च पृथग्भवेत् ॥ १८ ॥

तिलतैलं पञ्चपलं पाचयेत्सर्वमेकतः।
तैलावशिष्टं तत्तैलं जरा मृत्युश्च नश्यति ॥ १९ ॥

अर्धनिष्कं चैकनिष्कं सार्धनिष्कं क्रमेण च।
तैलप्रमाणमित्युक्तमब्दाज्जीवेच्छतत्रयम् ॥ २० ॥

इष्टि(पी)काक्षिपलं क्षिप्त्वा कर्षैकमुदकैः पिबेत्।
वत्सरात्पलितं हन्ति सहस्रायुर्भवेन्नरः ॥ २१ ॥

सर्पाक्षी काकमाची च सहदेवी च भृङ्गराट्।
काकतुण्डीफलं निम्बं पर्णं वाकुचिबीजकम् ॥ २२ ॥

समूलां देवदालीं च ब्राह्मीमूलं फललयम्।
मूलं च वाजिगन्धाया नीलकोरण्डपत्रकम् ॥ २३ ॥

समं समं कन्यकाया द्रवैश्च परिभावयेत्।
सप्ताहं शोषयेच्चूर्णं छायायां त्रिमधुप्लुतम् ॥ २४ ॥

द्विकर्षं प्रत्यहं सेव्यं वत्सरेण जरां जयेत्।
आचन्द्रतारकं जीवेन्महाबलयुतः सुखम् ॥ २५ ॥

महाकामेश्वरकल्पः ॥

चातुर्जातकचोरचन्दनजलद्राक्षातुगरेणुकं
कस्तूरीतगरेन्दुकुङ्कुमजटाकुष्ठाक्षगन्धाब्दकम्।

क्षीणे पोषमुपादधाति विपुलं पूर्णातिजीर्णोज्ज्वलं
मन्दाग्नि महणीं निहन्ततितरां दोषानशेषानपि ।
श्रेष्ठस्सर्वरसायनेषु विदुषां भोगार्थिनां योगिनां
सिद्धिं सम्यगिहातनोति वपुषस्संसेवनादन्वहम् ॥

मूलिकाकल्पेषु रसाभ्रकादिमेलनातिदेशः ॥

महावृक्षादिकल्पेषु प्रोक्तेष्वेतेषु साधकैः ।
एष साधारणो योगः कर्तव्यस्सिद्धिकांक्षिभिः ॥ २४ ॥

गुञ्जामात्रं शुद्धसूतं वाऽभ्रकं वा पणद्वयम् ।
कान्तलोहं तथैवोपयोजयेद्रक्षयेन्नर ॥ २५ ॥

रसाभ्रलोहयोगेन सद्यस्सिद्धिमवाप्नुयात् ।
जीवहीनो यथा देहो गन्धहीनं प्रसूनकम् ॥ २६ ॥
तथैव मूलिकाकल्पा रसहीना न सिद्धिदा. ।
तस्माद्रसेन सहितास्सद्यस्सिद्धिप्रदायका ॥ २७ ॥

अभ्यङ्गरसायनम् ॥
[महानीलीतैलम् ।]

महानीलीरसं प्रस्थं प्रस्थं भृङ्गरसं प्रिये ! ।
धात्रीफलरसं प्रस्थं काकतुण्डीफलोद्भवम् ॥ ३८ ॥
प्रस्थं कषायतिलजं तैलप्रस्थं च गोपयः ।
आढकं योजयेत्सर्वं काकतुण्डीफलं पलम् ॥ ३९ ॥
त्रिपलं चामलं भृङ्गनीलीपत्ररजः पलम् ।
पिष्ट्वा तस्मिन्क्षिपेत्सर्वं पचेन्मन्दाग्निना प्रिये ! ॥ ४० ॥
तैलावशिष्टं विपचेत्ततो वस्त्रेण शोधयेत् ।
तैलेनानेन चाभ्यज्य शिरोऽभ्यङ्गं समाचरेत् ॥ ४१ ॥

प्रत्यहं कर्णपूरं च एवं कुर्याद्रसायनम् ।
केशा भ्रमरसङ्काशाश्श्रोत्रं दिगन्तंपाटवम् ॥ ४२ ॥
जत्रूर्ध्वरोगा नश्यन्ति तथा पादहितं भवेत् ।

[चन्दनाद्यं तैलम् ।]

चन्दनागरुकर्पूरकस्तूरीकुङ्कुमं तथा ॥ ४३ ॥
उशीरद्वयकङ्कोलजातीफललवङ्गकम् ।
नलिकानलदास्पृक्कातुरुष्कस्थाणुलोचनम् ॥ ४४ ॥
हरेणुस्तगरं लाक्षा नखं स्थौणेयकं मुरा ।
नलदामलकं कुष्ठं चोरकं कटुकीफलम् ॥ ४५ ॥
प्रपौण्डरीकं खर्जूरं पद्मकं जातिपत्रिका ।
शैलेय धातकीपुष्पं सरलं चैलवालुकम् ॥ ४६ ॥
पूगीफलं सप्तपर्णं तथा तामलकं प्रिये ! ।
एकैकं कर्षमात्रं स्यात्सर्वं तैलं च गोपयः ॥ ४७ ॥
आढकं तत्पचेत्सर्वं तैलशेषं समाहरेत् ।
तस्मिन्मृगाण्ड कस्तूरीं कर्पूरं कुङ्कुमं क्षिपेत् ॥ ४८ ॥
पृथक्पर्णं च जात्यादिकुसुमैर्वासयेद्बुधः ।
तेनाभ्यङ्गमथ.काये कुर्याद्दौर्गन्ध्यनाशनम् ॥ ४९ ॥
अशीतिवर्षदेशीयोऽप्यसौ स्यात्षोडशाब्दकः ।
कामिनीलोककन्दर्पस्सुभगश्शुक्रवृद्धिमान् ॥ ५० ॥
योषिच्छतं न रमते स जीवेच्छरदश्शतम् ।

[उद्वर्तनरसायनम् ।]

अथोद्वर्तनमाख्यामि वलीपलितभञ्जनम् ॥ ५१ ॥
सूतं गन्धं समं मर्द्यं स्तनदुग्धेन योषितः ।

मुण्टिका मेघनादश्च विष्णुक्रान्ता मुनिस्तथा ॥ ५२ ॥
सर्पाक्षी च द्रवैरासां दिनमेकं विमर्दयेत् ।
एतद्द्रव्यगुणं क्षारम्तिलस्य च यवस्य च ॥ ५३ ॥
एतत्सर्वं समध्वाज्यमनेनोद्वर्तनं वपु. ।
वलीपलितनाशस्स्याद्वर्षात्त्रिशतवत्सर ॥ ५४ ॥
जीवेद्दिव्यवपुर्भूत्वा साधको नात्र संशयः ।
सनालमुत्पलं सूतं सप्ताहं परिमर्दयेत् ॥ ५५ ॥
आत्मीयशिवतोयेन ततश्चाङ्गं विमर्दयेत् ।
वत्सराज्जायते सिद्धि पूर्ववद्दिव्यविग्रह. ॥ ५६ ॥
शिवांगसा च सूतेन्द्रं ब्रह्मदण्डीयमूलकम् ।
मर्दयेत्सप्तदिवस सम्यग्देवि ! विमर्दयेत् ॥ ५७ ॥
वत्सराज्जायते सिद्धि पूर्ववद्दिव्यविग्रह ।
कटुतैलेन सुरभिं भावयेद्दिनसप्तकम् ॥ ५८ ॥
पलार्धं भक्षयेन्नित्य वर्षाद्वज्रवपुर्भवेत् ।
त्रिशतायुस्स्वर्णवर्णो वलीपलितवर्जित ॥ ५९ ॥
समध्वाज्य कुष्ठचूर्णं कर्षं प्रातर्लिहेन्नर ।
शतपुष्पसुगन्धाङ्गो जीवेद्वलिविवर्जित ॥ ६० ॥

केशरञ्जनकल्पाः ॥

काकतुण्डीफलं कान्तचूर्णमाम्राण्डतैलकम् ।
आलोड्य भाण्डे निक्षिप्य मास धान्यमये क्षिपेत् ॥
उद्धृत्य लेपयेच्छीर्षं नस्यकर्मामुना भवेत् ।
व्यहात्केशास्सुनीलास्स्युष्पण्मासात्केशरञ्जनम् ॥ ६२ ॥
हरीतकी निष्कमेकं द्विपलं कान्तचूर्णकम् ।
पलमेक नागचूर्णमम्लद्रव्या प्रमर्दयेत् ॥ ६३ ॥

अभ्यक्तो निक्षिपेन्मूर्ध्नि मर्दयेन्नाडिकार्धकम् ।
एरण्डपत्रैस्संवेष्टय पुनर्वस्त्रेण बन्धयेत् ॥ ६४ ॥
स्नायात्पुनर्ध्वं त्रिदिनं पूर्ववत्केशरञ्जनम् ।
समूलौ नीलिकाभृङ्गावयश्चूर्णं वरासमम् ॥ ६५ ॥
चूर्णमेडकमूत्रेण दिनमेकं च भावयेत् ।
स्नानादि पूर्ववत्कृत्वा पूर्ववत्केशरञ्जनम् ॥ ६६ ॥
निस्त्वग्गुञ्जाफलं चैला देवदारु च कुष्ठकम् ।
समं चूर्णं भृङ्गरसैर्भाव्यमेकदिनं प्रिये ! ॥ ६७ ॥
अन्यच्चतुर्गुणं तैलं पचेन्मृद्वग्निना बुधः ।
यस्य तैलधृताभ्यङ्गात्केशा अमरसन्निभाः ॥ ६८ ॥
हस्तिदन्तस्य दग्धस्य समभागं रसाञ्जनम् ।
छागीदुग्धेन संपेष्य लेपनात्केशरञ्जनम् ॥ ६९ ॥
कृष्णमृत्तिफलाभृङ्गरसायद्चूर्णकं समम् ।
आलोड्यैनं समं भाण्डे मासमेकं निरोधयेत् ॥ ७० ॥
तल्लेपाच्चिचुराः कृष्णा भवेयुः पञ्चमासतः ।
धात्रीफलं जपापुष्पं किट्टं पिष्ट्वा च मूर्धनि ॥ ७१ ॥
लेपयेत्त्रिदिनं तेन केशास्स्युर्भ्रमरोपमाः ।
चूर्णं सिन्दूरसदृशं तयोस्तुल्या च सांभणिः ॥ ७२ ॥
पिष्ट्वांभसा मलेपेन तत्क्षणात्केशरञ्जनम् ।
गोरोचनं कृष्णतिलान्शतपुष्पां शिवांबुना ॥ ७३ ॥
काकमाचीमिदं सर्वमयःपात्रे विमर्दयेत् ।
तेनैव दिवसादूर्ध्वं केशरञ्जनमुत्तमम् ॥ ७४ ॥
चूर्णं सिद्धार्थकं सर्जं यवक्षारं च काञ्जिकैः ।
नागपुष्परसैः पेष्यं लेपनं केशरञ्जनम् ॥ ७५ ॥

कदलीकन्दचूर्णं च सिन्दूराङ्गारकौ तथा ।
रसैर्जम्बीरजैर्लोहमुष्ट्याय.पात्रके पिषेत् ॥ ७६ ॥
दिनैकलेपनाद्येन केशानां रञ्जनं भवेत् ।
कासीसं नीलिकापत्रं दधिभृङ्गरसस्तथा ॥ ७७ ॥
समांशं लोहचूर्णं च लेपनात्केशरञ्जनम् ।
नागदण्डेन पत्राणि कोरण्टस्य च मर्दयेत् ॥ ७८ ॥
दिनत्रयं च तल्लेपात्केशास्स्युर्भ्रमरोपमाः ।
वरा भृङ्गी चूतबीजं मृणालं च प्रियङ्गुकम् ॥ ७९ ॥
नीली निशा लोहनागौ चूर्णिता निंबतैलकैः ।
कान्तपात्रे लोडयित्वा मासमेकं विभावयेत् ॥ ८० ॥
तेन लिप्ताः कचाः कृष्णा रञ्जिता भ्रमरोपमाः ।
तिलाः कृष्णाः काकमाचीबीजानि समभागतः ॥ ८१ ॥
तत्तैलयन्त्रतो ग्राह्यं तेन स्यात्केशरञ्जनम् ।
कर्षं जपारसः क्षौद्रं समाहं नस्यमाचरेत् ॥ ८२ ॥
तदूर्ध्वं रञ्जयेत्केशान्सर्वनस्योत्तमो ह्ययम् ।
भृङ्गराजरसै पिष्ट्वा त्रिफलां लोहचूर्णकम् ॥ ८३ ॥
तैलमेतत्समं योज्यं तथा भृङ्गरसैः पुनः ।
मृद्वग्निना पचेत्सर्वं तैलशेषं यथा भवेत् ॥ ८४ ॥
स्निग्धभाण्डे च तत्तैलं मासं भूमौ विनिक्षिपेत् ।
तैलेन लेपयेच्छीर्षं कारवल्लीदलैः पुरा ॥ ८५ ॥
वेष्टयेत्तत्तु वस्त्रेण निवाते क्षीरभोजनम् ।
क्षालयेत्त्रिफलाक्वाथैः कुर्यात्सप्तदिनं प्रिये ! ॥ ८६ ॥
कपालरञ्जनं कुर्याद्यावज्जीवं न संशयः ।
श्रियालीकाकतुण्ड्याश्च बीजं निर्गुण्डिकारसैः ॥ ८७ ॥

जपापुष्परसैर्भाव्यं पृथक् दिनचतुष्टयम् ।
पातालयन्त्रे तत्तैलं पातयेत्तेन लेपनम् ॥ ८८ ॥
कुर्यान्मूर्ध्नि च गन्धर्वपत्रैश्च परिवेष्टयेत् ।
वस्त्रेण च ततो घातशून्यदेशे वसन्सुधीः ॥ ८९ ।
क्षीराशी काञ्जिके स्नानं कुर्यात्समदिनं त्रिति ।
केशा भ्रमरसङ्काशा यावज्जीवं न संशयः ॥ ९० ॥

जलमण्डनिकाकाकमाचीभृङ्गास्समास्समा ।
पिष्ट्वा तैलं पचेत्सूपं पुनस्तैलेन लेपयेत् ॥ ९१ ॥
मूर्धानं लेपयेत्तेन सप्ताहं केशरञ्जनम् ।
स्नानभोजनशय्या च पूर्ववत्परिकल्पयेत् ॥ ९२ ॥

वराभृङ्गरसै. पिष्ट्वा कान्तपात्रे विलेपयेत् ।
अवाङ्मुखं विनिष्ठाप्य प्रातस्तं भृङ्गराड्सै ॥ ९३ ॥

पुन पिष्ट्वा लिहेच्छीर्षं क्षालयेत्त्रिफलाम्बुना ।
एकविंशद्दिनं कुर्यात्पूर्ववत्फलमाप्नुयात् ॥ ९४ ॥

गरलं कृष्णजीरं च पिष्ट्वा रुद्ध्वा च तन्मुखम् ।
गृहाङ्गणे पङ्किले च खनित्वा स्थापयेत्सुधी. ॥ ९५ ॥

षण्मासात्तद्द्रवीभूतं कृष्णं साधु समुद्धरेत् ।
शिरोमध्ये क्षिपेत्कर्षं पूर्ववद्वेष्टनादिकम् ॥ ९६ ॥

आजन्म रञ्जयेत्केशांस्तच्च कापालरञ्जनम् ।
भृङ्गी नीली वरा कृष्णायसं मदनबीजकम् ॥ ९७ ॥

कोरण्टकुसुमं चूर्णमर्जुनस्य त्वचोद्भवम् ।
अंभोजमूलं जम्ब्वाश्च तत्सर्वं च समांशकम् ॥ ९८ ॥

लोहभाण्डगतं कुर्यात्पक्षं भूमौ विनिक्षिपेत् ।
हरेद्भाण्डगतं कल्कं कल्कात्तैलं चतुर्गुणम् ॥ ९९ ॥

तैलाच्चतुर्गुणं भृङ्गरसन्तस्माच्चतुर्गुण. ।
चराक्वाथन्सर्वमिदं मन्दवह्नौ विपाचयेत् ॥ १०० ॥

तैलावशिष्टं विपचेच्चर्पिष्ट्वाऽऽयसपात्रके ।
निक्षिपेच्च परीक्षार्थं काकपक्षं विलेपयेत् ॥ १०१ ॥

तैलेन यदि कृष्णं तदौषधं सिद्धिदं भवेत् ।
साधको मासमेकन्तु तस्मिन्पात्रे विपाचितम् ॥ १०२ ॥

तेन लिप्ता कचास्तस्य पण्मासाद्भ्रमरोपमाः ।
चिञ्चाश्वत्थपलाशानां वासायाश्च द्रवैर्मुहु ॥ १०३ ॥

द्रुतं पात्रगत नागं चालयेद्भृसतां व्रजेत् ।
तावत्यचेन्नागभस्म पलं लोहस्य चूर्णकम् ॥ १०४ ॥

द्विपल च वराचूर्णं त्रिपल दाडिमत्वच ।
पलं चैतत्सर्वसमं काञ्जिकं लोहभाजने ॥ १०५ ॥

लोडयेत्पाचयेत्किञ्चित्क्षणं तल्लोहपात्रके ।
आतपे धारयेद्भृङ्गकोरण्टरसभावितम् ॥ १०६ ॥

एकविंशद्दिनं भाव्य भूयो भूयो द्रव द्रवम् ।
तेनैव लिप्ताश्चिकुरा पिञ्छतापिञ्छसन्निभा ॥१०७॥

कचरञ्जनयोगेषु कथिताकथितेषु च ।
निशि लेपं तथैरण्डपत्रैश्च परिवेष्टनम् ॥ १०८ ॥

प्रातस्स्नानमिदं कर्म सर्वसाधारण स्मृतम् ।

दिव्यौषधिग्रहणयोरयस्थलनिर्देशः ॥

श्मशाने सल्लिले मार्गे गृहे देवालये तथा ॥ १०० ॥

मलमूत्रयुतस्थाने ग्रामे गोष्ठे तरोरध ।
छायायां च विषमाये कुशीते चान्यच धिते ॥ ११० ।

एवं ग्रामेषु देशेषु न ग्राह्या सिद्धमूलिका ।
अरण्ये पर्वते तीरे नद्या तपवने शुचौ ॥ १११ ॥

शिलासङ्गिशुचिक्षेत्रे सिद्धक्षेत्रेऽब्धिरोधसि ।
श्रीपर्वते हिमगिरौ तटाके विजने ह्रदे ॥ ११२ ॥

गृह्णीयान्मूलिका जाता देहसिद्धिप्रदायिकाः ।

दिव्यौषधिग्रहणविधिः ॥

सर्वेषां सिद्धमूलानां रक्षाबन्धनकर्मणि ॥ ११३ ॥

खननेषूत्पाटनेषु ग्रहणेषु क्रमेण वै ।
कथ्यन्ते मनवो दिव्यास्सर्वसाधारणास्स्मृताः ॥ ११४ ॥

पूर्वेद्युरेव सुस्नातः कृतदन्तविशोधनः ।
अनुलिप्तश्शुद्धवस्त्रो हृष्टस्संयतमानसः ॥ ११५ ॥

मौनी गन्धाक्षतोपेतो रक्षाबन्धनसूत्रिताम् ।
पूर्वमन्वेषितां गत्वा मूलिकां स्वेष्टदायिकाम् ॥११६॥

चितृणं परितः कृत्वा खात्वांऽबु परिषेचयेत् ।
गन्धपुष्पाक्षतैः पूजां कृत्वा सूत्रेण बन्धयेत् ॥११७॥

समन्त्रकं साधकेन्द्रस्सोपवासो जितेन्द्रियः ।
अत्रैव तिष्ठ कल्याणि ! मम कार्यकरी भव ॥ ११८ ॥

मम कार्यकरी सिद्धा ततस्स्वर्गं गमिष्यसि ।

"ॐ ह्रीं नमस्तेऽमृतसंभूते बलवीर्यविवर्धिनि !
बलमायुश्च मे देहि पापं मे जहि दूरतः । ह्रीं फट् ॥"

अनेनैव तु मन्त्रेण त्रिधा सूत्रेण वेष्टितम् ॥ ११९ ॥

रक्षां बध्नीत तां स्पृष्ट्वा जपेदष्टोत्तरं शतम् ।
ततः प्रातस्समुत्थाय कृत्वा नित्यविधिं शुचिः ॥१२०॥

मूलिकां तां समासाद्य गन्धपुष्पाक्षतादिभिः ।
सर्वोपचारैस्संपूज्य बलिं दद्यात्सहेतुकम् १२१ ॥

समन्तकं खनेद्धीमान्मन्त्रोऽयमपि कथ्यते ।
येन त्वां खनते ब्रह्मा येन त्वां खनते भृगुः ॥१२२॥
येनेन्द्रो वरुणो विष्णुस्तेन त्वामुपचक्रमे ।
त्वामेवाहं खनिष्यामि मन्त्रपूतेन पाणिना ॥ १२३ ॥
एवं संप्रार्थयित्वाऽऽदौ पश्चान्मन्त्रं समुच्चरेत् ।

ओं श्रीं ह्रीं तं अमृतेश्वरि एहि एहि मम सकल-
सिद्धिं कुरु हुं फट् ।

अनेनैव तु मन्त्रेण निखनेत्सिद्धिमूलिकाम् ॥ १२४ ॥
अथ तूत्पाटयेत्तां तु प्राञ्जलिः प्रार्थयेदिति ।
मा उत्पते मा निपते मा च ते चान्यथा भवेत् ॥

ओं ह्रीं चण्ड हुं फट् स्वाहा ।

उत्पाटयेदनेनैव मन्त्रेण परमेश्वरि ! ।
अच्छिन्नमूलमादाय शुद्धवस्त्राभिवेष्टिताम् ॥ १२६ ॥
क्षिप्त्वा पटलिकायां च स्ववेश्मनि शुचिस्थले ।
निचये हृष्टमनसा निदध्यात्पारणं ततः ॥ १२७ ॥

ओं नमो भैरवाय महासिद्धिप्रदायकाय आपदुत्-
रणाय हुं फट् ।

अनेनैव तु मन्त्रेण गृहीत्वा गृहमानयेत् ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ षोडशोल्लासः ॥

॥ सप्तदश उल्लासः ॥

उपःपानरसायनम् ॥

अथ प्रीतमना देवी पप्रच्छ परमेश्वरी ।

श्रीभैरवी—

आदिभैरव देवेश सृष्टिस्थित्यन्तकारण ! ॥ १ ॥

सर्वज्ञ शिव लोकेश त्वत्प्रसादान्मया विभो ! ।

रसायनानि दिव्यानि श्रुतानि विविधानि च ॥ २ ॥

सुसाध्यं सुलभं दिव्यं सद्यः प्रत्ययकारणम् ।

बालस्त्रीषण्डवृद्धानां रोगार्तानां विशेषतः ॥ ३ ॥

योग्यं रसायनार्हाणां ब्रूहि देव कृपानिधे ! ।

ततस्मेराननाम्भोजो भैरवो भवभैरवः ॥ ४ ॥

श्रीभैरवः—

शृणु देवि ! प्रवक्ष्यामि सर्वयोग्यं सुखङ्करम् ।

पावनं सुलभं चान्तर्बहिरंहोविनाशनम् ॥ ५ ॥

यस्माज्जगन्ति जातानि प्राणाः प्राणभृतामपि ।

त्रायते विश्वमखिलं सर्वदेवात्मकं प्रिये ! ॥ ६ ॥

त्रिदोषशमनं सौख्यं पथ्यं सर्वरसाधिकम् ।

षड्जीवनादिगुणयुग्मसयुक्तं बलप्रदम् ॥ ७ ॥

जीवनं च बलं प्रायः प्राणिनामग्निमूलकम् ।

तस्याग्निरिन्धनं तोयं तस्मात्तोयं पिबेद्बुधः ॥ ८ ॥

वैद्युतो वाडवो बह्निर्जाठरश्च त्रयोऽग्नयः ।

अग्निन्धनास्युरन्येषां काष्ठादीनीन्धनानि हि ॥ ९ ॥

तस्माद्देवि ! शिवं वच्मि शृणु तोयरसायनम् ।
पूरयेन्नूतनघटे प्रातश्शोध्यैश्च वारिभिः ॥ १० ॥

गार्गेयैर्वाऽथ नादेयैस्तटाकैर्वापि सारसैः ।
कौपैर्वा चापि वै धर्मैर्वार्पिकैर्वा यथाभवैः ॥ ११ ॥

तद्घटं स्थापयेन्मञ्चे दिव्यभास्कररश्मिभि. ।
नष्टदोषं निशायां च चन्द्रामृतकराप्लुतम् ॥ १२ ॥

एलोशीरककर्पूरचन्दनैरधिवासितम् ।
पाटलीकेतकीजातिमल्लिकोत्पलवासितम् ॥ १३ ॥

उशीरतालधृन्तेन तोयसिक्तेन मन्द्रतः ।
मुहुर्मुहुर्वीजितं तु हंसोदकमुदाहृतम् ॥ १४ ॥

अनुरागोदयात्पूर्वं नास्पृष्टमलमूत्रकम् ।
पिबेत्तोयं तत कुर्यान्मलमूत्रविसर्जनम् ॥ १५ ॥

सन्ध्यावन्दनकर्मादि कुर्वन्स्वेच्छाशनो भवेत् ।
एकाब्दबालको नित्यं पिबेत्तोयं पलं पलम् ॥ १६ ॥

एवं षोडशवर्षान्तं प्रत्यब्दं च पलं पलम् ।
वर्धयेत्क्रमशो धीमान्पलषोडशिकावधि ॥ १७ ॥

षोडशाब्दात्परं सेव्यं षोडशप्रसृतं जलम् ।
एवं विंशतिवर्षान्तं नित्यं सेवेत सादरम् ॥ १८ ॥

अनेन व्याधयस्सर्वे विनश्यन्ति न संशयः ।
जीवेद्वर्षशतं बुद्धिबलेन्द्रियसुखान्वितः ॥ १९ ॥

प्रसृतं च पिबेदष्टपलं दीर्घायुषाय च ।
यथा वह्निबलं तोयं व्यहाद्वा पञ्चवासरात् ॥ २० ॥

समाहाद्वा क्रमात्साज्ञः प्रसृतं प्रसृतं तथा ।
पुनस्तु कुडवं वाऽपि वर्धयेत्तच्छनैश्शनैः ॥ २१ ॥

भोजनाभ्यन्तरे मात्रायत्सेव्यं ततः परम् ।
यथा मन्दोऽग्नितो वृद्धिस्तथा दोषः प्रशाम्यति ॥ २२ ॥

पिबेज्जलं वा वत्सरं वा यावन्तं वा पिबेज्जलम् ।
यथा वृद्धिस्तथा ह्रासो यावच्चुलुकमात्रकम् ॥ २३ ॥

उपवासं दिवा रात्रौ पथ्याशी तत्परित्यजेत् ।
आत्यन्तिके च व्यायामे सति वाञ्जलिमात्रकम् ॥२४॥

पादमर्धं त्रिपादं वा यथा सेवाञ्जलिं पिबेत् ।
मध्वाज्यतैलदुग्धाज्यजलान्यतमैर्युतम् ॥ २५ ॥

हन्याच्छीघ्रं वातरोगमथवाऽऽस्यस्थमेषजै. ।
तद्रोगोपशमनं भक्षयित्वा च भेषजम् ॥ २६ ॥

ततो जलं वा प्रपिबेन्मुहूर्तं वा गते सति ।
जीर्णे वा सलिले सेव्यं भोजनान्तेऽथवा निशि ॥

ज्वरादिरोगे सञ्जात उपवासो भवेद्यदि ।
पिबेदर्धञ्च पूर्वस्मालघ्वाहारी यथा सुखम् ॥ २८ ॥

उपवासो व्रतार्थं चेत्तक्षीरं वा पलं निशि ।
रात्रावभोजनं देवि ! जठरे वारि शुष्यति ॥ २९ ॥

अर्धं वा प्राञ्जलि वारि पिबेन्नित्यं प्रयत्नत. ।
सर्वलाहारसत्वाग्निसाम्यं वारि पिबेत्सुधी. ॥ ३० ॥

विण्मूत्रोत्सर्जनं ब्राह्मान्मुहूर्तात्पूर्वतो यदि ।
ततः पीत्वैव सलिलं विण्मूत्रं च विसर्जयेत् ॥ ३१ ॥

वारि पूतं विषं स्वल्पं विण्मूत्रोत्सर्जनात्परम् ।
अजातवेगे रात्रौ चेत्पिबेत्तोयं पुनः प्रगे ॥ ३२ ॥

पादं वाथ चतुर्थांशमञ्जलिं वा पिबेज्जलम् ।

जलपानकल्पे पथ्यमपथ्यञ्च ॥

गोधूमपष्टिशाल्यन्न यवजाङ्गलजामिषम् ॥ २३ ॥
गव्य सर्पिर्दधि क्षीरमुदश्वित्नवनीतकम् ।
मधुक्षुदाडिमद्राक्षामोचखर्जूरशर्करा ॥ २४ ॥
सहकारफल धात्री नालिकेरजल नवम् ।
कूष्माण्डालाबु(कोर्वा)रुनिम्बपत्रफलानि च ॥ २५ ॥
पत्रपुष्पफल शिग्रोर्मुद्गयूपरसौ कृतौ ।
सुनिषण्णकगोरण्टी जीवन्तीद्वयक तथा ॥ २६ ॥
राजवृक्षकगोथघ्नी चिल्ली वाऽपि लघुच्छदा ।
शतावरी तण्डुली च मत्स्याक्षी च विदारिका ॥ २७ ॥
उपोदकी च वार्ताकी कारवल्लीफलानि च ।
लघुकोशातकी लक्ष्मी पटोल तालमूलकम् ॥ २८ ॥
मोचाया कुसुम दण्डफलानि क्षुद्रदन्तिका ।
सदाफल च मत्स्याण्डी शृङ्गबेरञ्च सैन्धवम् ॥ २९ ॥
फलपूराम्लक पक्वधात्रीफलमर्कक ।
वायसी जुन्तली चैव वसुकन्यालिका तथा ॥ ४० ॥
कुस्तुबरी च सरसी शार्ङ्गेरी चक्रमर्दक ।
मण्डूकपर्णी पालक्या पत्र गार्ङ्गेरुक तथा ॥ ४१ ॥
आखुकर्णी कासमर्दपत्र गागेरक तथा ।
सस्कारार्थं च कैडर्यसैन्धवोषणजारका ॥ ४२ ॥
सर्वेऽपि मधुरप्रायाम्स्वादुशीतास्सुखप्रदा ।
कटकस्य च पथ्यायाश्शालादु लवणाक्तकम् ॥ ४३ ॥
नीलोत्पलाब्जयोर्नालपुष्पशालूककेसरा ।
स्नेहयुक्त मनोज्ञान श्वेताम्बरधरश्शुचि ॥ ४४ ॥

कस्तूरीचन्दनहिमकर्पूरैरनुलेपनम् ।
मन्दानिलं पुष्पमाल्यं कौमुदीरलभूषणम् ॥ ४५ ॥

पथ्यं रुच्यं जलीयं च स्वादुपाकं च सद्रवम् ।
घृतक्षीरयुतं भक्तं भुञ्जीतोदकसेवकः ॥ ४६ ॥

ताम्बूलचर्वणं कुर्यात्सकर्पूरं सुखासनम् ।
नारिकेलजलं सायं निशि क्षीरं सशर्करम् ॥ ४७ ॥

शाल्मली तूलशय्या च निशि निद्रा यथासुखम् ।
ऊनातिमालविष्टंभिविबन्ध्युष्णखराणि च ॥ ४८ ॥

रूक्षाह्यस्थिरगुर्वपिच्छिलाकालभोजनम् ।
कुल्माषवृहतीचोपद्यालाबुनिरूढकम् ॥ ४९ ॥

कुलुत्थयूषकालिङ्गगुञ्जावृक्षफलं तथा ।
पलाण्डु लशुनं सर्वकन्दं सिद्धार्थकं तथा ॥ ५० ॥

अजाश्लं पलं मत्स्यं किंचित्क्षीराम्लभोजनम् ।
अनुक्तशाकमन्नं च फलं क्षीरयुतं पलम् ॥ ५१ ॥

सर्वक्षीरयुतान्सर्वानूसानमधुरानपि ।
तिलतैलं च तत्कल्कमैतैस्संयुक्तमौषधम् ॥ ५२ ॥

बहुभाष्यातपच्छायासपचिन्ताध्वरोषणम् ।
शोकवाहनभीनिद्रालस्यात्यन्तरतं तथा ॥ ५३ ॥

मूर्ध्नि भारवहश्रांगसरणं चोपवासकम् ।
व्यायामेष्वादिवास्वप्नो निशि जागरणं तथा ॥ ५४ ॥

पुरोवातो हिमं धूल्यातिमायस्थलं तथा ।
धूमायगृहं तल्पं कार्पासपरिकल्पितम् ॥ ५५ ॥

अग्निश्रमांबुजननं तथोष्णाम्बरधारणम् ।
कौशेयधारणं तूर्योत्ताडनं कठिनासनम् ॥ ५६ ॥

उष्णालयक्षारकृपसलिलं कटुतिक्तकौ ।
अम्लः कषायतिक्तश्च रामठं च विरूक्षकम् ॥ ५७ ॥

मदिरा च वसा मज्जा मूत्रं दुष्टजलानि च ।
मद्यं शीतमनारोग्यं भोजन तैलवर्जितम् ॥ ५८ ॥

अभ्यङ्गं काञ्जिकं शीतं रोगागावे कषायकम् ।
विदाहि शोषण मूर्ध्नि स्नानमप्युष्णवारिभि· ॥ ५९ ॥

कारणं दोषकोपाना निन्द्यमन्यद्विवर्जयेत् ।

पीतजलजीर्णलक्षणम् ॥

स्वस्थ पीत्वा सुखासीनस्सलिलं वाग्यतश्शुचि ॥ ६० ॥

विसर्जयेन्मल मूत्रं ताम्बूलादीश्च वर्जयेत् ।
यावज्जल पिबेत्तावन्मूत्र निर्याति चेत्तदा ॥६१ ॥

जल जीर्ण विजानीयादौषधेन विना यदा ।
निर्गच्छेत्सलिलं पीत तदा स्वस्थतरो भत ॥ ६२ ॥

निर्गते पीतसलिले निश्शेषे क्षुत्प्रजायते ।
तैलाभ्यङ्गं तत. कुर्याद्धितं पथ्यमाचरेत् ॥ ६३ ॥

जलाजीर्णलक्षण तत्परिहारश्च ॥

परिहारं विना रोगा जायन्ते नाविचारत ।
श्रम क्लमश्च वमन शिरस्तोदश्शिरोभ्रम ॥ ६४ ॥

सलिलस्तम्भशोथौ चाभिष्यन्दो वेगरोधनम् ।
गुल्मोदावर्तकौ वह्निसदनं गात्रभञ्जनम् ॥ ६५ ॥

तोदो वस्तौ मेहने च वक्षणे हृदि लोचने ।
जड्घोद्वेष्टनक श्वासो मुक्तिद्वेषस्त्वरोचक ॥ ६६ ॥

अश्मरी पीनसः कासस्त्वतिसारश्च दुस्तरः ।
सकृद्भोविशोषश्चेद्दक्षायासादिकर्मभिः ॥ ६७ ॥

स दोषो न तु विज्ञेयो दोषस्तंभोऽसकृच्चदि ।
प्रपीते सलिले स्तब्धे चिकित्साऽत्र विधीयते ॥ ६८ ॥

कूष्माण्डपत्रैरुदरं वस्तिं चाच्छादयेत्सुधीः ।
मूत्रमोचनकुल्लेपं विदध्याज्जलमुक्तये ॥ ६९ ॥

यद्वाऽऽज्यधात्रीलिप्ताङ्गस्नानं कुर्याद्रसायनम् ।
सगुडं वा पिबेत्क्षीरं तक्रं वा शर्करान्वितम् ॥ ७० ॥

नालिकेरोदकैर्वापि ससितोर्वारुबीजकम् ।
कष्टाज्जीर्णं जलं यस्य भुक्ते प्राक्सर्पिराददेत् ॥ ७१ ॥

यद्वा तिष्ठेच्चिरं चाप्सु स्नायाद्धात्र्यादिभिर्हिमैः ।
यद्वा स्तब्धे जले पीते स्वादुशीतैर्विशोधयेत् ॥ ७२ ॥

कृष्णामदनसिन्धूत्थैः कल्कैर्मधुयुतैर्वमेत् ।
पथ्याचूर्णं नालिकेरजलैः पीत्वा विरेचयेत् ॥ ७३ ॥

यद्वा त्रिजातकव्योषत्रिभिन्नामलकाब्दकैः ।
त्रिवृत्सर्वसमा योज्या द्विचेतत्सर्वसमा सिता ॥ ७४ ॥

सक्षौद्रगुलिका कृत्वा लिहेदम्भोविमुक्तये ।
रात्रौ धरा सेविता चेत्सर्वदोषविनाशिनी ॥ ७५ ॥

नाभेरधश्चार्द्रपटं क्षणमात्रं निधापयेत् ।
अवगाहेन शीताम्भो मूर्ध्नि वा शीतवारि च ॥ ७६ ॥

निक्षिपेदथवा सार्द्रसिकतातल्पशोभिते ।
धारागृहे वा चासीत त्रपुसोर्वारुबीजकम् ॥ ७७ ॥

वरीद्राक्षाम्बुना पेयं वा तु काश्मरीजं वृषम् ।
द्राक्षारसेन वा पेयं कर्कटीबीजकानि च ॥ ७८ ॥

तण्डुलक्षालनजलैर्मधुकं वाऽथ शर्कराम् ।
सद्राक्षं च गुडं दार्वीं तण्डुलोदकयोगतः ॥ ७९ ॥

यद्वा धात्रीफलरसैर्गोस्तनीं शर्करान्विताम् ।
वरीं वा शर्करायुक्तां द्राक्षां वा गस्तुना सह ॥ ८० ॥

जलेन वा गुडं पेयं नालिकेरजलेन वा ।
तुगाक्षीरीभव कल्कं वापि कर्कारुबीजकम् ॥ ८१ ॥

कल्पं वा तामलक्याश्च मूलं वा यष्टिकल्ककम् ।
पिशाचकदलीपक्वफलं क्षौद्रसितान्वितम् ॥ ८२ ॥

नालिकेरजलैर्वापि तक्रैर्वा गस्तुनापि वा ।
रम्भाकन्दजलैर्वापि क्षीरैर्वाऽऽमलकीरसैः ॥ ८३ ॥

यद्वाऽऽगृतारसैर्वाऽपि कूष्माण्डस्वरसेन वा ।
दाडिमस्य रसैर्वाऽपि त्वभीरोश्च रसैस्तथा ॥ ८४ ॥

अलावोश्च रसैर्वाऽपि पिबेदेलां सशर्कराम् ।
कदलीकन्दयष्ट्याह्वश्वदंष्ट्राश्च कशेरुकाः ॥ ८५ ॥

तृणपञ्चकमूलानि शुक्ला चैव शतावरी ।
एतेषां कदलीकन्दप्रमुखानां कषायकम् ॥ ८६ ॥

सक्षौद्रं ससितं वापि पेयं जलविमुक्तये ।

उपःपानगुणाः ॥

एवं ब्राह्मे मुहूर्ते यत्पीतं वारि रसायनम् ॥ ८७ ॥

दोषानशेषान्शमयेद्रोगानपि विनाशयेत् ।
रक्तवातं च वातांश्च हृद्रोगं श्वासकासकम् ॥ ८८ ॥

रक्तपित्तं च पित्तानि अर्हणीर्छर्द्यरोचकान् ।
क्षयमूर्च्छाकुष्ठमेहमोहगण्डार्बुदान्गदान् ॥ ८९ ॥

गुल्मप्लीहाश्मरीशूलगाहार्जीर्णविपूचिकाः ।
क्रिमिं पाण्डुं कामिलां च हलीमकविसर्पकाः ॥ ९० ॥
व्रणं च श्वयथुं श्वित्रमग्निसादं त्रिधा विषम् ।
जत्रूर्ध्वगुह्यकान्रोगानपस्मारं च चिभ्रमम् ॥ ९१ ॥
ज्वरानाध्मानजठरमूलाघातगुदाङ्कुरान् ।
वलीपलितनिर्मुक्तो जीवेत्त्रिशतवत्सरम् ॥ ९२ ॥
स्थिरधीर्विलवान्धीरः कान्तः कान्तामनोभव· ।

नासापानरसायनम् ॥

नासापुटाभ्यां सलिलं यस्तु प्रातः पिबेन्नरः ॥ ९३ ॥
शुक्तिमात्रं प्रतिदिनं पथ्याशी विजितेन्द्रियः ।
इन्द्रियाणां पटुत्वं च वलीपलितनाशनम् ॥ ९४ ॥
शतायुष्यमवाप्नोति नासारन्ध्ररसायनम् ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ सप्तदशोल्लास. ॥

॥ अष्टादश उल्लासः ॥

सदाचाररसायनम् ॥
दिनचर्या ।

श्रीभैरवी—

देवदेव चिदानन्द सदाचारपरायण ! ।
परात्परतरं ब्रूहि सदाचारक्रमं प्रभो ! ॥ १ ॥

श्रीभैरवः—

साधु पृष्टं त्वया देवि ! लोकानां हितकारिणि ! ।
समासतस्सदाचारं ब्रवीमि शृणु पार्वति ! ॥ २ ॥

आचाराज्जायते धर्मो धर्मादर्थश्च वर्धते ।
तस्मात्प्रवर्तते कामस्तेन स्वर्गफलं भवेत् ॥ ३ ॥

आचारात्पापनाशस्स्यादायुर्वृद्धिर्दिने दिने ।
अधीता निगमास्सर्वे मन्त्राश्शास्त्राणि जातयः ॥ ४ ॥

समया देवतास्सर्वास्त्वाचारफलदाश्शुभा ।
आचारहीनास्सर्वे ते न फलन्ति न संशयः ॥ ५ ॥

[प्रबोधविधिः ।]

अरुणोदयवेलाया स्वस्थश्शय्यातलस्थितः ।
गीतैर्मङ्गलवाद्यैश्च बोधितस्सुमसन्निधौ ॥ ६ ॥

गुरुं तं नामपूर्वं च द्विभुजं वरदाभयम् ।
शान्तं शुद्धस्मित ध्यात्वा मूर्ध्नि स्वेष्टां च देवताम् ॥ ७ ॥

वारस्वरसञ्चरणचूडरत्नविधानमः(?) ॥

रविभौमार्किवारेषु सूर्यसौम्येन्दुमार्गवे ।
चन्द्रे गुरौ यथालाभं पश्येच्चारस्वरं प्रिये ! ॥ ८ ॥

आप्ये भौमे सुखं तत्वे दुःखमन्येषु चोत्थितः ।
तत्तद्वारस्वराभावे पूर्णां नाडीं पदं क्षिपेत् ॥ ९ ॥
जीर्णाजीर्णं विचिन्त्यादौ पुमान्पाणितलं निजम् ।
दक्षिणं विनतं वामे दीपं वह्निं च दर्पणम् ॥ १० ॥
सवत्सधेनुं धरणिमाकाशं खलमुत्तमम् ।
अन्यच्च मङ्गलं यद्यत्तत्पश्येत्समुत्थितः ॥ ११ ॥
न पश्येन्मुण्डिनं षण्डं जटिलं हीनविग्रहम् ।
नग्नं पाषण्डिनं रुग्णं मुक्तकेशं च नास्तिकम् ॥ १२ ॥
सशृङ्खलमतिक्रूरं मलिनाङ्गाम्बरं खलम् ।
अभ्यक्तं कुष्ठिनं मत्तं सुप्तं कुब्जं च नापितम् ॥१३॥
अनेडमूकं दासं च जडं भूतादिपीडितम् ।
चकितं च सुशोकार्तं रुदन्तीं भिक्षुकीं तथा ॥ १४ ॥
रजस्वलां च विधवामपत्नीकमपुत्रकम् ।
वेदाग्निगुरुदेवानां समयानां च निन्दकम् ॥ १५ ॥
रजकं च तथा कारुं खराजाविभुजङ्गमम् ।
श्वानमार्जालमहिषान्मुसलोलूखलं तृणम् ॥ १६ ॥
काष्ठं संमार्जनीं शूर्पं पाशं कपणकादिमान् ।

[विण्मूत्रोत्सर्जनविधिः ।]

उत्थायावश्यकं कर्म कुर्याद्देशे यथोचितम् ॥ १७ ॥
देवालये पथि शुचौ देशे कूपनदीतटे ।
चैत्यवृक्षे गवां गोष्ठे छायायां भस्मवारिणि ॥ १८ ॥
कृष्टे क्षेत्रे ससस्ये च देवताभिमुखं तथा ।
प्रत्यग्निसूर्यचन्द्रस्त्रीगोद्विजांबुनभस्वति ॥ १९ ॥

नोत्सृजेन्मलमूत्राणि मौनी वस्त्रावकुण्ठितः ।
उदङ्मुखो दिवा भूत्वा दक्षिणास्यस्सदा निशि ॥२०॥

समुत्सृजेज्जातवेगो न तु कृच्छ्रादुदीरयेत् ।

[शौचविधिः ।]

गन्धलेपापहं शौचं मृद्भिरद्भिस्समुद्धृतैः ॥ २१ ॥

कुर्याद्यत्नेन विधिवदलक्ष्मीकल्मिनाशनम् ।
शौचहीनाः क्रियास्सर्वा निष्फलास्ता महेश्वरि ! ॥२२॥

हस्तौ पादौ जलैर्मृद्भिस्सम्यक्प्रक्षालयेत्सुधी ।
पादरोगप्रशमनं चक्षुष्यं शुचि वृष्यकृत् ॥ २३ ॥

श्रमापहं च रक्षोघ्नं हर्षणं शुद्धिकारणम् ।

[आचमनविधिः ।]

अथाचमनमादध्यान्मुखो वाऽप्युदङ्मुखः ॥ २४ ॥

अन्तर्जानुस्समास्थाय मूलेऽङ्गुष्ठस्य वारि च ।
त्रिः पिबेद्द्विः प्रमृज्याद्भिरिन्द्रियाणि च संस्पृशेत् ॥

प्रच्युतान्नखकेशास्थिमलधातुवसादिकान् ।
उच्छिष्टं पुरुषं चाशु स्पृष्ट्वा ह्येतानिमानपि ॥ २६ ॥

रथ्यादिगमनं कृत्वा भुक्त्वा क्षुत्वा च मज्जनम् ।
कृत्वा पीत्वा च निष्ठीवगण्डूषानृतभाषणम् ॥ २७ ॥

पतितैस्सह संलापं पादप्रक्षालनं तथा ।
वाससी परिधायैव जपसन्ध्याभिवन्दनम् ॥ २८ ॥

दानहोमार्चनं कृत्यं कुर्यादाचमनं सुधीः ।
एतेष्वाचमनाशक्तश्श्रोत्राचमनमाचरेत् ॥ २९ ॥

क्षीरबुद्बुदफेनैश्च युक्तं सोष्णं सपूतिकम् ।
जलं सशब्दं नाचामेदन्यहस्तार्पितं प्रिये ! ॥ २० ॥
अक्षालितांघ्रिहस्तश्च मुक्तकच्छकचस्थितः ।

[दन्तशोधनविधिः ।]

ततश्शुद्धतनुर्भूत्वा दन्तकाष्ठं समाचरेत् ॥ २१ ॥
" आयुर्वर्कीर्तिवर्चांसि प्रजापशुधनानि च ।
ब्रह्मज्ञतावलारोग्यं देहि मह्यं वनस्पते ! ॥ २२ ॥
दन्ताना शोधनार्थाय हरामि त्वां पुनीहि माम् ।"
मन्त्रेणानेन गृह्णीयाद्यथार्हं दन्तकाष्ठकम् ॥ २३ ॥
अर्कापामार्गखदिरकरञ्जप्लक्षचम्पकम् ।
न्यग्रोधार्जुनवासन्तीजात्याम्रातकजाबवाः ॥ २४ ॥
आम्राशोकार्जुनोदुंबरपालाशकनिंबकम् ।
सर्जदाडिमकादम्बदारूणि हयमारक. ॥ २५ ॥
अरिमेदाश्च सरलश्शिरीषाङ्कोलकासनम् ।
व्याघ्रीमधूकश्रीपर्णीबदरीवृषमादिकम् ॥ २६ ॥
एतेषामेकमादाय यथालाभं च वाग्यतः ।
अथवा शुद्धमृज्जातं कादंबं मूलमेव वा ॥ २७ ॥
कटुतिक्तकषायाणामन्येषां मूरुहामपि ।
कनिष्ठिकाग्रकस्थौल्यं द्वादशाङ्गुलमायतम् ॥ २८ ॥
सत्वक्सान्द्रमृजुं शुद्धं समच्छेदमपर्वकम् ।
दन्तैर्वा शकलेनाथ शङ्कुना वाऽथ कूर्चितम् ॥ २९ ॥
क्षुण्णाग्रं मृदुलं कार्यं दन्तकाष्ठं सुरेश्वरि ! ।
अयं विप्रोचितो धर्मो नृपादीनां तु योषिताम् ॥ ३० ॥

कमात्रवाष्ट ससाथ चत्वारोऽङ्गुलकास्मृता: ।
अथ द्विजानामेकैकं (अङ्गुलं)मासत: क्रमात् ॥ ४१ ॥
दशाङ्गुलं समुद्दिष्टं नारीणां चतुरङ्गुलम् ।
प्रातश्च भोजनान्ते च द्वौ कालौ दन्तधावनम् ॥ ४२ ॥
वराव्योपत्रिजातैश्च सक्षौद्रैर्युक्तकूर्चिकान् ।
वामाधोदन्तपङ्क्तिं च पूर्वं मन्दं च घर्षयेत् ॥ ४३ ॥
ततोर्ध्वदन्तपङ्क्तिं च दन्तमांसमबाधयन् ।
आयुष्कामस्तु पूर्वास्यश्चासनस्थश्च वाग्यत: ॥ ४४ ॥
धनार्थी दक्षिणास्यस्तन्कीर्तिकामस्तु पण्डित: ।
पश्चिमास्यो दन्तशुद्धिं कुर्यान्नोदङ्मुखस्सदा ॥ ४५ ॥
अष्टाङ्गुलं मुमुक्षूणामङ्गोलस्तु प्रशस्यते ।
अर्केण दीप्तिजननं वश्यं स्यादन्तशूलहृत् ॥ ४६ ॥
अपामार्गेण तुष्टिस्स्याद्वृद्धिश्च ऋणमोचनम् ।
खदिरेणार्थलाभश्च भवेद्दन्तास्यरोगहृत् ॥ ४७ ॥
करञ्जेनास्यपूतिघ्नं लक्ष्मीं कुर्याद्विणे जयम् ।
प्लक्षेण कान्तिजननं चम्पकेनास्यपूतिहृत् ॥ ४८ ॥
न्यग्रोधेन व्रणघ्नस्स्याद्भाग्यकृद्दन्तदार्ढ्यकृत् ।
अर्जुनेनाधिक भाग्य दन्तानां शोधनं भवेत् ॥ ४९ ॥
वासन्त्या वाञ्छितार्थस्स्याज्जातिस्सर्ववशङ्करी ।
आम्रातको धान्यवृद्धिं जम्बूस्त्रीवश्यकृद्भवेत् ॥ ५० ॥
चूतस्सौभाग्यदायी स्यादशोकश्शोकनाशन ।
इन्द्राणी दन्तशूलघ्नी भृङ्गराजो मुखशुद्धिद ॥ ५१ ॥
पलाशो वश्यकृद्दृष्यो निम्बस्तु रुचिवित्तद ।
सर्ज पापहरो भाव्यो वत्सनाभो गुरुभक्तिद ॥ ५२ ॥

दाडिमी प्रीतिकृद्देवदारुस्त्रीवश्यदश्रुम ।
दन्तहर्षहरो ह्यग्नो ह्यमारोऽग्निवृद्धिदः ॥ ५३ ॥

अरिमेदो दन्तकान्ति सरलो दन्तदार्ढ्यकृत् ।
स्त्रीवश्यदश्रीपस्तु लक्ष्मीं च स्थिरतां नयेत् ॥५

अङ्कोलो दीप्तिजनको दन्तानां भाग्यदायकः ।
असृग्दस्त्रीवश्यकारी व्याघ्री चायुष्यवर्धनी ॥ ५५ ॥

मधूकः पुत्रपौत्राणां वृद्धिं श्रीपर्णिका द्युतिम् ।
करोति बदरी वश्यं वाशा राजवशङ्करी ॥ ५६ ॥

कृताधिवासं प्रागेव दन्तकाष्ठं महोत्तमम् ।
पथ्याचूर्णयुते क्षिप्त्वा गोमूत्रे सप्तवासरम् ॥ ५७ ॥

त्रिजातकुङ्कुमरिचमध्वञ्जनयुतेऽम्भसि ।
सनागकेसरे क्षिप्त्वा दन्तकाष्ठं क्षणं पुनः ॥ ५८ ॥

उद्धृत्य शोधयेद्दन्तान्घर्षणद्रव्यसंयुतान् ।
दन्तदार्ढ्यप्रजननं मुखकान्तिकरं शुभम् ॥ ५९ ॥

आस्यवैशद्यसौगन्ध्यजननं श्लेष्मनाशनम् ।
रुच्यं पित्तहरं श्रोत्रनाडीशोधनकारणम् ॥ ६० ॥

पावनं पुण्यजननं संभवेद्दन्तधावनम् ।

[विशिष्टरोगेषु दन्तकाष्ठधावनवर्जनातिदेशः ।

ज्वरच्छर्दिश्वासकासाऽजीर्णार्दितमदभ्रमाः ॥ ६१ ।

मूर्च्छाऽऽस्यपाकहृन्नेत्रशोषमूर्धरुजस्तथा ।
व्रणवलेदयुता ये च बलहीनातिसारिणः ॥ ६२ ॥

एतेश्च दन्तकाष्ठानि वर्जनीयानि पार्वति ।

[वर्ज्यानि दन्तकाष्ठानि ।]

धन्वयासो धवोऽक्षश्च तिन्निणी शिग्रुकाद्वयम् ॥ ६३ ॥
शेलुश्शाल्मलिकाश्वत्थो निचुलो बिल्वतिन्दुकौ ।
पीलुश्शमी गुग्गुलुश्च मल्लिका तिल्वकेंगुदी ॥ ६४ ॥
पलाश कोविदारश्च नाकुलिश्चित्रकाकुली ।
मोचा च तिन्दुकश्शाकं फेनिल कट्फलस्तथा ॥
त्वक्सारशणखर्जूरपूगतालाश्च केतकी ।
महावटो नालिकेरो हिन्तालैरण्डको डहु ॥ ६६ ॥
शीर्णं सपिच्छिल छिद्र सपर्णं पूतिगन्धिकम् ।
निस्त्वक्क च तथा शुष्कमज्ञात कण्टकान्वितम् ॥
मधुर लवण चाम्ल वक्रं च क्रिमिदूषितम् ।
एतानि दन्तकाष्ठानि हितार्थी परिवर्जयेत् ॥ ६८ ॥

[विशिष्टे काले दन्तकाष्ठधावननिषेध ।]

जन्मर्क्षे च विपत्तारे प्रत्यरे च वधर्क्षके ।
चन्द्रेऽष्टमे तु प्रतिपन्नवमीद्वादशीषु च ॥ ६९ ॥
पर्वषष्ठ्यो प्रजान्वेषी वर्जयेद्दन्तधावनम् ।
अकीर्तिर्भास्करे राजमान्य सोमे क्षिति, कुजे ॥ ७० ।
कान्तिर्बुधे सुख जीवे भाग्य शुक्रे शनौ शुचि ।
निषिद्धवारनक्षत्रे तिथौ वा दन्तधावनम् ॥ ७१ ॥
अलब्धे सति शुद्ध्यर्थमङ्गुल्या परिघर्षयेत् ।
सूक्ष्म ज्योतिष्मतीचूर्णं वराभिर्वा कदुत्रयै ॥ ७२ ॥
युक्त क्षौद्रयुत वाऽपि सतैल वा ससैन्धवम् ।
अङ्गुल्या च समादाय शनैर्दन्तान्विघर्षयेत् ॥ ७३ ॥

तदलाभे शुद्धपर्णैः कट्वम्लकषायकैः ।
कर्षयेद्दन्तपङ्क्तिं च ततः कोष्णाम्बुलेन च ॥ ७४ ॥
कुर्याद्द्वादशगण्डूषं मुखशुद्धिर्भवेदिमे ।
उपदेहास्यदौर्गन्ध्यश्लेष्मघ्नं दन्तदोषहृत् ॥ ७५ ॥
दृढत्वं दन्तपंक्तेश्च भवेदङ्गुलिघर्षणात् ।
हैमया वा राौप्यया वा नैम्बया वा शलाकया ॥ ७६ ॥
शर्करादन्तशल्यानि सेदमस्कन्नोद्धरेच्छनैः ।

[जिह्वाविलेखनविधिः ।]

दशाङ्गुलायतं सम्यक्कनिष्ठाग्रप्रमाणकम् ॥ ७७ ॥
हैमं रौप्यं तथा ताम्र्यं शाखां वा पाटलामपि ।
तालपत्रभवं वापि श्लक्ष्णं जिह्वाविलेखनम् ॥ ७८ ॥
तेन जिह्वामलं कर्षेन्मन्दं मन्दं मुहुर्मुहुः ।
जिह्वास्ययोर्मलं हन्याद्रसज्ञं च प्रसेकहृत् ॥ ७९ ॥
पूतिगन्धहरं रुच्यं वैशद्यं च प्रजायते ।
उन्मादमूर्च्छाहिक्कार्तिकफर्दिद्योषक्षयैर्युताः ॥ ८० ॥
श्वासकासाजीर्णयुता मानाहारविवर्जिताः ।
न कुर्वन्ति नरा नित्यं जिह्वालेखनकर्म च ॥ ८१ ॥

अञ्जनविधिः ॥

ततोऽञ्जयेद्वामदृशमादौ पश्चाच्च दक्षिणाम् ।
वामाक्षि वामहस्तेन दक्षहस्तेन दक्षिणम् ॥ ८२ ॥
मुद्गप्रमाणं सौवीरमञ्जनं नित्यशो हितम् ।
तेनाक्षिणी निर्मले च व्यक्तवर्णे तथोज्ज्वले ॥ ८३ ॥

स्याता घनतरस्निग्धपश्मणी सूक्ष्मदर्शने ।
नेत्रयोश्श्लेष्मणो भीतिर्विशेषात्स्रावण हितम् ॥ ८४ ॥
सप्ताहाच्छ्लेष्मकुद्वारिस्रावकं चाञ्जन निशि ।
अञ्जनोत्क्लेशितश्लेष्मा नासानाडीगतो भवेत् ॥ ८५ ॥
तस्य निर्हरणार्थाय नावन नित्यमाचरेत् ।

नस्यविधि ॥

सर्वर्तुष्वणुतैलेन नस्य श्रेष्ठतम प्रिये ! ॥ ८६ ॥
अभावे त्वणुतैलस्य नस्यं शुण्ठ्यादिकैर्हितम् ।
हेमन्ते शिशिरे शुण्ठीपिप्पलीगुडसयुतम् ॥ ८७ ॥
कोष्णेन वारिणा घृष्टमादौ वामपुटान्तरे ।
षड्बिन्दून्निक्षिपेदन्यन्नासारन्ध्रं पिधाय च ॥ ८८ ॥
पश्चादितररन्ध्रे च क्षिपेद्वाम पिधाय च ।
मधौ विश्वगुडस्तन्यघृष्ट नस्यमुदाहृतम् ॥ ८९ ॥
ग्रीष्मे स्तन्ययुता शुण्ठी नस्य वृष्टौ तिलोद्भवम् ।
तैल शरदि सस्तन्य शुण्ठी कर्पूरनावनम् ॥ ९० ॥
जत्रूर्ध्वरोगा नश्यन्ति नावनेन न संशय ।
सप्तवर्षात्पर नस्य हितमाशीतिवत्सरम् ॥ ९१ ॥
आजन्म मरणान्त स्यादणुतैल हितङ्करम् ।
मन्यास्तम्भो हनुस्तम्भशिरोरुक्कंपनादिकम् ॥ ९२ ॥
अघ्राणसृतिरोधौ च वैस्वर्यं पीनस तथा ।
केशच्युतिश्च खलतिर्जरा नस्येन नश्यति ॥ ९३ ॥
स्नायुसन्धिशिरोऽस्थ्ना च बलदार्ढ्यकर प्रिये ! ।
वृद्धिकार्ष्ण्यप्रद केशश्मश्रूणा सकलेन्द्रिये ॥ ९४ ॥

ओजस्करं विषहरं त्रिकालं नस्यमिष्यते ।

अणुतैलम् ॥

अथाणुतैलं वक्ष्यामि जीवन्त्यंबुदवारि च ॥ ९५ ॥
सेव्यत्वग्देवदारूणि दार्वी त्वग्गोपयष्टिका ।
हिमप्लवागरुवरीपुण्ड्रेक्षूत्पलबिल्वकम् ॥ ९६ ॥
सुरभिस्थिरधावन्यौ रेणुकैले च पत्रकम् ।
बलाकमलकिञ्जल्कौ क्रिमिघ्न च सुरेश्वरि ! ॥ ९७ ॥
षड्विंशत्यौषधं चैतत्प्रत्येकं तु चतुष्पलम् ।
तत्सर्वं खण्डश. कृत्वा दिव्येऽयुतपलेऽम्भसि ॥ ९८ ॥
पचेद्दशांशशेष च दशधा विपचेत्समम् ।
तस्माद्विभक्त एकांशे क्वाथे तैलं च तत्समम् ॥ ९९ ॥
पचेद्यावत्तैलशेष पचेत्तच्च द्वितीयके ।
भागे पुन. पचेदेवं तृतीयेऽपि चतुर्थके ॥ १०० ॥
क्षिप्त्वा क्षिप्त्वा तैलशेष भूयो भूय पचेदिति ।
एवं नवमभागान्तं कुर्याच्च दशमे पुन ॥ १०१ ॥
आजं पयस्तैलसम क्वाथे क्षिप्त्वा पचेच्छनै· ।
तैलशेष नवे वस्त्रे द्विगुणे पीडयेद्दृढम् ॥ १०२ ॥
अणुतैलमिदं श्रेष्ठ नस्यकर्मणि सर्वदा ।
अतिसूक्ष्मसिरामार्गव्यापकत्वाच्च सन्ततम् ॥ १०३ ॥
इन्द्रियस्थैर्यदायित्वादणुतैलमिति स्मृतम् ।

गण्डूषविधिः ॥

ततो गण्डूषमादध्यान्मातुलुङ्गस्य केसरम् ॥ १०४ ॥
पलं निष्कत्रयं व्योषं कर्षं सैन्धवजं रज: ।
क्षौद्रं कर्षं सिता कर्षमिति द्विपलमात्रकम् ॥ १०५ ॥

कर्यं चान्तर्मुखं क्षिप्त्वा यावच्छलेष्मावृतं मुखम्।
बहिः क्षिपेच्च कवलं पुनस्तद्वच्च पूरयेत् ॥ १०६ ॥

एवं षड्वारमाकल्प्यं कासश्वासाख्यरोगहृत्।
दीपनं रुचिकृद्वृष्यं भवेद्गण्डूषधारणम् ॥ १०७ ॥

अथ स्नेहस्य गण्डूषं कुर्याद्द्रव्ये घृतं पलम्।
मुखे क्षिप्त्वा पिधायास्यं निश्चलः किञ्चिदुन्मुखः ॥
यावच्छलेष्मावृतस्सान्तः पश्चान्निष्ठीवयेत्प्रिये!।
यूषाद्याहयुते पाके ह्यन्नस्यागन्तुके क्षते ॥ १०९ ॥
अग्निक्षारविषप्लुष्टे घृतगण्डूषमुत्तमम्।
पञ्चवर्षात्परं कार्यं गण्डूषं सततं हितम् ॥ ११० ॥

धूमपानविधिः॥

निशाकर्पूरशुण्ठीभिर्धूमस्सर्वर्तुषु प्रिये!।
पीतः कासश्वासजित्स्याच्चक्षुष्यो वक्त्रपूतिहा ॥ १११ ॥

कालदोषानुगुण्येन भेषजेन प्रयोजितम्।
धूमं पिबेत्सदा प्राज्ञे नरो रोगविवर्जितः ॥ ११२ ॥

वामनासापुटेनादौ दक्षिणं च निरोधयन्।
यथासुखं पिबेद्धूमं तथा दक्षिणरन्ध्रतः ॥ ११३ ॥

नासापानोत्क्लेशितश्च दोषः कण्ठं समाश्रयेत्।
तन्निराहरणार्थं च पिबेद्वक्त्रेण धूमकम् ॥ ११४ ॥

वक्त्रपीतं तु वक्त्रेण नोत्सृजेत्तं च नासया।
नासापीतं नसोत्सर्ज्यं वक्त्रेण च न नासया ॥ ११५ ॥

उत्सृजेद्यद्यशक्त्येन गलद्रोगमाप्नुयात्।
सम्यङ्निषेवितो धूमः कफवातोत्तरान्गदान् ॥ ११६ ॥

जत्रूर्ध्वजानिर्हरश्च तान्जातान्करोति च ।
मोहातिसारास्रक्षिप्ततिमिरोर्ध्वानिलामयान् ॥ ११७ ॥

रोहिण्याध्मानरिक्ताङ्गविरिक्तोदरपाण्डुकाः ।
जागरूकशिरस्तोदकृतवस्तिमदात्ययाः ॥ ११८ ॥

मद्यमत्स्यपयःक्षौद्रदधिश्लेष्मपिपासिताः ।
त्यजेयुस्ते धूमपानं तथैव स्नेहभोजनाः ॥ ११९ ॥

अष्टादशाब्दात्परतो धूमपानं हितं स्मृतम् ।
धूमपानात्परं कुर्यादण्डूपं तिलकल्कजम् ॥ १२० ॥

सुखोष्णसलिलैर्युक्तमामवातामयापहम् ।

ताम्बूलचर्वणविधिः ॥

हर्षणं चलनं हन्यादन्तानां दार्ढ्यकारणम् ॥ १२१ ॥

चर्वयेदथ तांबूलं चिक्कणादिगुणान्वितम् ।
क्रमुकं नागवल्ल्याश्च पत्रं शुभ्रदलानि च ॥ १२२ ॥

चूर्णं पाषाणजं श्रेष्ठं कर्पूरैकट्टकीफलैः ।
तक्कोलदेवकुसुमजातीखदिरसारकैः ॥ १२३ ॥

मूलाग्रमध्यमशिरा नागवल्ल्याः विवर्जयेत् ।
द्विपर्णं चूर्णयुक्तं च सार्द्रं बालमशोषितम् ॥ १२४ ॥

संयुक्तं च क्षणं धृत्वा वक्त्रे तच्च विवर्जयेत् ।
कलेशिता वक्त्ररदनजिह्वास्युर्निर्व्रणास्सुखाः ॥ १२५ ॥

नेत्रप्रक्षालनविधिः ॥

अथ प्रक्षालनं नेत्र उन्मील्यास्यं प्रपूरयेत् ।
अवमृज्याञ्जलिजलैर्निष्ठीवेन्मुखवारि च ॥ १२६ ॥

एवं त्रिधा विधायैतच्चक्षुषोरमृतं हितम् ।
दृक्पण्णवतिरोगघ्नं रुचिवैशद्यदायि च ॥ १२७ ॥

हेमन्ते शिशिरर्तौ तु द्वादशाञ्जलिमिर्दृशौ ।
वसन्तग्रीष्मयोरद्भिर्विंशत्यञ्जलिभिस्सुधी. ॥ १२८ ॥

पञ्चविंशतिभिर्वर्षाशरदि प्रिये ! ।
पित्तास्रनाडिकाव्यङ्गक्लेद्धवेत् ॥ १२९ ॥

नेत्रप्रक्षालनादेवि ! दृक्प्रसादकरं हितम् ।

व्यायामविधिः ॥

व्यायाममाचरेन्नित्यं यथासात्म्यं सुखावहम् ॥ १३० ॥

जातिशक्त्यानुकूल्येन स्निग्धाङ्गो बलवान्भवेत् ।
कार्यं शीते वसन्ते च स्वशक्त्यार्धं यथा मृदु ॥ १३१ ॥

अन्यदा मन्दमाद्ध्यादन्यथा रोगमाम्भवेत् ।
कर्मक्षम क्षीणमेदा लघ्वङ्गो दीपितानल ॥ १३२ ॥

विभक्तघनकायस्स्यादुक्तव्यायामकर्मणा ।
बालो वृद्धो वातपित्तकोपी चाजीर्णितस्त्यजेत् ॥ १३३ ॥

अतिव्यायामतस्तृष्णा क्षय कासो ज्वरो भ्रम ।
रक्तपित्त भ्रमश्छर्दिस्तमकश्च प्रजायते ॥ १३४ ॥

उद्वर्तनविधिः ॥

कृतव्यायामकं देहं मर्दयेच्च यथासुखम् ।
सुगन्धद्रव्यकल्केन कुर्यादुद्वर्तनं सुखम् ॥ १३५ ॥

वलिघ्नं कान्तिजननं मेद.कफविनाशनम् ।
अङ्गस्थिरीकर्मकारि भवेदुद्वर्तन प्रिये ! ॥ १३६ ॥

अभ्यङ्गविधिः ॥

अथाभ्यङ्गविधिं कुर्यात्पूर्वमभ्यासनस्थितः ।
रसायनोक्तैतैलेन शिरः कर्णौ च पूरयेत् ॥ १३७ ॥
शिरोऽहेणैव मूर्धानं शरीरार्हेण विग्रहम् ।
विशेषेण शिरः कर्णनासापाटेषु लेपयेत् ॥ १३८ ॥
बलातैलेन वाऽन्येन सिद्धेनाभ्यङ्गमाचरेत् ।

[बलातैलम् ।]

अथ वक्ष्ये बलातैलं चतुर्विंशत्पलानि च ॥ १३९ ॥
बलामूलानि कणश कृत्वा तत्षोडशे गुणे ।
जले क्षिप्त्वा पादशेषं पचेत्तत्समभागिकम् ॥ १४० ॥
गव्यं पयश्च देवेशि ! तत्तुल्यं पाटली तथा ।
काश्मरीबिल्वबृहतीद्वयगोक्षुरटुण्टुका ॥ १४१ ॥
कोलमशुमतीमुग्मकुलत्थमवका. पृथक् ।
चतुर्निष्कप्रमाणास्युश्चतुष्पट्टिपले जले ॥ १४२ ॥
पादशेष पचेत्सर्वं तिलतैलं च षोडश ।
पलमेतत्समस्तं च तत्क्षिपेत्ताम्रभाजने ॥ १४३ ॥
मेदाकाकोलिकासूप्यपर्णीयुग्मानि जीवक. ।
ऋषभो दारुमञ्जिष्ठाचन्दनागरुसैन्धवम् ॥ १४४ ॥
शैलेयशारिवाकुष्ठतगरोत्पलशारिवा. ।
वचागुन्द्रवाचोरनिष्कलाभिसुगन्धिकम् ॥ १४५ ॥
शतावरीविदार्यश्वगन्धायष्टिगताह्वया: ।
प्रत्येकमर्धकर्षं च श्लक्ष्णं संपेष्य कल्कयेत् ॥ १४६
सर्वं पक्वेतैलशेषं मृदग्नौ सावधानतः ।
चतुर्गुणवलेनैव पीटशेत्तुष्टिं सुधी ॥ १४७ ॥

सर्ववातप्रशमनं गुल्मोन्मादमहापहम् ।
मूत्राघातान्त्रवृद्धिघ्नं ज्वरघ्नं सूतिकाहितम् ॥ १४८ ॥
बालानां च हितं चास्थिमर्मक्षतयुजामपि ।
यक्ष्मिणः क्षीणसत्वस्य सन्निपाते विशेषतः ॥ १४९ ॥
पाने बस्तौ तथाऽभ्यङ्गे नस्यधारावगाहने ।
गण्डूषधारणे देवि ! हितं स्यात्पादलेपने ॥ १५० ॥
बलातैलमिदं श्रेष्ठं सर्वेषां सर्वदा हितम् ।

स्नानविधिः ॥

तैलापहारिकैश्चैव कषायैर्हृततैलकः ॥ १५१ ॥
कोष्णेन वारिणा शीघ्रं क्षालयेदथ विग्रहम् ।
यथा सुखोष्णमलिलैर्भूरिभिस्सर्वखानि च ॥ १५२ ॥
जरावातश्रमहर पुष्ट्यायुर्बलप्रमादक ।
दार्ढ्यनिद्रामुचमल्लकारी वृष्यो द्युनिमद ॥ १५३ ॥
उष्णांबुना शिरस्नानाद्दृढकेशबलहृच्छ्रम ।
वपुषे कोष्णसलिल बलकृद्वातशूलहृत् ॥ १५४ ॥
नेत्रादिनास्यकर्णानां जीर्णातीसाररोगिणाम् ।
आध्मानपीनसश्लेष्मयुजां सुक्तवतामपि ॥ १५५ ॥
कुलसशुद्धिदेहानां प्रातस्स्नानं तु गर्हितम् ।
पूर्वोत्तरार्द्धश्रवणत्रिजन्मरविसक्रमम् ॥ १५६ ॥
पर्वणां प्रतिपत्षष्ठीं चाष्टमीं दशमीं तथा ।
चतुर्दशीं व्यतीपातं वैधृतिं ग्रहणद्वयम् ॥ १५७ ॥
कुजार्किगुरुशुक्राणां वारानभ्यञ्जने त्यजेत् ।
बालस्थविरवृद्धानां न दोषस्सर्वदा भवेत् ॥ १५८ ॥

सन्ध्यादिनित्यकर्मविधिः ॥

सतश्चोद्वसनीयं च परिधाय विधानतः ।
आचम्य सुखमासीन. प्राङ्मुखः प्राणसंयमम् ॥ १५९ ॥

कृत्वा त्रिपुण्ड्रं सद्भूत्या वोर्ध्वपुण्ड्रं मृदा लिहेत् ।
तत्तन्नाम समुच्चार्य सन्ध्यां कुर्याद्यथोचिताम् ॥ १६० ॥

दिवाकराख्यमूर्जां च कुर्याद्दण्डनमस्क्रियाम् ।
तिथिवारादिपञ्चाङ्गं चन्द्रताराग्रहस्थितिम् ॥ १६१ ॥

शृणुयात्पापदारिद्र्यरोगादिविनिवर्हणम् ।
आयुश्श्रीविजयानन्दधर्मारोग्यसुखप्रदम् ॥ १६२ ॥

गुरुध्यानपरो भूत्वा कृतदेवार्चनक्रमः ।
तत्सन्निधौ द्विजातिभ्यो दानं दद्याद्यथाबलम् ॥ १६३॥

अथाग्निकार्यं कुर्वीत कपिलां च समर्चयेत् ।
गुरून्पुरोहितान्वैद्यान्दैवज्ञांश्च महीसुरान् ॥ १६४ ॥

तांबूलादिप्रदानेन नत्या संभावयेत्प्रिये ! ।
आज्ये स्वमुखमालोक्य तत्पात्रं तत्सदक्षिणम् ॥ १६५ ॥

दद्याद्द्विजन्मने नित्यमलक्ष्मीकलिनाशनम् ।

देहकेशधूपनविधिः ॥

ततश्च धूपयेद्देहं स्नानसिक्तकचादिकम् ॥ १६६ ॥

श्रीगन्धागरुकाष्ठानि सर्जांगुग्गुलुयावकाः ।
शर्करामधुसर्पिर्भिर्विलोड्य परिधूपयेत् ॥ १६७ ॥

अवगुण्ठितसर्वांगस्नानार्द्रचिकुरान्वपुः ।
शिरोरोगांश्च सकलान्स जयेत्पीनसादिकान् ॥ १६८ ॥

[गन्धानुलेपनविधिः।]

कुंकुमागरुकर्पूरकस्तूरीचन्दनानि च।
हिमांशुना श्लक्ष्णतरं पिष्टं देहविलेपनम् ॥ १६९ ॥

कुर्यादादौ द्विजातिभ्यो दत्त्वा पश्चाद्विलेपयेत्।
कीर्तिस्वरायुस्सद्वर्णकान्तिसौभाग्यवर्धनम् ॥ १७० ॥

मदमूर्च्छाश्रमस्वेददुर्गन्धश्रमवातहृत्।
चक्षुष्यं पित्तनुद्वृष्यं सुगन्ध्यं विषजिद्बलम् ॥ १७१ ॥

आकारश्रीकरं पुण्यं श्रमघ्नमनुलेपनम्।

[पुष्पधारणविधिः।]

जातीचम्पकपुन्नागपाटली यूथिकात्रयम् ॥ १७२ ॥

केतकीकुन्दचकुल्लकरवीरातिमुक्तकान्।
मल्लीकुरवनेपालमदनं शतपत्रकम् ॥ १७३ ॥

सौगन्धिकं मरुवकं वालकं कमलोत्पलम्।
अन्यानि च सुगन्धीनि यथाकालोद्भवानि च ॥ १७४ ॥

पुष्पाणि धारयेन्मूर्ध्नि सौभाग्यायुष्यपुष्टिदम्।
चक्षुष्य कान्तिदं श्रीदं धार्यविन्द्रियबलप्रदम् ॥ १७५ ॥

स्वेदक्लेदजदुर्गन्धमलहृच्च शिरोरुहाम्।
मृदुत्वस्निग्धताकार्ष्ण्यदैर्घ्यस्थैर्यविवर्धनम् ॥ १७६ ॥

मङ्गल्यं दाहशमनं चक्षुष्यं बलवर्धनम्।
पुष्पाणां धारणान्नृणां सौमनस्यं प्रजायते ॥ १७७

[रत्नधारणविधिः।]

अथाभरणरत्नानि धारयेच्च यथाक्रमम्।
पद्मरागं रवौ मुक्तां चन्द्रे भौमे च विद्रुमम्

सौम्ये मरकतं जीवे पुष्परागं भृगौ पविम् ।
शनौ नीलं पवणोस्तु राहुकेतुप्रियाय च ॥ १७९ ॥
धार्यो गोमेदवैडूर्यौ ससुवर्णं सुनिर्मितम् ।
आयुरारोग्यमैश्वर्यं धन्यं दुःखापहं सुखम् ॥ १८० ॥
काम्यमोजस्करं पुष्टितुष्टिऋद्धिपनाशनम् ।
पापघ्नं च भवेन्नित्यं रत्नाभरणधारणम् ॥ १८१ ॥
माणिक्यमायुर्विजयमोजो वित्तं करोति तत् ।
मौक्तिकं रक्तपित्तघ्नं दाहमूर्च्छाविषापहम् ॥ १८२ ॥
वज्रं भाग्यायुरोजश्रीकीर्तिदं विषपापहृत् ।
घोरव्यालाग्निचोराग्निचारवारिभयापहृत् ॥ १८३ ॥
नीलं लक्ष्म्यायुरारोग्यपुण्यकीर्तिबलप्रदम् ।
स्निग्धं मरकत सर्वदोषघ्नं विषभूतहृत् ॥ १८४ ॥
गोमेदं कान्तिकीर्तिश्रीमङ्गल्यं विषजिद्भवेत् ।
पुष्परागं सुखं कीर्तिं वाक्पटुत्वं ददाति च ॥ १८५ ॥
वैडूर्यं स्निग्धमोजस्यं मङ्गल्यं विषनाशनम् ।
प्रवालं श्रीकरं धान्यकान्तिदं विषनाशनम् ॥ १८६ ॥
सर्वाभरणसंयुक्तो दर्पणं देवमानुषम् ।
आलोकयेच्छुचिं देवि ! पुण्यं पापविनाशनम् ॥ १८७ ॥
काम्यमागन्तुदोषघ्नं श्रीकरं हर्षकृत्परम् ।

[कञ्चुकोष्णीषपादत्रधारणविधिः ।]

कार्पासयुगलच्छन्नो मध्ये पट्टांशुकावृतः ॥ १८८ ॥
कञ्चुकोष्णीषधारी स्यात्ससन्धान(या)सुखासन. ।
लक्ष्मप्रसादकरं वृष्यं रजश्रीनाशपापहम् ॥ १८९ ॥

केश्यं वातप्रशमनं कञ्चुकोष्णीपधारणम् ।
मृदुचर्मकृतं स्निग्धं पादत्राणं भजेत्सदा ॥ १९० ॥
वृष्यमोजस्यमायुष्यं चक्षुष्यं बलवर्धनम् ।
सुखप्रचारकृच्छल्यक्रिमिकण्टकनाशनम् ॥ १९१ ॥
स्फटशार्करपाषाणदुःखं सर्वजनोचितम् ।
गृद्धासने समासीनस्सुहृद्भिर्बन्धुभिस्सुतैः ॥ १९२ ॥
आर्यैः पूज्यैः परिवृतस्सल्लापामृतमाचरेत् ।

[भोजनविधिः ।]

ततो मध्याह्नवेलायां पूजयेदिष्टदेवताम् ॥ १९३ ॥
पञ्चयज्ञांश्च कुर्वीत दैवं पित्र्यं च मानुषम् ।
ब्राह्मं भौतं बलिं दद्यात्ततो भुञ्जीत मानवः ॥ १९४ ॥
उत्सृष्टमलमूत्रश्च विशुद्धोद्गारकोष्ठवान् ।
समार्गगतदोषश्च क्षुद्वारानुगतानिलः ॥ १९५ ॥
उत्पन्नजाठराग्निश्च लघ्वङ्गो विजितेन्द्रियः ।
मृदुलासनमासीनः प्राङ्मुखो दीर्घमायुषे ॥ १९६ ॥
यशसे दक्षिणास्यस्स्याच्छ्रियै प्रत्यङ्मुखस्सदा ।
नोदङ्मुखः कदाचित्स्यात्पिपासापीठं पुरस्थितम् ॥
आच्छाद्य शुद्धवस्त्रेण पात्रं तदुपरि न्यसेत् ।
रौक्मं वा राजतं कांस्यं यथालाभं सुशोधितम् ॥ १९८ ॥
रौक्मं पथ्यं पुष्टिकरं सौभाग्यं बृंहणं परम् ।
वातपित्तहरं वृष्यं गरघ्नं विषनाशनम् ॥ १९९ ॥
मङ्गल्यमपि रौप्यं तु वातघ्नं शुचि शीतलम् ।
कफपित्तहरं रुच्यं लेखनं भाग्यकान्तिकृत् ॥ २०० ॥

कांस्यं च रक्तपित्तघ्नं चक्षुष्यं लेखनं रुचि ।
हृद्यं श्लेष्महरं देवि ! रूक्षं वैशद्यकारि तत् ॥ २०१ ॥

आयसं सिद्धिदं पाण्डुकामिलाऽरुचिनाशनम् ।
हैमे सर्पिश्च रौप्ये तु चोष्याणि मद्रवाणि च ॥ २०२ ॥

कृताकृतानूसान्रौक्म्यपात्रे सोष्णं पयः क्षिपेत् ।
द्रव्याणि शुष्कदग्धानि कांस्ये तु कलवांबलौ ॥ २०३ ॥

रागषाडवसट्टांश्च वज्रवैडूर्यनिर्मिते ।
मृत्तिकाकाचकनकै रचिते पानकं जलम् ॥ २०४ ॥

दक्षिणे भक्षपिशितशाकक्रन्दफलानि च ।
पर्पटान्वटकान्वामे चूषपानीयपानकम् ॥ २०५ ॥

लेह्यं पयः प्रद्रवाणि रसान्पेयान्खलान्न्यसेत् ।
पुरस्ताद्धिमध्विक्षुविकृतिं सक्तुविक्रियाम् ॥ २०६ ॥

रागषाडवसट्टांश्च स्थापयेत्परमेश्वरि ! ।
गोधूमयवशाल्यन्नं जाङ्गलं पिशितं नवम् ॥ २०७ ॥

मुद्गसैन्धवमृद्वीकापथ्यामलकशर्कराः ।
पटोलं क्षौद्रमुदकं दिव्यं गव्यं घृतं नवम् ॥ २०८ ॥

दाडिमं गोपयस्सिद्धं दधि तक्रादिकं हितम् ।
यद्यत्स्वस्थहितं रुच्यं रोगघ्नं तत्तदाहरेत् ॥ २०९ ॥

मोचेक्षुचोचाम्रबिसतर्कारीमोदकं हितम् ।
भक्ष्यं भोज्यं लेह्यचोष्यं सषड्रसमनोहरम् ॥ २१० ॥

स्निग्धोष्णं लघु पथ्यं च शुद्धे मात्रानियन्त्रितम् ।
अतिमात्रं हीनमात्रं न भुञ्जीत सुखाय च ॥ २११ ॥

यथाऽर्धतृप्ति गुरुभिर्लघुभिश्चाऽऽत्रिपात्तथा ।
यथामात्रं समश्नीयाच्छीघ्रं जीर्यति सौख्यकृत् ॥

अतिमात्राशनाद्दोषा वाताद्याः पीडिता. परम् ।
कुप्यन्ति हीनमात्रा या भुक्तिरोजोनलापहा ॥ २१३ ॥

वातघ्नमात्रया भोजी मात्रा स्यादग्निवर्धनी ।
गुरुशिष्टातिथीन्बन्धून्पूज्यानन्याश्च दक्षिणे ॥ २१४ ॥

पुत्रपौत्रादिकान्धामे दौहित्रान्सकलान्पुन. ।
स्थापयेत्ताश्च शाकाद्यै. पक्तिभेदमकारयन् ॥ २१५ ॥

इतिहासपुराणानि शृण्वन्नापोऽशनं ततः ।
कुर्याच्च परिविष्टान्नं सर्वं सर्वेश्वरार्पितम् ॥ २१६ ॥

भावयन्नमृतं चास्तु ब्रुवन्भुञ्जीत हृष्टधीः ।
जठराग्निप्रतापेन वातपित्ते विजृम्भिते ॥ २१७ ॥

स्याता तयो. प्रशान्त्यर्थमादौ मधुरमाहरेत् ।
मध्येऽम्लं लवणं चाद्याज्जठरानलवर्धनम् ॥ २१८ ॥

कटुतिक्तकषायांश्च भुञ्जीतान्ते च मात्रया ।
पानीयममृत शीतं त्रिचतुर्वारमापिबेत् ॥ २१९ ॥

अन्यन्नयो कार्यमादौ मध्ये साम्यं तयोर्भवेत् ।
अन्ते स्थूलवपुर्वारि पीतं यद्भोजनस्य च ॥ २२० ॥

जलातिपानापीताभ्यां भुक्तमन्नं न पच्यते ।
तस्मादग्निविवृद्धयर्थं मात्रया सलिलं मुहुः ॥ २२१ ॥

जाठराग्नौ प्रदीप्ते च यो न भुंक्तेऽन्यकार्यत ।
क्षीयते जाठराग्निश्च यथाऽनाहुतिपावक ॥ २२२ ॥

जठरस्य द्विभागौ च पूर्यमन्नेन चांभसा ।
तृतीयभागं सपूर्य चतुर्थं परिशिष्यते ॥ २२३ ॥

वातादीनां प्रचारार्थमित्थं भोजनमाचरेत् ।
पर्वणोरर्कवारे च पितृपिण्डप्रदे दिने ॥ २२४ ॥

व्यतीपातेऽध्वरे चैव वर्जयेद्रात्रिभोजनम् ।
उपोष्यादथवा रात्रौ पानेनापि विशोपत ॥ २२५ ॥

द्विधा भुक्ति न कुर्याच्च चतुर्दश्यष्टमीषु च ।
द्विवार भोजन पथ्य द्विजातीना बल हितम् ॥ २२६ ॥

स्त्रीबालवृद्धाशक्ताना भवेदन्न यथासुखम् ।
आरोग्यमेकभुक्तेन बल्य वृष्य द्विभोजनम् ॥ २२७ ॥

त्रिवारभुक्त्या रोगास्स्युर्भुञ्जीताऽऽरोग्यरूपत ।
असाक्षिणैकवस्त्रेण न तिष्ठश्च न निद्रित ॥ २२८ ॥

अतिमात्र न भोक्तव्यमामदोषप्रदायकम् ।
अमिश्रमीतगणिकासङ्कीर्णगणकाशनम् ॥ २२९ ॥

अपक्वदुग्धविण्मि शीतलाशुचिरूक्षकम् ।
विदाहिगुरुशुष्कान्नप्लावित च पुरातनम् ॥ २३० ॥

विहगोच्छिष्टगोघ्रातमार्जारादिविदूषितम् ।
उदक्या स्पृष्टसक्लिष्टभुक्तशेषाघिदूषितम् ॥ २३१ ॥

सीमन्तसूतिकान्नादि पथ्याय परिवर्जयेत् ।
समान्न विषमान्न यदधिकान्न च वर्जयेत् ॥ २३२ ॥

क्रोधशोकक्षुधातापयुक्त पथ्यमपथ्यकम् ।
मिश्र भुक्त तदन्ने तु समन्नमिति कीर्तितम् ॥२३३॥

अल्प वा बहुभुक्त यदकाले विषमाशनम् ।
भुक्तचन्ते भोजन सद्यश्चाधिकान्न तदुच्यते ॥ २३४ ॥

एतत्त्रयान्न नयति मृत्यु वा तीनमामयम् ।
सदोषमतिमात्र वा गुरु भुक्त च यत्क्षणात् ॥ २३५ ॥

प्रणीयते तदन्न च यथोक्तादनुपानत ॥

अनुपानविधिः ॥

अनुपानं हितं ज्ञेयं देहदार्ढ्यं मनोज्ञताम् ॥ २३६ ॥
व्याप्तिं तृप्तिं च कुरुते भुक्तान्नस्य विशेषतः ।
संघातमपि शैथिल्यं विकृतिं जरणं तथा ॥ २३७
पीनसोरःक्षतश्वासकासजत्रूर्ध्वरोगहृत् ।
गीताध्ययनसंभाष्यस्वरसादे च तद्धितम् ॥ २३८ ॥

षोढानुपानमन्नस्य सात्म्यं वीर्यघ्नकं ततः ।
अनुलोमं वैपरीत्यं शोधनीयं च जीर्णकम् ॥ २३९ ।
सात्म्यं तु शीतलं वारि स्वादुरुष्णं घृतस्य च ।
वीर्यघ्नमजमांसस्य खादिरोदकमिष्यते ॥ २४० ॥
अनुलोमं सौकरस्य मांसस्याम्लकलावणे ।
तज्जातविकृतेश्शान्ति नयत्येवानुलोमतः ॥ २४१ ॥
वैपरीत्यं तु पुष्टिस्स्याल्लवणाम्भः प्रकीर्तितम् ।
वैपरीत्येन यत्तस्य हितं तद्विपरीतकम् ॥ २४२ ॥
शोधनीयं तु भुक्तान्नं मांसवच्छोधयेदतः ।
तेन शोधनमित्युक्तं जीर्णकं तेन जीर्यते ॥ २४३ ॥
मांसं यतो जीर्णकं तद्विख्यातं भुवनेश्वरि ! ।
यवगोधूमयोश्शीतमनुपानं जलं हितम् ॥ २४४ ॥
विषमद्यदधिक्षौद्रपिष्टकेषु कटूष्णकम् ।
मुद्गशाकादिविकृतौ तक्रमस्त्वम्लकाञ्जिकम् ॥ २४५ ॥
कृशानां पुष्टिकृन्मद्यं स्थूलानां सोदकं मधु ।
पुष्टिकृत्क्षयरोगे च कोष्णमांसरसो हितः ॥ २४६ ॥
धात्वग्निबलहीनेषु मद्यं मांसे हितं बलम् ।
रत्यध्वभाररोगार्तिभेषजानशनातपैः ॥ २४७ ॥

क्लेशितानां क्षये बालवृद्धानामृतं पय. ।
व्रणाक्षिगलमेहार्तास्त्यजेयु. क्लिन्नविग्रहा: ॥ २४८ ॥

अनुपानं च निद्राघ्वभाषणानि च सङ्गमम् ।
भुक्त्वा स्नात्वा च पीत्वा च वाहनाम्यातपायसम् ॥
व्यायामयानध्वनकर्माणि परिवर्जयेत् ।
विषयुक्तं भक्ष्यभोज्यलेह्यचोष्यादि वर्जयेत् ॥ २५० ॥

विषयुक्तौदनलक्षणम् ॥

विषयुक्तौदने चिह्नं साम्यवैसाम्यतोऽञ्जितम् ।
पाकश्चिरेण भवति पक्व. पर्युषितोपम. ॥ २५१ ॥

केकिग्रीवोपमोष्मा स्याद्गन्धवर्णविवर्जित: ।
विलक्षश्च चन्द्रिकायुक्तो मूर्च्छाऽज्ञानप्रसेकद: ॥
श्यावकथितशुष्कोर्ध्वराजीसीमन्तभाञ्जि च ।
फेनबुद्बुदतन्तूनि व्यञ्जनानि भवन्ति च ॥ २५२ ॥

रागषाडवमांसानि विच्छिन्नशिरसानि च ।
कृष्णा राजी मांसरसेऽरुणा क्षीरे महेश्वरि ! ॥ २५३ ॥

श्यावा दध्न्यसिता पीता तक्रे नीरनिभा घृते ।
कपोताभम्तु सूपे स्यात्कृष्णा राजी तुषोदके ॥ २५४ ॥

काली मद्ये च सलिलेऽरुणा तैले प्रशस्यते ।
हरिद्वर्णा भवेत्क्षौद्रे त्वामं पक्वं भवेत्क्रमम् ॥ २५५ ॥

वश्यं तु सुखितं वापि मद्यक्लमवमिश्रितम् ।
आर्द्राणि म्लानतां यान्ति शुष्काणि च विवर्णताम् ॥
मृदूनि यान्ति काठिन्यं कठिनानि च मार्दवम् ।
विषान्नमग्नौ निक्षिप्तं चैकाग्र्यं स्फुटत्यपि ॥ २५६ ॥

धूमार्चिषी मयूरस्य कण्ठाभासुमगन्धयान् ।
गतार्चिर्वा भवेदग्निर्निर्गन्धा ग्राह्य मक्षिका ॥२५९॥

भक्षणादेव काकश्च वैक्लव्यं यान्ति तत्क्षणात् ।
शारिकाशुकदात्यूहा कुर्वन्त्युत्कोशमुच्चकै ॥ २६० ॥

हसन्स्खालित्यमाप्नोति मौद्गल्य म्यान्मदोदय ।
जीवञ्जीवस्य च ग्लानिश्चकोराक्ष्णोर्विरागिता ॥ २६१ ॥

प्राणान्त्यजन्ति परभृद्दक्षचक्रकपोतका ।
उद्विग्नता विडालाश्च यान्ति मुञ्चन्ति वानरा ॥

कपोताश्शुकसारङ्गाश्शारिका भीपिता क्रमात् ।
मत्ता मयूरा नृत्यन्ति विपान्नस्य विलोकनात् ॥२६३॥

एतेषा दृष्टिपातेन भवेदन्नादि निर्विषम् ।

विरुद्धान्नस्वरूपम्, तद्वर्जनोपदेशश्च ॥

विरुद्धान्न न भुञ्जीत तत्स्याद्गरविषोपमम् ॥ २६४ ॥

नि क्षौद्र निस्नैश्च मापक्षीरैरनूपजम् ।
मास विषोपम सद्य प्राणानपहरेत्क्षणात् ॥ २६५ ॥

गुडेन पयसा वाऽपि मूलकैर्मत्स्यभक्षणम् ।
तस्मिंश्चिलिचिमा वर्ज्या क्षीरेणाम्ल फल सह ॥

सर्वं शाक कुलुत्थ च कोद्रवो बरक्स्तथा ।
वेल्लो मकुष्टकश्चैते विवर्ज्या पयसा सह ॥ २६७ ॥

गुडमूलकदुग्धैश्च वर्ज्यं हरितक सह ।
श्वाविधा कोलमास च दध्ना पृषदकुक्कुरौ ॥ २६८ ॥

पित्तेनापक्वपिशित मूलकैर्मापमूपकम् ।
अविमास च कौसुम्भैर्विसैस्सह विरूढकम् ॥ २६९ ॥

मध्वाज्यमापसूपैश्च दध्ना सिद्धगुडेन च ।
लकुचं वर्जयेत्तत्र दधि तालफलैस्सह ॥ २७० ॥

रंभापक्कफलं वर्ज्यं गुडक्षौद्रकणोपणै. ।
काकमाची विषसमा सुरया सह पायसम् ॥ २७१ ॥

कृसरान्नं घृतक्षौद्र वसातैलजलानि च ।
द्विशम्त्रिशो वा चैकत्र समभागगतानि चेत् ॥ २७२ ॥

अन्योन्यं विषतुल्यानि तिलकल्कैरुपोदकी ।
वारुण्या वकुलमायौ वर्ज्यौ कौलवसा कृता ॥ २७३ ॥

बलाका तु हरेत्प्राणान् लावतित्तिरिगोधिका: ।
कपिञ्जलश्च पत्राढ्य एरण्डेन्धनपाचिता: ॥ २७४ ॥

एरण्डतैलसभृग्राम्सद्य: प्राणान्हरन्ति ते ।
हारिद्रान्नौ विपक्वं चेत्प्रोत हारिद्रशूलके ॥ २७५ ॥

हारीतमास प्राणघ्नं सविषाणि विवर्जयेत् ।
कृमिकेशतृणैर्युक्तं पुनरुष्णीकृतं त्यजेत् ॥ २७६ ॥

अत्युष्णावरशाकानि निन्द्यैकरसनीरसम् ।
शुक्तममूलकदधिक्षारकीलाटकूर्चिका' ॥ २७७ ॥

गोवराहाविमहिषमत्स्याश्च परिवर्जयेत् ।
पूतिशुष्ककुशव्याधिविषपार्यादिभिर्हतम् ॥ २७८ ॥

शाल्मलिबिसनिष्पावपिष्टमाषविरूढकम् ॥
फाणितं यवकान्शुष्कशाकानि च विवर्जयेत् ॥ २७९ ॥

अत्यन्तकटुतिक्ताम्लकषायलवणान्वितम् ।
अज्ञातदोषजननं कुत्स्यं शास्त्रविगर्हितम् ॥ २८० ॥

असंस्कृतमदेवार्हं स्पृष्टं च पशुरोमभि' ।
हस्तदत्तं लेह्यपेयपायसं लवणं घृतम् ॥ २८१ ॥

तैल च समशाकानि व्यञ्जनानि च वर्जयेत् ।
स्त्रैण चैकशफ चौष्ट्र मासं वन्याविक त्यजेत् ॥२८२॥

अकालजानि पुष्पाणि प्रसूनानि फलानि च ।
सधिन्यवत्साऽसपूर्णदशाहाया च गो पय ॥ २८३ ॥

[भोजने वर्ज्या प्रकारा ३]

न प्रातरेव भुञ्जीत साय सन्ध्याऽर्धरात्रके ।
अन्धकारातपज्योत्स्नाव्योमपादपमूलके ॥ २८४ ॥

शय्याया द्वारि मार्गेषु कोणे घूसरितस्थले ।
न भुञ्जीत क्रियादुष्टे भिन्ने भावादिदूषिते ॥ २८५ ॥

स्वल्पे पात्रेऽन्यभोज्ये च पात्रभोजनगर्हिते ।
उन्नम्य तर्जनीं राजदेवतागुरुसन्निधौ ॥ २८६ ॥

अन्यचेता न भुञ्जीत न शीघ्र न चिरेण च ।
बुभुक्षितोऽम्बु न पिबेत्पिपासुर्नाशन भजेत् ॥ २८७ ॥

गुल्मी भवेत्पिपासार्तो बुभुक्षुश्च मगन्दरी ।
पशुवद्द्वामहस्तेन तोयमञ्जलिना न च ॥ २८८ ॥

परहस्तेन वा पीतशेष च लवणोदकम् ।

[भोजनानन्तरकर्तव्यम् ।]

एव भुक्त्वा तत कुर्यादमृतस्य पिधानकम् ॥ २८९ ॥

उत्थायासनमास्थाय क्षालयेदानन करम् ।
सुखोष्णवारिणा शश्वद्गण्डूषं ष्ठीवयन्मुहु ॥ २९० ॥

दन्तशोधनत कार्य दन्तसन्धिविशोधनम् ।
प्रातरेव बुभुक्षूणां दन्तशोधनमुच्यते ॥ २९१ ॥

प्रातर्मुक्ता च कर्तव्यं बुभुक्षूणां विधानतः ।
ततो निधिवदाचम्य सुद्धासनमुपेयिवान् ।। २९२ ।।

आलोलहृष्टचेताश्च संस्मरन्स्वेष्टदेवताम् ।
प्राणादीनां च वायूनां धातूनां पुष्टिकृत्सदा ॥ २९३ ॥

तवान्नामृतमेवास्तु बलमारोग्यमुज्ज्वलम् ।
पीताब्धितोयो वातापिभक्षितः खादितं मया ॥ २९४ ॥

पीतं संजरयेत्सर्वं लोपामुद्रापतिर्मुनिः ।
बडवाग्नि दिनाधीश नासत्यौ ससजिह्वकम् ।। २९५ ॥

कुम्भकर्णं शनिं स्मृत्वा शीघ्रमाहारजीर्णकृत् ।
अनेनैव तु मन्त्रेण स्वनाभिं पाणिना स्पृशेत् ॥ २९६ ॥

भुक्तोत्तरोद्भवकफं घूमेन शमयेत्प्रिये ! ।
अथवा कटुकैस्तिक्तै. कषायैर्वा मनोहरैः ॥ २९७ ॥

ततश्चर्वितताम्बूलो मन्दं शतपदं चरेत् ।
वामे च दक्षिणे पार्श्वे मध्ये तु क्रमश. स्मृतम् ॥

द्वात्रिंशत्पञ्चविंशच्च मात्रा स्याद्वादश क्रमात् ।
शयीतापि च नो कुर्याद्व्यायामं चासनं सुधीः ॥ २९९॥

भुक्त्वा दिनोत्तरं भूरि स्वानुकूलं समाचरेत् ।
भुक्तोपविष्टस्थूलस्यात्तिष्ठंस्तु बलवान् भवेत् ॥३००॥

सञ्चरन्सुखमायुष्यं स्वपन्धावन्मृतिं व्रजेत् ।
भुक्ताऽऽप्तपाणियानांबुस्नानं च परित्यजेत् ॥ ३०१ ॥

स्पर्शं शब्दं रसं गन्धं रूपं चानुभवेत्सुखम् ।
तेनान्नं जीर्यते क्षिप्रमौद्धत्यं कर्म नाचरेत् ॥ ३०२ ॥

अन्ये स्वस्यहिता धर्म्या आचाराः ॥

कथा धर्मोचराः पुण्याश्शृण्वन्पुण्यपरायणैः ।
परोपकारनिरतैरास्तिकैस्स्निग्धमानसैः ॥ ३०३ ॥

रागादिरहितैश्शान्तैर्वेदशास्त्रार्थवेदिभिः ।
स्वजनैस्सहितो नित्यं लोकयात्रानुसारिभिः ॥ ३०४ ॥

क्षणं तदितरैस्सार्धं न वदेन्न वसेत्क्वचित् ॥ ।
न स्निग्धेन द्विषेत्किञ्चिन्न दद्यान्न समाचरेत् ॥ ३०५ ॥

वेगान्निरुन्ध्यात्तान्नैव बलान्नोदीरयेत्सदा ।
सति वेगे नान्यकारी साध्यरोगाननाशयन् ॥ ३०६ ॥

ऐहिकामुष्मिकसुखं विना धर्मं न लभ्यते ।
सर्वेषां प्राणिनां सर्वं कार्यं सुखनिमित्तकम् ॥ ३०७ ॥

भवेद्धर्मरतस्तस्मात्सुखार्थी सततं नरः ।
पूज्यैस्सद्भिस्सहासीत न नरैर्दुष्टकर्मभिः ॥ ३०८ ॥

कायेन मनसा वाचा न कुर्यात्पापलेशकम् ।
अगम्यागमनं स्तेयं हिंसाताडनघातनम् ॥ ३०९ ॥

पाणिपद्भ्यां दृशा स्त्रीणामन्येषां च विलोकनम् ।
श्रुतिं पापकथानां च वृक्षादीनां च भञ्जनम् ॥३१०॥

आदा(धा)नं सर्वकाले च समादा(धा)नं च सर्वतः ।
द्रोहचिन्तां पापचिन्तां परद्रव्याभिलाषिताम् ॥ ३११ ॥

शास्त्रदृष्टे वैपरीत्यं महावाक्यान्यथाकृतिम् ।
नास्तिक्यचिन्तामज्ञानमसतामादरं तथा ॥ ३१२ ॥

असंबद्धप्रलापं च पारुष्यमनृतं तथा ।
निष्ठुरोक्तिं च पैशुन्यमर्मोद्घाटनकं तथा ॥ ३१३ ॥

विरोधशोकजननमहितं बहुभाषणम् ।

सन्त्यजेत्सततं विद्वान् देवि ! त्रिपुरभैरवि ! ॥ ३१४ ॥

शोकदारिद्र्यरोगार्तान्तोषयेच्च यथाबलम् ।
ब्रह्मादिकीटपर्यन्तं पश्येदात्मवदीश्वरि ! ॥ ३१५ ॥

मानयेद्देवताविप्रगोभिपृद्धभूमिपान् ।
गुरूनभ्यागतान्बन्धूनतिथीन्नतिनो यतीन् ॥ ३१६ ॥

याचकान्नावमन्येत नाक्षिपेत्तान्कदाचन ।
अहितार्थपरे शत्रावुपकारपरस्सदा ॥ ३१७ ॥

सुखे दुःखे चैकमनाश्चुतत्यागादिहेतुके ।
रूपामरणवस्त्राद्यै. फले चेर्ष्यां न कारयेत् ॥ ३१८ ॥

प्राप्तकाले हितं स्वल्पं सत्य मृदु मनोरमम् ।
सदाचार कृपालुश्च स्मितास्य पूर्वभाषकः ॥ ३१९ ॥

न सर्वत्रापि विश्वस्तो न च सर्वत्र शंकितः ।
नैक एव सुखार्थी स्यात्किञ्चिच्छल्यं न कारयेत् ॥

स्वय पराहितो न स्यात्प्रभोर्निस्नेहतामपि ।
अपमान न प्रकाश्यं स्वकृतं धर्ममीश्वरि ! ॥ ३२१ ॥

पराराधनदक्षस्तु यस्य चित्त यथा भवेत् ।
तथैव तमनुब्रूयात् तस्य सन्तोषहेतवे ॥ ३२२ ॥

धर्मार्थकामहीनं च कर्म नैव भजेत्सदा ।
तथा परस्परेणैव विरोधं न समाचरेत् ॥ ३२३ ॥

लालन पीडनं नित्यमिन्द्रियाणां न चाचरेत् ।
सर्वधर्मेषु सामान्यं कर्म नित्यं समाचरेत् ॥ ३२४ ॥

अदीर्घनखरश्शुद्धहस्तपादेन्द्रियस्सदा ।
स्निग्धकेशश्मश्रुवर्णस्स्वसौभाग्यमनुद्धत. ॥ ३२५ ॥

सुवेषस्नाननिरतश्छत्रोपानत्समन्वितः ।
युगप्रमाणमापश्यन्धारयेद्रत्नभूषणम् ॥ ३२६ ॥
दिव्यौषधं विषहरं सिद्धमन्त्रसुयन्त्रकम् ।
रात्रावात्यन्तिके कार्ये नैको गच्छेन्न दण्डभृत् ॥३२७॥
न वेष्टितशिरा नैव तमिस्रे शङ्कितस्थले ।
तुषोच्छिष्टाशुचिस्नानशर्करावह्निभूमयः ॥ ३२८ ॥
लोष्टभस्मध्वजाश्वस्तचैत्यार्यवनिताश्रिताः ।
छाया नाक्रमणीया स्यान्न दोर्भ्यां तटिनीं तरेत् ॥
उरसा स्यन्दनगजशिबिकानौमहीरुहान् ।
नारोहेन्न च वह्निं च दुष्टसत्वान्प्रति व्रजेत् ॥ ३३० ॥
क्षुतं विजृम्भहास्यं च न कुर्याद्विवृताननः ।
न पीडयेद्घ्राणरन्ध्रं लिखेद्भूमिमकारणम् ॥ ३३१ ॥
अङ्गानि न विचेष्टेत विपरीतानि भैरवि ! ।
नोर्ध्वजानुश्चिरं तिष्ठेत्तथा नोत्कटकासनः ॥ ३३२ ॥
श्रमो वा यदि वाक्कायमनसा च प्रजायते ।
तस्मात्पूर्वं त्यजेत्कर्म वृक्षच्छायां त्यजेन्निशि ॥३३३॥
दिवा कपित्थच्छायायां रात्रौ बोधिद्रुमस्य च ।
दिवानिशं विभीतस्य छायां च परिवर्जयेत् ॥ ३३४ ॥
चैत्यान्तश्चत्वरं देवभवनं च चतुष्पथम् ।
नक्तं न सेवेत दिवा वध्यशून्यगृहाटवीम् ॥ ३३५ ॥
पितृभूमिं चण्डरश्मिं न संपश्येत्कदाचन ।
सूक्ष्ममप्रियमादीप्तमेध्यं न विलोकयेत् ॥ ३३६ ॥
न धार्यशिरसा भारो विक्रेयं नासवं क्वचित् ।
तथा रसांश्च पुरुषवातवात्यापुरोऽनिलान् ॥ ३३७ ॥

रजोहिमातपान्वादं महद्भिश्च विवर्जयेत् ।
मैथुनक्षवथूदारकासनिद्रान्नपानकम् ॥ ३३८ ॥
वक्राङ्गो न च सेवेत दंष्ट्रिव्यालशृङ्गिणाम् ।
तटच्छायानीचदुष्टानार्यराजद्विषामपि ॥ ३३९ ॥
बालातिचतुराणा च स्त्रीणां सेवा विवर्जयेत् ।
निद्राध्ययनसम्भोगभोजनानि न सन्ध्ययो ॥ ३४० ॥
नखाङ्गास्यैरशब्दवाद्य केशाना धूनने करै ।
पूजयाग्न्यन्तरायानं सधूनं च वर्जयेत् ॥ ३४१ ॥
स्त्रीषु वैरस्यविश्वासम्घातन्व्याधिकसक्ताम् ।
व्यसनेषु च सर्वेषु वर्जयेदतिसक्ताम् ॥ ३४२ ॥
दैवाग्निगुरुराजानामनृताप्रियकोपनम् ।
लीलारागविनोदस्त्रीभाषण शयनान्तरम् ॥ ३४३ ॥
वाणिज्यद्वयगादानि हासोच्छिष्टाशुचित्वकम् ।
आकुण्ठन च शपथ सदा वासं विवर्जयेत् ॥ ३४४ ॥
स्नायान्न नग्न कर्माणि निष्फलानि न चाचरेत् ।
न बोधयेच्छयालु च नार्द्रांघ्रियुगलस्स्वपेत् ॥ ३४५ ॥
सक्लेशो नाजेयेद्वित्त मर्मस्पृङ्नैव कस्यचित् ।
देवाग्निगुरुवृद्धाना पूज्याना योषितामपि ॥ ३४६ ॥
वेदशास्त्रकुमारीणा वाममार्गानुसारिणाम् ।
ऊनातिरिक्तदेहाना विद्याहीनकुरूपिणाम् ॥ ३४७ ॥
दरिद्राणा च हीनाना निन्दा कुर्यात्कदापि न ।
न स्त्रीपरयुतोऽश्नीयाज्जृम्भमाणा समानताम् ॥३४८॥
नग्नामन्ययुता हीणा स्रवन्ती च रजस्वलाम् ।
यदृच्छया समासीनां न पश्येत्क्षुद्धतीं स्त्रियम् ॥

न कण्डूयेद्द्विरस्ताभ्या मूर्धान निजमीश्वरि ! ।
स्वक जन्मर्क्षलग्न च गृहन्छिद्र धन वय ॥ ३५० ॥

जप्य मन्त्र न कथयेच्छुनान्वयधनस्य च ।
वयोवाग्वेषबुद्धीना कर्मणा सदृशी प्रिये ! ॥ ३५१ ॥

शङ्काकोटिल्यरहिता शुभा वृत्ति समाचरेत् ।
वृद्ध्याजीवे रोगिमिश्च स्तेनै पातकिभिस्सह ॥३५२॥

न विटैर्न वसेद्वैद्यैर्न जीवेत्क्षात्रकर्मणा ।
विट्शूद्रकर्मणा वाऽपि हीनवृत्त्या द्विजन्मदा ॥३५३॥

आयुरारोग्यवित्तेषु योगनेष्वस्थिर स्मरेत् ।
अवैद्ये व्याधिबहुले दुर्बले जलवर्जिते ॥ ३५४ ॥

अधर्मिलोकैरुद्विग्ने वने नायकवर्जिते ।
बहुनाथेऽबलानाथे बालनाथे ह्यदातृके ॥ ३५५ ॥

उपद्रुते देवविप्रबन्धुभिश्च विवर्जिते ।
ऋणदातृविहीने च विद्याधनविवर्जिते ॥ ३५६ ॥

प्रियसमानरहिते देशेऽस्मिन्न वसेद्दिनम् ।
स्वय न कुर्यात्पुष्पस्रक्क्षौरचन्दनघर्षणम् ॥ ३५७ ॥

पादाभ्यङ्गोद्वर्तनानि केशशुद्धिं च पादयो ।
क्षालन च स्वय कुर्यान्मुखप्रक्षालन तथा ॥ ३५८ ॥

शौच नवमलद्वारशोधन दन्तधावनम् ।
अवरोधं कोशगृह गच्छेत्तिष्ठेच्चिर न च ॥ ३५९ ॥

अल्पलाभे तुष्टचेता बहुलाभेऽपि नोद्धत ।
राजाग्निस्त्रीगुरूणा च ह्यत्यासन्नातिदूरताम् ॥ ३६० ॥

वर्जयेद्भुजगक्रीडा लीलया विषभक्षणम् ।
आतप पृष्टभागेन सर्वलोकानृजुत्वत ॥ ३६१ ॥

नेर्ष्यालु परवृद्धौ च सयोगी बन्धुभिस्सह ।
उदग्रस्मृतिमान्वाग्मी बली ह्रीमाश्च बुद्धिमान् ॥

अरिषड्वर्गरहितो वृद्धसेवापरायण ।
पितृपिण्डप्रदाता स्यादृपाल्यर्यागहोमकृत् ॥ ३६३ ॥

क्रुद्धानुनेता भीतानामाश्वासी शान्तलोचन ।
विमृश्यकारी दक्षश्च क्षमी दाक्षिण्यतत्पर ॥ ३६४ ॥

कुलविद्याधैर्यशौर्यशिल्यविज्ञानतत्पर ।
इन्द्रियद्विरदान्रन्धे तीक्ष्णज्ञानाङ्कुशेन च ॥ ३६५ ॥

प्रेरक चेन्द्रियाणा यत्तन्निरुन्ध्यान्मनस्सदा ।
तस्मिन्बद्धे तु बद्धानि भवन्त्येवेन्द्रियाणि च ॥३६६॥

सेवेत काले विषयान भचेत्तदधीनताम् ।
इच्छेच्छिल्प च मरण विधाज्ञानार्जन तथा ॥ ३६७ ॥

प्रियवाक्येन लोकाना चित्तमाह्लादयेत्सुधी ।
विश्राणितार्थोऽप्यसदुग्रवाक्त्यज्यते भयात् ॥ ३६८ ॥

आत्मनोऽप्यहिते याते परेषा हितभाग्भवेत् ।
धर्मं सर्वप्रिय तथ्य हितमर्थं वचो वदेत् ॥ ३६९ ॥

अश्राव्यमुग्रमसहमप्रत्यक्ष न तद्वदेत् ।
नारीं भृत्य सुत प्रीतिदानैर्लुण्य च दानत ॥ ३७० ॥

अन्यान्दाक्षिण्ययोगेन मूर्खांश्छन्दानुभाषणात् ।
प्रणत्या स्तब्धहृदयान्विद्वास सत्यभाषणात् ॥ ३७१ ॥

विद्यावयोबन्धुवित्तयुक्ता पूज्या यथाक्रमम् ।
न कुर्यात्स्पर्धया वैर महद्भिश्च प्रधानकै ॥ ३७२ ॥

सुखे सुखाधिकान्दृष्ट्वा दुःखे दुःखाधिकास्तथा ।
अहिताभ्यामिवोभाभ्या न दद्यादात्मजीवितम् ॥३७३॥

धर्मज्ञान्दु खसंभार्यान् वन्धूंश्च सुहृदः प्रियान् ।
दासानकुपितान्कुर्यात्तेषां दोषान्न च स्मरेत् ॥ ३७४ ॥

परस्परं न कण्डूयेत्क्षालनीये पदे न च ।
पादं पदेन नाक्रम्य जुहुयान्नाशुचिस्सदा ॥ ३७५ ॥

अनर्चिषं हव्यवाहं नैकशय्यस्त्रिया सह ।
परासनगृहारामशय्यायानांशुकं त्यजेत् ॥ ३७६ ॥

कोऽयं कालः कश्च देशः सहायः को व्ययागमौ ।
कोऽन्वहं का च मे शक्तिरिति चिन्त्यं क्षणे क्षणे ॥

सदाचारप्रवृत्ताना महतां शीलवर्तनम् ।
समाचरेत्परीक्ष्यैव शिष्टास्त्वाचार्यका नृणाम् ॥ ३७८ ॥

दानी कृपार्द्रचित्तश्च वाग्यत कामविग्रहः ।
परकार्योद्यतो नित्यं भवेन्मुक्तिपरायण ॥ ३७९ ॥

दिनानि मे किं सुकृतैः दुष्कृतैर्वा प्रयान्ति किम् ।
दिवा नक्तमिति ज्ञात्वा न भवेत्स तु दुःखभाक् ॥

एवं संक्षेपत प्रोक्तमाचरन्यो भवेन्नर ।
कीर्त्यारोग्यधनायूंषि मुक्तिमन्ते च गच्छति ॥ ३८१ ॥

रात्रिचर्या ॥

एवमशेषं दिवसं क्षपयेच्च पितृप्रसूम् ।
प्रणम्यार्घ्याञ्जलिं दत्वा कल्ये वास्तमिते रवौ ॥ ३८२ ॥

गायत्रीं च जपेच्चैव वह्न्युपासनमाचरेत् ।
गुरून्प्रणम्य विप्रांश्च तै. कृताशीस्तत परम् ॥ ३८३ ॥

भजेन्नीराजनं दीपं दिव्यांभस्सुरपार्श्वयो. ।
कृत्वा पिष्टमय दीपराजनं घृतपूरितम् ॥ ३८४ ॥

अच्छवर्तियुतं स्थाल्यां पुष्पदूर्वातिलानपि ।
खरसां सहदेवीं च विष्णुकान्तां च सर्षपम् ॥
स्थापयित्वोद्दीपयेत दिनं नीराजनं प्रिये ! ।
सशङ्खघोषं कान्ताभिर्जयशब्दपुरस्सरम् ॥ ३८६ ॥
सुवासिनीभिस्सस्त्रीक· कृतनीराजनक्रमः ।
इतयस्सकला रोगाः शाम्यन्तु दुरितानि च ॥ ३८७ ॥
दुर्दृष्टिदोषाश्चेयांसि चारोग्यायूंषि सन्तु ते ।
एवं समुच्चरन्तीभिर्बालिणैश्च शुभं कृतम् ॥ ३८८ ॥
घृताक्तवर्तिसान्द्रश्च दीर्घैकाग्रो विनिश्चलः ।
प्रदक्षिणार्चिरुचिरस्तप्तहाटकदीप्तिमान् ॥ ३८९ ॥
वैडूर्याभ्रमयो दीपो ज्ञेयो मङ्गल्यदः परम् ।
निष्टप्ततनिया(?)यज्ञे दीप्तिमाननलो यदि ॥ ३९० ॥
प्रदक्षिणार्चिर्वेद्यां च तस्यैश्वर्यमराण्डितम् ।
यथोक्तलक्षणाद्धीना दीपहोमाग्नयो यदि ॥ ३९१ ॥
लक्ष्म्यै तदशुभं ज्ञेयं शलभानिलनाशितम् ।
सङ्गीतशास्त्रचतुरैस्सर्वशास्त्रविशारदैः ॥ ३९२ ॥
धर्मज्ञैर्योगिभिर्युक्त· पुराणार्थप्रवर्तकै· ।
एवं पण्याङ्गिका नीत्वाऽश्नीयात्प्रक्षालिताङ्घ्रिक· ॥

रात्रिभोजननियमाः ॥

प्रातर्भुक्तिरजीर्णा चेद्रात्रिभुक्तिं विवर्जयेत् ।
रात्रिभुक्तिरजीर्णा चेद्दिवाभुक्तिं विवर्जयेत् ॥ ३९४ ॥
अर्कोदये तु हृदयं बुध्यते कमलं यथा ।
तस्मात्स्रोतांसि सर्वाणि विवृतानि भवन्ति च ॥

इन्द्रियाणां विकासाच्च व्यायामाच्च विशोषतः ।
चित्तविक्षेपतो यान्ति धातव. क्लेदहीनताम् ॥ ३९६ ॥

तस्मान्निशि कृता भुक्तिरधिकाऽपि हि पच्यते ।
दिवाभुक्तिविदाहे तु पित्तकोपः प्रजायते ॥ ३९७ ॥

तस्मात्पयो हितं रात्रौ नान्यद्भुञ्जीत पित्तकृत् ।
रवावस्तमिते तेजो विशति ज्वलनं निशि ॥ ३९८ ॥

प्रकाशन्तेऽमयस्सर्वे जाठरश्च विशोषतः ।
तस्माद्रात्रौ हि भुञ्जीत न कुर्यात्तं निरिन्धनम् ॥३९९॥

न लंघयेन्नाडिकां च दशमीं रात्रिभोजने ।
अष्टनाड्यन्तरे चैव निशि भोजनमुत्तमम् ॥ ४०० ॥

दिवा द्वादशनाड्यास्तु पूर्वं भुक्तिं न चाचरेत् ।
नातिक्रमेत घटिकां षोडशीं चान्वहं प्रिये ! ॥ ४०१ ॥

निस्तार्ष्टितैस्समरिचैस्स्नेहपक्वैर्हितैर्मितैः ।
व्यञ्जनैश्चोपयुञ्जीत क्षीरान्नं मधुसितायुतम् ॥ ४०२ ॥

क्षीरमाया निशा मुक्ती रम्भाम्रपनसैः फलैः ।
हितं भुक्त्वा लघुतरं हस्तास्ये क्षालयेन्नरः ॥ ४०३ ॥

आचम्य विधिवत्तुष्टचेता भूत्वा सुखासनः ।
मुहूर्तमात्रेऽतीते तु कुर्याच्चाम्बूलचर्वणम् ॥ ४०४ ॥

सकर्पूरं च सूक्ष्माच्छवस्त्रैश्च परिशोधितः ।
यक्षकर्दमलिप्ताङ्गस्सुगन्धिकुसुमोज्ज्वलः ॥ ४०५ ॥

कामसेवाप्रकारः ॥

स्नातां शुद्धांबरधरामङ्गरागविलेपिताम् ।
सुगन्धि पुष्पसुरभिं तांबूलापूरिताननाम् ॥ ४०६ ॥

हृष्टां शुद्धान्वयां कान्तां युवतीं चतुरां रतौ ।
संप्रच्छेत प्रियां हृष्टो विलब्धः कामलोलुपः ॥ ४०७ ॥
प्रियवाक्यैस्तदुचितैस्तां च सन्तोषयेद्युवा ।
ऋज्वङ्गो मुक्तमूत्रादिरक्रोधोऽनन्यचिन्तनः ॥ ४०८ ॥
अस्नातां मलिनामार्तां मलिनाम्बरधारिणीम् ।
उदक्यां चेटिकां क्रुद्धामप्रियां मर्ममेदिनीम् ॥ ४०९ ॥
वयोऽतीतां कृशां स्थूलां पिङ्गाक्षीं मधुपिङ्गलाम् ।
अतिकृष्णां च विधवां कन्यकां व्रतचारिणीम् ॥ ४१० ॥
तपस्विनीं कुरूपां च दुर्गन्धामशुचिं शठाम् ।
परस्त्रियं स्वैरिणीं च दाक्षिण्या च सगोत्रजाम् ॥
वर्णाधिकां गुरुभ्रातृमातुलानीसखीसुताम् ।
मित्रबन्धुस्यालकानां नृपादीनां च योषितः ॥ ४१२ ॥
वर्जयेत्पार्श्वशयनामनुत्तानामधोमुखीम् ।
अनुजां पुत्रकामीयो न गच्छेत्कामिनीं प्रिये ! ॥४१३॥
पशुयोनावयोनौ च न कुर्याच्छुक्रमोचनम् ।
उद्याने सलिले रम्ये गिरौ पर्वसि चाध्वरे ॥ ४१४ ॥
चतुष्पथे च चैत्ये च पितृभूमौ नदीतटे ।
देवद्विजगुरुक्ष्मापभोगेषु परिवर्जयेत् ॥ ४१५ ॥
अह्नि सन्ध्यासु जन्मर्क्षे व्यतीपाते च सङ्क्रमे ।
पर्वस्वकल्पसङ्कल्पो वृष्यमेवृजवर्जितः ॥ ४१६ ॥
क्षुधार्तश्चातिभुक्तश्च श्रान्तस्तृष्णायुतो नरः ।
अतिबालोऽतिवृद्धश्च न रमेत वधूं प्रिये ! ॥ ४१७ ॥
अल्पायुषा प्राणसहैर्वा विधवां रोगमृत्युदाः ।
परांश्चनां हरेदायुरैहिकामुष्मिकं फलम् ॥ ४१८ ॥

दुःखञ्चाधोगतिर्वाच्यमुदक्या दग्धिनाशनम् ।
पुण्यायुष्यक्षयं कुर्यादतिसारं च दुस्तरम् ॥ ४१९ ॥
बलवान्वृष्यभैषज्यं भक्षयित्वाऽनुवासरम् ।
हेमन्ते शिशिरे चैव स्त्रियं गच्छेन्नरस्सदा ॥ ४२० ॥
निवासराद्वसन्ते च शरदि स्याच्च पक्षतः ।
ग्रीष्मे वर्षासु सेवेत नाभुक्तं च कदाचन ॥ ४२१ ॥
पतनाभिमुखं शुक्रं न रुन्ध्यात्सुखकाङ्क्षया ।
पूर्वं षोडशवर्षाच्च परं सप्ततिवत्सरात् ॥ ४२२ ॥
स्त्रियं न गच्छेद्बलवानपि रोगयुतोऽन्यथा ।
अपूर्णधातुर्बालस्तु यदि गच्छेत्स्त्रियं प्रिये ! ॥ ४२३ ॥
क्षुभ्यन्ति धातवो घर्मात्तप्ताकोऽल्पजलो यथा ।
क्रिमिदष्टं जर्जरितं काष्ठं शुष्कं च रूक्षितम् ॥ ४२४ ॥
स्पृष्टमात्राद्विशीर्णस्याद्रत्या पृक्तस्तथा भवेत् ।
शुक्रं तनोः प्रसन्नोऽच्छस्त्वन्नसारात्सुसारकम् ॥४२५॥
तस्मिन्सुरक्षिते देहे दार्ढ्यं स्यात्सततं तथा ।
रतान्ते सेवनीयानि श्रमविच्छित्तये नरैः ॥ ४२६ ॥
स्नानं विलेपनं तालवृन्तं शीतं जलं पयः ।
मद्यं मांसं तथा ज्योत्स्नामिक्षुं भक्ष्यान्ससर्करान् ॥४२७॥
रसालां मधुरप्रायरसां निद्रां च भैरवि ! ।

शयनीयप्रकाराः शयनविधिश्च ॥

खट्वां सुरक्षितां तन्तुनिर्मितायतपट्टकैः ॥ ४२८ ॥
संवीतां तूलसंघातशयनीयविराजिताम् ।
सच्छोचरच्छदयुतामुपधानयुगोज्ज्वलाम् ॥ ४२९ ॥

शय्यामासाद्य निद्रां च भजेत्स्मृत्वेष्टदेवताम् ।
पूर्वस्यां दक्षिणस्यां वा दिशि संस्थापयेच्छिरः ॥४३०॥

मेधावी पूर्वमूर्धा स्यादायुष्मान्यमगद्दिशि ।
मनस्तापश्च वारुण्यामुदीच्यां मरणं भवेत् ॥ ४३१ ॥

प्रवासे पश्चिमशिरा न कदाचिदुदक्छिराः ।
हंसपुच्छोदरोद्भूतमृदुपक्षविनिर्मिता ॥ ४३२ ॥

चर्मणा मृदुना बद्धा सा श्रेष्ठा हंसतूलिका ।
त्रिदोषशमनी राज्ञां मृद्वी सौभाग्यवर्धनी ॥ ४३३ ॥

अबीजैश्शाल्मलीतूलैस्सुपक्वफलजैः कृता ।
सान्द्रवस्त्रैः पिष्टयुता शाल्मलीतूलिका मता ॥४३४॥

सर्वदोषप्रशमनी वृष्या रक्तप्रदायिका ।
मृद्वी च शीतला लघ्वी सौकुमार्यप्रदायिनी ॥ ४३५ ॥

बीजवर्जं च सहितं कार्पासं गुणताडितम् ।
सवस्त्रं सीवयेच्च ख्याता कार्पासतूलिका ॥ ४३६ ॥

सोष्णा वातकफघ्नी स्याद्दुःखदोदकसेविनाम् ।
केसरैः पद्मजैर्वाऽपि नागपुष्पसमुद्भवैः ॥ ४३७ ॥

सुगन्धिपुष्पजनितैर्यद्वा कुङ्कुमसम्भवैः ।
चर्चितं पट्टवस्त्रेण ख्याता केसरतूलिका ॥ ४३८ ॥

चक्षुष्या वृष्यदा राज्ञस्सुखसौगन्ध्यदा शुभा ।
कल्हारोत्पलपद्मानां कङ्केलिकदलीभवैः ॥ ४३९ ॥

कल्पिता पल्लवैस्सा तु ख्याता पल्लवतूलिका ।
शीतला दाहपित्तघ्नी ग्लानितृड्ज्वरनाशिनी ॥ ४४० ॥

पाटलीमल्लिकाजातियूथीचम्पककेसरैः ।
केतकीकोमलदलैः कल्हारैर्वा सुगन्धिभिः ॥ ४४१ ॥

अवृन्तैरन्यपुष्पैर्वा रचिता पुष्पतूलिका ।
स्मृता निर्मलवस्त्रेण वृष्यदा कामकेलिषु ॥ ४४२ ॥
कल्मश्रमघ्नी शैत्य च कामज्वरनिबर्हणी ।
सान्द्रश्लक्ष्णाजिने पूर्णा वारुणी तोयतूलिका ॥४४३॥
रक्तपित्तप्रशमनी निदाघेऽह्नि सुखप्रदा ।
हेमन्ते शिशिरावृट्काले कार्पासतूलिका ॥ ४४४ ॥
वसन्ते हंसतूली स्यादग्रीष्मे मध्येऽह्नि तोयजा ।
शाल्मलीतूलिका ग्रीष्मरात्रौ शरदि सर्वदा ॥ ४४५ ॥
क्रीडाया पुष्पजा सेव्या तथा पल्लवतूलिका ।
भूमिशय्याऽनिलहरा वृष्या व्रणदायिनी ॥ ४४६ ॥
जानुदघ्न च मृदुल समास्तीर्णसुवस्त्रकम् ।
भजेत शयन वातश्रमघ्न बलपुष्टिदम् ॥ ४४७ ॥
निद्रासुखप्रद हृद्य तत्तद्द्रव्यगुणावहम् ।
असंबाधविशाल च नायता निर्मिक्षिपिताम् ॥ ४४८ ॥
मक्षा च मलिना शय्या नाम्तृता न भजेत्क्वचित् ।
सर्पप्रेतपिशाचेभ्यस्त्रातुमात्मानमीश्वरि ! ॥ ४४९ ॥
वैदिकान्निखिलमन्त्राश्च जपित्वा गारुडान्मनून् ।
धातशुक्लपदोऽगस्त्य मुचुकुन्द च माधवम् ॥ ४५० ॥
आस्तिक च श्वेतकं च हनूमन्त पटाननम् ।
गरुड नर्मदा देव भैरव भैरवी तथा ॥ ४५१ ॥
दुर्गां च त्वरिता वीरमघोर नरसिंहकम् ।
वीरभद्र स्मरेन्नित्य षोडशैतान्सदा निशि ॥ ४५२ ॥
भूतप्रेतपिशाचादिवृश्चिकादिभयापहान् ।
यक्षराक्षसकृष्माण्डमहाज्वरविनाशकान् ॥ ४५३ ॥

स्मृत्वा स्वप्यात्सुखं यस्मान्निद्रालुश्चामबोधितः ।

निद्रास्वरूपम् ॥

निद्रा हि लोके सृष्टाऽऽदौ प्रकृतिश्चादिमा स्मृता ॥
सा मूलं तमसो देवि ! तमोरूपा च सा भवेत् ।
सर्वप्राणिशरीरेषु प्रकृतिस्साऽभिधीयते ॥ ४५५ ॥

प्रकृतिः पुरुषं यायाद्यदा निद्रेति सा स्मृता ।
सैव सृष्टिं स्थितिं नाशं सूचयत्यनुवासरम् ॥ ४५६ ॥

प्रातर्ब्राह्मी सृजत्येषा मध्याह्ने वैष्णवी जगत् ।
याति चास्तमये रौद्री सदा संहरति क्रमात् ॥ ४५७ ॥

एतया मोहिता देवा बोधिताश्चानया सदा ।
तस्मात्प्रायेण सा निद्रा मोहयेत्सर्वजीविनः ॥ ४५८ ॥

श्रमात्स्वकर्मविरतेष्विन्द्रियेष्वखिलेषु च ।
श्लेष्मापूर्णेऽखिले द्वारे निद्रा प्राणिषु वर्तते ॥४५९॥

क्लान्ते चित्ते स्वविषयान्मुक्ते कर्मेन्द्रिये यदा ।
श्लथान्विते तदा निद्रा जायते प्राणिनां सती ॥४६०॥

सर्वेन्द्रियक्रियाशून्ये मनोविषयवर्जिते ।
पश्येद्दुर्विधान्स्वप्नान्सर्वेन्द्रियगुणानुगान् ॥ ४६१ ॥

निद्रासेवने नियमाः ॥

बलाबलं पुष्टिकार्श्ये सुखदुःखे च पण्डिता ।
घृण्यमज्ञानिता ज्ञानमायुष्यं मरणं भवेत् ॥ ४६२ ॥

निद्रायास्सर्वगेतच्च युक्तायुक्तनिषेवणात् ।
योषिद्ग्राहनगीताभ्यमध्ययनकर्मसु ॥ ४६३ ॥

भारव्यायामयोरस्कारिश्रमगुरुबलाः कृशाः ।
उपोषिता क्षीणकफा दिवानिद्रोचिता नराः ॥ ४६४ ॥

एते सर्वे स्वपन्त्यह्नि पूर्वं भुक्तेर्यथासुखम् ।
दिवास्वापोचिता ये च न स्वप्युस्ते दिवा यदि ॥

वातादय प्रकुपितास्तेषामेव भवन्ति हि ।
दिवास्वप्नोचितानां च धातुसाम्य बल भवेत् ॥४६६॥

श्लेष्मा पुष्टिस्थिरायुश्च दिवास्वापेन पार्वति ! ।
आदानत्वाद्रूक्षता स्याद्ग्रीष्मो बलाधिको यत ॥

अल्पत्वाच्च त्रियामाया दिवास्वापस्ततो भवेत् ।
स्नेहनित्याश्च कफिनो मेदोयुक्ता विषार्दिता ॥४६८॥

श्लेष्मलाहारनिरता न स्वप्युस्ते दिवा क्वचित् ।
अङ्गमर्दो गुरुत्व च शिरस्तोदो हलीमक ॥ ४६९ ॥

स्तैमित्यमग्निसादश्च हृल्लासोऽर्धशिरोव्यथा ।
पीनस हृत्प्रलेपश्च शोफ कर्णरुजाऽरुची ॥ ४७० ॥

गलामय कासकोठपिडकास्मृतिवैकृतम् ।
तन्द्रा ज्वर प्रमेहाश्च स्रोतोरोधो विषोद्भति ॥४७१॥

अपाटवं चेन्द्रियाणा दिवास्वापात्प्रजायते ।
निशि जागरणाद्रूक्षो वातकोपश्च जायते ॥ ४७२ ॥

दिवास्वापात्तया स्निग्धश्श्लेष्मा पित्त च कुप्यति ।
निषण्णोच्चलनस्वापाद्वृहणास्यन्दिता भवेत् ॥ ४७३ ॥

निद्रानाशो जृम्भिकाङ्गमर्दगौरवतन्द्रिता ।
आलस्य वातकोपश्च अगलानिजडत्वकम् ॥ ४७४ ॥

पक्तिशूल भवत्येव वक्त्रशोषस्स्वरक्षय ।
स्वात्मानुरूप स्वप्याच्च दिवा च निशि वा सदा ॥

रात्रिभजागरात्कालादर्धं स्वप्याद्दिवा नर ।
नित्याचारस्समासेन प्रोक्तस्त्रिपुरभैरवि ! ॥ ४७६ ॥

य इत्थमाचरेन्नित्यमावयोर्भक्तिमान्नर हि ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ अष्टादशोल्लास ॥

॥ एकोनविंश उल्लासः ॥

ऋतुचर्या ।

॥ प्रथमो भाग. ॥

श्रीभैरवी—

भगवन् ! त्वत्प्रसादेन शिवाचारमशेषतः ।
स्वामिन्नैमित्तिकाचार श्रोतु वाञ्छाऽस्ति मे वद ॥ १ ॥

श्रीभैरव —

तच्छृणु त्व महादेवि ! नूमि नैमित्तिकीं विधिम् ।
कालाधीनस्तु तु भवदनपायोऽमितस्सदा ॥ २ ॥

अनादिनिधनस्सूक्ष्मस्स्थूलो यासम्सदानन ।
ब्रह्मादयश्च सूर्याद्या महाभूतादय परे ॥ ३ ॥

कालानुसारिणस्सर्वे प्रयत्ने कालरूपिण ।
कालादेव हि जायन्ते लीयन्ते तत्र सर्वदा ॥ ४ ॥

य कालस्सोऽहमेवेति त्व च कालप्रवर्तिनी ।
तस्माज्जन्ममृता जन्मनिधनाय निवेद्यते ॥ ५ ॥

अविभाज्यो हि कालोऽय तथाऽपि प्रविभज्यते ।
तीक्ष्णसूच्याऽब्जपत्र तु यावत्कालेन भिद्यते ॥ ६ ॥

स कालो त्व इत्युक्तस्त्रुटी निशल्यभेदवेत् ।
तद्योऽय स्यात्रुटि कालो माता स्यात्तद्द्वयान्विता ॥ ७ ॥

दृक्पक्ष्मणोः परिक्षेपस्स तु मात्रा प्रशस्यते ।
मात्राष्टादशभिः काष्ठा काष्ठात्रिंशद्युता कला ॥ ८ ॥
कलात्रिंशत्क्षणः प्रोक्तः क्षणैष्पट्भिश्च नाडिका ।
नाडीद्वयं मुहूर्तम्स्यात्तैश्चतुर्भिश्च यामक ॥ ९ ॥
यामैश्चतुर्भिर्दिवसस्तथा रात्रिर्भवेत्प्रिये ! ।
एवं दिवाऽनिशं किं तु पूर्वाह्णो दश नाडिकाः ॥ १० ॥
मध्याह्ने दश नाडी स्यादपराह्णस्तथैव च ।
पूर्वरात्रं चार्धरात्रं तथैवापररात्रकम् ॥ ११ ॥
दिवसै पञ्चदशभि. पक्षम्स्याच्छुक्लसंज्ञकः ।
द्वितीय· कृष्णपक्षम्स्याद्द्वाभ्यां मासस्तु जायते ॥ १२ ॥
मासाभ्यामृतुसंज्ञा स्याद्दतुभ्यां कालसंज्ञक. ।
ऋतुत्रयं स्यादयन द्वाभ्यां संवत्सरो भवेत् ॥ १३ ॥
अष्टादशप्रकारेण कालस्तस्माद्विभज्यते ।
माघादिमासाः क्रमशो भवन्ति शिशिरादय. ॥ १४ ॥
शिशिरश्च वसन्तश्च ग्रीष्मो वर्षा शरद्धिम. ।
ऋतवो दक्षिण तेषां कथयामि शृणु प्रिये ! ॥ १५ ॥

हेमन्तर्तुस्वरूपम् ॥

तत्र सूर्यो दिशश्चैव हिमानीकल्पीकृताः ।
धूमधूम्रजोमन्दो वायुश्शीतप्रबोधनः ॥ १६ ॥
रोमाञ्चकारी कौवेरो लवल्यः पुष्पितास्तदा ।
पुन्नागलोध्रफलिनीपुष्पामोदितषट्पदाः ॥ १७ ॥
गजवाजीगोमहिषीकाकजाघाश्च गर्विताः ।
सरित्सालेयपटलसञ्चलच्छकुनादयः ॥ १८ ॥

सोष्णबाष्पजलाः कूपाः पद्म हैमन्तिके ऋतौ ।

शिशिरर्तुस्वरूपम् ॥

एवं हि शिशिरे काले चयं याति कफस्वतः ॥ १९ ॥

वसन्तर्तुस्वरूपम् ॥

वसन्ते विमला दिक्षास्सूर्यश्चारुणदीधितः ।
मलयानिलसञ्चारो नवपल्लवशोभिताः ॥ २० ॥

नवीनत्वक्पलाशाढ्या वृक्षाश्सर्वत्र पुष्पिताः ।
सहकाशोकवकुलमाधवीचम्पकोद्भवै. ॥ २१ ॥

पलाशकादिभै पुष्पै· प्रभाति वनस्थली ।
भ्रमद्भमरनिध्वानकोकिलालापसङ्कुला ॥ २२ ॥

श्लेष्मकोपश्च भवति कालस्सर्वोत्तमो ह्ययम् ।

ग्रीष्मर्तुस्वरूपम् ॥

ग्रीष्मे तीक्ष्णकरश्चण्डोऽतसीकुसुमसन्निभः ॥ २३ ॥

सन्तापितमहीदिक्खखोपिताशेषभूरसः ।
दावाग्निनाऽतिज्वलिता दिशो भूमिश्च धूसराः ॥ २४ ॥

नैर्ऋतो वायुरत्युग्रो वात्या चोष्माऽसुखा भवेत् ।
आतपस्वेदपवनै. प्राणिनो ज्वरिता इव ॥ २५ ॥

सन्तप्तक्रोडमहिषमातङ्गैराकुलीकृताः ।
चण्डांशुकिरणोत्तप्तशुष्कस्वल्पजलान्विताः ॥ २६ ॥

कल्लोलितास्तटाकाद्यास्सन्तप्तजलजन्तवः ।
जीर्णशुष्कविशीर्णैश्च पर्णैश्च पतितैर्द्रुमाः ॥ २७ ॥

सोष्माच्छायाविहीनाश्च वायुव्याकुलिता भृशम् ।
शुष्कपल्लवगुल्माद्रिशरीपाः कुसुमोज्ज्वलाः ॥ २८ ॥

श्लेष्मक्षयश्चानुदिन तस्माद्वायोश्चयो भवेत् ।

वर्षर्तुस्वरूपम् ॥

वर्षर्तौ पश्चिमो वायुर्मही नवतृणावृता ॥ २९ ॥

भिन्नैस्तथाऽञ्जनाभैश्च जलदैश्छादिताऽखिला ।
शक्रगोपावृता पृथ्वी सर्वसस्यमनोहरा ॥ ३० ॥

भूलतानिवहच्छन्ना जलक्लिन्ना च षड्किला ।
मत्तकेकिकुलक्रीडानृत्तविस्तीर्णपिञ्छका ॥ ३१ ॥

भेकभीकरनिध्वानबधिरीकृतदिङ्मुखा ।
कदम्बकदलीजातिकुटजामोदमेदुरा ॥ ३२ ॥

धाराधराम्बुधाराभिघातनष्टसरोरुहा ।
प्रभूतसलिलापूर्णसोपाना दीर्घिका भृशम् ॥ ३३ ॥

पतिसंयोगसदृशमहाकारा महाजला ।
पूर्णोभयतटान्ताश्च नद्यस्सक्लुपोदका ॥ ३४ ॥

नभस्तनितजीमूतप्रोद्यद्विद्युत्प्रदीपितम् ।
अन्योन्याम्बुदसघट्टजातनिर्घोपभीकरम् ॥ ३५ ॥

इन्द्रचापलसन्मेघच्छादितार्केन्दुमण्डलम् ।
घन ह्लष्टाजमहिषकिटिचातकसङ्कुलम् ॥ ३६ ॥

श्लेष्मा क्षीणतरो वायो कोप पित्तचयस्तदा ।

शरदृतुस्वरूपम् ॥

शरदि स्फुरिताभाश्च भानोस्तीक्ष्णा मरीचय ॥ ३७

प्रक्षीणवारिविमलवारिदोन्मुक्तमार्गका ।
ज्योत्स्नामृतरसासिक्तमोदिताखिलजन्तव. ॥ ३८ ॥

स्फुरितोडुकुलाकीर्णा रात्रयश्च मनोहरा ।
विमलाकाशरुचिरा: कामलीलोत्सवप्रदा. ॥ ३९ ॥

मही चाश्यानपङ्का च कणिकापूर्णशालिका ।
सदस्य. फुल्लकमलकुमुदोत्पलमण्डिता. ॥ ४० ॥

प्रहृष्टमीनहंसालीलीलालोलनरङ्गिका: ।
अमलाम्बुसरार्कीर्णास्नानपानहितप्रदा. ॥ ४१ ॥

दिश. प्रफुल्लरुचिरकाशचामरशोभिता ।
विमलामोदितक्रोञ्चमल्लिकापरिमण्डिता: ॥ ४२ ॥

सप्तच्छदरजोयोगदृप्तदन्तिकुलं वनम् ।
प्रक्षीयते तदा वायु पित्तं कुप्यति पार्वति ! ॥ ४३ ॥

आदानविसर्गकालस्वरूपम् ॥

दिवानिशादिमध्यान्ते श्लेष्मपित्तसमीरणा. ।
कुप्यन्ति ऋतवस्सर्वे प्रवर्तन्ते क्रमाच्छिवे ! ॥ ४४ ॥

दिनमाग्नेयरूपं स्याद्रात्रिस्सौम्यमयी भवेत् ।
द्वौ च पक्षौ तदा देवि ! ऋतू हेमन्तशैशिरौ ॥ ४५ ॥

तौ ऋतू हिमकालस्स्यादुष्णौ मधुनिदाघकौ ।
प्रावृट्शरद्ऋतू ज्ञेयौ वर्षाकालस्स उच्यते ॥ ४६ ॥

ऋतुभिश्शिशिराद्यैस्तद्भिस्स्यादुत्तरायणम् ।
तदा ज्ञेयमिति ज्ञेयमादानं तद्भवेत्प्रिये ! ॥ ४७ ॥

सूर्यानिलौ स्वभावेन भूमिसौम्यरसापहौ ।
किन्तु मार्गवशादेतावत्युष्णसरन्ध्रकौ ॥ ४८ ॥

आददाते बल तेज प्राणिना प्रतिवासरम् ।
तिक्त कषायकटुकौ प्रबलास्स्युर्यथोत्तरम् ॥ ४९ ॥

प्रावृडाद्यैश्च ऋतुभिस्त्रिभिस्स्याद्दक्षिणायनम् ।
एतत्सोमात्मकं विद्धि विसर्गाख्यमिति स्मृतम् ॥ ५० ॥
प्रकृत्या शीतला वृष्ट्या वायुसोमांबुदा परम् ।
बलिनस्युर्यतस्तस्मात्सूर्य क्षीणरुचिर्भवेत् ॥ ५१ ॥
गते भूतलतापेऽस्मिन् प्राणिनां प्रतिवासरम् ।
कालो बलं विसृजति प्रबलास्स्युर्यथोत्तरम् ॥ ५२ ॥
अत्याम्ललवणौ स्वादू रसास्स्निग्धा भवन्ति हि ।
हेमन्ते शिशिरे पूर्णं मधौ शरदि मध्यमम् ॥ ५३ ॥
ग्रीष्मे प्रावृषि शीतं स्यात्सर्वेषां प्राणिनां बलम् ।

हेमन्तर्तुचर्या ॥

रसस्य बलिनश्शीतसंवृतत्वाद्धिमागमे ॥ ५४ ॥
कोष्ठाग्नेश्चाविकीर्णत्वात्पिण्डितो जठरे यत. ।
ततो बलीयान्कोष्ठाग्निस्तस्मिन्स्वल्पाशनो यदि ॥ ५५ ॥
वायुना दीप्यते वह्नि पचेद्धातून्रसादिकान् ।
तस्माद्धिमागमे सेव्यो मधुरो लवणाम्लक. ॥ ५६ ॥
अथ दैर्घ्यान्निशानां तु क्षुधा प्रातस्तरां भवेत् ।
दिनचर्याप्रकारेण विसृजन्मलमूत्रकम् ॥ ५७ ॥
दन्तकाष्ठादिकं सर्वं विदध्यात्परमेश्वरि ! ।
ततो मूर्धाह्नवातघ्नतैलेनाभ्यङ्गमाचरेत् ॥ ५८ ॥
गात्राभ्यङ्गं मर्दनं च यावच्चक्यं च यथा सुखम् ।
कुशलैर्बाहुयुद्धं च यावच्छक्यं भजेत्ततः ॥ ५९ ॥
गोधूमचूर्णकैर्मुद्गैर्हृततैलो यथाविधि ।
स्नात्वा कौशेयके रक्ते लघुन्युष्णे सुसान्द्रके ॥ ६० ॥

वाससी परिधायैव कस्तूर्या कुङ्कुमेन च ।
कालागरुद्रवेणैव चर्चां कुर्वीत विग्रहे ॥ ६१ ॥

धूपयेद्देहचिकुरान्कालागरुजधूपत ।
चम्पक वकुल पुण्ड्र शतपत्र च कैतकम् ॥ ६२ ॥

जवाद्यैरुपलिप्तानि कृत्वा शिरसि धारयेत् ।
गुडासव मधुमण्ड मद्य मास च मेदुरम् ॥ ६३ ॥

स्निग्ध मासरस सोष्ण माषगोधूमपिष्टजान् ।
इक्षुक्षीरविकाराश्च सोष्णमन्न तिलोद्भवम् ॥ ६४ ॥

शौचे सुखोष्ण सलिल सोष्मल चारु मन्दिरम् ।
शयन कौथकश्लक्ष्णमृदुलाजिनकम्बले ॥ ६५ ॥

प्रावारैश्शुभकौशेयै क्रमेणास्तृतमुज्ज्वलम् ।
भजेद्वृद्धसुयौवनोन्मृष्टभागेन शाम्बरि ! ॥ ६६ ॥

स्वेद चोपानह नित्य हसन्तीतीव्रतापिते ।
गर्भगेहे निवास च वृत्तपीनोन्नतस्तनी ॥ ६७ ॥

रथाङ्गवृत्तसुश्रोण्यो रम्भास्तम्भोरुमण्डिता ।
मद्यपानमदोन्मत्ता वस्त्रस्रग्गन्धशोभिता ॥ ६८ ॥

प्रिया प्रीतास्समाश्लिष्येन्न बाधा शीतदोषजा ।
कस्तूरी कुङ्कुम चन्द्र लवङ्ग जातिकाफलम् ॥ ६९ ॥

प्रत्येक निष्कमेक स्यात्सार खदिरसम्भव ।
युञ्ज्यात्षोडशनिष्क च सर्वं पेय्य हिमाम्बुना ॥ ७० ॥

गुलिका सरिचाकारा कुर्याद्दौर्गन्ध्यनाशिनीम् ।
वातश्लेष्महरा रुच्या गुटिकैषा प्रकीर्तिता ॥ ७१ ॥

गुटयन्वित च ताम्बूल यथेष्ट भक्षयेत्सदा ।
एव हेमन्तचर्या स्यात्

शिशिरर्तुचर्या ॥

शिशिरेप्यनुमाचरेत् ॥ ७२ ।

श्लेष्मा चितस्स्यान्नितरां भजेद्धैमन्तिकं विधिम् ।
अलादानभवं रूक्षं भवेच्छीतो महत्तरः ॥ ७३ ॥

वसन्तर्तुचर्या ॥

शिशिरे तु चितश्लेष्मा वसन्तेऽर्कांशुविद्रुतः ।
नाशयेज्जाठरं वह्निं स्वयं तोयस्वभावतः ॥ ७४ ॥

जनयेद्रोगमखिलं तस्माच्छीघ्रं कफं जयेत् ।
अथ वासन्तिकाचर्यां कथयामि मम प्रिये ! ॥ ७५ ॥

तीक्ष्णाञ्जनच्छर्दिनस्यैर्व्यायामोद्वर्तनैरपि ।
पादाभ्यां मर्दनेनोष्णवारिस्नानेन तं हरेत् ॥ ७६ ॥

कषायरक्तकौसुम्भकौशेयवसनानि च ।
परिधाय सकर्पूरागरुणाऽङ्गानि धूपयेत् ॥ ७७ ॥

कस्तूरीकुङ्कुमहिमैश्चन्दनैर्लेपयेत्तनुम् ।
चूतचम्पकपुन्नागपूगकेसरपाटलम् ॥ ७८ ॥

माधवीकेतकीमल्लिकाशोकनवमालिकाः ।
जवाद्यैर्लेपिता. कृत्वा वहेत्कल्हारमुत्पलम् ॥ ७९ ॥

मद्यं पञ्चविधं प्रोक्तं सर्वव्याधिहरं परम् ।
माधवारिष्टमार्द्वीकासवशौण्डीरितीरिता. ॥ ८० ॥

क्षौद्रैर्मदकरद्रव्यैः रचितो माधवस्मृतः ।
चिरं मदकरद्रव्यं खनित्वा स्थापितं भुवि ॥ ८१ ॥

अरिष्टोऽयमिति ज्ञेयो मार्द्वीको गोडवीभवः ।
आसवो मदकृद्द्रव्यसवनाद्धा समुद्भवः ॥ ८२ ॥

शीधुरिक्षुरसाज्जातस्तेभ्यः पञ्च मया मताः ।
कामिनीवदनाम्भोजवासिताद्यिचतेहारिणः ॥ ८३ ॥

पुष्पादिवासिता हृद्याः कान्तानयनरञ्जिताः ।
पुराणाः कटुकास्तिक्ताः कषायाश्लेष्महारिणः ॥ ८४ ॥

मातुलुङ्गाम्रजम्बूनां पत्रपुष्पफलान्विताः ।
सुहृद्भिस्सह जंभीररसार्द्रकपलाण्डुकम् ॥ ८५ ॥

जाङ्गलं पललं शूल्यं तद्रसं च कृतं नवम् ।
पुराणक्षौद्रगोधूमयवषष्टिकशालिकान् ॥ ८६ ॥

भजेत्कफघ्नं शाकं च व्यञ्जनं पानकं तथा ।
अमद्यपस्तु शुण्ठ्यम्बु मुस्ताम्बु क्षौद्रवारि वा ॥ ८७ ॥

खदिरासनसारोत्थकथितं वारि वा पिबेत् ।
उद्याने सौधकाचाद्यैर्मणिनीकाशरोचिभिः ॥ ८८ ॥

कुट्टिमैर्मण्डिते चारुमण्डपे सुरतोचिते ।
कोकिलालापरुचिरे सुगन्धिकुसुमोज्ज्वले ॥ ८९ ॥

बहुपादपसच्छायावारितोष्णांशुदीधितौ ।
समन्तात्सलिलापूर्णकुल्यामिश्रशीतलीकृते ॥ ९० ॥

मलयानिलसञ्चारशमितश्रमवारिणि ।
नानामसूनसुभगशाखिनीनालनन्दिते ॥ ९१ ॥

लम्बमानसुगन्धस्रङ्मकरन्दाभिषेचिते ।
उशीरपाटलीपङ्क्तिशोभिते मिसविस्तृते ॥ ९२ ॥

पुष्पैराकीर्णिते मन्दतालवृन्तानिलोज्ज्वले ।
समासीनः प्रियालापचतुराः कामलोलुपाः ॥ ९३ ॥

कन्दर्पदर्पसर्वस्वसूक्ष्मस्वच्छाम्बराः प्रियाः ।
तरुणीरमयन् गोष्ठीः धुर्वैस्ताभिर्मनोहराः ॥ ९४ ॥

सुहृद्भिराप्तैस्सहितो मध्याह्नं गमयेत्सुखी ।
अतिशीतगुरुस्निग्धसाद्म्ललवणानि च ॥ ९५ ॥

तिलेक्षुक्षीरविकृतिदिवास्वप्नातिपिच्छिलम् ।
मत्स्यं क्षारोदकं पूप श्लेष्मलं वर्जयेन्मधौ ॥ ९६ ॥

ग्रीष्मतुंचर्यो ॥

ग्रीष्मे ह्यत्यर्थतीक्ष्णस्यादर्कमानुर्भुवो रसान् ।
स्निग्धान्गुणांश्च क्षपयेत्कफस्तस्मात्क्षयं व्रजेत् ॥ ९७ ॥

तेन वायुश्चितस्यात्र पूरितैश्शीतलैर्जलैः ।
चन्दनागरुकस्तूरीकुङ्कुमैश्च सुगन्धिभिः ॥ ९८ ॥

प्रसूनैर्विविधै, फुल्लैर्वासिते मल्लिकादिभिः ।
कामिनीपीनवक्षोजदघ्नांबुनि सुशोधिते ॥ ९९ ॥

ह्रदे वा दीर्घिकायां वा संस्कृतायां यथाविधि ।
आकर्णपूर्णनयनविराजितमुखेन्दुभि. ॥ १०० ॥

मृणालभूषणोद्भासिशिरीषमृदुबाहुभिः ।
कर्पूरमुक्ताकुसुममालामलयजोज्ज्वलै. ॥ १०१ ॥

सूक्ष्मकौसुम्भवसनबद्धमध्यनितम्बिभिः ।
स्वनत्पुरवाकृष्टसारसारावरञ्जितैः ॥ १०२ ॥

जलक्रीडातिचतुरैस्संयुक्तः कामिनीजनैः ।
संक्रीडेत करोन्मुक्तवारिसिक्ताङ्गनामुखः ॥ १०३ ॥

द्रुतिशृङ्गमुखोत्सृष्टवारिसेचितविग्रहः ।
ताभिर्भुजान्तरं श्लिष्यन्कुर्वन् लीलां मुहुर्मुहुः ॥१०४॥

उत्तीर्य च वपुर्वस्त्रैरुद्वृत्यं चिकुरान्सुखम् ।
स्वच्छे सूक्ष्मे कषाये च वसने धारयेत्ततः ॥ १०५ ॥

चन्दनागरुकर्पूरैर्धूपयेत्केशविग्रहौ ।
श्रीखण्डचन्द्रकस्तूरीपङ्कचर्चितविग्रहः ॥ १०६ ॥

नेपालमालतीमल्लीपाटलीशतपत्रकाः ।
सौगन्धिकं मरुवकं ह्रीवेरं च मृगाण्डजैः ॥ १०७ ॥

सुगन्धतैलैर्लिप्तानि धारयेत्कुसुमानि च ।
अत्र मद्य न पेयं स्यादथवा मद्यसात्म्यकैः ॥ १०८ ॥

स्वल्पं पेयं तु तेनेपन्न तृप्तिश्चेत्तदा जलैः ।
स्वादुभिर्बहुभिर्युक्तं पिबेन्मद्यं यथासुखम् ॥ १०९ ॥

तथा नोचेद्भवेद्वातुशोषोऽन्तर्दाहमोहभाक् ।
शिथिलावयवक्षीणप्राणबुद्धिबलः प्रिये ! ॥ ११० ॥

मधुरं शीतलं स्निग्धं द्रवं लघु हितं भजेत् ।
सघस्सशर्करं लिह्याच्छालेयं जाङ्गल पलम् ॥ १११ ॥

अमेदुरं मांसरस रसालां पानकं पिबेत् ।
पञ्चसारं च रागं च पाडवं चाऽथवा हितम् ॥ ११२ ॥

[रसालापानके ।]

शर्करामरिचोपेतं दधि हस्तविलोडितम् ।
एतद्रसाला विख्याता रम्भापनसचूतजै. ॥ ११३ ॥

फलैस्सशर्करांभोभिर्निर्वृत्तपालगं कृतम् ।
ईषदम्लमिति ख्यातं पानकं तद्धितङ्करम् ॥ ११४

[पञ्चसारः ।]

मृद्वीकाराजखर्जूरमधूककुसुमानि च ।
श्रीपर्णीक्षुद्रखर्जूरीपरिपक्वफलानि च ॥ ११५ ॥

सशर्कराम्बु निक्षिप्य दृढं हस्तेन पेषयेत् ।
संस्थाप्य नवमृद्भाण्डे ह्यन्येद्युर्वस्त्रशोधितम् ॥ ११६ ॥
पञ्चसार इति ख्यातो हृद्यो वातकफापहः ।

[रागषाडवौ ।]

सिताक्षौद्रादिमधुरद्रव्ययुक्तं फलं च यत् ॥ ११७ ॥
स्वच्छं राग इति ज्ञेयस्सर्वसन्तापनाशनः ।
अयमेव तु सान्द्रश्चेल्लेह्यं षाडव ईरितः ॥ ११८ ॥
स च वस्त्रेण संशुद्धः पेयषाडव उच्यते ।
एतत्पञ्चविधं पानं पाटलीचम्पकादिभिः ॥ ११९ ॥
एलया वासितं शुद्धं मृद्भाण्डे स्थापिते नवे ।
उशीरतालवृन्तस्य वायुना शीतलीकृतम् ॥ १२० ॥
मोचचोचदलोपेतमेषा सामान्यसंस्कृतिः ।
अथ नूतनभाण्डान्तः पूरितं स्वादु निर्मलम् ॥ १२१ ॥
पाटलीकेतकीपुष्पकर्पूरसुरभीकृतम् ।
सान्द्रांबरेण संवीतं तालवृन्तैस्सुशीतलम् ॥ १२२ ॥
पिबेज्जलं तालसालपूगखर्जूरपादपैः ।
नालिकेराम्रपनसजम्बूपुन्नागचम्पकैः ॥ १२३ ॥
करमर्चेयङ्यालम्बिफलपुष्पकगुच्छकैः ।
द्राक्षास्तबकसञ्छन्नशाखान्तरितराजिभिः ॥ १२४ ॥
माधवीस्तनकालीनभृङ्गगीताभिनन्दितैः ।
नानासुगन्धितरुभिर्वर्धमानार्कदीधितौ ॥ १२५ ॥
हंससारसकारण्डशोभमानसरोवरे ।
परितः प्रवहत्कुल्यातरङ्गानिलशीतले ॥ १२६ ॥

नृत्यत्केकिकलाकीर्णकोकिलालापशोभिते ।
शारिकाशुकसंलापमुखन्मानवतीजने ॥ १२७ ॥
उद्याने वालकोशीरवृतौ सलिलसेचिते ।
मृणालपद्मकल्हारोत्पलपल्लवनिर्मिते ॥ १२८ ॥
सुगन्धिपुष्पमालाभिर्लम्बमाने सुशीतले ।
आर्द्राम्बरैश्च रचितच्छायानवपटालिके ॥ १२९ ॥
माधवीमण्डपे रम्ये सर्वसन्तापहारिणि ।
कदलीमृणालकुसुमपल्लवैः परिकल्पिताम् ॥ १३० ॥
चारूत्तमच्छदपटां हिमांबुपरिषेचिताम् ।
शय्यामत्यन्तमृदुलां सन्तापश्रमहारिणीम् ॥ १३१ ॥
तुषारशीतलतरैश्चर्मवस्त्राभिपूरितैः ।
सूक्ष्मैर्जललवैस्सिक्तस्सवयोभिस्समन्वितः ॥ १३२ ॥
मध्याह्न गमयेदेवं तथा धारागृहेऽथवा ।
दीव्यन्मुक्तमयीकान्तास्तनहस्तमुखच्युतैः ॥ १३३ ॥
वालोशीराम्बुभिश्शीते स्वच्छस्फटिकपट्टके ।
कर्पूरचन्दनालिप्ते लुठंस्तापप्रशान्तये ॥ १३४ ॥
प्रत्यग्रस्नानशीतांग्यो मुक्ताभरणभूषिताः ।
मृणालचन्दनालेपा मृणालवलयान्विताः ॥ १३५ ॥
स्वच्छाम्बराऽतिरुचिरा. प्रमदास्तापहारिणी. ।
चुम्बनालिङ्गनस्पर्शैस्तोषयन्परिहासयन् ॥ १३६ ॥
पुष्पमालाविरचितवितानपरिशोभिते ।
शीतांशुकिरणस्पर्शद्रवचन्द्रोपलोज्ज्वले ॥ १३७ ॥
चन्द्रिकाकान्तिलसिते मन्दानिलविराजिते ।
सौधस्थले समासीनदशशाङ्ककिरणाह्वयान् ॥ १३८ ॥

मक्षानश्नीत तारेन्दुक्रिरणैश्शीतलीकृतम् ।
सशर्करं पिबेत्क्षीर माहिषं बलकृद्धितम् ॥ १३९ ॥

निदाघहं शरीरस्य मालतीचन्दनधारिणः ।
स्वच्छांशुकावृताङ्गस्य समासरतिकर्मणः ॥ १४० ॥

जलार्द्रांशुकवातेन तालवृन्तानिलेन च ।
विस्तारिताब्जपत्रस्य वीजनैश्चाम्बुवर्षिभिः ॥ १४१ ॥

मयूरतालवृन्तैश्च तथा च हरिचन्दनैः ।
कर्पूरमल्लिकामुक्तामालाभिर्मधुरैः प्रिये ॥ १४२ ॥

शारिकाशुकबालानामालापैर्विसभूषणैः ।
फुल्लकल्हारकमलनीलोत्पलविराजितै ॥ १४३ ॥

कर्पूरचन्दनालेपै..कान्तैश्च प्रमदाजनैः ।
तापस्संह्रियते चास्य चादानोष्णाभितापिनः ॥ १४४ ॥

सक्तुकट्वम्ललवणरूक्षायासातपांस्त्यजेत् ।

वर्षर्तुचर्या ॥

अथातो वार्षिकीं चर्यां शृणु वक्ष्यामि भैरवि ! ॥१४५॥

आदानक्षीणधातूनां नराणां जठरानलः ।
क्षीणोऽपि वर्षासमये दोषैस्सीदति सत्वरम् ॥ १४६ ॥

सवारिवारिदवाततिरोहितदिवाकरे ।
व्योम्नि झंझासमीरिण शीतलेन तुषारिणा ॥ १४७ ॥

वातस्स्यात्कुपितोऽत्यन्तं मतसाया निदाघतः ।
भूमेर्मेघादिसिक्ताया बाष्पैः कालस्वभावतः ॥ १४८ ॥

अम्लपाकैश्च लवणादिमद्यैम्सस्नेहैस्तथा ।
पित्तं कुप्यति चात्यर्थं दुर्दिनत्वाच्च जाठरः ॥ १४९ ॥

वह्निम्सीदति तेनैव श्लेष्मा कुप्यति दुस्तरः ।
एवमन्योन्यदुग्रास्युर्दोषास्साधारणं ततः ॥ १५० ॥
मर्दन च शिरोऽभ्यङ्गं तैलैर्नारायणैर्भजेत् ।
उष्णोदकैश्च बहुभिस्नातंवा सम्मार्जयेत्तनुम् ॥ १५१ ।
रक्तं चाप्यथवा शुक्लं माञ्जिष्ठं चाऽथ धारयेत् ।
सान्द्रेणागरुधूपेन शरीरं धूपयेच्छिवे ! ॥ १५२ ॥
कस्तूरीं कुङ्कुमं चारु भजेत्कालागरुद्रवम् ।
कुटज केतकीं जातिं मरुव करवीरकम् ॥ १५३ ॥
स्निग्धजाङ्गलमासानि संस्कृतांस्तद्रसानपि ।
मुद्गाढककुलत्थाना पिबेद्यूष च सस्कृतम् ॥ १५४ ॥
अरिष्टाख्य च मैरेय पुराणमथवा पिबेत् ।
सौवर्चलयुतं मस्तु पञ्चकोलरजोयुतम् ॥ १५५ ॥
भजेदुष्णकरं सर्वं शुद्धकोष्ठो भवेन्नरः ।
कुर्यात्कषायवस्तिं च जीर्णधान्याशन भजेत् ॥ १५६ ।
दिव्य वा कौपमुदक शृतं पेय सुखावहम् ।
अत्यन्तवातवर्षेऽह्नि प्रायेण लवणाम्लकम् ॥ १५७ ॥
मधुरं लघु सक्षौद्र शुष्कनिम्तालितानि च ।
व्यञ्जनानि च तैल च वटकान्पर्पटान्भजेत् ॥ १५८ ॥
यथासुख च ताम्बूलं कस्तूरीफलसंयुतम् ।
नेतेवनी(?)स्वादगरुधूपितावरमावहेत् ॥ १५९ ॥
सुगन्धावयवस्तिष्ठेत्सौधे,मूत्राप्यवर्जिते ।
तुषारशीतरहिते सुरम्येऽगरुधूपिते ॥ १६० ॥
दिवासुप्ति नदीतोय सक्तुं जलघृताप्लुतम् ।
व्यायाममर्कंकिरणान्सगमात्यन्तिकं त्यजेत् ॥ १६१ ॥

शरदृतुचर्या ॥

अथातश्शारदीं चर्यां वक्ष्यामि शृणु वाग्मयि ! ।
चर्यतौ शीतवृष्टिभ्या सहसैव रवे करै ॥ १६२ ॥

तप्ताङ्गाना नृणा पित्त चित वृष्टौ तु शारदे ।
सुतरा कुप्यति तदा तस्मात्पित्तापनुत्तये ॥ १६३ ॥

पित्तघ्नतैलेनाभ्यङ्ग मर्दन मृदु कल्पयेत् ।
सुखोष्णवारिणा स्नान शुक्लकाषायमम्बरम् ॥ १६४ ॥

धृत्वा चागरुकर्पूरधूमेनाङ्गानि लेपयेत् ।
भद्रश्रीहिमलिप्ताङ्ग केतकीमल्लिकानि च ॥ १६५ ॥

चम्पकाम्बुजपत्राणि वहेन्मृगमदान्वितम् ।
विरेचन शिरामोक्ष तिक्ताज्यास्वादन भजेत् ॥ १६६ ॥

शालिगोधूममुद्ग च पटोलक्षौद्रशर्करा ।
जाङ्गल पिशितं तिक्त कषाय मधुरान्भजेत् ॥ १६७ ॥

बुभुक्षितस्तु लघ्वन्न धात्रीं शीधु घृत पय ।
पानक यावस चेक्षुनालिकेरोदक नवम् ॥ १६८ ॥

अगस्त्योदयसशुद्धनिर्विष लघु शीतलम् ।
अर्केन्दुकिरणोत्तप्तशीत रसोदक पिबेत् ॥ १६९ ॥

सौधपृष्ठ प्रदोषे तु हिमचन्दनचर्चित ।
सुगन्धमालानिर्धौतवसनालङ्कृतस्सुखी ॥ १७० ॥

मुक्तामालापरिष्कारस्सुगन्धीरीरलेपित ।
रम्यारामापरिवृते हर्म्ये ज्योत्स्नातिसुन्दरे ॥ १७१ ॥

समासीनश्चन्द्रपादान् सेवेत तरुणीयुत ।
सादन्स्वादन्नेक्षुदण्डान्पित्तघ्नमदिरामपि ॥ १७२ ॥

पायं पायं सुखं तिष्ठन्क्रीडयन्कामिनीजनम् ।
यवक्षारादिकान्क्षारान्हिममातृप्ति भोजनम् ॥ १७३ ॥

तिलतैलं रविकरान्दिवा निद्रां वसां दधि ।
तीक्ष्णं मद्यं त्यजेद्वस्तु प्राचीवायुं च पित्तकृत् ॥१७४॥

सर्वर्तुसाधारणी चर्या ॥

अथ साधारणी चर्या संक्षेपाद्वक्ष्यते शिवे ! ।
स्वाद्वम्ललवणान्प्रायो हिमवर्षागमे भजेत् ॥ १७५ ॥

तिक्तोषणकषायांश्च वसन्ते नितरां भजेत् ।
निदाघे मधुरप्रायं भजेद्वर्षात्यये पुनः ॥ १७६ ॥

तिक्तस्वादुकषायांश्च वर्षासु च भजेत्क्रमात् ।
मधौ रूक्षोष्णमश्नीयाद्ग्रीष्मे स्निग्धं च शीतलम् ॥

प्रावृट्शिशिरहेमन्ते स्निग्धं चोष्णतरं भजेत् ।
मेघात्यये रूक्षशीतं विधिनानेन सेवयेत् ॥ १७८ ॥

तत्तदुक्तानधिकानूसान्सेवेत चान्वहम् ।
अन्यानपि रसान्सर्वानल्पमात्रं यथारुचि ॥ १७९ ॥

एकस्मान्त्ये च सप्ताहमन्यस्य दिनसप्तकम् ।
एवं चतुर्दशदिनमृतुसन्धिरिति स्मृतः ॥ १८० ॥

वर्तमानामृतोश्चर्यां मन्दं मन्दं समुत्सृजेत् ।
आगामिन ऋतोश्चर्यामृतुसन्धौ भजेत्क्रमात् ॥१८१॥

सात्म्यद्रव्यविसर्गाच्च ह्यसात्म्यद्रव्यसेवनात् ।
रोगा भवन्ति तस्माच्च्छीलत्यागी शनैर्भुजेत् ॥ १८२ ॥

ऋतुचर्यामिति भजन्नायुरारोग्यमाप्नुयात् ।

अन्नपाकक्रमो धातुमलाद्युत्पत्तिक्रमश्च ॥

अन्नपाकक्रमं वक्ष्ये समासेन सुरार्चिते ! ॥ १८३ ॥

भुक्तमन्नं च सकलं कोष्ठकं प्राणवायुना ।
आहृतं तद्द्रवैर्भिन्नसंघातं मार्दवं पुनः ॥ १८४ ॥

स्नेहेन नीतं कोष्ठाग्निरामाशयगतं पचेत् ।
समानवायुनोदीप्तो जाठरस्तु यथा बहिः ॥ १८५ ॥

स्थालीस्थं तण्डुलं तोय पचेदन्नं च पावकः ।
भुक्तमात्रेण तत्सर्वं षड्रसं मधुरायते ॥ १८६ ॥

पच्यमानं कफोत्पाद्यैः फेनस्स्यान्मधुरादिभिः ।
फेनस्तु कफतत्त्वं यात्यम्लतां च विदाहतः ॥ १८७ ॥

आमाशयाच्च्युतं तच्च पित्तं भवति निर्मलम् ।
पक्वाशयमनुप्राप्तमग्निना परिशोषितम् ॥ १८८ ॥

पिण्डितं परिपक्वं स्यान्महतः पाकतः कटुः ।
पार्थिवश्चाप्य.आग्नेयो वायव्यश्चेति नाभसः ॥१८९॥

पञ्चोष्माणः पार्थिवादीनन्नानन्नु पचन्ति च ।
पञ्चाहारगुणान्पक्वांस्तथा भूतगुणानपि ॥ १९० ॥

पृथक् पृथक् यथास्वं च पुष्णन्त्येते यथासुखम् ।
भौमो भौमांस्तथैवान्यानन्ये देहगतान्क्रमात् ॥१९१॥

पक्वं तदन्नं द्विविधं किट्टसारप्रभेदतः ।
किट्टं तु द्विविधं चाच्छं मूत्रं सान्द्रं शकृद्भवेत् ॥

पुनस्सारं पचन्त्येव यथास्वं सप्त धातवः ।
धातुगास्तु ततो देवि ! रसाद्रक्तं भवेत्ततः ॥ १९३ ॥

मांसं मांसाद्भवेन्मेदस्तस्मादस्थि प्रजायते ।
अस्थ्नो मज्जा ततश्शुक्रं शुक्राद्गर्भो भवेत्प्रिये ॥१९४॥

प्रसादशेषजान्वक्ष्ये रसात्स्तन्यमसृक्ततः ।
सिराश्च कण्डरा मांसात्पट् त्वचश्च वसा भवेत् ॥१९५॥
मेदसस्स्नायुसन्धी च शेषं नश्यत्यतः परम् ।
रसस्य किट्टं श्लेष्मा स्यादसृजः पित्तमेव च ॥१९६॥
मांसस्य किट्टं खमला मेदसो घर्मवारि च ।
अस्थ्नो रोमाणि केशास्त्युर्मज्जायास्त्वक्षिविट्त्वचाम् ॥
स्नेहश्शुक्रस्य चौजस्यात्क्रमाद्धातुमलास्स्मृताः ।
किट्टं प्रसादो भवति धातूनां परिपाकतः ॥ १९८ ॥
इतरेतरसंस्तम्भा धातुस्नेहपरम्परा ।
आहुरात्साधु जीर्णाद्यो जातस्सारो रसो हि सः ॥
तस्माद्रसस्तु धातूनां रक्तादीनां च वर्धनः ।
नराणां धातवस्सप्त सन्ति स्त्रीणां यथा तथा ॥२००॥
पुंसां शुक्लं च शिरसि नारीणां हृष्टमानसे ।
पतिसङ्गे तु तच्छुक्लं स्रवन्ति स्वरमन्दिरे ॥ २०१ ॥
तच्चाम्बुसदृशं स्वच्छं सौम्यं गर्भाय नो भवेत् ।
भुक्तमन्नं दिवारात्रं शुक्लवृद्धिं करोति तत् ॥ २०२ ॥
सप्ताहादच्छशुक्लं स्यान्मासाद्गर्भक्षमं हि तत् ।
एवं पाकक्रमेणैव भवेत्पाण्मातुरांबिके ! ॥ २०३ ॥
वृष्यौषधप्रभावेण सद्यश्शुक्रादि जायते ।
चङ्क्रमद्भोज्यधातूनां परिवृत्तिस्सदा भवेत् ॥२०४॥

पाचकाग्निस्वरूपम् ॥

जाठरो भौतिकश्चैव धातवीयोऽग्नयस्स्मृता. ।
एतेषु जाठरश्श्रेष्ठो येनान्नं परिपच्यते ॥ २०५ ॥

स एव मूलं सर्वेषामग्नीनां तत्क्षये क्षयः ।
तद्वृद्धौ च भवेद्वृद्धिस्तन्मूलं जीवितं बलम् ॥२०६॥

देवि ! तस्माद्धितैस्साम्यैरन्नपानाख्यदारुभिः ।
पालयेच्चं प्रयत्नेन तदायत्ता ह्यरोगता ॥ २०७ ॥

चतुर्विधस्स एवाग्निस्तीक्ष्णो मन्दस्समोऽसमः ।
पित्ताग्निर्मूर्च्छिते वायौ समाने तीक्ष्णपावकः ॥२०८॥

असम्यग्वहु वा भुक्तं पचेच्छीघ्रं तु पित्तजान् ।
रोगान्कुर्यात्तु मन्दाग्निस्समाने कफपीडिते ॥ २०९ ॥

सम्यग्भुक्तं मितं चाऽपि हितं चान्नं चिरात्पचेत् ।
चक्रूशोपाध्मानताश्च गौरवं चान्त्रकूजनम् ॥ २१० ॥

आटोपमसकृत्कुर्याच्छ्लेष्मजानामयानपि ।
स्वस्थानस्थे समाने तु समोऽग्निरभिधीयते ॥ २११ ॥

सम्यग्भुक्तं पचेत्काले त्वारोग्यफलदो भवेत् ।
असमोऽग्निरमार्गस्थे समाने स्यात्सुभोजनम् ॥२१२॥

चिरात्पचेत्तु दुर्भुक्तमचिराद्धातजान्गदान् ।
कुर्यात्तस्मादप्रमत्तस्समाग्निं रक्षयेत्प्रिये ! ॥ २१३ ॥

यामद्वये पचेत्तीक्ष्णप्पड्यामान्मन्दपावकः ।
कृच्छ्रादन्नं समाग्निस्तु चतुर्यामात्पचेत्सुखम् ॥२१४॥

असमाग्निः कदाचित्तु शीघ्रं वा मन्दमेव वा ।
नाभिस्थाने स्थितो वह्निस्सर्वेषां प्राणिनामपि ॥२१५॥

गजोष्ट्रतुरगादीनां वह्निरङ्गुष्ठमात्रकः ।
पशुमर्त्यमृगाणां च यवमात्रानलो भवेत् ॥ २१६ ॥

गृध्रोलूकवकादीनां जाठराग्निस्तिलोन्मितः ।
कृमिकीटादिजन्तूनां केशमात्रो हुताशनः ॥ २१७ ॥

प्रदीप्तो जाठरो वह्निरण्डावन्न पचेत्तन ।
अन्नाभावे पचेद्दोषान्दोषे क्षीणे पचेत्तन ॥ २१८ ॥

धातून्धातुक्षये प्राणान्सहरेत्प्राणिना परम् ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ एकोनविंशोल्लास

॥ विंश उल्लासः ॥

योगरहस्यनम् ॥

श्रीभैरवी—

देवदेव कृपाम्भोधे ! कालकन्दर्पनाशन ! ।
अष्टमूर्ते महामूर्ते पञ्चकृत्यपरायण ! ॥ १ ॥
प्रपञ्चित जगत्सर्वं त्र्यम्बक त्रिपुरान्तक ! ।
जटाकलितभोगीन्द्रफूत्कारबलान्तचन्द्रम ! ॥ २ ॥
सूर्येन्दुवह्निनयन स्मेरपञ्चानन प्रभो ! ।
कुण्डलाहिफणारत्नद्योतमानकपोलभू ! ॥ ३ ॥
कुन्दाग्रदन्तसुभगपल्लवाधरशोभित ! ।
हालाहलासितगल सप्तभोगीन्द्रभूषण ! ॥ ४ ॥
महाशिवलयप्रोद्यदष्टादशभुजोज्ज्वल ! ।
सर्वदिव्यायुधोपेत वरव्याघ्राजिनाम्बर ! ॥ ५ ॥
नमत्सुरासुराधीशमुकुटोत्पलरश्मिभि ! ।
नीराजितपदद्वन्द्व योगिजन्मजरापह ! ॥ ६ ॥
सच्चिदानन्दविभव प्रसन्न करुणाम्बुधे ! ।
ओङ्कारगम्य विमलातर्क्याचिन्त्याप्रमेय भो ! ॥ ७ ॥

स्तोता स्तुत्यस्तुतिस्त्व हि कर्ता कार्यं च कारक ।
सर्वोऽपि हि त्वमेवासि प्रसीद परमेश्वर ! ॥ ८ ॥

त्वन्मायया जगत्सर्वं सृष्ट त्रात हृत तथा ।
त्व भूस्त्वमापस्त्व वह्निस्त्व वायुस्त्व नभश्शशी ॥ ९ ॥

रविस्त्व परमात्मा त्व गुणास्त्व प्रकृतिस्तथा ।
पुरुषस्त्व मनस्त्व च बुद्धिश्चित्तमहङ्कृति ॥ १० ॥

रसायन च सकलमाख्यातु च सविस्तरम् ।
आज्ञापयाह यदि ते ह्यहा प्राणप्रिया विभो ! ॥ ११ ॥

जीवन्मुक्ति कथ नाथ ! योगरूप च कीदृशम् ।
अनुगृह्णीष्व देवेश ! सुखोपाय भवापहम् ॥ १२ ॥

श्रुत्वा स्तुतिं स्मितमुखो भैरव परया मुदा ।
उवाच देवीं कल्याणीं पर्वताधिपनन्दिनीम् ॥ १३ ॥

श्रीभैरव —

साधु साधु महामाये ! सर्वं वेत्सि सनातने ! ।
तथाऽपि पृच्छसीशानि ! लोकाना हितकाम्यया ॥१४॥

प्रवक्ष्यामि समासेन सावधान शृणु प्रिये ! ।
त्वत्तोऽन्या वल्लभा का मे रहस्यार्थविभाषणे ॥ १५ ॥

जीवन्मुक्तलक्षणम् ॥

शृणु वक्ष्यामि देवेशि ! जीवन्मुक्तस्य लक्षणम् ।
काम क्रोध भय लोभ मद मोह च मत्सरम् ॥ १६ ॥

मान लज्जा कुलं शील जुगुप्सा दम्भ च वञ्चनाम् ।
अविद्या जडता गर्वं शीतमुष्ण तथाऽऽतपम् ॥ १७ ॥

घातं सुखं च दुःखं च पापं पुण्यं हिताहितम् ।
तापलयं पुत्रमित्रकलत्रादीनि यस्त्यजेत् ॥ १८ ॥

न सक्तस्सर्वविषये तत्वचिन्तापरायण. ।
पद्मपत्रमिवाम्भोभिर्निर्लिप्तहृदयो भवेत् ॥ १९ ॥

मैत्रीकृता(पा)तटोपेक्षामदैर्दैर्मण्डिताशय. ।
ऐहिकामुष्मिकसुखप्राप्तिकार्यानिरक्तधी. ॥ २० ॥

नित्यानित्यविवेकज्ञो ह्यन्त करणनिग्रहः ।
जरामरणहीनश्च शिवसामरसात्मवान् ॥ २१ ॥

जीवन्मुक्तस्स विज्ञेयस्तीर्णससारसागरः ।
देवदैत्यादिभिर्वन्द्यस्स सेव्यस्स गुरुश्शिव ॥ २२ ॥

यथाऽह सर्वलोकेषु पूजनीयो महेश्वरि ! ।
तथाऽसौ सर्वलोकेषु सर्वैस्संपूज्यते सदा ॥ २३ ॥

देहान्तेषु तु मुक्तिर्या प्राणिनां साऽमयोजना ।
देहान्ते देहिनस्सर्वे मुक्तिं यान्ति न संशय ॥ २४ ॥

भगसन्द्रावणान्मुक्तिर्भवेच्चेद्दर्दुरादय ।
पक्षिगो घृणभा मेषा किं मुक्तास्त्विपुराम्बिके ! ॥२५॥

रेतोनिर्मूलसेवाया यदि मुक्तिर्भवेत्प्रिये ! ।
कपिश्च सूकराद्याश्च कथं मुक्ता भवन्ति ते ॥ २६ ॥

न केवलामरत्वाच्च न शिवत्वाद्धुवेतया ।
तद्द्वयोर्मेलनाच्च स्याज्जीवन्मुक्तिरियं स्मृता ॥ २७ ॥

सर्वस्मिन्समये शास्त्रे मुक्तिरस्त्यन्तकालजा ।
न दृश्यते फरान्तस्थमणिवत्सा च शाम्भवि ! ॥ २८ ॥

अतिगोप्यमवाच्य यद्देवानामपि दुर्लभम् ।
कथयिष्यामि देवेशि ! देहस्थैर्यं सदातनम् ॥ २९ ॥

जीवन्मुक्तिसाधकशरीरस्थैर्यसंपादनोपायः ॥

योगसिद्धि ॥

वैशिवत्व खेचरत्वं च सर्वसिद्धिप्रद शुभम् ।
देह विना न किञ्चित्स्यादेहोऽयं सर्वसाधनम् ॥ ३० ॥

तस्माद्देहं प्रयत्नेन रक्षयेत्सर्वतस्सदा ।
देहपाते धर्मनाशो धर्मनाशे क्रियाच्युति ॥ ३१ ॥

क्रियाच्युतौ कुतो योगो योगभ्रंशे न चिद्भवेत् ।
चिदभावे कुतो मोक्षो मोक्षे अष्टे न किञ्चन ॥ ३२ ॥

अन्योपायशतेनापि न देहो धार्यते सदा ।
पारद पवनश्च स्यात्सर्वसिद्धिद उत्तम. ॥ ३३ ॥

सम्मूर्च्छितौ मृतौ बद्धावुभौ पवनपारदौ ।
क्रमाद्रोगहरौ नित्यं मृत्युघ्नौ खेचरप्रदौ ॥ ३४ ॥

रस पूर्वं मया ख्यातोऽधुना वायु प्रशस्यते ।
वायोस्सन्धारणाज्ज्ञान ज्ञानान्मोक्ष प्रजायते ॥ ३५ ॥

सर्वेषा देहमूल स्याद्वस्थैर्यं पवन. प्रभु. ।
परस्मादक्षराज्जसादाकाश समभूवत. ॥ ३६ ॥

वायुस्तस्माच्च दहनस्तस्मादापस्ततो मही ।
एतेषा पञ्चभूतानामक्षरं कारण परम् ॥ ३७ ॥

व्योम शब्दात्मक वायुश्शब्दस्पर्शात्मको भवेत् ।
यद्विश्शब्दस्पर्शरूपमयस्तेजिमुच्यते ॥.३८ ॥

शब्दरूपस्पर्शरसात्मक भूमिर्विशेषत ।
शब्दरूपरसस्पर्शगन्धरूपा भवेत्प्रिये ! ॥ ३९ ॥

भूवाय्वम्बनिराकाशाधिष्ठात्र्यश्चैव देवता ।
ब्रह्मा विष्णुश्च रुद्रश्च महेश्वरस्तदाशिर्व. ॥ ४० ॥

भूमिर्नष्टाम्बुसंमग्ना ताश्च प्रस्ता महाग्निना ।
स च चण्डसमीरेण शमितस्सोऽपि पार्वति ॥ ४१ ॥

व्योम्नि लीनः क्रमात्तस्मादाकाशादुद्भवन्ति ते ।
अन्तर्बहिस्स्थितं व्याप्तं निराधारं निराश्रयम् ॥ ४२ ॥

आकाशं चेतसा ध्यायन्मुच्छिन्द्याद्भवबन्धनम् ।
जगत्प्राणमयं वायुं चिदानन्दमयं जलम् ॥ ४३ ॥

निश्चलीकुरुते युक्त्या वायुर्बलस्थास्तं खेचरः ।
अनन्तार्काग्निसन्दीप्तं दहन्तं जगतां त्रयम् ॥ ४४ ॥

तेजो ध्यात्वा स्वहृदये नाग्निना स तु बाध्यते ।
सुधातरङ्गनिकरप्लाव्यमानमहीतलम् ॥ ४५ ॥

अम्बुलं भावयन्स्वान्ते वारि तं न हि बाधते ।
अभूतलचराक्रान्तं भूतलं भूतसंप्लवम् ॥ ४६ ॥

हृदये भावयन्नित्यं तस्य नो पार्थिवं भयम् ।
यद्यद्भावयते चित्ते तत्तद्रूपमवाप्नुयात् ॥ ४७ ॥

यथाग्नित्वं व्रजेत्काष्ठः कीटो भ्रमरतां यथा ।

योगाङ्गानि ॥

आसनं प्राणनियमः प्रत्याहारश्च धारणा ॥ ४८ ॥

ध्यानं समाधिरेतानि स्युर्योगाङ्गानि क्रमेण च ।

१. आसनविधिः ॥

चतुरशीतिलक्षाणि ह्यासनानि भवन्ति हि ॥ ४९ ॥

तेषु मुख्यासने द्वे च सिद्धपद्मासने स्मृते ।

[सिद्धासनम् ।]

स्वयोनिं पादमूलेन चैकेन घटयेद्दृढम् ॥ ५० ॥

अन्यच्चरणमूलं च मेहनोपरि विन्यसेत् ।
अवकाङ्गस्समासीनो वशीभूतेन्द्रियः प्रिये ! ॥ ५१ ॥

निश्चलाक्षो भ्रुवोर्मध्यं पश्यन्निश्चलमानसः ।
सिद्धासनमिदं ज्ञेयं मुक्तिमार्गप्रदायकम् ॥ ५२ ॥

[पद्मासनम् ।]

दक्षिणोरौ पदं वामं वामोरौ दक्षिणं पदम् ।
विन्यस्य करयुग्मेन पृष्ठभागगतेन च ॥ ५३ ॥

विपरीतेन चाङ्गुष्ठं वामं वामकरेण च ।
दक्षिणं दक्षिणेनैव दृढं धृत्वा निजोरसि ॥ ५४ ॥

विन्यस्य चुबुकं ध्यायेन्नासाग्रं संयतेन्द्रियः ।
एतत्पद्मासनं ख्यातं सर्वरोगनिबर्हणम् ॥ ५५ ॥

२. प्राणायामः ॥

[अजपामुद्रा ।]

आधारं तु गुदस्थाने चतुर्दलसरोरुहम् ।
वादिसान्ताक्षरोपेतं बालारुणसमप्रभम् ॥ ५६ ॥

स्वाधिष्ठानं षड्दलाब्जं बादिलान्ताक्षरान्वितम् ।
विद्युत्प्रभं ततो देवि ! रक्तवर्णं मणिपूरकम् ॥ ५७ ॥

डादिफान्तार्णसंयुक्तं नाभौ दलशतालकम् ।
अनाहतं सुवर्णाभं द्वादशच्छदपङ्कजम् ॥ ५८ ॥

हृदये कादिठान्तार्णं विशुद्धिस्तु प्रशस्यते ।
षोडशारं महापद्मं षोडशस्वरभूषितम् ॥ ५९ ॥

आज्ञाचक्रं द्वयदलं पद्मस्तविराजितम् ।
श्वेतवर्णं क्षमादेवि ! षट्चक्रं समुदाहृतम् ॥ ६० ॥

नाभेरधस्तान्मेढ्स्योपरिष्टात्कन्द उच्यते ।
चिद्ब्रह्मण्डसङ्काशस्तत्र नाडीसमुद्भवः ॥ ६१ ॥
सप्ततिद्विसहस्रास्युस्तासु मुख्या दश स्मृताः ।
इडा च प्रथमा नाडी पिङ्गला च द्वितीयका ॥ ६२ ॥
सुषुम्ना च तृतीया स्याद्गान्धारी च चतुर्थिका ।
पञ्चमी हस्तिजिह्वा स्यात्षष्ठी पूषा तरस्विनी ॥ ६३ ॥
सप्तम्यलम्बुषा नाडी चाष्टमी च कुहूस्मृता ।
नवमी शंखिनी चैव दशमी च क्रमेण हि ॥ ६४ ॥
एतास्तु प्राणवाहिन्यो वायवस्तु जपास्स्मृताः ।
प्राणापानौ तथा व्यानोदानौ चैव समानकः ॥ ६५ ॥
नागः कूर्मश्च कृकलो देवदत्तो धनञ्जयः ।
सर्वेषु नाडीचक्रेषु वर्तन्ते दश वायवः ॥ ६६ ॥
वामदक्षिणमार्गाभ्यामध ऊर्ध्वं च चञ्चलाः ।
प्राणापानवशो जीवः प्रधावति न दृश्यते ॥ ६७ ॥
हस्ताभ्यामाहतो भूमौ कन्दुको न स्थिरो यथा ।
प्राणापानपरिक्षिप्तस्तथा जीवोऽपि न स्थिरः ॥ ६८ ॥
प्राणापानसमाकर्षे तथा प्राणमपानतः ।
बहिर्गच्छद्धकारेण सकारेणान्तराविशेत् ॥ ६९ ॥
हंसस्सोहं मनुममुं सदा जीवो जपेत्प्रिये ! ।
एकविंशत्सहस्रं च षट्शताधिकमीश्वरि ! ॥ ७० ॥
हंसमन्त्रस्य संख्या स्यादहोरात्रेण सर्वदा ।
हंसाख्योऽयं महामन्त्रो व्रजपेति प्रकीर्तितः ॥ ७१ ॥
जपाख्येयं च गायत्री यमिकैवल्यदायिनी ।
एतत्समं तपो ज्ञानं जपः पुण्यं न किंचन ॥ ७२ ॥

अनुच्चार्या ह्यवर्णा च कुण्डलिन्यास्समुद्भवा ।
प्राणसञ्चारिणी ह्येषा ज्ञातव्या योगिभिस्सदा ॥ ७३ ॥

माता कुण्डलिनी शक्तिः कन्दादूर्ध्वं प्रतिष्ठिता ।
अष्टधा परिवृत्ता च प्रसुप्तभुजगाकृतिः ॥ ७४ ॥

ब्रह्मद्वारमुखं सा तु स्वमुखेन पिधाय च ।
तां च प्रबोधयेदादौ वह्नियोगेन पार्वति ! ॥ ७५ ॥

वायुना मनसा सार्धं मध्यनाड्या व्रजेच्छिवे ! ।
हठादाकुञ्चनाद्ब्रह्मद्वारमुद्घाटयेत्तु सा ॥ ७६ ॥

यथा नयेद्गुणं सूची तद्वद्ब्रह्मबिलं तु सा ।
सुखं पद्मासनासीनः पाणी चोत्तानितौ प्रिये ! ॥ ७७ ॥

अङ्कमध्ये निधायैव चुबुकं वक्षसि न्यसेत् ।
दृढं गुदमुखं गाढमाकुञ्च्यापानरन्ध्रकम् ॥ ७८ ॥

मुहुर्मुहुर्वायुमूर्ध्वं चालयेत्त्वरितं प्रिये ! ।
प्राणं मुञ्चन्कुण्डलिन्याः प्रभावान्मोक्षवर्त्मजम् ॥ ७९ ॥

उपैति सत्प्रबोधं च देवानामपि दुर्लभम् ।
तदोद्भूतैरश्रमजलैस्स्वाङ्गानि परिमार्जयेत् ॥ ८० ॥

क्षीराहारी मिताशी कटूम्ललवणं त्यजेत् ।
जितेन्द्रियो ब्रह्मचारी धुरीणः कर्मवर्जितः ॥ ८१ ॥

एवमभ्यासनिरतो वत्सरात्सिद्धिमेति सः ।

प्राणायामे मुद्राः ॥

जालन्धरं मूलबन्धमोड्डीयाणं च खेचरीम् ॥ ८२ ॥

महामुद्रां च यः कुर्यात्स भवेद्देहसिद्धिभाक् ।
एषां वक्ष्ये लक्षणानि गोप्यानि शृणु शाम्भवि ! ॥

[जालन्धरबन्धः ।]

जालन्धरं कण्ठशिरासमूहानां च बन्धनम् ।
कृत्वाऽधो नमयित्वा कं तदा स्यन्दति मूर्धतः ॥ ८४ ॥
नभस्तस्यन्दमानं च सुधा दोग्धौ पतेत् च ।
न धावति मरुत्तत्र कर्णसंकोचने कृते ॥ ८५ ॥
कर्णामयसमूहघ्नं मृत्युघ्नं तत्परं भवेत् ।

[मूलबन्धः ।]

मूलबन्धं पार्ष्णिभागाद्योनिस्थानं प्रपीडयेत् ॥ ८६ ॥
गुदमाकुञ्चयेद्योगी नयेदूर्ध्वमपानकम् ।
एवं कृते मूलबन्धे क्षीयते मलमूत्रकम् ॥ ८७ ॥
प्राणापानौ च संयुक्तौ स्यातां वृद्धोऽपि यौवनम् ।
प्राप्नुयान्मूलबन्धेन मृत्युर्थोपि विवस्वताम् (*) ॥८८॥

[ओड्याणबन्धः ।]

ओड्डियाणे नाभिविवरमूर्ध्वं जठरे दृढम् ।
आकृष्य पश्चिम तानं बन्धयेत्पवनस्तदा ॥ ८९ ॥
विश्रान्तस्यान्महामाये ! चोड्याणोऽयं प्रकीर्तितः ।
मृत्युदावानलो दीप्तो जरारोगाभिघाडबः ॥ ९० ॥

[खेचरी मुद्रा ।]

आस्यान्तर्विवरे जिह्वां तालुरन्ध्रे प्रवेशयेत् ।
विपरीतां भ्रुवोर्मध्ये पश्येन्निश्चलया दृशा ॥ ९१ ॥
एषा हि खेचरी मुद्रा गोपनीयाऽतिदुर्लभा ।
जिह्वा तु खगता यस्मान्मनश्चरति खे ततः ॥ ९२ ॥

खेचरीति प्रसिद्धेय मृत्युरोगजरापहा ।
निद्रा क्षुधा तृषा नास्ति खेचर्या मुद्रितस्य च ॥९३॥

मूर्च्छा भवति साध्वी च कर्मबन्धभयं न हि ।
रमण्या सङ्गतस्यापि रेतो न पतति ध्रुवम् ॥ ९४ ॥

यावच्चुक्रं स्थिरं देहे तावत्कालभयं न हि ।
येन बद्धा नभोमुद्रा बीजस्तस्य न गच्छति ॥ ९५ ॥

यदि गच्छेत्तस्य बीजो हुताशनमुपैति हि ।
स बीजश्चोर्ध्वमायाति शक्त्या प्रतिहतस्स्वयम् ॥९६॥

योनिमुद्रानिबद्ध सन्सा मुद्रा तेन दुर्लभा ।
बीजस्तु द्विविध प्रोक्तश्शुक्र चैव महारज ॥ ९७ ॥

शिरस्स्थानगत शुक्रं योनिस्थानगतं रज ।
शुक्र तु श्वेतवर्णं स्यात्सवालाभ रजस्स्मृतम् ॥ ९८ ॥

शुक्रं चन्द्रगत नित्यं रजस्सूर्येण सङ्गतम् ।
शुक्रं शिवो रजश्शक्तिस्तया योगस्सुदुर्लभः ॥ ९९ ॥

मरुता शक्तिचारेण रजश्चोर्ध्वं प्रणीयते ।
ऐक्यं तद्बिन्दुना याति तदा दिव्यं वपुर्भवेत् ॥१००॥

महामुद्रा ॥

वामाङ्घ्रिमूलभागेन योनिस्थानं प्रपीडयेत् ।
दक्षिणाङ्घ्रिं च वितत हस्ताभ्यामभिधारयेत् ॥१०१॥

हनुं वक्षसि निक्षिप्य वायुना जठरं तत. ।
आपूर्य रेचयेद्देवि! स्थित्वा बद्धासनो यमी ॥ १०२ ॥

एषा ख्याता महामुद्रा मलसंशोषणी वरा ।
सूर्येन्दू घटयेज्जिह्वाशोषणी पापनाशिनी ॥ १०३ ॥

तथा दक्षिणपादेन योनिस्थानं प्रपीडयेत् ।
वितत्य वामपादं च कराभ्यां धारयेत्प्रिये ! ॥ १०४ ॥

शेषं पूर्वोक्तवत्कुर्यादेवं सव्यापसव्ययोः ।
भागयोःसमकालस्यादभ्यासस्तां विवर्जयेत् ॥ १०५ ॥

तस्य पथ्यमपथ्यं च पटूसा नीरसा अपि ।
घोरं विषं वातिसुखं पीयूषमिव जीर्यते ॥ १०६ ॥

गुल्मोदावर्तकुष्ठाद्या रोगा नश्यन्त्यसंशयम् ।
सिद्धिदेयं महामुद्रा कालं हन्ति जराभयम् ॥ १०७ ॥

न प्रकाश्या न देया च यस्मैकस्मैचन प्रिये ! ।

२. प्रत्याहारः ॥

मुक्तासनस्थितो योगी ऋज्वङ्गग्रीवमस्तकः ॥ १०८ ॥

घोणाग्रलोचनस्वस्थः कुटीस्थः प्रणवं जपेत् ।
त्रिलोकश्च त्रिकालश्च त्रिदेवास्त्रींश्चरा अपि ॥ १०९ ॥

त्रिज्योतींषीन्दुमुख्यानि त्रिवेदाश्चाग्नयस्त्रय. ।
शक्तित्रय त्रिपदवी ब्राह्मी चैन्द्री च वैष्णवी ॥११०॥

वर्णत्रयं च भासन्ते यत्र तज्ज्योतिरोमिति ।
तमोङ्कारं च मनसा वचसा कर्मणा तु यः ॥ १११ ॥

ध्यायेज्जपेदभ्यसेच्च स मुक्तो भवबन्धनात् ।
गच्छस्तिष्ठन्नपञ्चाग्रच्चुचिर्वाऽप्यशुचिर्यदि ॥११२॥

न कर्मणा च लिप्यस्याज्जलेनाब्जदलं यथा ।
वायौ चलति सर्वेऽपि चलन्तीन्द्रियधातव ॥ ११३ ॥

स्थिते वायौ स्थिरे सर्वं वपु प्रभृति शाम्भवि ! ।
तस्माद्वायुं निबध्नीयात्स्थिरे वाते स्थिरं मन ॥११४॥

स्थिरे मनसि जीवश्च स्थिरो भवति भैरवि!।
यावत्संयमितो वायुर्यावच्चेतोऽपि सुस्थिरम् ॥ ११५ ॥

बीजं यावद्भ्रुवोर्मध्ये तावत्कालभयं न हि।
षट्त्रिंशद्वत्सुलं नित्यं ततः प्राणः प्रकीर्तितः ॥११६॥

बद्धपद्मासने स्थित्वा ऋज्वंगस्थिरमानसः।
वामनासापुटेनैव पूरयेत्प्राणमारुतम् ॥ ११७ ॥

यावत्षोडशमात्रं च कुंभयेद्द्वादश प्रिये!।
रेचयेद्दशमात्रं च दक्षनासापुटेन च ॥ ११८ ॥

पुनश्च सूर्यमार्गेण पूरयेत्पूर्ववत्प्रिये!।
कुंभयित्वा रेचयेच्च वामनासापुटेन च ॥ ११९ ॥

प्राणायामविधिः प्रोक्तस्त्रिविधो योगिवन्दिते!।
अधमो मध्यमो देवि! ह्युत्तमोऽपि यथाक्रमम् ॥१२०॥

प्रोक्तोऽयमधमस्तस्माद्द्विगुणो मध्यमस्स्मृतः।
उत्तमस्त्रिगुणः प्रोक्तः प्राणायामोऽयमीश्वरि! ॥१२१॥

यदा तु वामनासायां पूरयेच्चन्द्रमक्षरम्।
ध्यायेदमृतवारीशमध्यस्थं क्षीरसन्निभम् ॥ १२२ ॥

यदा तु दक्षनासायां पूरयेत्सूर्यमक्षरम्।
ज्वलज्ज्वलनसङ्काशं नाभिस्थं चिन्तयेत्सदा ॥ १२३ ॥

एवं बीजद्वयं ध्यात्वा नासारन्ध्रद्वयेन च।
पूरयेद्यस्तु मतिमान्नाडीशुद्धिरतो भवेत् ॥ १२४ ॥

एवं मासत्रयाभ्यासाद्यथेष्टं वायुधारणम्।
प्रदीप्तो जाठरो वह्निर्नादव्यक्तिश्च जायते ॥ १२५ ॥

आरोग्यं प्राप्नुयाद्देवि! नित्यमभ्यासयोगतः।
प्रथमेयं न(यत्र!) धर्मस्स्याद्द्वितीये कम्पते वपुः ॥

उत्तिष्ठति तृतीये तु बद्धपद्मासनस्थितेः ।
प्राणायामादिपट्केन प्रत्याहारो भवेच्छिवे ! ॥ १२७ ॥

तद्द्विपट्केन विधिना धारणा तु प्रशस्यते ।
धारणाद्वादशेन स्याद्ध्यानं तद्द्वादशात्मकम् ॥ १२८ ॥

समाधिः कथ्यते देवि ! तेन दृश्यं परात्परम् ।
तस्मिन्परापरे धाम्नि क्षीयते कर्मसञ्चय. ॥ १२९ ॥

जन्ममृत्यू न भवतो जरारोगश्च नश्यति ।
युक्तियुक्तेन योगेन चिरायुश्च सुखी भवेत् ॥ १३० ॥

अयुक्ताभ्यासनाद्धिक्काकर्णरोगशिरोव्यथाः ।
श्वासकासादयो रोगा दोषास्स्युर्बहवस्तथा ॥ १३१ ॥

[विपरीतकरणीमुद्रा ।]

सौम्यस्थानात्समायाता द्वाभ्यां चैका तु भुज्यते ।
ततस्तृतीयो य. कश्चित्स स्याज्जन्मजरोज्झितः ॥

प्रज्वलज्ज्वलनाकारो नाभिमध्ये स्थितो रवि. ।
तालुमध्ये शशी भाति सुधां वर्षत्यधोमुखः ॥ १३३ ॥

तां ग्रसत्यूर्ध्ववदनो भास्कर. किरणत्विषा ।
एतस्य विपरीतं यत्करणं विपरीतकम् ॥ १३४ ॥

काकचञ्चुवदास्यं च कृत्वा वायुं ससूत्कृतम् ।
आदाय नासारन्ध्रेण पुनस्तं ध्वसनं त्यजेत् ॥ १३५ ॥

शीतलीकरणाख्योऽयं योगस्तु ज्वरपित्तहृत् ।
अमृतं शीतलं तस्य पिबतश्च जरा न हि ॥ १३६ ॥

जिह्वया तालुमूलेन प्राणं यः पिबति प्रिये ! ।
तस्य षण्मासतस्सर्वे रोगा नश्यन्ति योगिन ॥१३७॥

रसनामूर्ध्वतः कृत्वा सोमं पिबति यः प्रिये ! ।
सिद्धिर्मासार्ध आयाति रोगास्तस्य न सन्ति हि ॥

जिह्वाग्रेण च सपीड्य रसनान्तर्बिलं महत् ।
ध्यात्वाऽमृतशरीमम्बामर्धोन्दुन भवेत्कविः ॥ १३९ ॥

अमृताप्लावितततनोर्योगिनो वत्सरत्रयात् ।
रेतश्चोर्ध्वं प्रयात्येव सिध्यन्ति ह्यणिमादय. ॥ १४० ॥

त्रिविधं गरलं तस्य शरीरे च न सङ्क्रमेत् ।
जरा च मरणं नास्ति दुष्टसत्वभयं तथा ॥ १४१ ॥

४. धारणम् ॥

उक्तासनसमारूढः प्राणायामरतस्सदा ।
प्रत्याहारप्रसन्नस्सन्नभ्यसेद्धारणं तत. ॥ १४२ ॥

चेतसो निश्चलत्वं यद्धारणा सा स्मृता शिवे ! ।
पृथ्व्यादिपञ्चभूताना या पृथग्धारणा हृदि ॥ १४३ ॥

चतुरश्रा सुवर्णा सलकारा च हृदि स्थिता ।
ब्रह्मणा सहिता भूमिर्ध्यातव्या पञ्च नाडिकाः ॥१४४॥

प्राण तत्रैव मनसा धारयेत्सह शाभवि ! ।
एषा स्तम्भकरी विद्या पृथ्वीजयमवाप्नुयात् ॥ १४५ ॥

अर्धचन्द्रमतीकाशं कर्पूरहिमनिर्मलम् ।
कण्ठस्थानगतं नित्यं सुधाप्लुतवकारयुक् ॥ १४६ ॥

जलतत्वं च संयुक्तं विष्णुना तत्र धारयेत् ।
प्राणं चित्तेन सहितं ध्यातव्यं पञ्चनाडिकाः ॥ १४७ ॥

एषा हि वारुणी विद्या विषपित्तज्वरापहा ।
असने कालकूटस्य मयैव परिकल्पिता ॥ १४८ ॥

ब्रह्मानन्दमयो योगी भवत्येव न संशयः ।
आज्ञाचक्रमिति ख्यातं परे व्योम्नि निरामये ॥१७२॥

शिवमात्मानमाचिन्त्य भवेज्ज्ञानमयो वशी ।
गगनाकारममलं मृगतृष्णाम्बुसन्निभम् ॥ १७३ ॥

ध्यात्वाऽऽत्मानं सर्वगतं मोक्षं व्रजति संयमी ।
अपानमेढ्रौ नाभिश्च हृदयं घण्टिका तथा ॥ १७४ ॥

लम्बिका च भ्रुवोर्मध्यं नभश्च ब्रह्मरन्ध्रकम् ।
तव चक्रमिति ख्यातं देयं स्थानं च योगिनाम् ॥

धारणा पञ्चघटिका षण्णाडी ध्यानमुच्यते ।
समाधिर्द्वादशाहं स्यात्प्राणसंयमनात्प्रिये ॥ १७६ ॥

६. समाधिः ॥

जलसैन्धवयोर्योगादेकत्वं च यथा भवेत् ।
चित्तात्मनोस्सामरस्यं समाधिस्स तु कथ्यते ॥ १७७ ॥

मनः प्रलीयते चान्ते यदा प्राणक्षयो भवेत् ।
सामरस्यं तदा स्याच्च समाधिस्स तु कथ्यते ॥१७८॥

प्रणष्टाखिलसङ्कल्पो जीवात्मा परमात्मना ।
यदेकत्वं भजेद्देवि ! समाधिस्स तु कथ्यते ॥१७९॥

परापेक्षेन्द्रियं चित्तमिन्द्रियेषु प्रवर्तते ।
यदा जीवो गतद्वैधयं तदा नैवेन्द्रियं मन ॥१८०॥

शब्दं स्पर्शं च रूपं च रसं गन्धं परं तथा ।
आत्मानं च सुखं दुःखं मानामानं प्रियाप्रिये ॥१८१॥

शीताशीतं तथा वातमातपं यो न वेत्ति च ।
न बाध्यते स्वकर्मौघैर्न कैश्चिदपि बाध्यते ॥ १८२ ॥

न शस्त्रैर्बाध्यते मन्त्रैर्यन्त्रैस्तन्त्रैर्न गृह्यते ।
नाग्निना न जलेनापि वायुना न च पीड्यते ॥१८३॥

अवध्यो देहिभिस्सर्वैर्मानिनीयसुरैरपि ।
आहारे च विहारे च निद्रायामवबोधने ॥ १८४ ॥

सर्वकर्मसु युक्तस्सन्स तत्त्वं वेत्ति योगिनि ! ।
निरालम्बं निराकारमनाद्यन्तं निराश्रयम् ॥ १८५ ॥

अनालयं निष्प्रपञ्चं निष्क्रियं निर्मलं महत् ।
निश्चलं निर्मलं नित्यं निर्गुणं व्योम चिन्मयम् ॥

सदानन्दमनन्तं च सर्वगं विभु सन्ततम् ।
एतद्ब्रह्मपदं तत्त्वं विद्धि त्वं दिव्यवासिनि ! ॥१८७॥

अनामये निरालम्बे निरातङ्के महाद्युतौ ।
निराभासे परे तत्त्वे योगयुक्त प्रलीयते ॥ १८८ ॥

दुग्धे दुग्धं घृते चाज्यमम्बावम्बिर्जले जलम् ।
क्षिप्तं भजेतन्मयत्वं तथा ब्रह्मणि लीयते ॥ १८९ ॥

योगाभ्यासफलम् ॥

मयोदितमिदं सर्वं दिव्यवायुरसायनम् ।
यस्सेवेत स पुण्यात्मा कृतकृत्यो जगत्त्रये ॥ १९० ॥

सर्वयज्ञफलोपेतस्स स्नातस्सर्वतीर्थके ।
स यशस्वी स योगीन्द्रस्स एवामरवन्दितः ॥ १९१ ॥

स एव सिद्धश्शुद्धश्च मम तुल्यो वरानने ! ।
तस्मिन्निवसति मे चेतस्तच्चित्तं मे निवासभूः ॥

सफलं जीवितं तस्य पूतं तदुभयं कुलम् ।
तत्पदन्यासमात्रेण धरित्री पावनीकृता ॥ १९३ ॥

यत्रोपितं क्षणं तेन पुण्यक्षेत्रं हि सा मही ! ।
धन्या तज्जनयित्री च पुण्यस्तज्जनकः प्रिये ! ॥ १९४ ॥

तद्दर्शनात्सजीवास्युर्दशूलम्प्रोतादयश्चवाः ।
तद्भावयेनैव सर्वेऽपि लभन्तेऽपि शुभाशुभम् ॥ १९५ ॥

तन्मूत्रमलसंस्पर्शाल्लोहा यान्ति सुवर्णताम् ।
किं पुनः कथ्यते देवि ! मम तुल्यपराक्रमः ॥ १९६ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ विंशोल्लासः ॥

॥ एकविंश उल्लासः ॥

योगसिद्धिदकुटीनिर्माणविधिः ॥

श्रीभैरवी—

कुटी प्रोक्ता त्वया पूर्वं कर्म कार्यं च कौलिकी ।
तत्र कालं क्रियच्चैव ! यन्त्रत्यं ब्रूहि मे प्रभो ! ॥

श्रीभैरवः—

वक्ष्यामि तां कुटीं सम्यक् शृणु त्रिपुरसुन्दरि ! ।
मेदिनीमुपलीकृत्य पुनर्मां सुहृदं प्रिये ! ॥ २ ॥

स्नंभांश्च क्रमशस्तद्वत् षट् पंक्तिस्तम्भापयेद्बुधः ।
तुला उपरि चारोप्य दारूणि सुदृढानि च ॥ ३ ॥

स्थापयेद्विप्रका. पश्चात्सुधया गान्द्रमालिपेत् ।
परितो यत्नमि कृत्वा भित्तिं त्रिदशयां शुभाम् ॥ ४ ॥

कुर्यात्कुटीं च तन्मध्ये सृणीमावरणं. पुनः ।
निम्नेषचतुरश्रं च दशमादेशमात्रकम् ॥ ५ ॥

पञ्चप्रादेशमात्रे च स्वयोनिम्नं तथोर्ध्वतः ।
एवं दशवितस्त्यामिरचिन्त्यां तां मनोहराम् ॥ ६ ॥

प्राग्द्वारं बाह्यवलये द्वितीये वलये शिवे ! ।
याम्यद्वारं तृतीये तु प्रत्यग्द्वारं विधीयते ॥ ७ ॥

द्वाराणां च प्रमाणं हि वितस्तिद्वयमुच्यते ।
सकवाटं प्रतिद्वारमच्छिद्रं चार्गलान्वितम् ॥ ८ ॥

सुधाप्रलेपितं कुर्याद्भित्तिं श्लक्ष्णतरं स्थलम् ।
दक्षिणे चोत्तरे चैव कुट्यन्तर्वेदिकाद्वयम् ॥ ९ ॥

सार्धत्रयं वितस्तीनां विशालं चायतं वृश ।
प्रादेशमात्रमुत्सेधं मध्यं प्रादेशिकत्रयम् ॥ १० ॥

तत्र गोमयसम्भूतं भस्म वस्त्रेण गालितम् ।
पूरयेच्च कुटीभित्तौ चित्रं बहु सुविस्तरम् ॥ ११ ॥

भैरवं कालमेघाभं ज्वलदूर्ध्वशिरोरुहम् ।
फालाक्षं वक्रदंष्ट्रं च नागकुण्डलमण्डितम् ॥ १२ ॥

नागयज्ञोपवीतं च किङ्किणीमुण्डमालिनम् ।
दिगम्बरं तु फाकोटीभूषितांघ्रिशिरोरुहम् ॥ १३ ॥

हारकेयूरकटकमुद्रिकादिविभूषितम् ।
दशहस्तं च डमरुमङ्कुशं खड्गशूलकम् ॥ १४ ॥

चरदं सव्यहस्ताब्जैर्नागं पाशं च घण्टिकाम् ।
मधुपात्रं भयहरं बिभ्राणं वामबाहुभिः ॥ १५ ॥

कृष्णांगरागमाल्याढ्यं सर्वव्याधिविनाशनम् ।
व्याधिभूताहिशत्रुघ्नं क्ष्वेलाद्विभयनाशनम् ॥ १६ ॥

ततो मृत्युञ्जयं शान्तं चंदुकं विलिखेत्प्रिये ! ।
पारदेन्दुहिमश्वेतं चारुं द्विभुजशोभितम् ॥ १७ ॥

किंकिणीमालया वद्धकर्णन्नूपुरशोभितम् ।
बालं कुण्डलसच्छोभं त्रिनेत्रं नग्नरूपिणम् ॥ १८ ॥
श्वेतमाल्यानुलेपं च पूर्णपात्रं च वामतः ।
दण्डं दक्षिणहस्तेन दधानं मृत्युनाशनम् ॥ १९ ॥
मायाबीजं च वटुकं होनं ग्रथममुच्चरेत् ।
आपदुद्धारणायेति लिखेत्पश्चाक्षरद्वयम् ॥ २० ॥
वटुकायेति मायां च वटुकस्य मनुस्स्मृतः ।
मूर्तिद्वयोरयं मन्त्रः कथितस्सुरवन्दिते ! ॥ २१ ॥
मन्त्रस्यास्य च यद्यन्त्रं तद्यन्त्रं तत्र संलिखेत् ।
रमां च भुवनेशीं च कामं चिन्तामणिं क्रमात् ॥२२॥
कर्णिकायां लिखेत्पूर्वं वटुकायेति दीप्सितम् ।
अष्टपत्रे लिखेच्छेषाण्यक्षराण्यष्टपत्रके ॥ २३ ॥
बहिष्पोडशपत्रेषु विलिखेत्षोडश स्वरान् ।
द्वात्रिंशद्दलके कादिसान्तद्वात्रिंशदक्षरान् ॥ २४ ॥
अन्ये दले हलक्षांश्च विलिखेद्भूपुरं बहिः ।
आपदुद्धारणं यन्त्रमपमृत्युनिवारणम् ॥ २५ ॥
रक्षाकरं ग्रहार्तानां सर्वेषां प्राणिनामपि ।
स्त्रीवश्यं राजवश्यं च पुंवश्यं पशुवश्यकम् ॥ २६ ॥
नानासिद्धिप्रदं नित्यं सर्वरोगविषापहम् ।
हारकेयूररुचिरं कान्त्या विश्वविमोहनम् ॥ २७ ॥
महामृत्युञ्जयं देवं भावयेन्मृत्युजिद्भवेत् ।
एवं द्वितीयवर्गस्य तृतीयं पञ्चमेन च ॥ २८ ॥
स्वरेण बिन्दुना युक्ते सोन्तं साध्यपदं ततः ।
रक्षशब्दयुगं पश्चात्पूर्वं बीजत्रयं पुनः ॥ २९ ॥

प्रतिलोमं समुच्चार्य मन्त्रं मृत्युञ्जयं जपेत् ।
तारं मध्ये ससाध्याख्यं दिग्दले भं समालिखेत् ॥ ३० ॥
आग्नेयादिदलेष्वन्त्यमक्षरं क्रमशो लिखेत् ।
बाह्ये भूपुरमालिख्य दिक्षु सान्द्रं समालिखेत् ॥ ३१ ॥
चतुष्कोणे ठकारं च यन्त्रं मृत्युञ्जयात्मकम् ।
अपमृत्युज्वरव्याधिक्ष्वेलमोहविनाशनम् ॥ ३२ ॥
तत्र चिन्तामणिं देवं चिन्तितार्थप्रदं लिखेत् ।
नीलप्रवालरुचिरं त्रिणेत्रं रुचिराननम् ॥ ३३ ॥
पाशारुणोत्पलं वामे दक्षे शूलकपालकौ ।
दधानमिन्दुमकुटं ध्यायेदर्धाम्बिकेश्वरम् ॥ ३४ ॥
वह्निप्रथमवर्गाद्विपमरेफाः क्रमात्ततः ।
प्राणसद्यांतसहितप्पष्ठस्वरसबिन्दुकः ॥ ३५ ॥
इदं चिन्तामणेर्मन्त्रं चिन्तितार्थप्रदं शुभम् ।
षोडशस्वरसंदीप्तं चिन्तामणिमभीष्टदम् ॥ ३६ ॥
ठकारावेष्टितं कुर्याज्ज्वरापस्मृतिमृत्युहम् ।
ततश्च शारदादेवीमालिखेत्सिद्धिदायिनीम् ॥ ३७ ॥
शङ्खकुन्देन्दुधवलां मकुटेन्दुकलाधराम् ।
सुधाकुम्भं वराक्षस्रक्संविन्मुद्रां करांबुजैः ॥ ३८ ॥
बिभ्राणां श्वेतवसनां मौक्तिकाभरणोज्ज्वलाम् ।
वाग्बीजं भुवनेशीं च वदवाक्यद्वय ततः ॥ ३९ ॥
वाग्वादिनीं ससंबुद्धिमग्निपत्नीं समुच्चरेत् ।
एष श्रीमातृकामन्त्रः प्रोक्तस्सारस्वतप्रदः ॥ ४० ॥
आदिबीजद्वयं हित्वा शेषं पूर्ववदुच्चरेत् ।
दशार्णशारदामन्त्रो वाग्विलासप्रदायकः ॥ ४१ ॥

वियद्वर्णसुकारञ्च सधान्तं सविसर्गकम् ।
कर्णिकायां लिखेत्पूर्वं किञ्जल्केषु स्वरानपि ॥ ४२ ॥

अष्टच्छदेष्वष्टवर्गान्यशहाद्यैः परैस्त्रिभिः ।
कादैश्च पञ्चभिर्वर्णैरष्टवर्गास्समीरिताः ॥ ४३ ॥

लिखेद्भूपुरकोणेषु ठकारान्दिक्षु विन्यसेत् ।
इदं हि मातृकायन्त्रं विपमृत्युगदापहम् ॥ ४४ ॥

अघोरं विलिखेद्देवि ! नीलजीमूतसन्निभम् ।
क्रूरदंष्ट्रं त्रिणेत्रं च नागेन्द्राष्टविभूषितम् ॥ ४५ ॥

रक्ताङ्गरागवसनं रक्तमालाविराजितम् ।
परश्वधं च डमरुं खड्गं खेटमिषुं धनुः ॥ ४६ ॥

त्रिशूलं पूर्णपात्रं च बिभ्राणं चाष्टबाहुभिः ।
भुवनेशीं स्फुरद्धुन्द्धं तत. प्रस्फुरवीप्सितम् ॥ ४७ ॥

घोरं ततोऽघोरतरं तनुरूपं चटद्वयम् ।
प्रक(च)टद्विगुणं चैव कहशब्दयुगं ततः ॥ ४८ ॥

वमशब्दद्वयं देवि ! बन्धशब्दं च वीप्सितम् ।
घात(खाद)यद्वितयं देवि ! कवचं च फडन्तकम् ॥४९॥

एकोत्तरोऽयं पञ्चाशद्वर्णोऽघोरस्स्मृतो मनुः ।
वश्यार्थं तत्तद्वेमाभं पूर्वोक्ताकृतिसंयुतम् ॥ ५० ॥

मुक्तौ मृत्युञ्जयार्थं तु श्वेतं पूर्वोक्तविग्रहम् ।
सर्वार्थसिद्धिदं शान्तमघोरास्त्रं लिखेत्प्रिये ! ॥ ५१ ॥

मायाबीजं ससाध्यं स्यान्मध्ये च खगसंयुतम् ।
तद्बहिःकेसरेष्वेवं विलिखेदष्टवर्गकम् ॥ ५२ ॥

ततस्त्वष्टदले मन्त्रवर्णान्गुणमितान् लिखेत् ।
अग्नीशेषु तद्वत्तत्पट्कोणे कवचास्त्रकौ ॥ ५३ ॥

सहहिर्भूपुरं लेख्यमेनदाघोरयन्त्रकम् ॥ ।
स्फुरद्वयामृतं मध्ये शक्तिबीजं लिखेत्ततः ॥ ५४ ॥

षट्कोणे प्रस्फुरद्युगं ततश्चाष्टदले क्रमात् ।
षड्भिश्चतुर्भिर्वेदैश्च रसैर्वस्वैश्च गोपदैः ॥ ५५ ॥

ऋतुभिर्दिशाष्टमन्त्राणैरमीभिर्विलिखेत्ततः ।
षट्कोणे वह्निचा(श)स्राभ्यामुद्धृतं वीतकोपकम् ॥५६॥

भूपुरेणावृतं यन्त्रमघोरं विलिखेत्प्रिये ! ।
च्यालरिचोरक्षुद्रापस्मारभूतग्रहापहम् ॥ ५७ ॥

अथो महागणपतिं लिखेद्विद्रुमसन्निभम् ।
कोटीरचन्द्रशकलं गजास्यं लोचनत्रयम् ॥ ५८ ॥

तुन्दिलं रक्तवसनं रक्तमालानुलेपनम् ।
दशदोर्दण्डसुभगं वामोरुस्थितयोषितम् ॥ ५९ ॥

हारकेयूरकटकमुद्रिकाकुण्डलोज्ज्वलम् ।
फलपूरं गदामिक्षुकोदण्डं च त्रिशूलकम् ॥ ६० ॥

चक्रं सरसिजं पाशमुत्पलं शालिमञ्जरीम् ।
स्वदन्ततुण्डया रत्नकलशं दशभिः करैः ॥ ६१ ॥

बिभ्राणं पद्मकरया वामोरुस्थितया श्रिया ।
आलिङ्गितं भक्तलोकचिन्तितार्थसुरद्रुमम् ॥ ६२ ॥

प्रणवं कमलां मायां कामराजं वसुन्धराम् ।
क्रमाद्गणपतेर्बीजं महागणपतिं ततः ॥ ६३ ॥

चतुर्थ्यन्तं ससंबुद्धि वरं च वरदे तथा ।
ततस्सर्वजनं मे च वशमानय शब्दकम् ॥ ६४ ॥

अग्निपत्नीं समालिख्य चाष्टाविंशतिवर्णकम् ।
मन्त्रे महागणपतेर्मृत्युदारिद्र्यनाशनम् ॥ ६५ ॥

त्रिकोणे बीजमालिख्य सतारे च गणेशितु ।
दिक्षु श्रीशक्तिमदनभ्रूबीजानि बहिर्लिखेत् ॥ ६६ ॥

षट्कोणे बीजषट्कं च तत्संधिष्वङ्गमन्त्रकम् ।
ततोऽष्टदलमध्येषु मन्त्राणि गणशो लिखेत् ॥ ६७ ॥

अन्त्याक्षरे चान्त्यदले मातृकामनुलोमत. ।
लेखे च प्रतिलोमेनाङ्कुशपाशावृतं तत ॥ ६८ ॥

भूमन्दिरेण सुभग यन्त्रं गणपतेरशुभम् ।
गजान्त श्रीपद दिव्यमायुष्यारोग्यवर्धनम् ॥ ६९ ॥

एतानि यन्त्रजालानि क्षुद्यन्तदेवता लिखेत् ।
कुटीभित्तिबहिर्भागे भैरव वर्णमालिखेत् ॥ ७० ॥

असिताङ्ग रुरु चण्ड क्रोधमुन्मत्तभैरवम् ।
कपालिन भीषण च सहारं भैरवं क्रमात् ॥ ७१ ॥

द्वितीयावरणस्यान्तर्भित्तावेकादश क्रमात् ।
रुद्रास्त्रिलोचनाश्चन्द्रकलाजूटजटान् लिखेत् ॥ ७२ ॥

तद्बाह्ये नव नाथाश्च नव सिद्धाश्च षोडश ।
सनत्कुमारसनकसनन्दादीन् लिखेत्तत ॥ ७३ ॥

तृतीयावरणस्यान्तर्भित्तौ ब्राह्म्यादिमातर ।
चतुष्पष्टिश्च योगिन्यो लेखनीया यथाविधि ॥ ७४ ॥

तद्भित्तिबाह्ये देवेन्द्रमुखा दिक्पतय क्रमात् ।
ग्रहाश्च चन्द्रसूर्याद्या अश्विन्याद्याश्च तारका ॥ ७५ ॥

पेषाया सरत्ये लेख्यात्सालङ्कारा च सायुधा ।
कुटीद्वारविपार्श्वे च गणेशं भैरवं लिखेत् ॥ ७६ ॥

द्वितीयावरणद्वारपार्श्वे द्वौ शखपद्मकौ ।
गरुत्मन्तं हनूमन्त तृतीयावरणस्य च ॥ ७७ ॥

द्वारस्य पार्श्वयोर्देवि । विलिखेद्वयभञ्जनौ ।
यस्मिन्देशे कुटी दिव्या कल्पिता योगिसत्तमैः ॥७८॥

देशो धन्यतरश्लाघ्यः पुण्यक्षेत्रं च पावनम् ।
तत्रत्याश्च प्रजा धन्यास्स्फीतार्थाः पुण्यकर्मिणः॥ ७९ ॥

राष्ट्रं सुभिक्षमारोग्यमनामयसुखावहम् ।
ईतिहीनं कालवृष्टिसहितं धान्यसङ्कुलम् ॥ ८० ॥

तत्करोपद्रवव्याघ्रसर्पादिभयवर्जितम् ।
तत्र तीर्थानि सर्वाणि गङ्गादीनि वसन्ति च ॥ ८१ ॥

इन्द्रादयोऽपि विबुधास्सूर्यचन्द्रादयो ग्रहा ।
योगिन्यो भैरवास्सिद्धा गणेशगुहमातरः ॥ ८२ ॥

तत्रस्थस्य महीपस्य जयार्थावाप्तिरायुषः ।
संभवेच्चक्रवर्तित्वं पुनर्नित्योत्सवोज्ज्वलम् ॥ ८३ ॥

वन्ध्यानां पुत्रसपत्ति. कुटीसन्दर्शनाद्भवेत् ।
कुष्ठापस्मारभूतादिमहाव्याधिविनाशनम् ॥ ८४ ॥

कुटीगता भवेयुस्ते ये सेवन्ते रसायनम् ।
सिद्धिं यान्ति सुखेनैव देवानामपि दुर्लभाम् ॥ ८५ ॥

अमरीकल्पः ॥

देवि ! चित्रं प्रवक्ष्यामि दिव्यं गुह्यतमं शिवम् ।
अमरीकल्पमनघ सुलभं निजदेहजम् ॥ ८६ ॥

अणिमाद्यष्टकैश्वर्यदेहलोहादिसिद्धिदम् ।
वमनादिविशुद्धाङ्गो लवणाम्लविवर्जितः ॥ ८७ ॥

कुटीगतस्तु देवेशि ! शिवतोयमुदारधीः ।
स्थूलस्य कतकस्यैव दारुणा पानपात्रकम् ॥ ८८ ॥

कुर्याच्च त्रिफला पिष्ट्वा लेपयेच्चपकान्तरे ।
कर्पं शिवाम्बुना रात्रौ पात्र चाधोमुख न्यसेत् ॥ ८९ ॥

स्थापयित्वा पुन प्रातराद्यन्तं मलव त्यजेत् ।
मध्यधाराश्च तत्पात्रे क्षिपेत्तत्त्रिफला तत ॥ ९० ॥

लोडयेदमरीयुक्त पिबेत्प्रागननम्सदा ।
इष्टदेवान्गुरून्वृद्धान्वत्वार्चितगणेश्वर. ॥ ९१ ॥

मिताहारो युक्तचेष्टो वातातपविवर्जित ।
एकमण्डलमात्रेण बाह्यान्तश्शुचिमाग्भवेत् ॥ ९२ ॥

मण्डलेन द्वितीयेन सर्वकुष्ठविनाशनम् ।
मण्डलेन तृतीयेन चतुर्विधविषापहम् ॥ ९३ ॥

मण्डलेन चतुर्थेन नालिकेराम्बुबद्धयेत् ।
आतमतोयं पञ्चमेन मलदौर्गन्ध्यनाशनम् ॥ ९४ ॥

षष्ठमण्डलयोगेन देहदौर्गन्ध्यनाशनम् ।
सप्तमण्डलयोगेन भवेदिन्द्रियपाटवम् ॥ ९५ ॥

ततोऽष्टमे मण्डले तु रजनीचूर्णकर्षयुक् ।
सेवेत शिवतोये च यावद्वृद्धिम्सप्तमण्डलम् ॥ ९६ ॥

वलीपलितहीनम्स्यान्महाविषभयोज्झित ।
मण्डले पञ्चदशके कर्षौशौ शृङ्गगन्धकौ ॥ ९७ ॥

शिवतोयेन सम्मिश्रं प्रपिबेदेकविंशतिम् ।
मण्डलं च तदन्ते स्यात्सन्धिभाग्देहलोहयो ॥ ९८ ॥

द्वाविंशन्मण्डले देवि ! चाभ्रक वरया युतम् ।
एव भजेद्यमी यावदष्टाविंशतिमण्डलम् ॥ ९९ ॥

मत्तहस्तिबलोपेतो गृध्रदृष्टिरनामय ।
एकोनत्रिंशति प्राप्ते मण्डले वरया युताम् ॥ १०० ॥

सक्रान्तचूर्णविमलां गोधामपि पिबेत्प्रिये ! ।
पञ्चत्रिंशन्मण्डलान्तं वज्रकायो भवेन्नरः ॥ १०१ ॥

षट्त्रिंशन्मण्डलादि स्वर्णधात्रीरजोऽन्वितम् ।
आत्मगोधान्वितं पेयं तत्तु यावद्द्वयाधिकम् ॥ १०२ ॥

चत्वारिंशन्मण्डलान्तं सशरीरः खगो भवेत् ।
त्रिचत्वारिंशन्मण्डले तु प्राप्ते पारदसंयुतम् ॥ १०३ ॥

वरायुतं पिबेदूनपञ्चाशन्मण्डलावधिः ।
अणिमादिगुणोपेतो वज्रकायश्च खेचरः ॥ १०४ ॥

सिद्धैर्युक्तो निरातंको निरपायो निरञ्जनः ।
यदृच्छया सर्वलोके विहरत्येव सर्वदा ॥ १०५ ॥

आरभ्य प्रथमं देवि ! मण्डलान्नित्यमाचरेत् ।
आत्मतोयेन धुत्तूररसेन परिलोडयेत् ॥ १०६ ॥

भस्म तेनैव सर्वाङ्गमसकृत्परिमर्दयेत् ।
अन्यकालसमायातमात्मतोयं विशोषतः ॥ १०७ ॥

मूर्ध्नि नासापुटे कर्णे हृशि पादकरद्वये ।
शीलयेत्सततं देवि ! शुद्धदेहो भवेश्वरः ॥ १०८ ॥

कदाचिदप्यात्मगोधां भूमौ न विसृजेत्प्रिये ।
अमरीसेविनः पुंसश्छिन्नतोयेन जायते ॥ १०९ ॥

सर्वलोहं च कनकं दिव्यं मनुजदुर्लभम् ।
विजयासहितां गोधां प्रतिवासरमोपिबेत् ॥ ११० ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ एकविंशोल्लासः ॥

क्षौद्रपृष्टेन तेनैव कृतं चक्षुष्यमञ्जनम् ।
वध्नकमुदुम्बरभवं रोहिण्यां गृह्य वल्यकं कुर्यात् ।
तद्वल्योपरि विनिहितभाण्डस्थितमोदकं क्षयं नैति ॥२१॥
अश्वत्थस्य तु वन्दाकं रोहिण्यां विधिनाऽऽहरेत् ॥२२॥
गृहे स्थिते च वन्दाके नित्यैश्वर्यं प्रजायते ।
कतकस्य तु वन्दाकं रोहिण्यां विधिनाऽऽहरेत् ॥२४॥
अञ्जने नेत्रयुगले निधिं पश्यति निश्चितम् ।
तदेव बन्धयेद्धस्ते सर्ववश्यो भवेद्ध्रुवम् ॥ २५ ॥
उदुम्बरस्य वन्दाकं रोहिण्यां विधिनाऽऽहरेत् ।
हस्ते बध्वा निहन्त्याशु ज्वरं चातुर्थिकं प्रिये ! ॥२६॥
रोहिण्यां मातुलुङ्गस्य बध्नकं तु समाहरेत् ।
धारयेद्दक्षिणे कर्णे जगद्वश्यकरं परम् ॥ २७ ॥
रोहिण्यां बिल्ववन्दाकं करे बध्वा जगत्प्रियः ।
मृगशीर्षे शिरीषस्य वन्दाकं सम्यगाहृतम् ॥ २८ ॥
हस्ते बध्वा स्पृशेन्नारीं नरं वा वशयेद्ध्रुवम् ।
मृगशीर्षे तु वन्दाकं तिन्त्रिणीवृक्षसम्भवम् ॥ २९ ॥
क्षीरेण पिष्ट्वा प्रपिबेदहश्यो जायते नरः ।
तद्घ्ना यः पिबेत्प्रातस्सर्वव्याधिहरो भवेत् ॥ ३० ॥
महिषीतक्रपिष्टेन तेन सर्वाङ्गलेपनम् ।
कृत्वा वह्निगतो यस्तु वह्निना च न दह्यते ॥ ३१ ॥
तिन्त्रिणीकस्य वन्दाकं गृहे यस्य प्रतिष्ठितम् ।
तस्य चोरभयं नास्ति करे द्यूतजयो भवेत् ॥ ३२ ॥
उदुम्बरस्य वन्दाकं मृगशीर्षे समाहरेत् ।
हस्ते बध्वा स्पृशेन्नारीं सा नारी वशगा भवेत् ॥३३॥

स्त्रीणां हस्ते तु बध्नीयादन्नमध्ये विनिक्षिपेत् ।
जायते चान्नवृद्धिस्तु नात्र कार्या विचारणा ॥ ३४ ॥

न्यग्रोधस्य तु वन्दाकं मृगशीर्षे समाहरेत् ।
बध्नीयाद्दक्षिणे हस्ते जनवश्यो भवेद्ध्रुवम् ॥ ३५ ॥

आदाय माटरूपस्य वन्दाकं समुदाहृतम् ।
बध्वा हस्ते जनैर्दीव्यन् स्याद्द्यूतेष्वपराजितः ॥ ३६ ॥

आर्द्रायां तौंबुरं ग्राह्यं वन्दाकं विधिना हरेत् ।
क्षीरेण प्रपिबेद्यस्तु तस्य स्याल्लोहमोटनम् ॥ ३७ ॥

आर्द्रकिं वा पुष्यरवौ वन्दाकं तुम्बुरोर्हरेत् ।
बध्नीयाद्दक्षिणे हस्ते बाणस्तम्भः प्रजायते ॥ ३८ ॥

पुनर्वसोर्हृतं वंशवन्दाकं क्षीरपेषितम् ।
पीत्वा स्त्रीपुरुषौ वन्ध्यौ प्रसुवाते सुतान्बहून् ॥ ३९ ॥

नक्तमालस्य वन्दाकमाहरेच्च पुनर्वसौ ।
क्षीरेण पिष्ट्वा प्रपिबेदखिलामयनाशनम् ॥ ४० ॥

तच्चूर्णनस्य मात्रेण नश्यन्ति ग्रहराक्षसाः ।
पुष्ये वन्धूकवन्दाकं गृहीत्वा तं निधापयेत् ॥ ४१ ॥

क्षेत्रमध्ये रिपोस्तत्र सस्यनाशश्च जायते ।
आश्लेषायां कर्णिकारवन्दाकं सम्यगाहृतम् ॥ ४२ ॥

बध्वा हस्ते दृढं तेन स्पृशन्वशति तेजनात् ।
मधूकस्यापि च वन्दाकमाश्लेषायां समाहरेत् ॥ ४३ ॥

बन्धयेद्दक्षिणे हस्ते व्याघ्रादिभयनाशनम् ।
मघासु मुचुकुन्दस्य वन्दाकं विधिनाऽऽहृतम् ॥ ४४ ॥

निधापयेद्धान्यमध्ये तद्धान्यं त्वक्षय भवेत् ।
विभीतकस्य वन्दाकं फल्गुन्योः पूर्वयोर्हृतम् ॥ ४५ ॥

स्थापयेद्धान्यमध्येन तदक्षय्यं क्षणाद्भवेत् ।
फल्गुन्योरन्ययोर्हस्तेऽप्ययमेव विधिस्मृतः ॥ ४६ ॥

शाकवृक्षस्य चन्दाकं मघायां विधिनाऽऽहरेत् ।
धान्यसंचयकृद्द्वारे धान्यवृद्धिश्च जायते ॥ ४७ ॥

मौञ्जीवृक्षस्य चन्दाकं मघार्के विधिनाऽऽहरेत् ।
शिरसा धारयेन्नित्यं तस्य श्रीर्वशमाप्नुयात् ॥ ४८ ॥

पलाशस्य तु चन्दाकं हस्तर्क्षे विधिनाऽऽहरेत् ।
करे शिरसि वध्नीयाद्व्याघ्रादिभयहृद्भवेत् ॥ ४९ ॥

तिन्दुकस्य च चन्दाकं चित्रायामाहृतं तथा ।
बध्वा हस्ते समस्तानां सध्वधो भवति द्विपाम् ॥५०॥

बुंटजस्य तु चन्दाकं चित्रायां विधिनाऽऽहरेत् ।
बध्नीयाद्दक्षिणे हस्ते दुर्लभं चेप्सितं लभेत् ॥ ५१ ॥

स्वात्यां लिकुचचन्दाकं गृहीत्वा यत्र वस्तुनि ।
निधापयति तत्सर्वमक्षयं नात्र संशयः ॥ ५२ ॥

बब्बूलबभ्रकं स्वात्यां बदर्यास्त्वनुराधके ।
बध्नन्यो धारयेद्धस्ते तत्पृष्ट्वा स्त्री वशा भवेत् ॥५३॥

आहृत्य धात्रीचन्दाकं विशाखायां यथाविधि ।
शुक्लकारस्य भवने विरुद्धस्य निधापयेत् ॥ ५४ ॥

सर्वं मद्यमपेयं स्यान्मोक्षस्तस्मिन्समुद्धृते ।
अनुराधासु विधिना ऐन्द्रीचन्दाकमाहृतम् ॥ ५५ ॥

धान्यमध्ये विनिक्षिप्तं धान्यमक्षयतां नयेत् ।
ज्येष्ठायामाम्रचन्दाकं हृत्वा वेश्यागृहे खनेत् ॥ ५६ ॥

सा दुर्भगा भवेत्सत्यमुद्धृते मोक्ष उच्यते ।
मूले खदिरचन्दाकं गृहीत्वा विधिपूर्वकम् ॥ ५७ ॥

बध्वा हस्ते नर क्षिप्र दुर्भगस्सुभगो भवेत् ।
तदेव पिष्ट क्षीरिण पीत कुष्ठादिनाशनम् ॥ ५८ ॥

मूलार्के गोट्टिकायाश्च वन्दाक विधिनाऽऽहरेत् ।
दक्षिणे बन्धयेद्धस्ते स्त्रीवश्य भवति ध्रुवम् ॥ ५९ ॥

तदेव शिरसा धार्यं सर्वसिद्धिर्भवेद्ध्रुवम् ।
करवीरस्य वन्दाक पूर्वाषाढासु साधितम् ॥ ६० ॥

धारयेच्छिरसा युद्धे स भवेदपराजित ।
पूर्वाषाढासु वन्दाक बदरीवृक्षसम्भवम् ॥ ६१ ॥

पिबेत्क्षीरिण या बन्ध्या सा बहूश्च सुताल्लभेत् ।
बुरवस्य तु वन्दाक पूर्वाषाढार्कवारके ॥ ६२ ॥

बन्धयेद्दक्षिणे हस्ते ह्यदृश्यो जायते नर ।
उत्तराषाढनक्षत्रे ग्राह्य गन्धारबन्धकम् ॥ ६३ ॥

पलाशबन्धक वाऽथ करे बध्वा वशंकरम् ।
श्रवणे चिलकोद्भूत वन्दाक प्राप्यते न तु ॥ ६४ ॥

कटुतैलघृष्टेन ताम्रपत्र च लेपयेत् ।
पुटपाकविधानेन तत्स्वर्णं भवति ध्रुवम् ॥ ६५ ॥

एरण्डस्य तु वन्दाक श्रवणार्के समाहरेत् ।
बन्धयेद्दक्षिणे हस्ते सदा द्यूतजयो भवेत् ॥ ६६ ॥

धनिष्ठाया तु बदरीवन्दाक विधिनाऽऽहृतम् ।
बध्वा करे स्पृशेद्य य स स दासो भवेद्ध्रुवम् ॥ ६७ ॥

हृत पुन्नागवन्दाक वारुणेषु यथाविधि ।
क्षीरिण पिष्ट्वा प्रपिबन्महानागबलो भवेत् ॥ ६८ ॥

नक्तमालस्य वन्दाक मघार्के विधिनाऽऽहरेत् ।
विधिना धारयेद्बाहौ पिशाचाना च दर्शनम् ॥ ६९ ॥

तिन्त्रिणीकम्य वन्दाकं पुत्र(पूर्व ?)र्क्षे विधिनाऽऽहरेत् ।
बन्धयेद्दक्षिणे हस्ते नित्यं द्यूतजयो भवेत् ॥ ७० ॥

पुत्र(पूर्व ?)र्क्षे विशवन्दाकमदृश्यो जायते करे ।
शिरीषस्य तु वन्दाकमुत्तरे विधिनाऽऽहरेत् ॥ ७१ ॥

करे शिरसि वध्नीयाद्व्याघ्रादिमहद्भयेत् ।
मघायां स्थापयेत्क्षेत्रे वन्दाकं मधुकोद्भवम् ॥ ७२ ॥

पक्षिणां मूषिकानां च जायते तुण्डबन्धनम् ।
पलाशस्य तु वन्दाकं हस्तर्क्षे विधिनाऽऽहरेत् ॥ ७३ ॥

लिङ्गलेपं प्रकुर्वीत वीर्यस्तम्भो भवेद्ध्रुवम् ।
क्षीरेणालोड्य वल्लीकं क्षौद्रं पिष्ट्वा निषेचयेत् ॥ ७४ ॥

वङ्गं तु सप्तधा देवि ! तद्वङ्गं रजतं भवेत् ।
पलाशस्य तु वन्दाकं हस्तर्क्षे विधिनाऽऽहरेत् ॥ ७५ ॥

क्षीरेण पपिवेद्यस्तु बद्दश्यो जायते नरः ।
तिन्दुकस्य च वन्दाकं चित्रायामाहृतं तथा ॥ ७६ ॥

बध्वा हस्ते समस्तानामवध्यो भवति द्विषाम् ।
हरीतक्यास्तु वन्दाक पूर्वभाद्रपदाहृतम् ॥ ७७ ॥

क्षीरेण कल्कितं पीत्वा चरेद्वररुचेस्समः ।
उत्तरास्वर्कवन्दाकं हृतं भाद्रपदासु तत् ॥ ७८ ॥

प्रलेपाद्यै. परं हन्याद्विषं स्थावरजङ्गमम् ।
रेवत्यां बोधिवन्दाकलतया कृतकौतुका ॥ ७९ ॥

वन्ध्याऽपि लभते गर्भं पीत्वा गोपयसा च तत् ।
रेवत्यां वटवन्दाकं वल्मीकमधुघर्षितम् ॥ ८० ॥

अक्षिदोषेष्वतिश्रेष्ठमक्षरावरणादिषु ।
रेवत्यां वटवन्दाकं गृहीत्वा धारयेद्भुजे ॥ ८१ ॥

महानागबलोपेतो महागणश्च जायते ।
समुद्धृतं विशाखायां वन्द्राकं राजवृक्षकम् ॥ ८२ ॥
निवारयति गेहस्थं वैश्वानरभयं गृहे ।
रोहिण्यां वटवन्द्राकं कटिस्थं वीर्यवर्धनम् ॥ ८३ ॥
अश्वत्थभववन्दाकं रेवत्यां गर्भदं स्मृतम् ।
विषवृक्षोत्थवन्दाकं मूर्ध्नि धृतं यदि ॥ ८४ ॥
प्रलिप्तं तनुते भूतपिशाचादिप्रभाषणम् ।
चुल्लिकान्तर्गतं कुर्यात्सभक्तं पानसन्ततिम् ॥ ८५ ॥
द्यूते जांबववन्दाकं रेवत्यां जयकारकम् ।
कुर्यात्कुरववन्दाकं हस्तस्थं बाणवारणम् ॥ ८६ ॥
मधूकवृक्षवन्दाकं धान्यस्थं धान्यवृद्धिदम् ।
पलाशतरुवन्दाकं वाक्प्रदं क्षीरसेवितम् ॥ ८७ ॥
वेश्यायां निम्ववन्दाकं गृहान्तर्निहितं यदि ।
वश्यं करोति साश्चर्यमाजन्ममरणान्तिकम् ॥ ८८ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ द्वाविंशोल्लासः ॥

॥ त्रयोविंश उल्लासः ॥

विशिष्टरससंस्काराः ॥

श्रीभैरवी—

श्रुतं सर्वं मया देव ! दिव्यं सर्वरसायनम् ।
शंभो ! तव प्रसादेन कृपांभोधे सुरेश्वर ! ॥ १ ॥

विज्ञापयिष्याम्यपरं सर्वलोकहितङ्करम् ।
वृद्धस्त्रीबालषण्डानामन्येषा रोगिणामपि ॥ २ ॥

रसायनेष्वशक्तानां कथं सौख्यं भवेत्समो ! ।
सर्वानुग्राहके श्रीमन्! तदाज्ञापय भैरव ! ॥ ३ ॥

श्रुत्वा देव्यास्तुतिपरं सर्वलोकहितप्रदम् ।
श्रुत्वा मन्दस्मितं देवो जगादेत्थं परं वचः ॥ ४ ॥

भैरवः—

साधु साधु महाभागे ! लोकानां जननी यतः ।
तस्माल्लोकहितं पृष्टं तद्वक्ष्याम्यहमीश्वरि ! ॥ ५ ॥

रसादिसस्कारविधिं सर्वरोगनिबर्हणम् ।
यथाक्रम प्रवक्ष्यामि श्रूयतामवधानत. ॥ ६ ॥

रसेन्द्रो रसराजश्च रसस्सूतश्च पारदः ।
शिववीज शिवो जैत्रो रसलौहो महारस. ॥ ७ ॥

रसोत्तमो महातेजास्सूतराट् चपलोऽमृतः ।
धुत्तुरो लोकनाथश्च प्रभुरिन्द्रो भवस्तथा ॥ ८ ॥

रुद्रतेजा. खेचरश्च रसधातुरचिन्त्यजः ।
अमरो देहदस्स्कन्दस्स्कन्देशो मृत्युनाशन. ॥ ९ ॥

देवो रसायनश्रेष्ठो यशोद. पावनस्स्मृत. ।
प्रोक्ता दिव्यरसाश्चैव त्रयस्त्रिंशच्च नाम च ॥ १० ॥

दोषयुक्तस्सूतराजो विषमेव वरानने ! ।
दोषहीनो रसस्साक्षादमृतं नात्र संशय ॥ ११ ॥

तस्मात्पारदसस्कारं दोषघ्नं शृणु पार्वति ! ।
रसाचार्यो भिषक्श्रेष्ठो यताल्लाऽघोरमन्त्रवित् ॥ १२ ॥

रसशोधनसंस्काराः ॥

[प्रथमः प्रकारः ।]

शुभर्क्षे शुभलग्नेषु सुमुहूर्ते सुवासरे ।
पूर्वोक्तंवल्सूतपूजां कुर्यादादौ शुचिस्थले ॥ १३ ॥
शतं पलानां पञ्चागत्पञ्चविंशति वा पुन. ।
दश वा पञ्च वा देवि ! नैतत्सादूनमिष्यते ॥ १४ ॥
लोहजे वा शिलोत्थे वा खल्वे सूतं विनिक्षिपेत् ।
कलांशं सूतराजस्य चूर्णेष्टकनिशारजः ॥ १५ ॥
जम्बीराम्लेन संमर्द्य तत्खल्वे दिनं प्रिये ! ।
क्षालयेदुष्णसौवीरैर्नागदोषो विनश्यति ॥ १६ ॥
अंकोलेनेन्द्रवारुण्या वङ्गदोषो विनश्यति ।
आरग्वधेन च मलं चित्रके नागदूषणम् ॥ १७ ॥
कृष्णधूर्तेन चाञ्चल्यं त्रिफलाभिर्विषं हरेत् ।
गिरिदोषं त्रिकटुकैरसह्यमग्निस्तु गोक्षुरैः ॥ १८ ॥
वङ्गादिसप्तदोषाणां नाशार्थं सप्तवासरम् ।
तत्तच्चूर्णैः कलाशैश्च कुमार्या रससंयुतैः ॥ १९ ॥
मर्दयित्वा रसं पश्चात्क्षालयेदुष्णकांजिकैः ।
पारदस्सकलैर्दोषैर्मुच्यते सप्तकञ्चुकैः ॥ २० ॥
वैद्यकर्मणि योज्यश्चेद्रसस्सार्वरोगहा ।

[द्वितीयः प्रकारः ।]

देवदारुमलयजजयावायसतुण्डिका- ॥ २१ ॥
कुमारीमुसलीवन्ध्याकर्कोटीरससंयुतम् ।
सूत दिनं मर्दयेच्च पुन पातनयन्त्रके ॥ २२ ॥

पातयेद्योजयेत्सूतं शुद्धं वैद्यस्य कर्मणि ।

[तृतीयः प्रकारः ।]

दग्धं पाषाणचूर्णं च निशाकन्यारसैः रसम् ॥ २३ ॥
मर्दयेद्दिनमेकं च पूर्वयन्त्रे च पातयेत् ।
एवं संस्कारसंशुद्धं योजयेद्वैद्यकर्मणि ॥ २४ ॥

[चतुर्थः प्रकारः ।]

दरदं याममात्रं तु पारिभद्रद्रवैः प्रिये ! ।
अथवा जम्बीररसैर्मर्दयित्वा तु पाचयेत् ॥ २५ ॥
यन्त्रे पातनके देवि ! दोषकञ्चुकवर्जितः ।

[पञ्चमः प्रकारः ।]

पुनर्नवारसैः पेष्यं धान्याभ्रं पारदं समम् ॥ २६ ॥
तप्तखल्वे दिनं कृत्वा वज्रमूषागतं रसम् ।
पचेद्भूधरयन्त्रे च पुनस्संमर्दयेच्च तम् ॥ २७ ॥
पूर्वद्रवैर्यथापूर्वं मर्दनं पाचनं पुनः ।
कृत्वैत दशवारं तं पात्यं पातनयन्त्रके ॥ २८ ॥
शुद्धस्स्यात्पारदो देवि ! योज्यो योगे रसायने ।

[षष्ठः प्रकारः ।]

दशमांशं रसाद्गन्धं तप्तखल्वे विनिक्षिपेत् ॥ २९ ॥
वराजम्बीरकन्याग्निद्रवैर्यामं विमर्दयेत् ।
पातयेत्पातनायन्त्रे कुर्यादेवं तु सप्तधा ॥ ३० ॥
सगन्धकं मर्दनं च पातनं भवति प्रिये ! ।
शुद्धस्स्यात्पारदो देवि ! योज्यः पारदकर्मणि ॥ ३१ ॥

[सप्तम. प्रकारः ।]

तिलतैलैर्महिषिकैर्मूत्रैर्मद्याम्लकेन च ।
गोमांसैर्हिङ्गुलं पाच्य लोहपात्रे क्रमाग्निना ॥ ३२ ।
सप्ताह लोहदण्डेन चालयेत्तद्द्रवं मुहु· ।
सार्द्धं मयूरपित्तेन भावयेदातपे दिनम् ॥ ३३ ॥
पातयेत्पातनायन्त्रे दरदं खरवह्निना ।
शुद्धो भवेच्चतुर्यामात्पारदो योगवाहक ॥ ३४ ॥

जारणार्हो वडवानलविडः ॥

शृणु देवि ! प्रवक्ष्यामि जारणार्हं विड प्रिये ! ।
चूर्णं कृत्वा दग्धशङ्खं घर्मेऽर्कक्षीरभावितम् ॥ ३५ ॥
कुर्यादिनं ततो देवि ! धूमसारं च भावयेत् ।
दिनं जम्बीरकरसैरातपे चातितीव्रके ॥ ३६ ॥
चतुर्यामप्रजामूत्रैष्षोडशांशं सुवर्चलम् ।
यथा सान्द्रत्वमाप्नोति तावत्काथ्यं वरानने ! ॥ ३७ ॥
नरमूत्रे षोडशांशे कण्टकारीं समूलकाम् ।
यावद्घनीभवेत्तावत्काथनीया प्रयत्नत ॥ ३८ ॥
तिन्त्रिणीक्षारकासीससर्जक्षाराश्मिलाजतु ।
जम्बीरस्य रसैस्सर्वं चतुर्यामं पृथक्पृथक् ॥ ३९ ॥
जेपालं तत्त्वचाहीनं मूलकक्षारसैन्धवम् ।
गुञ्जां च टङ्कणं शिग्रुद्रवैर्भाव्यं पृथक्पृथक् ॥ ४० ॥
जम्बीराणां द्रवैर्भाव्यं शङ्खाद्यं तत्त्रयोदश ।
सर्वं समाशं च दिनमेकीकृत्य तु गालितम् ॥ ४१ ॥
रक्षयेत्सर्वदा ज्ञेयो नाम्ना च वडवानल. ।
सुवर्णादिमलोहानां रत्नानां जारणे तथा ॥ ४२ ॥

अम्लाद्युपरसाना च योजनीय प्रयत्नत ।

पारदभस्मविधि. ॥

[प्रथम प्रकार ।]

शुद्धसूत शुद्धगन्ध मर्दयेद्गोघृतैस्समम् ॥ ४३ ॥
पिण्डीभूत कुमार्याश्च दलगर्भे निवेशयेत् ।
सम्यक्सूत्रेण सवेष्ट्य तमयस्कान्तसपुटे ॥ ४४ ॥
निरुध्य त मृदुपुटे त्रिधा पाच्य पुन भिये ! ।
आदाय दृढमूषायामन्धयित्वा धमेत्सुधी' ॥ ४५ ॥
भस्मीभवेत्सूतराजो योज्यो योगे रसायने ।

[द्वितीय प्रकार' ।]

छायाशुष्काणि कुर्वीत शाकपकफलानि च ॥ ४६ ॥
मर्दयेदर्कपयसा तेन मूषोदर लिपेत् ।
अर्भप्रसूतगोजातजरायोश्शिखित रज ॥ ४७ ॥
मूषामध्ये क्षिपेत्पश्चात्सूतं गन्धश्च तद्रज ।
क्षिप्त्वा निरुध्य चं धमेद्भस्मीभवति पारद ॥ ४८ ॥

[तृतीय' प्रकार' ।]

वन्ध्या कार्कोटकी काकतुण्डी च कटुतुम्बिका ।
कचुकी नलिका काकमाची वै कालमञ्जरी ॥ ४९ ॥
काकजघास्त्विमास्सर्वा पिष्ट्वा मूषान्तरे क्षिपेत् ।
पूर्वोक्तवन्ध्यामुख्याभिरष्टाभिर्मर्दयेद्रसम् ॥ ५० ॥
तद्रस लिप्तमूषाया क्षिप्त्वा रुध्वा च मूधरे ।
पचेदेव चाष्टवारमेव मूषाप्रलेपनम् ॥ ५१ ॥

मर्दनं धमनं कुर्याद्भूयो भूयस्सुरेश्वरि ! ।
मृतो भवति सूतेन्द्रो योग्यो रोगे रसायने ॥ ५२ ॥

[चतुर्थः प्रकारः ।]

नियामकौषधैर्गर्भं चतुर्यामं रसं दृढम् ।
द्विगुणे गन्धतैले च शनैर्मन्दाग्निना पचेत् ॥ ५३ ॥

यावद्खोटत्वमाप्नोति तावदेवं पचेद्रसम् ।
तत्खोटं सपुटे लौहे क्षिप्त्वा रुन्ध्याद्दृढं सुधी. ॥५४॥

पथ्याजलैर्लोहकिट्ट पिष्ट्वा सम्पुटमालिपेत् ।
तस्योर्ध्वं श्रावके काच कृत्वा नाग विनिक्षिपेत् ॥५५॥

स नागो द्रवते यावत्तावदेवं घमेत्प्रिये ! ।
यावन्न याति काठिन्य तावन्नैव घमेत्सुधी ॥ ५६ ॥

पुन कठिनता प्राप्ते घमेत्पूर्वोक्तवन्मुहु ।
त्रियामघमनादेवं भस्मीभवति पारद ॥ ५७ ॥

भस्मीकृते मूलिकाभिर्जारणारहितो रस ।
देहे लोहे न योज्यस्याद्योज्यो भेषजकर्मणि ॥ ५८ ॥

[पञ्चम प्रकार ।]

द्विगुणे गन्धतैले च शुद्धसूतं विमर्दयेत् ।
एकाह त पुनर्मर्द्यं सर्पाक्षीभृङ्गराडपि ॥ ५९ ॥

विष्णुक्रान्ता ज्यहं चैषा रसैश्चश्लक्ष्णं विमर्दयेत् ।
पचेद्यन्त्रे त्रिसप्तेह्नाष्टवारमिति प्रिये ! ॥ ६० ॥

कुर्याद्रसति सूतेन्द्रो रोगसघातनाशन. ॥

[षष्ठ प्रकार ।]

श्वेताकोलस्य मूलोत्थरसैर्मर्द्यस्त्र्यह रस ॥ ६१ ॥

मूषायां निक्षिपेद्रुध्वा पचेद्भूधरयन्त्रके ।
पारदो भस्मतां याति सर्वरोगहरः परः ॥ ६२ ॥

[सप्तमः प्रकारः ।]

विष्णुक्रान्तां वेदिकां च काञ्जिकेन विमर्दयेत् ।
तत्कल्केन रसो मर्द्यस्सप्तधा मूर्च्छितोत्थितः ॥ ६३ ॥

तं रसं शावके क्षिप्त्वा सिद्धयेच्चन्द्रसैर्मुहुः ।
दीपाग्निना दिनं पच्याद्भस्म स्याल्लवणाकृतिः ॥ ६४ ॥

[अष्टमः प्रकारः ।]

काकोदुंबरिकाक्षीरैर्भावयेत्सोमरामठम् ।
पुनः पुनस्सप्तधैवं शोषयेन्मर्दयेत्सुधीः ॥ ६५ ॥

काकोदुम्बरपञ्चाङ्गं षोडशांशो जले क्षिपेत् ।
यथैकांशोऽवशिष्टस्स्यात्तेन तद्धिङ्गु मर्दयेत् ॥ ६६ ॥

तद्गोलके रसं क्षिप्त्वा मूषायां तं च रोधयेत् ।
भूधरे च पुटेदेवमष्टवारं पुनः पुनः ॥ ६७ ॥

पुटे पुटे च तद्धिङ्गु दद्यात्सूतो मृतो भवेत् ।

[नवमः प्रकारः ।]

उलूकस्य बीजानि तथाऽपामार्गजानि च ॥ ६८ ॥

पूर्णयेत्तच्च मूषाया क्षिप्त्वा सूतं ततः क्षिपेत् ।
तदूर्ध्वं पूर्वचूर्णं च सम्यङ्मूषां निरोधयेत् ॥ ६९ ॥

पचेल्लघुपुटैरेवं चतुर्भिर्भस्मता व्रजेत् ।

[दशमः प्रकारः ।]

कुड्डुहुन्च्या. कन्दमध्ये कान्तासत्यपरिप्लुते ॥ ७० ॥

रसं क्षिप्त्वा मुखं रुध्वा तन्मज्जकल्कतस्सुधीः ।
तं गोमयैस्समालिप्य स्वेदयेद्गोमयाग्निना ॥ ७१ ॥

एवं कृते सप्तवारं रसो भस्मत्वमाप्नुयात् ।

[एकादशः प्रकारः ।]

अंकोलस्य शिफानीरैस्सूतं गन्धं समं समम् ॥ ७२ ॥

दिनमेक मर्दयेच्च मूषागर्भं निरोधयेत् ।
पुटेद्भूधरयन्त्रे च दिनान्ते भस्म जायते ॥ ७३ ॥

[द्वादशः प्रकारः ।]

सूतं धान्याभ्रकं तुल्यं मारकौषधिजै रसैः ।
मर्दयेद्दिनमेकं तु तत्कल्कैर्वस्त्रलेपनम् ॥ ७४ ॥

तद्वस्त्रं वर्तिकां कृत्वा धृत्वा दंशेन दीपयेत् ।
तद्द्रुतिं पतितां कांस्ये कृष्णवर्णं च तद्भवेत् ॥ ७५ ॥

तत्पुनर्मारकैर्मर्द्यं पातनायन्त्रके पचेत् ।
मृतो भवेद्दिनैकेन तद्भस्माखिलरोगहृत् ॥ ७६ ॥

[त्रयोदशः प्रकारः ।]

कालधुत्तूरतैलेन मर्दनीयश्च पारदः ।
ततो नियामकैर्मर्द्यादिनैकं कूर्मयन्त्रके ॥ ७७ ॥

पाचयेद्भस्मतां याति शुभ्रस्स्यात्सर्वरोगहा ।

[चतुर्दशः प्रकारः ।]

शुद्धसूतार्धभागं शुद्धं गन्धं विमर्दयेत् ॥ ७८ ॥

मारकौषधजैर्द्रावैर्दिनं मूषागतं पचेत् ।
यन्त्रे भूधरसंज्ञे च दिनेनैकेन भस्मति ॥ ७९ ॥

[पञ्चदश. प्रकारः ।]

सूतमभ्रं वटक्षीरैस्त्रियाम मर्दयेत्रिये ।।
सूपागर्भे विनिक्षिप्य करीषाग्नौ दिनं पचेत् ॥ ८० ॥

भस्मीभवति सूतेन्द्रश्चाभ्रसर्वार्तिनाशन ।

[षोडशः प्रकारः ।]

मुखीकृते वासिते च पारदे समकाञ्चनम् ॥ ८१ ॥

जारयेत्पूर्वयोगेन ततो गन्धं सम क्षिपेत् ।
दिव्यौषधिद्रवैर्मर्द्यं दिनं मूषाधृतं रसम् ॥ ८२ ॥

दिवानक्तं करीषाग्नौ पचेद्वा तुषवह्निना ।
स्वेदयेत्तं समुद्धृत्य मूयो दिव्यौषधोद्भवै ॥ ८३ ॥

बीजैस्समाक्षैस्समर्द्यं चतुर्यामं सुरेश्वरि ! ।
वज्रमूषागतं धान्यं भस्मीभवति पारदः ॥ ८४ ॥

तद्वत्तं दिव्यं युञ्जीत सदा रोगे रसायने ।

[सप्तदश. प्रकारः ।]

खजीर्णे पारदे स्वर्णं सममम्लेन मर्दयेत् ॥ ८५ ॥

पिष्टीभूतं काञ्जिकेन प्रक्षाल्यादाय तां पुनः ।
पिष्ट्यर्धं शुद्धगन्धं च तदर्धं टङ्कणं क्षिपेत् ॥ ८६ ॥

सर्वतुल्या निशा नारीपुष्परक्तद्रवैर्दिनम् ।
मर्दयेत्ता दिनान्ते च कुर्याच्चद्गोलकं ततः ॥ ८७ ॥

पचेद्गजपुटान्ते च दिनं मन्दाग्निना सुधी ।
समादाय विचूर्ण्यैव दत्वा तत्समगन्धकम् ॥ ८८ ॥

गर्भयन्त्रे त्र्यहं पाच्यं लघुना तत्तुषाग्निना ।
रसो भस्म भवेद्देवि ! निरर्थस्याद्रसायनम् ॥ ८९ ॥

[अष्टादशः प्रकारः।]

कर्षमेयं शुद्धसूतं कर्षं ताम्ररजः प्रिये!।
अम्लैस्संमर्दयेद्दाढं दिनं खल्वे ततो भवेत् ॥ ९० ॥
पिष्टिस्तां क्षालयेत्तोयैस्ततः आदाय निर्मलम्।
माक्षीकसत्वं तत्सर्वं चक्रमर्दच्छद्रवैः ॥ ९१ ॥
त्रिदिनं मर्दयेद्दाढं तां पिष्टिं गर्भयन्त्रके।
तुषाग्निना पचेद्देवि! त्रिदिनं वा दिवानिशम् ॥ ९२ ॥
करीषाग्नौ भवेत्सूतमस्य रोगजरापहम्।

[एकोनविंशः प्रकारः।]

सूतं स्वर्णं व्योमसत्वं समं स्वर्णसमं विडम् ॥ ९३ ॥
रम्भादण्डद्रवैस्सर्वं तत्खल्वे मर्दयेद्दिनम्।
ततो दिव्यौषधोद्भूतैर्बीजैस्तुल्यं दिनद्वयम् ॥ ९४ ॥
सह संमर्दयेद्भ्भातोयैस्तद्गर्भयन्त्रके।
पूर्वकर्मेण विपचेद्रसगर्भं भवेच्छुभम् ॥ ९५ ॥
जरामरणरोगघ्नं सर्वसिद्धिप्रदायकम्।

[विंशः प्रकारः।]

रसेन्द्रं विमलासत्वं तुल्यं मर्द्यं दिनत्रयम् ॥ ९६ ॥
सिन्दुवारच्छदरसैः पिष्टिस्स्यात्तां विनिक्षिपेत्।
काचकूप्यन्तरे कूपीं सप्तमृत्कर्पटैर्लिपेत् ॥ ९७ ॥
शोषयेद्वालुकायन्त्रे दिनं मन्दाग्निना पचेत्।
रसगर्भं भवेद्दिव्यं रुग्जरामरणापहम् ॥ ९८ ॥

[एकविंशः प्रकारः।]

कर्षद्वयं रसेन्द्रं च तदर्धं शुद्धगन्धकम्।

माक्षीकसत्वे गन्धाशं तत्सर्वं मर्दयेद्दिनम् ॥ ९९ ॥
निर्गुण्डीपत्रसारैश्च त गोल निक्षिपेदिमये ! ।
मूषामध्ये ततो मूषावक्त्रं रुध्वा निनिक्षिपेत् ॥१००॥
ता मूषां गड्डुकायन्त्रे पचेन्मन्दाग्निना दिनम् ।
रसभस्म भवेद्दिव्य सिन्दूरारुणसन्निभम् ॥ १०१ ॥
जरामरणरोगघ्न सर्वसिद्धिप्रद शुभम् ।

[द्वाविंशः प्रकारः ।]

पक्वमूषोदरे तुल्यगन्धकान्तरित रसम् ॥ १०२ ॥
तयोश्चतुर्गुण दत्वा काकमाचीरस पुन ।
आच्छाद्य गड्डुकायन्त्रे ता निधाय पचेत्क्रमात् ॥
मृदुमध्यमचण्डाख्यवह्नौ यामचतुष्टयम् ।
ततश्च सर्वरोगघ्न रसभस्म भवेच्छुभम् ॥ १०४ ॥

[त्रयोविंशः प्रकारः ।]

स्नुहीक्षीरै दिन सूत मर्दयेत्तदभावत ।
अम्लवल्ल्या रसैरेव त रस गन्धकैकसगम् ॥ १०५ ॥
गर्भयन्त्रे निनिक्षिप्य पूर्ववद्विपचेद्बुध ।
मृतो भवेद्रससोऽय सर्वरोगहरो भवेत् ॥ १०६ ॥

[चतुर्विंशः प्रकारः ।]

गुञ्जाफल रससम मधुटङ्कणयावकै ।
भृङ्गपत्ररसैर्युक्त दिनमेकं विमर्दयेत् ॥ १०७ ॥
छादित घट्टमूषाया घमयेन्मृदुवह्निना ।
अय रसायनो घृष्यो रसस्याच्छशिसन्निभ ॥१०८॥

[पञ्चविंश प्रकार ।]

सम गन्धरस शुद्ध कीटमारिणिकाद्रवै ।
अजमायेहिमार्योर्वा श्वेताकोलरसेन वा ॥ १०९ ॥

मर्दयेत्त्रिदिन क्षिप्त्वा मृण्मये सपुटे तत ।
दिनमेक करीषाग्नौ तुषाग्नौ वा दिनत्रयम् ॥ ११० ॥

पचेत्ततस्सूतभस्म जायते रुग्जरापहम् ।

[षड्विंश प्रकार ।]

ताम्राभ्रपातनायोगाच्छोधित पारद प्रिये ! ॥ १११ ॥

वज्रभस्म सम हसपादीद्रावैर्विमर्दयेत् ।
दिव्यौषधिभवैर्बीजैर्वज्रमूषान्तर लिपेत् ॥ ११२ ॥

तस्मिन्पूर्वरस क्षिप्त्वा रुध्वाऽथ त्रिदिन पचेत् ।
तुषाग्निना ततोद्धृत्य तत्तुल्य द्रुतपारदम् ॥ ११३ ॥

हसपादीरसैस्सर्वं मर्दयेत्त्रिदिन तत ।
पूर्ववत्त पचेत्सोऽय रसो भस्मति निश्चय ॥ ११४ ॥

जरामरणरोगघ्नस्सर्वसिद्धिप्रदश्शुभ ।

[सप्तविंश प्रकार ।]

वासित पारद कर्षमष्टगुञ्ज सुवर्णकम् ॥ ११५ ॥

मृतवज्र चतुर्गुञ्ज मर्द्य हसपदीरसे ।
तप्तखल्वे वज्रमूषागत कृत्वा निरोधयेत् ॥ ११६ ॥

पचेद्भूधरयन्त्रे च पुनरादाय त रसम् ।
हसपादीद्रवैर्मर्द्य तप्तखल्वे दिनत्रयम् ॥ ११७ ॥

पूर्ववद्भूधरे यन्त्रे पचेत्त च पुन पुन ।
एव शतपुट कृत्वा भस्म स्याद्रक्तवर्णकम् ॥ ११८ ॥

जरामरणदारिद्र्यनाशनं भवनाशनम् ।

[अष्टाविंश. प्रकारः ।]

युगांशशुद्धसूतस्यादेकांशं ताम्रचूर्णकम् ॥ ११९ ॥
अम्ले दिनं मर्दयेत्तं प्रक्षाल्यादाय पिष्टिकाम् ।
ताप्यसत्वं पिष्टिसमं चक्रमर्दंदलद्रवैः ॥ १२० ॥
मर्दयेत्त्रिदिनं सर्वं गोलकं गर्भयन्त्रके ।
निक्षिप्य त्रिदिन पाच्यं तुषाग्नौ वा सुरेश्वरि ! ॥१२१॥
दिवारात्रं करीषाग्नौ पचेद्धस्म भवेद्रसः ।

[एकोनत्रिंशः प्रकारः ।]

सुखीकृतरसं चाभ्रसत्वं स्वर्णं लयं समम् ॥ १२२ ॥
रंभाद्रवेण सम्मर्द्य दिनं सर्वसमं बिडम् ।
ततो दिव्यौषधीनां च बीजैर्गर्द्यं दिनत्रयम् ॥ १२३ ॥
गर्भयन्त्रे पचेत्पश्चात्करीषाग्नौ मृतो भवेत् ।

[त्रिंशः प्रकारः ।]

खर्जीर्णसूतं विमला समं निर्गुण्डिकारसैः ॥ १२४ ॥
मर्दयित्वा त्र्यहं काचकूपिकायां विनिक्षिपेत् ।
सिकतायन्त्रके पाच्याच्चतुर्यामेन भस्मितं ॥ १२५ ॥

[एकत्रिंश. प्रकारः ।]

ताप्यसत्वं समं गन्धं द्वाभ्यां तुल्यं च जारितम् ।
सूतं निर्गुण्डिकां मर्द्य दिनं तद्गोलकं पुनः ॥ १२६ ॥
वज्रमूषान्वितं कृत्वा धमेद्वा गड्डुयन्त्रके ।
पचेत्तद्रक्तवर्णं स्यात्स रसस्सर्वरोगहा ॥ १२७ ॥

रसभस्मलक्षणम् ॥

अक्षयित्वं निरुत्थत्वं निर्लेपत्वं सुभस्मता ।
मारकत्वं च लोहानां लक्षयेद्रसभस्मतः ॥ १२८ ॥

१. गन्धपिष्टी ॥

[प्रथमः प्रकारः ।]

सञ्चूर्ण्य शोधितं गन्धं धूर्तपत्ररसेन च ।
सप्तधा भावयेद्धर्मे स्त्रीणां च रजसा तथा ॥ १२९ ॥

तथा मानवपित्तेन लोलयेद्गन्धकं पुनः ।
पलमेकं शुद्धरसं कर्परे चातपे न्यसेत् ॥ १३० ॥

तदूर्ध्वं लोलितं गन्धं विन्यस्याङ्गुष्ठमर्दितम् ।
कुर्यात्सूतो भवेत्पिष्टिस्सर्वकर्मसु सिद्धिद. ॥ १३१ ॥

[द्वितीयः प्रकारः— स्वर्णगन्धपिष्टी ।]

गन्धक शोधितं देवि ! तिलपर्णीरसेन च ।
सप्तधा मर्दयेच्छोप्यं छायायां भावयेत्क्रमात् ॥१३२॥

मूषायां पारदं शुद्धं पलमात्रं विनिक्षिपेत् ।
सुवर्णनिष्कगुलिकां मूषायां निक्षिपेत्तत ॥ १३३ ॥

तत्र नारीरजोमूत्रमलमात्रं विनिक्षिपेत् ।
वालुकायन्त्रमध्ये च तां मूषां स्थापयेच्छिवे ! ॥१३४॥

अल्पमल्पं पूर्वगन्धं वारं वारं विनिक्षिपेत् ।
मृद्वग्निना पचेद्यावत्कर्परगन्धं च जीर्यते ॥ १३५ ॥

अवतार्य स्वाङ्गशीतमाहरेत्स्वर्णगोलकम् ।
स्वर्णपिष्टिर्भवेद्दिव्या सर्ववाञ्छितदायिनी ॥ १३६ ॥

[तृतीयः प्रकारः ।]

भावयेन्मर्कटीतोयैश्शतधा शुद्धगन्धकम् ।

छायायां शुद्धसूतं च घर्मे मृत्कर्परे क्षिपेत् ॥ १३७ ॥
किञ्चित्किञ्चित्पूर्वगन्धं निक्षिपेन्मर्कटीरसम् ।
जीर्णे गन्धे द्रवं देयं मुहुर्गन्धं मुहुर्द्रवम् ॥ १३८ ॥
यावत्पादांशकं जीर्णं गन्धं च पिष्टिका भवेत् ।
दिव्या सा सर्वकर्मार्हा देवानामपि दुर्लभा ॥ १३९ ॥

[चतुर्थः प्रकारः ।]

शुद्धगन्धं चूर्णयित्वा त्रिवारं काञ्जिकेन च ।
जम्बीराम्लैस्त्रिवारं च हंसपादीरसेन च ॥ १४० ॥
सप्तधा क्षालयेदेवं कर्पूरं भावयेत्पृथक् ।
श्वेतार्कर्णिकातोयैरातपे च त्रिवारकम् ॥ १४१ ॥
द्विगुञ्जमात्रं कर्पूरं यन्त्रान्तः परिलेपयेत् ।
तत्र गन्धं सार्धनिष्कं भावितं चूर्णितं क्षिपेत् ॥१४२॥
तदूर्ध्वं च पलं सूत निक्षिपेत्तस्य पृष्ठतः ।
पूर्वमात्रं च कर्पूरं तदूर्ध्वं सार्धनिष्ककम् ॥ १४३ ॥
गन्धकं च पुनः क्षिप्त्वा ततो गोमूलकेन च ।
श्वेतार्कर्णिकामूलं पिष्ट्वा तत्कल्ककेन च ॥ १४४ ॥
आच्छाद्य तच्छरावेण रोधयेत्पाचयेत्क्रमात् ।
जालिकायन्त्रमध्ये च दिव्यं पश्चात्समुद्धरेत् ॥ १४५ ॥
एवं कुर्यात्त्रिवारं च गन्धपिष्टिर्भवेद्ध्रुवम् ।

[पञ्चमः प्रकारः ।]

स्नेहलिप्ते खल्वमध्ये शुद्धसूतं पलं न्यसेत् ॥१४६॥
कर्षं च शोधितं गन्धं देवदालीद्रवं क्षिपेत् ।
कराङ्गुल्या खरे घर्मे मर्दयेत्पिष्टिका भवेत् ॥ १४७ ॥

[षष्ठ प्रकारः ।]

ताम्रखल्वे पलं सूतं कर्पार्धं गन्धकं क्षिपेत् ।
मृद्वग्निना पचेद्यामं कराङ्गुष्ठेन चालयेत् ॥ १४८ ॥
गन्धपिष्टिर्भवेद्दिव्या सर्वकर्मकरी शुभा ।

पिष्टीस्तम्भनम् ॥ (२)

पिष्टीनां स्तम्भन वक्ष्ये तिक्तकोशातकीभवम् ॥ १४९ ॥
बीजं चण्डालिनीकन्दं तुल्य कान्तास्तनोद्भवैः ।
क्षीरैः पिष्ट्वा च तां पिष्टीं लेपयेदङ्गुलं दृढम् ॥ १५० ॥
वन्ध्याकन्देऽथवा क्षीरकन्दे वा सूरणोद्भवे ।
कन्दे वा वज्रकन्दे वा कन्दे वा कुडुहुंचिजे ॥१५१॥
तां पिष्टिं निक्षिपेत्तत्तन्मज्जया रोधयेन्मुखम् ।
तत्कन्दं च मृदा लिप्त्वा पुटेद्भूधरयन्त्रके ॥ १५२ ॥
दिवानक्तं करीषाग्निर्वृध्यांघ परिवर्तनम् ।
यथा कन्दं तु न दहेत्तथा पाकक्रमस्स्मृत ॥१५३॥
अथ पिष्टिं समानीयाद्भवेत्सा स्तम्भिता प्रिये ! ।

पिष्टीजारणम् ॥ (३)

पिष्टीनां स्तम्भितानां च जारणा वक्ष्यते शिवे ! ॥
स्तनयन्त्रे लोहकृते गन्धकं पिष्टितुल्यकम् ।
क्षिपेदूर्ध्वं च देवेशि ! स्तम्भिता गन्धपिष्टिकाम् ॥
तदूर्ध्वं पिष्टितुल्यं च गन्धकं चूर्णित क्षिपेत् ।
निरुध्य भूधरे यन्त्रे पाचयेज्जारयेत्क्रमात् ॥ १५६ ॥
गन्धं पुनःपुनर्देयमेवं शतगुणं प्रिये ! ।
जीर्णे शतगुणे गन्धे यन्त्रात्पिष्टिं समाहरेत् ॥ १५७ ॥

सर्वासां गन्धपिष्टीनां जारणं स्याच्च रञ्जनम् ।

पिष्टीमारणम् ॥ (२)

जारितानां च पिष्टीना प्रवक्ष्ये मारणक्रमम् ॥ १५८ ॥

तप्तखल्वे विनिक्षिप्य जारितां गन्धपिष्टिकाम् ।
दिव्यौषधिरसै. पिष्ट्वा दिनं कुर्याच्च गोलकम् ॥१५९॥

दिव्यौषधीनां बीजानि पिष्ट्वा दिव्यौषधोद्भवै· ।
स्वरसैर्वज्रमूषान्तर्लेपयेत्पूर्वगोलकम् ॥ १६० ॥

क्षिप्त्वा निरुध्य मूषास्यं पचेद्भूधरयन्त्रके ।
प्रवर्तयश्चोर्ध्वमधो दिनमेकं पुन· प्रिये ! ॥ १६१ ॥

समाहृत्य यथापूर्वं पूर्वतोयैश्च मर्दयेत् ।
पुटयेत्पूर्ववद्देवि ! दशवारमिति क्रमात् ॥ १६२ ॥

असशय गन्धपिष्टिर्म्रियते सर्वकार्यकृत् ।
गन्धपिष्टिक्रमाज्जातरसभस्मानि भैरवि ! ॥ १६३ ॥

सर्वकर्मसु मुख्यानि विशेषाद्वादकर्मणि ।

रसबन्धाः ॥

[प्रथम प्रकार – वैक्रान्तबन्धः ।]

वक्ष्यामि रसबन्धानि शृणु भैरवि ! सम्प्रति ॥१६४॥

शोधितं पारदं खल्वे दशनिष्क विनिक्षिपेत् ।
निष्कैकं शुद्धगन्धं च स्वल्पं स्वल्पं विनिक्षिपेत् ॥१६५॥

कुट्टयेन्मर्दयेद्भाव्या पिष्टिम्स्यायाममालके ।
क्षीरकन्देऽथवा वन्ध्याकन्दे वा कुड्डहुञ्चिजे ॥१६६॥

कन्दे वा निक्षिपेत्पक्वे शुभे गन्धकपिष्टिकाम् ।
निष्कार्धं भस्म वैक्रान्तमूर्ध्वाधो निक्षिपेत्सुधी ॥१६७॥

तत्कन्दमज्जया वक्त्रं निरुध्य च मृदा बहिः।
बिलम्पेदङ्गुलिमात्रेण शोषयित्वाऽथ सर्वतः॥ १६८॥

अष्टवारं पचेद्यन्त्रे भूधरे कौक्कुटे पुटे।
करीषाग्नौ पुनः कुर्यादूर्ध्वभागमधः प्रिये!॥ १६९॥

अधोभागं तथोर्ध्वं च भूयो भूयः प्रवर्तनम्।
एवमेकदिनं पश्चात्पचेद्युगकरीषकैः॥ १७०॥

पक्वदाडिमबीजाभो बद्धो भवति पारदः।
वैक्रान्तबद्धनामा स्याच्चूर्णितो योगवाहकः॥ १७१॥

[द्वितीयः प्रकारः— गन्धकबन्धः।]

पूर्वोक्तां गन्धपिष्टीं तां वस्त्रे बध्वाऽथ संपुटे।
लोहजे पोट्टलीं स्थाप्य चोर्ध्वाधस्समगन्धकम्॥१७२॥

निरुध्य संपुटं सम्यक् पचेत् भूधरयन्त्रके।
यथा जीर्णो भवेद्गन्धो भूयो भूयस्तथाऽपि च॥१७३॥

एव षड्गुणगन्धस्तु जारणीयो महेश्वरि!।
एवं गन्धकबद्धोऽयं रसस्सर्वामयापहः॥ १७४

[तृतीयः प्रकारः— गन्धकबन्धः।]

षोडशाङ्गुलदीर्घा च जम्बीरफलविस्तृता।
पक्वमूषा दृढतरा चालुकायन्त्रमध्यतः॥ १७५

त्रिभागमग्नां कुर्वीत बहिः पादांशसंस्थिताम्।
तस्यां क्षिपेद्गन्धसूतं पलमेकं सुरेश्वरि!॥ १७६

सूतादथोर्ध्वभागे तु द्विपलं शुद्धगन्धकम्।
निक्षिपेत्तन्मुखं सम्यग्मोधयेन्मन्दवह्निना॥ १७७॥

पचेन्निर्धूमतः यावत्तावद्धूमे गते पुनः।
काकमाचीद्रवैः पूर्यां तद्द्रवे जीर्णता गते॥ १७८

रसेन नागवल्ल्याश्च पूरणीया पुनः प्रिये ! ।
उन्मत्तकरसैः पूर्या शनैर्मन्दाग्निना पचेत् ॥ १७९ ॥

गन्धकं जीर्यते यावत्काकमाच्यादिकद्रवैः ।
धत्तूरान्तैः पचेदेवं बद्धो भवति पारदः ॥ १८० ॥

नाम्ना गन्धकबद्धोऽयं सर्वयोगेषु योजयेत् ।

[चतुर्थः प्रकारः— गन्धकस्वर्णबन्धः ।]

पूर्ववद्गन्धपिष्टिं च विधायाऽऽदौ विचक्षणः ॥१८१॥

सप्तार्धनिष्कसूतस्यादध्यर्धं शुद्धहाटकम् ।
यामम्लेन सम्मर्द्य ख्यातोऽयं हेमपिष्टिका ॥ १८२ ॥

गन्धपिष्टिं हेमपिष्ट्या समयाऽऽवेष्ट्य बाह्यतः ।
स्तनाकारे लोहमये संपुटे वस्त्रबन्धिताम् ॥ १८३ ॥

कृत्वा तां पिष्टिकां क्षिप्त्वा पिष्ट्यूर्ध्वांघश्च गन्धकम् ।
सर्वतुल्यं क्षिपेत्सन्धिं रुध्वाऽम्लरुवर्णैस्सुधीः ॥ १८४ ॥

पचेद्भूधरयन्त्रे च जीर्णे जीर्णे पुनः पुनः ।
षड्गुणं गन्धकं दद्यात्ततो वस्त्रं शनैर्हरेत् ॥ १८५ ॥

समांशं गन्धकं भूयो भूयो जार्यं शनैश्शनैः ।
निर्दोषं गन्धकं नैव कुर्याच्चेत्पारदच्युतिः ॥ १८६ ॥

एवं शतगुणे जीर्णे गन्धपिष्टिं समाहरेत् ।
तत्समांशसुवर्णस्य संपुटे पिष्टिकां क्षिपेत् ॥ १८७ ॥

काचं कन्यादवैः पिष्ट्वा लेपयेद्धाद्यतोऽङ्गुलम् ।
ततश्चक्षणकैर्लिप्त्वा पश्चान्मृल्लवणैः क्रमात् ॥ १८८ ॥

एकैकं लेपनं कार्यं चेष्टयमङ्गुलमानकम् ।
प्रतिलेपं शोषयेच्च कोष्ठीयन्त्रगतं धमेत् ॥ १८९ ॥

वङ्कनालेन तीव्रेण वह्निना प्रहरं भवेत् ।
उदयादित्यसङ्काश खोटं दिव्यरसायनम् ॥ १९० ॥
गन्धहाटकबन्धोऽयं जराव्याधिदरिद्रहा ।

[पञ्चमः प्रकार— गन्धकबन्ध ।]

अथवा गन्धपिष्टिं ता वस्त्रे बध्वाऽथ गन्धकम् ॥
तुल्य दत्वा निरध्याथ सपुटे लोहजे दृढम् ।
पुटेच्चद्भूधरे तावद्यावज्जीर्यति गन्धकम् ॥ १९२ ॥
एव पुन पुनर्देय यावद्गन्धं तु षड्गुणम् ।
इत्येव गन्धके बद्धम्मूतस्स्यात्सर्वरोगजित् ॥ १९३ ॥

[षष्ठ प्रकार— मूलिकाबन्ध ।]

कार्कोटीमूलजैर्द्रावै पारदं मर्दयेद्दिनम् ।
मर्कटीमूलजे पिण्डे क्षिपेत्त मर्दित रसम् ॥ १९४ ॥
त पिण्डं वज्रमूषाया रुध्वा तीव्राग्निना पचेत् ।
जायते खोटबद्धोऽयं सर्वकार्यकरश्शुभ ॥ १९५ ॥

[सप्तम प्रकार— मूलिकाबन्ध ।]

अर्कमूल रविक्षीरै. पिष्ट्वा मूषा प्रलेपयेत् ।
तन्मध्ये रञ्जितं सूत क्षिप्त्वा बध्वाऽथ रोधयेत् ॥
मृण्मये संपुटे तं च निरध्याल्लोहसपुटे ।
पचेद्गजपुटे पश्चात्पारदो बन्धमाप्नुयात् ॥ १९७ ॥

[अष्टम प्रकार— मूलिकाबन्ध ।]

जलकुम्भीरसैस्सूत मर्दयेद्दिवसत्रयम् ।
जलकुम्भीदलैर्मूषा कृत्वा तत्र क्षिपेद्रसम् ॥ १९८ ॥
रुध्वा ता वज्रमूषाया छायाशुष्कं पुटेल्लघु ।

छगणैरेकवृद्ध्या तु त्रिशद्वारं पुटैः पचेत् ॥ १९९ ॥
ततो गजपुटे देयं सम्यग्भद्रो भवेद्रसः ।

[नवमः प्रकारः- मूलिकाबन्धः ।]

एकवीराद्रवैर्मर्द्यं दिनं शुद्धं तु सूतकम् ॥ २०० ॥
एकवीराकन्दकल्कैर्वज्रमूषां प्रलेपयेत् ।
तस्यां पूर्वरसं क्षिप्त्वा ध्माते बद्धो भवेद्रसः ॥२०१॥

[दशमः प्रकारः- मूलिकाबन्धः ।]

आरक्तक्षीरकन्दोत्थद्रवैस्त्रीस्तन्यसंयुतैः ।
त्रिदिनं पारदं मर्द्यं वज्रकन्दद्रवैस्त्र्यहम् ॥ २०२ ॥
क्षीरकन्दस्य कल्केन वज्रमूषां प्रलेपयेत् ।
तत्र पूर्वरसं बध्वा(दत्वा) ध्माते बद्धो भवेद्रसः ॥२०३॥

[एकादशः प्रकारः- मूलिकाबन्धः ।]

अर्कमूलफलं पिष्ट्वा मूषां तेन प्रलेपयेत् ।
तन्मध्ये निक्षिपेन्मूषां पुङ्खामूलविनिर्मिताम् ॥२०४॥
तन्मध्ये सूतकं क्षिप्त्वा पुङ्खामूलसमुद्भवैः ।
पूरयित्वा रसैर्मूषां निरुध्यात्तन्मुखं दृढम् ॥ २०५ ॥
एवमन्धीकृता मूषां क्षिपेत्सम्पुटमध्यतः ।
ततस्तं लेपयेद्बालुवर्णेन मृदा तथा ॥ २०६ ॥
ततोऽसौ पुटयोगेन सूतो बन्धमवाप्नुयात् ।
राजिकाद्वयमात्रेण चित्रकद्रवसैन्धवैः ॥ २०७ ॥
चूर्णितो भक्षितः प्रातस्सर्वरोगविनाशकः ।

[द्वादशः प्रकारः- मूलिकाबन्धः ।]

कपित्थस्य शिफानीरैर्यामं सूतं विमर्दयेत् ॥ २०८ ॥

अन्यस्यामन्धमूषायां सूतमूषा निरोधयेत् ।
तया धमेत्ततो मूषा यथा सिन्धूरवद्भवेत् ॥ २०९ ॥

एव कृते रसेन्द्रोऽसौ वध्यते नात्र संशय ।
मूषिकाबन्धनं ह्येतद्रसेन्द्रस्य प्रकीर्तितम् ॥ २१० ॥

इत्येते मारितास्सूता मूर्च्छिता बन्धमागता ।
प्रत्येक योजितास्वल्प प्रयोगैर्योगवाहिन ॥ २११ ॥

रसमूर्च्छनाविधिः ॥

[प्रथम प्रकार ।]

अथ शुद्धस्य सूतस्य मूर्च्छनाविधिरुच्यते ।
मेघनादवचाहिङ्गुलशुनैर्मर्दयेद्रसम् ॥ २१२ ॥

पंदिन पिष्ट तु तद्गोल हिङ्गुना वेष्टयेद्बहि ।
पचेल्लवणयन्त्रस्थ दिनेक चण्डवह्निना ॥ २१३ ॥

ऊर्ध्वलग्न समादाय दृढ वस्त्रेण बन्धयेत् ।
ऊर्ध्वाधो गन्धक तुल्य दत्वा सोमानले पचेत् ॥२१४॥

जीर्णे गन्ध पुनर्देय षड्भिर्वा रैस्सम समम् ।
षड्गुणे गन्धके जीर्णं मूर्च्छितो रोगहा भवेत् ॥२१५॥

[द्वितीय प्रकार ।]

गन्धक धूमसार च शुद्ध सूत सम समम् ।
यामैक चूर्णयेत्खल्वे काचकुप्या निवेशयेत् ॥२१६॥

रुध्वा द्वादशयामान्त वालुकायन्त्रके पचेत् ।
स्फोटयेत्स्वागशीत तमूर्ध्वस्थ गन्धकं त्यजेत् ॥२१७॥

अधस्थ रसमादाय सर्वयोगेषु योजयेत् ।

[तृतीयः प्रकारः ।]

शुद्धसूतं तथा गन्धं सूतार्धं सैन्धवं क्षिपेत् ॥ २१८ ॥
द्रवैस्सितजयन्त्याश्च मर्दयेद्दिवसत्रयम् ।
कृत्वा गोलं तु संशोष्य मूषायां तं निरोधयेत् ॥२१९॥
शोषयित्वा धमेत्किञ्चित्सुतप्तेऽथ जले क्षिपेत् ।
तस्माद्रसं समुद्धृत्य त्रिकन्दरसभावितम् ॥ २२० ॥
योजयेत्सर्वरोगेषु धमेद्वा भूधरे पचेत् ।

[चतुर्थः प्रकारः ।]

रसार्धं गन्धकं गर्वं घृतैर्युक्तं तु गोलकम् ॥ २२१ ॥
कृत्वा तद्बन्धयेद्वस्त्रे डोलायन्त्रगतं पचेत् ।
गोमूत्रे तद्धृतं यामं नरमूत्रैर्दिनत्रयम् ॥ २२२ ॥
शोषयेत्तत्पुनर्यस्त्रैर्बध्वा वेष्टयं मृदा दृढम् ।
शुष्कं निरुध्य मूषायां पचेदर्धं सुपाग्निना ॥ २२३ ॥
ऊर्ध्वमागमधः कृत्वा त्वधोभागमथोर्ध्वगम् ।
इत्यादिपरिवर्तेन स्वेदयेद्दिवसत्रयम् ॥ २२४ ॥
पश्चादुद्धृत्य तं सूतं योगवाहं रुजापहम् ।
सद्योजातस्य बालस्य विष्ठां पालाशबीजकम् ॥ २२५ ॥
चण्डालीरुधिरं सूतं सूतपादं च टङ्कणम् ।
जयन्त्या मर्दयेद्दुग्धैर्दिनमेकं तु गोलकम् ॥ २२६ ॥
पिष्टया सहदेव्याऽथ लेपयेत्ताम्रसम्पुटम् ।
तन्मध्ये गोलकं क्षिप्त्वा द्वियामं स्वेदयेल्लघु ॥ २२७ ॥
वालुकायन्त्रमध्ये तु समुद्धृत्य ततः पुनः ।
चिलकैस्सहदेव्या च गन्धकं लेपयेद्बहिः ॥ २२८ ॥

सम्पुटं बन्धयेद्वस्त्रे मृदा लेप्यं च शोषयेत् ।
तं रुध्वा चान्यमूषायां ध्माते सम्पुटमाहरेत् ॥२२९॥

सूक्ष्मचूर्णं हरेद्रोगान्योगवाहो महारसः ।
सम्पुटं सूततुल्यं स्याच्छास्त्रदृष्टेन कर्मणा ॥ २३० ॥

[पञ्चमः प्रकारः ।]

धुत्तूरकद्रवैर्मर्द्यं दिनं गन्धांशसूतकम् ।
अन्धमूषागतं स्वेद्यं भूधरे मूर्च्छितो दिनात् ॥२३१॥

[षष्ठः प्रकारः ।]

कृत्वा षडङ्गुलां मूषां सुपक्वां मृण्मयीं दृढाम् ।
मूषागर्भे विलिप्याथ मूलैर्वर्तुलपत्रजैः ॥ २३२ ॥

तन्मध्ये सूतकं क्षिप्त्वा मूषां पूर्यात्तु तद्द्रवैः ।
रुध्वा तां वालुकायन्त्रे चुल्यां दीपाग्निना पचेत् ॥

सप्ताहान्ते समुद्धृत्य योजयेत्तं जरापहम् ।

[सप्तमः प्रकारः ।]

कुरण्डकरसैस्सान्द्रमातपे मर्दयेद्रसम् ॥ २३४ ॥

लताकरञ्जपत्रोत्थैः पादांगुष्ठेन मर्दयेत् ।
दिनैकं मूर्च्छितं सम्यक् सर्वयोगेषु योजयेत् ॥२३५॥

[अष्टमः प्रकारः ।]

कांसीसं सैन्धवं सूतं तुल्यं तुल्यं विमर्दयेत् ।
कांसीसस्याप्यभावे तु दातव्या फुल्लतूरिका ॥ २३६ ॥

स्तोकं स्तोकं क्षिपेत्खल्वे लयमेकत्र मूर्च्छयेत् ।
प्रत्येकं शतनिष्कं स्याद्दृनं नैवाधिकं क्वचित् ॥ २३७ ॥

स्थालीसम्पुटयन्त्रेण दिनं चण्डाग्निना पचेत् ।
ऊर्ध्वलग्नं ततश्शुभ्रं मूर्च्छितं चाहरेच्छुभम् ॥ २३८ ॥

[नवमः प्रकारः ।]

अथ शुद्धस्य सूतस्य मूर्च्छितस्यापरो विधिः ।
सूततुल्यं मृतं स्वर्णं द्वाभ्यां तुल्यं च गन्धकम् ॥
रविक्षीरैर्दिनं मर्द्यमन्धयेद्भूधरे पुटे ।
दिनैकेन भवेत्सिद्धो रसो हैरण्यगर्भकः ॥ २४० ॥

शुभ्रश्शोणोऽथवा कृष्णवर्णो गुरुतरो रसः ।
पुनरुत्थानवान्यस्तु मूर्च्छितस्स उदाहृतः ॥ १४१ ॥

मूलिकाबन्धाः ॥

भैरवी—

[1]कीदृशी ओषधी नाथ ! रसमूर्च्छाकरी शुभा ।
केन वा भस्म सूतश्च केन वा खोटबन्धनम् ॥२४२॥

भैरवः—

शृणु भैरवि ! तत्त्वेन रहस्यं रसबन्धनम् ।
अल्पविष्णुसुरेन्द्राद्यैर्न ज्ञातं सुरवन्दिते ! ॥ २४३ ॥

[निशाचरमूलिकाकल्पः ।]

गङ्गायमुनयोर्मध्ये प्रयागो नाम राक्षसः ।
तस्यासने(न्ने) वरारोहे ! क्षणाद्भस्येत सूतकः ॥२४४॥

---

1. इत आरभ्य चतुर्विंशोल्लासावधिर्भागो रसार्णवे १२–१५ पत्रैनैव पाठेनोपलभ्यते । परं अत्रानुपलब्धाः केचन श्लोका रसार्णवे लभ्यन्ते ; ये क्वचिद्भावपोषणाय अर्थविशदनाय क्वचित् संभाविपोहनाय चावश्यमनुसन्धेया इति तत्तत्स्थलेऽद्भुतेन पृष्ठस्याधस्तन्त्र तन्यन्ते । मुख्याश्च पाठभेदास्तत्र तत्र ( ) मुद्रया दीयन्ते ॥

निशाचरस्य पत्राणि गृह्णीयात्साधकोत्तमः ।
ततो निपीड्यते देवि ! रसो भवति चोत्तमः ॥२४५॥
रसं सम्मर्द्य तेनैव दिनानि त्रीणि वार्तिकः ।
आरोटं बन्धयेत्क्षिप्रं गगनं तत्र जारयेत् ॥ २४६ ॥
तेन पत्ररसेनैव साधयेद्गन्धकं पुनः ।
सप्तधा भावितं तेन व्यूषणेन सहैकतः ॥ २४७ ॥
यन्त्रे विद्याधरे देवि ! गगनं तत्र जारयेत् ।
मासमात्रेण देवेशि ! जीर्यते तु समं समम् ॥२४८॥
समजीर्णे तु गगने शतवेधी भवेद्रसः ।
निशाचररसे देवि ! गन्धकं भावयेच्छतः ॥ २४९ ॥
भावयेत्सप्तवारं तु द्विपद्याश्च रसेन तु ।
तारस्य पत्रलेपेन अर्धार्धं काञ्चनोत्तमम् ॥ २५० ॥
गन्धके समजीर्णेऽस्मिन्शतवेधी भवेद्रसः [1] ।
निशाचररसैर्भाव्यं सप्तवारं तु तालकम् ॥ २५१ ॥
तेनैव घातयेद्वङ्गं ना(व)ग तारे तु निर्वहेत् ।
तत्तारं जारयेत्सूते तत्सूतं बन्धितं भवेत्[2] ॥ २५२ ॥

---

1 पुनस्तं गन्धकं दत्वा पत्रलेपे रविं हरेत् ।
त रविं तारमध्ये तु त्रिगुणं वाह्ययेत्ततः ॥
हेमार्धं मिलितं हेम मार्तण्डसमतां व्रजेत् ।
पुनस्तं गन्धकं साक्षाद्द्रावयित्वा द्रुतं कुरु ॥
रसेन्द्रं मर्दयेत्तेन गतदेहं तु कारयेत् ।
लेपमात्रेण तेनैव कुष्ठान्यष्टादश त्रियेत् ॥
अर्शो भगन्दरं लूतां शिरोरोगांश्च नाशयेत् ।

2. लेपमात्रेण तेनैव चतुष्पष्टितनुर्भवेत् ।

चतुष्पष्टितमे भागे शुल्ववेधं तु दापयेत् ।
तदंशं(त्तारं) जायते श्रेष्ठं धर्मकामार्थमोक्षदम् ॥ २५३ ॥

निशाचरस्य पुष्पाणि सूक्ष्मचूर्णानि कारयेत् ।
पलानि दशचूर्णस्य रसैर्धान्यास्तु भावयेत् ॥ २५४ ॥

घृतेन मधुनाऽऽलोड्यं नवभाण्डे विनिक्षिपेत् ।
धान्यराशौ निधातव्यं त्रिसप्ताहं सुरेश्वरि ! ॥ २५५ ॥

तेन भक्षितमात्रेण वलीपलितवर्जितः ।
वल्कलं सूक्ष्मचूर्णं तु मधुना सहितं लिहेत् ॥ २५६ ॥

अर्धमासप्रयोगेण प्रत्ययोगं(क्षोड्यं) भवेत्प्रिये ! ।
तस्य मूत्रपुरीषेण शुल्वं भवति काञ्चनम् ॥ २५७ ॥

मासमालप्रयोगेण पन्नगः काञ्चनं भवेत् ।
ग्राह्यं तत्फलतैलं तु यन्त्रे पातालसंज्ञके ॥ २५८ ॥

तेन तैलेन देवेशि ! रसं संकोचयेद्बुधः ।
तत्क्षणाज्जायते देवि ! पाटबन्धो महारसः ॥ २५९ ॥

फटकं कङ्कणं कार्यं रसलिङ्गं वरानने ! ।
संकोचमरणं तेन कर्तव्यं परमाद्भुतम्[1] ॥ २६० ॥

[अङ्गनायिकाकल्पः ।]

पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम् ।

---

1. निशाचररसे क्षिप्तं सप्तवारं तु भास्करम् ।
कालिकारहितं तेन जायते कनकप्रभम् ॥

सत्तारेण समं वाह्यं तेन सिक्तं तु वापितम् ।
दशांशं वेधयेत्सूतं दश पीतं शतेन च ॥

शतं वेधयते लक्षं सहस्रं कोटिवेधकम् ॥
दशांशं कोटिवेधि स्यात्कोटिवेधि समेन च ।

त्रैलोक्यजननी या सा ओपधी अङ्गनायिका ॥२६१॥

तया संपर्कमात्रेण बद्धस्तिष्ठति पारदः ।
सप्ताहं मर्दितस्यास्य महौषध्या रसै रसः ॥ २६२ ॥

शतांशेनैव वेधेन कुरुते दिव्यकाञ्चनम् ।
त्रिसप्ताहं रसे तस्या मर्दनाद्वरवर्णिनि ! ॥ २६३ ॥

लक्षवेधी रसस्साक्षादष्टौ लोहानि विध्यति ।
त्रिसप्ताहेन देवेशि ! दशलक्षाणि विध्यति ॥ २६४ ॥

चतुर्थे चैव सप्ताहे कोटिवेधी भवेद्रसः ।
स्वेदतापनिघर्षेण महौषध्या रसेन तु ॥ २६५ ॥

ददाति खेचरीं सिद्धिमनिवारितगोचरः ।
कामयेत्कामिनीनां तु सहस्रं दिवसान्तरे ॥ २६६ ॥

नष्टच्छायो ह्यदृश्यश्च त्रैलोक्यं च भ्रमेदसौ ।
महौषध्या रसेनैव मृतसंजीवनं भवेत् ॥ २६७ ॥

अनेन घातयेत्सूतं पश्चावस्थं कुरु प्रिये ! ।
मृतस्य दापयेन्नस्यं हस्तौ पादौ तु मर्दयेत् ॥ २६८ ॥

तस्य तु प्रविशेज्जीवो मृतस्यापि वरानने ! ।

[नरसारकल्पः ।]

पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम् ॥ २६९ ॥

नर(क)सारस्पर्शनेन क्षणाद्बध्येत सूतकः ।
नर(क)साररसं दत्त्वा द्विपदीरजसा रसे ॥ २७० ॥

दिनान्ते बन्धमायाति सर्वलोहानि रञ्जति ।
नर(क)सारसेनैव भावयेत्तु मनश्शिलाम् ॥ २७१ ॥

निर्गन्धा जायते सा तु घातयेत्तेन पन्नगम् ।
द्विपदीरजसा सार्धं निरुद्ध. पन्नगो भवेत् ॥ २७२ ॥

नर(क)साररसेनैव जीर्णं षड्गुणपन्नगे ।
तारे तामेऽपि वा देवि ! कोटिवेधी भवेद्रसः ॥२७३॥

नरसाररसे स्तन्ये भाविते सप्तधा पृथक् ।
रसस्य दापयेद्ग्रासं यन्त्रे विद्याधराह्वये ॥ २७४ ॥

जीर्यते गगनं देवि ! निर्मुखे च वरानने ! ।
नर(क)साररसेनेशि ! कौटमारीरसेन च ॥ २७५ ॥

द्रावयेद्गगनं देवि ! तीक्ष्णलोहं च पन्नगम् ।
नर(क)साररसेनेशि ! हनुमत्या रसेन च ॥ २७६ ॥

जायते काञ्चनं दिव्यं निषेकाद्भास्करः प्रिये ! ।
नर(क)साररसे दत्वा मञ्जिष्ठां रक्तचन्दनम् ॥ २७७ ॥

खरसैर्मर्दयन्त्याश्च पन्नगं देवि ! सेचयेत् ।
तत्क्षणात्काञ्चनं दिव्यं सप्तवारा निषेचितम्[1] ॥२७८॥

अष्टमांशयुतं हेम हेमकर्मणि चौषधम् ।
नर(क)साररसे भाव्यं सप्तवारं तु हिङ्गुलम् ॥२७९॥

तेनैव घातयेत्तीक्ष्णं भस्मीभूतत्वमाप्नुयात् ।
तद्भस्म ताम्रपिष्टं तु त्रिगुणं तेन निर्वहेत् ॥ २८० ॥

तच्छुल्वं हेमसङ्काशं तारे चाऽष्टांशयोजितम् ।
तारं हेमसमांशं तु द्विवर्णं पतितं भवेत् ॥ २८१ ॥

नर(क)साररसे भाव्यं रसकं सप्तवारतः ।
नर(क)साररसेनैव रवेन्द्रं सप्तवारत. ॥ २८२ ॥

तं रसं रसकं चैव तीक्ष्णलोहं च पन्नगम् ।
नर(क)साररसेनैव तेनैकत्र विमर्दयेत् ॥ २८३ ॥

---

1. रविघृष्टं तु तं देवि ! पन्नगं त्रिगुणं प्रिये ! ।
तच्छुल्वं तारसङ्काशं तारपञ्चांशयोजितम् ॥

तत्क्षणाज्जायते बद्धो रसस्य रसकस्य च ।
तीक्ष्णनागं तथा शुल्बं रसकेन तु रञ्जयेत् ॥ २८५ ॥
हठात्तज्जायते हेम कूष्माण्डकुसुमप्रभम् ।

[कङ्कालखेचरीकल्पः ।]

पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम् ॥ २८६ ॥
कङ्कालखेचरी नाम्ना ओषधी परमेश्वरि ! ।
तस्य तैलं तु संग्राह्यमाद्य(मार्घ)खेचरिसंयुतम् ॥२८७॥
स्थापयेद्दिनमेकं तु पात्रे भास्करनिर्मिते ।
द्वितीये वासरे प्राप्ते वज्ररत्नं तु घातयेत् ॥ २८८ ॥
अनले धामयेत्त तु सुतप्त प्रज्वलत्प्रभम्[1] ।

[मन्त्रसिंहासनीकल्पः ।]

सबीजा चौषधी ग्राह्या काचिद्गुल्मलता प्रिये ! ॥
मन्त्रसिंहासनी नाम तृतीया देवि ! खेचरी ।
पातालयन्त्रे तत्तैलं गृह्णीयात्ताम्रभाजने ॥ २९० ॥
तस्य तैलस्य मध्ये तु प्रक्षिपेत्खेचरीरसम् ।
मेदिनीयन्त्रमध्ये तु स्थापयेच्च वरानने ! ॥ २९१ ॥

---

1 कङ्कालखेचरीतैले वज्ररत्नं निषेचयेत् ।
दशवारं निषिक्तं तु भस्मसारं हि जायते ॥
तद्देहपक्वबीजं तु तेन भस्मसमं कुरु ।
त्रिभागं टङ्कणं दत्वा अन्धमूषागतं धमेत् ॥
तत्क्षणान्मिलति द्वन्द्वं वज्ररत्नं च काञ्चनम् ।
चन्द्रहेम वरारोहे समं जारयते यदि ॥
कोटिवेधी रसो देवि ! लोहान्यष्टौ च विध्यति ।
पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम् ॥

पूर्वौषध्यां तु तद्देवि ! गगनं मेदिनीजले ।
रसे मा(आ)सं ततो दत्वा मर्दनाद्गोलकं कुरु ॥२९२॥

बध्वा पोट्टलिकां तेन गगनं जारयेत्प्रिये ! ।
समे तु गगने जीर्णे बद्धस्तिष्ठति पारदः ॥ २९३ ॥

भस्त्राभ्रत्कारयुक्तेन धाम्यमानो न नश्यति ।
काकविष्ठासमं रूपं समजीर्णस्य जायते ॥ २९४ ॥

द्विगुणे गगने जीर्णे द्यष्टलोहानि संहरेत् ।

[इरिन्दिरीकल्पः ।]

पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम् ॥ २९५ ॥

शिवदेहात्समुत्पन्ना ओषधी तु इरिन्दिरी ।
जारयेद्बन्धकं सा तु जारयेत्साऽपि तालकम् ॥२९६॥

काञ्चनं जारयेत्सा तु रसेन्द्रं सा च बन्धयेत् ।
प्रवालं द्रावयेत्सा तु द्रावयेद्गगनं तथा ॥ २९७ ॥

वङ्गं च घातयेत्सा तु सर्वसत्वं च घातयेत् ।
जारयेत्सर्वलोहानि सत्वान्यपि च जारयेत् ॥ २९८ ॥

इरिन्दिरीरसे न्यस्य गोशृङ्गे तु वरानने ! ।
धान्यराशौ निधातव्यं द्रुतस्तिष्ठति पारदः ॥ २९९ ॥

दिव्यौषध्या रसेनैव रसेन्द्रस्तुरवन्दिते ! ।
समे तु कनके जीर्णे दशकोटिं तु वेधयेत् ॥ ३०० ॥

पञ्चमे लक्षकोटिं तु षड्गुणे स्पर्शवेधकः ।
सप्तमे धूमवेधी स्यादष्टमे त्ववलोकनः ॥ ३०१ ॥

नवमे शब्दवेधी स्यादत ऊर्ध्वं न विद्यते ।
भ्रमन्ति पशवो मूढाः धुलौषधिविवर्जिताः ॥ ३०२ ॥

तृणौषधिरसाना च नैव सिद्धि प्रजायते ।
तस्मात्सर्वप्रयत्नेन ज्ञात्वा तु कुत्रौषधि ॥ ३०३ ॥

दिव्यौषध्यश्चतुष्पष्टि. कुलमध्ये व्यवस्थिता ।
नैव जानाति मूढात्मा शिवमोहेन मोहिता ॥ ३०४ ॥

यदिव्यास्तु तृणौषध्यो जायन्ते गिरिगह्वरे ।
तृणौषध्या रसे सूतो नैव बद्धः कदाचन ॥ ३०५ ॥

अक्षयो नैव निष्टेत कुलौषधिविवर्जितः ।
कुलौषध्या विहीनास्तु गगन चारयन्ति ये ॥ ३०६ ॥

स रसस्तु वरारोहे! वह्निमध्ये न तिष्ठति ।
न स्फोटं न च वा भस्म नैव द्रव्यं करोति स ॥

किंचिद्द्रव्य प्रदुर्वन्ति धाम्यमान न तिष्ठति ।
परे पक्के क्वथे चैव नैव तिष्ठति काञ्चनम् ॥३०८॥

न वेधं च शतार्द्धं करोति स रस प्रिये ! ।
यावन्न चाब्द(धद्ध)मेकं तु विक्रान्त(क्रीतं)वपु (नतु) काञ्चनम् ॥

धर्मार्थकाममोक्षेषु नैव दद्यात्तन प्रिये ! ।

श्रीभैरवी—

निर्जीवत्य गतसूत कथं जीवं ददाति स ॥ ३१० ॥

निर्जीवेन तु निर्जीवं कथं जीवति शंकर ।

श्रीभैरवः—

दिव्यौषध्या यदा देवि ! रसेन्द्रो मर्दितो भवेत् ॥

कालिकारहितस्सूतस्तदा भवति पार्वति ! ।
परस्परहरते कालं कालिकारहितो रस ॥ ३१२ ॥

अष्टानां चैव लोहाना मङ्गं शमयति क्षणात् ।
महामूर्च्छागतं सूत को वा विकथयेन्मृतम् ॥ ३१३ ॥

दिव्यौषध्या रसेनैव जायते नष्टचेतन ।
पञ्चभूतात्मकम्सूतम्तिष्ठत्येव सदाशिव ॥ ३१४ ॥

[क्षमापालकल्प ।]

पुनरन्य प्रवक्ष्यामि रसबन्धनमीश्वरि ! ।
क्षमापालेन हरेद्वज्रं अनेनैव तु काञ्चनम् ॥ ३१५ ॥
वज्रभस्म हेमभस्म तद्वा एकत्र बन्धयेत् ।

[अन्ये कुलमूलिकाकल्पा ।]

निशाचररसे जार्यं नरजीवेन जारयेत् ॥ ३१६ ॥

त सूत मारयेद्धन्द्रे ! जागरिर्दिव्य ओषधि ।
भक्षितस्स रसो येन सोऽपि साक्षात्सदाशिव ॥३१७॥

भक्षिते तोरकैकेन स्पर्शवेधी भवेन्नर ।
प्रस्वेदात्तस्य गात्रस्य अष्टौ लोहानि काञ्चनम् ॥३१८॥

लक्षवर्षसहस्राणि स जीवेत्साधकोत्तम ।
प्रस्वेदात्तस्य गात्रस्य रसराजश्च बध्यते ॥ ३१९ ॥

अजापनि कृष्णतेजा क्षणाद्ध्नाति सूतकम् ।
जागरीस्पर्शनाद्देवि ! क्षमापालेन च बध्यते ॥ ३२० ॥

तुरु(वज्र)वल्ल्या रसेनैव भावित गगन प्रिये ! ।
जारयेद्वालुकायन्त्रे खोटो भवति तत्क्षणात् ॥ ३२१ ॥

द्रु(मृ)तगोलकमापैक मापैक हेमगोलकम् ।
एकीकृत्य तु सम्मर्द्य लुङ्गाम्लेन दिनत्रयम् ॥ ३२२ ॥

कर्षैक नागपत्राणि रसकल्केन लेपयेत् ।
वेष्टयेद्वृश्चिकार्ली च तत्पिण्ड लेपयेत्तत ॥ ३२३ ॥

मारयेत्पन्नग देवि ! शङ्खगोपनिभ भवेत् ।
कर्षैकं तारपर्णानि मृतनागेन लेपयेत् ॥ ३२४ ॥

लेपयेद्धूश्चिकाक्रीमं च तत्पत्र लेपयेत्तत ।
तत्तार म्रियते देवि ! सिन्दूरारुणसन्निभम् ॥ ३२५ ॥

सहस्राशेन तेनैव शुल्ववेधं प्रदापयेत् ।
जायते कनक दिव्य देवाभरभूषणम् ॥ ३२६ ॥

क्षीरयुक्ता बहुफला ग्रन्थियुक्ता च पार्वति[1] ।
नाम्ना वर्तुलपत्राणि शस्यते रसबन्धने ॥ ३२७ ॥

एकसार कन्दकल्के मूकमूषागत रसम् ।
धमेन्मुखानिलैर्बद्धो भक्षणाय प्रशस्यते ॥ ३२८ ॥

रक्तकञ्चुकिकन्द तु स्त्रीस्तन्येन तु पेषितम् ।
मूषाया पूर्वयोगेन कुरुते सूतबन्धनम् ॥ ३२९ ॥

धूश्चिकापत्रिकाबीज नारीक्षीरसमन्वितम् ।
धमयेत्पूर्ववत्सूत भक्षणार्थाय वार्तिक ॥ ३३० ॥

चक्रकन्द समादाय रस मध्ये विनिक्षिपेत् ।
गजेन्द्राख्य पुट दद्यात्ससुधा बन्धता नयेत् ॥ ३३१ ॥

भक्षयेत्त रस प्राज्ञप्पण्मासादमरो भवेत् ।
लाङ्गलीकन्दमादाय कर्कोटीकन्दमेव च ॥ ३३२ ॥

रस तन्मध्यग कृत्वा स्वेदयेन्मर्दयेत्पुन ।
म्रियते नात्र सन्देहो ध्मातस्तीव्रानलेन तु ॥ ३३३ ॥

शुकचञ्चुगत सूत पुटयेद्धामयेत्तत ।
शताश्वेधकर्ताऽय देहसिद्धिकरो भवेत् ॥ ३३४ ॥

हसपादीरस सूत शुष्ककन्दोदरे क्षिपेत् ।
गजेन्द्रपुटत दद्यान्म्रियते नात्र सशय ॥ ३३५ ॥

सहस्रवेधकर्त्ता च जायते नात्र संशयः ।
हंसांघ्रिं शुक्लचन्द्रुं च गृहीत्वा मर्दयेद्रसम् ॥ ३३६ ॥
क्रौञ्चपादोदरे क्षिप्त्वा ततो दद्यात्पुटत्रयम् ।
म्रियते नात्र सन्देहो लक्षवेधी महारसः ॥ ३३७ ॥

[तृणज्योति-कल्पः ।]

तृणज्योतिरिति ख्यातां शृणु दिव्यौषधिं प्रिये ! ।
निशा तु प्रज्वलेन्नित्यं नाह्ना ज्वलति पार्वति ! ॥
तस्य मूले तु संक्षिप्ते क्षीरं रक्तं भवेत्क्षणात् ।
तन्मूलरसगन्धैर्मातुलुङ्गाम्लपेषितैः ॥ ३३९ ॥
शुल्बपत्रं विलिप्तं तु भवेद्धेम पुटत्रयात् ।
तन्मूलचूर्णसंयुक्तो रसराजस्सुरेश्वरि ! ॥ ३४० ॥
मातुलुङ्गरसे घृष्टमभ्रकं चरति क्षणात् ।

[उच्चाटाकल्पः ।]

अथोच्चाटा प्रवक्ष्यामि रसबन्धकरीं प्रिये ! ॥ ३४१ ॥
एकमेव भवेन्नालं तस्या रोमप्रवेष्टनम् ।
तस्याग्रे च भवेत्पुष्पं शुकतुण्डस्य सन्निभम् ॥ ३४२ ॥
तत्पत्राणि च देवेशि ! शुकपिञ्छनिभानि च ।
तत्कन्दं कूर्मसंस्थानं क्षीरं सिन्दूरसन्निभम् ॥ ३४३ ॥
जलं स्रवेन्मधूच्छिष्टे तत्समादाय पार्वति ! ।
वेधयेत्सर्वलोहानि काञ्चनानि भवन्ति च ॥ ३४४ ॥
रसतालकतुत्थानि मर्दयेदुच्चटारसैः ।
आतपे म्रियते तप्तो रसो दिव्यौषधीबलात् ॥ ३४५ ॥
वेधयेत्सर्वलोहानि लक्षांशेन वरानने ! ।

आवर्तित भवेद्यावज्जायतेऽर्कसमप्रभम्[1] ॥ ३४६ ॥

[रक्तस्नुहीकल्पः ।]

रस रक्तस्नुहीक्षीर कुनटी गन्धकाभ्रकम् ।
दरद चैव लोहानि सहस्रांशेन वेधयेत् ॥ ३४७ ॥
स्नुहीक्षीरं समादाय निशाचूर्णेन वेष्टयेत्[2] ।
घुटिकीकृत्य तेनैव नागं विध्यति तत्क्षणात् ॥ ३४८ ॥

[स्थलपद्मिनीकल्प' ।]

अथातस्थलपद्मिन्या दिव्यौषध्या विधि शृणु ।
पद्मिनीसदृशा पत्रै पुष्पैरपि च तादृशी ॥ ३४९ ॥
भङ्गे चैव स्रवेत्क्षीर रक्तवर्णा सुशोभना ।
आक्रम्य वामपादेन पश्येद्गगनमण्डलम् ॥ ३५० ॥
पश्येच्च तारकायुक्त ग्रहनक्षत्रमण्डलम् ।
लक्षयोजनतो देवि ! सा ज्ञेया स्थलपद्मिनी ॥३५१॥
तस्या पञ्चाङ्गमादाय हरगौरीसमन्वितम् ।
मनश्शिलातालयुक्तं माक्षिकेण समन्वितम् ॥ ३५२ ॥
मर्दयेत्सप्तरात्रं तु तेन शुल्बञ्च वेधयेत् ।
सहस्रांशेन देवेशि ! विद्ध भवति काञ्चनम् ॥३५३॥
तस्या पञ्चाङ्गनादाय पूर्वोक्तविधिना प्रिये ! ।
चारयेत्सूतराज तु मूकमूषागत धमेत् ॥ ३५४ ॥

---

1. अथातस्तिलतैलेन पाचयेच्च दिनत्रयम् ।
तथा शुल्बस्य पत्राणि वेध्य जारूनदं भवेत् ॥

2 स्नुहीक्षीर समादाय निशार्धं हेम चोभयम् ।
कुनटीं गन्धचूर्णं च सर्वमेकत्र मर्दयेत् ॥
अनेनैव प्रकारेण निशार्धं हेम शोधयेत् ।

म्रियते मूषिकामध्ये संकोचेन न संशयः ।
तेनैव सर्वलोहानि सहस्रांशेन वेधयेत्[1] ॥ २५५ ॥

[चित्रककल्पः ।]

चित्रकस्य यथा गुह्यं कथयामि समासतः ।
त्रिविधश्चित्रको ज्ञेयः कृष्णो रक्तो रसायनम् ॥२५६॥
शुक्लो व्याधिप्रशमनश्रेष्ठमध्यकनीयसाः ।
कृष्णं रक्तं सितं चाऽपि हेमन्ते नोद्धरेद्बुधः ॥२५७॥

कृष्णचित्रकमुत्पाट्य गोभिर्नाघ्रातमीश्वरि ! ।
क्षीरमध्ये क्षिपेत्क्षीरं कृष्णवर्णं भवेत्क्षणात् ॥ २५८ ॥

तस्य पञ्चाङ्गचूर्णेन पारदं सह मर्दयेत् ।
धमेच्च मूकमूषायां खोटो भवति तत्क्षणात् ॥ २५९ ॥

रक्तांबरधरो भूत्वा रक्तमाल्यानुलेपनः ।
कृष्णपक्षे तु पञ्चम्या रक्तमाल्योदनेन तु ॥ २६० ॥

बलिं दत्वा महादेवि ! रक्तचित्रकमुद्धरेत् ।
रक्तचित्रकचूर्णेन वङ्गं पाचै(स्तापै)स्त्रिभिस्त्रिभिः ॥

सर्वदोषविनिर्मुक्तस्तम्भमायाति तत्क्षणात् ।
तन्मूले सूतकं ताम्रं कुंकुमतैलसेचनात् ॥ २६२ ॥

---

1. [कुमुदिनीकल्पः ।]

अथातस्संप्रवक्ष्यामि कुमुदिन्या निधिं प्रिये ! ।
भित्त्वा काश्मीरिपाषाणे पूर्णिमायां तु कारयेत् ॥
तस्याः पञ्चाङ्गमादाय भावयेत्तु मनश्शिलाम् ।
सर्पदे धारयित्वा तु भावयेत्तु पुनः पुनः ॥
सर्पदे द्रावितं नागं तत्कल्केन युतं कुरु ।
काश्मीरद्रवतुल्यं हि जायते कनकं ध्रुवम् ॥

एकविंशतिवारेण शुद्धं शुल्वं भविष्यति ।
रक्तचित्रकभल्लातैललिप्तं पुटेन तु ॥ ३६३ ॥
चन्द्रार्कपत्र देवेशि ! जायते दिव्यकाञ्चनम् ।
नागिनीकन्दसूतेन्द्ररकचित्रकसंयुतम् ॥ ३६४ ॥
पत्रलेपप्रतीवापैश्चन्द्रार्कं काञ्चनं भवेत्[1] ।

[ज्योतिष्मतीतैलकल्पः 1]

ज्योतिष्मतीतैलविधिं वक्ष्यामि शृणु पार्वति ! ॥३६५॥
ज्योतिष्मती नाम लता या च काञ्चनसन्निभा ।
चल्लीवितानबहुला हेमवर्णफला शुभा ॥ ३६६ ॥
आषाढपूर्वपक्षेऽस्या गृहीत्वा बीजमुत्तमम् ।
तिलवत्क्वाथयित्वा वा हस्तपादैरथापि वा ॥ ३६७ ॥
तस्यास्तैलं समादाय कुम्भे ताम्रमये क्षिपेत् ।
स्थापयेद्भूगतं कुम्भं क्रमादूर्ध्वंतुपाग्निना ॥ ३६८ ॥
षण्मासे तु व्यतिक्रान्ते स घटः काञ्चनं भवेत् ।
तामं हेमसमं कृत्वा तैलमाक्षीकमिश्रितम् ॥ ३६९ ॥
प्रतिवापेन सि(निषि)ञ्चेत्तद्धेम ताम्रसमं भवेत् ।
तथा च शतवेधी स्याद्विद्यारत्नमनुत्तमम् ॥ ३७० ॥

[दग्धरुहाकल्पः 1]

दग्धरुहां प्रवक्ष्यामि रसबन्धकरीं प्रिये ! ।
स्पर्शौषधीति सा ज्ञेया सर्वकामार्थसाधनी ॥ ३७१ ॥
शस्त्रच्छिन्ना महादेवि ! दग्धा सा पावकेन तु ।
प्ररोहति क्षणाद्दिव्या दग्धा सा तु महौषधी ॥३७२॥

---

1. रक्तचित्रकसंयुक्तो रसोऽपि सर्वदो भवेत् ।

रक्तं पीतं सितं कृष्णं तस्याः पुष्पं प्रजायते ।
चणकस्येव पत्राणि सुप्रसूतानि लक्षयेत् ॥ ३७३ ॥
सा स्थिता गोमतीतीरे गङ्गायामर्बुदे गिरौ ।
उज्जयिन्या दक्षिणतो वनान्तेषु च दृश्यते ॥ ३७४ ॥
तस्याः कन्दरसं दिव्यं कृष्णराजीसमन्वितम् ।
ताम्बूलेन समं कृत्वा गुटिकां कारयेद्बुधः ॥ ३७५ ॥
सर्वेषामेव लोहानां द्रुतानां वह्निमध्यतः ।
सहस्रं वेधयित्वा तु काञ्चनं कुरुते क्षणात् ॥ ३७६ ॥
तथैव म्रियते सूतः कान्तहेमाभ्रसंयुतः ।

[कटुतुम्बीकल्पः ।]

कटुतुंबी तु विख्याता देवि ! दिव्यौषधिं शृणु ॥
तस्या बीजानि सङ्गृह्य सूक्ष्मचूर्णं तु कारयेत् ।
एकविंशतिवाराणि भाव्यं धात्रीरसेन च ॥ ३७८ ॥
पयसा सह तेनैव विश्वभेषजसंयुतम् ।
बीजं यन्त्रे विनिक्षिप्य तैलं संगृह्य पिण्डितः ॥३७९॥
रसं मूर्च्छापयेत्तेन चक्रमर्देन मर्दयेत् ।

[लोहदण्डकल्पः ।]

गोपित्तं शिग्विपित्तं च काक्षीकासीससंयुतम् ॥३८०॥
तारतुल्यानि चैतानि सर्वेषां सूतकं समम् ।
मेषशृङ्गे निधातव्यं मासमेकं निरन्तरम् ॥ ३८१ ॥
लोहदण्डेन संसिक्तं सर्वलोहानि वेधयेत् ।
गन्धकं लोहदण्डेन एकविंशतिभावितम् ॥ ३८२ ॥

युक्त लोहदुले(मने)नैव जम्बीररससयुतम् ।
सबीज सूतकोपेतमन्धमूषानिवेशितम् ॥ ३८३ ॥
भूगत मासमेक तु तार काञ्चनता नयेत् ।
दलस्य भागमेक तु तारपञ्चाशमेव च ॥ ३८४ ॥
शुल्व च पञ्चभाग च बीजस्यैक च योजयेत् ।
एते द्वादशभागास्युम्सर्वं तद्धारयेत्क्षतौ ॥ ३८५ ॥
स्थानस्यास्य निषेक तु सुदण्डेन तु कारयेत् ।
पञ्चविंशदिनान्ते तु जायते कनकोत्तमम् ॥ ३८६ ॥

[क्षीरकन्दकल्प ।]

क्षीरकन्दविधिं वक्ष्ये सर्वसिद्धिकर तथा ।
चतुर्वर्ण विध तत्र रक्तकन्द प्रशस्यते ॥ ३८७ ॥
भग्नमेतत्स्रवेत्क्षीरं रक्तवर्णं सुशोभनम् ।
मेघानाद तु निनादेन सञ्जातैरुपशोभितम् ॥ ३८८ ॥
पत्रेस्नुहीसमैस्स्निग्धैस्समभिर्हेमसत्प्रभै ।
बन्धन रसराजस्य सर्वसत्त्ववशकरम् ॥ ३८९ ॥
तस्य क्षीर तु सङ्गृह्य तार निर्वाहयेद्बुध ।
घमेद्धठाग्निना चैव जायते हेम शोभनम् ॥ ३९० ॥
तिन्तिणीपत्रनिर्यासमीषत्ताम्ररजोयुतम् ।
मर्दयेत्पारद प्राज्ञो रसबन्धो भविष्यति ॥ ३९१ ॥
तोयमध्ये विनिक्षिप्य गुलिका वज्रवद्भवेत् ।

[शाकवृक्षकल्प ।]

शाकवृक्षस्य देवेशि । निष्पीड्य रसमुत्तमम् ॥३९२॥

रक्तचन्दनसंयुक्तं सर्वलोहानि जारयेत् ।
[1]मिलन्ति सर्वलोहानि द्रवन्ति सलिलं यथा ॥३९३॥

गन्धकं रसकं ताप्यं पारदं रक्तचन्दनम् ।
रुद्रन्त्या रससंयुक्तं तारमायाति काञ्चनम् ॥ ३९४ ॥

शाकवृक्षस्य निर्यासं यत्नतः परिगालयेत् ।
शिग्रुमूलस्य चूर्णं तु तद्रसेन तु मर्दयेत् ॥ ३९५ ॥

प्रलिप्तशुल्बपत्राणि पुटेत्क्षिप्त्वा विपाचयेत् ।
तद्द्रुतं काञ्चनं दिव्यं भवेल्लक्षणसंयुतम् ॥ ३९६ ॥

फलानि शाकवृक्षस्य परिपक्वानि संगृह्येत् ।
तद्रसेन तु संप्राज्य. सप्तरात्रं तु भावयेत् ॥ ३९७ ॥

तद्रसेन समायुक्तं मञ्जिष्ठामिश्रितं तथा ।
लेपयेत्ताम्रपत्राणि ध्मातं भवति काञ्चनम्'॥ ३९८ ॥

[देवदालीकल्पः ।]

देवदाल्या महौषध्या विधिं वक्ष्याम्यतः परम् ।
सा श्वेता व्याधिशमने कृष्णा पीता रसायने ॥३९९॥

पौर्णमास्यां त्रयोदश्यां राहुग्रस्ते दिवाकरे ।
अथवा कृष्णपक्षंम्यामिमां विधिवदुद्धरेत् ॥ ४०० ॥

देवदालीफलं देवि ! विष्णुकान्तां च सूतकम् ।
मूर्च्छयेद्बन्धयेत्क्षिप्रं शुल्वं हेम करोति च ॥ ४०१ ॥

देवदालीफलं मूलमीश्वरीरसमेव च ।
तोयेन मर्दितं कृत्वा वङ्गं स्तम्भयति क्षणात् ॥४०२॥

---

1 गन्धपाषाणगन्धेन आयसे विनियोजयेत् ।

[श्वेतगुञ्जाकल्पः ।]

अथातस्संप्रवक्ष्यामि श्वेतगुञ्जाविधिं प्रिये ! ।
कृष्णपक्षे चतुर्दश्यामष्टम्यां च सुरार्चिते ! ॥ ४०३ ॥

कपाले मृत्तिकां न्यस्य सेचयेत्सलिलेन तु ।
बीजानि सितगुञ्जायाः पुष्ययोगे तु वापयेत् ॥ ४०४ ॥

वक्ष्यमाणेन योगेन कुर्यात्संग्रहणं तथा ।
ओं नमो भगवति श्वेतवल्लि श्वेतपर्वतवासिनि ! ॥
सर्वकार्याणि कुरु कुरु अप्रतिहतं नमो नमस्स्वाहा[1] ।

शुद्धगुल्वं तु संगृह्य मूषामध्ये तु संस्थितम् ॥४०६॥

त्रिपञ्चपलसंख्या तु कर्षार्धसितगुञ्जया ।
सहैकत्र भवं तारं तस्य गन्धविवर्जितम् ॥ ४०७ ॥

अम्लरीतिसमायुक्तं गुञ्जाचूर्णं सहैकतः ।
देवीनां भूषणं देवि ! जायते हेम शोभनम् ॥ ४०८ ॥

[कर्तरीरसबन्धः ।]

अथातस्संप्रवक्ष्यामि कर्तरीरसबन्धनम् ।
असुराणा समायोगे क्रोधाविष्टेन चेतसा ॥ ४०९ ॥

सुदर्शनं महाचक्रं प्रेषितं सुरवैरिणा ।
भालपट्टाच्चतस्तस्य निपेतुस्स्वेदबिन्दवः ॥ ४१० ॥

ते भूमौ पतिता दिव्यास्सञ्जाताः कर्तरीरसः ।
रक्षार्थं स्थापितं तत्र विष्णुना च सुदर्शनम् ॥ ४११ ॥

चक्रतुल्यं भ्रमत्येतदायुधानि निकृन्तति ।
कुरुते गर्जनं नादं धूमज्वालां विमुञ्चति ॥ ४१२ ॥

---

1. अनेन मनुना प्रोक्ता सिद्धिर्भवति नान्यथा ।
पण्मासेन तथा बल्ली मन्त्रपूतेन रक्षयेत् ॥

कर्तरीदृष्टिमात्रेण तथाऽन्या शब्दकर्तरी[1] ।
लोकाना तु हितार्थाय घोरशक्तिर्व्यवस्थिता ॥ ४२३ ॥

रसरूपा महाघोरा सा सिद्धाना तु वेदिनी
तस्य क्षेत्र यदा गच्छेद्घोरास्त्र जपेत्तदा ॥ ४१४ ॥

पुनर्घोर न्यसेत्तत्र अथान्य(म्त्र) विन्यसेद्बुध ।
अनुलोमविलोमेन दैहेऽधिष्ठाप्य कर्तरीम् ॥ ४१५ ॥

मुद्रया मुद्रयेत्ता तु अघोरास्त्रेण योनिताम् ।
दीप्ते(पे)न रोधयेत्ता तु स्तम्भयेद्धू(धू)पनेन तु ॥

निष्ठया मुद्रया ता तु स्थानयोगेन योजयेत् ।

उदकबन्धा ॥

[चन्द्रोदकबन्ध ।]

अथ चन्द्रोदकेनेशि । वक्ष्यामि रसबन्धनम्[2] ॥४१७॥

दृष्ट्वा चन्द्रोदक मन्त्री पौर्णमास्या विशेषत ।
ग्रहण तत्र कर्तव्यं पौर्णमास्या प्रयत्नत ॥ ४१८ ॥

निर्गच्छति मही भित्वा चन्द्रवृद्ध्या तु वर्धते।
क्षेत्रबन्ध पुरा कृत्वा देवमभ्यर्च्य शङ्करम् ॥ ४१९ ॥

चतुर्दश्या तु तत्क्षेत्र पूजयित्वा विचक्षण ।

---

1 सा स्पर्शकर्तरी छायाकर्तरी धूमकर्तरी ।
सा ज्वालाकर्तरी चैव शान्तिघोरस्य कर्तरी ॥

2 शुक्लपक्षे पौर्णमास्या दृष्ट्वा पूर्णेन्दुमण्डलम् ।
निर्गच्छन्ति मही भित्वा चन्द्रतोयान्यनेकधा ॥

कानिचिन्मृत्तिवर्णानि रसेन लक्षणानि तु ।
कानिचिच्चन्द्रतुल्यानि व्योमाभासानि कानिचित् ।
चन्द्रवृद्धाऽभिवर्धन्ते क्षीयेरंस्तत्क्षयेण तु ॥

अहोरात्रोषितो भूत्वा बलि तत्र निवेदयेत् ॥ ४२० ॥

पौर्णमास्या च रात्रौ च गत्वा तस्य समीपत ।
चन्द्रोदक तु सङ्गृह्य मन्त्रयुक्तम्सुमन्त्रितम् ॥ ४२१ ॥

आलोड्य मधुसर्पिर्भ्यां पिबेत्तत्तु समाहित ।
पीतमात्रेण तेनैव मूर्च्छितो भवति क्षणात ॥ ४२२ ॥

चन्द्रोदये तथोत्तिष्ठेत्क्षीर तस्य तु दापयेत् ।
सप्तरात्रप्रयोगेण चन्द्रवन्निर्मलो भवेत् ॥ ४२३ ॥

एकविंशतिरात्रेण जीवेद्वत्सरदिनत्रयम् ।
एकमासप्रयोगेण ब्रह्मायुस्स भवेन्नर ॥ ४२४ ॥

चन्द्रोदकेन गगन रस हेम च मर्दयेत् ।
मूषामध्यगत धमात तत्क्षणाद्वुटिका भवेत् ॥ ४२५ ॥

अय तु स्पर्शमात्रेण लोहान्यष्टो च वेधयेत् ।
तद्रस तु रस चान्य वज्रेण समजारितम् ॥ ४२६ ॥

चतुष्पष्टयशतो विंधेद्द्विगुणेन सहस्रकम् ।
दशसङ्ख्यिकावद्ध गुञ्जामान रस तत ॥ ४२७ ॥

त्रिलोहवेष्टित वक्त्रे धृत्वा चादृश्यता व्रजेत् ।

"ओं नमो रुद्राय दंष्ट्रोत्कटाय विघ्न नाशय नाशय दिशो रक्ष रक्ष रुद्रो ज्ञापयति हु फट् स्वाहा "

इति दिग्बन्धमन्त्र ।

"ओ नमो भगवते रुद्राय त्रिशूलहस्ताय अमृतोद्भव रक्ष रक्ष हु फट् स्वाहा । "

इति पान मन्त्र ॥

[विषोदकबन्धः ।]

अथातस्संप्रवक्ष्यामि विषोदरसबन्धनम् ॥ ४२८ ॥

सितपीतादिवर्णाढ्यं तन्न देवि ! रसोत्तमम् ।
तन्न गत्वाऽचलोद्देशे स्मरेद्घोरं सहस्रकम् ॥४२९॥

केशाः क्षिप्तास्फुटन्त्यस्मिन्नात्मच्छायां न दृश्यते ।
तैलं च गोलकाकारं घृतं तेन विसर्पति ॥ ४३० ॥

गन्धकस्य हरेद्गन्धं पलं लवणायते ।
ज्ञात्वा पलाशपत्रेण कटुकालाबुके क्षिपेत् ॥ ४३१ ॥

विषोदकं गन्धक च हरबीजं च तत्समम् ।
अजाक्षीरेण पिष्ट्वा तु शुल्बपात्रे तु लेपयेत् ॥ ४३२॥

तत्पुटेन भवेद्देवि ! सिन्दूरारुणसन्निभम् ।
शतांशेनैव तद्देवि ! सर्वलोहानि वेधयेत् ॥ ४३३ ॥

अनेन विधिना देवि ! नागस्सिन्दूरतां व्रजेत् ।
सहस्रांशेन तस्यैव तारं भवति काञ्चनम् ॥ ४३४ ॥

रक्तं पीतं तथा कृष्णमुत्तरोत्तरकार्यकृत् ।
त्रिफलाकान्तपात्रे वा पात्रेऽलाबुमयेऽपि वा ॥ ४३५ ॥

गृहीत्वा पूर्वरत्नैः पालाशैर्वेष्टयेद्बहिः ।
स्थापयेद्धान्यमध्ये तु दिवसानेकविंशतिम् ॥ ४३६ ॥

महिषीक्षीरमध्ये तु बिन्दुमेकं तु साधयेत् ।
पायसं भक्षयेद्यस्तु पयोमध्वाज्यसंयुतम् ॥ ४३७ ॥

यावत्पूर्णं बलं देवि ! जीवेत्तद्बिन्दुसंख्यया ।
लाङ्गली गृहधूमश्च सिन्दूरं रजनीद्वयम् ॥ ४३८ ॥

मेषस्य शृङ्गं शृङ्गी च कृष्णोन्मत्ताश्वमारकम् ।
सबीजसूतकं चैव विषतोयेन मर्दयेत् ॥ ४३९ ॥

विषतोयेन मेधावी सप्तवाराणि भावयेत् ।
अथवा भावयेत्तु यावच्चूर्णं तु मर्दयेत् (तद्भवेत्) ॥
तेन नागं मतीवाप्य षोडशांशेन खं(सं)भवेत् ।
मूषास्थं वेणुयन्त्रे च त्रीणि यामानि भावयेत् ॥४४१॥
धूम परिहरेत्तस्य अङ्गल्याधिकरं परम् ।
स्थापयेन्नागसिन्दूरं पात्रेऽलाबुमये च तत् ॥ ४४२ ॥
तच्चूर्णं तु शतांशेन तारताम्रादि वेधयेत् ।
विषपानीयमादाय वङ्गमावर्तित शुभम् ॥ ४४३ ॥
निषिक्त चैव तच्चोयैस्तारं भवति काञ्चनम् ।
विषपानीयमादाय प्रक्षिपेच्च रसोत्तमे ॥ ४४४ ॥
कुनटीगन्धपाषाणविषटङ्कणलाङ्गली ।
नष्टपिष्ट कृतं खल्वे तारपत्राणि लेपयेत् ॥ ४४५ ॥
अन्धमूषागत ध्मात निर्बीज कनक भवेत् ।
ओं ह्रीं नीलकण्ठाय ठ ठ । अस्य अयुत जपेत् ।
इति विषोदकग्रहणपानमन्त्र ॥

[सञ्जीवनीजलकल्प ।]

सञ्जीवनीजलस्याथ विधि वक्ष्यामि पार्वति ! ॥ ४४६ ॥
शुक्रेणाराधितो देवि ! प्रागहे सुरवन्दिते[1] ।
दानवाना हितार्थाय मृताना देवसङ्गरे ॥ ४४७ ॥
मया सञ्जीवनी विद्या दत्ता चोदकरूपिणी ।
तया सञ्जीविता दैत्या ये मृता देवसङ्गरे ॥ ४४८ ॥
निक्षिप्ता मर्त्यलोके सा सम्यक् ते कथयाम्यहम् ।
अस्ति मर्त्या महापुण्या पवित्रा दक्षिणापथे[1] ॥४४९॥

1. नदी गोदावरी नाम प्रसिद्धा जाह्नवी यथा ।

दक्षिणे तु तटे तस्या उत्पली(कदली)नगरं परम् ।
तस्य दक्षिणतश्शैलस्सर्वलोकेषु विश्रुतः ॥ ४५० ॥

नाम्ना कृष्णगिरिश्चेति दृश्यते सर्वमङ्गले ! ।
सुप्रसिद्धाम्बिका नाम ग्रामस्तस्यास्ति सन्निधौ ॥

तलाप्युदकमालोक्य परीक्षेत सुरार्चिते ! ।
गृहीत्वा शुष्कवंशं तु क्षिपेत्तोयस्य मध्यतः ॥ ४५२ ॥

जायते हरितं स्निग्धमहोरात्रेण निश्चितम् ।
मुञ्चत्यङ्कुरपत्राणि दृश्यतेऽतिमनोहरम् ॥ ४५३ ॥

बलिपुष्पोपहारेण ततो देवि ! समर्चयेत् ।
क्षेत्राधिपं गणेशं च चन्द्रं योगिगणं तथा ॥ ४५४ ॥

ॐ चन्द्राय पिनाकिने शूलपाणये ॐ दिशो बन्ध बन्धय दिशो बन्ध बन्धय टः ठः ।

तिलांश्च सर्षपांश्चैव मन्त्रेणानेन सर्षपान् ।
समाभिमन्त्रितान्कृत्वा साधको दिक्षु निक्षिपेत् ॥४५५॥

कटुकालाबुके तोयं कृतरक्षस्समाहितः ।
गृहीत्वा तत्प्रयत्नेन निजं स्थानं समाश्रयेत् ॥ ४५६ ॥

ॐ नमो अमृते अमृतरूपिणि अमृतं स्रुव स्रुव एवं रुद्र आज्ञापयति स्वाहा ।

समाभिमन्त्रितं कृत्वा मन्त्रेणानेन तज्जलम् ।
दिनमेकं तथा सूतं स्वर्णमाषद्वयान्वितम् ॥ ४५७ ॥

मर्दयेत्तेन तोयेन पिबेत्तत्तु विचक्षणः ।
एकविंशतिरात्रं तु क्षीराहारोऽथ यत्नतः ॥ ४५८ ॥

जीवेत्कल्पायुतं साग्रं कामरूपो महाबलः ।
योजनानां शतं गत्वा पुनरेव निवर्तते ॥ ४५९ ॥

अवध्यस्सर्वभूताना स्वेच्छाहारस्स खेचर ।
कनक पारद ०योम सममेकत्र योजयेत् ॥ ४६० ॥

मर्दयेत्तेन तायेन सप्ताह म्वेदयेत्तत ।
स रसस्सर्वलोहानि षष्ट्यंशेन तु वेधयेत् ॥ ४६१ ॥

अथ वा त रस दिव्यं मधुना सह भक्षयेत् ।
मासमात्रप्रयोगेण जीवेद्वत्सरदिनायुतम् ॥ ४६२ ॥

तस्य मूत्रमलस्वेदैश्शुल्ब भवति काञ्चनम् ।
[1]निर्याते तोयमादाय पारद च मनश्शिलाम् ॥४६३ ॥

मर्दयेत्खल्वपाषाणे नष्टपिष्ट भवेत्तत ।
म्वेदयेत्सप्तरात्र तु निलोहेन च वेष्टयेत् ॥ ४६४ ॥

अ तर्धान क्षणाद्गच्छेद्विद्याधरपतिर्भवेत् ।
सिद्धकायशतवृतो यावत्कल्पाश्चतुर्दश ॥ ४६५ ॥

दिनेषु तेषु सर्वेषु दद्याच्छाल्योदन घृतम् ।
पयसा च समायुक्त नित्यमेव च कारयेत् ॥ ४६६ ॥

[उष्णोदककल्प ।]

उष्णोदकविधि वक्ष्ये समाहितमनाश्शृणु ।

---

1 निर्याते तोयमादाय अञ्जलित्रितय पिबेत् ।
पीतमात्रे भवेन्मूर्च्छा स्वास्थ्य स्यान्महरत्रयात् ॥

एकविंशदुदिनान्येव क्षीराहारो भवेत्तत ।
अष्टवर्षाकृति प्राप्त कामरूपो महाबल ॥

पक्वेच्छिद्रा गृहीं सर्वां मज्जपत्रालसयुताम् ।
अवध्यो देवदैत्यानां कल्पायुश्च प्रजायते ॥
अथोदकमादाय पारद च मनश्शिलाम् ।

पश्यत्युष्णोदकं यत्र वासं तत्रैव कारयेत्[1] ॥ ४६७ ॥

शर्वरीमुषितां तत्र चणकान्तु दिने दिने ।
भक्षयेन्मासमात्रं तु जीवेद्वर्षशताष्टकम् ॥ ४६८ ॥

[2]तस्य मूत्रपुरीषेण शुल्वं भवति काञ्चनम् ।
उष्णोदकं च कासीसं गन्धपाषाणसंयुतम् ॥ ४६९ ॥

चतुर्थांशेन रसकं दशभागं विनिक्षिपेत् ।
शुल्वं च मर्दयेत्सर्वं नष्टपिष्टं क्षणेन तु ॥ ४७० ॥

तेन लेपितमात्रेण शुल्वं भवति काञ्चनम् ।
निषिक्तं तेन तोयेन प्रतिवापं ददेद्बुधः ॥ ४७१ ॥

शुल्वं च जायते हेम तरुणादित्यवर्चसम् ।
तारं च तेन मार्गेण निषिक्तं हेमतां व्रजेत् ॥ ४७२ ॥

उष्णोदकेन भक्तानं तिलमुष्टिं च भक्षयेत् ।
मासद्वयमयोगेण जीवेद्वर्षशतत्रयम् ॥ ४७३ ॥

रसगन्धाश्मरसकत्रुत्थं दरदमाक्षिकम् ।
याममुष्णाम्बुना घृष्ट्वा तारपत्राणि लेपयेत् ॥ ४७४ ॥

---

1. अस्ति गोदावरी नाम महाराष्ट्रेऽतिविश्रुता ।
तस्या उत्तरभागे तु सह्याद्रिः पुण्यपर्वतः ॥
तत्र मालापुरं नाम प्रसिद्धं देवतागृहम् ।
तस्मादुत्तरतो देवि ! कम्पाख्यं नगरं परम् ।
तत्र कम्पेश्वरो देवस्तत्रास्त्युष्णोदकं ध्रुवम् ॥
प्रणीतारया नदी तत्र स्नात्वा वै साधवोत्तमः ।
पश्चादुष्णोदके कुण्डे विधिं कुर्याद्यथोदितः ॥

2. वर्षमेकं प्रयुञ्जीत जीवेद्वर्षायुतं सुखी ।
वलीपलितनिर्मुक्तो भोगी चैव पुरन्दरः ॥
वर्षमेकं पिबेत्तोयं जीवेच्चन्द्रार्कतारकम् ।

विश्राम्य तु धमेद्देवि ! स्याच्चतुर्दशवर्णकम् ।
क्रमेणानेन देवेशि ! शुल्वं षोडशवर्णकम् ॥४७५॥

एकैकं हेमतारांशं द्वयं कांताभ्रयोः पृथक् ।
उष्णोदकेन सम्मर्द्य धमनात्खोटतां नयेत् ॥ ४७६ ॥

तं मुखे धारयेन्मासं वज्रकायो भवेत्ततः ।
तच्चूर्णं यवमात्रं तु भक्षयेन्मधुसर्पिषा ॥ ४७७ ॥

यावत्पलं तस्य मलैरशुल्वं भवति काञ्चनम् ।
उष्णोदपाचितान्खादेत्कुलुत्थान्क्षीरपो भवेत् ॥ ४७८ ॥

स्नानमुष्णांभसा कुर्याद्वर्षाद्वर्षाच्छतायुषः ।
क्षीरमुष्णोदक क्वाथं त्रिफलायाश्च पाचयेत् ॥ ४७९ ॥

पाचयेत्पायसं कान्तपात्रे भुक्त्वा महायुषः ।

[शैलोदककल्पः ।]

अतः परं प्रवक्ष्यामि शैलोदकविधिं प्रिये ! ॥ ४८० ॥

कर्दमापो महीशैलशिला चेति चतुर्विधम् ।
कानिचित्क्षणवेधीनि दिनवेधीनि कानि च ॥ ४८१ ॥

पक्षमासादिषण्मासवेधनानि महीतले ।
क्षिप्तं जले यदा काष्ठं शैलीभूतं च दृश्यते ॥४८२॥

बहिरन्तश्च देवेशि ! वेधकं तत्प्रकीर्तितम् ।
हिङ्गुलं हरितालं च गन्धकं च मनश्शिलाम् ॥४८३॥

एषां गन्धापहारं तु कुरुते तच्च वेधकम्[1] ।
अन्यथा चे(वे)ष्टकं देवि तदग्राह्यं निरर्थकम् ॥

---

1. गन्धकं तालकञ्चैव तोयपूर्णे घटे क्षिपेत् ।
यदा तद्बुद्बुदाकारं तदा शैलोदकं भवेत् ॥

श्रीशैले श्रीवनप्रान्ते पर्यङ्काख्ये गिलातले ।
तलस्थं क्षणवेधि स्यालवणं भगवतीतटे ॥ ४८५ ॥

एकाहे वेधकं तत्र गोकर्णे तु दिनत्रयम् ।
भद्रांगे दिनवेधि स्यात्तिलस्थलान्ते त्रिवत्सरम् ॥४८६॥

धरेश्वरे पाक्षिकं स्यात्कर्षापुर्यां दिनैकतः ।
ब्रह्मेश्वरे मासिकं स्याद्व्याघ्रपुर्यां तु वासरम् ॥ ४८७ ॥

अघोरेशे मासिकं स्यात्तिलद्वीपे तथा पुनः ।
दिनमेकं ब्रह्मगिरौ विन्ध्ये तु क्षणवेधकम् ॥ ४८८ ॥

वासरं माल्यवन्ते तु क्षणवेधी तु तत्र च ।
किष्किन्धे पर्वते रम्ये पंपातीरे क्षणोदकम् ॥ ४८९ ॥

तस्य पश्चिमतो देवि ! योजनद्वितये पुनः ।
मूशैलमस्ति तत्रैव त्रिदिनं वेदपर्वते ॥ ४९० ॥

[1]अन्यत्र यत्र यत्रापि ब्रह्मविष्णुशिवोद्भवम् ।
अमृतं तत्र तत्रापि यज्ञीकरणमुत्तमम् ॥ ४९१ ॥

तस्योत्पत्तिं प्रवक्ष्यामि यथा जानाति साधकः ।
महीं समुद्धृतवतो वराहस्य कलेबरात् ॥ ४९२ ॥

यस्त्वेदः पतितस्तस्माज्जातं शैलोदकं परम् ।
तं मुखे क्षणिकं जातं कर्णदेशे तु वासरम् ॥४९३॥

बाहुभ्यां त्र्यहवेधी स्यान्मासवेधी तु पार्श्वयोः ।
षण्मासमपराङ्गे च सर्वं समफलं च तत् ॥ ४९४ ॥

अघोराग्नेय तत्क्षेत्रे रक्षां कृत्वा दिशां बलिम् ।

---

1. महाचले पुरे देव्या. क्षीरक्षेत्रस्य सन्निधौ ।
शैलोदकं कोटिवेधि भुजदेशेऽपि वासरम् ॥
लक्षवेधि नृसिंहस्य नगरे गोकुलाभिधे ।

दत्वा लक्ष जपित्वा तु गृह्णीयादमृत परम् ॥ ४९५ ॥

शरद्ग्रीष्मवसन्तेषु हेमन्ते वा सुरार्चिते ।
आयसे ताम्रपात्रे वा कान्तलोहमयेऽथवा ॥ ४९६ ॥

शिलाऽऽढकमष्टौ तु पल क्षीरस्य निक्षिपत् ।
क्षीरावशेष सकाथ्य त्रिसप्ताह पिबेन्नर ॥ ४९७ ॥

जीवेद्वर्षसहस्र तु वलीपलितवर्जित ।
अथवाऽष्टपल क्षीर परैकेनाम्बुमिश्रितम् ॥ ४९८ ॥

क्षीरावशेष सेवेत पूर्वोक्त लभते फलम् ।
कुलत्थाष्टगुण वारि पचेदष्टावशेषितम् ॥ ४९९ ॥

चतुर्गुणेन तेनाऽऽज्य पाचयेद्घृतशेषितम् ।
लिह्यान्मधुसितोपेत त्रिसप्ताहाद्बृहस्पति ॥ ५०० ॥

द्विरष्टवार्षिकाकारस्सहस्रायुर्नसशय ।
अवशिष्टकुलुत्थ तु पादाशमधुसर्पिषा ॥ ५०१ ॥

भक्षयेत्कर्षमेक तु मासेनायुतजीवित ।
तत्सिद्धतैलेनाभ्यङ्ग मक्षण चैव कारयेत् ॥ ५०२ ॥

पामाविचर्चिकाद्युत्थानि सहसा जयेत् ।
वलीपलितनिर्मुक्तस्सहस्रायुश्च जायते ॥ ५०३ ॥

य पिवेत्प्रातरुत्थाय शैलाम्बु चुलुक पय ।
षण्मासात्स्यात्सहस्रायुर्निर्वलीपलिनश्च स ॥ ५०४ ॥

अथवा सूतक देवि ! वारिणा सह मर्दयेत् ।
मासेनैकेन देवेशि ! नष्टपिष्टिर्भविष्यति ॥ ५०५ ॥

मासमात्र समश्नीयात्स भवेदजरामर ।
अथवा त रस हेम्ना धामयेत्खदिराग्निना ॥ ५०६ ॥

गुलिका सुन्दरी नाम सर्वायुधनिवारिणी ।
कर्ता हर्ता स्वयं सिद्धो जीवेच्चन्द्रार्कतारकम् ॥५०७॥

अथ तेनोदकेनैव क्षीरार्धं पायसं पचेत् ।
मासमात्रप्रयोगेण वलीपलितवर्जितः ॥ ५०८ ॥

पक्त्वा तेनाम्बसा पथ्याप्यष्टिस्त्रीणि शतानि च ।
मधु संयोज्य भाण्डस्थं भूमौ सर्वं निधापयेत् ॥५०९॥

दिने दिने तदेकैकं भक्षयेत्प्रातरुत्थितः ।
वलीपलितनिर्मुक्तो जीवेद्वर्षसहस्रकम् ॥ ५१० ॥

शैलीभूतं कुलुत्थं वा भक्षयेन्मधुसर्पिषा ।
षण्मासात्तु प्रयोगेण जीवेद्वर्षसहस्रकम् ॥ ५११ ॥

कूष्माण्डमादितः कृत्वा यानि कानि फलानि च ।
जले क्षिप्तानि लोहानि शैलभूतानि भक्षयेत् ॥ ५१२ ॥

क्षीराहारश्च जीर्णान्ते वज्रकायो भवेन्नरः ।
तेनोदकेन सम्मर्द्यमभ्रकं क्वाथयेत्प्रिये ! ॥ ५१३ ॥

कटुत्रययुतं खादेज्जीवेद्वर्षसहस्रकम् ।
अथवा रसकर्पैकं तज्जलेन तु मर्दितम् ॥ ५१४ ॥

इक्षुदीफलमध्यस्थं तच्छैलोदकमध्यगः ।
कालेन त्रिगुणेनैव काठिन्यं तस्य जायते ॥ ५१५ ॥

षण्मासं तन्मुखे धार्यं वज्रकायं करोति तत् ।
दशनागसमप्राणो देवैस्सह स मोदते ॥ ५१६ ॥

गृहीत्वा निष्फलां तत्र शैलवारिणि निक्षिपेत् ।
यदा भवति तच्छैलं गृहीत्वा चूर्णयेत्ततः ॥ ५१७ ॥

कान्तजीर्णरसं तेन सार्धं घृतमधुप्लुतम् ।
भक्षयेद्वर्षमेकं तु ततः क्षीराशनो भवेत् ॥ ५१८ ॥

उदयादित्यसङ्काशो मेधावी प्रियदर्शन ।
नीलवुञ्चितकेशश्च जीवेच्चन्द्रार्कतारकम् ॥ ५१९ ॥

पारद हरिताल च शिला माक्षिकमेव च ।
दरद च विष चैव सर्वमेकत्र कारयेत् ॥ ५२० ॥

मर्दयेत्खल्वपाषाणे मातुलुङ्गरसेन तु ।
गोलक कारयित्वा तु वारिमध्ये विनिक्षिपेत् ॥५२१॥

तेन तार च शुल्ब च काचन भवति ध्रुवम् ।
उपयुञ्जीत मासैक वलीपलितवर्जित ॥ ५२२ ॥

सहस्र जीवित तस्य महाबलपराक्रम ।
शैलीभूतहरिद्रा तु तच्चूर्णवापमात्रत ॥ ५२३ ॥

हेमत्व लभते नागो बालार्कसदृशप्रभ ।
शैलोदके विनिक्षिप्य भूशैले कर्दमेऽपि वा ॥५२४॥

ज्ञात्वा कारप्रमाणेन बन्धयेत्पारद तत ।
रक्तक्षारयुत धमत सुवर्णसमसारितम् ॥ ५२५ ॥

शताशेन तु लोहाना सवपा हेमकारकम्[1] ।
द्वितीयसारणा प्राप्य सहस्राशेन विध्यति ॥ ५२६ ॥

त खोट धारयेद्वक्त्रे दिव्यत्व लभते ध्रुवम् ।

[केचन घुटिकायोगा ।]

निचुले ककुभे चैव किंशुके मधुकेऽपि वा ॥५२७॥

इङ्गुदीफलमध्ये वा रज्जनीद्वयमार्द्रके ।
अमृते कन्दके वाऽथ उत्कन्दोपधीषु च ॥ ५२८ ॥

---

1 द्वितीयसारणा प्राप्य भक्षयेन्मधुसर्पिषा ।
तत्काळं चित्तचातना ऊर्ध्वं भवति चानिल ॥
कालज्ञान भवेत्तस्य जीवेदयुतपञ्चकम् ।

विधाय कोटरं तत्र क्षिप्त्वा तेनैव डोलयेत् ।
निफलाव्योषकल्केन वेष्टयित्वा प्रयत्नतः ॥ ५२९ ॥

पादेन कनकं दत्वा पारदं तत्र योजयेत् ।
शैलोदके क्षिपेत्तत्र गुलिका वज्रवद्भवेत् ॥ ५३० ॥

पूर्ववत्सारणा कार्या पूर्ववत्सिद्धिदा भवेत् ।
धार्यमाणा मुखे सा तु सहस्रायुष्करी भवेत् ॥५३१॥

द्वितीयसारणायोगादयुतं वेधयेत्तु सा ।
धार्यमाणा मुखे सैवमयुतायुष्प्रदा भवेत् ॥ ५३२ ॥

तृतीयसारणायोगाज्जायते लक्षवेधिनी ।
तं खोटं धारयेद्वक्त्रे लक्षायुर्जायते नरः ॥ ५३३ ॥

चतुर्थी सारणा देवि ! कोटिवेधी न संशयः ।
कोट्यायुर्जीवितं तस्य खेचरत्वं च लभ्यते ॥ ५३४ ॥

पञ्चभिर्दशकोटिस्यात्षड्भिः कोटिशतं भवेत् ।
यावच्चन्द्रार्कजीवित्वमनन्तबलवीर्यवान् ॥ ५३५ ॥

ददाति सप्तमी चापि सारणा गुलिका परा ।
खेचरी नाम विख्याता भैरवेण प्रचोदिता ॥ ५३६ ॥

यस्तु तद्राजिकामात्रं मासमेकं तु भक्षयेत् ।
वज्रदेहस्स सिद्धस्स्याद्दिव्यस्त्रीजनवल्लभः ॥ ५३७ ॥

क्रीडते खेचरैर्योगैस्स्वेच्छया शिवतां व्रजेत् ।
नानाविधफलाश्चास्या गुटिकां शृणु सुन्दरि ! ॥५३८॥

शुद्धबद्धं रसेन्द्रं तु गन्धके तत्र जारयेत् ।
त्रिगुणे गन्धके जीर्णे तेन हेम तु कारयेत् ॥ ५३९ ॥

कारयेद्रस सूतं तु काञ्चनं तेन सूतकम् ।
तद्रसा सूतके जार्यं रसेन्द्रस्य समे समम् ॥ ५४० ॥

तेन सूतकजीर्णेन वज्ररत्न तु घातयेत् ।
तद्वज्रं जायते भस्म सिन्दूरारुणसन्निभम् ॥ ५४१ ॥

तद्भस्म जारयेत्सूते त्रिगुणे तु सुरार्चिते ! ।
हाटकं सारयेत्तु घुटिका तेन कारयेत् ॥ ५४२ ॥

त्रिलोहावेष्टितं तं तु मुखे प्रक्षिप्य साधक ।
नष्टच्छायो भवेत्सोऽयमदृश्यो देवदानवै [1] ॥ ५४३ ॥

लक्षवर्षसहस्राणि निर्वलीपलितो भवेत् ।
शूलिन शक्तिसयुक्तं रत्नादिगुणभूषितम् ॥ ५४४ ॥

वक्त्रे करे च बिभृयात्सर्वायुधनिवारणम् ।
व्योम माक्षिकसत्व च तारं तामं सुरायुधम् ॥ ५४५॥

सारलोह सूतकं च रत्नादिगुणभूषितम् ।
घुटिका सा वरारोहे ! मधुरत्रयसंयुता ॥ ५४६ ॥

वक्त्रस्था नाशयेत्साक्षात्पलितं नात्र सशय. ।
शिवश्शक्तिश्च देवेशि ! रत्नानि सितगोनसा ॥५४७॥

हेम तारं तथा भानुस्समभागानि कारयेत् ।
स्त्रीरजो व्याघ्रमध्यस्थ पद्मसूत्रेण वेष्टयेत् ॥ ५४८ ॥

सि(त्रि)तयेन तथा वेष्टयं गुह्यस्थाने निवेशयेत् ।
रणे राजकुले द्यूते दिव्ये कामे जयो भवेत् ॥५४९॥

वैकान्ताभ्रककान्त तु सस्यकं तु सुरायुधम् ।
विशीतकादिसमूलकाजिकम्य समं भवेत् ॥ ५५० ॥

समावर्त्य ततस्सूते योजयेत्पादयोगत. ।
कुमारीरसङ्गृष्टा कृतैषा घुटिका शुभा ॥ ५५१ ॥

---

1 तत्क्षणाद्वेधयेद्देवि ! सर्वलोहानि काञ्चनम् ।

रोगमृत्युजरा हन्ति वक्तूस्था नात्र संशयः ।
पञ्चतारं वरारोहे ! सूतकद्वयमेव च ॥ ५५२ ॥

त्रयो गगनभागास्युरेकैकं हेमकान्तयोः ।
अर्धं शुल्वं विभागेन गुलिकाऽमरसुन्दरी ॥ ५५३

अक्षयो ह्यजरश्चैव भवेत्तेन महाबलः[1] ।
भस्म सूतपलैकं च मृतकान्तपलं तथा ॥ ५५४ ॥

माक्षिकस्य पलं चैव शिलाजतु पलं तथा ।
पलमेकं विडङ्गस्य पथ्याचूर्णपलं तथा ॥ ५५५ ॥

एकीकृत्य तु तत्सर्वं मध्वाज्येन तु पेषयेत् ।
गुलिकाः कारयेत्तेन षष्ट्याऽधिकशतत्रयम् ॥ ५५६

एकैका भक्षयेन्नित्यं वर्षमेकं निरन्तरम् ।
जीवेद्वर्षशतायुस्स यथा रुद्रो महाबलः ॥ ५५७ ॥

[केचन रसायनकल्पाः ।]

अत परं प्रवक्ष्यामि रसभस्मरसायनम् ।
विज्ञेयं निष्परिहारं साक्षाद्दिव्यौषधं परम् ॥ ५५८ ॥

आमलक्यादि कान्तं च पारदं च मनश्शिलाम् ।
वाकुचीसमभागानि क्षीरिणीरसपेषितम् ॥ ५५९ ॥

मेघनादरसोपेतं मूकमूषागतं पचेत् ।
माषं द्विमाषं त्रिगुणं भक्षयेत्तत्क्रमेण तु ॥ ५६० ॥

वर्षत्रयं परं देवि ! पादनिष्कार्धकं क्रमात् ।
षट् सप्ताष्टौ च वर्षाणि क्रमान्निष्कप्रमाणत. ॥५६१॥

---

1. सर्वरोगविनिर्मुक्तो जीवेद्वत्सरे विधारणात् ।

भुञ्जीत स च दिव्यान्नं जरावैरूप्यवर्जितः ।
किञ्चित्काञ्चनसंयुक्तं निष्कं निष्कार्धमेव वा ॥५६२॥

यो भक्षयेत्त्रिभिर्वर्षैस्सर्वव्याधीञ्जयत्ययम् ।
अष्टवर्षसहस्रायुर्द्वादशे लक्षवेधकः ॥ ५६३ ॥

षोडशे वत्सरे देवि ! दिव्यरूपस्स जायते ।
उत्तमो मूलबन्धस्तु मध्यमं सारबन्धनम् ॥ ५६४ ॥

अधमः पक्वबन्धस्तु एवं त्रिविधबन्धनम् ।

शतपलमभयान्नामक्षधात्र्योस्तथैव
कथितजलसमाप्तौ भागमष्टावशिष्टम् ।
घृतमधुसितयाढ्यं व्योषचित्रं दशैव
रसपलदशसिद्धं लोहजीर्णं मृतं च ॥ ५६५ ॥

गिरियुत(जतु)समभ्रं कान्तभृङ्गं विडङ्गं
रससहितविभाव्य तण्डुलैर्बिल्वमज्जै ।
हिमकरकृतकल्कं लोहपात्रस्थमासं
त्रिदिनतनुविशुद्धं कल्कमेनं वरिष्ठम् ॥ ५६६ ॥

लिहति शयनकाले वामनेत्रार्धसेवी
घननिबिडसमाधिर्मत्तगातङ्गदर्पः ।
विगतसकलदोषस्सर्वदृक् दिव्यचक्षुः
मदन इव सुकान्तिः कामिनीनां प्रवीरः ॥ ५६७ ॥

जलद इव वपुष्मान्कुञ्चिताग्राग्रकेशः
तुरग इव विशुद्धस्सत्कविश्चित्रकारी ।
नृपभगतिविचेष्टो मन्दगम्भीरघोषः
सुरगज इव लोके चन्द्रतारार्कजीवी ॥ ५६८ ॥

कान्तहेमरविचन्द्रमभ्रकै-
गोलकं निहितमिङ्गुदीफले ।
शैलवारिरिसिद्धगोलकं
सुन्दरी ह्यमरसंज्ञिका शुभा ॥ ५६९ ॥

कान्तहेमरविचन्द्रमभ्रक
वज्ररत्नरस(महि)राजगोलकम् ।
क्षिप्तमामलककाष्ठकोदरे
भूमिशैलनिहितं समुद्धृतम् ॥ ५७० ॥

शैलतां गतमथाहितं मुखे
वज्रकायकरक(म)ल्पवासरैः ।
तारहेमधरशुल्वसूतकै-
गोलकं वरणकाष्ठयन्त्रितम् ॥ ५७१ ॥

शैलवारिकृतसुन्दरीरसैः
खेचरीति गुलिका निगद्यते ॥ ५७२ ॥

शैलाम्बुनिक्षिप्तपलाशबीजं
शैलीकृतं क्षौद्रघृतेन खादेत् ।
त्रिसप्तरात्रं दिनमेकमेकं
सहस्रजीवी त्रिदिवो नरस्स्यात् ॥ ५७३ ॥

सूतके चाभ्रकं चैव वज्रतीक्ष्णसमन्वितम् ।
हाटकेन समायुक्तं गुलिका खेचरी भवेत् ॥ ५७४ ॥

करञ्जफलमध्यस्थं सूतं तत्रैव निक्षिपेत् ।
घृतशैलाम्बुमध्यस्थस्सहस्रायुः प्रयच्छति ॥ ५७५ ॥

तिन्दुके द्विसहस्रायुर्जम्बीरे त्रिसहस्रकम् ।
मातुलुंगे च नारङ्गे चतु पञ्चसहस्रकम् ॥ ५७६ ॥
रम्भाफले षट्सहस्र पनसे सप्तसख्यकम् ।
निभीतकफले चैव दशसाहस्रसख्यकम् ॥ ५७७ ॥
नालिकेरे महाभागे ! सहस्राणि चतुर्दश ।
विंशत्सहस्र पर्य्याया लक्षमामरके पुन ॥ ५७८ ॥
अभ्रपत्रभवात्काथादहोरात्र शिलोदके ।
वध्नाति चोद्धृत सूत मृत्युदारिद्र्यनाशनम् ॥ ५७९ ॥
सारणात्रययोगेन वज्रवज्जायते वपु ।
रसे रसायने चैव लक्षवेधी न सशय ॥ ५८० ॥
कर्दम तु कुमार्याश्च रसेन कृतपिण्डिकम् ।
धमनात्पतते सत्व मुखस्थ धारयेन्नर ॥ ५८१ ॥
षण्मासोपप्रयोगेण ह्यजरामरता व्रजेत् ।
सूतोऽज्जनयुत धमात सत्व पारदमिश्रितम् ॥ ५८२ ॥
तत्खोट धारयेद्युक्त्या ह्यदृश्यो भवति ध्रुवम् ।
यस्य यो विधिराम्नात उदकस्य शिवागमे ॥ ५८३ ॥
शतेन वत कालेन कुर्याद्देहे रसायनम् ।

वद्धजारणविधि. ॥

या पूर्वं निर्मिता सैयमधमा वालुजारणा ॥ ५८४ ॥
उत्तमा दुर्लभा चैव श्रूयता वद्धजारणा ।
अवद्ध जारयेद्यस्तु क्षीय(जीर्य)माण क्षय व्रजेत् ॥
वद्धस्य जीर्यते ग्रासो जीर्णस्य च मुख भवेत् ।
समुखो दुर्मुख दत्ते सागान्योत्तमरक्षणम् ॥ ५८६ ॥

[बन्धप्रकाराः]

सामान्योऽग्निसहत्वेन महारत्नादिजारकः ।
सामान्यः प्रथमः कार्यस्सद्ग्रासस्तु समन्ततः ॥ ५८७

वसुदेहकरो देवि ! सामान्यो हि भवेदयम् ।
ग्रासहीनस्तु यो बद्धो दिव्यसिद्धिकरो भवेत् ॥५८८

उत्तमो मूलबन्धस्तु मध्यमं सारबन्धनम् ।
अधमः पाकबन्धस्तु एवं त्रिविधबन्धनम् ॥ ५८९

मूलबन्धस्तु यो बन्धो मूलसंकुचितं महत् ।
सारबन्धस्तु यो बन्धो ग्रासबन्ध उच्यते ॥ ५९०

स्याच्चतुष्पष्टिमूलेभ्य किंचिन्मूलेन बन्धनम् ।
प्राण्यङ्गं दैत्यादीनां मूलाङ्गं देवतामयम् ॥ ५९१ ॥

पाषाणं चैव सिद्धाना मानुषाणां च पूजितम् ।
पीटि(पिण्डि)काद्रुतिसंकोचैस्त्रिविधं बन्धनं भवेत् ॥

दिव्याभिरौषधीभि. प्रागुक्तं संकोचबन्धनम् ।

[द्रुतिबन्धः]

द्रुतिभिर्बध्यते सूतः क्षणबन्ध उदाहृतः ॥ ५९३ ॥

अभ्रकं हरबीजं च षोडशांशेन काञ्चनम् ।
ध्मातं प्रकाशमूषायां शोधयेत्काचटङ्कणैः ॥ ५९४ ॥

दक्षिणावर्तिनं ध्मातं हरबीजेन मेलकम् ।
मूषां त्यक्त्वा वरारोहे ! तिष्ठते खग(बद्ध)वद्रसः ॥

रक्तिकार्धाधिमात्रेण पर्वतानपि वेधयेत् ।
भक्षणाच्चस्य देवेशि ! रुद्रतुल्यो भवेन्नरः ॥ ५९६ ॥

क्रीडते सप्तलोकेषु शिवतुल्यपराक्रमः[1] ।

द्रुतिमेलनविधिः ॥

चञ्चक्कन्दं गुडूचीं च उच्चटादिसमन्वितम् ॥ ५९७ ॥
अभ्रकं क्रमते शीघ्रमन्यथा नास्ति सङ्गम. ।
कृष्णागरुनाभिसितै· (शङ्खनाभि)रसोनपितरामठै ॥
नारीकुसमपालाशबीजतैलसमन्वितैः ।
सोष्णैर्मिलन्ति मृदिता द्रुतयस्सकला रसे ॥ ५९९ ॥

बन्धवन्धः ॥

[दशसङ्कलिकाविधिसिद्ध· ।]

पुनरन्य प्रवक्ष्यामि बन्धबन्धं सुरार्चिते ! ।
गन्धकं भक्षयेन्नारी दिनानामेकविंशतिम् ॥ ६०० ॥
तद्रजो रसराजस्य बन्धने जारणे हितम् ।
चञ्चभस्म तु भागैकं भागाद्दशुद्धरसात्त्रय ॥ ६०१ ॥
द्विपदीरजसा मर्द्यं यावत्कल्कता गतम् ।
पादांशेन सुवर्णेन(र्णस्य) पत्रलेपं तु कारयेत् ॥६०२॥
सो(व्यो)मवल्लीरस कान्तं टङ्कणाल सुचूर्णितम् ।
दद्यात्तमष्टमांशेन मर्दयेच्च प्रयत्नतः ॥ ६०३ ॥
नष्टपिष्टं च शुष्कं तदन्धयित्वा पुटे तत ।
[illegible] ॥ ६०४ ॥
खोटस्तु जायते देवि ! शतवेधी महारसः ।
सौवीरं टङ्कण काचं दत्वा दत्वा विशोधयेत् ॥६०५॥

---

1 द्रुतीनां मेलनं देवि ! दिव्यौषधिपरं शृणु ।

अक्षीणो मिलते हेम्ना समावर्तश्च जायते ।
एकोत्तरक्रमे वृद्ध्या सङ्कैः क्रामयेत्तत ॥ ६०६ ॥

एकगुणेन सूतेन एका सङ्कलिकोच्यते ।
त्रिगुणेन तु सूतेन द्वितीया सङ्कलोच्यते ॥ ६०७ ॥

षड्गुणेन तु सूतेन तृतीया सङ्कली भवेत् ।
दशगुणेन सूतेन चतुर्थी सङ्कली भवेत् ॥ ६०८ ॥

पञ्चादशगुणेनेशि ! पञ्चमी सङ्कली भवेत् ।
एकविंशद्गुणेनेशि ! षष्ठी सङ्कलिका भवेत् ॥ ६०९ ॥

अष्टाविंशद्गुणेनेशि ! सप्तमी सङ्कली स्मृता ।
षट्त्रिंशद्गुणिते बद्धा भवेत्सङ्कलिकाऽष्टमी ॥ ६१० ॥

पञ्चचत्वारिंशगुणे सङ्कली नवमी मता ।
पञ्चाध्यधिकपञ्चाशद्गुणसङ्कलिका स्मृता ॥ ६११ ॥

एव च क्रमवृद्धया तु सङ्कली दशबन्धिता ।
प्रथमे दशवेधी च शतवेधी द्वितीयके ॥ ६१२ ॥

तृतीये सहस्रवेधी स्याच्चतुर्थेऽयुतवेधिक. ।
पञ्चमे लक्षवेधी स्याद्दशलक्षन्तु षष्ठके ॥ ६१३ ॥

सप्तमे कोटिवेधी स्याद्दशकोटिं तथाऽष्टमे ।
धूमवेधी तु नवमे दशमे शब्दवेधक. ॥ ६१४ ॥

सङ्कलैस्सकलैर्बद्धे वेधो दशगुणो भवेत् ।
दशसङ्कलिकाबद्धशब्दवेधी महारस ॥ ६१५ ॥

यथा लोहे तथा देहे मानते नात्र संशय ।
वेधयेत्तत्प्रमाणेन धातूंश्चैव शरीरकम् ॥ ६१६ ॥

कारयेद्घुटिकां दिव्या वदरास्थिप्रमाणत ।
महाकालीं पूजयित्वा धारयेत्सततं बुध ॥ ६१७ ॥

"ओं ऐं ह्रीं श्रीं
कालि कालि महाकालि मांसशोणितभोजनि !।
ह्रां ह्रीं ह्रूं
रक्त कृष्णमुखि ! देवि ! रससिद्धिं ददस्व मे ॥
श्रीं ह्रीं ऐं ॥"

पूजयित्वा ततो देवी सिद्धचक्रं विशेषतः ।
तां क्षिपेच्चक्रमध्ये तु घुटिकां दिव्यरूपिणीम् ॥६१९॥
शतवेधेन या बद्धा रसेन घुटिका प्रिये ! ।
मासमेकं तु वक्त्रस्था जीवेच्चैव यथा विधि ॥६२०॥

तथा सहस्रवेधेन बद्धा या घुटिका शुभा ।
मासद्वयं तु वक्त्रस्था जीवेच्चन्द्रार्कतारकम् ॥ ६२१ ॥

दशसहस्रवेधेन बद्धा या घुटिका यदि ।
शक्रतुल्यं तदायुष्यं निर्भिर्मासैस्तु जायते ॥ ६२२ ॥

लक्षवेधेन या बद्धा घुटिका दिव्यरूपिणी ।
चतुर्मासं तु वक्त्रस्था ब्रह्मायुष्यं प्रयच्छति ॥ ६२३ ॥

दशलक्षेण या बद्धा घुटिका दिव्यरूपिणी ।
सप्तमासं तु वक्त्रस्था वैष्णवं लभते फलम् ॥ ६२४ ॥

कोटिवेधेन या बद्धा घुटिका दिव्यरूपिणी ।
षण्मासंसंस्थिता वक्त्रे साक्षाद्वै रुद्रतां नयेत् ॥ ६२५ ॥

दशकोटिप्रभेदेन घुटिका दिव्यरूपिणी ।
समासं तु वक्त्रस्था स भवेद्व्यापको नर ॥ ६२६ ॥

कर्ता हर्ता स्वयं भोक्ता शापानुग्रहकारकः ।
सर्वज्ञस्सर्वकर्ता च सूक्ष्मरूपो निरञ्जनः ॥ ६२७ ॥

इच्छया कुरुते सृष्टिमिच्छया संहरेज्जगत् ।

स्वच्छन्दगमनो भूत्वा शिवरूपो भवेन्नरः ॥ ६२८ ॥
पूज्यते सर्वदेवैश्च ब्रह्मविष्णुमहेश्वरैः ।

[अन्यो वज्रबन्धः ।]

पुनरन्यं प्रवक्ष्यामि वज्रबन्ध सुदुर्लभम् ॥ ६२९ ॥
समाशभक्षणं हेम शुद्धसूतेन कारयेत् ।
मृतवज्रं कलाशेन मर्दयेद्द्विपदीरसैः ॥ ६३० ॥
प्राग्वच्छेषं क्रियाजातं पूर्ववच्च फलं भवेत् ।
वज्रबन्धो भवेत्सिद्धो देवदानवदुर्जयः ॥ ६३१ ॥
चतुर्विंशतिसिद्धानां नायकस्सर्वसिद्धिमान् ।

[अन्यो वज्रबन्धः ।]

वज्रचूर्णसम सूतं हंसपाद्या विमर्दितम् ॥ ६३२ ॥
पुटित्वा मारयेत्तत्र पुनस्तुल्य रसं क्षिपेत् ।
ध्मात खोटो भवत्याशु शोधितः काचटङ्कणैः ॥६३३॥
यावच्चक्षुकोदयमस्यो जायते च रस प्रिये ! ।

[अन्यो वज्रबन्धः ।]

वज्रसत्वं च गगनं रस हेम च मेलयेत् ॥ ६३४ ॥
अमरत्वमवाप्नोति वक्त्रस्थेन सुराधिपे ! ।
जारयित्वा रसं तद्धि पुनस्तेनैव जारयेत् ॥ ६३५ ॥
कोटिवेधी न सन्देहो वक्त्रस्थं खेचरं परम ।
वेधयेत्तत्प्रमाणेन धातूंश्चैव शरीरकम् ॥ ६३६ ॥
कारयेद्द्युटिकां दिव्यां वज्रसिद्धेन काञ्चने ।
अनेन क्रमयोगेन यावच्चक्षय तु मारयेत् ॥ ६३७ ॥

तद्रसं सूतकं देवि ! सर्वरोगनिबर्हणम् ।
हेम्ना च सारयित्वा तु चन्द्रार्कं लेपयेत्ततः ॥ ६३८ ॥

द्व्यात्रिंशांशेन हेमार्धं मातृकार्य(भ्य)धिकं भवेत् ।
बदरास्थिप्रमाणेन कारयेद्गुलिकां बुधः ॥ ६३९ ॥

यथा लोहे तथा देहे क्रमते नान्यथा क्वचित् ।

[अन्यो वज्रबन्धः ।]

चञ्चेण द्वन्द्वितं हेम कान्तशुल्वकपालिना(योजितम्) ॥
रञ्जयेत्सप्तवाराणि तं खोटं सूक्ष्मचूर्णितम् ।
भावितं स्त्रीरजेनैव भूजंपत्रे निवेशितम् ॥ ६४१ ॥

द्रुतसूतेन संयुक्तं बध्वा वस्त्रेण पोट्टलीम् ।
स्वेदयेद्देवदेवेशि ! यावद्भवति गोलकः ॥ ६४२ ॥

लाङ्गली जीवनी चैव गन्धार्युत्तरवारुणी ।
एतेषां निक्षिपेत्पिण्डे वज्रगोलं तु वेष्टयेत् ॥ ६४३ ॥

मूषामध्ये विनिक्षिप्य सन्धयित्वा प्रयत्नतः ।
भूमौ मूषां विनिक्षिप्य पुटं मूर्ध्नि प्रदापयेत् ॥६४४॥

अनेनैव प्रतापेन वन्ध्यमेति महारसः ।
गोलकं धारयेद्वक्त्रे वर्षमेकं यदा प्रिये ! ॥ ६४५ ॥

जीवेत्कल्पसहस्राणि यथा नागो महाबलः ।
वर्षद्वादशभिस्साक्षाज्जायते रसभूरुपः ॥ ६४६ ॥

गात्रस्य तस्य प्रस्वेदादृष्टौ लोहान्तु काञ्चनम् ।
वज्रभस्म तथा सूते काञ्चनेन समन्वितम् ॥ ६४७ ॥

बलवन्तं कुरुते यस्तु भक्षयन्निरहर्निशः ।

अन्ये वेधोपयोगिनो बन्धाः ॥

कृष्णाभ्रकस्य सत्वं च तारं ताम्रं च हाटकम् ॥६४८॥
माक्षिकं कान्तलौहं च समभागानि कारयेत् ।
अन्धमूषागतं ध्मातं खोटं भवति तत्क्षणात् ॥ ६४९
तं खोटं सूक्ष्मचूर्णं तु द्रुतसूतेन गोलयेत् ।
मृतसत्व(वङ्ग)स्य भागैकं भागाश्चत्वारि गोलकम् ।
मर्दयेत्तत्सखल्वेन भस्मीभवति सूतकः ।
मारयेद्मूधरे यन्त्रे सप्तसङ्कल्पिकाक्रमात् ॥ ६५१
गुञ्जामात्रं तु तद्वस्म मध्याज्येन तु लेहयेत् ।
सवत्सरप्रयोगेण द्ययुतायुर्भवेन्नरः ॥ ६५२ ॥
वलीपलितनिर्मुक्तो महाबलपराक्रमः ।
तद्वस्म पलमेकं तु पलैकं गन्धकस्य च ॥ ६५३
अन्धमूषागतं ध्मातं खोटं भवति तत्क्षणात् ।
जीवेत्कल्पसहस्राणि यथा नागो महाबल. ॥ ६५४
तस्य मूत्रपुरीषेण लोहान्यष्टौ च काञ्चनम् ।
तत्खोटं रञ्जयेत्तप्ताद्वङ्गभस्मकपालिना ॥ ६५५ ॥
रञ्जयेत्सप्तवाराणि भवेत्कुङ्कुमसन्निभः ।
हेम्ना सह समावर्त्य सारणात्रयसारितम्[1] ॥ ६५६ ॥
शतांशेन तु तेनैव शुल्वमध्ये(वेधं) प्रदापयेत् ।

---

1. सहस्रांशेन तेनैव सर्वलोहानि वेधयेत् ।
कृष्णाभ्रकस्य सत्वं च तारं ताम्रं च हाटकम् ॥
तीक्ष्णं च वङ्गसूतं च माक्षिकं च समन्वितम् ।
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ॥
हेम्ना सह समावर्त्य सारणात्रयसारितम् ।

जायते कनकं दिव्यं देवाभरणभूषणम्[1] ॥ ६५७ ॥
बद्धसूतस्य भागैकं भागैकं कुटिलस्य च[2] ।
अन्धमूषागतं धमेन्नं यावद्द्रावशोषितम् ॥ ६५८ ॥
अनेन क्रमयोगेन वज्रं निर्वलि षड्गुणम् ।
अनेन क्रमयोगेन वह्नागं च षड्गुणम् ॥ ३५९ ॥
तत्सप्तं रञ्जयेत्पश्चात्तीक्ष्णगुञ्जकपालिनः[3] ।
परसूत(वीज)स्य भागैकं भागैकं द्रुतसूतकम् ॥६६०॥
मर्दयेन्मध्यमाम्लेन गोलकं भवति क्षणात् ।
मृतवज्रस्य भागैकं भागार्धत्वारि गोलकम् ॥ ६६१ ॥
मर्दयेत्तत्तराम्लेन भस्मीभवति सूतकं ।
गारयेद्भूधरे यन्त्रे सप्तसप्तिदिनात् ॥ ६६२ ॥
तद्धस्मं तु पुनः पश्चान्मध्यमाम्लेन मर्दयेत् ।
पुटं दद्यात्प्रयत्नेन षष्ट्याऽधिकशतत्रयम् ॥ ६६३ ॥

---

1 बद्धसूतस्य भागैकं भागैकं पन्नगस्य च ।
हाटकस्य तु भागैकं भागौ द्वौ चाभ्रकस्य तु ॥
एकीकृत्य च तद्धस्म्य रसे जीर्णं तु जारयेत् ।
शताशेनैव तेनैव शुल्बवेधं प्रदापयेत् ॥

2 अन्धमूषागतं धमेत्तोयं भवति तत्क्षणात् ।
तत्तोयं भागमेकं च भागैकं गन्धकस्य च ॥

3 रञ्जयेत प्रयत्नेन यावत्तुङ्गसन्निभम् ।
हेम्ना सह समावर्त्य सारणावत्सरारितम् ॥
शताशे वेधयेच्छुल्बं दिव्यं हेम प्रजायते ।
पुनरन्यं प्रवक्ष्यामि द्रवसारसुलक्षणम् ॥
रञ्जयेच्छुद्धसूतं तीक्ष्णगुञ्जकपालिना ।

तद्रसा जायते दिव्यं सिन्दूरारुणसन्निभम् ।
तेनैव वेधयेत्तारं सहस्रांशेन काञ्चनम् ॥ ६६४ ॥
मृतवज्रस्य भागैकं भागाष्टोडश सूतकम् ।
देवदालीशङ्खपुष्पीरसेन मृदितं क्रमात् ॥ ६६५ ॥
मारयेदभ्रूधरे यन्त्रे भस्मीभवति तत्क्षणात् ।
पूत्काराणां सहस्रेण धाम्यमानं न गच्छति ॥ ६६६ ॥
ईदृशं भस्म सूतं च देहे लोहे च योजयेत् ।
तद्भस्म पलमेकं तु पलमेकं च गन्धकम् ॥ ६६७ ॥
अन्धमूषागत ध्मातं खोटं भवति तत्क्षणात् ।
तं खोट रञ्जयेत्पश्चात्कपालिक्रमयोगतः ॥ ६६८ ॥
सारणात्रययोगेन शुल्ववेधं प्रदापयेत् ।
भस्मसूतपलैकं च पलैक पन्नगस्य च ॥ ६६९ ॥
कान्तपात्रेण तं कृत्वा मर्दयेल्लोहमुष्टिना ।
मृद्वग्निना ततः पाच्यं यावन्नागेन मेलकम् ॥ ६७० ॥
पुटेन जायते भस्म सिन्दूरारुणसप्रभम् ।
तद्भस्म तु पुन. पश्चाद्गोपित्तेन तु मर्दयेत् ॥ ६७१ ॥
तच्चतुर्दशवारांस्तु पुटयेद्भस्मयेत्तत· ।
तद्भस्म भागमेक तु भागैक हेमगोलकम् ॥ ६७२ ॥
एकीकृत्याऽथ सम्मर्द्य क्रामणेन सहैकतः ।
तारपि(ारि)ष्ट तु तेनैव सहस्रांशेन काञ्चनम् ॥६७३॥
अनेन क्रमयोगेन वङ्गभस्म प्रजायते ।
सहस्रांशेन तेनैव शुल्ववेधं प्रदापयेत् ॥ ६७४ ॥
तच्छुल्वे जायते तारं शङ्खकुन्देन्दुसन्निभम् ।
श्वेताभ्रकं च सत्वं च कांक्षी कान्तं तथाऽऽयसम् ॥

क्षं कान्तं (तारं) तथा श्वेतं वैक्रान्तं च कदंबकम्।
न्धमूषागतं ध्मातं खोटं कुन्देन्दुसन्निभम् ॥६७६॥

खोटं सूक्ष्मचूर्णं तु द्रुतसूतेन गोलकम्।
तवज्रस्य भागैकं भागाश्चत्वारि गोलकः ॥ ६७७ ॥

र्दयेत्तत्खल्वेन भस्मीभवति सूतकः।
रयेद्भूधरे यन्त्रे सप्तसङ्खलिकाक्रमात् ॥ ६७८ ॥

तश्च जायते भस्म शङ्खकुन्देन्दुसन्निभम्।
द्धस्य पलमेकं तु पलमेकं तु गन्धकम् ॥ ६७९ ॥

न्धमूषागतं ध्मातं खोटं भवति तद्रस.।
रेण च समावर्त्य सारणात्रयसारितम् ॥ ६८० ॥

हस्राशेन तेनैव शुल्बवेधं प्रदापयेत्।
तीक्ष्णचूर्णपलान्यष्टौ पलाष्टौ द्रुतसूतकम् ॥ ६८१ ॥

मर्दयेत्तत्खल्वेन टेंटंचिल्ली(कुष्ठच्छल्ली)रसेन च।
तत्क्षणाज्जायते पिण्डं तीक्ष्णेन सह गोलकम् ॥६८२॥

मृतवज्रस्य भागैकं भागाश्चत्वारि गोलकम्।
मर्दयेत्तत्खल्वेन भस्मीभवति तत्क्षणात् ॥ ६८३ ॥

मारयेद्भूधरे यन्त्रे सप्तसङ्खलिकाक्रमात्।
षोडशांशेन तेनैव वङ्गवेधं प्रदापयेत् ॥ ६८४ ॥

तद्रस्य पलमेकं तु पलैकं गन्धकस्य च।
खन्धमूषागतं ध्मातं खोटं भवति तत्क्षणात् ॥ ६८५ ॥

तस्य खोटस्य भागं च तीक्ष्णचूर्णं च तत्समम्।
द्वौ भागौ द्रुतसूतस्य सर्वमेकत्र मर्दयेत् ॥ ६८६ ॥

तत्खल्वे तु सम्मर्द्यं गोलकं भवति क्षणात्।
मारयेद्भूधरे यन्त्रे सप्तसङ्खलिकाक्रमात् ॥ ६८७ ॥

तत्सर्वं जारयेद्भस्म शङ्खकुन्देन्दुसन्निभम् ।
तद्भस्म कारयेत्खोटं तीक्ष्णेन द्वन्द्वितं सह ॥ ६८८ ॥

अनेन क्रमयोगेन सप्तसङ्खलिकाक्रमात् ।
तं खोटं जारयेत्पश्चात्सारणात्रयसारितम् ॥ ६८९ ॥

लक्षांशेन तु तेनैव वङ्गवेधं प्रदापयेत् ।
भस्मसूतपलैकं तु शुद्धवङ्गं प्रदापयेत् ॥ ६९० ॥

मर्दयेदायसे पात्रे वङ्गं तु म्रियते क्षणात् ।
द्विपलं मृतवङ्गस्य तारचूर्णपलद्वयम् ॥ ६९१ ॥

द्विपलं गन्धकं दद्यात्पलैकं टङ्कणस्य च ।
अन्धमूषागतं ध्मातं खोटं भवति तत्क्षणात् ॥ ६९२ ॥

पलैकं खोटचूर्णस्य पलैकं द्रु(मृ)तसूतकम् ।
मर्दयेन्मातुलुङ्गाम्लैर्गोलको भवति क्षणात्[1] ॥ ६९३ ॥

षोडशांशेन तेनैव तारारिष्टं तु वेधयेत् ।
मृतवङ्गपलैकं तु पलैक सूतकस्य च ॥ ६९४ ॥

सर्व(त्व)चूर्णं पलैकं तु त्रयमेकत्र कारयेत् ।
मर्दयेन्मातुलुङ्गाम्लैर्गोलको भवति क्षणात् ॥ ६९५ ॥

मृतवङ्गस्य भागैकं भागश्चत्वारि गोलकम् ।
एकत्र मर्दयेद्भद्रे ! ओषधीद्रवसंयुतम् ॥ ६९६ ॥

मारयेद्भूधरे यन्त्रे पुटानां सप्तकेन तु ।
तत्सर्वं जायते भस्म वज्रस्यैव प्रभावतः ॥ ६९७ ॥

---

1. षोडशांशेन तेनैव शुल्बवेधं प्रदापयेत् ।
वङ्गस्थाने ददेन्नागं तारस्थाने च घोषनम् ॥
पूर्ववत्क्रमयोगेन रसं खोटं तु कारयेत् ।
तं खोटं सूक्ष्मचूर्णं तु द्रुतसूतेन गोलकम् ॥

सामुद्रं त्रिपलं देवि ! भस्मामध्ये प्रदापयेत् ।
एकीकृत्याऽथ सम्मर्द्य वज्रीक्षीरे दिनत्रयम् ॥ ६९८ ॥

विधामिलकमालस्थं पुटं दद्यात्तु भूधरे ।
तत्सर्वं जायते भस्म शङ्खकुन्देन्दुसन्निभम् ॥ ६९९ ॥

तेनैव यवमात्रेण वङ्गं स्तम्भयति क्षणात् ।
वङ्गं तारं तथा सत्वं समसूतेन गोलकम् ॥ ७०० ॥

अनेन क्रमयोगेन मारयेच्च पृथक् पृथक् ।
तत्सर्वं जायते भस्म वज्रस्यैव प्रभावतः ॥ ७०१ ॥

भस्मसूतपलैकं च वङ्गभस्म पलद्वयम् ।
द्वे पले मृततारस्य सत्वभस्म पलद्वयम् ॥ ७०२ ॥

शङ्खचूर्णं पलं पञ्च सामुद्रस्य पलाष्टकम् ।
टङ्कणस्य पलान्यष्टौ सर्वमेकत्र जारयेत् ॥ ७०३ ॥

वज्रीक्षीरेण संवेष्ट्य पुटं दद्याच्चतुर्दश ।
एष सिद्धरसस्साक्षाद्दुर्लभस्त्रिदशैरपि ॥ ७०४ ॥

वङ्गं तु दाप(द्राव)येत्पश्चाद्भाण्डे चैव तु मृण्मये ।
सिद्धं भस्म भवेल्लोहशलाकेन च चालयेत् ॥७०५॥

वापयेच्च प्रयत्नेन यावत्कठिनतां व्रजेत् ।
अन्धमूषागतं ध्मातं तारं भवति शोभनम् ॥ ७०६ ॥

कदाचित्स्फा(पु)टिते तारे पुनर्वङ्गं प्रदापयेत् ।
पत्रे दाहे कषे छेदे तत्तारं शाश्वतं भवेत् ॥ ७०७ ॥

सन्ति(स्तंभि)तं दनु(तत्तु)गोलं च षोडशांशसमन्वितम् ।
मृतवज्रस्य भागैकमेकत्रैव तु कारयेत् ॥ ७०८ ॥

देवदाली शङ्खपुष्पं तद्रसेन तु मर्दयेत् ।
मारयेद्भूधरे यन्त्रे पुटानां सप्तकेन तु ॥ ७०९ ॥

तद्धम्म तु पुनः पश्चाद्दीपयन्त्रेण पाचयेत् ।
भस्मसूतपलैकं च श्वेताभ्रकद(प)लद्वयम् ॥ ७१० ॥

शङ्खचूर्णपलैकं तु पलैकं टङ्कणस्य तु ।
एकीकृत्याथ तत्सर्वं वज्रीक्षीरेण पेषयेत् ॥ ७११ ॥

अरण्योत्पलकैः पश्चात्पुटं दद्याच्चतुर्दश ।
रसोऽयं यवमात्रेण वङ्गं स्तम्भयति क्षणात् ॥ ७१२ ॥

कृष्णाभ्रकपलैकं तु द्विपलेनैव सूतकम् ।
गन्धकस्य पलैकं च एकीकृत्याथ मर्दयेत् ॥ ७१३ ॥

मर्द्यमानं प्रयत्नेन गोलकं भवति क्षणात् ।
सूतवज्रस्य भागैकं भागाश्चत्वारि गोलकम् ॥ ७१४ ॥

मर्दयेत्प्रहरैकं तु मन्मीभवति सूतकः ।
आरण्यगोमयेनैव पुटं दद्यात्तु भूधरे ॥ ७१५ ॥

अनेन क्रमयोगेन ससप्तवलिकां कुरु ।
शतांशेन तु तेनैव नागवेधं प्रदापयेत् ॥ ७१६ ॥

तं खोटं रञ्जयेत्पश्चाच्छुल्वाभ्रककपालिना ।
पुनस्तं रञ्जयेत्पश्चात्तीक्ष्णशुल्वकपालिना ॥ ७१७ ॥

पुनस्तं रञ्जयेत्पश्चान्नागाभ्रककपालिना ।
हेम्ना सह समाबर्त्य सारणात्रयसारितम् ॥ ७१८ ॥

सहस्रांशेन तेनैव शुल्ववेधं प्रदापयेत् ।
जायते कनकं दिव्यं देवाभरणभूषणम् ॥ ७१९ ॥

वज्रवल्ली(भस्म)म्नुहीक्षीरे पुटितं दशभिः पुटैः ।
तत्तुल्यं मर्दयेत्सूतं देवदाल्या रसैः पुटेत् ॥ ७२० ॥

तत्तुल्यं पुटयेत्तीक्ष्णं त्रिफलाया रसेन तु ।
तत्तुल्यं पुटयेन्नागमहिमाराटरूपकैः ॥ ७२१ ॥

हेमवर्णप्रदं तद्धि विंशत्यंशेन योजितम् ।
चतुष्पष्टयंशकेनेदं शुद्धतारं च रञ्जयेत् ॥ ७२२ ॥
अष्टमांशेन तेनैव नागपत्राणि लेपयेत् ।
पुटयेन्मारयेन्नागं सिन्दूरारुणसन्निभम् ॥ ७२३ ॥
तत्तुल्यं मारयेद्धेम काञ्चनाररसे पुटेत् ।
तत्तुल्यं मारयेच्छुल्बं गृहकन्यारसेन च ॥ ७२४ ॥
पश्चादम्लेन पुटयेद्यावत्सिन्दूरसन्निभम् ।
चन्द्रार्कौ रञ्जयेत्तेन शतांशेन तु पाचितम् ॥ ७२५ ॥
सबीजं बीजवर्जं वा वज्रेण सह सूतकः ।
तद्धस्त मर्दयेत्पश्चात्स्वर्णपत्ररसेन च ॥ ७२६ ॥
तेनैव वेधयेच्छुल्ब शुल्बं तारेण योजयेत् ।

वज्रहेमद्वन्द्वमेलापनम् ॥

वज्रेण द्वन्द्वयेद्धेम हेम्ना च द्वन्द्वयेद्रसम् ॥ ७२७ ॥
रसेन द्वन्द्वयेद्देहं स देहो ह्यजरामरः ।
कदलीटङ्कसौवीरं कण्टकारीरसप्लुतम् ॥ ७२८ ॥
क्रामणं सर्वधातूनां सर्वद्वन्द्वेषु मेलनम् ।
तिमिरस्य तु पञ्चाङ्गं पेटा(मार्जा)रीबीजसंयुतम् ॥७२९॥
एकीकृत्याऽथ सम्मर्द्य वज्रं तेनैव वेष्टयेत् ।
वज्रमूषागतं ध्मातं हेमद्वन्द्वं तु कारयेत् ॥ ७३० ॥
कान्तपाषाणचूर्णं तु भृलता रामठं मधु ।
गुञ्जाटङ्कणकाचं च कर्कटास्थि स्नुहीपयः ॥ ७३१ ॥
तत्सर्वं तु समं योज्यं स्त्रीस्तन्येन तु मर्दयेत् ।
मूषालेपः कृतः प्राज्ञो वज्रमेलापकस्सुखम् ॥ ७३२ ॥

हठाग्नौ वज्रमूषाभिर्दृढं वज्रा मिलन्ति च ।
सुसूक्ष्मा रक्ता भूत्वा लेखीभावं व्रजन्ति च ॥७२३॥
काचटङ्कणयोगेन भ्रमतश्चुक्तिमाप्नुयात् ।
बहुभिश्चैव मूषाभिस्तेजः पुञ्जोऽपि जायते ॥ ७२४ ॥
मृतवज्रस्य भागैक भागाष्टौ हाटकम् ।
श्वेतकाचस्य सूतं तु भागं षोडश दापयेत ॥ ७२५ ॥
अन्धमूषागतं ध्मातं वज्रद्वन्द्वन्तु कारयेत् ।
अनेन क्रमयोगेन सप्तवारांश्च दापयेत् ॥ ७२६ ॥
गिलते तत्क्षणाद्वज्रं हेम्ना तु सदृशं यथा ।
चूर्णं नरकपालस्य मृतवज्रं च दापयेत् ॥ ७२७ ॥
अन्धमूषागतं ध्मात हेम्ना मिलति तत्क्षणात् ।
मृङ्गपत्रं नृकेशं च मुखं कान्तस्य टङ्कणम् ॥ ७२८ ॥
बालवत्सपुरीषं च स्त्रीस्तन्येन तु पेषयेत् ।
अन्धमूषागतं ध्मातं वज्रं मिलति तत्क्षणात् ॥ ७२९ ॥
क्षीरिणीत्वक्सारिण्या मृतवज्रं तु भावयेत् ।
हेमपिष्टिकया मध्ये वज्रं तत्रैव निक्षिपेत् ॥ ७४० ॥
वेष्टयेद्भूर्जपत्रेण वाह्ये वस्त्रेण वेष्टयेत् ।
धान्यमध्ये तु संस्थाप्य पक्षमेकं निरन्तरम् ॥ ७४१ ॥
उद्धरेत्तत्प्रयत्नेन वज्रमन्थं तु कारयेत् ।

रत्नद्रुतिबन्धः ॥

द्रुतां वज्रात्तु सूतेन मेलनीयास्तु पार्वति ! ॥ ७४२ ॥
द्रुतिबन्धस्य विज्ञेयश्शतसाहस्रवेधकः ।
रत्नाना द्रुतयस्सर्वा मेलयित्वा यथाविधि ॥ ७४३ ॥

शतसहस्रवेधी च देहसिद्धिप्रदायकः ।
मुसली चित्रकं वन्ध्या कुक्कुटीकन्दपद्मिनी ॥७४४॥

कञ्चुकी नीलिसिन्दूरी पाठा नागबला यथा ।
कंसपात्रे रसश्चैव रत्नानां द्युतयस्तथा ॥ ७४५ ॥

आतपे धारयित्वा वै-अधः कर्षानलं यथा ।
ओषधीनां रसं दत्वा स्वच्छं कृत्वा पुनः पुनः ॥७४६॥

याममात्रं तु घर्मे च द्युतिर्मिलति वै रसम् ।
न तेषां क्रामणे शक्तिर्वक्तुं वक्त्रशतैरपि ॥ ७४७ ॥

सैन्धवं निम्बपत्राणि चाकुन्दी द्वेपिणीजके ।
द्रुताभ्रस्य रसेनैव मेलनं परमं मतम् ॥ ७४८ ॥

वज्रद्वन्द्वानमीशानि ! वज्रेण रसमारणम् ।
सबीजं सारणं प्रोक्तं खोटबन्धनमेव च ॥ ७४९ ॥
तन्ममाचक्ष्व देवेशि ! किमन्यच्छ्रोतुमर्हसि ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ त्रयोविंशोल्लास. ॥

॥ चतुर्विंश उल्लासः ॥

महारसैरुपरसैर्लोहैश्च रसस्य वेधोपयोगिनो बन्धाः ॥

श्री भैरवः—

महारसैरुपरसैर्लोहैश्च परमेश्वरि ! ।
आज्ञापय समस्तं तं रसराजस्य बन्धनम् ॥ १ ॥

वैक्रान्तबन्धाः ॥

[प्रथमः प्रकारः ।]

वैक्रान्तस्य तु भागैकमष्टभागं तु सूनकम् ।
कनकस्य तु सप्तांशं द्विपदीरसटङ्कणम् ॥ २ ॥
नष्टपिष्टं च शुष्कं च ध्मातं खोटो भवेत्प्रिये ! ।
सौवीरं टङ्कण काचं दत्वा दत्वा तु शोधयेत् ॥ ३ ॥
समहेम्नि समावर्त्य मूकमूषागतं ततः ।
समांशभक्षणं तत्तु शुद्धसूतेन कारयेत् ॥ ४ ॥
वैक्रान्तं षोडशांशेन पूर्वयोगेन धामयेत् ।
दशसङ्कल्पिकायोगाद्वेधो दशगुणोत्तर. ॥ ५ ॥

[द्वितीयः प्रकारः ।]

पुनरन्यं प्रवक्ष्यामि प्रयोगं भुवि दुर्लभम् ।
वैक्रान्तसत्त्व देवेशि ! पारदेन समन्वितम् ॥ ६ ॥
जारितं समहेम्ना तु शिलाभाण्डे निधापयेत् ।
मासमात्रोषितं भूमौ समुद्धृत्य प्रयत्नत. ॥ ७ ॥
एष देवि ! रसो दिव्यो देहद्रव्यकरो भवेत् ।

[तृतीयः प्रकारः ।]

वैक्रान्तकास्तु ये केचित्त्रिफलाया रसेन च[1] ॥ ८ ॥
एकैकं देवि ! सप्ताहं स्वेदिता मर्दितास्तथा ।
सुध्माता मूकमूषायां खोटो भवति चाक्षयः ॥ ९ ॥
का(क्रा ?)न्तं रूप्यं च कनकं पारदं चैव योजयेत् ।
शुल्व तृतीयभागं तु सूतोऽञ्जनसमन्वितम् ॥ १० ॥

---

1. भूम्यामलकसारेण चसुद्धद्वरसेन च ।

तद्भ्मातं खोटतां यातं देहलोहकरं भवेत् ।

[चतुर्थः प्रकारः— श्वेतवैक्रान्तसिद्धः ।]

श्वेतवैक्रान्तचूर्णं तु हयमूत्रेण मर्दयेत् ॥ ११ ॥

आदौ सुस्विन्नमादाय पले पलशतं क्षिपेत् ।

तारस्य जायते भस्म विशुद्धस्फटिकाकृति ॥ १२ ॥

तद्भस्म मेलयेत्सूते समभागं विचक्षणः ।

चारयेद्रजतं सूते हयमूत्रेण मर्दयेत् ॥ १३ ॥

पुटयेदन्धमूषायां क्रमेण मृदुवह्निना[1] ।

अहोरात्रं त्रिरात्रं वा भवेदग्निसहो रसः ॥ १४ ॥

स्पर्शनात्सर्वलोहानि रजतं च करिष्यति ।

[पञ्चमः प्रकारः— रक्तवैक्रान्तसिद्धः ।]

रक्तस्य वक्ष्यते कर्म जरादारिद्र्यनाशनम् ॥ १५ ॥

सप्तधा भावयेत्तस्य व्याघ्रीकन्दांभसा रजः ।

पलं तस्य पलं हेम्नः पलं शुद्धरसस्य च ॥ १६ ॥

शुद्धभस्म भवेत्सर्वं पुनर्हेम्नश्शतं क्षिपेत् ।

तद्भस्म जायते सर्वं शुद्धहेमसमप्रभम् ॥ १७ ॥

तद्भस्म रसराजे तु पुनर्हेम्ना तु मेलयेत् ।

भवेदग्निसहो देवि ! ततो रसवरो भवेत् ॥ १८ ॥

सर्ववेधी भवेत्सूतः कोटिवेधी महारसः ।

[षष्ठः प्रकारः ।]

रक्तवैक्रान्तसत्वं तु हेम्ना तु सह मेलयेत् ॥ १९ ॥

समं तु जारयेत्सूते सारयित्वा समेन तु ।

---

1. क्रामणेन समायुक्तं मूषामध्ये विचक्षणः ।

सहस्राशेन लोहानि वेधयेल्लाल संशयः ॥ २० ॥

[सप्तम. प्रकार.— कृष्णवैक्रान्तसिद्ध. ।]

कृष्णवैक्रान्तभागैकं शुद्धसूतं शतांशकम् ।
एकत्र मर्दयेत्खल्वे चूर्णं भवति तद्द्वयम् ॥ २१ ॥
अभ्र चूर्णभ्र भागैकं हेमभागसहस्रकम् ।
एकत्र मर्दयेत्तावद्यावद्भस्म तु जायते ॥ २२ ॥
धमेत्तदन्धमूषाया यावत्खोटो भविष्यति[1] ।
समाशभक्षण तस्य पीठि(पिष्टि)कां तभ्र कारयेत् ॥
वेधयेत्सर्वलोहानि स्पर्शमात्रेण हेमताम् ।
तच्चूर्णमभ्रकं चैव रसेन सह मर्दयेत् ॥ २४ ॥
स्वेदयेज्जारयेच्चैव ततो वह्निसहो भवेत् ।
स रसश्चा(स्सा)रितश्चैव सर्वलोहानि विध्यति ॥२५॥

[अष्टम. प्रकारः— पीतवर्णवैक्रान्तसिद्ध. ।]

पीतवर्णेऽपि वैक्रान्ते रक्तकृष्णविधिस्मृतः ।
पीतवैक्रान्तचूर्णं तु हेमचूर्णसमन्वितम् ॥ २६ ॥
पीताभ्रकभ्र चूर्णं तु मेलयित्वा महारस· ।
स्वेदितो मर्दितश्चैव मासादग्निसहो भवेत् ॥ २७ ॥

[नीलवैक्रान्तभस्मरसायनम् ।]

नीलवर्णं तु वैक्रान्त मृियते रससयुतम् ।

---

1. समांशभक्षणं तभ्र शुद्धसूतं तु कारयेत् ।
वेधयेत्सर्वलोहानि स्पर्शमात्रेण पार्वति ! ॥
तच्चूर्णमभ्रकं चैव रसेन सह मर्दयेत् ।
एकत्र मर्दयेत्तावद्यावद्भस्म प्रजायते ।
धमेत्तदन्धमूषायां यावत्खोटो भविष्यति ॥

कृष्णाभ्रकेण सहितं मधुसर्पिर्युतं च तत् ॥ २८ ॥
भक्षयेन्मण्डलं देवि ! जीवेच्चन्द्रार्कतारकम् ।
यस्य यस्य हि यो योगस्तस्य तस्य प्रयोगतः ॥ २९ ॥
मेलयित्वा रसं गुञ्जामानं त्रिमधुसंयुतम् ।
खादेत्क्षीराज्यशाल्यन्नं भोज्यमन्यच्च वर्जयेत् ॥ ३० ॥

[नवमः प्रकारः ।]

वैक्रान्तसत्वसंयुक्तं लुङ्गाम्ले मर्दयेद्रसम् ।
तापयेदुष्णतोयेन जलेन परिपूरयेत् ॥ ३१ ॥
सत्वं सूतं च समिश्रं धमेत्स्याद्रसबन्धनम् ।
बद्धं रस मुखे क्षिप्त्वा भूमिच्छिद्राणि पश्यति ॥३२॥

[दशमः प्रकारः ।]

निष्कमेकं रसं क्रान्तमश्वमूत्रेण मर्दयेत् ।
दिनमेकमिदं देवि ! मर्दयित्वा मृतो भवेत् ॥ ३३ ॥
चतुर्दिनमिदं कृत्वा समसूतं समं नयेत् ।
मर्दनं स्वेदनं चैव पूर्ववच्छुद्धमानसः ॥ ३४ ॥
सप्तद्वन्द्वजमेकैकं सप्तमेऽष्टपलं भवेत्[1] ।
शल्याविशल्यामूलस्य वारिणा मर्दयेद्दिनम् ॥ ३५ ॥

---

1. मर्दयेन्मातुलुङ्गाम्लैश्चतुष्पञ्चपुटं ददेत् ।
उदयारुणसङ्काशस्सर्वलोहानि वेधयेत् ॥
कृष्णाभ्रकस्य सत्वं च रसं हेमसमं भवेत् ।
निक्षिप्य चक्रमूषायां धमित्वा स्रोटतां नयेत् ॥
बद्धं रसं मुखे क्षिप्त्वा ह्यजरामरतां व्रजेत् ।
तेनैव भस्म संमिश्रं कृष्णाभ्रकसमं भवेत् ॥

मूषरीयन्त्रमध्यस्थं पुटं स्यादिनं दृढम् ।
तद्वन्म शुल्वं सौम्ये स्यादुत्तानाग्नं तु मण्डलम् ॥ ३६ ॥

एकार्धं पञ्चमं मध्यं पुनरेकं प्रशस्यते ।
पूर्ववद्बन्धनं देवि ! कोटिवेधी भवेद्रसः ॥ ३७ ॥

काचबन्धः ॥

रक्तवर्णमयम्काचं त्र्याशारसमनप्रभम् ।
मिलत्स्त्रीरक्तसंकाशं तच्चूर्णं सूतसंयुतम् ॥ ३८ ॥

मर्दयेच्छागरक्तेन ध्मातं स्यात्कोटिवेधि ये ! ।
स सूतदशतवेधी तु स तु व्याधिहरो भवेत् ॥ ३९ ॥

गुटिकां धारयेद्बद्धत्वे जीवेद्वर्षसहस्रकम् ।
पीतवर्णमयम्काचं मिलद्धेमसमप्रभम् ॥ ४० ॥
वेधयेत्सप्तमांशेन स तु लोहानि सुन्दरि ! ।

चपलबन्धः ॥

[प्रथमः प्रकारः ।]

शाङ्खीं करवीरं च चिलकं गिरिकर्णिकाम् ॥ ४१ ॥
स्त्रीस्तन्यटङ्कसौवीरं मूषालेपं तु कारयेत् ।
चपलाद्द्विगुणं सूतं सूताद्द्विगुणकाञ्चनम् ॥ ४२ ॥
नष्टपिष्टं च तत्कुर्यादन्धमूषागतं धमेत् ।
तत्र स्थितो रसेन्द्रोऽयं खोटो भवति शोभन. ॥ ४३ ॥
शतांशं वेधयेन्नागं शुक्लावर्णस्तु जायते ।
तेन नागशतांशेन शुल्वं रक्तनिभं भवेत् ॥ ४४ ॥
तेन शुल्वशतांशेन तारं विध्यति काञ्चनम् ।

[द्वितीयः प्रकारः ।]

चपलस्य तु षड्भागास्तारभागास्तु सप्त च ॥ ४५ ॥
अष्टौ कनकभागास्तु नव भागा रसस्य च ।
त्रिशद्भागा मिलित्वा तु भवन्ति सुरवन्दिते ! ॥ ४६ ।
चित्रकं कण(र)वीरं च लाङ्गली गृध्रविट् तथा ।
मर्दितं मातुलुङ्गाम्लैर्मूपालेपं तु कारयेत् ॥ ४७ ॥
अन्वयित्वा घमेद्देवि ! खोटो भवति शोभन ।
तेन खोटदशांशेन विद्धो नागोऽरुणो भवेत् ॥ ४८ ॥
तेन नागेन विद्धं तु शुल्वं गुञ्जारुणं भवेत् ।
तेन शुल्वेन तार तु विद्ध भवति काञ्चनम् ॥ ४९ ॥

[तृतीयः प्रकारः ।]

हेमार्भं(भं) चपलं देवि ! पारदार्धेन संयुतम् ।
पारदे(देन)कनकं दत्वा कुनट्या मर्दयेत्क्षणम् ॥५०॥
लाङ्गली चित्रक चैव स्त्रीस्तन्यं कण(र)वीरकम् ।
गृध्रविष्ठा तथा सर्वं मूषालेपं तु कारयेत् ॥ ५१ ॥
तन्मध्ये तु स्थितं ध्मातं खोटो भवति शोभन ।
पूर्वोक्तं वेधयेदेतन्निर्बीज कनकं भवेत् ॥ ५२ ॥
सुतसलोहपात्रे च क्षिपेच्चपलचूर्णकम् ।
सबीजं पारदं कृत्वा चपलस्य तु वापयेत् ॥ ५३ ॥
लाक्षाभो बध्यते सूतोऽङ्कुशेनेव महागजः ।

गन्धकयन्त्रः ॥

[प्रथमः प्रकारः ।]

शुद्धसूतपलैकं च पलैकं गन्धकस्य च ॥ ५४ ॥

एकीकृत्याऽथ संमर्द्य धुत्तूरकरसेन च ।
मारयेच्चक्रयोगेन भस्मीभवति सूतकः ॥ ५५ ॥

अन्धमूषागतो धमातः खोटो भवति शोभनः ।
सितं हेम च नागं च चन्द्रार्कं चापि वेधयेत् ॥५६॥

[द्वितीयः प्रकारः ।]

पलैकं शुद्धसूतस्य कर्षैकं गन्धकस्य च ।
मर्दयेत्स्निग्धखल्वेन देवदालीरसप्लुतम् ॥ ५७ ॥

मर्दयेत्तु कराङ्गुल्या गन्धपिष्टिस्तु जायते ।
जम्बीरस्य रसेनैव दिनमेकं तु मर्दयेत् ॥ ५८ ॥

पञ्चद्रावकसंयुक्तां वटिकां कारयेच्छुभाम् ।
पलाशमूलकल्केन वटिकां तां प्रलेपयेत् ॥ ५९ ॥

धमेत्खोटो भवेच्छेलकाचटङ्कणयोगतः ।
शोधयेत्त प्रयत्नेन यावन्निर्मलतां व्रजेत् ॥ ६० ॥

स खोटो जायते देवि ! त्रिगुणं पन्नगं ततः ।
शतशो रञ्जयेत्पश्चाच्छुल्वाभ्रककपालिना ॥ ६१ ॥

शुल्बे तारे च खोटोऽयं सहस्रांशेन वेधकः ।

[तृतीयः प्रकारः ।]

गन्धकेन हते सूते मृतलोहानि वाहयेत् ॥ ६२ ॥

पुनर्हेम समावर्त्य समांशं भक्षणं कुरु ।
सारितश्शुल्बतारौघोपं विध्यति सूतकः ॥ ६३ ॥

[चतुर्थः प्रकारः ।]

रसं हेमसमं कृत्वा पिष्टिकार्धेन गन्धकम् ।
द्विपदीरजसा युक्तं मर्दयेट्टङ्कणान्वितम् ॥ ६४ ॥

नष्टपिष्टं च शुष्कं च ध्मातः खोटो भवेत्ततः[1] ।
चन्द्रार्कषोडशांशेन विद्धं भवति काञ्चनम् ॥ ६५ ॥
हेमार्धमिलितं तं तु मातृकासमतां व्रजेत् ।
कुर्यात्सङ्कलिकायोगाद्वेधो दशगुणोत्तरः ॥ ६६ ॥
यथा हेम्नि तथा तारे व्याटि(पि)चीजेन योजितम् ।
तृतीयसङ्कलाबद्धं षट्शते नागवेधकम् ॥ ६७ ॥
चतुर्गुणेन नेनैव सहस्रांशेन काञ्चनम् ।
अनेन क्रमयोगेन सप्त सङ्कलिका यदि ॥ ६८ ॥
कुरुते काञ्चनं दिव्यमष्टलोहानि पार्वति ! ।
तं पुनश्चूर्णयित्वा तु पुटयेद्वह्नि जायते ॥ ६९ ॥
सर्वव्याधिजयो देवि ! पलैकेन शुभक्षिते ।
द्विपले व्राह्ममायुष्यं त्रिपले वैष्णवं भवेत् ॥ ७० ॥
चतुष्पले च पञ्चत्वमीशः पञ्चपले भवेत् ।
षट्पले भक्षिते देवि ! सदाशिवतनुर्भवेत् ॥ ७१ ॥

[पञ्चमः प्रकारः ।]

शुतकं गन्धकं तारं मेषवल्लीवसा समा ।
त्रिदिनं मर्दयेल्लक्षं(तीक्ष्णं) वङ्गं पादेन लेपयेत् ॥७२॥
अन्धमूषागतं ध्मातं वङ्गं स्तम्भयति क्षणात् ।

---

1. सौवीरं टङ्कणं काचं दत्वा दत्वा च शोधयेत् ।
अक्षीणो मिलते हेम्नि समावर्तस्तु जायते ॥ ;
समांशं भक्षणं हेम्नि शुद्धसूतेन कारयेत् ।
नष्टपिष्टं च तच्चुल्ल्यं ध्मातं खोटो भवेत्ततः ॥
द्विपदीरजसा युक्तं मर्दयेट्टङ्कणान्वितम् ।

[षष्ठ प्रकारः ।]

[गन्धपिष्टिविधिः ।]

चूर्णितं गन्धकं देवि ! मर्कटीरसभावितम् ॥ ७३ ॥
भावयेच्छतवाराणि जीवभस्म तु गच्छति ।
दापयेन्मृण्मये पात्रे रसेन सह संयुतम् ॥ ७४ ॥

तापयेद्रवितापेन मर्कटीरससंयुतम् ।
गन्धकं ग्रसते सूत. पिष्टिका भवति क्षणात् ॥ ७५ ॥

तिलपर्णीरसेनैव गन्धकं भावयेच्चत. ।
सप्तवारास्तु देवेशि ! छायाशुष्कं पुन पुन ॥ ७६ ॥

शोधितं पातितं सूतं पलैकप्रमितं प्रिये ! ।
मूषामध्ये विनिक्षिप्य नरेन्द्रीरससयुतम् ॥ ७७ ॥

जारयेद्वालुकायन्त्रे भावितं गन्धक तुन ।
त्रुटि त्रुटि प्रदातव्यं गन्धकं च पुन पुन ॥ ७८ ॥

अनेन क्रमयोगेन जायते गन्धपिष्टिका ।
गन्धपाषाणचूर्णं तु कर्कटस्य रसेन तु ॥ ७९ ॥

भावयेत्सप्तवारास्तु स्त्रीरजेन(पुष्पेण) तु सप्तधा ।
शुद्धसूतपलैकं च खर्परे दापयेत्तत. ॥ ८० ॥

भावितं गन्धकं दद्यात्तरपित्तेन संयुतम् ।
शोलयेद्रवितापेन पिष्टिका भवति क्षणात् ॥ ८१ ॥

गन्धकं सूक्ष्मचूर्णं तु चणकाम्लेन पार्वति ! ।
भावयेत्सप्तवाराणि स्त्रीपुष्पेण च सप्तधा ॥ ८२ ॥

द्रुतसूतकमध्ये तु कर्पूरं गन्धकं रसम् ।
दापयेन्निक्षिपेद्गोष्ठे सप्ताहाद्गन्धपिष्टिका ॥ ८३ ॥

छायाशुष्क ततो गोल मूकमूषागतं प्रिये ! ।
दत्वा लघुपुटं धमात खोटो भवति शोभन ॥ १२६ ॥

रंभा वीरा स्नुहीक्षीरं कन्चुकी यवचिञ्चिका ।
दीनारी चेव गोरम्भा मीनाक्षी कास्मार्चिका ॥१२७॥

एभिर्मर्दितसूतस्य पुनर्जन्म न विद्यते ।
पूर्ववत्कमयोगेन खोटो भवति शोभन. ॥ १२८ ॥

विष्णुक्रान्ता च व(च)काका(गी)वला च तुलसी तथा ।
महासोमाऽहिवल्ली च सूर्यावर्तं च सुन्दरि ! ॥१२९॥

एभिस्तु मर्दितस्सूत पूर्ववत्खोटता नयेत्[1] ।
स्नुहीक्षीरं च काञ्जीरं(क) बीजानि कनकस्य च ॥

कन्चुकी लाङ्गली चेन्द्रवारणी विषमुष्टिका ।
पालाशमूलतोयञ्च मर्दयेत्तेन सूतकम् ॥ १३१ ॥

समहेम्नि सम सूत पिष्टिका कारयेद्बुध ।
महारसान्पिष्टिकार्धं मर्दयेदोषधीरसै ॥ १३२ ॥

यामलय मर्दयित्वा गोलक कारयेद्बुध ।
पिष्टिका बन्धयित्वा तु गन्धतैले विपाचयेत् ॥१३३॥

अन्धमूषागत गोल छायाशुष्क तु कारयेत् ।
ततो लघुपुट दत्वा खदिराग्नौ तु धामयेत् ॥ १३४ ॥

---

1. मुखेन ग्रसते ग्रास जारणा तेन सुन्दरि ! ।
रसोनराजिकामूलैर्मर्दित वरवर्णिनि ! ॥

दिव्यौषधिपुटं पाच्यं रसखोटस्य लक्षणम् ।
एतत्ते कथित गुह्य विज्ञेय रसवादिभि ॥
मत्प्रसादेन देवेशि ! तस्य सिद्धिर्न संशय ।

अहोरात्र विमर्द्य वा चूर्णबन्ध भवेत्तत ।
तच्चूर्णबन्ध सुम्ने वेध दशगुणोत्तरम् ॥ १४७ ॥

मूलिनीरससूतं च सौतोऽञ्जनसमन्वितम् ।
पूर्ववत्पिष्टिकायोगात्खोटो भवति शोभन ॥ १४८ ॥

सौतोऽञ्जन सतगर सृष्टित्रययुत रसम् ।
भवेद्बद्धिसट् क्षिप्र सूतकन्सर्वकर्मकृत् ॥ १४९ ॥

हैमाभ्र चैव तारास्य शुक्लाभ्र चाग्रतीक्ष्णकम् ।
चन्द्राभ्र चैव नागाभ्र सट् सूतेन बन्धयेत् ॥ १५० ॥

यवालामोपधीकृष्ट महारससमन्वितम् ।
हेम्ना तारेण शुक्लेन तीक्ष्णचोरगेस्तथा ॥ १५१ ॥

एभिर्द्रव्यैस्समस्तैर्वा पिष्टि कृत्वा समे समाम् ।
मारयेत्पूर्वविधिना गर्भयन्त्रे तुषाग्निना ॥ १५२ ॥

समाग्र सूतक दत्वा वार वार पुन पुन ।
जायते त्रिविध खोट कान्तबद्धो महारस ॥१५३॥

भवेत्सङ्गलिकयोगाद्वेधो दशगुणोत्तर ।

निगलबन्ध ॥

खोट पोटस्तथा भस्म धूलीकल्पश्च पञ्चम ॥ १५४ ॥

एते निगलयोगाभ्या सर्वबन्धफलोदय ।
स्नुह्यर्कसभव क्षीर बन्ध(ब्रह्म)बीजानि गुग्गुलु ॥१५५॥

सैन्धव द्विगुण दत्वा मर्दयेत विचक्षण ।
पिष्टिकाबन्धन कृत्वा करकेनानेन सुन्दरि ! ॥१५६॥

बिल्वप्रमाण कृत्वा तु मूषामतिदृढा शुभाम् ।
ऊर्ध्वाधो रक्षण दत्वा मूषामध्ये रस क्षिपेत् ॥१५७॥

मूषामध्ये प्रदातव्यं दग्धशङ्खादिचूर्णकम् ।
मुखं तस्य दृढं बध्वा लोणमृत्तिकया बुध. ॥ १५८ ॥

कारयेत्सन्निलोणं च छायाशुष्कं तु कारयेत् ।
उक्तो निगलबन्धोऽयं पुत्रसाऽपि न कथ्यते ॥१५९॥

तुषकर्षाग्निना भूमौ मृदुम्वेदं तु कारयेत् ।
अहोरात्रं त्रिरात्रं वा पुटं दत्वा प्रयत्नतः ॥ १६० ॥

सुरागते खदिराङ्गारै रसेन्द्रं लोटतां नयेत् ।
गोधीरं टङ्कणं क्षारं दत्वा दत्वा तु शोधयेत् ॥१६१॥

अक्षीणो मिलते हेम्नि समावर्तश्च जायते ।
ममाशभाणं तत्तु शुद्धसूतेन कारयेत् ॥ १६२ ॥

धमनेनूर्वयोगेन रसेन्द्र लोटनां नयेत् ।
अयोरसङ्क्रियायोगाद्देहो दशगुणोऽर ॥ १६३ ॥

पलाशबीजनिर्यास कोकिलोन्मत्तयोर्गी ।
शूलिनीरसगुक्तं पचेत्तैलमथान्वितम् ॥ १६४ ॥

पिष्टिकायंत्रन कृत्वा निगडेन तु बन्धयेत्[1] ।
अदक्ष्य तु पचेत्र यत्नार्कक्षीरसिन्धुना ॥ १६५ ॥

ताम्रेण लोढितेन सिक्तनागृत्तयेन च ।

सामुद्रं शाम्बरं चैव लवणं निगमोत्तमः ।
स्नुह्यर्कसम्भवं क्षीरं ब्रह्मबीजानि कारयेत् ॥ १६९ ॥

कन(त)कस्य च बीजानि लोणाष्टेन च मर्दयेत् ।
निगलोऽन्यस्तु गोजिह्वामूलानि स्त्रीरजोऽपरः ॥१७०॥

वाकुची ब्रह्मबीजानि स्नुह्यर्कक्षीरसैन्धवम् ।
ज्वालिनी काकविष्ठा च प्रशस्तो निगलोत्तमः ॥१७१॥

लवणं टङ्कणं क्षारं शिलातालकगन्धकम् ।
तथाऽम्लवेतसं ताप्यं हिङ्गुलं समभागिकम् ॥ १७२ ॥

स्नुह्यर्कपयसा युक्तं पेषयेन्निगलोत्तमम् ।
पिष्टिकां वेष्टयेदेषामेकेन निगलेन तु ॥ १७३ ॥

लोणमूषागतं प्राग्वत्खोटं कृत्वा तु वेधयेत् ।
द्वितीयं गोलकं वक्ष्ये पिष्टिकास्तम्भमुत्तमम् ॥ १७४ ॥

द्विपदीरजमूत्रेण सैन्धवाभ्रं सगुग्गुलम् ।
पिष्टीं संवेष्ट्य कल्केन मृदा तु पुनरष्टधा ॥ १७५ ॥

तुषकर्षाग्निना भूमौ मृदुस्वेदं तु कारयेत् ।
अहोरात्रं त्रिरात्रं वा पूर्ववत्खोटतां नयेत्[1] ॥ १७६ ॥

वाकुची ब्रह्मबीजानि गगनं विमलं मणिम् ।
सौवर्चलं सैन्धवं च टङ्कणं गुग्गुलुं तथा ॥ १७७ ॥

द्विपदीरजसा भूत्रे सुश्लक्ष्णं तं च मर्दयेत् ।
पिष्टीमावेष्ट्य कल्केन पूर्ववत्खोटतां नयेत् ॥ १७८ ॥

---

1. त्रयोविंशोल्लासगतमूलिकाबन्धात् (पृ. ४०८) एतत्पर्यन्तं पाठो रसार्णवेऽमुनैव सन्दर्भेणोपलभ्यते ।

रसमूर्च्छनविधि ॥

[प्रथम प्रकार ।]

अथ मूर्च्छां प्रवक्ष्यामि रसस्य परमेश्वरि ! ।
वाहीक सैन्धव कन्या धूशरो लशुन वचा ॥ १७९ ॥
मेघनादा काकमाची सर्वांश मर्दयेद्रसम् ।
श्लक्ष्ण त गोलक कृत्वा हिंगुना वेष्टयेद्बहि ॥१८०॥
समेन लोणयन्त्रस्थ कृत्वा तद्विपचेद्दिनम् ।
चण्डाग्निना स्वाङ्गशीतमध पात्रे स्थित रसम् ॥ १८१ ॥
चूर्णीभूत समादाय सान्द्रद्विगुणवाससा ।
बध्वा सोमानले यन्त्रे ह्यथोर्ध्वं गन्धक समम् ॥१८२॥
दत्वा पचेत्पुनर्गन्धमेव गन्ध तु षड्गुणम् ।
जारयेत्स रसो देवि ! मूर्च्छितम्सर्वरोगहा ॥ १८३ ॥

[द्वितीय प्रकार ।]

गन्धक नवसार च शुद्धसूतसम समम् ।
याम सम्मर्दयेच्लक्ष्ण काचकूप्या निनिक्षिपेत् ॥१८४॥
मृत्तिकर्पटैर्लिप्त्वा कूपीं घर्मे विशोषयेत् ।
कूपिका वालुकायन्त्रे द्वादशप्रहर पचेत् ॥ १८५ ॥
स रसो जायते देवि ! मूर्च्छितो रञ्जितो भवेत् ।

[तृतीय प्रकार ।]

रसार्धं गन्धक मर्द्यं यामयुग्म खरातपे ॥ १८६ ॥
तत्सितजयन्त्याश्च रसैस्समर्दयेत्र्यहम् ।
तन्मतु गोलक कृत्वा मूषाया सन्निरोधयेत् ॥१८७॥

शोषयित्वा धर्मेत्किञ्चित्सन्तप्ता ता जले क्षिपेत् ।
त रसेन्द्र समादाय भावयेद्गोक्षुरद्रवै ॥ १८८ ॥
मूर्च्छितो जायते सूतस्सर्वरोगहरश्शुभ ।
बद्धरसलक्षणम् ॥
अक्षयश्च लघुद्रावी तेजस्वी निर्मलो गुरु ॥ १८९ ॥
स्फुटन पुनरावर्ती बद्धसूतस्स उच्यते ।

जलूकायन्त्रा. ॥
[मर्दनजलूका ।]
रसस्याष्टमभागं तु स्वर्णं वा नागमेव वा ॥ १९० ॥
श्लेष्मातकफल पक्व कोकिलाक्षकबीजकम् ।
तिलपिण्याकचूर्णं च तत्सर्वं विमर्दयेत् ॥ १९१ ॥
शाल्मल्याश्चैव पञ्चाङ्ग रस तत्र विनिक्षिपेत् ।
जलूका जायते यावत्तावन्मर्द्यात्तत क्षिपेत् ॥ १९२ ॥
कर्पूर बाकुचीतैल सैन्धव टङ्कण कणाम् ।
कपिकच्छुरोमाणि तत्सर्वं पेषयेज्जलै ॥ १९३ ॥
एतत्पूर्वजलूका त्रिसप्ताह तत्खल्वके ।
जलूका जायते दिव्या मर्दनाख्या सुरार्चिते ! ॥१९४॥
नारीणामृतुकाले तु सा योज्या योनिगह्वरे ।
मददर्पहरा तासा मदविह्वलकारका ॥ १९५ ॥
बाल्ये चाष्टाङ्गुला योज्या यौवने सा दशाङ्गुला ।
द्वादशाङ्गुलिका योज्या प्रगल्भाना जलूकका ॥ १९६ ॥
यस्तु ता धारयेन्मूर्ध्नि वीर्यं तस्य स्थिर भवेत् ।

[मन्मथजलूका ।]
रसेन्द्रस्याष्टम भागं स्वर्णं वा नागमेव वा ॥ १९७ ॥

शाल्मलीत्वग्यस्तिकन्दनीलामूलमुनिच्छदम् ।
एषां द्रवैश्चसखल्वे सर्वं मर्द्यमतन्द्रित· ॥ १९८ ॥
इलेष्मातकफलं पक्वं कोकिलाक्षकबीजकम् ।
सुपक्वबिल्वमज्जां च तस्मिन्क्षिप्त्वा विमर्दयेत् ॥१९९॥
जल्लका जायते यावत्कर्पूराद्यं च पूर्ववत् ।
तस्मिन्क्षिप्त्वा त्रिसप्ताहं मर्दयेच्चसखल्वके ॥ २०० ॥
मन्मथाख्या जल्लका स्यात्पूर्ववत्फलदायिनी ।

[कन्दर्पजल्लका ।]

सूतकस्याष्टमं भागं हाटकं सीसमेव वा ॥ २०१ ॥
शुण्ठी भृङ्गी वरा क्षौद्री छागक्षीरघृतं गवाम् ।
मूत्रं त्रिस्सप्तदिवसं मर्दयेच्चसखल्वके ॥ २०२ ॥
जल्लका जायते यावत्कर्पूराद्यं च पूर्ववत् ।
एकविंशद्दिनं मर्द्यं जल्लका जायते शुभा ॥ २०३ ॥
कन्दर्पाख्या सुरेशानि ! पूर्ववत्फलदायिनी ।

[मदनजल्लका ।]

त्रिदिनं मर्दयेत्खल्वे सूतनिष्कचतुष्टयम् ॥ २०४ ॥
त्रिपलं चाम्रनिर्यासं स्तोक स्तोकं विनिक्षिपेत् ।
पञ्चैव महाशम्या दातव्यं मर्दनक्षमम् ॥ २०५ ॥
जल्लका मदनाख्येयं जायते शुभदा नृणाम् ।
रामाणां मददर्पाणां-द्राविकाऽग्निघृतौ यथा ॥२०६॥
पूर्ववत्क्रमयोगेन वीर्यस्तम्भकरं भवेत् ।
नानावर्णं तथा स्वच्छं धृतं योनौ जल्लकवत् ॥ २०७ ॥
बध्यते सूतको यस्तु जल्लकाबन्धलक्षणम् ।

। इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ चतुर्विंशोल्लास. ।

॥ पञ्चविंश उल्लासः ॥

परिभाषा ॥

परिभाषां प्रवक्ष्यामि शृणु त्वं सावधानतः ।

वैद्यभागः ॥

अर्धं सिद्धरसं देवि ! त्रिप्वेकं हेमभस्म च ॥ १ ॥

पादांशकं रूप्यभस्म षष्ठांशं ताम्रभस्म च ।
अष्टमांशं हि कान्ताभ्रं कलांशं नवरत्नकम् ॥ २ ॥

रसेश्वरं समुद्दिश्य रसवैद्याय धीमते ।
रसाचार्याय सिद्धाय दद्यादिष्टार्थसिद्धये ॥ ३ ॥

कज्जली पङ्करसश्च ॥

धातुभिर्गन्धकाद्यैश्च निर्द्रवैर्मर्दितो रसः ।
सुश्लक्ष्णः कज्जलाभोऽसौ कज्जली साऽभिधीयते ॥

सद्रवे मर्दितस्सोऽपि इति पा(पं)करसस्स्मृतः ।

पिष्टी ॥

अर्कांशतुल्याद्रसतोऽथ गन्धा-
न्निष्कार्धतुल्यात्त्रुटिशोऽपि खल्वे ।
अर्कातपे तीव्रतरे विमर्द्या-
त्पिष्टिर्भवेत्सा नवनीतरूपा ॥ ५ ॥

खल्वे विमर्द्य गन्धेन दुग्धेन सह पारदम् ॥ ६ ॥

पेषणात्पिष्टितां याति सा पिष्टीति मता परैः ।

पातनपिष्टी ॥

चतुर्थांशसुवर्णेन रसेन कृतपिष्टिका ॥ ७ ॥
भवेत्पातनपिष्टी सा तथा रूप्यादिभि कृता ।

हेमपिष्टी तारपिष्टी च ॥

रूप्यं वा जातरूप वा रसगन्धादिभिर्हतम् ॥ ८ ॥
समुत्थितं च बहुशस्सा कृष्टी हेमतारयो: ।
कृष्टीं क्षिप्त्वा सुवर्णान्ते न वर्णो हीयते तया ॥ ९ ॥
स्वर्णकृष्ट्या कृतं बीजं रसस्य परिरञ्जनम् ।

वरलोहकम् ॥

तामं तीक्ष्णसमायुक्तं द्रुतं निक्षिप्य भूरिश. ॥ १० ॥
सगन्धे लिकुचद्रावे निर्गतं वरलोहकम् ।

हेमरक्ती तारक्ती च ॥

तेन रक्तीकृतं स्वर्णं हेमरक्तीत्युदाहृता ॥ ११ ॥
निक्षिप्ता सा द्रुते स्वर्णे वर्णोत्कर्षविधायिनी ।
तारस्य रञ्जनी चापि बीजरागविधायिनी ॥ १२ ॥
एवमेव प्रकर्तव्या तारस्क्ती मनोहरा ।
रञ्जनी खलु रूप्यस्य बीजानामपि रञ्जनी ॥ १३ ॥

चन्द्रानलदलम् ॥

मृतेन वा बद्धरसेन वान्य
लोहेन वा साधितमन्यलोहम् ।
सितं हि पीतत्वमुपागतं त-
दलं हि चन्द्रानलयो प्रसिद्धम् ॥ १४ ॥

आभास(ा)मृतवन्ध्येन रसेन सह योजितम् ।
साधितं वाऽन्यलोहेन सितं पीतं हि तद्दलम् ॥ १५ ॥

अयोनागम् ॥

ताप्येन निहतं कान्तं सप्तवारं समुत्थितम् ।
तद्द्वयं द्विपलं चाऽथ ताम्रभस्म पलद्वयम् ॥ १६ ॥
सर्वं निक्षिप्य मूषायां सप्तवारं धमेद्दृढम् ।
तदयोनागमित्युक्तं साधकं देहलोहयोः ॥ १७ ॥
रसेन सारणायन्त्रे तदीया गुलिका कृता ।
सा धृता वदने हन्ति मेहरोगानशेषतः ॥ १८ ॥
कुरुते दन्तदार्ढ्यं च दृशौ गृध्रदृशाविव ।
तथाऽन्यान्क्षेत्रजान्रोगान्रोगाञ्जत्वूर्ध्वसंभवान् ॥ १९ ॥

शुल्वनागम् ॥

माक्षिकेण हतं तामं दशवारं समुत्थितम् ।
तद्द्वद्विशुद्धनागं हि द्वितयं तच्चतुष्पलम् ॥ २० ॥
नीलाञ्जनहतं भूयस्सप्तवारं समुत्थितम् ।
इति संसिद्धमेतद्धि शुल्वनागं प्रकीर्तितम् ॥ २१ ॥
साधितस्तेन सूतेन्द्रो वदने विधृतो नृणाम् ।
निहन्ति मासमात्रेण मेहव्यूहमशेषतः ॥ २२ ॥
पथ्याशनस्य चर्पेण पलितं वलिभिस्सह ।
गृध्रदृष्टिर्लसद्दृष्टिस्सर्वारोग्यसमन्वितः ॥ २३ ॥

पिञ्जरी ॥

लोहं लोहान्तरे क्षिप्तं भ्मातं निर्वापितं द्रवे ।
पाण्डुपीतप्रभं जातं पिञ्जरीत्यभिधीयते ॥ २४ ॥

चन्द्रार्कम् ॥

भागाष्षोडश तारस्य तथा द्वादश भास्वतः ।
एकत्रावर्तितास्ते तु चन्द्रार्कमिति कथ्यते ॥ २५ ॥

निर्वाप(ह)णम् ॥

घार्य(म्य)(साध्य)लोहेऽन्यलोहश्चेत्प्रक्षिप्तो वह्निनाऽत्त ।
निर्वापणं तु तत्प्रोक्तं वैद्यैर्निर्वाहण खलु ॥ २६ ॥

क्षिपेन्निर्वाहणं द्रव्ये निर्वाहये समभागिकम् ।
आवाप्यं वापनीयञ्च भागे दृष्टे च दृष्टवत् ॥ २७ ॥

लोहभस्मसिद्धिलक्षणम् ॥

मृत तरति यत्तोये लोहं वारितरं हि तत् ।
अङ्गुष्ठतर्जनीघृष्ट यत्तद्रेखान्तरे विशेत् ॥ २८ ॥
मृत लोह तदुद्दिष्ट रेखापूर्णाभिधानतः ।

निरुत्थभस्मलक्षणम् ॥

गुडगुञ्जासुखस्पर्शमध्वाज्यैस्सह योजितम् ॥ २९ ॥
न याति प्रकृतिं ध्मानादपुनर्भवमुच्यते ।
लोहेन सह सयुक्त ध्मातं रूप्येण चेल्लिहे(ङ्गे)त् ॥
तदा निरुत्थमित्युक्तं लोह तदपुनर्भवम् ।
एव रूप्य सताम्र चेद्ध्मातं ताम्रं लगेन्न हि ॥ ३१ ॥
तदानिरुत्थं मन्तव्यं रजतं च भिषग्वरैः ।

बीजम् ॥

निर्वाहणविशेषेण तद्वर्णं भवेद्यदा ॥ ३२ ॥
मृदुलं चित्रसङ्काशं तद्बीजमिति कथ्यते ।

उत्तारणम् ॥

इदमेव हि निर्दिष्टं वैद्यैरुत्तारणं खलु ॥ २३ ॥
संसृष्टलोहयोरेकलोहस्य परिनाशनम् ।

ताडनम् ॥

मध्यातं वङ्कनालेन तत्ताडनमुदाहृतम् ॥ २४ ॥

धान्याभ्रम् ॥

चूर्णाभ्रं शालिसंयुक्तं वस्त्रबद्धं हि काञ्जिके ।
निर्यातं मर्दनाद्वस्त्राद्धान्याभ्रमिति कथ्यते ॥ २५ ॥

सत्त्वम् ॥

क्षाराम्लद्रावकैर्युक्तं धातमाकरकोष्ठके ।
यस्ततो निर्गतस्सारस्सत्त्वमित्यभिधीयते ॥ २६ ॥

एककोलीसकः ॥

कोष्ठिकाशिखरापूर्णे· कोकिलाध्मानयोगत. ।
मूषार्कर्ण(ण्ठ)मनुप्राप्तैरेककोलीशको मत. ॥ २७ ॥

स्वेदनाद्यर्हाः कोकिलाः ॥

शिखिन्ना· पावकोच्छिष्टा मृताङ्गाराश्च कोकिला ।
कृष्णाङ्गा. कोकिलाश्चेति पर्यायास्ते परस्परम् ॥२८॥

द्रावणे सत्त्वपाते च माधूकाः खादिराश्शुभाः ।
दुर्द्रवि वंशजापे(ता)स्तु स्वेदने बादराश्शुभा· ॥२९॥

हिङ्गुलाकृष्टरसः ॥

विद्याधराख्ययन्त्रस्थादार्द्रकद्रवमर्दितात् ।
समाकृष्टो रसो योऽसौ हिंगुलाकृष्ट उच्यते ॥ ४० ॥

घोषाकृष्टं चङ्गम् ॥

सल्पतालयुतं कांस्यं वङ्गनालेन ताडितम् ।
मुक्तवङ्गं हि तत्तामं घोषाकृष्टमुदाहृतम् ॥ ४१ ॥

गुह्यनागम् ॥

पलविंशति नागस्य शुद्धस्य कृतचक्रिकम् ।
रूपिकादुग्धसंपिष्टशिलायां(लया) परिलेपितम् ॥४२॥

शरावसंपुटे रुध्वा पचेत्कोडंपुटेन तम् ।
तावद्धारं पचेद्यत्नाद्यावद्भस्म प्रजायते ॥ ४३ ॥

गुडगुग्गुलुगुञ्जाऽऽज्यटङ्कणैः परिमर्द्य तम् ।
मूषामध्ये निरुध्याऽथ ध्मानादुत्थापितं पुनः ॥ ४४ ॥

चक्रीं तेन पुनः कृत्वा पलप्रमितपारदैः ।
लिप्त्वा लिम्पेत्सितार्कस्य पयसा शिलयाऽपि च ॥४५॥

पचेद्वजपुटैरेवं वाराणां खलु विंशतिः ।
पुटे पुटे च नागस्य कुर्यादुत्थापनं खलु ॥ ४६ ॥

नीलज्योतिर्दलैस्सम्यग्दशवाराणि दालयेत् ।
इति सिद्ध हि तत्सीस कर्षमात्रावशेषितम् ॥ ४७ ॥

गुह्यनागाख्यया प्रोक्त श्रेष्ठं रसरसायने ।
निष्कमात्रं तु नागेऽस्मिन् लोहाख्ये या द्रुते सति ॥
स्वतो लक्षगुणां हैमीं शलाकां ग्रसते ध्रुवम् ।
ॐ
लगेत्तैलप्रतप्त तत्स्वर्णमुद्गिरति ध्रुवम् ॥ ४८ ॥
ॐ
गुह्यनागोऽयमुद्दिष्टश्शक्तिस्वच्छन्दभैरवः ।

वज्रनागम् ॥

तीक्ष्णं नीलाञ्जनोपेतं ध्मातं हि बहुशो दृढम् ॥ ५० ॥

मृदु कृष्णं द्रुतद्रावं वरनागं तदुच्यते ।

उत्थापनम् ॥

मृतस्य पुनरुद्भूतिस्ता प्रोक्तोत्थापनाख्यया ॥ ५१ ॥

ढालनम् ॥

द्रुतद्रव्यस्य निक्षेपो द्रवे तत् ढालनं मतम् ।

चपलः ॥

त्रिंशत्पलगितं नागं भानुदुग्धेन मर्दितम् ॥ ५२ ॥

विभृद्य पुटयेत्तावद्यावत्कर्पावशेषकम् ।
न तत्पुटसहस्रेण क्षयमायाति सर्वदा ॥ ५३ ॥

चपलोऽयं समादिष्टो वार्तिकैर्नागसम्भव ।
इत्थं हि चपलः कार्यो वङ्गस्यापि न संशय ॥ ५४ ॥

तत्स्पृष्टहस्तसंस्पृष्ट केवलो बध्यते रसः ।
स रसो धातुवादेषु शस्यते न रसायने ॥ ५५ ॥

अय हि कर्पणाख्येन लोकनाथेन कीर्तितः ।
आमकाश्मरजम्सूक्ष्मं पञ्चमांशसमन्वितम् ॥ ५६ ॥

कुमारीमूलतोयेन मर्दयेदेकवासरम् ।
शार्ङ्गेरीस्वरसे वाऽपि दिनमेकमनारतम् ॥ ५७ ॥

एवं भूनागधौतं च मर्दयेद्दिवसद्वयम् ।
अथैकपलनागेन तावता त्रपुणाऽपि च ॥ ५८ ॥

दशनिष्करसेन्द्रेण श्लक्ष्णपिष्टं समाचरेत् ।
योजयित्वाऽऽर्द्रकल्केन यथापूर्वं विमर्दयेत् ॥ ५९ ॥

ततश्शाणरसेन्द्रेण सत्वेन रसकस्य च ।
पिष्टीं कृत्वा तु पूर्वेण मूर्वकल्कैश्च योजयेत् ॥ ६० ॥

अथ प्रक्षाल्य सोष्णेन काञ्जिकेन प्रशोषयेत् ।
पलार्धं शुद्धसस्येन अष्टगुञ्जारसेन च ॥ ६१ ॥

विमर्द्य काञ्जिकैः कुर्यान्मरिचप्रमिता वटीः ।
निरुध्य वज्रमूषायां सन्धिबन्धं विधाय च ॥ ६२ ॥

शिखित्रैर्नवभिस्सम्यग्भस्त्राभ्यां प्रधमेत्खलु ।
ततो मूषागतं सत्वं समादाय समन्ततः ॥ ६३ ॥

धमेत्प्रकटमूषायां वङ्कनालेन शोधयेत् ।
दशशाणं हि तत्सत्वं भस्मना लवणेन च ॥ ६४ ॥

सकाञ्जिकेन संपेष्य पुटयोगेन शोधयेत् ।
त्रिनिष्कप्रमिते तस्मिन्पूर्वप्रोक्तेन भस्मना ॥ ६५ ॥

अशीतिगुणितं नागं धमित्वा निर्वाहयेत्खलु ।
इयता पूर्वसूतोऽसौ क्षीयते न कथञ्चन ॥ ६६ ॥

चपलोऽयं समुद्दिष्टो लोकनाथेन शम्भुना ।
अनेनापि रसश्शीघ्रं पूर्ववद्बध्यते सुखम् ॥ ६७ ॥

कारवल्लीजटाचूर्णैर्दशधा पुटितो हि सः ।
भवेन्नागविनिर्मुक्तो ग्रासं गृह्णात्यशोपतः ॥ ६८ ॥

सुखं प्रकटमूषायां भवेद्द्विगुणोत्तरः ।
जीर्णग्रासो रसो ह्येषां देहलोहकरो भवेत् ॥ ६९ ॥

भूनागधौतम् ॥

भूभुजङ्गशकृत्तोयैः प्रक्षाल्यापहृतं मलम् ।
कृष्णवर्णं हि तत्प्रोक्तं धौताख्यं रसवादिभिः ॥ ७० ॥

द्रुन्द्वानम् ॥

द्रव्ययोर्मेलनं ध्मानाद्द्रुन्द्वानं परिकीर्तितम् ।

भञ्जनी ॥

भागाद्वृध्याधिके क्षेपमनुवर्णसवर्णकम् ॥ ७१ ॥
दलैर्वा वर्णिकाग्रासो भञ्जनी वादिनिर्मिता ।

फुल्लिका ॥

पतङ्गीकल्कतो जाता लोहे तारत्वहेमता ॥ ७२ ॥
दिनानि कतिचित्स्थित्वा यात्यसौ फुल्लिका मता ।

पतङ्गीरागः ॥

रञ्जितार्धरसाल्लोहाद्न्यद्वा चिरकालत ॥ ७३ ॥
विनिर्याति स निर्दिष्ट. पतङ्गीरागसञ्ज्ञक ।

आवापः ॥

द्रुते द्रव्यान्तरक्षेपाल्लोहाद्यै क्रियते हि य ॥ ७४ ॥
स आवाप .प्रतीवापस्तदेवाच्छादनं मतम् ।

अभिषेकः ॥

द्रुते वह्निस्थिते लोहे विरम्याऽष्टनिमेषकम् ॥ ७५ ॥
सलिलस्य परिक्षेपस्सोऽभिषेक इति स्मृत ।
नागं वा वङ्ग वा मद्राव्य निषेचयेच्छतं वारान् ॥७६॥
उक्तद्रव्ये तद्द्रवताऽनमेतद्धि सोऽभिषेकन्तु ।

निर्वापः ॥

तप्तस्याप्सु परिक्षेपो निर्वापस्तपनं च तत् ॥ ७७ ॥
प्रतिवाप्यादिक कार्यं द्रुतलोहे सुनिर्मले ।

शुद्धावर्तः ॥

यदा हुताशो दीप्तार्चिश्शुक्लोत्थानसमन्वित. ॥ ७८ ॥

शुद्धावर्तस्तदा ज्ञेयस्स कालस्सत्वनिर्गमे ।

रेखावर्तः ॥

द्राक्ष्यद्रव्यनिभा ज्वाला दृश्यते धमने यदा ॥ ७९

द्रवम्योन्मुखता सेयं रेखावर्तस्य कथ्यते ।

स्वाङ्गशीतं वह्नि(वह्निश्)शीतञ्च ॥

वह्निस्थमेव शीतं यत्तदुक्तं स्वाङ्गशीतलम् ॥ ८० ॥

अग्नेराकृष्टशीतं यद्वह्नि(वह्निश्)शीतं तदीरितम् ।

स्वेदनम् ॥

क्षाराम्लैरौषधैर्वाऽपि डोलायन्त्रे स्थितस्य हि ॥ ८१ ॥

पचनं स्वेदनाख्यं स्यान्मलशैथिल्यकारकम् ।

मर्दनम् ॥

उद्दिष्टैरौषधैस्सार्धं सर्वाम्लैः काञ्जिकैरपि ॥ ८२ ॥

पेषणं मर्दनाख्यं स्याद्बहिर्मलविनाशनम् ।

मूर्च्छनम् ॥

मर्दनादिष्टभैषज्यैर्नष्टपिष्टित्वकारकम् ॥ ८३ ॥

तन्मूर्च्छनं हि विज्ञेयं द्विभूजकञ्चुकनाशनम् ।

नष्टपिष्टिः ॥

स्वरूपस्य विनाशेन पिष्टित्वापादनं हि यत् ॥ ८४ ॥

विवृद्धि(द्धि)र्जितसत्त्वेन(त्त्वोऽसौ) नष्टपिष्टिस्तु उच्यते ।

उत्थापनम् ॥

स्वेदतापादियोगेन स्वरूपापादनं पुनः ॥ ८५ ॥

तदुत्थापनमित्युक्तं मूर्च्छाव्यापत्तिनाशनम् ।

पातनम् ॥

उक्तौषधैर्मर्दितपारदस्य
यन्त्रस्थितस्योर्ध्वमधश्च तिर्यक् ।
निर्यापनं पातनसंज्ञयोक्तं
दक्षाहिसंपर्कजकल्पुकाम्म ॥ ८६ ॥

रोधनम् ॥

जलसैन्धवयुक्तस्य रसस्य दिवसत्रयम् ॥ ८७ ॥
स्थितिराप्यायिनी कुम्भे योऽसौ रोधनमुच्यते ।

नियमनम् ॥

रोधनाल्लब्धवीर्यस्य चपलत्वनिवृत्तये ॥ ८८ ॥
क्रियते यो घटे स्वेदः प्रोक्तं नियमनं हि तत् ।

दीपनम् ॥

धातुपाषाणमूलाद्यैस्संयुक्तो घटमध्यतः ॥ ८९ ॥
मासार्धं त्रिदिनं स्वेदो दीपनं तन्मतं बुधैः ।

ग्रासमानम् ॥

इयन्मानस्य सूतस्य भोज्यद्रव्यात्मिका मितिः ॥ ९० ॥
इयतीत्युच्यते योऽसौ ग्रासमानमितीरितम् ।

जारणा ॥

ग्रासस्य चारणं गर्भद्रावणं जारणं तथा ॥ ९१ ॥
इति त्रिरूपा निर्दिष्टा जारणा चरवार्तिकैः ।
ग्रासः पिण्डः परीणामस्तिस्रश्चाख्याः पराः पुनः ॥९२॥
समुखा निर्मुखा चेति जारणा द्विविधा मता ।
निर्मुखा जारणा प्रोक्ता बीजादानेन भागतः ॥ ९३ ॥

समुग्वजारणा ॥

शुद्धं स्वर्णं च रूप्यं च वीनमित्यभिधीयते ।
चतुष्पष्टयंशतो बीजप्रक्षेपो मुखमुच्यते ॥ ९४ ॥

एव कृते रसो ग्रासलोलुपो मुखवान् भवेत् ।
कठिनान्यपि लोहानि क्षमो भवति भक्षितुम् ॥ ९५ ।

इयं हि समुखी प्रोक्ता जारणाऽमृतजार(चारि)णा ।

निर्मुखचारणा ॥

दिव्यौषधिसमायोगात्स्थित· प्रकटकोष्ठिषु ॥ ९६ ॥

भुक्ते निखिललोहाद्यान्योऽसौ राक्षसवक्त्रवान् ।

चारणा ॥

रसस्य जठरे ग्रासक्षेपणं चारणा मता ॥ ९७ ॥

गर्भद्रुतिः ॥

ग्रसस्य द्रावणं गर्भे गर्भद्रुतिरुदाहृता ।

बाह्यद्रुतिः ॥

बहिरेव द्रुतीकृत्य घनसत्वादिकं खलु ॥ ९८ ॥

जारणाय रसेन्द्रस्य सा बाह्यद्रुतिरुच्यते ।

द्रुतिलक्षणम् ॥

निर्लेपित्वं द्रवत्वं च तेजस्त्वं लघुता तथा ॥ ९९ ।

असंयोगश्च सूतेन पञ्चधा द्रुतिलक्षणम् ।

औषधाज्यादियोगेन लेहधात्वादिकं सदा ॥ १०० ॥

उच्छिष्टते द्रवाकारा सा द्रुतिः परिकीर्तिता ।

जारणा ॥

द्रुतग्रासपरीणामो बिडयन्त्रादियोगतः ॥ १०१ ॥

जारणेत्युच्यते तस्या प्रकारास्सन्ति कोटिश ।

विडम् ॥

क्षारैरम्लैश्च गन्धाद्यैर्मूत्रैस्सपटुभिस्तथा ॥ १०२ ॥
रसप्रासस्य जीर्णार्थं तद्विडं परिकीर्तितम् ।

रञ्जनम् ॥

ससिद्धबीजसत्त्वादिजारणेन रसस्य हि ॥ १०३ ॥
पीतादिरागजनन रञ्जन समुदीरितम् ।

सारणा ॥

सूते सतैरयन्त्रस्थे स्वर्णादिक्षेपण हि यत् ॥ १०४ ॥
वेधाधिक्यकर लोहे सारणा सा प्रकीर्तिता ।

वेध ॥

व्यवायिभेषजोपतो द्रव्ये क्षिप्तो रस खलु ॥ १०५ ॥
वेध इत्युच्यते तज्ज्ञै स चानेकविधस्स्मृत ।
लेप क्षेपश्च कुन्तश्च शब्दाख्यो धूमसज्ञक ॥१०६॥

लेपवेध ॥

लेपन कुरुते लोह स्वर्णं वा रजत तथा ।
लेपवेधस्स विज्ञेय पुटमल च सौकरम् ॥ १०७ ॥

क्षेपवेध ॥

प्रक्षेपण द्रुते लोहे वेधस्स्यात्क्षेपसज्ञक ।

कुन्तवेध ॥

सन्दशधृतसूतेन द्रुतद्रव्याहतिश्च य ॥ १०८ ॥
सुवर्णत्वादिकरण कुन्तवेधस्स उच्यते ।

धूमवेधः ॥

वह्नौ धूमायमानेऽन्तःप्रक्षिप्तरसधूमतः ॥ १०९ ॥
स्वर्णाद्यापादनं लोहे धूमवेधस्स ईरितः ।

शब्दवेधः ॥

मुखस्थिते रसे नाल्या लोहस्य धमनात्खलु ॥ ११० ॥
स्वर्णरूप्यत्वजननं शब्दवेधस्स कीर्तितः ।

उत्पाटनम् ॥

पिण्डद्रव्यस्य सूतेन कालुष्यादिनिवारणम् ॥ १११ ॥
प्रकाशनं च वर्णस्य तदुत्पाटनमीरितम् ।

स्वेदनम् ॥

क्षाराम्लैरौषधैस्सार्धं भाण्डे रुध्वाऽतियत्नतः ॥ ११२ ॥
भूमौ निखन्यते यत्तत्स्वेदनं समुदीरितम् ।

सन्यासः ॥

रसस्यौषधयुक्तस्य भाण्डे रुद्धस्य यत्नतः ॥ ११३ ॥
सदाऽग्नियुतचुल्यन्त क्षेपस्सन्यास उच्यते ।
द्वावेतौ स्वेदसन्यासौ रसराजस्य निश्चितम् ॥ ११४ ॥
गुणप्रभावजननौ शीघ्रव्याप्तिकरौ तथा ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमतीकरणविश्रान्तौ पञ्चनिर्णोल्लासः

॥ षड्विंश उल्लासः ॥

यन्त्राणि ॥

रसो नियन्त्र्यते येन यन्त्रं तदिति कथ्यते ।

१. खल्वयन्त्रम् ॥

खल्वयन्त्रं द्विधा प्रोक्तं मर्दनादिककर्मणि ॥ १ ॥

खल्वं लोहमयं देवि ! पाषाणोत्थमथाऽपि वा ।
खल्वयोग्या शिला नीला श्यामा स्निग्धा दृढा गुरुः ॥

खल्वयन्त्रं द्विधा प्रोक्तं रसादिमुखमर्दने ।
षोडशाङ्गुलिकोत्सेधा नवाङ्गुलिमुविस्तरा ॥ २ ॥

चतुर्विंशाङ्गुलीदीर्घमूषणी द्वादशाङ्गुला ।
विंशत्यङ्गुलदीर्घा वा स्यादुत्सेधे दशाङ्गुला ॥ ४ ॥

खल्वप्रमाणं तज्ज्ञेयं श्रेष्ठं स्याद्रसमर्दने ।
षोडशाङ्गुलविस्तारः खल्वो भवति वर्तुलः ॥ ५ ॥

चतुरङ्गुलनिम्नं च मध्येऽतिमसृणीकृतम् ।
मर्दनी चिपिटाऽधस्तात्सुग्रहा च शिखोपरि ॥ ६ ॥

अयं हि वर्तुलः खल्वो मर्दनेऽतिसुखप्रदः ।
अयसा कान्तलोहेन लोहखल्वमपीदृशम् ॥ ७ ॥

अधस्तादुद्रोणिका कार्या वह्निप्रज्वालनोचिता ।

उत्सेधेन नवाङ्गुलः खलु कलातुल्याङ्गुलायामवान्
विस्तारेण नवाङ्गुलो रसमितैर्निम्नैस्तथैवाङ्गुलैः ।
कण्ठे द्व्यङ्गुलविस्तरोऽतिमसृणो द्रोणार्धचन्द्राकृतिः
घर्षश्चैव दशाङ्गुलश्च तदिदं खल्वाख्ययन्त्रं मतम् ॥
अस्मिन्पञ्चपलसूतो मर्दनीयो विशुद्धये ॥ ९ ॥
तत्तदौचित्ययोगेन खल्वेष्वन्येषु शोधयेत् ।

[तप्तखल्वः ।]

लोहे नवाङ्गुल. खल्वो निम्नश्चैव षडङ्गुल. ॥ १० ॥
मर्दकोऽष्टाङ्गुलश्चैव तप्तखल्वाभिधो ह्ययम् ।
कृत्वा खल्वाकृतिं चुल्लीमङ्गारै. परिपूर्य ताम् ॥ ११ ॥
तस्मिन्निवेद्य तं खल्वं पार्श्वे भस्त्रिकया धमेत् ।
तस्मिन्विमर्दिता पिष्टि क्षाराम्लैश्च सुसयुता ॥ १२ ॥
भद्रवत्यतिवेगेन स्वेदिता नात्र संशयः ।
कृत. फान्तायसा सोऽय भवेत्कोटिगुणो रस· ॥१३॥

२. खलभीयन्त्रम्- (खलभीयन्त्रं चा) ॥

यन्त्रे लोहमये पात्रे पार्श्वयोर्वलयद्वयम् ।
तादृक् स्वल्पतरं पात्रं वलयद्यो(यो)तकोष्ठकम् ॥ १४ ॥
पूर्वपात्रोपरि न्यस्य स्वल्पपात्रोपरि क्षिपेत् ।
रस समूर्च्छित स्थूलपात्रमापूर्य काञ्जिके. ॥ १५ ॥
द्वियामं स्वेदयेदेवं रसोत्थापनहेतवे ।
तत्स्यात्खलभीयन्त्रं रससाद्गुण्यकारकम् ॥ १६ ॥
सूक्ष्मकान्तमये पात्रे रसस्स्यादुगुणवत्तरः ।

३. ऊर्ध्वपातनयन्त्रम् ॥

अष्टाङ्गुलमिता सम्यक् वर्तुला चिपिटा तले ॥ १७ ॥
चतुरङ्गुलतः कण्ठादधो द्रोण्या समन्विता ।
चतुरङ्गुलविस्तारा निम्नया दृढबद्धया ॥ १८ ॥
तद्विया च घटी मूले षोडशाङ्गुलविस्तृता ।
नवाङ्गुलकविस्तारकर्णे(ण्ठे)न च समन्विता ॥ १९ ॥
पूर्वे घटे रसं क्षिप्त्वा न्युब्जा दद्यात्परां घटीम् ।
सोर्ध्वं निम्ना च परितो दृढपालिकयाऽन्विता ॥ २० ॥
पाल्यां द्रोण्यां क्षिपेत्तोयं पावकं ज्वालयेदधः ।
ऊर्ध्वपातनयन्त्रं हि नन्दिना परिकीर्तितम् ॥ २१ ॥

४. अधःपातनयन्त्रम् ॥

उपरिष्टात्तु तत्स्थाल्या क्षिपेद्रस्यामधोमुखीम् ।
स्थालिका चिपिटीभूता तलान्तर्लिप्तपारदाम् ॥ २२ ॥
क्षिप्त्वा तत्पङ्किले गर्ते ज्वालयेन्मूर्ध्नि पावकम् ।
अध.पातनयन्त्रं हि तदेतत्परिकीर्तितम् ॥ २३ ॥

५. तिर्यक्पातनयन्त्रम् ॥

क्षिपेद्रसं घटे दीर्घे नताधोनालसंयुते ।
तन्नालं निक्षिपेदन्यघटकुक्ष्यन्तरे खलु ॥ २४ ॥
तत्र रुध्वा मृदा सम्यग्वदने घटयोरध. ।
अधस्ताद्रसकुम्भस्य ज्वालयेत्तीव्रपावकम् ॥ २५ ॥
इतरस्मिन् घटे तोयं प्रक्षिपेत्स्वादुशीतलम् ।
तिर्यक्पातनमेतद्धि वार्तिकैरभिधीयते ॥ २६ ॥

पातनात्रितयम्योक्त यन्त्राणा त्रितय खलु ।
पातनैक्य विना सूतो नितरा दोषमृच्छति ॥ २७ ॥

त्रिभिरेवोर्ध्वपातैस्स कस्मादूर्ध्वैर्न मुच्यते ।
द्वि(वि)भागेन विपाकेन द्रव्यान(०येणा)न्योन्ययोगत ॥

पात्रान्तरपरिक्षेपाद्गुणास्स्युर्विविधा खलु ।
खण्डान्युल्लवलाभोमिस्तण्डुलाम्युर्न(र्म)लोज्झिता ॥
पातनैव महाशुद्धिस्तण्डुली परिकीर्तिता ।

६ कच्छपयन्त्रम् ॥

विशालवदने भाण्डे तोयपूर्णे निवेशयेत् ॥ ३० ॥

अपर पृथुल सम्यक् मत(स्त)रन्तस्य मध्यमे ।
आलवाल विडे कृत्वा तन्मध्ये पारद क्षिपेत् ॥ ३१ ॥

ऊर्ध्वाधश्च विड दत्वा मल्लेनारुध्य यत्नत ।
पुटमौचित्ययोगेन दीयते तन्निगद्यते ॥ ३२ ॥

यन्त्र कच्छपसज्ञ हि तदुक्त रसजारणे ।

७ आन्तरालिकयन्त्रम् ॥

कृत्वा लोहमयीं मूषा वर्तुलाधारका(धा)रिणीम् ॥३३॥
वितस्त्या समिता कान्तलोहेन परिनिर्मिताम् ।
मुण्डलोहोद्भवा चाऽपि कण्ठाधो व्यङ्गुलादध ॥ ३४ ॥

व्यङ्गुल वलय दद्यान्मध्यदेशे च कण्ठत ।
पिधानधारक चिञ्चापत्रविस्तीर्णकङ्कणम् ॥ ३५ ॥

पिधानमन्तराविष्ट सशिरस श्लिष्टसन्धिकम् ।
तले प्रविहतच्छिद्र भाण्ड कृत्वा ह्यधोमुखम् ॥ ३६ ॥

यन्त्रेणालम्बयेन्मूर्ध्नि निरुध्य च विशोष्य च ।
स्थालीकण्ठं ततो दद्यात्पुटानलविधारणम् ॥ ३७ ॥

एवरूपं भवेद्यन्त्रमान्तरालिकसज्ञकम् ।
अनेन जारयेद्बन्ध द्रुतिं गर्भद्रुतामपि ॥ ३८ ॥

८. तापिकायन्त्रम् ॥

तापीमूषां मृदा कृत्वा दृढां चारत्निमात्रिकाम् ।
सुदृढां मध्यदेशे च द्व्यङ्गुलच्छिद्रसयुताम् ॥ ३९ ॥

कान्तलोहमयीं खारीं दद्याद्द्रव्यस्य चोपरि ।
तापिकां पूरयेच्छुद्धसिकताभिस्समन्तत ॥ ४० ॥

तां च चुल्यां समारोप्य क्षेपं क्षेपं बिडद्रुमम् ।
पादाङ्गुष्ठमिता ज्वालां ज्वालयेदनलं तत ॥ ४१ ॥

लोहाभ्रकादिकं सर्वं रसम्योपरि जारयेत् ।
तापिकायन्त्रमित्युक्तं सुकरं रसजारणे ॥ ४२ ॥

९. गर्भयन्त्रम् ॥

स्थाल्या विनिक्षिप्य रसादिवस्तु
स्वर्णादि खोर्यां प्रविधाय भूयः ।
अम्लेन चोर्ध्वं लवणानि दत्वा
चुल्यां पचेत्तत्प्रतिगर्भयन्त्रम् ॥ ४३ ॥

खोरीमल्लं ततस्थालीं निरुध्यादतियत्नत ।
स्थाल्या मल्लेन वा खोर्यां क्षिप्त्वा वस्तु निरुध्य च ॥

क्षिप्त्वा पट्टादिकं रुध्वा पाकस्यादर्भयन्त्रकम् ।

१०. पालिकायन्त्रम् ॥

चषक वर्तुलं लोहं विनतामोर्ध्वदण्डकम् ॥ ४५ ॥

एतद्धि पालिकायन्त्रं वलिजारणहेतवे ।

११. घटीयन्त्रम् ॥

चतुःप्रस्थजलाधारं चतुरङ्गुलकाननम् ॥ ४६ ॥
घटीयन्त्रमिदं प्रोक्तं तदाध्यायनके स्मृतम् ।

१२. इष्टिकायन्त्रम् ॥

विधाय वर्तुलं गर्तं मल्लमत्र निधाय च ॥ ४७ ॥
विनिधायेष्टकां तत्र मध्यगर्तवर्तीं शुभाम् ।
गर्तस्य परितः कुर्यात्पालिकामङ्गुलोच्छ्रयाम् ॥ ४८ ॥
क्षत्र सूतं विनिक्षिप्य गर्तास्ये वसनं क्षिपेत् ।
निक्षिपेद्बन्धकं तत्र मल्लेनास्यं निरुध्य च ॥ ४९ ॥
मल्लपालिकयोर्मध्ये मृदा सम्यङ्निरुध्य च ।
घनोत्पलैः पुटं देयं कपोताख्यं न चाऽधिकम् ॥ ५० ॥
इष्टिकायन्त्रमेतत्स्याद्बन्धक तेन जारयेत् ।

१३. विद्याधरयन्त्रम् ॥

स्थालिकोपरि विन्यस्य स्थालीं सम्यङ्निरुध्य च ॥५१॥
ऊर्ध्वस्थाल्या जलं क्षिप्त्वा वह्निं प्रज्वालयेदधः ।
एतद्विद्याधरं यन्त्रं हिङ्गुलाकृष्टिहेतवे ॥ ५२ ॥

१४ डमरुकयन्त्रम् ॥

यन्त्रं स्थाल्युपरि स्थालीं न्युब्जां दत्वा निरुध्यते ।
यन्त्रं डमरुकाख्यं तद्रसबन्धकृते हितम् ॥ ५३ ॥

१५. नाभियन्त्रम् ॥

मल्लमध्ये चरेद्गर्तं तत्र सूतं सगन्धकम् ।

गर्तस्य परितः कुड्यं प्रकुर्यात्व्यङ्गुलोच्छ्रितम् ॥ ५४ ॥
ततश्चाच्छादयेत्सम्यग्गोस्तनाकारमूपया ।
सम्यक्तोयमृदा रुध्वा सम्यगत्रोच्यमानया ॥ ५५ ॥

[जलमृत्स्ना ।]

लेहवत्कृतवर्षूरक्वाथेन परिमिश्रितम् ।
जीर्णकिट्टरजस्सूक्ष्मं गुडचूर्णैस्समन्वितम् ॥ ५६ ॥
इयं हि जलमृत्प्रोक्ता दुर्भेद्या सलिलैः खलु ।

[वह्निमृत्स्ना ।]

खटिकापट्टकिट्टैश्च महिषीदुग्धमर्दितैः ॥ ५७ ॥
वह्निमृत्सा भवेद्घोरवह्नितापसहा खलु ।
घृतयोर्मृत्खयो रुद्धो न गन्तुं क्षमते रसः ॥ ५८ ॥
ततो जलं विनिक्षिप्य वह्निं प्रज्वालयेदधः ।
गाभियन्त्रमिदं प्रोक्तं नन्दिना तत्त्ववेदिना ॥ ५९ ॥
अनेन जीर्यते सूते निर्धूमश्शुद्धगन्धकः ।

१६. प्रस्तयन्त्रम् ॥

मूषा मूषोदराविष्टा आद्यन्तसमवर्तुला ॥ ६० ॥
चिपिटा च तले प्रोक्तं प्रस्तयन्त्र मनीषिभिः ।
सूतेन्द्रबन्धनार्थं हि रसविद्भिरुदीरितम् ॥ ६१ ॥

१७. तुलायन्त्रम् ॥

वृन्ताकाकारमूपे द्वे तयोः कण्ठादधः खलु ।
प्रादेशमात्रां नलिकामूर्ध्वां लग्नां सगन्धकाम् ॥ ६२ ॥

तत्रैकस्यां क्षिपेत्सूतमन्यस्यां गन्धचूर्णकम् ।
निरुध्य मूषयोर्वक्त्रं वालुकायन्त्रके क्षिपेत् ॥ ६३ ॥
अधोऽग्निं ज्वालयेदेतत्तुलायन्त्रमुदाहृतम् ।
शिलातालकगन्धाश्मजारणाय प्रकीर्तितम् ॥ ६४ ॥

१८. स्थालीयन्त्रम् ॥

स्थाल्यां ताम्रादि निक्षिप्य मल्लेनाम्यं निरुध्य च ।
पच्यते स्थालिसंस्थं यत्स्थालीयन्त्रमिति स्मृतम् ॥

१९ कोष्ठिकायन्त्रम् ॥

स्थूलभाण्डोदरस्यान्तर्वालुकां निक्षिपेच्छुभाम् ।
वितस्तिप्रमितोत्सेधां ततस्तत्र निवेशयेत् ॥ ६६ ॥
सुपक्वां मृण्मयीं कोष्ठीं द्वादशाङ्गुलकोच्छ्रयाम् ।
षडङ्गुलविस्तीर्णां मध्येऽतिमसृणीकृताम् ॥ ६७ ॥
पश्चाङ्गुलपिधानं च तीक्ष्णाग्रं मुकुलीकृतम् ।
न न्यूनं नाधिकं कोष्ठे कण्ठतो मसृणा बहिः ॥ ६८
कोष्ठ्यां च निक्षिपेद्गन्धं पट्पलं श्लक्ष्णचूर्णितम् ।
ततस्त्रैपादिकीं लौहीं निवेश्य च स्थिरीकृताम् ॥६९॥
तस्यां च विन्यसेत्सोरीं लौहीं वा कान्तलोहजाम् ।
तस्यां सूतं क्षिपेच्छुद्धं पलविंशतिमानतः ॥ ७० ॥
दृढगन्धकसूतं च भावयेत्तुल्यगुन्द्रवैः ।
अधश्शिखेन पूर्वोक्तपिधानेन पिधाय च ॥ ७१ ॥
संधिबन्धं प्रकुर्वीत सुधामृत्स्नागुडादिभिः ।
सन्धिबन्धे विशुष्के च क्षिपेदुपरि वालुकाम् ॥ ७२ ॥

भाण्डवक्त्रं निरुध्याऽथ ज्वालयेत्तदधोऽनलम् ।
एवं यामत्रयं यावत्ततो गन्धकसम्भवः ॥ ७३ ॥
पिधानलग्नधूमोऽसौ गलित्वा निपतेद्रसे ।
एवं च षड्गुणं गन्धं भुक्त्वा सूतोऽरुणो भवेत् ॥७४॥
करोति कल्पनिर्दिष्टान्विशिष्टानखिलान्गुणान् ।
कोष्ठिकायन्त्रमेतद्धि नन्दिना परिकीर्तितम् ॥ ७५ ॥

२०. वालुकायन्त्रम् ॥

पश्चाद्वालुकाचूर्णं भाण्डे निक्षिप्य यत्नतः ।
पच्यते रसगोलोऽत्र वालुकायन्त्रकं हि तत् ॥ ७६ ॥

२१ लवणयन्त्रम् ॥

एव लवणनिक्षेपात्प्रोक्तं लवणयन्त्रकम् ।

२२. धूपयन्त्रम् ॥

विधायाष्टाङ्गुलं पात्रं लोहमष्टांगुलोच्छ्रयम् ॥ ७७ ॥
कण्ठाधो द्व्यङ्गुले देशे जाताधारं च तत्र च ।
तिर्यग्लोहशलाका च तस्मिंस्तिर्यग्विनिक्षिपेत् ॥७८॥
तनूनि स्वर्णपत्राणि तस्यामुपरि विन्यसेत् ।
पालाघो निक्षिपेद्रूप वक्ष्यमाणमिहैव हि ॥ ७९ ॥
तत्पात्रं न्युब्जपात्रेण छादयेदपरेण हि ।
मृदा विलिप्य सन्धिं च वह्निं प्रज्वालयेदधः ॥८०॥
तेन कृष्णानि पत्राणि हतान्युक्तविधानतः ।
रसश्चरति वेगेन द्रुतिगर्भे द्रवन्ति च ॥ ८१ ॥
गन्धालकशिलानां हि कज्जल्या वा मृताद्रिना ।
धूपन स्वर्णपत्राणां परमं परिकीर्तितम् ॥ ८२ ॥

जारार्थं तारपत्राणि मृत्तवक्त्रेन धूपयेत् ।
धूपयेच्च यथायोगै रसैरुपरसैरपि ॥ ८३ ॥
धूपयन्त्रमिदं प्रोक्तं जारणाद्रव्यशोधने ।

२३. कन्दुकयन्त्रम् ॥

स्थूलस्थाल्यां द्रव क्षिप्त्वा वासो बध्वा मुखे दृढम् ॥
तत्र स्वेद्य विनिक्षिप्य मृदाऽऽस्यं प्रपिधाय च ।
अधस्ताज्ज्वालयेदग्निं यन्त्रं तत्कन्दुकाह्वयम् ॥ ८५ ॥

२४. ढेकीयन्त्रम् ॥

भाण्डकण्ठादधश्छिद्रे वेणुनालं विनिक्षिपेत् ।
कान्त(कांस्य)पात्रद्वयं कृत्वा सम्पुटं जलगर्भितम् ॥
नालास्यं तत्र सयोज्यं दृढं तच्चापि कारयेत् ।
युक्तद्रव्यैर्विनिक्षिप्तः पूर्वं तत्र पुटे रसः ॥ ८७ ॥
अग्निना तापितो नालात्तोये तस्मिन्पतत्यधः ।
यावदुष्णं भवेत्सर्वं भाजनं तावदेव हि ॥ ८८ ॥
जायते रससन्धानं ढेकीयन्त्रमिदं भवेत् ।

२५. सोमानलयन्त्रम् ॥

ऊर्ध्वं बहिरधश्चापो मध्ये तु रससङ्ग्रहः ॥ ८९ ॥
सोमानलमिदं प्रोक्तं जारयेद्गगनादिकम् ।

२६. नालिकायन्त्रम् ॥

लोहनालगतं सूतं भाण्डे लवणपूरितम् ॥ ९० ॥
निरुद्धं विपचेदेतन्नालिकायन्त्रमीरितम् ।

२७ पातालयन्त्रम् ॥

सुसन्धि सन्धितं कृत्वा दिव्यभाण्डे तु सम्मुखम् ॥
अष्टाङ्गुलमुग्वं तं तु दीर्घं स्यात्षोडशाङ्गुलम् ।
सुसन्धि सन्धितं कृत्वा वस्त्रमृत्तिकलेपनम् ॥ ९२ ॥
यत्र पातालयन्त्रे तु सूतकादि निपातयेत् ।

२८. दीपिकायन्त्रम् ॥

कच्छपयन्त्रान्तर्गतमृण्मयपीठस्थदीपिकासस्थः ॥ ९३ ॥
यस्मिन्निपतति सूत प्रोक्तं तद्दीपिकायन्त्रम् ।

२९. गङ्गासागर(भट्टी)यन्त्रम् ॥

द्वादशाङ्गुलमुत्सेधं षोडशाङ्गुलमायतम् ॥ ९४ ॥
ताम्रीय मृण्मयं वाऽथ सुश्लक्ष्णं चिपिटं शुभम् ।
पात्रं कर्णा(ण्ठा)धो द्रोणी व्यङ्गुलोत्सेधमालकाम् ॥
द्रोण्या पात्र न्यसेदन्यत्तावन्मात्र सुसन्धितम् ।
न्युब्जं सन्धौ तयोर्नाल कुर्याद्गोमुखसन्निभम् ॥९६॥
पाच्यद्रव्यमध पात्रे द्रवद्रव्येण योजितम् ।
क्षिप्त्वा निधाय मृत्सन्धि यन्त्रोर्ध्वे जलसेचनम् ॥९७॥
चुल्यामारोप्य तद्यन्त्रं चण्डाग्नि ज्वालयेदध ।
तस्माद्यान्यद्विनिर्याति तत्तद्द्रव्याश्रितो रस ॥ ९८ ॥
गङ्गासागरयन्त्रं हि भट्टियन्त्रमिदं स्मृतम् ।
गुडपुष्पफलादीनामाहरेद्द्रुतिमुत्तमाम् ॥ ९९ ॥

३०. डो(दो)लायन्त्रम् ॥

द्रवद्रव्येण भाण्डस्य पूरितार्धोदरस्य च ।
मुखे तिर्यक्कृते दण्डे रसं सूत्रेण लम्बितम् ॥१००॥

स्वेदयेत्तत्तरगत डोलायन्त्रमिति स्मृतम् ।

३१ कोष्ठीयन्त्रम् ॥

शुल्वीं चतुर्मुखीं कृत्वा तत्र भाण्ड निवेशयेत् ॥१०१॥
तत्रौषध विनिक्षिप्य रुद्ध्वा तद्भाण्डकाननम् ।
कोष्ठीयन्त्रमिद नाम्ना तत्रत्यै परिकीर्तितम् ॥१०२॥

३२ गर्भयन्त्रम् ॥

अङ्गुला परिणाहेन दैर्घ्येण चतुरङ्गुलाम् ।
मृण्मयीं सुदृढा मूषा वर्तुल कारयेन्सुखम् ॥ १०३ ॥
लोणम्य त्रिंशति भागान्भागमेक तु गुग्गुलो ।
सुश्लक्ष्ण पेषयित्वा तु वार वार पुन पुन ॥१०४॥
मूषालेप दृढ कृत्वा रक्षणार्थमृदा बुध ।
कारीषे वा तुषाग्नौ वा भूमौ तु स्वेदयेन्मृदु ॥१०५॥
अहोरात्र त्रिरात्र वा रसेन्द्रो भस्मता व्रजेत् ।
गर्भयन्त्रमिद प्रोक्त पिष्टिकाभस्मकारकम् ॥ १०६ ॥

३३ हसपाकयन्त्रम् ॥

खर्पर सिकतापूर्ण कृत्वा तस्योपरि न्यसेत् ।
अपर खर्पर तत्र शनैर्मृद्वग्निना पचेत् ॥ १०७ ॥
पञ्चक्षौरैस्तथा मूत्रैर्लवणैश्च विड तत ।
हसपाकस्समाख्यातो यन्त्र तद्वार्तिकोत्तमै ॥ १०८ ॥

३४ मूषायन्त्रम् ॥

लोहमूषाद्वय कृत्वा द्वादशाङ्गुलमानत ।
मूषयोर्मुखयोर्नालि दत्वा सम्यङ्निरोधयेत् ॥ १०९ ॥

एकस्यां सूतकं शुद्धमन्यस्या शुद्धगन्धकम् ।
देयं जलं सूतकाधो गन्धोपरि क्षिपेत् ॥ ११० ॥

जारयेत्षड्गुणं गन्धमनेनैव क्रमेण हि ।
मूषायन्त्रमिदं ज्ञेयं सिद्धनागार्जुनेरितम् ॥ १११ ॥

३५. स्तनयन्त्रम् ॥

कान्तलोहमयं पात्रमायतं द्वादशाङ्गुलम् ।
दीर्घमष्टाङ्गुलं देवि ! पात्राधस्त्र्यङ्गुलं शुभम् ॥ ११२ ॥

निम्नं पात्रं पिधानीं च लोहोत्था चिपिटा शुभाम् ।
स्तनयन्त्रमिद सूतपिष्टीना जारणे वरम् ॥ ११३ ॥

३६. नागमायूरयन्त्रम् ॥

वृन्ताकमूषायुगलं पद्म(वर्त)लोहेन कारयेत् ।
एकस्या निक्षिपेत्सूतमन्यस्या गरलं क्षिपेत् ॥ ११४ ॥

नागाकारं वक्त्रनालं विषमूषामुखे न्यसेत् ।
मयूराकारनालं हि रसमूषामुखे न्यसेत् ॥ ११५ ॥

मयूरवदने नागमुखं संयोजयेत्सुधी ।
सन्धिन्यस्तं वज्रमृदा लेप कुर्याद्यथा दृढम् ॥ ११६ ॥

सलिल रसमूषाधो विषाधोऽङ्गारपावकः ।
नागमायूरयन्त्र हि विषधूपे वर प्रिये ! ॥ ११७ ॥

३७. चक्रयन्त्रम् ॥

हस्तमात्रायतं गर्तं वितस्तिद्वयनिम्नकम् ।
कोष्ठीं गर्तस्य मध्ये तु द्वादशागुलमायताम् ॥ ११८॥

वितस्तिद्वयमुत्सेधा कोष्ठ्यामापूरयेच्छुभाम् ।
वालुका तद्वह्निदग्धाणवह्निं कोष्ठ्यां रस प्रिये ! ॥११९॥

चक्रयन्त्रमिद सूतभस्मकमेणि शस्यते ।

३८ खेचरयन्त्रम् ॥

स्थाल्या कदलीपुष्पनिभा मच्छिद्रमूषिकाम् ॥ १२० ॥
अधोमुखीं प्रकुर्वीत लिप्तद्वक्त्रमृदा दृढम् ।
उपरिष्टादधोवक्त्रा स्थालीमन्या सुसन्धिताम् ॥ १२१ ॥
मूषाया वत्सनाभ तु निक्षिपेदूर्ध्वभाजने ।
रस विलेपयेद्युक्त्या यन्त्रोर्ध्वं कैतवो रस ॥ १२२ ॥
अधो मृद्वग्निना पाकस्त्वेतत्खेचरयन्त्रकम् ।
प्रायस्सिद्धरसेन्द्रस्य विधूप वर प्रिये ! ॥ १२३ ॥

३९ कापालियन्त्रम् ॥

स्थाल्या सूतादिकान्क्षिप्त्वा हेमरूप्यादि खोरिकाम् ।
न्युब्जा सन्धि मृदा लिप्त्वा वालुका खोरिकान्तगाम् ॥
कृत्वा मृद्वग्निना पाकस्त्वेतत्कापालियन्त्रकम् ।

४० वालुकायन्त्रम् ॥

सरसा गूढवक्त्रा च मृद्वस्त्राङ्गुलसयुताम् ॥ १२५ ॥
शोषिता काचकल्कौं पूरयेत्तिलपु भागयो ।
भाण्डे वितस्तिगभीरे वालुकासु प्रतिष्ठिता ॥ १२६ ॥
भागस्य पूरयित्रीभिरन्याभिरवगुण्ठयेत् ।
भाण्डवक्त्रं मणिकया सन्धि लिम्पेन्मृदा पचेत् ॥१२७॥
चुल्ल्या तृणस्य चादाहान्मणिकापृष्ठवर्तिन ।
एतद्धि वालुकायन्त्र रसगोलादिकान्पचेत् ॥ १२८ ॥

४१. लवणयन्त्रम् ॥

एवं लवणनिक्षेपात्प्रोक्तं लवणयन्त्रकम् ।
अन्तःकृतरसालेपताम्रपात्रमुखस्य च ॥ १२९ ॥
लिप्त्वा मृल्लवणेनैव सन्धिं भाण्डतलस्य च ।
तद्भाण्डं पटुनाऽऽपूर्यं क्षौरैर्वा पूर्ववत्पचेत् ॥ १३० ॥

४२. भूधरयन्त्रम् ॥

वालुकागूढसर्वाङ्गां यन्त्रे मूषां रसान्विताम् ।
दीप्तोत्पलैस्संवृणुयाद्यन्त्रं तद्भूधराह्वयम् ॥ १३१ ॥

४३ नालिकायन्त्रम् ॥

कुम्भस्य पार्श्वे सुषिरं कुर्यादङ्गुष्ठमात्रकम् ।
तावत्स्थूलमयोनालं वेणुनालमथापि वा ॥ १३२ ॥
छिद्रे संयोजयेन्नालं नालाग्रे घटिका न्यसेत् ।
कुम्भे सर्जादिनिर्यासं क्षिप्त्वा वक्त्रं निरोधयेत् ॥१३३॥
अधोऽग्निं ज्वालयेदेतन्नालिकायन्त्रमुच्यते ।

४४. पुटयन्त्रम् ॥

शरावसम्पुटान्तस्थं करीषैप्वग्निमानवित् ॥ १३४ ॥
पचेत चुल्यां यामं वा रस तत्पुटयन्त्रकम् ।

४५. पातालयन्त्रम् ॥

विशालवदनां स्थालीं गर्ते सजलगोमये ॥ १३५ ॥
विन्यस्य वदनान्तश्च पूरयेदपरं घटम् ।
पञ्चसच्छिद्रसहितां स्थालीं वक्त्रे निवेशयेत् ॥ १३६ ॥
तद्घटं पूरयेत्तैलपात्यंद्रव्यैर्निरोधयेत् ।
भाण्डवक्त्रं शरावेण पुटं दद्यात्समन्ततः ॥ १३७ ॥

छिद्रेभ्यः पतितं तैलं तत्तद्योगेषु योजयेत् ।
इदं पातालयन्त्रं हि सर्वतैलं निपातयेत् ॥ १३८ ॥

काष्ठत्वग्बीजमांसास्थिवंशतैलं समाहरेत् ।

४६. धूपयन्त्रम् ॥

स्थाल्यां रुद्रं खरादीनां क्षिप्त्वाऽऽस्ये कांस्यपात्रकम् ॥
सजलं विन्यसेद्देवि ! वह्निं प्रज्वालयेदधः ।
कान्तपालस्थितं तैलं सर्वव्रणविरोपणम् ॥ १४० ॥

धूपयन्त्रमिदं देवि ! नन्दिना परिकीर्तितम् ।

४७. अधःपातनयन्त्रम् ॥

वृत्तालाबुसमस्थूलं दीर्घनालं सरन्ध्रकम् ॥ १४१ ॥
तन्मिन्क्षिपेत्तैलपात्यद्रव्यं बीजादिकं प्रिये ! ।
तन्मुखे निक्षिपेत्केशान्विन्यसेत्तदधोमुखम् ॥ १४२ ॥

सच्छिद्रे च घटे नाल भाण्डच्छिद्रे निवेशयेत् ।
घटमध्ये पुट दद्यान्नालाधो घटिकां न्यसेत् ॥ १४३ ॥

अधःपातनयन्त्रं हि श्रेष्ठं स्यात्तैलपातने ।

४८. अन्यत्- अधःपातनयन्त्रम् ॥

विशालकांस्यपात्रान्तर्न्यसेदुत्तम्भनं समम् ॥ १४४ ॥
तदूर्ध्वं मृण्मयं पात्रं सुदृढं चतुरङ्गुलम् ।
विन्यसेदपरं पात्रं सन्तप्तं पूर्वपात्रके ॥ १४५ ॥

विन्यस्य तस्मिन्श्रीखण्डकृष्णागरुमधुप्लुतम् ।
एवं द्वितीयं पात्रं तु तृतीयमपि तद्विधम् ॥ १४६ ॥

उपर्युपरि विन्यस्य तदूर्ध्वं मृत्कटाहकम् ।
न्युब्जं न्यसेत्कास्यपात्रे कटाहं मार्जयेज्जलैः ॥ १४७ ॥

अध.पातनयन्त्रं हि गन्धतैलं विपातयेत् ।

मूपा ॥

मूषा हि कौञ्चिका प्रोक्ता कुमुदी करहाटिका ॥
पाचनी वह्निमित्रा च रसवादिभिरिष्यते ।
मुष्णाति दोषान्मूषेयं सा मूषेति निगद्यते ॥ १४९ ॥
उपादान भवेत्तस्या मृत्तिका लोहमेव च ।
मूषामुखविनिष्क्रान्ता वरमेकाऽपि काकिनी ॥ १५० ॥
दुर्जनप्रणिपातेन धिग्लक्षमपि मानिनाम् ।
मूषापिधानयोर्बन्धे रन्ध्राण सुविलेपयेत् ॥ १५१ ॥
अन्धण रन्धन चैव सश्लिष्ट सन्धिबन्धनम् ।

[मूषार्थे श्रेष्ठा मृत् ।]

मृत्तिका पाण्डुरस्थूलश्लोणपाण्डुरमूषरा ॥ १५२ ॥
चिराध्मानसहा सा हि मूषार्थमतिशस्यते ।
तदभावे च वाल्मीकी कौलाली वा समीर्यते ॥१५३॥
या मृत्तिका दग्धतुषैश्शणेन
शिखिलकैर्वा हयलद्दिना च ।
लोहेन दण्डेन च कुट्टिता सा-
साधारणा स्यात्खलु मूषिकार्थम् ॥ १५४ ॥
श्वेताश्मानस्तुषा दग्धाश्शिखित्राश्शणकर्पटम् ।
लद्दिकिट्ट यथायोग्यं संयोज्या मूषिकामृदि ॥

वज्रमूषा ॥

मृदस्त्रिभाग शणरद्रुदिभागौ
ना(भा)गश्च निर्दग्धतुषोपलादे ।
किट्टार्धभाग परिसण्ड्य वज्र-
मूषा विदध्यात्खलु सत्वपाते ॥ १५६ ॥

योगमूषा ॥

दग्धाङ्गारतुषोपेतमृत्स्ना वल्मीकसम्भवा ।
तत्तद्विडसमायुक्ता तत्तन्निडविलेपिता ॥ १५७ ॥
तया या विहिता मूषा योगमूषेति कथ्यते ।
अनया साधितस्सूतो जायते गुणवत्तर ॥ १५८ ॥

वज्रद्रावणमूषा ॥

गारमूनागधौताभ्या शणैर्दग्धतुषैरपि ।
समैस्समा च मूषामृन्महिषीदुग्धसयुता ॥ १५९ ॥
कौञ्चिका वक्ष्यमाणा हि बहुधा परिकीर्तिता ।
तया विरचिता मूषा वज्रद्रावणके हिता ॥ १६० ॥
यामयुग्मपरिध्मानान्नासौ द्रवति वह्निना ।

गारमूषा ॥

दग्धषड्गुणगाराढ्या किट्टाङ्गारशणान्विता ॥ १६१ ॥
कृष्णमृद्भि कृता मूषा गारमूषेत्युदाहृता ।

वज्रमूषा ॥

वल्लाङ्गारतुषास्तुल्यास्तच्चतुर्गुणमृत्तिका ॥ १६२ ॥
गाराश्च मृत्तिका तुल्या सर्वैरेतैर्विनिर्मिता ।
वज्रमूषेति निर्दिष्टा याममग्निं सहेत सा ॥ १६३ ॥

स्वर्ण(वर)मूषा ॥

रक्तवर्गरजोयुक्ता रक्तवर्गाम्बुसाधिता ।
वरमूषेति निर्दिष्टा स्वर्णमूषेत्युदाहृता ॥ १६४ ॥

मृण्मया साधिता मूषा क्षितिखेचरलेपिता ।
वर्णमूषेति सा प्रोक्ता वर्णोत्कर्षे नियुज्यते ॥ १६५ ॥

रूप्यमूषा ॥

एव हि श्वेतवर्गेण रूप्यमूषा समीरिता ।

विडमूषा ॥

तत्तद्विडमृदोद्भूता तत्तद्विडविलेपिता ॥
देहलोहार्थयोगार्थं विडमूषेत्युदाहृता ।
सहतेऽग्निं चतुर्यामं द्रवेण व्यथिता सती ॥ १६७ ॥

मूषाऽऽप्यायनम् ॥

द्रवीभावमुपेयोश्च मूषाया ध्मानयोगत ।
क्षणमुद्धरणं यत्तन्मूषाऽऽप्यायनमुच्यते ॥ १६८ ॥

वृन्ताकमूषा ॥

वृन्ताकाकारमूषाया नालं द्वादशकाङ्गुलम् ।
धुत्तूरपुष्पवच्चोर्ध्वं सुदृढ श्लिष्टसन्धिकम् ॥ १६९ ॥
अष्टाङ्गुल च सच्छिद्र सा स्याद्वृन्ताकमूषिका ।
अनया खर्पराद्दीनां मृदूना सत्वमाहरेत् ॥ १७० ॥

गोस्तनी मूषा ॥

मूषा या गोस्तनाकारा शिखायुक्तपिधानका ।
सत्वानां द्रावणे शुद्धौ मूषा सा गोस्तनी भवेत् ॥

मल्लमूषा ॥

निर्दिष्टा मल्लमूषा या मल्लद्वितयसम्पुटात् ।
पर्पट्यादिरसादीनां स्वेदनाय प्रकीर्तिता ॥ १७२ ॥

पक्वमूषा ॥

कुलालभाण्डरूपा या दृढा च परिपाचिता ।
पक्वमूषेति सा प्रोक्ता पोट्टल्यादिविपाचने ॥ १७३ ॥

गोलमूषा ॥

निर्वक्त्रा गोलकाकारा पुटनद्रव्यगर्भिणी ।
गोलमूषेति सा प्रोक्ता गत्वरद्रव्यरोधिनी ॥ १७४ ॥

मञ्जुमूषा ॥

तले या कूर्माकारा क्रमादुपरि विस्तृता ।
स्थूलवृन्ताकवत्स्थूला मञ्जुमूषेति सम्मता ॥ १७५ ॥
सा चायोऽभ्रकसत्त्वादेः पुटाय द्रावणाय च ।

मञ्जूषामूषा ॥

मञ्जूषाकारमूषा या निम्नतायामविस्तरा ॥ १७६ ॥
षडङ्गुलप्रमाणेन मूषा मञ्जूषासंज्ञका ।
भूमौ निखन्य तां मूषा दद्यात्पुटमथोपरि ॥ १७७ ॥

मुसलमूषा ॥

मूषा या चिपिटा मूले वर्तुलाऽष्टाङ्गुलोच्छ्रया ।
मूषा सा मुसलाख्या च चक्रिबद्धरसे तथा ॥ १७८ ॥

अन्या वज्रमूषा ॥

दग्धाङ्गारस्य षड्भागा गैरिक कृष्णमृत्तिका ।
गारमङ्गारकिट्टं च वज्रमूषा प्रकीर्तिता ॥ १७९ ॥

गारा दग्धास्तुषा दग्धा वल्मीकमृत्तिका ।
श्वेतत्वक् च समायुक्ता मूषा वज्रोपमा मता ॥ १८० ॥

अन्धमूषा प्रकाशमूषा च ॥

प्रकाशा चान्धमूषा च मूषा च द्विविधा स्मृता ।
प्रकाशमूषा विज्ञेया शरावाकारसंयुता ॥ १८१ ॥
द्रव्यनिर्वहणे सा च वार्तिकैस्तु प्रशस्यते ।
अन्धमूषा च कर्तव्या गोस्तनाकारसन्निभा ॥ १८२ ॥
पिधानेन समायुक्ता किञ्चिदुन्नतमस्तका ।
पत्रलेपे तथा रङ्गे द्वन्द्वमेलापके हितम् ॥ १८३ ॥
सैव छिद्रान्विता नन्दगम्भीरा सारणोचिता ।

भस्ममूषा ॥

तिलभस्म द्विरंश तु इष्टकाशसमन्वितम् ॥ १८४ ॥
भस्ममूषेति विज्ञेया तारसंशोधने हिता ।

अन्या वज्रमूषा ॥

तुष वस्त्र सम दग्ध मृत्तिका चतुरंशिका ॥ १८५ ॥
कूपीपाषाणसंयुक्ता वज्रमूषा प्रकीर्तिता ।

मूषावह्ननालकोष्ठिकोपयुक्तमृल्लक्षणम् ॥

कृष्णा रक्ता च पीता च शुक्लवर्णा च मृत्तिका ॥
आद्या श्रेष्ठा कनिष्ठाऽन्त्या मध्यमे मध्यमे मते ।
गजाश्वाना मल दग्ध्वा यावत्कृष्णत्वता गतम् ॥१८७॥
वाशा वज्रवता पत्र वल्मीकस्य मृदा सह ।
पेषयेद्वज्रतोयेन यावच्छुक्लत्वता गतम् ॥ १८८ ॥

मर्दयेत्तेन घट्नीयाद्वल्कनालं च कोष्ठिकाम् ।
वल्मीकमृत्तिकालोहकिट्टश्वेताश्मनां पृथक् ॥ १८९ ॥

एकांशौ द्वौ तु दग्धस्य तुषस्य स्त्रीशिरोरुहाम् ।
समांशास्तत्समस्तं तु छागीदुग्धेन मर्दयेत् ॥ १९० ॥

यामद्वयं दृढं तेन कुर्यान्मूषां च सम्पुटम् ।
शोषयित्वा रसं क्षिप्त्वा तत्र कंस निरोधयेत् ॥१९१॥

वज्रमूषादिकं प्रोक्तं सम्यक्सूतस्य मारणे ।
मोक्षक्षारस्य भागौ द्वाविष्टिकाशसंयुतौ ॥ १९२ ॥

यत्कृतौ सा तु मूषा स्यादुत्तमा तारशोधने ।
रक्तवर्गेण संमिश्रा रक्तवर्गपरिप्लुता ॥ १९३ ॥

रक्तवर्गकृतालेपा समुक्ता स्वर्णकर्मसु ।
शुक्लवर्गेण समिश्रा शुक्लवर्गपरिप्लुता ॥ १९४ ॥

शुक्लवर्गकृतालेपा शुक्लशुद्धिषु शस्यते ।
विड्वर्गेण तु समिश्रा विड्वर्गेण परिप्लुता ॥ १९५॥

विड्वर्गेण कृतालेपा मूषा स्याद्द्रुतिजारणे ।
क्षारवर्गेण संमिश्रा क्षारवर्गपरिप्लुता ॥ १९६ ॥

क्षारवर्गकृतालेपा मूषा निर्वहणे हिता ।

मूषायामावर्तनविधिः ॥

विपटङ्कणगुञ्जाभिर्मूषालेपं तु कारयेत् ॥ १९७ ॥

प्रकाशायां प्रकुर्वीत यदि वाऽङ्गारलेपनम् ।
तस्यां विन्यस्य मूषायां द्रव्यमावर्तयेद्बुधः ॥ १९८ ॥

लेपवर्णे पुटे योज्या रक्तमृत्पङ्कमूलगाः ।

आवर्तितद्रव्यस्वरूपम् ॥

आवर्तमाने कनके पीता तारे सितप्रभा ॥ १९९ ॥

शुल्बे ज(नी)लनिभा तीक्ष्णे शुक्लवर्णा प्रशम्यते ।
यन्त्रमेवौषधीभ्यस्स्याच्छ्रेष्ठ सूतस्य यन्त्रणे ॥ २०० ॥

ओषधीसहितेऽप्येषा रसो यन्त्रेण बध्यते ।

कोष्ठी ॥

सत्त्वाना पातनार्थाय पतिताना विशुद्धये ॥ २०१ ॥

कोष्ठिका विविधाकारास्तासा लक्षणमुच्यते ।

आकरकोष्ठी अङ्गारकोष्ठी वा ॥

राजहस्तसमुत्सेधा तदर्धायामविस्तरा ॥ २०२ ॥

चतुरश्रा च मुडच्येन वेष्टिता मृण्मयेन सा ।

एकभित्तौ चरेद्द्वार वितस्त्याभोगसयुतम् ॥ २०३ ॥

द्वार सार्धवितस्त्या च सम्मित सुदृढ शुभम् ।
दोहल्यश्चो विधातव्य धमनाय यथोचितम् ॥ २०४ ॥

प्रादेशप्रमिता भित्तिरुत्तराङ्गस्य चोर्ध्वत ।

द्वार चोपरि कर्तव्य प्रादेशप्रमित खलु ॥ २०५ ॥

ततश्चेष्टिकया रुध्वा द्वारसन्धि विलिप्य च ।
शिखित्रेस्ता समापूर्य धमेद्भस्त्राद्वयेन च ॥ २०६ ॥

शिखित्राधमनद्रव्यमूर्ध्वद्वारेण निक्षिपेत् ।
सत्त्वपातनगोलाश्च पञ्च पञ्च पुन पुन ॥ २०७ ॥

भवेदाकर(दङ्गार)कोष्ठीय खराणा सत्त्वपातने ।

पातालकोष्ठी ॥

दृढभूमौ चरेद्गर्तं वितस्त्या सम्मितं शुभम् ॥ २०८ ॥
वर्तुलं चाऽथ तन्मध्ये गर्तमन्यं प्रकल्पयेत् ।
चतुरङ्गुलविस्तारनिम्नत्वेन समन्वितम् ॥ २०९ ॥
गर्ताद्धरणिपर्यन्तं तिर्यग्द्वार(द्वार)समन्वितम् ।
किञ्चित्समुन्नतं बाह्यगर्ताभिमुखनिम्नकम् ॥ २१० ॥
मृच्चक्रीं पञ्चरन्ध्राढ्यां गर्भगर्तोपरि क्षिपेत् ।
आपूर्य कोकिलै. कोष्ठीं प्रथमेदेकभस्त्रया ॥ २११ ॥
पातालकोष्ठिका ह्येषा मृदूनां सत्वपातने ।
घानसाध्यपदार्थाना नन्दिना परिकीर्तिता ॥ २१२ ॥

गारकोष्ठी ॥

द्वादशाङ्गुलनिम्ना या प्रादेशप्रमिता तथा ।
चतुरङ्गुलतश्चोर्ध्वं वलयेन समन्विता ॥ २१३ ॥
मूरिच्छिद्रवतीं चक्रीं वलयोपरि निक्षिपेत् ।
शिखित्रांस्तत्र निक्षिप्य प्रथमेद्वङ्कनालतः ॥ २१४ ॥

[वङ्कनालम् ।]

मूषामृद्भिः प्रकर्तव्यमरत्निप्रमितं दृढम् ।
अधोमुखं च तद्वक्त्रे नालं पञ्चाङ्गुलं खलु ॥ २१५ ॥
वङ्कनालमिति प्रोक्तं दृढाध्मानाय कीर्तितम् ।
गारगोष्ठीयमादिष्टा सृष्टलोहविनाशिनी ॥ २१६ ॥
कोष्ठी बन्धरसादीनां विधानाय विधीयते ।
द्वादशाङ्गुलकोत्सेधा सा युक्ता(क्ष्णे) चतुरङ्गुला ॥२१७॥
नियमध्मापना या सा मृदुद्रव्यविशोधनी ।

पुटम् ॥

रसादिद्रव्यपाकानां प्रमाणज्ञापनं पुटम् ॥ २१८ ॥

नेष्टो न्यूनाधिकः पाकस्सुपाकं हितमौषधम् ।
लोहादेरपुनर्भावो गुणाधिक्यं तथोग्रता ॥ २१९ ॥

अनप्सु मज्जनं रेखापूर्णता पुटतो भवेत् ।
पुटाद्रागो लघुत्वं च शीघ्रं व्याप्तिश्च दीपनम् ॥२२०॥

जारितादपि सूतेन्द्राल्लोहानामधिको गुणः ।
यथाऽश्मनि विशेद्वह्निर्बहिस्थः पुटयोगतः ॥ २२१ ॥

चूर्णत्वाद्धि गुणावाप्तिस्तथा लोहेषु निश्चितम् ।
पाच्यमानौषधं क्षिप्त्वा शरावद्वयसम्पुटे ॥ २२२ ॥

रुध्वा गरुण्डपचनं पुटं तदिति कथ्यते ।

महापुटम् ॥

निम्नविस्तरत. कुण्डे द्विहस्ते चतुरश्रके ॥ २२३ ॥

वनोत्पलसहस्रेण पूरिते पुटनौषधम् ।
कोष्ठ्यां रुद्धं प्रयत्नेन पिष्टिकोपरि निक्षिपेत् ॥२२४॥

वनोत्पलसहस्रार्धं कोविकोपरि निक्षिपेत् ।
वह्निं प्रज्वालयेत्तत्र महापुटमिदं स्मृतम् ॥ २२५ ॥

गजपुटम् ॥

राजहस्तप्रमाणेन चतुरश्रं च निम्नकम् ।
पूर्णं चोपलखण्डैस्तैः कपर्दाख्यश्च विन्यसेत् ॥२२६॥

विन्यसेत्कुमुदीं तत्र पुटनद्रव्यपूरिताम् ।
पूर्वच्छगणतोऽर्द्धानि गरुण्डानि विनिक्षिपेत् ॥ २२७ ॥

एतद्गजपुटं प्रोक्तं महागुणविधायकम् ।

वाराहपुटम्

इत्थं चारत्निके कुण्डे पुटं वाराहमुच्यते ॥ २२८ ॥

कुक्कुटपुटम् ॥

पुटं भूमितले यत्तद्भितस्तिद्वितयोच्छ्रयम् ।
तावच्च तलविस्तीर्णं तत्स्यात्कुक्कुटकं पुटम् ॥ २२९ ॥

कपोतपुटम् ॥

यत्पुटं दीयते भूमावष्टसल्यैर्वनोत्पलैः ।
तद्धालसूतभसार्थं कपोतपुटमुच्यते ॥ २३० ॥

गोवरपुटम् ॥

गोष्ठान्तर्गोखुरक्षुण्णं शुष्कं चूर्णितगोमयम् ।
गोवर तत्समादिष्टं वरिष्ठं रससाधने ॥ २३१ ॥
गोवरैर्वा तुषैर्वाऽपि पुटं यत्र प्रदीयते ।
तद्गोवरपुटं प्रोक्तं रसभस्मप्रसिद्धये ॥ २३२ ॥

भाण्डपुटम् ॥

स्थूलभाण्डे तुषापूर्णे मध्ये मूषासमन्विते ।
वह्निना विहिते पाके तद्भाण्डपुटमुच्यते ॥ २३३ ॥

वालुकापुटम् ॥

अधस्तादुपरिष्टाच्च कोविका छाद्यते खलु ।
वालुकाभिः प्रतप्ताभिर्यन्त्रं तद्वालुकापुटम् ॥ २३४ ॥

भूधरपुटम् ॥

वह्निमत्या क्षितौ सम्यङ्निखन्याद्द्व्यङ्गुलादधः ।
उपरिष्टात्पुटं यन्त्रं पुट तद्भूधराह्वयम् ॥ २३५ ॥

लाघवपुटम् ॥

ऊर्ध्वं षोडशिकामानैस्तुषैर्वा गोवरैः पुटम् ।
यन्त्रं तल्लाघवाख्यं स्यान्मृदुद्रव्यसुसाधने ॥ २३६ ॥
अयुक्तपुटमाने तु साध्यद्रव्यबलाबलात् ।
पुटं विज्ञाय दातव्यमूहापोहविचक्षणैः ॥ २३७ ॥

कूपिकादिस्वरूपम् ॥

काचाभ्रोन्मृद्घटीनां च कूपिका चपकाणि च ।
रूपिका कूपिका सिद्धा गोलं चैव करण्डकम् ॥२३८॥
चपकं च कठोरी च वाटिका खोरिका तथा ।
कम्बोली ग्राहिका चेति नामान्येकार्थकानि हि ॥२३९॥
रसोपरसलोहानां त्रिधा संस्कारवद्वय. ।
गरुण्डकाष्ठकोलीशसाधनास्ते पृथक्क्रिया ॥ २४० ॥
गरुण्डसाधनास्तेषु पुटं कुक्कुटसंज्ञकम् ।
वराहपुटसंज्ञं हि गजसंज्ञं पुटे भवेत् ॥ २४१ ॥
श्रेष्ठा वनोद्भवच्छाणा मध्यमा गोष्ठसम्भवाः ।
अधमाः कृत्रिमं काष्ठं खदिरासनसम्भवम् ॥ २४२ ॥
अथवा सारवृक्षोत्थं वितस्तिद्वयदीर्घकम् ।
स्थूलप्रकोष्ठमात्रं तु श्रेष्ठं सूतेन्द्रपाचने ॥ २४३ ॥
मृदुमध्यमचण्डाग्निसंज्ञं स्याद्दारुसाधनम् ।
अङ्गाराः खदिरोद्भूतास्त्रिफला वृक्षसम्भवाः ॥ २४४ ॥
कर्षाम्सारतरूद्भूताश्रेष्ठा धमनकर्मणि ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ षड्विंशोल्लासः ॥

॥ इति अमृतीकरणविश्रान्तिः समाप्ता ॥

॥ क्रियाकरणं नाम द्वितीया विश्रान्तिः ॥

॥ प्रथम उल्लासः ॥

उपरसशोधनमारणविधिः ॥

श्रीभैरवी—

देवदेव चिदानन्द सच्चिदानन्ददायक ! ॥
त्वयैव प्रतिबुद्धाऽस्मि पूर्वं रसविधानकम् ॥ १ ॥

इदानीं त्वत्प्रसादेन श्रोतुमिच्छाम्यहं प्रभो ! ।
गन्धाद्युपरसाना च लोहानां हेमपूर्विणाम् ॥ २ ॥

पद्मरागादिरत्नाना लक्षणं जातिमाह्वयम् ।
संस्कारं च गुणान्ब्रूहि यथा जानाम्यहं प्रभो ! ॥ ३ ॥

उपरसाः ॥

श्रीभैरवः—

गन्धताल्लशिलाताप्यघनहिङ्गुलगैरिकाः ।
चपलाञ्जभूनागहरिद्राश्माग्निजारकाः ॥ ४ ॥

खर्परीतुत्थकट्टङ्कुष्ठगिरिसिन्दूरटङ्कणाः ।
कम्पिल्लविषकासीसगौरीपाषाणभूखगाः ॥ ५ ॥

पोदारश्रृङ्गी सिन्दूरस्तुवरिश्च रसाञ्जनम् ।
नीलाञ्जनं च सौवीरं स्रोतोञ्जनमफेनकम् ॥ ६ ॥

पुष्पाञ्जनं शङ्खशुक्तिशम्बूकाश्च वराटकाः ।
साबुणी च नवक्षारचीनक्षाराखुमारकाः ॥ ७ ॥

सर्जगुग्गुलुलाक्षाश्च क्षाराश्च लवणानि च ।
गोरोचनोऽम्लवेतश्च काचच्छगणवालुकाः ॥ ८ ॥

एते उपरसा ख्याता रसराजस्य कर्मणि ।

द्वादश लोहाः ॥

स्वर्णरूप्यार्कंकान्ताभ्रसत्व तीक्ष्ण च मुण्डकम् ॥ ९ ॥
भुजङ्ग लपुस चैव रीति काम्य च वर्तकम् ।
द्वादशैतानि लोहानि मण्डूरो लोहकिट्टकम् ॥ १० ॥

नवरत्नानि ॥

माणिक्यमुक्ताफलविद्रुमाणि
ताक्ष्यं च पुष्प भिदुर च नीलम् ।
गोमेधक चाऽथ विड्डूरक च
क्रमेण रत्नानि नवग्रहाणाम् ॥ ११ ॥

नव उपरत्नानि ॥

सूर्यकान्तश्चन्द्रकान्तस्तारकान्तस्तु कान्तक ।
वैक्रान्तश्च नृपावर्तस्सस्यको विमला तथा ॥ १२ ॥
पेरोजश्च नवैतानि ह्युपरत्नानि निर्दिशेत् ।

गन्धक – गन्धकशुद्धि. ॥

[प्रथम प्रकार ।]

उत्पत्तिलक्षण जातिं गन्धक शोधयेदत ॥ १३ ॥
साज्य भाण्डे पय क्षिप्त्वा मुख वस्त्रेण बन्धयेत् ।
तत्पृष्ठे चूर्णित गन्ध क्षिप्त्वा श्रावेण रोधयेत् ॥ १४ ॥
भाण्ड निक्षिप्य भूम्यन्तरूर्ध्वं देय पुट लघु ।
तत क्षीरे द्रुत गन्ध शुद्ध योगेषु योजयेत् ॥ १५ ॥

[द्वितीयः प्रकारः।]

कङ्गुणीसर्षपैरण्डतैलं वाऽथ कुसुम्भजम् ।
मेषीक्षीरं घृतं वाऽथ गोक्षीरं चारनालकम् ॥ १६ ॥

एतेष्वेकं तु भाण्डान्तः किञ्चिदूनं मपूरयेत् ।
रुध्वा वस्त्रेण तद्धुक्तं गन्धचूर्णं ततोपरि ॥ १७ ॥

लोहपात्रेण रुध्वाऽथ पृष्ठे म्याप्य च सर्परम् ।
साग्निमुत्पलकैः पूर्णमेवं द्राव्य समुद्धरेत् ॥ १८ ॥

तद्धुत्तूरद्रवैः पिष्ट्वा शुष्कं द्राव्यं च पूर्ववत् ।
पुनरेवं प्रकर्तव्यं सुशुद्धो गन्धको भवेत् ॥ १९ ॥

[तृतीयः प्रकारः]

यामैक गन्धकं मर्द्यं बृहत्या चाज(श्व)गन्धया ।
भृङ्गीधुत्तूरयोर्वाऽथ तिलपर्ण्याश्च तद्द्रवैः ॥ २० ॥

तमादाय घृतैस्तुल्यैर्लोहपात्रेऽक्षणं पचेत् ।
बध्वाऽग्निना द्रुतं तं वै छागक्षीरे विनिक्षिपेत् ॥२१॥
इत्येवं सप्तधा कुर्याच्छुद्धिमायाति गन्धकः ।

[चतुर्थः प्रकारः।]

करञ्जैरण्डतैलं च छागीदुग्धं च माण्डके ॥ २२ ॥
क्षिप्त्वा तस्य मुखं बध्वा स्वच्छवस्त्रेण बुद्धिमान् ।
गन्धकं धूर्तजैर्द्रावैर्दिनं भाव्यं विशोषयेत् ॥ २३ ॥

तच्चूर्णं पूर्वभाण्डस्य वस्त्रोपरि निधापयेत् ।
आच्छाद्य श्रावकेनैव पृष्ठे देयं पुटं लघु ॥ २४ ॥

द्रुतं गन्धं समादाय भाव्यं धुत्तूरजैर्द्रवैः ।
तद्वद्द्राव्यं पुनर्भाव्यं द्रावयेच्च पुनस्ततः ॥ २५ ॥

आदाय मत्स्यपित्तेन ससधा भाव्यमातपे ।
ततः कोशातकीबीजचूर्णेन सह पेषयेत् ॥ २६ ॥

भावयेद्भृङ्गजैर्द्रावैस्सप्ताहमातपे खरे ।
तोयेन क्षालितं शोष्यं ततो मृद्वग्निना क्षणम् ॥ २७ ॥

घृताक्ते लोहपात्रे तु द्रावितं ढालयेतत. ।
भृङ्गराजद्रवान्तस्थस्सम्यक् शुद्धस्स जायते ॥ २८ ॥

[पञ्चमः प्रकारः ।]

गन्धकं याममात्रं वा मर्द्यं माहूम्यजगन्धयो ।
भृङ्गधुत्तूरयोर्वाऽपि तिल्पर्णीरसेन वा ॥ २९ ॥

तदादाय घृतोपेतं लोहपात्रे क्षणं पचेत् ।
लघ्वग्निना द्रुतं तच्च मेषीक्षीरे विनिक्षिपेत् ॥ ३० ॥

एवं कृतं ससवारं शुद्धं भवति गन्धकम् ।

गन्धकतैलम् ॥

[प्रथमः प्रकारः ।]

देवदाल्यम्लपर्णी वा नारङ्ग वाऽथ दाडिमम् ॥ ३१ ॥

मातुलुङ्गं यथालाभं द्रवमेकस्य चाऽहरेत् ।
गन्धकस्य तु पादांश टङ्कणं द्रवसयुतम् ॥ ३२ ॥

आतपे त्रिदिनं शुष्कं द्रवं देयं पुन पुन ।
धुत्तूरतुलसीकृष्णलशुनं देवदालिका ॥ ३३ ॥

शिग्रुमूले काकमाची कर्पूरं शंखिनीद्वयम् ।
कृष्णागरु च कस्तूरी वन्ध्या कर्कोटकी समम् ॥३४॥

मातुलुङ्गरसैः पिष्ट्वा क्षिपेदेरण्डतैलके ।
अनेन लोहपात्रस्थं भावयेत्पूर्वगन्धकम् ॥ ३५ ॥

त्रिवारं क्षौद्रतुल्यं तज्जायते गन्धवर्जितम् ।
इदं गन्धकतैलं स्यात्सर्वयोगेषु योजयेत् ॥ ३६ ॥

[द्वितीयः प्रकारः ।]

अथवाऽर्कस्नुहीक्षीरैर्वस्त्रं लेप्यं तु सप्तधा ।
गन्धकं नवनीतेन पिष्ट्वा वस्त्रं लिपेत्तु ताम् ॥ ३७ ॥

तद्वर्तिं ज्वलितां दद्रो धृतां कुर्यादधोमुखीम् ।
तैलं पतेदधो भाण्डे ग्राह्यं योगेषु योजयेत् ॥ ३८ ॥

गन्धकसत्त्वपातनम् ॥

[प्रथमः प्रकारः ।]

गन्धकन्तु कुबेराक्षीतैलेन चिरमर्दितः ।
दृढं प्रकटमूषायां ध्मातस्सत्त्वं विमुञ्चति ॥ ३९ ॥

[द्वितीयः प्रकारः]

यद्वा भाण्डोदरे क्षिप्त्वा गन्धकं पूर्वशोधितम् ।
विधाय ताम्रपात्रेण तस्मिन्शीतोदकं क्षिपेत् ॥ ४० ॥

मन्दं प्रज्वाल्य तदधो वह्निमुष्णं जलं हरेत् ।
एवं पुनः पुनश्शीतजलमूर्ध्वं विनिक्षिपेत् ॥ ४१ ॥

गन्धकस्याग्नितस्सत्त्वं स्वर्णाभं सर्वकार्यकृत् ।
न चास्य सत्त्वमाददात्सत्त्वरूपो हि गन्धकः ॥ ४२ ॥

इति गन्धकतत्त्वज्ञाः केचिदन्ये प्रचक्षते ।

गन्धकद्रुतिः ॥

यद्वा सञ्चूर्णितं गन्धं कटुतैलसमन्वितम् ॥ ४३ ॥
वस्त्रे निक्षिप्य तद्वस्त्रं कारयेद्वर्तिकां दृढाम् ।
ततस्सूत्रेण संवेष्ट्य गोघृतेन परिप्लुताम् ॥ ४४ ॥

सन्दंशेनोद्धृतं कृत्वा वर्तिं चाऽध· प्रदीपयेत् ।
पक्वाम्रफलसम्भूतरसवर्णं भवेद्द्युति ॥ ४५ ॥

गन्धकस्य गुणाः ॥

गन्धक कटुक· पाके वीर्योष्णो विमलस्सरः ।
विसर्पकुष्ठकण्डूतिक्रिमिगुल्मक्षयापह ॥ ४६ ॥
अक्षिरोगप्रशमनो वृष्यो विषगदार्तिजित् ।
सर्वसिद्धिप्रदो बल्यस्त्रिदोषघ्नो रसायन ॥ ४७ ॥

हरितालम् ॥

हरितालञ्च गोदन्ती तालकं नटमण्डनम् ।
गिरिजाललितं पीतमतिगन्ध बिडालकम् ॥ ४८ ॥

[हरितालभेदा· ।]

हरितालं द्विधा प्रोक्त पत्राख्यं पिण्डसञ्ज्ञकम् ।
स्वर्णवर्णं गुरु स्निग्धं तनुपत्र च भासुरम् ॥ ४९ ॥

तत्पत्रतालकं प्रोक्तं बहुपत्रं रसायनम् ।
निष्पत्रं पिण्डसदृशं स्वल्पसत्वं तथा गुरु ॥ ५० ॥

स्त्रीपुष्पहरण तत्तु गुणाल्पं पिण्डतालकम् ।

[अशुद्धहरितालसेवने दोषा ।]

वातश्लेष्मप्रमेहादिकरमायुर्निबर्हणम् ॥ ५१ ॥
तापस्फोटाङ्गसङ्कोचं हरितालमशोधितम् ।

हरितालशुद्धिः ॥

[प्रथमः प्रकार· ।]

तालकं कणशः कृत्वा दशांशेन तु टङ्कणम् ॥ ५२ ॥
जम्बीरोत्थद्रवै क्षाल्यं काञ्जिकै क्षालयेत्पुन ।

वस्त्रे चतुर्गुणे वध्वां दोलायन्त्रे दिनं पचेत् ॥ ५३ ॥
सचूर्णेनारनालेन दिन कूष्माण्डजै रसैः ।
स्वेद्य वा शाल्मलीतोयैस्तालकं शुद्धिमाप्नुयात् ॥५४॥

[द्वितीयः प्रकारः ।]

मधुतुल्ये घनीभूते कषाये ब्रह्ममूलजे ।
त्रिवारं तालकं भाव्यं पिष्ट्वा मूत्रेऽथ माहिषे ॥ ५५ ॥
उत्परैर्दशमिर्देयं पुटं कुर्यात्पुनः पुनः ।
एवं द्वादशधा पाच्यं शुद्धं योगेषु योजयेत् ॥ ५६ ॥

[तृतीयः प्रकारः ।]

तालकं पोट्टलं बध्वा सचूर्णे काञ्जिके पचेत् ।
दोलायन्त्रेण यामैकं ततः कूष्माण्डजे रसे ॥ ५७ ॥
तिलतैले पचेद्यामं यामं च त्रिफलाजले ।
एवं यन्त्रे चतुर्यामं पाच्यं शुध्यति तालकम् ॥ ५८ ॥

तालकसत्वपातनम् ॥

[प्रथमः प्रकारः ।]

लाक्षा राजी तिलान्दिराम्रु टङ्कणं लवणं गुडम् ।
तालकार्द्धेण(?) सम्मर्द्य छिद्रमूषां निरोधयेत् ॥५९॥
पुटेत्तालयन्त्रेण सत्व पतति निश्चयम् ।

[द्वितीयः प्रकारः ।]

तालक मर्दयेद्दुग्धैस्सर्पाक्ष्या वा कषायकैः ॥ ६० ॥
पूर्ववज्जनयेत्सत्व छिद्रमूषानिरोधितम् ।

[तृतीय. प्रकारः ।]

लाक्षा राजी गुडं शिग्रु टङ्कणं लवणं तिला. ॥ ६१ ॥

एभिस्तुल्यं सत्त्वतालं मर्दयेद्रविदुग्धकैः ।
दिनं वा वह्निणीदुग्धैः कूष्माण्डस्य द्रवैश्च वा ॥ ६२
तेन कल्केन लिप्त्वान्तश्छिद्रमूषां निरोधयेत् ।
पुटाद्वा धमनात्सत्त्वं ग्राह्यं पातालयन्त्रके ॥ ६३ ॥

[चतुर्थः प्रकारः ।]

तालकादष्टमांशेन देयं सूतं च टङ्कणम् ।
कूष्माण्डस्य रसैस्स्नुह्याः क्षीरैर्मर्द्यान्दिनत्रयम् ॥ ६४ ॥
तद्गोलं छिद्रगूपायां ग्राह्यं सत्त्वं च पूर्ववत् ।

[पञ्चमः प्रकारः ।]

भागाष्षोडश तालस्य विषपारदटङ्कणाः ॥ ६५ ॥
श्वेताभ्रवङ्ग्योश्चूर्णं प्रतिभागं विमिश्रयेत् ।
समं स्नुह्यर्कपयसा मर्दयेद्दिवसद्वयम् ॥ ६६ ॥
तद्गोलं काचकुप्यन्तः क्षिप्त्वा ता काचकूपिकाम् ।
सर्वतोऽङ्गुलमानेन लिम्पेद्वस्त्रे मृदा दृढम् ॥ ६७ ॥
शुष्कां तां वालुकायन्त्रे शनैर्मन्दाग्निना पचेत् ।
शुष्के द्रवे निरुध्याऽथ सम्यङ्मृल्लवणैर्मुखम् ॥ ६८ ।
चण्डाग्निना पचेद्यावत्तावद्द्वादशयामकम् ।
स्वाङ्गशीतं समुद्धृत्य भित्त्वा कूपीं समाहरेत् ॥ ६९ ।
ऊर्ध्वलग्नं तालसत्त्वं स्फटिकोपलसन्निभम् ।

[षष्ठः प्रकारः ।]

भावितं स्नुक्पयस्सिक्तं स्नुहीद्रावैर्द्विसप्तधा ॥ ७० ॥
तिलसर्षपशिग्रूणि लवणं मिलपञ्चकम् ।
एभिस्तुल्यं शुद्धतालं दिनमेकं विमर्दयेत् ॥ ७१ ॥

मूधरे च्छिद्रमुपान्तधर्मितं सत्वं विमुञ्चति ।

तालकस्य गुणाः ॥

तालकं शोधितं श्रेष्ठं कुष्ठमृत्युजरापहम् ॥ ७२ ॥

सौभाग्यसौगन्ध्यकरं परमायुर्विवर्धनम् ।

मनःशिला ॥

मन शिला स्यात्कुनटी नागास्या रक्तगन्धकः ॥ ७३ ॥

नेपालिका नागजिह्वा कल्याणी ससनामका ।

[मनःशिलाभेदाः ।]

मन शिला त्रिधा प्रोक्ता श्यामाङ्गी कणवीरका ॥ ७४ ॥

खण्डाख्या चैव तद्रूपं विविच्य परिकल्प्यते ।

श्यामा रक्ता खराङ्गा च भाराढ्या श्यामिका मता ॥

तेजस्विनी च निर्भारा ताम्राभा कणवीरका ।

चूर्णीभूताऽतिरक्ताङ्गी सभारा खण्डपूर्विका ॥ ७६ ॥

उत्तरोक्ता गुणैश्श्रेष्ठा भूरिसत्वा प्रकीर्तिता ।

[अशुद्धमनःशिलासेवायां दोषाः ।]

अश्मरीं मूत्रकृच्छ्रं च मन्दाग्निं मलबद्धताम् ॥ ७७ ॥

करोति कुष्ठं तापं च शुद्धिहीना मनःशिला ।

मनःशिलाशुद्धिः ॥

अजामूत्रैस्त्र्यहं पच्याद्दोलायन्त्रे मनःशिलाम् ॥ ७८ ॥

ससधा दध्यजापित्तैर्घर्मे ताप्यं विशुद्धये ।

जीवन्तीभृङ्गराड्रुक्षागम्त्यद्रावैर्मनःशिलाम् ॥ ७९ ॥

दोलायन्त्रे पचेद्याम याम छागोत्थमूत्रकै ।
क्षालयेदारनालेन सर्वयोगेषु योजयेत् ॥ ८० ॥
अगस्त्यस्य रसे भाव्या सप्ताहाच्छोधिता शिला ।

मन.शिलासत्वपातनम् ॥

[प्रथम प्रकार ।]

तालवच्च शिलासत्व पातनं शोधन तथा ॥ ८१ ॥
गोमासैर्मातुलुङ्गाम्लैर्दिन भाव्या मन शिला ।
ता रक्तपीतपुष्पाणा रसै पीतैश्च भावयेत् ॥ ८२ ॥
दिनान्ते मर्दयेद्याम मिलपञ्चकसयुतम् ।
गुलिका काचकूप्यन्त क्षिप्त्वा ता काचकूपिकाम् ॥
सर्वतोऽङ्गुलमानेन लिम्पेद्धुस्तमृदा दृढम् ।
शुष्का ता वालुकायन्त्रे शनैर्मन्दाग्निना पचेत् ॥८४॥
शुष्के द्रवे निरुध्याऽथ सम्यङ्मृल्लवणैर्मुखम् ।
चण्डाग्निना पचेद्यावत्तावद्द्वादशयामकम् ॥ ८५ ॥
स्वाङ्गशीतं समुद्धृत्य भित्वा कूपीं समाहरेत् ।
ऊर्ध्वलग्न शिलासत्व बालार्कसदृशोपमम् ॥ ८६ ॥

[द्वितीय प्रकार ।]

अगस्त्यशिग्रुजैस्तोयैस्त्र्यह् भाव्या मन शिला ।
तालकौषधयोगेन सत्व हेमनिभ भवेत् ॥ ८७ ॥

मन शिलाया गुणाः ॥

मनश्शिला कटूष्णा च सतिक्ता कफवातजित् ।
कण्डूतिक्षयकासघ्नी विषभूताग्निमान्द्यहृत् ॥ ८८ ॥

माक्षिकम् ॥

माक्षिक मधुधातु स्यान्माक्षीक हेममाक्षिकम् ।
ताप्यञ्च तापिज ताक्ष्यं तापीदिशसमुद्भवम् ॥ ८० ॥

[माक्षिकभेदा ।]

माक्षीक द्विविध हेममाक्षिक तारमाक्षिकम् ।
तत्राऽऽद्य माक्षिक कान्यद्युज्जोत्थ स्वर्णसन्निभम् ॥

तप्तीतीरसभूत पञ्चवर्णं सुवर्णवत् ।
पाषाणगह्वल प्रोक्तस्ताप्याख्योऽसौ गुणात्मक ॥ ९१ ॥

सुवर्णाकारभेदाच्च प्रत्येक तत्पुनस्त्रिधा ।
कादम्ब कारवेल्लाख्य तण्डुलीयकसज्ञकम् ॥ ९२ ॥

[अशुद्धमाक्षिकसेवने दोषा ।]

माणविष्टम्भदौर्बल्यवह्निसादाक्षिरोगकृत् ।
माक्षिक मारयत्येव शुद्धिहीन सुरार्चिते ! ॥ ९३ ॥

माक्षिकशुद्धि ॥

[प्रथम प्रकार ।]

माक्षिक नरमूत्रेण क्वाथे कौलुत्थकोद्भवे ।
वेतसेनाम्लवर्गेण टङ्कणेन कटुत्रिकै ॥ ९४ ॥

डोलायन्त्रे दिन पाच्य सूरणस्यैव मध्यगम् ।
दिन रम्भाद्रवै पच्यादुद्धृत पेषयेद्धृतै ॥ ९५ ॥
एरण्डतैलसयुक्तै पुटे पच्यन्विशोधयेत् ।

[द्वितीय प्रकार]

माक्षिकस्य त्रयो भागा भागैक टङ्कणस्य च ॥ ९६ ॥
मातुलुङ्गद्रवैर्वाऽथ जम्बीरोत्थद्रवै पचेत् ।

लोहपात्रे पचेत्तावद्यावत्पात्रं सुलोहितम् ॥ ९७ ॥
ताम्रवर्णमयो चाऽपि तावच्छुध्यति माक्षिकम् ।

[तृतीयः प्रकारः ।]

अग्निपुष्पनिर्यासैरिक्षुमूलं निघर्षयेत् ॥ ९८ ॥
द्रवै पाषाणभेद्याश्च पेष्यमेभिश्च माक्षिकम् ।
तद्धरी चाऽथ मूषाया दशभिरुत्पलै पुटेत् ॥ ९९ ॥
पुन पुनश्च पिष्टाऽथ पुटैष्षड्भिर्विशुध्यति ।

[चतुर्थः प्रकारः ।]

क्षौद्रक्षीरारनालाश्च अष्टभागा. पृथक् पृथक् ॥ १०० ॥
गव्यं तक्रं चतुर्भागं भाग· कौलुत्थजो रस ।
सर्वं संपूरयेद्भाण्डे भागैकं माक्षिक पचेत् ॥ १०१ ॥
डोलायन्त्रेण मृद्वग्नौ याममात्र पुन पचेत् ।
उद्धृत्य मातुलुङ्गाम्लै. पिष्ट्वा दशभिरुत्पलै. ॥ १०२ ॥
पुटे पुनः पुन. कुर्यादेवं द्वादशवासरम् ।
शुद्ध भवति माक्षीकं सर्वयोगेषु योजयेत् ॥ १०३ ॥

[पञ्चमः प्रकारः ।]

माक्षिकं कणश. कृत्वा जालिनीमेघनादयो ।
पिण्डे निक्षिप्य विपचेद्दोलायन्त्रे कुलुत्थजे ॥ १०४ ॥
काथे तच्छुद्धतां याति प्रशस्तं लोहमारणे ।

[षष्ठः प्रकारः ।]

तैले तक्रे गवां मूत्रे कौलुत्थे वाऽम्लकाञ्जिके ॥१०५॥
माक्षिकं शोधयेत्प्राज्ञो गिरिदोषनिवृत्तये ।

[सप्तमः प्रकारः ।]

कुलत्थकोद्रवक्वाथनरमूलाम्लवेतसैः ॥ १०६ ॥

टङ्कणेनाम्लवर्गेण कट्फलत्रिफलेन वा ।

डोलायन्त्रे दिनं पाच्यं सूरणकन्दमध्यगम् ॥ १०७ ॥

दिनं रम्भाद्रवै. पाच्यं घ्मातमुद्धृत्य पेषितम् ।

एरण्डतैलसर्पिभ्यां पुटैदशुध्यति माक्षिकम् ॥ १०८ ॥

[अष्टमः प्रकारः ।]

सुवर्णवर्णविमलं ताप्यं वा कणश. कृतम् ।

पुनर्नवाया. कल्कस्थं कौलुत्थे स्वेदयेद्रसे ॥ १०९ ॥

सैन्धवैर्बीजपूराक्तैर्युक्तं वा पोट्टलीकृतम् ।

डोलायन्त्रे दिनं स्वेद्यं शुद्धिमायाति निश्चितम् ॥

माक्षिकसत्वपातनविधिः ॥

[प्रथमः प्रकारः ।]

गोदुग्धैश्च स्नुहीक्षीरैर्माक्ष्यमेरण्डतैलकैः ।

माक्षिकं दिनमेकं तु मर्दितं वटकीकृतम् ॥ १११ ॥

अग्रवद्भमने सत्वं सस्यकस्याऽप्ययं विधिः ।

[द्वितीयः प्रकारः ।]

दोलायन्त्रे सारनाले माक्षिकं स्वेदयेद्दिनम् ॥ ११२ ॥

चूर्णितं मधुसर्पिभ्यां लोहपात्रे पचेद्दिनम् ।

आदाय भावयेद्वर्गे वज्रीक्षीरैर्दिनत्रयम् ॥ ११३ ॥

गृहधूमैर्घृतैः क्षौद्रैस्संयुक्तैर्मर्दयेद्दिनम् ।

अन्धमूषागतं घ्मातं सत्वं गुञ्जानिभं भवेत् ॥ ११४ ॥

[तृतीयः प्रकारः ।]

कदलीकन्दतोयेन माक्षिकं शतधाऽऽतपे ।
भावितं पाचयेद्यामं साज्यैर्वातारितैलकैः ॥ ११५ ॥
पूर्ववद्भक्षनात्सत्वमिन्द्रगोपसमं भवेत् ।

[चतुर्थः प्रकारः ।]

स्नुह्यर्कपयसा सत्यैर्माक्षिकं मर्दयेद्दिनम् ॥ ११६ ॥
कट्फलं टङ्कणं चैव प्रतिपादाशमिश्रितम् ।
मूकमूषागतं ध्मातं सत्वं मणिनिभं भवेत् ॥ ११७ ॥

[पञ्चमः प्रकारः ।]

कदलीकन्दतुलसीजंबीराणां द्रवैः क्रमात् ।
भावयेन्माक्षिकं श्लक्ष्णं प्रतिद्रावेण सप्तधा ॥ ११८ ॥
रुध्वा ध्माते पतेत्सत्वं शुक्लतुण्डनिभं शुभम् ।

[षष्ठः प्रकारः ।]

मूलवर्गाम्लवर्गाभ्यां द्विसप्ताहं विभावयेत् ॥ ११९ ॥
माक्षीकं तीव्रघर्मेण दिनमम्लैश्च मर्दयेत् ।
मित्रपञ्चकसंयुक्तं वटीकृत्य धमेद्दृढम् ॥ १२० ॥
व्योमवद्भक्षनालेन सत्वं शुल्वनिभं भवेत् ।

[सप्तमः प्रकारः ।]

स्नुहीक्षीरैर्गवां क्षीरैर्भाव्यमेरण्डतैलकैः ॥ १२१ ॥
माक्षिकं पञ्चमिलाक्तं सप्ताहान्ते वटीकृतम् ।
पूर्ववद्विधमेत्तेन सत्वं लाक्षानिभं भवेत् ॥ १२२ ॥

[अष्टमः प्रकारः ।]

स्तन्यै. कट्वुष्टकैश्चैव कदलीतोयसंयुतैः ।
मिलपञ्चकसयुक्तैर्माक्षिकं दिनसप्तकम् ॥ १२३ ॥

भावितं मर्दयेद्यामं दिनं वातारितैलकैः ।
मृद्वग्निना पचेत्तावद्यावद्द्रवति गोलकम् ॥ १२४ ॥

सत्वं किंशुकपुष्पाभं व्योमवद्धमनाद्भवेत् ।
विमलाना च सर्वेषां सस्यकस्याऽप्ययं विधिः ॥१२५॥

[नवमः प्रकारः]

संचूर्ण्य माक्षिकं शुद्धं मर्द्यमम्लेन केनचित् ।
क्षालयेदारनालेन ह्यधस्थं स्वर्णचूर्णवत् ॥ १२६ ॥

जारयेत्तत्समाहृत्य धमेत्सत्वं विमुञ्चति ।
योजयेद्वापने चेदं बीजाना यत्र यत्र वै ॥ १२७ ॥

[दशमः प्रकारः ।]

कदलीपलजैर्नीरैर्माक्षिकं भावयेद्द्रुतम् ।
गन्धर्वतैलमध्वाज्यैः पक्वमेकदिनं ततः ॥ १२८ ॥

तत्ताप्यं वज्रमूषायां पक्वायां निक्षिपेत्तत ।
लोहसन्धानकरणं तत्समं तत्र निक्षिपेत् ॥ १२९ ॥

दृढं प्रमूक्मूषायां कोष्ठिकायां निवेशयेत् ।
अङ्गारैः खदिरोद्भूतैर्धमेद्भस्त्याद्वयेन वै ॥ १३० ॥

यन्त्रनालयुजा सत्वं ताप्यस्य पतति ध्रुवम् ।

[एकादशः प्रकारः ।]

माणिबन्ध्यं(मन्थं) वैष्णवं च गृह्णीयात्समभागतः ॥
फलपूररसैः पिष्ट्वा सम्पुटे सुदृढं क्षिपेत् ।

सम्यग्लिप्त्वा वनोद्भूतैश्छाणकै· पुटयेत्ततं ॥ १३२ ॥

कुकुप्तोत्थं(?) तदाकृष्यं सांगशीतं प्रमर्दयेत् ।
फलपूररसैः पक्वैर्मर्दयित्वाऽथ पूर्ववत् ॥ १३३ ॥

पुटनं छाणेनैव तावत्कुर्याद्विचक्षणः ।
यावत्तत्पुटितं कल्कं फलपूराम्लमर्दितम् ॥ १३४ ॥

छाणोत्थेजितनिस्त्रिंशलिप्तं तत्ताम्रतामियात् ।
इत्थं शुद्धं च गरुडं टङ्कणं नीरजं रसम् ॥ १३५ ॥

घृतेन मधुना युक्तं सगुडं गुञ्जया समम् ।
प्राग्वन्मूषागतं कृत्वा धमेत्तत्खदिराग्निना ॥ १३६ ॥

मृदुसत्वं नागसमं मिन्द्रगोपकसन्निभम् ।
पतत्येव न सन्देहस्सर्वज्ञवचनं तथा ॥ १३७ ॥

शुक्लदीप्तिरशब्दश्च यदा वैश्वानरो भवेत् ।
तदा तु सत्वं पतितं जानीयान्नान्यथा क्वचित् ॥१३८॥

माक्षिकस्य गुणाः ॥

कषायतिक्तमधुरं कटुकं माक्षिकद्वयम् ।
उष्णं रसायनं कुष्ठशोषहिध्मावमिप्रणुत् ॥ १३९ ॥

माक्षीकधातुम्सकलामयघ्न.

माणो रसेन्द्रस्य परं हि वृष्य ।
दुर्मेललोहद्वयमेलकश्च
गुणोत्तर· पूर्वरसायनाभ्य· ॥ १४० ॥

अभ्रकम् ॥

उत्पत्त्यादि घनसाऽऽदौ कथितं तद्रसायनें ।
अधुना सम्प्रवक्ष्यामि तत्किंयालद्गुणानपि ॥ १४१ ॥

अभ्रकभस्मविधिः ॥

[प्रथमः प्रकारः ।]

धान्याभ्रकं मेघनादद्रवैस्सम्मर्दयेद्दिनम् ।
शतांशं टङ्कणं दत्वा ततो गजपुटे पचेत् ॥ १४२ ॥

मुस्तासूरणवर्षाभूरसैर्व्यस्तैः पुटं त्रिधा ।
कासमर्दरसैः पञ्च वरागोमूत्रकैरपि ॥ १४३ ॥

न्यग्रोधस्य जटाकाथैर्मर्द्यं दशपुटं पुनः ।
षट् च जम्बीरनीरेण गोक्षीरेण पुटत्रयम् ॥ १४४ ॥

पेषणं घर्मपाकं च स्थालीपाकं पुटं क्रमात् ।
कुर्याच्चत्वारि कर्माणि टङ्कणं च पुटे पुटे ॥ १४५ ॥

निश्चन्द्रं जायते ह्यभ्रं सर्वयोगेषु योजयेत् ।
अयं सामान्यसंस्कारो विशेषस्तु निगद्यते ॥ १४६ ॥

[भस्मीकरणे विशिष्टसंस्काराः ।]

निश्चन्द्रकं मृतत्योम सामान्यक्रमसंस्कृतम् ।
तत्तद्रोगहरद्रव्यकाथैः पिष्ट्वा पुटे पचेत् ॥ १४७ ॥

यन्त्रैस्त्रिभिस्सप्तधा कुर्यात्तत्तद्रोगहरं भवेत् ।
अयं विशेषसंस्कारस्तत्तद्रोगहरो भवेत् ॥ १४८ ॥

पूर्वाह्णे पेषणं कार्यं मध्याह्ने घर्मपाचनम् ।
सायाह्ने स्थालिकापाकं कुर्याद्रात्रौ पुटं क्रमात् ॥१४९॥

संस्कारः पञ्चधा प्रोक्तो घनस्य परमेश्वरि ! ।
धान्याभ्रकरणं सत्वपातनं निर्मलक्रिया ॥ १५० ॥

सुमृतीकरणं चैव त्वमृतीकरणं तथा ।
मारणे घनसत्वस्य घनपत्रस्य मारणे ॥ १५१ ॥

क्रमाच्छ्रेष्ठतमौ प्रोक्तौ शस्तौ दरदटङ्कणौ ।

[द्वितीयः प्रकारः]

मुस्ताक्वाथेन धान्याभ्रं पञ्चविंशत्पुटे पचेत् ॥१५२॥
गोमूत्रैश्च तथा क्वाथैस्त्रिफलाया सुरेश्वरि ! ।
कासमर्दद्रवैरेकं गोक्षीरेण पुटं त्रिधा ॥ १५३ ॥
निश्चन्द्रं जायते ह्यभ्रं सर्वयोगेषु योजयेत् ।
विशेषसंस्कारयुतं तत्तद्रोगहरं भवेत् ॥ १५४ ॥

[तृतीयः प्रकारः ।]

धान्याभ्रकस्य भागैकं भागौ द्वौ टङ्कणस्य च ।
पिष्ट्वा तदभ्रचूर्णायां रुध्वा तीव्राग्निना धमेत् ॥१५५॥
स्वभावशीतलं चूर्णं सर्वयोगेषु योजयेत् ।
विशेषसंस्कारयुतं तत्तद्रोगहरं भवेत् ॥ १५६ ॥

[चतुर्थः प्रकारः ।]

धान्याभ्रं मर्दयेदम्लैर्घर्मे संस्थापयेत्ततः ।
पुटं कुर्यात्ततोऽम्लेन सेचनं मर्दनं पुनः ॥ १५७ ॥
विंशद्वारं ततो दुग्धे पुटनिस्तुषमभ्रकम् ।
क्षिपेत्तं मर्दयेद्दुग्धैर्दुग्धे क्षिप्त्वाऽऽतपे न्यसेत् ॥१५८॥
पुटं त्रिस्सप्तवाराणि कुर्यादेवं पुनः पुनः ।
तण्डुलं वज्रवल्ली च तालमूली पुनर्नवा ॥ १५९ ॥
शार्ङ्गेरी मरिचं चैव बला च पयसा सह ।
पूर्वाभ्रं पेषयेदेतैः प्रत्येकैश्च त्र्यहं त्र्यहम् ॥ १६० ॥
क्षिप्त्वाऽऽतपे पुटे पच्यात्प्रत्येकेन पुनः पुनः ।
एवं निश्चन्द्रकं व्योम कज्जलाभं मृतं भवेत् ॥ १६१ ॥

[पञ्चमः प्रकारः ।]

धान्याभ्रकस्य शुष्क(द्ध)स्य दशांशं मरिचं क्षिपेत् ।
पेषयेदम्लवर्गेण अम्लैर्भाव्यं दिनत्रयम् ॥ १६२ ॥

तच्छुष्कं सम्पुटे धाम्यं खदिराङ्गारकैर्दृढम् ।
ऊर्ध्वपात्रे निवार्याऽथ सिञ्चेदम्लेन केन तम् ॥१६३॥

धान्यं तत्रैव षड्वासम्लैःसिञ्च्यात्पुनः पुनः ।
अगस्त्यशिग्रुवर्षाभूमूलपत्रभवै रसैः ॥ १६४ ॥

पिष्टाऽभ्रं सेचयेत्तेन षड्धा धाम्यं च सेचयेत् ।
सितामध्वाज्यगोक्षीरैस्तद्धौतं पेय्यमभ्रकम् ॥ १६५ ॥

रुध्वा षड्भि. पुटैः पाच्यं पिष्ट्वा चैव पुनः पुनः।
मत्स्याक्ष्याश्चैकवीराया द्रवैः पिष्ट्वा त्रिधा पचेत् ॥
एवं गजपुटै. पाच्यं निश्चन्द्रमयतेऽभ्रकम् ।
पलाभ्रकस्य सिन्दूरं सर्वयोगेषु योजयेत् ॥ १६७ ॥

[षष्ठः प्रकारः ।]

धान्याभ्रं मर्दयेद्यामं मत्स्याक्षीक्षीरसैस्तत. ।
पचेद्गजपुटैरेवं सप्तधा तुलसीरसैः ॥ १६८ ॥

कोकिलाक्षरसैस्सप्त कुमारीक्षरसैस्तथा ।
श्वेतदूर्वारसैस्तद्वद्ब्राह्मीकन्दरसैस्तथा ॥ १६९ ॥

पुनर्नवारसैस्सप्त तद्वत्सञ्चामृतैस्ततः ।
निश्चन्द्रं जायते ह्यभ्रं सर्वयोगेषु योजयेत् ॥ १७० ॥

[सप्तमः प्रकारः ।]

धान्याभ्रं टङ्कण तुल्यं गोमूत्रैस्तुलसीद्रवैः ।
वाकुच्या सूरणैर्नाल्या दिनं पिष्ट्वा पुटे पचेत् ॥१७१॥

द्रवैः पुनः पुनः पिष्ट्वा दिनान्तेषु पुटे पचेत् ॥१७०॥
रुध्वा रुध्वा पुटैम्त्वेव निश्चन्द्रं चाभ्रकं भवेत् ।

[अष्टमः प्रकारः ।]

पिष्ट्वा साम्लारनालेन पेटाली(री)मूलजत्वचम् ॥१७१॥
तद्द्रवैर्मर्दयेदभ्रं दिनं गजपुटे पचेत् ।
एवं सप्तपुटं कार्यं दध्ना च पुटसप्तकम् ॥ १७२ ॥
यवचिच्चाद्रवैस्तद्वन्निश्चन्द्रं जायतेऽभ्रकम् ।

[नवमः प्रकारः]

धान्याभ्रकं रविक्षीरै रविमूलद्रवैश्च वा ॥ १७३ ॥
मर्द्यं मर्द्यं पुटे पच्यात्सप्तधा म्रियते ध्रुवम् ।

[दशमः प्रकारः ।]

धान्याभ्रकं तुषाम्लान्तरातपे स्थापयेद्दिनम् ॥ १७४ ॥
यामं मर्द्यं तु तद्गोलं रुध्वा गजपुटे पचेत् ।
एवं कार्पासतोयान्तस्थाप्यं पाच्यं पुटे पचेत् ॥१७५॥
एवं गोक्षीरमध्यस्थ स्थाप्यं पेप्य पुटे पचेत् ।
पञ्चादम्लैश्च गोक्षीरै कार्पासैश्च पुन पुन ॥१७६॥
घर्मपाकं मर्दनं च स्थालीपाकं पुटं क्रमात् ।
एकविंशत्पुटे प्राप्ते निश्चन्द्रं जायतेऽभ्रकम् ॥ १७७ ॥
सर्वेषां घातिताभ्राणाममृतीकरणे विधि ।

अभ्रकस्य गुणाः ॥

अभ्रकं गगनं भृङ्गं बहुपुलमुमाभवम् ॥ १७८ ॥
पत्राभ्रकभ्य सिन्दूरममृतं परमं हितम् ।

त्रिदोषघ्नं बलकरं वृष्यमारोग्यदं शुचि ॥ १७९ ॥
सर्वरोगहरं सौम्यं विषघ्नं च रसायनम् ।

हिङ्गुलः ॥

हिङ्गुलो दरदं चूर्णपारदश्च रसोद्भवः ॥ १८० ॥
रसगर्भस्सुरक्तश्च लोहघ्नस्सिद्धिपारदः ।
हिङ्गुलस्त्रिविधो ज्ञेयश्चर्मारिश्शुकतुण्डकः ॥ १८१ ॥
हंसपादश्च तत्राऽऽद्यं तारकर्मणि योजयेत् ।
अधमं तं विजानीयाच्छुकतुण्डं च मध्यमम् ॥ १८२ ॥
हेमतारक्रियामार्गे योजयेत्परमेश्वरि ! ।
हंसपादो महाश्रेष्ठ. सर्वकर्मकरो हि सः ॥ १८३ ॥
तस्य सत्वं सूत एव दरदस्य त्रिभेदतः ।
हेमकिट्टस्य सदृशस्तद्रूपस्तीक्ष्णमारक ॥ १८४ ॥
चर्मारिस्तीक्ष्णरूपस्स्यात्सुमीतश्शुकतुण्डक ।
जपाकुसुमसङ्काशो हंसपादो महोत्तमः ॥ १८५ ॥
रसायने सर्वसूतहरणे सर्वरञ्जने ।
लोहानां मारणे श्रेष्ठो वर्णोत्कर्षणकर्मणि ॥ १८६ ॥
रसकस्य तथा रागबन्धे धैरेयकस्स्मृत ।
मलदोषादिकं नाऽस्ति सर्वकार्येषु पूज्यते ॥ १८७ ॥

हिङ्गुलशुद्धिः ॥

मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् ।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम् ॥ १८८ ॥

हिङ्गुलसत्वपातनम् ॥

दरदं पातनायन्त्रे पातितं च जलाशये ।

सत्वं सूतकसङ्काशं विमुञ्चति न संशयः ॥ १८९ ॥

हिङ्गुलस्य गुणाः ॥

ये गुणा. पारदे प्रोक्तास्ते गुणास्सन्ति हिङ्गुले ।
नवज्वरहरः प्रोक्तः सन्यातज्वरनाशनः ॥ १९० ॥

गैरिकम् ॥

गैरिकं गिरिधातुस्स्यादुरक्तधातुर्गवेधुकम् ।
गैरिकं द्विविध प्रोक्तं तत्राऽऽद्य स्वर्णगैरिकम् ॥१९१॥
पाषाणगैरिकं चान्यत्पूर्वं श्रेष्ठतमं गुणै ।

गैरिकस्य गुणाः ॥

शोणितं मसृणं स्निग्धं स्वादु वृष्यं हिमं लघु ॥१९२॥
चक्षुष्य रक्तपित्तघ्नं विषहिध्मावमिप्रणुत् ।
तापज्वरहरं श्रेष्ठ हेमघ्नं रक्तगैरिकम् ॥ १९३ ॥
पापाणगैरिकं प्रोक्तं कठिनं ताम्रवर्णकम् ।

चपलः ॥

देहवेधी लोहवेधी चपला रसबन्धिनी ॥ १९४ ॥
चपला बहुभेदा च सर्वलोहस्वरूपतः ।
हेमस्तारो रविमयस्सीसात्मा वङ्गरूपधृक् ॥ १९५ ॥
तीक्ष्णरूपः कांस्यरूपो रक्तो विषमयस्तथा ।

[चपलस्वरूपम् ।]

सत्वलोहस्वरूपास्ते विगो हरितलोहभाक् ॥ १९६ ॥
विषाख्यं चपलं प्राप्य निर्जीवे तस्य दापयेत् ।
पुटेनारण्यजैरछागैस्सधूमं सर्वथा त्यजेत् ॥ १९७ ॥

नश्येत तस्य धूमं वै स्पर्शनं दूरतस्त्यजेत् ।
अशनात्तस्य संस्पर्शान्म्रियते सद्य एव हि ॥ १९८ ॥

धूमावलोकनाच्छीर्षपीडा सञ्जायते ज्वरः ।
एवं दत्तपुटे शान्ते गृह्णीयाच्चपलं ततः ॥ १९९ ॥

चपलस्य गुणाः ॥

तस्य संस्पर्शमात्रेण हीरको म्रियते क्षणात् ।
सर्वेषां चपलानां वै स्वभावस्समुदाहृतः ॥ २०० ॥

वङ्गस्तम्भे नागराजे क्रमे वाऽतीव शस्यते ।
सर्वलोहानि कुर्वन्ति सुवर्णं तारमेव च ॥ २०१ ॥

युक्त्याऽथ शोधितस्सूते विना बीजं च वा तथा ।
शतं वाऽपि सहस्रं वा लक्षं कोटिं च वेधयेत् ॥२०२॥

वङ्गेण रसराजेन बीजेन च समाश्रिता ।
धूमतो वेधयेल्लोहान् रसजीर्णस्स्वयं गलेत् ॥ २०३ ॥

निष्पत्य तेन देहस्य चपलेन महात्मना ।

शिलाजतु ॥

अश्मजं गिरिजं शैलमश्मलाक्षा शिलाजतु ॥ २०४ ॥

शिलाधातुर्द्विधा प्रोक्तो गोमूलाऽऽद्यो रसायनम् ।
कर्पूरपूर्वकश्चान्यस्तत्राऽऽद्यो द्विविधस्स्मृतः ॥ २०५ ॥

ससत्वश्चैव निःसत्वस्तयोः पूर्वो गुणाधिकः ।
ग्रीष्मे तीव्रार्कतप्तेभ्यः पादेभ्यो हिमभूभृतः ॥२०६॥

स्वर्णरूप्याकगर्भेभ्यः शिलाधातुर्विनिस्सरेत् ।

शिलाजतोर्गुणाः ॥

स्वर्णगर्भगिरेर्जातं जपापुष्पनिभं गुरु ॥ २०७ ॥

संसर्गे स्वादु परमं परमं तद्रसायनम् ।
रूप्यगर्भगिरेर्जातं मधुरं पाण्डुरं गुरु ॥ २०८ ॥
शिलाजं पाण्डुरोगघ्नं विशेषात्पित्तरोगजित् ।
ताम्रगर्भगिरेर्जातं नीलवर्णं घनं गुरु ॥ २०९ ॥
शिलाजं कफवातघ्नं तीक्ष्णोष्णं दीपनं परम् ।
वह्नौ क्षिप्तं भवेद्यत्तल्लिङ्गाकारं धूमकम् ॥ २१० ॥
सलिलेऽप्यचलीनञ्च तत्सिद्धं हि शिलाजतु ।

गोमूत्रगन्धि कृष्णं
गुग्गुलुकाभं सशर्करं मृत्स्नम् ।
स्निग्धमनम्लकषायं
मृदु गुरु च शिलाजतु श्रेष्ठम् ॥ २११ ॥

सर्वं च तिक्तकटुकं स्वादु नात्युष्णशीतलम् ॥ २१२ ॥
वृष्यं त्रिदोषजिद्मेदि चक्षुष्य च रसायनम् ।
क्षयशोफोदरार्शोघ्नं मेहगुल्महापहम् ॥ २१३ ॥
नूनं सज्वरपाण्डुशोफशमनं मेहाग्निमान्द्यापहं
मेदश्छेदकरं च यक्ष्मशमनं मूलामयोन्मूलनम् ।
गुल्मप्लीहविनाशनं जठरहृच्छूलप्रमाथापहं
सर्वत्यगदनाशनं किमपरं देहे च लोहे हितम् ॥
रसोपरसधातूनां रत्नलोहेषु ये गुणा. ।
वसन्ति ते शिलाघातौ जरामृत्युजिगीषया ॥ २१५ ॥

भूनागः ॥

भूनाग क्षितिनागश्च भूलता रक्तजन्तुक ।
क्षितिज. क्षितिजन्तुश्च विषघ्नो रक्तवृण्डक. ॥२१६॥

यासां छेदे न रक्तं प्रभवति सततं प्रायशो रक्तभूमौ ।
सङ्ग्राह्या मूलतास्ता विषहरधनदं पातयेत्तासु सत्वम् ।
तद्युक्तया पारदेन्द्रश्चरति यदि समं सारणायन्त्रयोगैः
बद्धोऽयं कोटिवेधी समरविरजते(थ तं)योजयेद्भास्करे वा ॥

भूनागसत्वस्य गुणाः ॥

सत्वं भूनागजं क्ष्वेलयक्षराक्षसमृत्युजित् ।
सर्ववश्यकरं सर्वरोगघ्नं च रसायनम् ॥ २१८ ॥

रसेन्द्रे जारणाकर्मजारितं कोटिवेधकृत् ।
सुवर्णादीनि लोहानि रक्तानि ग्रसति क्षणात् ॥२१९॥

भूनागसत्वपातनम् ॥

[प्रथमः प्रकारः ।]

रक्तभूजातभूनागमृत्तिकां क्षालयेज्जलैः ।
यावत्सत्वावशेषं स्याद्धौतसत्वं तदेव हि ॥ २२० ॥

मित्रपञ्चकयुक्तं तन्मूषाया धमयेद्दृढम् ।
निर्भिद्य मूषा तत्सत्वं गृहीत्वा किट्टकं पुनः ॥२२१॥

एवं त्रिवारं धमनात्सत्वशेषं समाहरेत् ।

[द्वितीयः प्रकारः]

भूनागमृत्तिकां भाण्डे भूनागैस्सह निक्षिपेत् ॥२२२॥

षण्मासान्तं समान्तं वा जलैस्सिञ्चेन्मुहुर्मुहुः ।
अस्य सत्वं विधानेन गृह्णीयादभ्रसत्ववत् ॥ २२३ ॥

[तृतीयः प्रकारः ।]

रक्तभूमिजभूनागान्पञ्जरस्थेन बर्हिणा ।
भक्षयेत्तु शरत्काले नित्यं तन्मलमादरेत् ॥ २२४ ॥

लाक्षासर्जरसस्सर्जौ गुग्गुलुर्मिलपञ्चकम् ।
ऊर्णा क्षाराश्च पटवो नीलसर्षे(र्षे)न्द्रगोपकौ ॥ २२५ ॥

मत्स्यश्च नीलसरट कूर्मपृष्ठं शशास्थि च ।
माक्षीक शिखि(शख)तुत्थ च सर्वांश बर्हिणो मलम् ॥
सर्वं निक्षिप्य मूषाया घमेत्तीव्राग्निना दृढम् ।
निर्भिद्य मूषा तत्सत्वं गृहीत्वा किट्टक पुन ॥
एवं त्रिवारधमनात्सत्वशोधं समाहरेत् ।

हरिद्रादिगणा ॥

हरिद्रादिगणा निशाम्राव पीताङ्ग पीतक(घ)र्षण ॥
तत्सत्वक सित स्वर्ण श्रेष्ठ रसरसायने ।

अग्निजार. ॥

अग्निजारोऽग्निनिर्यासोऽप्यग्निगर्भोऽग्निजस्स्मृत ॥
चडवाग्निमलो ज्ञेयो जरायुश्चार्णवोद्भव ।
अग्निज्वालोऽग्निजारश्च प्रोक्तस्सिन्धुप्लवो दश ॥
सामुद्रस्याग्निनक्रस्य जरायुर्नहिरञ्जित ।
सशुष्को भानुतापेन सोऽग्निजार इति स्मृत ॥२३१॥
जाराभं दहति स्पर्शात्पिच्छिल सागरोत्प्लवम् ।
जरायुस्तच्चतुर्वर्ण श्रेष्ठं तेषु सलोहितम् ॥ २३२ ॥

अग्निजारस्य गुणा. ॥

स्यादग्निजार. कटुकोष्णवीर्य
तुन्दामयघ्न कफवातहारी ।
पित्तप्रद शोणितसन्निपात-
शूलादिवातामयनाशकश्च ॥ २३३ ॥

अग्निजारम्त्रिदोषघ्नो धनुर्वातादिवातनुत् ।
मर्दनो रसवीर्यस्य दीपनो जारणस्तथा ॥ २३४ ॥

खर्परी (रसकम्) ॥

खर्परी रसकं तुत्थखर्पराभ्रमृतसम्भवा ।
रसको द्विविध प्रोक्तो दर्दुर. कारवेल्लक ॥ २३५ ॥
सदृशो(दलो)दर्दुरं प्रोक्तो निर्दश (र्दल)कारवेल्लक ।
सत्वपाते शुभ पूर्वो द्वितीयश्चौषधादिषु ॥ २३६ ॥
घनसत्वनिभं बाह्ये शुभ हारिद्रवर्णत ।
अच्छ खर्परवत्तुत्थ उत्तम(स्या सि) संतोदरम् ॥२३७॥

खर्पर्या गुणा. ॥

रसकम्सर्वदोषघ्न कफपित्तविनाशन ।
चक्षूरोगक्षयघ्नश्च लोहपारदरञ्जनं ॥ २३८ ॥
नागार्जुनेन निर्दिष्टौ रसस्य(श्च) रसकौ द्विधा ।
श्रेष्ठौ सिद्धरसौ ख्यातौ देहलोहकरौ परौ ॥ २३९ ॥
रसश्च रसकश्चोभौ येनाग्निसहनौ कृतौ ।
देहलोहमयीं सिद्धिं दास्यतस्तु न संशय ॥ २४० ॥

खर्परीसंत्यपातनम् ॥

जयन्तीत्रिफलाचूर्णं हरिद्रागुडटङ्कणम् ।
पादार्धं रसकस्येद पिष्ट्वा मूषा प्रलेपयेत् ॥ २४१ ॥
नलिकासम्पुट कृत्वा शोषयेदातपे खरे ।
भाल्य पातालयन्त्रेण सत्व ध्माते पुटेऽथ वा ॥२४२॥

खर्परीशुद्धि ॥

रम्भलारजोमूत्रै रसक भावयेद्दिनम् ।

तैरेव दिनमेकं तु मर्दयेच्छुद्धिमाप्नुयात् ॥ २४३ ॥

मयूरतुत्थम् ॥

मयूरतुत्थं तुत्थं च नीलाश्मा ताम्रभस्म च ।
मयूरग्रीवकं श्वेडनाशन सस्यकं प्रिये ! ॥ २४४ ॥
मयूरग्रीवसङ्काशं घृष्टे गोक्षीरसन्निभम् ।
अप्सु च प्लवते क्षिप्तमेतन्मायूरतुत्थकम् ॥ २४५ ॥
अथवा शुकपिञ्छाभमन्त काञ्चनबिन्दुभि ।
अङ्कितं घर्षयेत्तुत्थमायसे चाम्लसंयुते ॥ २४६ ॥
भवेदयस्ताम्रनिभं एतन्मायूरतुत्थकम् ।

मयूरतुत्थशुद्धिः ॥

विष्ठया मर्दयेत्तुत्थं मार्जारककपोतयो ॥ २४७ ॥
दशांशं टङ्कण दत्वा पाच्य मृदुपुटे तत ।
पुटं दध्ना पुटं क्षौद्रैर्देयं तुत्थविशुद्धये ॥ २४८ ॥

मयूरतुत्थसत्वपातनम् ॥

तुत्थं च टङ्कणं चैव तुल्यं श्लक्ष्णं विमर्दयेत् ।
मूषाया तं विनिक्षिप्य रुध्वा तीव्राग्निना धमेत् ॥
इन्द्रगोपनिभं सत्वं पतत्येव न संशय. ।

मयूरतुत्थस्य गुणाः ॥

तुत्थं कटुकषायोष्णं श्वित्रनेत्रामयापहम् ॥ २५० ॥
विषदोषेषु सर्वेषु प्रशस्तं कान्तिकारकम् ।

कङ्कुष्ठम् ॥

कङ्कुष्ठ काकुष्ठं च रेचक रागदायकम् ॥ २५१ ॥

कट्कुष्ठं च द्विधा प्रोक्तं हेमतारसमं तथा ।
व्रणजन्तुज्वरघ्नं च शूलोदावर्तगुल्महृत् ॥ २५२ ॥

गिरिसिन्दूरम् ॥

महागिरिपु चाल्लो(प्ला)व(वी) पाषाणान्तस्थितो रसः ।
शुष्कः शोणस्स निर्दिष्टो गिरिसिन्दूरसंज्ञया ॥२५३॥

त्रिदोषशमनं भेदि रसबन्धनकारकम् ।
देहलोहकरं नेत्र्यं गिरिसिन्दूरमीरितम् ॥ २५४ ॥

टङ्कणम् ॥

टङ्कणं टङ्कणक्षारो रसक्षारो रसाधिकः ।
लोहद्रावी रसघ्नश्च सुभगो रक्तदश्च सः ॥ २५५ ॥
मालतीतीरसम्भूतः क्षारश्रेष्ठो नवाह्वयः ।
अश्मरीमतिसारं च निहन्यात्स्थावरं विषम् ॥ २५६ ॥
रससिद्धिकरः प्रोक्तो नागार्जुनपुरस्सरैः ।

कम्पिल्लकः ॥

इष्टचूर्णस्य सङ्काशश्चन्द्रिकाढ्योऽतिरेचकः ॥ २५७ ॥
सौराष्ट्रदेशखनिजस्स हि कंपिल्लको मतः ।
पित्तव्रणाध्मानविबन्धनघ्नः
श्लेष्मोदरार्तिकृमिगुल्महारी ।
मूलामशूलज्वरशोफहारी
कंपिल्लको रिच्य मलापहारी ॥ २५८ ॥

वत्सनाभिः ॥

उत्पत्यादि विषस्याऽऽदौ कथितं हि रसायनम् ॥
अमृतं स्याद्वत्सनाभो विषमुग्रं महौषधम् ।

गरलं मरणं नागस्स्तोकं प्राणहारकम् ॥ २६० ॥

सर्वकुष्ठहरं प्रोक्तं सर्वव्याधिविनाशनम् ।
सन्निपातादिरोगाणां विनिवृत्तिकरं प्रिये ! ॥ २६१ ॥

कासीसम् ॥

कासीसं धातुकासीसं केसरं हसलोमशम् ।
शोधन पांशुकासीसं शुभ्रं सत्वाह्वयं मतम् ॥ २६२ ॥

कासीसं त्रिविधं शुभ्रं कृष्णं पीतमिति स्मृतम् ।
कासीसं पुष्पकासीसं हीरकासीसमित्यथ ॥ २६३ ॥

पीतं कृष्णं सितं रक्तं चतुर्धेति परे जगुः ।
कासीसमुष्णं सक्षारकषायाम्लं सतिक्तकम् ॥ २६४ ॥

वातश्लेष्मप्रशमनं चक्षुष्यं रञ्जकं परम् ।
मूलकृच्छ्राश्मरीकुष्ठकण्डूव्रणविषापहम् ॥ २६५ ॥

गौरीपाषाणकः ॥

गौरीपाषाणकः पीतो व्यक्तदेहश्च चूर्णकः ।
रसवन्धकरस्स्निग्धो दोषघ्नो रसवीर्यकृत् ॥ २६६ ॥

तुवरी फटकी च ॥

भूमिस्तुवरिका फुल्लतुवरी रञ्जिका क्षितिः ।
चिलभूश्चीनकारश्च मञ्जिष्ठारागदायिनी ॥ २६७ ॥

खगस्तु फटकी दुग्धपाषाणो नेत्ररोगहा ।
कर्पूराख्यशिलाधातुर्मञ्जिष्ठारागरञ्जकः ॥ २६८ ॥

पोटाशफटकी ॥

सदलं पीतवर्णं च भवेद्गुर्जरमण्डले ।

अर्जुनस्य गिरेः पार्श्वे जातं पोदारशृङ्गिकम् ॥ २६९ ॥
सीससत्वं मरुच्छ्लेष्मशमनं पुन्नदापहम् ।
रसबन्धनमुत्कृष्टं केशरञ्जनमुत्तमम् ॥ २७० ॥

सिन्दूरम् ॥

सिन्दूरनागगर्भे
सैमन्तिकवीरपासु नागभवम् ।
रक्तं च नागरेणुः
गणपतिभूषा सुरङ्ग इत्याख्या ॥ २७१ ॥
सौभाग्यं चैव शृङ्गारं मङ्गल्यमरुण रजः ।
सिन्दूरं कटुकं तिक्तमुष्णं व्रणविरोपणम् ॥ २७२ ॥
किलासविषकण्डूतिविसर्पशमनं परम् ।
हिङ्गुले ये गुणास्सन्ति ते गुणाम्तिसुरौ प्रिये ॥२७३॥

रसाञ्जनम् ॥

रसाञ्जनं रसोद्भूतं रसगर्भं रसाम्रजम् ।
रीत्या तु धाम्यमानायां तत्किट्टं तु रसाञ्जनम् ॥२७४॥
तदभावे तु कर्तव्यं दार्वीकाथसमुद्भवम् ।
कृतकं बालभैषज्यं दार्वीकाथोद्भवं तथा ॥ २७५ ॥
दार्वीकाथभवं काष्ठ(ष्ट्य)विकासि क्षितमङ्गि यत् ।
तद्रसाञ्जनमुद्दिष्टं कषायं कटु तिक्तकम् ॥ २७६ ॥
किञ्चिदुष्ण कफहरं छेदनं लेखनं लघु ।
रक्तपित्तप्रशमन नेत्ररोगविनाशनम् ॥ २७७ ॥
रसाञ्जनं तार्क्ष्यशैलं ज्ञेयं चर्याञ्जनं तथा ।
रसनाभ चाग्निसारं द्वादशाह्वयकीर्तितम् ॥ २७८ ॥

नीलाञ्जनम् ॥

नील नीलाञ्जन चैव चक्षुष्य वारिसम्भवम् ।
कपोतक च कापोत सम्प्रोक्त शक्रभूमिजम् ॥ ७९ ॥

शीत नीलाञ्जन प्रोक्त कटुतिक्तकषायकम् ।
चक्षुष्य कफवातघ्न विषघ्न च रसायनम् ॥ २८० ॥

सौवीराञ्जनम् ॥

सौवीरमञ्जन स्निग्धमवृष्ट शिलातले ।
अञ्जनाभ शिलारूपमेतच्छ्रेष्ठमकृत्रिमम् ॥ २८१ ॥

सौवीरमञ्जन चैव रक्तपित्तहर हितम् ।
विषहिध्माक्षिरोगघ्न व्रणशोधनरोपणम् ॥ २८२ ॥

स्रोतोऽञ्जनम् ॥

स्रोतोद्भव स्रोतनदीभव च
स्रोतोऽञ्जन वारिभव तथाऽन्यम् ।
सौवीरसार च कपोतसार
वल्मीकशीर्ष मुनिसम्मिताह्वम् ॥ २८३ ॥

वल्मीकशिखराकार भङ्गे नीलोत्पलद्युति ।
घर्षणे गैरिकच्छाय स्रोतोऽञ्जनमिद भवेत् ॥ २८४ ॥

स्रोतोऽञ्जन शीतकटुकषाय क्रिमिनाशनम् ।
रसायन रसे योज्य स्तन्यवृद्धिकर परम् ॥ २८५ ॥

स्रोतोऽञ्जन हिम स्निग्ध तृष्णाहृत्स्वादु लेखनम् ।
नेत्र्य हिध्मावमिच्छर्दिकफपित्तासकोपनुत् ॥ २८६ ॥

महिफेनम् ॥

श्रान्तस्य मथनाक्षोभाद्वासुकेर्वदनोत्थिता ।
द्वीपान्तरे पतन्ति स्म सविषास्स्वेदबिन्दव ॥ २८७ ॥

यत्र यत्र पतन्ति स्म प्ररूढा गुल्मरूपतः ।
तेषु जातं तु निर्यासमफेनं ब्रुवते जनाः ॥ २८८ ॥

चतुर्विधमफेनं स्याज्जारणं मारणं तथा ।
धारणं सारणं चैव क्रमाद्वक्ष्यामि लक्षणम् ॥ २८९ ॥

श्वेतं तु जारणं प्रोक्तं कृष्णवर्णं तु मारणम् ।
धारणं पीतवर्णं च कर्बुरं सारणं तथा ॥ २९० ॥

जारणं जरयेदन्नं मारणं मृत्युदायकम् ।
धारणं च वयःस्तम्भे सारणं मलसारकम् ॥ २९१ ॥

अफेन सन्निपातघ्नं वृष्यं बल्यं च मोहदम् ।
ग्रहणीमतिसारं च नाशयेत्पण्डतामपि ॥ २९२ ॥

पुष्पाञ्जनम् ॥

पुष्पाञ्जनं पुष्पकेतुः कौस्तुभः कुसुमाञ्जनम् ।
रीतिकं रीतिकुसुमं रीतिपुष्पं च पुष्पकम् ॥ २९३ ॥

पुष्पाञ्जनं हितं प्रोक्तं पित्तहिक्काप्रदाहनुत् ।
नाशयेद्विषकासार्तिसर्वनेत्रामयापहम् ॥ २९४ ॥

शङ्खः क्षुद्रशङ्खश्च ॥

शङ्खोऽर्णवभव. कंबुर्जलज. पावनध्वनिः ।
कुटिलोऽन्तर्महानादः श्वेतपीतस्तुनादक ॥ २९५ ॥

सस्वनो दीर्घनादश्च बहुनादो हरप्रियः ।
क्षुल्लक· क्षुद्रशङ्खस्स्याच्छंबूको नखशङ्खक· ॥ २९६ ॥

शङ्ख. कटुरसश्शीतः पुष्टिवीर्यबलप्रदः ।
गुल्मशूलकफश्वासनाशनो विषदोषहः ॥ २९७ ॥

क्षुल्लक. कटुकः स्निग्धशूलहारी च दीपन. ।

शुक्तिः ॥

शुक्तिर्मुक्ताप्रसूश्चैव महाशुक्तिश्च शुक्तिका ॥ २९८ ॥
मुक्तास्फोटस्तौतिकस्तु मौक्तिकप्रसवा च सा ।
ज्ञेया मौक्तिकमूश्चैव मुक्तामाता तथा स्मृता ॥२९९॥
मुक्ताशुक्तिः कटुस्निग्धा श्वांसहृद्रोगहारिणी ।
शूलप्रशमनी रुच्या मधुरा दीपनी परा ॥ ३०० ॥

जलशुक्तिः ॥

जलशुक्तिः क्षुद्रशुक्तिः किमिसुम्फुटिका च सा ।
जलशुक्तिः कटुस्निग्धा दीपनी गुल्मशूलनुत् ॥३०१॥
तथा विपहरा रुच्या पाचनी बलदायिनी ।

कपर्दः ॥

कपर्दको वराटश्च कपर्दश्च वराटिका ॥ ३०२ ॥
चराचरश्चरो वर्यो बालक्रीडनकश्च सः ।
पीताभा ग्रन्थिला पृष्ठे दीर्घवृत्ता वराटिका ॥ ३०३ ॥
रसवैद्यैर्विनिर्दिष्टा सा चराचरसंज्ञका ।
सार्धनिष्कभरा श्रेष्ठा निष्कभारा च मध्यमा ॥ ३०४॥
पादोननिष्कभारा च कनिष्ठा परिकीर्तिता ।
परिणामादिशूलघ्नी ग्रहणीक्षयनाशनी ॥ ३०५ ॥
कटूष्णा दीपनी वृष्या नेत्र्या वातकफापहा ।
रसेन्द्रजारणे प्रोक्ता विडद्रव्येषु शस्यते ॥ ३०६ ॥
वदन्ये पुंवराटास्युर्गुरवश्श्लेष्मपित्तलाः ।
कपर्दः कटुतिक्तोष्णः कर्णशूलव्रणापहः ॥ ३०७ ॥

यवशूको यवाह्वश्च यवपाक्यो यवारु(म)जः ॥ ३२५ ॥
यवक्षारः कटूष्णश्च कफवातोदरार्तिनुत् ।
आमशूलाश्मरीकृच्छ्रविषदोषहरः परः ॥ ३२६ ॥

सर्जक्षारः ॥

सर्जःक्षारस्सर्जिकश्च क्षारस्सर्जी सुवर्जिकः ।
सर्जीकः कटुरूक्षश्च तीक्ष्णो वातकफार्तिनुत् ॥३२७॥
गुल्मानाहवमिघ्नश्च मेहजाठररोगहृत् ।

लवणक्षारः ॥

लोणारं लवणोत्थं लवणासुरं च लवणभेदश्च ॥३२८॥
जतु(लु)जं लवणक्षारं लवणं च क्षारलवणं च ।
लोणकक्षारमत्युष्णं तीक्ष्णं पित्तप्रवृद्धिदम् ॥ ३२९ ॥
क्षारं लवणमीषच्च वातगुल्मादिशूलनुत् ।

वज्रकक्षारः ॥

वज्रकं वज्रकक्षारं क्षारश्रेष्ठ विदारकम् ॥ ३३० ॥
सारं चन्दनसारं च धूमोत्थं धूमजं गजाः ।
वज्रकक्षारमत्युष्णं तीक्ष्णं क्षारं च रोधनम् ॥ ३३१ ॥
गुल्मोदरार्तिविष्टंभशूलप्रशमनं परम् ।

सामुद्रलवणम् ॥

सामुद्रकं तु सामुद्रं सामुद्रलवणं शिवम् ॥ ३३२ ॥
सामुद्रं लघु हृद्यं च वातिसृजपित्तलम् ।
विदाहि कफवातघ्नं दीपनं रुचिकृत्प्रियम् ॥ ३३३ ॥

सैन्धवम् ॥

सैन्धवं स्याच्छीतशिवं नादेयं सिन्धुजं शिवम् ।
शुद्ध शिवात्मकं पथ्यं माणिमन्थ नवाभिधम् ॥३२४॥

सैन्धवं लवणं वृष्यं चक्षुष्यं दीपन रुचि ।
पूतं नम्यात्तिदोषघ्न व्रणदोषविबन्धजित् ॥ ३२५ ॥

सैन्धवं द्विविधं ज्ञेयं सितं रक्तमिति क्रमात् ।
रसवीर्यविपाकेषु गुणाढ्य पूतनं सितम् ॥ ३२६ ॥

काचलवणम् ॥

नीलकाचोद्भवं काचति(नी) लक चैव(काच)सम्भवम् ।
काकसौवर्चल काचलवणं पाक्यजं स्मृतम् ॥ ३२७ ॥

काचोत्थं हृद्यगन्धं च तत्काललवणं तथा ।
कुरुविन्दं काचमलं कतिम च चतुर्दश ॥ ३२८ ॥

काचाख्यं लवणं रुच्यमीषत्क्षारं सपित्तलम् ।
दाहदं कफवातघ्नं दीपनं गुल्मशूलहृत् ॥ ३२९ ॥

विडलवणम् ॥

बिडं च बिडक खण्डं कृतक्षारं च आसुरम् ।
सुपाक्यं लवणं खण्डं धूर्तं कृत्रिमकं दश ॥ ३४० ॥

बिडमुष्णं सलवण दीपनं वातनाशनम् ।
रुच्यं चाजीर्णशूलघ्नं गुल्ममेहविनाशनम् ॥ ३४१ ॥

सौवर्चललवणम् ॥

सौवर्चलं च रुचक तिलकं हृद्यगन्धकम् ।
अक्षं च कृष्णलवणं रुच्यं कोद्रविकं तथा ॥ ३४२ ॥

सौवर्चलं लघु क्षारं कटूष्णं गुल्मशूलनुत् ।
ऊर्ध्ववातामशूलार्तिविबन्धारोचकं जयेत् ॥ ३४३ ॥

अम्लवेतसः ॥

अम्लोऽम्लवेतसो वेधी रसाम्लो वीतवेतसः ।
वेतसारश्चाम्लसारदारवेधी च वेधकः ॥ ३४४ ॥
नीलश्च भेदनो भेदी राजाम्लश्चाम्लभेदनः ।
अम्लाङ्कुशो रक्तसारः फलाम्लश्चाम्लनायकः ॥
सहस्रवेधी वीराम्लो गुल्मकेतुर्घराक्षिधा ।
शङ्खमासादिद्रावी स्याद्द्विघा चैवाम्लवेतस. ॥३४६॥
अम्लवेतसमत्यम्लं कषायोष्णामवातजित् ।
कफार्शस्समगुल्माममरोचकहरं परम् ॥ ३४७ ॥

काचः ॥

काचस्तुपारसारश्च रसखोटमलापहः ।
शृङ्गारी चाभ्रधारी च सर्वनेत्रामयापहा ॥ ३४८ ॥

छगणम् ॥

पिष्टकं छगणश्छाणमुत्पलं च वनोत्पलम् ।
करिण्डोपलशाटी च वरटी छगणाभिधा ॥ ३४९ ॥
रसलोहदोषहारि स्यात तद्भस्म दुरितसंहतये ।

अङ्गाराः ॥

शिखिन्नाः पावकोच्छिष्टा अङ्गारा कोलिशा मता. ॥
कोकिलाश्चेति चाङ्गारा निर्वाणा. पयसा विना ।

सिकता ॥

सिकता प्रवाहजनिता सिक्ता पानीयचूर्णका सूक्ष्मा ॥

सा वालुका श्रमघ्नी संसेकात्सन्निपातघ्नी ।

उपरसानां शोधनम्

कासीसं भावयेद्धर्मे दिनं जम्बीरजैर्द्रवैः ॥ ३५२ ॥
शुध्यते टङ्कणं गै(गौ)री कड्कुष्ठं च वराटिका ।
शङ्खं नीलाञ्जनं चैव पृथक् शोध्यं दिने दिने ॥
गोदुग्धैस्त्रिफलाक्वाथैर्भृङ्गद्रावैश्शिलाजतु ।
मर्दयेदायसे पात्रे दिनैकं तच्च शुध्यति ॥ ३५४ ॥
मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् ।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चयम् ॥ ३५५ ॥
सूर्यावर्तं वज्रकन्दं कदली देवदालिका ।
शिग्रुः कोशातकी वन्ध्या काकमाची च वालुका ॥
आसामेकरसेनैव त्रिक्षारैर्लवणैस्सह ।
भावयेदम्लवर्गैश्च दिनमेकं प्रयत्नतः ॥ ३५७ ॥
सौवीरं कान्तपाषाणः शुद्धा भूनागमृत्तिका ।
सर्वे उपरसाश्चाथ पृथग्भाव्यं दिनं दिनम् ॥ ३५८ ॥
ततः पाच्यं च तद्द्रावैर्डोलायन्त्रे दिनं सुधीः ।
शुध्यन्ते नात्र सन्देहस्सर्वे उपरसाः पृथक् ॥ ३५९ ॥
पुनर्नवामेघनादकपिजम्भीरतिन्दुकैः ।
अगस्तिपुष्पकुमुदयवचिञ्चाम्लवेतसैः ॥ ३६० ॥
वनसूरणभूधात्रीमण्डूकीकरवीरकैः ।
कारवल्लीक्षीरकन्दरक्तोत्पलशमीघनैः ॥ ३६१ ॥
मेषशृङ्गीशशवसाशङ्खवारुणिटङ्कणैः ।
तैल्यमत्स्यवसाम्योपद्रवैरेतैस्सकाञ्जिकैः ॥ ३६२ ॥

एतैस्समस्तैर्व्यस्तैर्वा डोलायन्त्रे दिनत्रयम् ।
अम्रपल्लाद्युपरसान्शुद्धिहेतोः प्रपाचयेत् ॥ ३६३ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ प्रथमोल्लासः ॥

॥ द्वितीय उल्लासः ॥

सुवर्णम् ॥

श्रीभैरवः—

स्वर्णादिसर्वलोहानामुत्पत्त्यादिक्रमं ब्रुवे ।
स्वर्णं सुवर्णकनकोज्ज्वलकाञ्चनानि
कल्याणहाटकहिरण्यमनोहराणि ।
गाङ्गेयगौरिकमहारजताग्निवीर्य-
रुक्मानि हेमतपनीयकभासराणि ॥ १ ॥

जाम्बूनदाष्टापदजातरूप-
पिञ्जानचामीकरकर्बुराणि ।
कार्तस्वरापिञ्जरवर्णभूरि-
तेजांसि दीप्तामलदीपि(पीत)कानि ॥ २ ॥

मङ्गल्यसौमेरवशातकुम्भ-
शृङ्गारचन्द्रारजजांबवानि ।
आग्नेयनिष्काग्निशिखानि चेति
नेलाब्धिनिर्धारितहेमनाम ॥ ३ ॥

[सुवर्णभेदाः ।]

माकृतं सहजं बह्निसम्भूतं खनिसम्भवम् ॥ ४ ॥

रसेन्द्रवेधसञ्जातं स्वर्णं पञ्चविधं स्मृतम् ।
ब्रह्माण्डं संवृतं येन रजोगुणभुवा खलु ॥ ५ ॥

तत्प्राकृतमिति प्रोक्तं देवानामपि दुर्लभम् ।
ब्रह्मा येनाऽऽवृतो जातस्सुवर्णं सहजं हि तत् ॥ ६ ॥

विसृष्टमग्निना शैवं तेजः पीतं सुदुस्सहम् ।
अभूत्स्वर्णं तदुद्दिष्टं सुवर्णं वह्निसंभवम् ॥ ७ ॥

एतत्स्वर्णत्रयं दिव्यं वर्णैष्षोडशभिर्युतम् ।
धारणादेव तत्कुर्याच्छरीरमजरामयम् ॥ ८ ॥

गिरीणां खनिसम्भूतं तत्स्वर्णं खनिजं स्मृतम् ।
तच्चतुर्दशवर्णाऽऽढ्यं भक्षितं सर्वरोगहृत् ॥ ९ ॥

रसेन्द्रवेधसम्भूतं तद्वेधजमुदाहृतम् ।
रसायनं महाश्रेष्ठं पवित्रं वेधजं हि तत् ॥ १० ॥

रक्ताभं पीतवर्णं च द्विविधं काञ्चनं भवेत् ।

[ग्राह्याग्राह्यसुवर्णस्वरूपम् ।]

दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम् ॥ ११ ।

गुरु स्निग्धं मृदु स्वच्छं निर्दल रक्तपीतकम् ।
हेम षोडशवर्णाऽऽढ्यं शस्यते देहलोहयोः ॥ १२ ।

श्वेताङ्गं कठिनं रूक्षं विवर्णं समलं दलम् ।
दाहे श्वेतासितं श्वेतं निकषे लघु च व्रजेत् ॥ १३

न शुद्धं न मृतं स्वर्णं रोगवर्गं करोति च ।
सौख्यं वीर्यं बलं हन्ति तस्माच्छुद्धिरुदीर्यते ॥ १४ ।

सुवर्णशुद्धिः ॥

वल्मीकमृत्तिका घृष्टं गैरिकं चेष्टका पटु ।

इत्येते मृत्तिकाः पञ्च जम्बीरैर्वाऽऽरनालकैः ॥ १५ ॥

पिष्ट्वा लिम्पेत्सुवर्णपत्रे भस्मच्छन्नं तु कर्परे ।
यावद्द्रवं पुटं तावत्कुर्यात्तेन विशुध्यति ॥ १६ ॥

मृत्तिकां मातुलुङ्गाम्लैः पञ्चवासरमाविताम् ।
सभस्मलवणं हेम शोधयेत्पुटपाकतः ॥ १७ ॥

भावयेन्मातुलुङ्गाम्लैस्त्रिदिनं पञ्चमृत्तिकाम् ।
सैन्धवं भूमि(धूम)भस्माभिः(पि)सवर्णं शुध्यति पूर्ववत् ॥

तैले तक्रे गवां मूत्रे क्षारनाले कुलुत्थके ।
क्वथान्निपेचयेत्तप्तं सप्तवारं द्रवैर्द्रवैः ॥ १९ ॥

स्वर्णादिलोहपत्राणां शुद्धिरेषा प्रशस्यते ।
द्रावितौ नागवङ्गौ च तद्वत्सिञ्चेद्विशुद्धये ॥ २० ॥

सुवर्णं क्षा(क्षा)लयेत्पूर्वं काञ्जिकारोद्भवे रसे ।
सप्तवारं ततः कर्मयोग्यं हेम भवेद्ध्रुवम् ॥ २१ ॥

सुवर्णभस्म ॥

[प्रथमः प्रकारः ।]

नागचूर्णं शिलायुक्तं वज्रीक्षीरसमन्वितम् ।
लेपनात्पुटयोगाच्च हेमपत्राणि लेपयेत् ॥ २२ ॥

मृतं नागं स्नुहीक्षीरैरथवाऽम्लेन केनचित् ।
पिष्ट्वा लेप्यं स्वर्णपत्रं रुध्वा गजपुटे पचेत् ॥ २३ ॥

आदाय पेपयेदम्ले मृतनागं चाष्टमांशकम् ।
पचेद्गजपुटे रुध्वा पूर्ववन्नागसंयुतम् ॥ २४ ॥

एवं पुनः पुनः पाकादष्टधा म्रियते ध्रुवम् ।

[द्वितीयः प्रकारः ।]

शुद्धसूतसमं गन्धं माक्षिकं च सहाम्लकैः ॥ २५ ॥
अष्टभिश्च पुटैर्हेम म्रियते पूर्ववत्क्रिया ।

[तृतीयः प्रकारः ।]

शुद्धसूतसमं स्वर्णं खल्वे कुर्याच्च गोलकम् ॥ २६ ॥
ऊर्ध्वाधो गन्धकं दत्वा सर्वतुल्यं निरुध्य च ।
त्रिंशद्धनोत्पलैर्दद्यात्पुटानेवं चतुर्दश ॥ २७ ॥
निरुत्थं जायते भस्म गन्धं देयं पुनः पुनः ।

[चतुर्थः प्रकारः ।]

स्वर्णमावर्त्य तोलैकं मार्पैकं शुद्धनागकम् ॥ २८ ॥
क्षिप्त्वाऽऽदाय तु तच्चूर्णं तत्तुल्ये गन्धमाक्षिके ।
अम्लेन मर्दयेद्यामं रुध्वा लघुपुटे पचेत् ॥ २९ ॥
गन्धं पुनः पुनर्देयं म्रियते दशभिः पुटैः ।

[रसादिभिः स्वर्णमारणम् ।]

हेमपत्राणि कुर्वीत विलिपेद्रसभस्मना ॥ ३० ॥
अम्लपिष्टेन पुटयेद्धेम निर्जीवतां व्रजेत् ।
अथवा ताप्यपुटितं स्वर्णं गच्छति भस्मताम् ॥ ३१ ॥
यद्वा मृतेन करिणा शिलायोगेन भस्मयेत् ।
अथवा मृतवज्रेण योगिन्यंशविलेपितम् ॥ ३२ ॥
भस्मतां यात्युपरसै रसैश्चैव महारसैः ।
अम्लपिष्टैर्विलिप्तं च पुटितं याति भस्मताम् ॥ ३३ ॥

[पञ्चमः प्रकारः ।]

स्वर्णस्य द्विगुणं सूतं याममम्लेन मर्दयेत् ।
आरोटं माक्षिकं क्षिप्त्वा मूषायां स्वर्णतुल्यकम् ॥३४॥

तत्पृष्ठे मर्दितं हेम तत्पृष्ठे शुद्धमाक्षिकम् ।
देयं स्वर्णसमं तच्च पृष्ठे गन्धं च तत्समम् ॥ ३५ ॥

सर्वं च चूर्णितं दद्याद्रुध्वा मूषां धमेद्दृढम् ।
स्वभावशीतलं ग्राह्यं भस्म तद्भागपञ्चकम् ॥ ३६ ॥

टङ्कणं श्वेतकाचं च भागैकैकं प्रपेषयेत् ।
त्रितयं मधुनाऽऽज्येन मेलकं गोलकीकृतम् ॥ ३७ ॥

धान्याभ्रस्य च भागैकमधश्चोर्ध्वं च दापयेत् ।
निरुध्य तद्धमेद्गाढं मूषायां घटिकाद्वयम् ॥ ३८ ॥

निरुत्थं जायते भस्म तच्चयोगेषु योजयेत् ।

[षष्ठः प्रकारः ।]

हेम्नः पादं मृतं सूतं पिष्टमम्लेन केनचित् ॥ ३९ ॥

पत्रे लिप्त्वा पुटे पच्यादष्टमिर्म्रियते ध्रुवम् ।
शुद्धानां सर्वलोहानां मारणे रीतिरीदृशी ॥ ४० ॥

[सप्तमः प्रकारः ।]

शुद्धमाक्षीकभागैक भागं चारोटमाक्षिकम् ।
द्विभागं सूतकं क्षिप्त्वा त्रयमम्लेन मर्दयेत् ॥ ४१ ॥

भागैकं हेमपत्रं च लिप्त्वा चाम्लेन मर्दयेत् ।
तद्गोलं पातनायन्त्रे हठाद्यागलयं पचेत् ॥ ४२ ॥

इत्येवं म्रियते स्वर्णं निरुत्थं नात्र संशयः ।

[अष्टमः प्रकारः ।]

यवचिञ्चारजोवृक्षभल्लातैष्टङ्कणेन च ॥ ४३ ॥

लिप्त्वा स्वर्णस्य पत्राणि रुध्वा गजपुटे पचेत् ।
तैर्दैवैः(कृतया) पिष्ट्या म्रियते संसधा पुटैः ॥ ४४ ॥

[नवमः प्रकारः]

पीलुकट्कुष्ठबुक्काणसौवर्चलमपेषितम् ।
लिप्त्वा स्वर्णस्य पत्राणि म्रियते सप्तभि. पुटैः ॥ ४५॥

सुवर्णस्य गुणाः ॥

सुवर्णं बृंहणं स्निग्धं मधुरं रसपाकयो. ।
विषदोषहरं शीतं सकषायं सतिक्तकम् ॥ ४६ ॥

हृद्यं कान्तिप्रदं वल्यं संसनं गुरु लेखनम् ।
बुद्धिमेधास्मृतिकरं व्रणघ्नं वाग्विशुद्धिदम् ॥ ४७ ॥

क्षयोन्मादप्रशमनं चक्षुष्यं च रसायनम् ।
त्रिदोषशमनं सौम्यमायुष्यं चिरं शुचि ॥ ४८ ॥

प्रज्ञावीर्यस्वरकरमैश्वर्यं धारणाद्भवेत् ।

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ द्वितीयोल्लासः ॥

॥ तृतीय उल्लासः ॥

रजतम् ॥

श्रीभैरवः—

रौप्य शुभ्रं वसुश्रेष्ठ रुचिरं चन्द्रलोहकम् ।
रजतं तप्तरूप्यं च चन्द्रभूतिस्तु रौप्यकम् ॥ १ ॥
कलधौतं च सौधं च चन्द्रहासं च तारकम्

[रजतभेदाः ।]

सहजं खनिसञ्जातं कृत्रिमं च त्रिधा मतम् ॥ २ ॥
रजतं पूर्वपूर्वं हि स्वगुणैरुत्तरोत्तरम् ।
कैलासाद्रिसम्भूतं सहजं रजतं भवेत् ॥ ३ ॥
तत्पृष्टं हि महाव्याधिनाशनं देहिनां भवेत् ।
हिमाचलादिकूटेषु यद्रूप्यं जायते हि तत् ॥ ४ ॥
खनिजं कथ्यते तज्ज्ञै. परमं हि रसायनम् ।
श्रीरामपादुकान्यस्तं वङ्गं यद्रूप्यता गतम् ॥
तत्पादरूप्यमित्युक्तं कृत्रिमं सर्वरोगनुत् ।

[ग्राह्याग्राह्यरजतस्वरूपम् ।]

घनं स्निग्धं गुरु स्निग्धं दाहे छेदे सितं मृदु ॥ ६ ॥
वर्णाढ्यं चन्द्रवत्स्वच्छं दाहे छेदे समप्रभम् ।
शङ्खाभं मसृणं स्फोटरहितं रजतं शुभम् ॥ ७ ॥
दाहे रक्तं च पीतं च कृष्णं रूक्षं स्फुटं लघु ।
स्थूलाङ्गं कर्कशाङ्गं च रजतं त्याज्यमष्टधा ॥ ८ ॥

कठिनं कृत्रिमं रूक्षं विवर्णं समलं दलम् ।
दाहे छेदे घने नष्टं मध्यमं रजतं मतम् ॥ ९ ॥

करोति ताप विड्भेदं क्षयं शुक्लबलायुषाम् ।
न शुद्धं न मृतं तारं तस्माच्छुद्धं च मारयेत् ॥१०॥

रजतशुद्धिः ॥

नागेन टङ्कणेनैव द्रावितं शुद्धिमृच्छति ।
तारं त्रिवारं निक्षिप्तं तैले ज्योतिष्मतीभवे ॥ ११ ॥

तप्तं तप्तं तारपत्रं सेचयेच्छुद्धिमाप्नुयात् ।
पिशाचसंभवे यद्वा प्रक्षिप्त शुद्धिमाप्नुयात् ॥ १२ ॥

रजत दोषनिर्मुक्त नागोत्तीर्णं समाहरेत् ।
श्वेतकुम्भोद्भवे नीरे दालयेत्सप्तवारकान् ॥ १३ ॥

रजतभस्म ॥

[प्रथम प्रकार ।]

कुरण्डमुनिपुष्पोत्थसलिलैस्सप्तमर्दयेत् ।
तारपत्राणि लिप्तानि पुटयेच्च वनोत्पलै॰ ॥ १४ ॥
म्रियते नाऽत्र सन्देह॰

[द्वितीय॰ प्रकार ।]

लिप्तं वा रसभस्मना ।
अम्लवर्गप्रलिप्तेन पूर्ववत्पुटयोगत॰ ॥ १५ ॥
म्रियते

[तृतीयः प्रकारः ।]

तालक सूतं वङ्गमम्लेन पेषयेत् ।
तारपत्राणि सलिप्य पुटित्वा भस्मतां नयेत् ॥ १६ ॥

म्रियते गन्धयोगाद्यैर्मण्डूवेन विपद्यते(मर्यं तत्) ।

[चतुर्थः प्रकारः ।]

स्नुहीक्षीरैः पचेत्ताप्यं तारपत्राणि लेपयेत् ॥ १७ ॥
रुद्ध्वा गजपुटे पक्त्वा पूर्वोक्तैः पाचयेत्पुनः ।
चत्वारिंशत्पुटैरेवं पचेत्तारं मृतं भवेत् ॥ १८ ॥

[पञ्चमः प्रकारः ।]

गृधार्त्रीं माक्षिकं तुल्यं पिप्पलीं सैन्धवाम्लकैः ।
लिप्त्वा तारस्य पत्राणि रुद्ध्वा सप्तपुटैः पचेत् ॥ १९ ॥
द्रवे पुनः पुनः पिष्ट्वा म्रियते नात्र संशयः ।

[षष्ठः प्रकारः ।]

लिङ्गच्छिन्नरसूताभ्यां तारपिष्टीं प्रकल्पयेत् ॥ २० ॥
रुद्ध्वाऽधो गन्धकं दत्त्वा मूषागर्भे निरुध्य च ।
स्वेदयेद्बालुकायन्त्रे दिनमेकं दृढाग्निना ॥ २१ ॥
स्वाङ्गशीतलतां पिष्टिं साम्लतालेन मर्दितम् ।
पुटेद्द्वादशवाराणि भस्मीभवति रूप्यकम् ॥ २२ ॥

[सप्तमः प्रकारः ।]

माक्षिकं चूर्णयेच्छुद्धाम्लमर्दितं पुटितं शनैः ।
त्रिंशद्वारेण तत्तारं निरुत्थं भस्म जायते ॥ २३ ॥
रागस्त्यात्सर्वलोहानां पुटाधिक्ये न संशयः ।

[अष्टमः प्रकारः ।]

तारपत्रं चतुर्भागं भागैकं शुद्धतालकम् ॥ २४ ॥

मर्द्यं जम्बीरजैर्द्रवैस्तारपत्राणि लेपयेत् ।
शोषयेदन्धयेत्तं च त्रिंशद्वनोत्पलै पुटैत् ॥ २५ ॥
चतुर्दशपुटैरेवं निरुत्थं म्रियते ध्रुवम् ।

[नवम प्रकारः ।]

रौप्यपत्रं चतुर्भागा भागैक मृतवङ्गकम् ॥ २६ ॥
अथवा गन्धभागैक लेप्यं जम्बीरपेषितै ।
रुध्वा त्रिभि पुटै पाच्य पञ्चविंशद्वनोत्पलै ॥ २७ ॥
म्रियते नाऽत्र सन्देहो गन्धो देय पुन. पुन ।

[दशम प्रकारः ।]

रसगन्धौ समं कृत्वा काकतुण्डस्य मूलकम् ॥ २८ ॥
मर्दयेन्महिषीक्षीरै पिष्टिं ता क्षालयेज्जलै. ।
हरिद्रागोलके क्षिप्त्वा गोल हयपुरीषके ॥ २९ ॥
क्षिप्त्वा दिनैकविंशच्च तद्वर्मादुद्धरेत्पुन ।
तत्पिष्ट्वा तारपत्राणि लेप्यमम्लेन केनचित् ॥ ३० ॥
पुटैर्विंशतिभिर्भस्म जायते नात्र सशय ।
भस्मना ह्यम्लपिष्टेन लिम्पेच्चाम्रमय क्षुरम् ॥ ३१ ॥
जायते तं मृतं विद्याद्रस्म हाटकतारयो ।

[रजतस्य गुणाः ।]

रौप्य स्निग्ध कषायाम्ल विपाके मधुरं रसम् ॥ ३२ ॥
वयसस्स्थापनं शीतं लेखन वातपित्तजित् ।
वृष्यं रुचिकरं बल्यं जठराग्निमदीपनम् ॥ ३३ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ तृतीयोल्लासः ॥

॥ चतुर्थ उल्लासः ॥

ताम्रम् ॥

श्रीभैरवः—

ताम्रं म्लेच्छमुखं शुल्वं तपनेष्टमुदुम्बरम् ।
त्र्यंबकं चारघिन्दं च रविलोहं रविप्रियम् ॥ १ ॥

रक्तं नैपालकं चैव रक्तधातुः करेन्दुधा ।

[ताम्रभेदाः ।]

म्लेच्छं नेपालकं चेति तयोर्नेपालमुत्तमम् ॥ २ ॥

नेपालादन्यखन्युत्थं म्लेच्छमित्यभिधीयते ।

[ग्राह्याग्राह्यताम्रस्वरूपम् ।]

सुस्निग्धं मृदुलं शोणं घनघातक्षयं गुरु ॥ ३ ॥

निर्विकारं गुरुश्रेष्ठ ताम्रं नेपालमुच्यते ।
सितकृष्णारुणच्छायं वामभेदि कठोरकम् ॥ ४ ॥

क्षालितं च पुनः कृष्णमेतन्म्लेच्छकताम्रकम् ।
पाण्डुरं कृष्णशोणं च लघु स्फुटनसंयुतम् ॥ ५ ॥

रूक्षाङ्गं सदलं ताम्रं नेष्यते रसकर्मणि ।

उत्क्लेदमोहभ्रमवाहभेदाः

ताम्रस्य दोषाः खलु दुर्भरास्ते ।
विशोधनात्तद्विगतस्वदोषं
सुधासमं स्याद्रसवीर्यपाके ॥ ६ ॥

वान्तिमूर्च्छाभ्रमोन्मादनानारुक्कुष्ठशूलकृत् ॥ ७ ॥

आयु.कान्तिबलभ्रंशकरं धातुप्रदूषणम् ।
न शुद्धं न मृतं ताम्रं तेन संशोध्य मारयेत् ॥ ८

ताम्रशुद्धिः ॥

ताम्रं क्षाराम्लसंयुक्तं द्रावितं त(लि)तगैरिकम् ।
निक्षिप्तं महिषीतक्रद्वगणे सप्तवारकम् ॥ ९ ॥
पञ्चदोषविनिर्मुक्तं सप्तवारेण जायते ।
ताम्रनिर्द(र्म)लपत्राणि लिप्त्वा नि(नै)म्बसिन्धुना ॥
ध्मात्वा सौवीरके क्षेपाद्विशुध्यत्यष्टवारतः ।
निम्बंबुपट्टलिप्तानि तापितान्यष्टवारकम् ॥ ११ ॥
विशुद्ध्यन्त्यर्कपत्राणि निर्गुण्डीरसमर्दनात् ।
कुमारीपलमध्ये तु शुल्वपत्रं निवेशितम् ॥ १२ ॥
पुटितं दोषनिर्मुक्तं पाण्डुरं च प्रजायते ।
इत्थं विशोधितं ताम्रं सर्वदोषविवर्जितम् ॥ १३ ॥
भवेद्रसायनकरं देहलोहकरं परम् ।
इमां शुद्धिं विजानीयाच्चिञ्चो वा नन्दिकेश्वरः ॥ १४ ॥
चरिना निहतं ताम्रं सप्तवारं समुत्थितम् ।
सर्वदोषविनिर्मुक्तं भवेदमृतसन्निभम् ॥ १५ ॥
शुष्कार्कक्षीरलवणकाञ्जिकैर्म्लाम्रपल्लकम् ।
लिप्त्वा सताप्य निर्गुण्डीरसेसिञ्च्यात्पुन पुनः ॥
वारान्द्वादशतश्शुद्धं लेपाच्चापाथ सेचनात् ।
सटिकां लवणं तत्तैरारनालैश्च पेषयेत् ॥ १७ ॥
तेन लिप्तं ताम्रपत्रं तप्तं तप्तं निषेचयेत् ।
षड्वारमम्लतक्रान्तर्निर्गुण्ड्याश्च विशुद्धये ॥ १८ ॥

तप्तानि ताम्रपत्राणि सेचयेत्तिक्तकारसैः ।
लिप्त्वाऽम्लतक्रलवणकाञ्जिकेन पुनः पुनः ॥ १९॥

तप्तं तप्तं त्रिधा सिञ्च्याच्छुद्धिमायाति निश्चयम् ।
गोमूत्रेण पचेद्यामं ताम्रपात्रं दृढाग्निना ॥ २० ॥
शुध्यते नाऽत्र सन्देहो मारणं चाप्यथोच्यते ।

ताम्रभस्म ॥

[प्रथमः प्रकारः ।]

गन्धेन ताम्रतुल्येन ह्यम्लपिष्टेन लेपयेत् ॥ २१ ॥

कण्टवेधीकृतं पत्रमन्वयित्वा पुटे पचेत् ।
उद्धृत्य चूर्णयेत्तस्मिन्पादांशं गन्धकं क्षिपेत् ॥ २२ ॥

जम्बीरैरारनालैर्वा मृगदूर्वाथवाद्रवैः ।
पिष्ट्वा पिष्ट्वा पचेद्रुद्धं सगन्धं च चतुष्पुटैः ॥ २३ ॥

मातुलुङ्गद्रवैः पिष्ट्वा पुटमेक प्रदापयेत् ।
सितशर्करयाऽप्येकं पुटं देयं मृतं भवेत् ॥ २४ ॥

[द्वितीयः प्रकारः ।]

पाषाणभेदिमत्स्याक्षीद्रवैर्द्विगुणगन्धकम् ।
ताम्रस्य लेपयेत्पिष्टिं(ष्टं)त्रं) रुध्वा गजपुटे पचेत् ॥
समांशेन पुनर्गन्धं दत्वा द्रावैश्च लोलयेत् ।
एवं सप्तपुटैः पक्वं ताम्रभस्म भवेद्ध्रुवम् ॥ २६ ॥

[तृतीयः प्रकारः ।]

ताम्रस्य त्रिगुणं सूतं जम्बीराम्लेन मर्दयेत् ।
आदौ भूपान्तरे क्षिप्त्वा धुस्तूरस्य तु पत्रकम् ॥ २७

तत्पृष्ठे ताम्रतुल्यं च गन्धकं चूर्णितं क्षिपेत् ।
तत्पृष्ठे मर्दितं तामं पूर्वतुल्यं च गन्धकम् ॥ २८ ॥

आच्छाद्य धूर्तपत्रैस्तु रुध्वा गजपुटे पचेत् ।
स्वाङ्गशीतं ततश्चूर्णं मृतं भवति निश्चितम् ॥ २९ ॥

[चतुर्थः प्रकारः ।]

किञ्चिद्गन्धेन वाऽम्लेन क्षालयेत्ताम्रपत्रकम् ।
ताम्रपादेन सूतेन सार्द्धं(र्धं) पत्रं प्रलेपयेत् ॥ ३० ॥

ताम्रद्विगुणगन्धेन चाम्लपिष्टेन तत्पुनः ।
लिप्त्वा ह्यधोर्ध्वगं देया सुपिष्टा चाम्लपर्णिका ॥३१॥

तत्पिण्डं भाण्डगर्भे तु रुध्वा चुल्ल्यां विपाचयेत् ।
यामैकं ताम्रपाकेन भस्मीभवति निश्चितम् ॥ ३२ ॥

[पञ्चमः प्रकारः ।]

सूतमेकं द्विधा गन्धं यामं कन्याविमर्दयेत् ।
द्वयोस्तुल्ये(ल्यं) ताम्रपत्रे(त्रं) स्थाल्या गर्भे निरोधयेत् ॥

सम्यङ्मृल्लवणैस्सन्धिं पार्श्वे भस्म निधापयेत् ।
चतुर्यामं पचेच्चुल्र्यां पालपृष्ठे सगोमयम् ॥ ३४ ॥

जलं पुनः पुनर्देयं स्वाङ्गशीतं विचूर्णयेत् ।
म्रियते नाऽत्र सन्देहस्सर्वयोगेषु योजयेत् ॥ ३५ ॥

[षष्ठः प्रकारः ।]

जीर्णं तामं समादाय तत्र चैतान्विनिक्षिपेत् ।
वङ्गं घोषं गजं तीक्ष्णमारं कान्तं च षट् समान् ॥३६॥

प्रत्येकं ताम्रमानेन सर्वानेकत्र धामयेत् ।

वङ्गनालेन तावत्तद्यावदर्कोऽवशिष्यते ॥ ३७ ॥
तमर्कं ढालयेत्पूर्वं निर्गुण्डीसलिलान्तरे ।
सप्तवारांश्च तन्मूलचूर्णमर्के प्रवापयेत् ॥ ३८ ॥
तेन तामेण कुर्वीत वटिकामत्रणां शुभाम् ।
द्विगुणं गन्धक लिप्त्वा, बलेस्त्र्यंशं च पारदम् ॥३९॥
शुद्ध हिङ्गुलज वाऽपि मर्दयेद्बीजपूरकै. ।
जम्बीरजैर्वा लिकुचनीरै स्सम्यक्समर्दयेत् ॥ ४० ॥
त्रिदिनं तद्विशोष्याऽथ भाण्डान्तस्तन्निवेशयेत् ।
उपरिष्टात्ताम्रघटीमधोवक्त्रा निधाय च ॥ ४१ ॥
दृढ विलेपयेत्पश्चात्कुटीं मृण्मयीं क्षिपेत् ।
अतिप्रयत्नाल्लिम्पेत्ता यथा वारा न भिद्यते ॥ ४२ ॥
अधिचुल्लि ततो दत्वा पूरयित्वा जलैरथ ।
प्रज्वालयेद्वीतिहोत्रं मृदुमध्योत्तमक्रमात् ॥ ४३ ॥
दिनानि षट् समादाय खाङ्गशीतं तु पातकम् ।
निर्भिद्य शुल्व गृह्णीत मृतं सूतेन यत्नतः ॥ ४४ ॥
तत. खल्वे विचूर्ण्यैतद्यथेष्ट विनियोजयेत् ।

[ताम्रभस्मशुद्धि. ।]

नानाविध मृतं ताम्र शुद्ध्यर्थं भागपञ्चकम् ॥ ४५ ॥
भागैकं श्वेतकाचं च भागं श्वेतं च टङ्कणम् ।
मूषाया मिश्रितं क्षिप्त्वा भागैकं चाभ्रपत्रकम् ॥ ४६
ऊर्ध्वं दत्वा निरुध्याऽथ ध्माते ग्राह्यं सुशीतलम् ।
निर्दोषं तु भवेत्ताम्रं सर्वरोगहरं भवेत् ॥ ४७ ॥
अथवा मारितं ताम्रमम्लैनैकेन मर्दयेत् ।

तद्गोलं सूरणस्यान्तः रुध्वा सर्वत्र लेपयेत् ॥ ४८ ॥

शुष्कं गजपुटे पच्यात्सर्वदोषहरं भवेत् ।
वान्तिं भ्रान्तिं विरेकं च न करोति कदाचन ॥४९॥

[सप्तमः प्रकारः ।]

विलिप्य लिकुचद्रावपिष्टगन्धाश्मपङ्कतः ।
ताम्रपत्राणि सञ्छाद्य स्थालीमध्ये निरुध्य च ॥ ५० ॥

यावमात्रं पचेत्सम्यक् शीतान्याकृष्य चूर्णयेत् ।
तद्धस्म चलमानं हि ताम्बूलीदलवेष्टितम् ॥ ५१ ॥

भक्षितं वामयित्वाऽथ रेचयित्वा द्वियामतः ।
ज्वरं विनाशयेन्नृणां शूलाध्मानसमन्वितम् ॥ ५२ ॥

विषं गरं च वेगेन वामयत्येव निश्चितम् ।
पथ्यमन्न प्रदातव्यं गव्यं तक्रं च भक्तकम् ॥ ५३ ॥

अतिरेकेऽतिवान्तौ च समोहे चातिमात्रके ।
तत्तदौचित्ययोगेन कुर्याच्छीतां प्रतिक्रियाम् ॥ ५४ ॥

अतिवान्तौ भजेद्भ्रष्टमिक्षुदण्डं सुशीतलम् ।
यद्वा बिल्वभवं क्वाथं सितया सह पाचयेत् ॥ ५५ ॥

बर्बूरत्वमसः पेयो विरेके तक्रसंयुतः ।

[अष्टमः प्रकारः ।]

शुल्वतुल्येन सूतेन वल्लिना तत्समेन च ॥ ५६ ॥

तदर्धांशेन तालेन शिल्या च तदर्धया ।
विधाय कज्जलीं श्लक्ष्णां भिल्लकज्जलसन्निभाम् ॥५७॥

यन्त्राध्यायविनिर्दिष्टगर्भयन्त्रोदरान्तरे ।
कज्जलीं ताम्रपत्राणि पर्यायेण विनिक्षिपेत् ॥ ५८ ॥

प्रपचेद्यामपर्यन्तं खाङ्गशीतं विचूर्णयेत् ।

[ताम्रस्य गुणाः ।]

तत्तद्रोगहरानुपानसहितं तामं द्विवल्लोन्मितं
सल्लीढ परिणामशूलमुदरं शूलं च पाण्डुज्वरम् ।
गुल्मप्लीहयकृत्क्षयाग्निसदनं मेहं च मूलामयं
दुष्टं च व्रणीं हरेद्ध्रुवमिदं सर्वामयध्वंसनम् ॥

तामं तिक्तकषायकं च मधुरं पाकेऽथ वीर्योष्णकं
कोष्णं पित्तकफापहं जठरकुष्ठामजूर्त्यन्तकृत् ।
ऊर्ध्वाध परिशोधनं च विपहत्स्थौल्यापहं क्षुत्करं
दुर्नामक्षयपाण्डुरोगशमनं नेत्र्यं परं लेखनम् ॥

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ चतुर्थोल्लासः ।

॥ पञ्चम उल्लासः ॥

कान्ततीक्ष्णमुण्डलोहाः ॥
लोहोत्पत्तिः ॥

श्रीभैरवः—

कान्तायस्तीक्ष्णमुण्डाख्यलोहोत्पत्तिरथोच्यते ।
देवासुरसमूहेन मथ्यमाने महोदधौ ॥ १ ॥

समुत्पन्नं पुरा तस्मिन्नमृतं देवजीवनम् ।
पीयमानात्सुरैस्तस्मान्निपेतुः क्षुद्रबिन्दवः ॥ २ ॥

ज्ञात्वा तान्भूगतान्यन्ता गोपयामास घूर्जटिः ।
लोहपाषाणरूपेण कृत्वा तान्वसुधातले ॥ ३ ॥

पापरोगाभिभूता ये मानवा न भजन्त्वमून् ।
इत्येवं शिवगुप्ता ये सुधाया बिन्दवः पुरा ॥ ४ ॥
तेषां मया समासेन कथ्यते साधनं स्फुटम् ।
कुष्ठादिरोगनाशार्थं यथाबुद्ध्यनुसारतः ॥ ५ ॥
कान्तायस्तीक्ष्णमुण्डाख्यं लोहमेवमपि त्रिधा ।
रसायनेभ्यस्सर्वेभ्यो विद्याच्छतगुणाधिकम् ॥ ६ ॥

कान्तलोहः ॥

अयस्कान्तं कान्तलोहं कान्तं स्यात्कृष्णलोहकम् ।
कान्तायसं महालोहं काललोहं च सप्तधा ॥ ७ ॥

[अशुद्धकान्तलोहसेवनजा दोषाः ।]

हृत्पीडा वह्निदौर्बल्यं महारोगान्मृतिं तथा ।
करोति सेवनाल्लोहमशोधितममारितम् ॥ ८ ॥
तस्मात्कान्तस्य संशुद्धिर्मारणं च विधीयते ।

कान्तग्रहणविधिः ॥

मदोन्मत्तगजस्सूतः कान्तमङ्कुशमुच्यते ॥ ९ ॥
क्षेत्रं ज्ञात्वा गृहीतव्यं तत्प्रयत्नेन भूयसा ।
मारुतातपनिक्षिप्तं वर्जयेत्सुरसुन्दरि ! ॥ १० ॥
भूमिस्थितं च यत्कान्तं छागरक्तेन भावयेत् ।
छागरक्तमलिप्तेन चर्मणा तत्प्रवेष्टयेत् ॥ ११ ॥
छागचर्म परीवेष्ट्य विन्यसेत्पूर्ववत्क्षितौ ।
उद्धृतं सप्तभिर्मासैस्तोयकुम्भे विनिक्षिपेत् ॥ १२ ॥
रक्तपुष्पैस्सदा पूज्यं रक्तगन्धानुलेपनैः ।
पूरि(ञि)तं मद्यमांसैश्च योज्यं रसरसायने ॥ १३ ॥

संस्कृत छागरक्तेन आमकं चुंबकं भवेत् ।
अनेन क्रमयोगेन द्रावकं भवति प्रिये ! ॥ १४ ॥
कान्तलोहं विना सूतो देहे न क्रामति क्वचित् ।
न कान्तेन विना सूतः कान्तस्सूतविवर्जितः ॥ १५ ॥
कान्तसूतसमायुक्तः प्रयोगो देहधारकः ।
पुरा प्रोक्तं मया सर्वं कान्तसत्वं यथाविधि ॥ १६ ॥
अधुना संप्रवक्ष्यामि कान्तसंस्कारतद्गुणान् ।

कान्तशुद्धिः ॥

शशरक्तेन संलिप्तं कान्तपत्रं सुधामितम् ॥ १७ ॥
त्रिवारं चाग्निना देवि ! दोषं नैसर्गिकं त्यजेत् ।
त्रिफलाष्टगुणे तोये त्रिफला षोडशं पलम् ॥ १८ ॥
तत्काथपादशेषं च कान्तस्य पलपञ्चकम् ।
कृत्वा पत्राणि तप्तानि सप्तवारं निषेचयेत् ॥ १९ ॥
एवं प्रलीयते दोषो गिरिजो लोहसंभवः ।
कान्तलोहमयं चूर्णं गोमूत्रेऽष्टगुणे पचेत् ॥ २० ॥
धान्याम्लैः क्षालितं भूयः शोषितं शुद्धिमाप्नुयात् ।
रक्त(नक्त)माला हंसपादी गोजिह्वा त्रिफलाऽमृता ॥
गोपाली तुंबुरुर्दन्ती गोमूत्रे पेषयेदिमाः ।
तत्कल्के कान्तपत्रं तु तप्तं तप्तं द्विसप्तधा ॥ २२ ॥
सेचयेत्कान्तलोहं तु सर्वदोषनिवृत्तये ।

[कान्तसिद्धिक्रमः ।]

क्रमः कान्तस्य सिद्ध्यर्थं कर्तव्यो मन्त्रपूर्वकम् ॥ २३ ॥

उद्भवोद्भवशब्दस्याचतुर्थ्यन्तोऽमृतात्परम् ।
स्वाहान्तः प्रणवश्चाऽऽदौ मन्त्रोऽयं मर्दने स्थितः ॥
रक्षायै लोहरसयोरयमेवैकमुद्भवम् ।
विना स्वाहेति तस्यान्ते फडन्तं योजयेत्प्रिये ! ॥ २५ ॥
प्रणवोर्ध्वं नमश्चण्डं वज्रपाषाण इत्यपि ।
ततः परं महावज्रसेनाधिपतये नमः ॥ २६ ॥
द्विरुक्तस(स)शब्दस्यान्महाविद्या(बाहो)बलाय च ।
ततस्स्वाहेति मन्त्रोऽयं बलिकर्मणि पूजितः ॥ २७ ॥
अनेनैव बलिं कृत्वा यथोक्तामाचरेत्क्रियाम् ।

लोहभस्मविधिः ॥

[प्रथमः प्रकारः ।]

स्तन्येन हिङ्गुलस्याथ पेषयेत्पलपञ्चकम् ॥ २८ ॥
तेनैव पत्रं कान्तस्य लिम्पेत्पञ्चपलोन्मितम् ।
रुध्वा गजपुटे पाच्यं कषायैस्त्रिफलै. पुनः ॥ २९ ॥
जम्बीरैरारनलैर्वा विंशत्यंशेन हिङ्गुलम् ।
पिष्ट्वाऽऽलिप्य पुटे रुध्वा तल्लोहे पाचयेत्पुनः ॥३०॥
रुद्धं पुटेत्सचेद्रात्रौ मातृद्रावैश्च भावयेत् ।
एवमष्टदिनं कुर्यात्त्रिविधं म्रियते क्षयः ॥ ३१ ॥

[द्वितीयः प्रकारः ।]

चिन्चापत्रनिभं कुर्यात्कान्तं तीक्ष्णं च मुण्डकम् ।
मृत्पात्रस्थं क्षिपेद्धर्मे दन्तीद्रावैः प्रपूरयेत् ॥ ३२ ॥
पत्रं पुनः पुनस्तावद्यावत्तरति नान्यथम् ।
म्रियते तीव्रघर्मेण तच्चूर्णीकृत्य योजयेत् ॥ ३३ ॥

[तृतीयः प्रकारः ।]

कान्तायस्तीक्ष्णमुण्डानां चूर्णं मत्स्याक्षिजैर्द्रवैः ।
आतपे त्रिदिनं भाव्यं त्रिदिनं चित्रकद्रवैः ॥ ३४ ॥

व्यहं त्रिकण्टकरसैस्सहदेवीद्रवैर्दिनम् ।
गोमूत्रैस्तिलफलाक्वाथैर्भावयेच्च व्यहं व्यहम् ॥ ३५ ॥

उक्तद्रावैस्ततो मर्द्यं क्रमाद्देयं पुटं पुटम् ।
रुध्वा गजपुटैरेवं मृतं योगेषु योजयेत् ॥ ३६ ॥

[चतुर्थः प्रकारः ।]

स्थाल्यां वा लोहपात्रे वा लोहदर्व्या विचालयन् ।
पाचयेत्तिलफलाक्वाथैर्दिनैकं लोहचूर्णकम् ॥ ३७ ॥

तत्पिण्डं त्रिफलातोयैः पिष्ट्वा रुध्वा पुटे पचेत् ।
षोडशाङ्गुलगर्तान्तर्निर्वतिऽहर्निशं पचेत् ॥ ३८ ॥

एवं त्रिधा प्रकर्तव्यं स्थालीपाकं पुटान्तकम् ।
भृङ्गार्द्रकं तालमूलं हस्तिकर्ण्यार्श्च मूलकम् ॥ ३९ ॥

शतावरीविदार्योश्च मूलं तत्तिलफलाम्भसि ।
संपेष्य पूर्ववत्स्थाल्यां पाच्यं पेष्यं त्रिधा पुटैः ॥४०॥

पाच्यं ततः पुनर्नव्याः क्वाथैश्च दशमूलतः ।
बृहत्याश्च कषायेण बीजपूरस्य च द्रवैः ॥ ४१ ॥

ब्रह्मबीजरसैश्शिग्रुक्वाथैर्गोपयसाऽपि च ।
प्रत्येकं सम्पेष्याऽऽदौ पूर्वगतं पुटे पचेत् ॥ ४२ ॥

भावयेत्तद्द्रवेणैव पुटान्ते याममालकम् ।
प्रत्येकमेवं सम्पेष्य पुटयेद्भावयेत्क्रमात् ॥ ४३ ॥

म्रियते नाऽत्र सन्देहः कान्तं तीक्ष्णं च मुण्डकम् ।

[पञ्चम प्रकार: ।]

शुद्धसूत द्विधा गन्ध खल्वे कृत्वा तु कज्जलीम् ॥
द्वयोस्समं कान्तचूर्णं मर्दयेत्कन्यकाद्रवै ।
यामद्वयात्समुद्धृत्य तद्गोल ताम्रपालके ॥ ४५ ॥
आच्छाद्यैरण्डपत्रैश्च यामार्धेऽत्युष्णता गतम् ।
धान्यराशौ न्यसेत्पश्चात्त्रिदिनान्ते समुद्धरेत् ॥ ४६ ॥
सम्पेष्य गालयेद्वस्त्रे सत्य वारितरं भवेत् ।
कान्ति तीक्ष्ण च मुण्ड च निरुत्थं जायते मृतम् ॥
स्वर्णादीन्मारयेदेवं चूर्णीकुर्याच्च लोहवत् ।
सिद्धयोगमथाऽऽख्यातं सिद्धाना सम्मुखागतम् ॥ ४८ ॥
अनुभूतं मया देवि ! सर्वरोगापहारकम् ।
नाय पचेत्पञ्चपलप्रमाणा-
दधो न चोर्ध्वं त्रिदशप्रमाणात् ॥ ४९ ॥

[षष्ठ प्रकार: ।]

अर्जुनस्य त्वच पेष्या काञ्जिकेनातिलोलिना ।
तन्मध्ये कान्तचूर्णं च कास्यपात्रे विनिक्षिपेत् ॥ ५० ॥
दिनैक धारयेद्धर्मे द्रवै. पूर्ये पुन पुन ।
अर्जुनैस्सारनालैर्वा त्रिविध मारयेदय. ॥ ५१ ॥

[सप्तम प्रकार: ।]

द्रवैः कुक्कुटपत्रोत्थै कान्तचूर्णं विमर्दयेत् ।
दिन च ह्यातपे तीव्रे द्रवैर्मर्द्यं त्रिकण्टजै ॥ ५२ ॥
वन्ध्यामूत्रपुनर्नवास्सगोमूत्रैर्दिनं पुन ।
गोमूत्रैस्सिफला क्वाथ्या उत्कषायेण भावयेत् ॥ ५३ ॥

त्रिसप्ताहं प्रयत्नेन दिनैकं मर्दयेत्ततः ।
रुध्वा गजपुटे पच्यादिनं क्वाथेन मर्दयेत् ॥ ५४ ॥

दिवा मद्यं पुटेद्रात्रावेकविंशद्दिनावधि ।
एकविंशत्पुटैरेवं म्रियते त्रिविधं क्षयः ॥ ५५ ॥

[अष्टमः प्रकारः ।]

माक्षिकं च शिला ह्यम्लैर्हरिद्रा मरिचांघ्रि च ।
पिष्ट्वा लेप्यं कान्तपत्रं तप्तं तप्तं निषेचयेत् ॥ ५६ ॥

समधा त्रैफले क्वाथे जलेन क्षालयेत्पुनः ।
कुट्टयेल्लोहदण्डेन पेषयेत्त्रैफले जले ॥ ५७ ॥

षोडशांशेन लोहस्य दातव्यं माक्षिकं शिला ।
अम्लेन मर्दितं रुध्वा गजाख्यैकपुटे पचेत् ॥ ५८ ॥

निरुत्थं जायते भस्म कान्तं तीक्ष्णं च मुण्डकम् ।

[नवमः प्रकारः ।]

तिन्दुफलस्य मज्जाया खड्गं लिप्त्वाऽऽतपे खरे ॥
धारयेत्काम्यपात्रान्तर्दिनैकेन स्फुटत्यलम् ।
लेपं पुनः पुनः कुर्याद्दिनान्ते तं प्रपेषयेत् ॥ ६० ॥
त्रिफलाक्वाथसंयुक्तं दिनैकेन मृतो भवेत् ।

[लोहभस्मनोऽमृतीकरणम् ।]

तोयाष्टभागदोषेण त्रिफला पलपञ्चकम् ॥ ६१ ॥
घृतं क्वाथस्य तुल्यं स्याद्घृततुल्यं मृताऽऽयसम् ।
पाचयेत्ताम्रपात्रे तु लोहदर्व्या विचालयन् ॥ ६२ ॥
मृद्वग्निना पचेद्यावत्तावज्जीर्यति तद्द्वयम् ।
लोहतुल्या सिता योज्या सुपक्वामवतारयेत् ॥ ६३ ॥

योगवाहमिदं ख्यातं मृतलोहं महाऽमृतम् ।
इत्थं कान्तस्य तीक्ष्णस्य मुण्डस्यापि ह्ययं विधिः ॥६४॥

घृततुल्यं मृतं लोहं लोहपात्रगतं पचेत् ।
जीर्णे घृते समादाय सर्वयोगेषु योजयेत् ॥ ६५ ॥
" ओं ओं अमृतेन्द्रं भक्षयामि नमः "

[कान्तलक्षणम् ।]

पात्रे यस्मिन्प्रविशति जले तैलबिन्दुर्न सर्पेत्
हिङ्गुर्गन्धं विसृजति निजां तिक्ततां निम्बकल्कः ।
पाके दुग्धं भवति शिखराकारतां नैव भूमौ
कान्तं लोहं तदिदमुदितं लक्षणोक्तं न चान्यत् ॥

[लोहपाकस्वरूपम् ।]

लोहपाकस्त्रिधा प्रोक्तो मृदुमध्यखरात्मकः ।
पङ्कोत्करसमः पूर्वः पिण्डपाकस्तु मध्यमः ॥ ६७ ॥
तृतीयः खरपाकस्स्याद्बालुकासदृशः प्रिये ! ।

[निरुत्थभस्मपरीक्षा ।]

पाकं वर्णं तथा गन्धं ज्ञात्वा लोहस्य बह्वितः ॥ ६८ ॥
उत्तार्याऽथ ततश्शुद्धे लोहपात्रान्तरे न्यसेत् ।
लोहमात्रप्रपञ्चास्या गन्धमाक्षीकहिङ्गुलाः ॥ ६९ ॥
सर्वमेतन्मृतं लोहं ध्मातव्यं मित्रपञ्चकैः ।
यद्येवं स्यान्निरुत्थानं सेव्यं वारितरं हितम् ॥ ७० ॥
मध्वाऽऽज्येन समायुक्तं लोहं तारेण संयुतम् ।
अन्धमूषागतं ध्मातं गृह्णीयात्स्वाङ्गशीतलम् ॥ ७१ ॥

लोहमध्यगतं तारं पूर्वमानं भवेद्यदि ।
तदा लोहं निरुत्थं स्यादन्यथा साधयेत्पुनः ॥ ७२ ॥
गन्धकं चोत्थितं लोहं तुल्यं खल्वे विमर्दयेत् ।
दिनैकं कन्यकाद्रावै रुध्वा गजपुटे पचेत् ॥ ७३ ॥
इत्येवं सर्वलोहानां कर्तव्येत्थं निरुत्थिति ।

कान्तादिभस्मनां गुणाः ॥

कान्तसिन्दूरमायुष्यमारोग्यं बलवीर्यदम् ॥ ७४ ॥
देहदार्ढ्यकरं श्रेष्ठं कुर्यादिन्द्रियपाटवम् ।
त्रिदोषशमनं राजयक्ष्मरोगविनाशनम् ॥ ७५ ॥
ज्वरास्रकृमिपाण्डादीन्हन्यादष्टमहागदान् ।
यद्यद्रोगहरैर्योगैस्तत्तद्रोगहरं भवेत् ॥ ७६ ॥
तीक्ष्णं शस्त्रायस शस्त्र पिण्डं, पिण्डायसं शठम् ।
आयसं निशितं तीव्रं लोहखड्गं च मुण्डजम् ॥ ७७ ॥
अयश्चित्रायसं प्रोक्तं चीनजं च त्रिपञ्चधा ।
मुण्डं मुण्डायसं लोहं कृष्णलौहं शिलोद्भवम् ॥ ७८ ॥
कान्तलोहप्रकारेण मारणं तीक्ष्णमुण्डयोः ।
तीक्ष्णलोहं कषायाम्लं तिक्तकं कटुकं लघु ॥ ७९ ॥
शीतलं लेखनं रूक्षं कफपित्तास्रपाण्डुजित् ।
प्रमेहसर्वशूलघ्नं तीक्ष्णं मुण्डाधिकं गुणैः ॥ ८० ॥
चक्षुष्यं मुण्डलोहं तु कषायं स्वादु तिक्तकम् ।
लेखनं वातहृच्छीतं कृमिपित्तकफापहम् ॥ ८१ ॥
अश्मथूदरशूलार्शःकुष्ठपाण्डुप्रमेहजित् ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ पञ्चमोल्लास

॥ षष्ठ उल्लासः ॥

वङ्गम् ॥

श्रीभैरव —

खुरकं मिश्रक चेति द्विविधं वङ्गमुच्यते ।
खुरं तन्न गुणैश्रेष्ठ गुणहीनं तु मिश्रकम् ॥ १ ॥

धवलं मृदुल स्निग्ध द्रुतद्रावं सगौरवम् ।
निश्शब्द खुरवङ्गं स्यान्मिश्रकं श्यामशुभ्रकम् ॥ २ ॥

वपु त्रपुसमारूपं वङ्गं च कुटिल हिमम् ।
कुरूप्यं विचटं रङ्गं पूतिगन्धं रसाह्वयम् ॥ ३ ॥

स्वच्छमुष्णासहं शीतं सूक्ष्मपलकरं लघु ।
रङ्नाशो रूप्यकरणे तद्वङ्गं श्रेष्ठमुच्यते ॥ ४ ॥

वङ्गशुद्धिः ॥

द्रावयित्वा निशायुक्ते क्षिप्तं निर्गुण्डिकारसै ।
विशुध्यति त्रिवारेण खुरवङ्गं न संशय· ॥ ५ ॥

अम्लतक्रविनिष्पिष्टवर्षाभूव(वि)षसिन्धु(तिन्दु)भिः ।
कट्वलावुगतं वङ्ग द्वितय परिशुध्यति॥ ६ ॥

वङ्गभस्म ॥

[प्रथमः प्रकारः ।]

सतालेनार्कदुग्धेन लिप्त्वा वङ्गदलान्यथ ।
धोषिचिञ्चात्वच क्षारैर्दग्धालघुपुटानि च ॥ ७ ॥

मर्दयित्वा चरेद्भस्म तद्रसादिषु कीर्तितम् ।

[द्वितीयः प्रकारः ।]

नागवच्छोधयेद्वङ्गं तद्वदभ्रत्यचिञ्चयोः ॥ ८ ॥
तद्वत्स हरितालं च तुल्यमम्लेन मर्दयेत् ।
पलाशोत्थद्रवैर्वाऽथ लोलयित्वाऽम्भयेत्पुटे ॥ ९ ॥
उद्धृत्य दशमांशेन तालेन सह मर्दयेत् ।

[तृतीयः प्रकारः ।]

पूर्वद्रावैस्सहालोड्य रुध्वा गजपुटे पचेत् ॥ १० ॥
एकविंशत्पुटैर्वङ्गो मृतो भवति रोगहा ।
शिरीषरजनीचूर्णैः कुमार्या युतगोलकम् ॥ ११ ॥
सूतलिप्तं वङ्गपत्रं गोलकं सममर्दितम् ।
रुध्वा लघुपुटे पक्वं मृतं स्यात्पूर्वसंख्यया ॥ १२ ॥
अक्षभल्लातकीतोयैः पिष्ट्वा पत्राणि लेपयेत् ।
ततस्तिलखरीमध्ये क्षिप्त्वा रुध्वा पुटैः पचेत् ॥ १३ ॥
चत्वारिंशद्वजपुटैर्वङ्गकं भस्म जायते ।

वङ्गस्य गुणाः ॥

वङ्गं तीक्ष्णोष्णकटुकमीषद्वातप्रकोपनम् ॥ १४ ॥
मेदश्लेष्मामयघ्नं च क्रिमिघ्नं मेहनाशनम् ।
हिम कषायलवणं पाण्डुदाहहरं सरम् ॥ १५ ॥
रेचनं पित्तलं क्लिन्नवत्मशु सीसं च तद्गुणम् ।

सीसकम् ॥

सीसकं तु जडं शीतं यवनेष्ट भुजङ्गमम् ॥ १६ ॥
योगीष्टं नागमुरगं कुवङ्गं परिपिष्टकम् ।

मृदु कृष्णायसं पक्ष्मतारशुद्धिकरं स्मृतम् ॥ १७ ॥
शिरावृत्तं च वङ्गं स्याच्चीनपिष्टं च षोडश ।
सीसं तु वङ्गसाम्यं स्याद्रसवीर्यविपाकतः ॥ १८ ॥

[अशुद्धवङ्गनागसेवने दोषाः ।]

पाकहीनौ नागवङ्गौ कुष्ठगुल्मरुजाकरौ ।
मेहपाण्डुज्वरश्लेष्मवातपित्तप्रदौ स्मृतौ ॥ १९ ॥

[ग्राह्याग्राह्यनागस्वरूपम्]

द्रुतद्रावं महाभारं छेदे कृष्णं समुज्ज्वलम् ।
पूतिगन्धं बहिः कृष्णं शुद्ध सीसमतोऽन्यथा ॥ २० ॥

नागशुद्धिः ॥

निर्गुण्डीमूलचूर्णेन सार्कदुग्धेन लेपयेत् ।
नागपत्रं ततश्शुष्कं द्रावयित्वा निषेचयेत् ॥ २१ ॥
लिप्त्वा द्राव्यं पुनस्सेच्यं सप्तवारं विशुद्धये ।
निशातुम्बुरुबीजानि कोकिलाक्षीकुवेरकम् ॥ २२ ॥
गौरीफलं मल्लिका च मोक्षो ब्रह्मा मयूरकम् ।
यथालाभं तु भस्मैषां वज्रीक्षीरेण भावयेत् ॥ २३ ॥
तन्मध्ये द्रावितं नागं शुद्धं सेच्यं तु सप्तधा ।
महिषस्यास्थिचूर्णेन सुपाकं मूलसेचनात् ॥ २४ ॥
वङ्गं शुद्धं भवेच्छुद्धनागो नागास्थिमूत्रतः ।

नागभस्म ॥

[प्रथमः प्रकारः ।]

अश्वत्थचिञ्चात्वग्भस्म नागस्य चतुरंशतः ॥ २५ ॥

क्षिप्त्वा चुल्ल्यां पचेदग्नौ चालयेल्लोहचट्टुना ।
यावद्भस्म समुद्भूत्य भस्मतुल्यां मन शिलाम् ॥ २६ ॥
जम्बीरैरारनालैर्वा पिष्ट्वा रुध्वा पुटे पचेत् ।
स्वाङ्गशीतं पुनः पिष्ट्वा विंशत्यंशे शिलाम्लके ॥ २७ ॥
एवं षष्टिपुटैः पक्वो नागस्स्याच्तु निरुत्थितः ।

[द्वितीयः प्रकारः ।]

अथवा नागपत्राणि चूर्णलिप्तानि खर्परे ॥ २८ ॥
अल्पाग्नौ पाचयेद्यामं भस्म तच्चिलकद्रवैः ।
भर्जयेल्लोहपात्रे तत्पार्थदण्डेन चालयन् ॥ २९ ॥
यामषोडशपर्यन्त द्रवं देयं पुनः पुनः ।
दण्डेन मर्दयेद्गाढमुद्धृतं चित्रकद्रवै ॥ ३० ॥
लोलयित्वा निरुद्ध्यांऽथ षट्पुटैर्म्रियते लघु ।

[तृतीयः प्रकारः ।]

चिञ्चाक्षमिक्षुभल्लातवाशावज्रलताभवैः ॥ ३१ ॥
अपामार्गार्जुनाश्वत्थसमुद्भूतैश्च भस्मभि ।
दृढ पालाशदण्डेन लोहपात्रे तु भर्जयेत् ॥ ३२ ॥
सप्तभिर्दिवसैरेवं म्रियते नात्र सशयः ।

[चतुर्थः प्रकारः ।]

पिष्ट्वाऽगस्त्यं च मूनागं लिप्त्वा भाण्डं विशोधयेत् ॥
तद्भाण्डे द्रावयेन्नागं द्रुते नागे विनिक्षिपेत् ।
वाराचिञ्चटयोः क्षारं वाराकाष्ठेन घट्टयेत् ॥ ३४ ॥

यामैकं पाचयेच्चुल्ल्यां समुद्धृत्य विमिश्रयेत् ।
सञ्चूर्ण्य च शिलाताप्ये वाशकक्षारसंयुतम् ॥ ३५ ॥

चतुस्तुल्यं पूर्वनागं विंशत्येकपुटैः पचेत् ।
द्विपुटं चिञ्चिकक्षारैर्देयं वाशारसान्वितैः ॥ ३६ ॥

नागस्सिन्दूरवर्णाभो म्रियते सर्वकायकृत् ।

[नागभस्मनो गुणाः ।]

अत्युष्णं सीसकं स्निग्धं तिक्तं वातकफापहम् ॥ ३७ ॥
प्रमेहतोयदोषघ्नं दीपनं चाऽऽमवातनुत् ।

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ षष्ठोल्लासः ॥

॥ सप्तम उल्लासः ॥

पित्तलम् ॥

श्रीभैरवः—

रीतिः क्षुद्रसुवर्णं
सितकनकं पिङ्गलं च पित्तलकम् ।
लोहितकमारकूटं
पिङ्गललोहं च पीतकं नवधा ॥ १ ॥

रीतिका काकतुण्डीति द्विविधं पित्तलं भवेत् ।
सन्तप्ता काञ्जिके क्षिप्ता ताम्राभा रीतिका मता ॥ २ ॥
एवं या जायते कृष्णा काकतुण्डीति सा मता ।

[प्राह्यग्राह्यपित्तलस्वरूपम् ।]

गुर्वी मृद्वी च पीता(कपोता)भा साराङ्गी ताडनक्षमा ॥
सुस्निग्धा मसृणाङ्गी च रीतिरेतादृशी शुभा ।
शुद्धा स्निग्धा मृदुश्शीता सुरङ्गा सूत्रपत्रिणी ॥ ४ ॥
हेमोपमा शुभाश्वत्था ज्ञात्या रीति प्रकीर्तिता ।
पाण्डु. पीता खरा रूक्षा वर्बरा घट्टनाक्षमा ॥ ५ ॥
पूतिगन्धा तथा लघ्वी रीतिर्नेष्टा रसादिषु ।
रीतिस्तिक्तरसा रूक्षा जन्तुघ्नी सास्रपित्तनुत् ॥ ६ ॥
कृष्णा कुष्ठहरा योगादुष्णवीर्या च शीतला ।
काकतुण्डी कृ(ग)तस्नेहा राजरीतिगुणानुगा ॥ ७ ॥
राजरीतिस्तु निर्दिष्टा रीतिकासदृशी गुणै. ।

[पित्तलस्य गुणा. ।]

रीतिकायुगलं 'रूक्षं सतिक्त लवण सरम्' ॥ ८ ॥
शोभन पाण्डुवातघ्न बलवीर्यायुवर्धनम् ।
रीतिका कटुतिक्तोष्णा प्लीहानाहनिबर्हणी ॥ ९ ॥
रूक्षा कफास्रपित्त च हन्यात्स्वादु प्रयोजिता ।
राजरीति काकतुण्डी राजपुत्री महेश्वरी ॥ १० ॥
ब्राह्मणी ब्रह्मरीतिश्च कपिला पिङ्गलाऽपि च ।

[कांस्यम् ॥]

कास्यं सौराष्ट्रिकं घोष कंसीयं वह्निलोहकम् ॥ ११ ॥
दीप्तलोहं घोषयु(घ्ट)प्यं दीप्तक च नवाह्वयम् ।
अष्टभागेन तामेण द्विभागकुटिलेन च ॥ १२ ॥

विद्रुतेन भवेत्कांस्यं तत्सौराष्ट्रभवं शुभम् ।

[ग्राह्याग्राह्यकांस्यस्वरूपम्]

तीक्ष्णशब्दं मृदु स्निग्धमीषच्छ्यामलशुभ्रकम् ॥ १३ ॥

निर्मलं दाहरक्तं च पोढा कांस्यं प्रशस्यते ।

श्वेतदीप्तं मृदुज्योति शब्दाढ्यं स्निग्धनिर्मलम् ॥

घनाग्निसहसूत्राङ्गं कांस्यमुत्तममीरितम् ।

तत्पीतं दहने ताम्रं घनं रूक्षं घनासहम् ॥ १५ ॥

मन्दनादं गतज्योति सप्तधा कांस्यमुत्सृजेत् ।

कांस्यस्य गुणाः ॥

घृतमेकं विना चान्यत्सर्वं कांस्यगतं नृणाम् ॥ १६ ॥

भुक्तमारोग्यसुखदं हितं सात्म्यकरं तथा ।

कांस्यं तु लघुतिक्तोष्णं लेखनं दक्प्रसादनम् ॥ १७ ॥

कृमिकोष्ठहरं वातपित्तघ्नं भोजने हितम् ।

वर्तलोहः ॥

वर्तलोहं वर्ततीक्ष्णं वर्तकं लोहसङ्कर ॥ १८ ॥

नीलिका नीललोहं च लोहकं वट्टलोहकम् ।

कास्यार्कारीतिलोहाहिजातं तद्वर्तलोहकम् ॥ १९ ॥

तदेव पञ्चलोहाख्यं लोहविद्भिरुदाहृतम् ।

तद्भाण्डसाधितं सर्वमन्यव्यञ्जनपूर्वकम् ॥ २० ॥

अम्लेन वर्जितं चातिदीपनं पाचनं शुभम् ।

वर्तलोहशुद्धिर्मारणं च ॥

द्रुतमधजले क्षिप्तं वर्तलोहं विशुध्यति ॥ २१ ॥

म्रियते गन्धतालाभ्यां पुटितं वर्तलोहकम् ।
तेषु तेषु विभागेषु योजनीयं यथाविधि ॥ २२ ॥

वर्तलोहगुणाः ॥

वर्तलोहं कटूष्णं च तिक्तं च शिशिरं तथा ।
कफजित्पित्तशमनं मधुरं दाहमेहनुत् ॥ २३ ॥
रूक्षं रुच्यं कृमिघ्नं च नेत्र्यं मलविशोधनम् ।

पित्तलादीनां शोधनभस्मविधिः ॥

त्रिक्षारं पञ्चलवणं ससधाऽम्लेन भावयेत् ॥ २४ ॥
कांस्यारघोषपत्राणि तेन कल्केन लेपयेत् ।
रुध्वा पुटेद्वजपुटे शुद्धिमायाति नान्यथा ॥ २५ ॥
ताम्रवन्मारणं तेषां कृत्वा सर्वत्र योजयेत् ।

मृतानि लोहान्यमृतीभवन्ति
निघ्नन्ति युक्तानि महामयांश्च ।
अभ्यासयोगाद्दृढदेहसिद्धिं
कुर्वन्ति रुग्जन्मजराविनाशम् ॥ २६ ॥

नागेन स्वर्णं रजतं च ताप्यैः
गन्धेन ताम्रं शिलया च नागम् ।
तालेन वङ्गं त्रिविधं तु लोहं
नारीपयो भन्ति च हिङ्गुलेन ॥ २७ ॥

तथाऽभ्रसत्वं बलिनोपलोहं
वज्रेण सूतं विनिहन्ति सद्यः ॥ २८ ॥

अभ्रकसत्वम् ॥

वज्राभ्रकस्य सत्सत्वं वक्ष्यामि शृणु भैरवि ! ।

चतुर्थांऽभ्रकसत्वं स्यात्कठिनं मृदुलं द्युतिः ॥ २९ ॥
बीजं च गुणवज्ज्ञेयं तत्क्रमादुत्तरोत्तरम् ।

सत्वपातनायाभ्रकसिद्धिः ॥

धान्याभ्रकं रविक्षीरे धर्मे स्थाप्यं दिनावधि ॥ ३० ॥
तच्चूर्णं पेषयेत्पट्टे शरावे,तं निरोधयेत् ।
सम्यक् पचेद्गजपुटे रविक्षीरे पचेत्पुनः ॥ ३१ ॥
मर्दनं पुटपाकं च कुर्यादेवं तु सप्तधा ।
तथा जम्बीरनीरे च निचुलस्य रसे तथा ॥ ३२ ॥
घृतसिद्धघनं श्रेष्ठं निश्चन्द्रं सत्वपातने ।
घनसारकसारैर्वा व्यस्तैर्वांऽथ समस्तकैः ॥ ३३ ॥
पिष्ट्वा धान्याभ्रकं श्लक्ष्णं रुध्वा गजपुटे पचेत् ।

अभ्रककठिनसत्वम् ॥

लाक्षागुग्गुलुदग्धोर्णासर्जसर्जरसं पटु ॥ ३४ ॥
शशास्थि क्षुद्रमत्स्याश्च हरिद्रा मित्रपञ्चकम् ।
पञ्चमाहिफेनापि भल्लातं च समं समम् ॥ ३५ ॥
सर्वतुल्यं सिद्धघनं निश्चन्द्रं पेषयेद्दिनम् ।
तत्सर्वं तेन वटकाः कार्यास्ते कर्षमात्रकाः ॥ ३६ ॥
कोष्ठीयन्त्रे धमेद्दाढमङ्गारैः खदिरोद्भवैः ।
त्रियामधमनादेव सत्वं पतति निर्मलम् ॥ ३७ ॥
कठिनं सूक्ष्मरवकं काचटङ्कणवर्जितम् ।
त्रिवारमेवं कुर्वीत तत्किट्टैः सत्वपातने ॥ ३८ ॥

अभ्रकमृदुसत्वम् ॥

[प्रथमः प्रकारः ।]

पुनरन्यं प्रवक्ष्यामि मृदुसत्वं सुरेश्वरि ! ।
गुग्गुलुं टङ्कणं गुञ्जां सर्जसर्जरसं गुडम् ॥ ३९ ॥

क्षुद्रमीनं यवक्षारं काचपिण्याकसूरणम् ।
मूलता त्रिफला वह्निः क्षीरकन्दं पुनर्नवम् ॥ ४० ॥

धुत्तूरं लाङ्गली पारा वला गन्धक(र)सेवकम् ।
गोक्षीरं पञ्चलवणं सर्वं च द्विगुणं मधु ॥ ४१ ॥

षड्बिन्दु क्षुद्रशंबूकमस्थीनि शशकस्य च ।
पारावतमलं व्यूषमिन्द्रगोपं सशिग्रुकम् ॥ ४२ ॥

गोधूमसर्षपं ताप्यं छागक्षीरेण मर्दयेत् ।
एवं व्यस्तं समस्तं वा याममात्रेण मर्दितम् ॥ ४३ ॥

अस्य पिण्डस्य भागैकं द्विभागं सिद्धमभ्रकम् ।
पञ्चमाहिषभागैकं सर्वमेकत्र लोडयेत् ॥ ४४ ॥

कर्षाभा वटिकाः कार्याः किञ्चिच्छायाविशोषिताः ।
खदिराङ्गारसन्तप्ते कोष्ठीयन्त्रे क्षिपेत्क्षिपेत् ॥ ४५ ॥

घृतीपञ्चकपञ्चैव वङ्कनाले धमेद्दृढम् ।
मृदुसत्व भवेच्छुभ्रं रुजरामृत्युनाशनम् ॥ ४६ ॥

त्रिवारमेवं कुर्वीत तत्किट्टं सत्वपातनम् ।
अनेन क्रमयोगेन कान्तसस्यकमाक्षिकम् ॥ ४७ ॥

कठिनोपरसाश्चान्यैः शुद्धा भूनागमृत्तिका ।
मुञ्चन्ति द्युतिसङ्घातं गृह्णन्तीमं पृथक्पृथक् ॥ ४८ ॥

[द्वितीयः प्रकारः ।]

अभ्रमत्वं समादाय समांशं काचटङ्कणम् ।

दत्वा दत्वा त्रिवारं तद्वज्रमूषागतं घमेत् ॥ ४९ ॥
अम्लवर्गं स्नुहीपत्रं बिंबीबीजं सवल्कलम् ।
कल्कयेत्तत्र सन्तप्तं सप्तवारं निषेचयेत् ॥ ५० ॥
मृदु शुभ्रं भवेत्तस्य (सत्वं) रुग्जरामृत्युनाशनम् ।

[तृतीयः प्रकारः ।]

सिद्धाभ्रं दशभागं स्याच्छुद्धभागं त्रिभागकम् ॥ ५१
टङ्कणं माक्षिकं सूतं भागैकं च सुशोधितम् ।
ऊर्णासर्जयवक्षारं भागं भागं विमिश्रयेत् ॥ ५२ ॥
मर्द्यं मूत्राम्लवर्गाभ्यां यथा प्रोक्तं दिनावधि ।
अजापञ्चाङ्गसंयुक्तं पूर्ववत्सत्वपातनम् ॥ ५३ ॥
कृत्वाऽऽदाय मृतं साक्षान्निर्मलं मृदु जायते ।

अभ्रकबीजपाकः ॥

बीजपाकं प्रवक्ष्यामि घनस्यैतत्परं हितम् ॥ ५४ ॥
सिद्धाभ्रकं शतपलं स्वर्णरूप्यार्ककान्तकम् ।
रसत्रिगन्धमाक्षीकं विमलाभृलताद्विजम् ॥ ५५ ॥
नीलाञ्जनं च कट्कुष्ठं कासीसं दरदं तथा ।
प्रत्येकं दशनिष्कं स्यात्ततो गैरिकटङ्कणम् ॥ ५६ ॥
इन्द्रगोपं गुडं गुञ्जा मधु सर्पिश्च गुग्गुलुः ।
सर्जक्षारो यवक्षारो मत्कुणा नवपञ्चकम् ॥ ५७ ॥
क्षुद्रमीनशशास्थीनि माहिषं शृङ्गमा(मू)लकम् ।
पृथक्पृथक्पञ्चमूलं पञ्चमाहिषमर्दयेत् ॥ ५८ ॥
तेषां च(कर्षाभा)वटिका कार्या किञ्चिच्छायाविशोषिता ।
पूर्ववत्पातयेत्सत्वं रुग्जरादैन्यमृत्युहृत् ॥ ५९ ॥

बीजसत्वमिदं श्रेष्ठं वैद्ये वादे रसायने ।

अभ्रकसत्वनिर्मलीकरणम् ॥

निर्मलीकरणं वक्ष्ये घनसत्वस्य पार्वति ! ॥ ६० ॥

तत्सत्वं कणशः कृत्वा मिलपञ्चकसंयुतम् ।
मूषायां तद्विनिक्षिप्य काचं तदधरोत्तरम् ॥ ६१ ॥

रुध्वा हठाग्नौ धमयेत्खदिराङ्गारयोगतः ।
एवं क्रमेण धमयेत्सप्तधा निर्मलं भवेत् ॥ ६२ ॥

ससत्वं निर्मलीभूतं लोहखल्वे विचूर्णयेत् ।
मर्दयेत्तिलफलाक्काथैर्यामं घर्मे विशोषयेत् ॥ ६३ ॥

पाकं पुटं च विधिवत्कुर्यादेवं पुनः पुनः ।
चत्वारिंशत्पुटं कुर्यादेवं मार्कवजैर्द्रवैः ॥ ६४ ॥

पृथक्पञ्चामृतैः पञ्चपुटं चेक्षुरसैस्त्रिधा ।
उदयादित्यसङ्काशं घनसत्वं सुसिद्धिदम् ॥ ६५ ॥

अभ्रकसत्वसिन्दूरविधिः ॥

[प्रथमः प्रकारः ।]

चूर्णीकुर्याल्लोहखल्वे निर्मलीकृतमभ्रकम् ।
निष्काणां शतकं तस्मिन्निष्कैकं गन्धकं क्षिपेत् ॥
पेषयेद्दिनमेकं तु कुमारीरसयोगतः ।
यामं तप्तापयेद्धर्मे ततो गजपुटे पचेत् ॥ ६७ ॥

एवं शतपुटं कुर्याद्गन्धं दद्यात्पुनः पुनः ।
सिन्दूरपाटलच्छायमभ्रसत्वं भवेच्छिवे ! ॥ ६८ ॥

[द्वितीयः प्रकारः ।]

घनसत्वं सुविमलं लोहखल्वे विचूर्णयेत् ।
शतनिष्कं ततस्तस्मिन्निष्कार्धं माक्षिकं क्षिपेत् ॥ ६९ ॥

अर्कक्षीरैर्दिनं मर्द्यं रुध्वा गजपुटे पचेत् ।
एवं शतपुटं कुर्यान्माक्षीकं च पुटे पुटे ॥ ७० ॥
एतत्स्यात्सत्त्वसिन्दूरं रुजरामृत्युनाशनम् ।

[तृतीयः प्रकारः ।]

तत्सत्त्वं रक्तकान्हित्वा लोहखल्वे सुबुद्धिमान् ॥
मर्दयेल्लोहदण्डेन वराकायसमन्वितम् ।
याममात्रं खरे घर्मे स्थापयेल्लोहपात्रगम् ॥ ७२ ॥
स्थालीपाकं खरं कृत्वा रात्रौ गजपुटे पचेत् ।
एवं सप्तपुटं कुर्यान्मार्कवस्वरसैस्तथा ॥ ७३ ॥
कुमारीस्वरसैस्तद्वच्चित्रमूलरसैस्तथा ।
नीलीपत्ररसैस्तद्वत्पुनर्नवरसैस्तथा ॥ ७४ ॥
मेघनादद्रवैस्तप्त क्वाथैर्वटजटोद्भवैः ।
एवं सुसूक्ष्मचूर्णं तु शतांशं गन्धकं क्षिपेत् ॥ ७५ ॥
मर्दयेदारनालेन घर्मे स्थाल्यां पुटे पचेत् ।
एवं दशदिनं कुर्यात्पुनस्ताप्यं शतांशत. ॥ ७६ ॥
क्षिप्त्वाऽऽरनालैस्संमर्द्य घर्मे स्थाल्यां पुटे पचेत् ।
एवं दशदिनं कुर्यात्पुनः पञ्चामृतैः पचेत् ॥ ७७ ॥
पञ्चपञ्चेक्षुजरसैः पञ्चधा पुटमाचरेत् ।
सिन्दूराभेऽभ्रभसिते निक्षिपेच्छुद्धहिङ्गुलम् ॥ ७८ ॥
विंशत्यंशं घनस्याऽथ स्तन्यैस्संमर्द्य संपुटे ।
रुध्वाऽथ भूधरे यन्त्रे क्षिप्त्वा लघुपुटं विधेत् ॥ ७९ ॥
एवं विंशत्पुटं कुर्याद्दत्वाऽथ हिङ्गुलम् ।
अनेन क्रमयोगेन सत्त्वं सिन्दूरसन्निभम् ॥ ८० ॥

अयं सामान्यसंस्कारो विशेषस्तु निगद्यते ।
यद्यद्रोगहरैर्द्रव्यैस्तत्तद्रोगहरं भवेत् ॥ ८१ ॥

[चतुर्थः प्रकारः ।]

घनसत्वं सुविमलं लोहखल्वे विचूर्णयेत् ।
मुण्डीपत्ररसैर्मर्द्यं दिनं गजपुटे पचेत् ॥ ८२ ॥

एवं दशपुटं कार्यं निर्गुण्डीस्वरसैस्तथा ।
तथा वटजटाक्वाथै· पेटारीमूलजै रसैः ॥ ८३ ॥

कङ्कुमस्य रसैस्तद्वज्जम्बूत्वक्स्वरसैस्तथा ।
एवं षष्टिपुटं कार्यं ततस्तस्मिन्विनिक्षिपेत् ॥ ८४ ॥

विंशत्यंशेन दरदं स्तन्यैस्सम्मर्दयेद्दिनम् ।
ततस्तत्सम्पुटे रुध्वा भूधरे तु पुटं लघु ॥ ८५ ॥

एवं विंशतिधा कुर्यात्सिन्दूराभं भवेद्ध्रुवम् ।

स्थालीपाकविधिः ॥

स्थालीपाकस्त्रिधा प्रोक्तो मृदुर्मध्य. खरात्मक. ॥८६॥

पङ्कोत्करसम. पूर्वं पिण्डपाकस्तु मध्यमः ।
तृतीयः खरपाकस्स्याद्वालुकासदृशः प्रिये ! ॥ ८७ ॥

स्थालीपाको रसे युक्तः संयुक्तो दरदेन वा ।
मृदुमध्यमपाकाभ्यां कर्तव्यो भूधरे तत. ॥ ८८ ॥

क्षिप्त्वा लघुपुटे देयं रसहिङ्गुलवर्जितः ।
खरपाकः प्रकर्तव्यो विधिर्गजपुटे पचेत् ॥ ८९ ॥

[लोहभस्मनाममृतीकरणविधिः ।]

सर्वेषां मारितानां च लोहानामभ्रकस्य च ।

चक्ष्यामि परमं गुह्यममृतीकरणं शृणु ॥ ९० ॥

त्रिफलोत्थकषायस्य भागानादाय षोडश।
गोघृतस्य पलान्यष्टौ मृताम्रकपलान्दश ॥ ९१ ॥

एकीकृत्वा लोहपात्रे पाचयेन्मृदुवह्निना।
द्रवे जीर्णे समादाय सर्वयोगेषु योजयेत् ॥ ९२ ।

अभ्रकसत्वसिन्दूरगुणाः ॥

अनुपानं विना ह्यभ्रं जरामृत्युरुजापहम्।
योजयेदनुपानैर्वा तत्तद्रोगहरं भवेत् ॥ ९३ ॥

कठिनस्याभ्रसत्वस्य सिन्दूरं पलितं वलिम्।
इन्द्रियाणां पटुत्वं च पत्राभ्रकगुणा अपि ॥ ९४ ।

मृदुसत्वस्य सिन्दूरं सर्वामयनिबर्हणम्।
वलीपलितदारिद्र्यमृत्युघ्नं सुरसायनम् ॥ ९५ ॥

त्रिदोषशमनं सौम्य दीपनं पाचनं शुभम्।
निहन्ति ज्वरजालं च ग्रहणीमतिसारकम् ॥ ९६ ॥

अश्मरीं मूत्रकृच्छ्रं च क्षयं पाण्डुहलीमकम्।
दुर्नाममेहकुष्ठानि वातजान्पित्तजानपि ॥ ९७ ॥

कफजान्दुस्तरान्रोगान्विद्रध्यादिव्रणानपि।
नानाविधानि शूलानि पुंस्त्वीवन्ध्यत्वभञ्जनम् ॥ ९८
यद्यद्रोगहरैर्योगैस्तत्तद्रोगनिबर्हणम्।
पारदे ये गुणास्सन्ति बीजसत्वेऽपि ते गुणा ॥ ९९ ॥

मण्डूरम् ॥

[मण्डूरशुद्धिः।]

अक्षाङ्गारैर्धमेत्तिक्तं लोहजं तद्भवां जलै.।

सेचयेदक्षपालान्तप्पड्वारं च पुनः पुनः ॥ १०० ॥
मण्डूरोऽयं समाख्यातश्शुद्धं श्लक्ष्णं नियोजयेत् ॥
गोमूत्रे त्रिफला काथ्या तत्काथे सेचयेच्छनैः ॥१०१॥

मण्डूरमस्म ॥

लोहकिट्टं सुतप्तं च यावच्छी(ची)र्यति तत्क्षयम् ।
तच्छी(ची)र्णं ग्राहयेत्पेप्यं मण्डूरं यं प्रयोजयेत् ॥
ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके ।
तस्मात्सर्वत्र मण्डूरं रोगशान्त्यै प्रयोजयेत् ॥ १०२ ॥

किट्टादशगुणं मुण्डं मुण्डात्तीक्ष्णं शतोन्मितम् ।
तीक्ष्णाल्लक्षगुणं कान्तं भक्षणात्कुरुते गुणम् ॥ १०४ ॥

मण्डूरगुणाः ॥

मण्डूरं पाण्डुशोषार्शोग्रहणीकामलापहम् ।
सर्वशूलप्रमेहघ्नं दीपनं परमं हितम् ॥ १०५ ॥
शीतं तिक्तं कषायाम्लं हृद्रोगप्लीहनाशनम् ।

रसादिमारणाय द्रव्यमानम् ॥

रसेन्द्रं शोधयेद्देवि ! पलानां द्विसहस्रकम् ॥१०६॥
सहस्रं वा शतं वाऽपि पञ्चाशद्वा तदर्धकम् ।
न कुर्याद्रसकर्माणि हीनं वै पञ्चविंशतेः ॥ १०७ ॥
लोहस्य पचनं त्रिंशत्पलादूर्ध्वं न कारयेत् ।
अर्वाक् पञ्चपलाद्देवि ! घनसत्वं तथा पचेत् ॥१०८॥
स्वर्णं पञ्चपलादूर्ध्वं पलादर्वाङ्न शोधयेत् ।

तथा रूप्यं च तामं च शोधयेन्मारयेत्प्रिये ! ॥१०९॥

लोहवद्घनसत्वं च घनपत्रं तथैव च ।
हीनं पञ्चपलादूर्ध्वं न कुर्यात्पलविंशतेः ॥ ११० ॥

द्रावणं शोधनं देवि ! मारणं नागवङ्गयोः ।
वज्रं निष्कादधश्चोर्ध्वं न कुर्याच्छोधनं मृतिम् ॥१११॥

पद्मरागादिरत्नानि तथा कुर्यात्सुरेश्वरि ! ।

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ सप्तमोल्लासः ॥

॥ अष्टम उल्लासः ॥

रत्नान्युपरत्नानि च ॥

श्रीभैरवः—

महाम्बुराशौ सरिति पर्वते काननेऽपि वा ।
रत्नानामाकरं देवि ! स्थानमाधेयगौरवात् ॥ १ ॥

तेषु रक्षोविषव्यालव्याधिदोषहराणि च ।
प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च ॥ २ ॥

मदुष्टेनोपजातानि जन्तुनोपहतानि च ।
दोषैस्तान्युपचीयन्ते हीयन्ते गुणसंपदा ॥ ३ ॥

माणिक्यम् ॥

माणिक्यं शोणरत्नं च रत्नराट् रविरत्नकम् ।
शृङ्गारि रङ्गमाणिक्यं तरलो रत्ननायकः ॥ ४ ॥

रागदृक् पद्मरागश्च रत्नं शोणोपलस्तथा ।
सौगन्धिकं लोहितकं कुरुविन्दं शरेन्दुकम् ॥ ५ ॥

माणिक्यं पद्मरागाख्यं द्वितीयं नीलगन्धि च ।
कुशेशयदलच्छायं स्वच्छं स्निग्धं गुरु स्फुटम् ॥ ६ ॥

वृत्तायतं समं गात्रं माणिक्यं श्रेष्ठमुच्यते ।
परीक्षापरिशुद्धानां रत्नानां पृथिवीभृता ॥ ७ ॥

धारणं सर्वदा कार्यं श्रेयःश्रीकीर्तिकाङ्क्षिणा ।
ततस्तु शास्त्रतस्तेषां परीक्षादिकमुच्यते ॥ ८ ॥

[माणिक्यभेदाः ।]

यत्सिंहलं कालपुरमन्धं तुम्बुरुसंस्थितम् ।
क्षेत्रं चतुर्विधं तस्य माणिक्यस्य समुद्भवे ॥ ९ ॥

सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम् ।
पीतं कालपुरोद्भूत कुरुविन्दमिति स्मृतम् ॥ १० ॥

अशोकपल्लवच्छायमन्धं सौगन्धिकं प्रिये ! ।
तुम्बुरौ छायमानीलं नीलगन्धि च कीर्तितम् ॥ ११ ॥

मध्यमे मध्यमं ज्ञेयं माणिक्यं क्षेत्रभेदतः ।
माणिक्यस्य गुणा. प्रोक्ताश्चत्वारो मुनिपुङ्गवैः ॥ १२ ॥

स्निग्धच्छाया गुरुत्वं च नैर्मल्यमतिरक्तता ।

[माणिक्यस्य गुणा. ।]

माणिक्यं दीपनं वृष्यं कफवातक्षयार्तिहृत् ॥ १३ ॥

भूतवेतालपापघ्नं कर्मजव्याधिनाशनम् ।
माणिक्यं च महापुण्यं महाभाग्यकरं परम् ॥ १४ ॥

सर्वभूतमहोन्मादविषघ्नं दोषजित्परम ।

मुक्ता ॥

मुक्ता सौम्या मौक्तिकं शौक्तिकेयं
तारं तारा शौक्तिकं तारका च ।
अम्भस्सार शीतलं नीरज च
नक्षत्रं स्यादिन्दुरत्न वलक्षम् ॥ १५ ॥

मुक्ताफल विन्दुफल च मुक्ता
शौक्तेयक शुक्तिमणिश्शशिप्रियम् ।
स्वच्छ हिम हैमवतं च शुभ्रं
सुधाशुरत्न च भसल्यकाह्वम ॥ १६ ॥

[मुक्ताभेदा ।]

मातङ्गोरगमीनपोत्रिशिरसस्त्वक्सारशङ्खाम्बुभृ-
च्छुक्तीनामुदराच्च मौक्तिकमणिस्स्पष्ट भवेदष्टधा ।
छाया पाटलनीलपीतधवलास्तत्रापि सामान्यत
सप्ताना बहुशो न लब्धिरितरच्छौक्तेयक तुल्यणम् ॥

नक्षलाभ शुद्धमत्यन्तमुक्त
स्निग्ध स्थूल निर्मल निर्व्रण च ।
न्यस्तं धत्ते गौरव यत्तुलाया
तन्निर्मौल्यं मौक्तिक सौख्यदायि ॥ १८ ॥

[मुक्तागुणा ।]

मौक्तिक च मधुर सुशीतल
दृष्टिरोगशमनं विषापहम् ।
राजयक्ष्मपरिकोपनाशन
क्षीणवीर्यबलपुष्टिवर्धकम् ॥ १९ ॥

मौक्तिक शिशिरं स्निग्धं विशद कान्तिवर्धनम् ॥२०॥

दाहतृड्भ्रममूर्च्छांसृक्पित्तज्वरविषापहम् ।

चक्षुष्यं पवनास्रपित्तविषजित्सर्वेन्द्रियाह्लादनं
तृड्दाहज्वरशोकमोहशमनं शीतं श्रमघ्नं हितम् ।
धन्यं मङ्गलमायुषः स्थितिकरं सौभाग्यकान्तिप्रदं
मुक्ता हारविभूषणं तदखिलं मूलं शशी प्रीयते ॥

प्रवालः ॥

प्रवालोऽङ्गारकमणिर्विद्रुमोऽम्भोधिपल्लवः ॥ २२ ॥

भौमरत्नं च रक्ताङ्गो रक्ताङ्कुरलतामणिः ।
सेतौ सागरमध्ये या जायते वल्लरी शुभा ॥ २३ ॥

विद्रुमाख्या सुरक्ता सा दुर्लभा दीप्तरूपिणी ।
पाषाणत्वं भजत्येषा पाकतः कठिना सती ॥ २४ ॥

प्रवालनाम तद्रक्तं वर्णसौभाग्यकान्तिदम् ।
सिद्धं स्वच्छं स्निग्धरूपं वृत्तं कान्तं समं गुरु ॥२५॥

रक्तगात्रं दृढं पिण्डं प्रवालं श्रेष्ठमुच्यते ।
पक्वबिम्बफलाभासं जपाकुसुमसन्निभम् ॥ २६ ॥

शुकतुण्डसमच्छायं प्रवालमतिशोभनम् ।
शारदाभं दलं सूक्ष्मं वक्रं रूक्षं सकोटरम् ॥ २७ ॥

विद्धं कृष्णं लघुतमं प्रवालं दोषकृद्भवेत् ।
गौररक्तं जलाक्रान्तं प्रवालमशुभं त्यजेत् ॥ २८ ॥

प्रवालं कोमलं स्निग्धं सुरागं विद्रुमं हितम् ।

[प्रवालगुणाः]

धनधान्यकरं मेध्यं विषाहिभयनाशनम् ॥ २९ ॥

प्रवालो मधुराम्लश्च कफपित्तादिदोषनुत् ।
वीर्यकान्तिकरः स्त्रीणां धृतो मङ्गलदायकः ॥ ३० ॥

मरकतम् ॥

मरकतं रौहिणेयं गारुत्मन्तं हरिन्मणिः ।
सौपर्णं गरुडोद्गीर्णं बुधरत्नाश्मगर्भजे ॥ ३१ ॥
गरलारिर्वीय(र्क)वीर्यं(यं) गारुडं रुद्रसम्मितम् ।
तुरुष्कविषयांभोधौ समीरारोहणाचले ॥ ३२ ॥

तच्छायाश्यामलो देशस्सोऽभून्मरतकाकरः ।
तद्विशेषान्मरकतं जातं दोषगुणान्वितम् ॥ ३३ ॥

दोषास्सप्तविधास्तस्य गुणाः पञ्चविधास्स्मृताः ।
भवेदष्टविधा छाया मणेर्मरकतस्य च ॥ ३४ ॥

अस्निग्धं रूक्षमित्युक्तं विस्फोटं पिट(पीठ)कं तथा ।
जठरं कान्तिहीनं च विच्छायं मलिनं तथा ॥ ३५ ॥

सशर्करं सपाषाणं कर्कशं सूत्रसंयुतम् ।
कल्माषवर्णं शबलं समस्तभयदायकम् ॥ ३६ ॥

निर्मलं कथितं स्वच्छं गुरु स्यादगुरुदायुत(यक)म् ।
स्निग्धं रूक्षं विनिर्मुक्तमरजस्क(मरत्व)मरेणुकम् ॥

सुरागं रागबहुलमिति पञ्च गुणाः स्मृताः ।
एतैर्युक्तं मरकतं सर्वपापहरं परम् ॥ ३८ ॥

[मरकतगुणाः ।]

मरकतं विषघ्नं च शीतलं मधुरं रसे ।
आम(अम्ल)पित्तहरं रुच्यं पुष्टिदं भूतनाशनम् ॥३९॥
स्निग्धं मरकतं स्वच्छं सर्वदोषहरं शुभम् ।

कान्तिसौभाग्यदं मेध्यं भूतग्रहविपापहम् ॥ ४० ॥

पुष्परागः ॥

पीतस्तु पुष्परागः
पीतस्फुटिकं च पीतरत्नं च ।
पीताश्मा गुरुरत्नं
पीतमणिः पुष्यरागश्च ॥ ४१ ॥

ईषत्पीतं पविच्छायं स्वच्छं कान्त्या मनोहरम् ।
पुष्पराग इति ख्यातं रत्नं रत्नपरीक्षकैः ॥ ४२ ॥
हेमच्छायं शिरोवृत्तं ज्योतिरङ्गारनिर्मलम् ।
पीतगात्रं गुरु स्निग्धं पुष्परागं प्रशस्यते ॥ ४३ ॥
रूक्षं क्षतलघु श्वेतं कृष्णं गौरं सशर्करम् ।
मलिनं बिन्दुमद्रत्नं पुष्परागं न शस्यते ॥ ४४ ॥

[पुष्परागगुणाः ।]

पुष्परागोऽम्लशीतश्च वातजिद्दीपनः परम् ।
आयुः श्रियं च प्रज्ञां च धारणात्कुरुते नृणाम् ॥४५॥
पुष्परागं शुभं मेध्यं वस्तुसौभाग्यकीर्तिदम् ।
वाक्पटुत्वकरं हृद्यं विषघ्नं दोषजित्परम् ॥ ४६ ॥

वज्रम् ॥

वज्रमिन्द्रायुधं वीरं मिदुरं कुलिशं पविः ।
अमेघमसिरं रत्नं दृढं मार्गवकं स्मृतम् ॥ ४७ ॥
स्वच्छं विद्युत्प्रभं स्निग्धं सुन्दरं लघु लेखनम् ।
षडारं तीक्ष्णधारं च सुसौम्यारं श्रियं दिशेत् ॥ ४८ ॥

[वज्राकरा वज्रभेदाश्च ।]

पौण्ड्रमतङ्गहिमाचल-
सौराष्ट्रसुपारकोसलकलिङ्गाः ।
पेण्णा(पूर्णा)नदीतटश्चे-
त्यष्टौ वज्राकरा विनिर्दिष्टाः ॥ ४९ ॥

श्यामं प्रपौण्ड्रप्रभवं
किञ्चित्पीतं मतङ्गगिरिजातम् ।
हिमवत्सुराष्ट्रसंभव-
मातामं कृष्णकान्ति सौपारम् ॥ ५० ॥

फुल्लशिरीषच्छायं
कोसलजं कनककान्ति कालिङ्गम् ।
पेण्णानदीतटोद्भव
माहुर्वज्रं सुधांशुनिभम् ॥ ५१ ॥

कलिङ्गकोसलौ देशौ मतङ्गाद्रिहिमालयौ ।
सौराष्ट्रपौण्ड्रकौबेरा(पेण्णा)करसूपारकौ तथा ॥ ५२ ॥

कृतादिषु युगेष्वेतौ वज्राणामाकरौ स्मृतौ ।
आकरेष्वेव वज्राणां खनिः स्रोतः प्रकीर्णकम् ॥ ५३ ॥

समुत्पत्तिस्थलं त्रेधा निर्दिष्टं सुरनायिके ! ।

[वज्रगता गुणा दोषाश्च ।]

कोट्यः पार्श्वानि धाराश्च षडष्टौ द्वादशैव च ॥ ५४ ॥

इत्यच्छतीक्ष्णधाराग्रा वज्रस्याहुरथो गुणान् ।
मलो बिन्दुश्च रेखा च लासः काकपदं तथा ॥ ५५ ॥

एते दोषास्समाख्याताः पञ्च वज्रेषु संस्थिताः ।
कुर्यादशोधितं वज्रं कुष्ठदाहाङ्गगौरवम् ॥ ५६ ॥

हृत्पार्श्वपीडां पाण्डुं च ततस्तच्छुद्धिरुच्यते ।

[वज्रशुद्धिः ।]

गृहीत्वाऽथ शुभं वज्रं व्याघ्रीकन्दोदरे क्षिपेत् ॥ ५७ ॥
महिषीशकृदाऽऽलिप्य करीषाग्नौ विपाचयेत् ।
अहोरात्रात्समुद्धृत्य हयमूत्रेण सेचयेत् ॥ ५८ ॥
एवं पुनः पुनः पक्वं सप्तरात्राद्विशुध्यति ।
मेघनादाशमीश्यामाश्रृङ्गीमदनकोद्भवैः ॥ ५९ ॥
कुलुत्थवेतसागस्त्यसिन्दुवाराखुकर्णिकाः ।
एतेषां हयमूत्रेण कषायं साधितं पुनः ॥ ६० ॥
जम्बीरे कुलिशं क्षिप्त्वा हयमूत्रैस्त्र्यहं पचेत् ।
डोलायन्त्रविधानेन ततश्शुद्धिमवाप्नुयात् ॥ ६१ ॥
कुलुत्थकोद्रवक्वाथैर्डोलायन्त्रे विपाचयेत् ।
व्याघ्रीकन्दगतं वज्रं सप्ताहाच्छुद्धिमाप्नुयात् ॥ ६२ ॥
कुलत्थकोद्रवक्वाथं हयमूत्रं स्नुहीपयः ।
क्षिप्त्वा भाण्डे पचेत्तस्मिन्व्याघ्रीकन्दगतं पविम् ॥६३॥
डोलायन्त्रे दिवारात्रं समुद्धृत्य पुनः क्षिपेत् ।
वज्रकन्दे मृदा कन्दं लिप्त्वा गजपुटे पचेत् ॥ ६४ ॥
तत्पक्वं पाचनद्रावैस्सेचितं शुद्धिमाप्नुयात् ।
व्याघ्रीकन्दगतं वज्रं मृदा लिप्तं पुटे पचेत् ॥ ६५ ॥
अहोरात्रात्समुद्धृत्य हयमूत्रेण सेचयेत् ।
वज्रीक्षीरेण वा सिञ्चेदेवं शुद्धं तु मारयेत् ॥ ६६ ॥

वज्रमारणविधिः ॥

[विप्रजातीयवज्रमारणम् ।]

वक्ष्यते विप्रजात्यादेश्शुद्धवज्रस्य मारणम् ।

अधस्थनदरीभण्डीमाक्षिक कर्कटास्थि च ॥ ६७ ॥

सम म्नुक्पयसा पिण्ड मूषामध्ये प्रलेपयेत् ।
तन्मध्ये प्रक्षिपेद्वज्रमौषधैस्तैस्तत परम् ॥ ६८ ॥

वज्रमाच्छाद्य यत्नेन ततो मूषा निरोधयेत् ।
द्रुक्षराख्येन पुटयेत्पुटेन महता पुन ॥ ६९ ॥

विप्रजातीयकं वज्रं पुटैनैकेन सिध्यति ।

[क्षत्रियजातीयवज्रमारणम् ।]

करवीर मेषशृङ्गी दरद(वदर)च ह्युदुम्बरम् ॥ ७० ॥

अर्कदुग्धैस्सप्त पिष्ट्वा तत्कृते गोलके क्षिपेत् ।
वज्रं क्षत्रियजातीय पूर्ववन्मारयेद्ध्रुवम् ॥ ७१ ॥

[वैश्यजातीयवज्रमारणम् ।]

सूरण लशुन शख शिलाया(ह्व) पेषयेत्समम् ।
बलामतिबला गन्ध कच्छपास्थि च पेषयेत् ॥ ७२ ॥

उत्तरावारुणीदुग्धैस्तत्कृते गोलके क्षिपेत् ।
वज्रं तु वैश्यजातीय पूर्ववत्तन्मृत भवेत् ॥ ७३ ॥

[शूद्रजातीयवज्रमारणम् ।]

सूरण लशुन शङ्ख शिला सपेषयेत्समम् ।
वटक्षीरेण तत्कल्पते गोलके पूर्ववत्पचेत् ॥ ७४ ॥

वज्रं तच्छूद्रजातीय तेन सम्यग्भवेन्मृतम् ।

[स्त्रीपुन्नपुसकवज्रमारणम् ।]

स्त्रीपुवज्र तु पूर्वोक्तैर्म्रियते तत्तदौषधै ॥ ७५ ॥

चतुर्जात्यौषधैरेव मृतिर्वज्रे नपुसके ।

सामान्येन वज्रमारणविधिः ॥

[प्रथमः प्रकारः ।]

सामान्यस्सर्ववज्राणां वक्ष्यते मारणक्रमः ॥ ७६ ॥

शुद्धं वज्रं मल्कुणानां रक्तैर्लिप्त्वा धमेत्पुन ।
अग्निवर्णं क्षिपेन्मूत्रे गदभस्य पुनः पुनः ॥ ७७ ॥

लेपितं ध्मापितं तद्वदेवं कुर्यात्त्रिसप्तधा ।
तालकं मल्कुणैः पिष्ट्वा तस्मिन्नोले क्षिपेत्तु तम् ॥७८॥

रुध्वा मूषा धमेद्दाढं हयमूत्रे विनिक्षिपेत् ।
समुद्धृत्य पुनस्तद्वत्सप्तवारैर्मृतो भवेत् ॥ ७९ ॥

[द्वितीयः प्रकारः ।]

मेषशृङ्गं भुजङ्गास्थि कूर्मपृष्ठं शिलाजतु ।
गन्धकं कान्तपाषाणं मुनिपुष्पं सतालकम् ॥ ८० ॥

त्रिक्षारं पञ्चलवणं मेषशृङ्गीन्द्रवारुणी ।
वज्रवल्ली मूषकर्णी वदरी कुट्मलानि च ॥ ८१ ॥

मूषकस्य मलं स्तन्यं स्नुह्यर्कक्षीरमल्कुणम् ।
पञ्चाङ्ग शरपुंखस्य ह्यस्थिनी खरमेषयोः ॥ ८२ ॥

पेटारिबीजं स्त्रीपुष्पं पारावतमले शिला ।
पुष्पाणि चैव बाकुच्याः पञ्चाङ्गं तिमिरस्य च ॥ ८३ ॥

धात्रीवृक्षस्य पञ्चाङ्गं गोरंभा वाजिमूत्रकम् ।
हंसपादी वज्रकन्दं बृहतीफलसूरणम् ॥ ८४ ॥

गोजिह्वा कर्कटं मांसं मूत्रवर्गं च मिश्रयेत् ।
एतत्समस्तं द्रव्यस्तं वा यथालाभं सुपिण्डितम् ॥८५॥

तत्पिण्डे निक्षिपेद्वज्रमन्धमूषागतं पुटेत् ।

कुलुत्थकोद्रवं पिष्ट्वा हयमूत्रे विलोलयेत् ॥ ८६ ॥

तन्मध्ये सेचयेत्तसां 'मूषापुटविनिर्गताम् ।
एवं पुन. पुन. कुर्यादेकविंशतिवारकम् ॥ ८७ ॥

आदाय तत्पुनर्वज्रं ताले मल्लुणपेषिते ।
गोलके निक्षिपेद्रुध्वा मूषां तीव्रानले धमेत् ॥ ८८ ॥

इत्येव सप्ताधा ध्मातं हयमूत्रे निषेचयेत् ।
अनेन क्रमयोगेन मृतो भवति निश्चितम् ॥ ८९ ॥

तन्मृतं चूर्णयेत्खल्वे सिद्धयोग उदाहृत ।

[तृतीय' प्रकार' ।]

आमक च मृत ताप्य पेटारीबीजटङ्कणम् ॥ ९० ॥

क्षीरं चोत्तरवारुण्या गन्धक तालक शिला ।
चिञ्चाबीजं मेषशृङ्गी स्त्रीकुप चाम्लवेतस. ॥ ९१ ॥

पञ्चाङ्ग शरपुंखायाश्शशदन्तं शिलाजतु ।
एतत्समस्तं व्यस्त वा यथालाभं सुचूर्णयेत् ॥ ९२ ॥

स्नुह्यर्कोत्तरवारुण्या क्षीरैस्तन्यैर्विमर्दयेत् ।
तद्गोलके क्षिपेद्वज्रं रुध्वा चैतान्धमेद्दृढम् ॥ ९३ ॥

गुडूची सैन्धवं हिङ्गु समुस्तोत्तरवारणी ।
क्वाथै कौलुत्थकै पिष्ट्वा तस्मिन्क्वाथे विनिक्षिपेत् ॥

तं वज्रं पूर्ववद्गोले कृत्वा रुध्वा धमेत्तथा ।
सेचनान्तं तत. कुर्यादेकविंशतिवारकम् ॥ ९५ ॥

तालक मल्लुणायोगे संसवारं पुनर्धमेत् ।
सेचयेदश्वमूत्रेण तद्वज्रं म्रियते ध्रुवम् ॥ ९६ ॥

[चतुर्थ प्रकार ।]

त्रिवर्षीयोत्थकार्पासमूलमादाय पेषयेत् ।
त्रिवर्षनागवल्ल्या वा निजद्रावै प्रपेषयेत् ॥ ९७ ॥

तद्गोलके क्षिपेद्धत्तूरं रुध्वा गजपुटे पचेत् ।
एव सप्तपुटै पक्वमेकैकेन कृत भवेत् ॥ ९८ ॥

[पञ्चम प्रकार ।]

तालकासीससौराष्ट्रीमपामार्गस्य भस्म च ।
पिष्ट्वा कौलुत्थकै क्वाथैस्तस्मिन्वत्रं सुलापितम् ॥९९ ॥

क्षिपेत्त्रिसप्तवाराणि म्रियते नाऽत्र सशय ।

[षष्ठ प्रकार ।]

वैक्रान्तभस्मना सार्धं पेषयेदम्लवेतसम् ॥ १०० ॥

तद्गोले निक्षिपेद्धत्तूरमन्धमूषागत धमेत् ।
सेचयेदश्वमूत्रेण पूर्वगोले पुन क्षिपेत् ॥ १०१ ॥

रुध्वा ध्मात पुनस्तेच्यमेवकुर्यात्त्रिसप्तधा ।
म्रियते नाऽत्र सन्देहस्सर्वयोगेषु योजयेत् ॥ १०२ ॥

[सप्तम प्रकार ।]

उत्तरावारणीक्षीरै क्रान्तपाषाणज मुखम् ।
क्षण पिष्ट्वा तु तद्गोल क्षिप्त्वा तस्मिन्पचेद्दिनम् ॥
नृतैले गन्धतैलेन म्रियते नाऽत्र सशय ।

[अष्टम प्रकार ।]

मूनाग गन्धक चाऽथ नारीस्तन्येन पेषयेत् १०४ ॥
तद्गोलस्थ पचेद्धत्तूं पूतितैले मृतं भवेत् ।

[नवमः प्रकारः]

स्नुहीक्षीरेण विमलां पिष्ट्वा तद्गोलके क्षिपेत् ॥१०५॥
वज्रं निरुध्य मूषा तु शुष्का तीव्राग्निना धमेत् ।
क्षिप्तामथस्य मूत्रे तु क्षिप्त्वा वज्रं समाहरेत् ॥१०६॥
इत्येवं सप्तधा कुर्यात्ततस्तालक्रमल्कुणैः ।
पिष्ट्वा गोलं क्षिपेत्तस्मिन्वज्रमूषां निरुध्य च ॥१०७॥
ध्मापितं पूर्ववत्सेच्यं सप्तवारैर्मृतं भवेत् ।।

[दशमः प्रकारः ।]

वज्रं मल्कुणरक्तेन लिप्त्वा लिप्त्वाऽऽतपे क्षिपेत् ॥
शुष्कं लेप्यं पुनः शोष्यं यावत्सप्तदिनावधि ।
विष्णुक्रान्तापेटकार्यो द्विर्विस्रिसञ्चेत्पुन पुन ॥ १०९ ॥
तप्तं तप्तं च तद्वज्रं शतवारैर्मृतं भवेत् ।

[एकादशः प्रकारः ।]

गन्धकं चूर्णित भाव्यं स्त्रीपुष्पेण तु सप्तधा ॥११०॥
पुनस्स्त्रीरजसाऽऽलोड्य तस्मिन्वज्रं सुतापितम् ।
सेचयेत्तापयेदेकविंशद्वारान्मृतं भवेत् ॥ १११ ॥

[द्वादशः प्रकारः ।]

वज्रं नदीमहाशुक्तौ क्षिप्त्वा भाव्यं मुहुर्मुहुः ।
स्नुह्यर्कोत्तमकन्याना द्रवेणैकेन चातपे ॥ ११२ ॥
कृष्णक(म)र्कटमासेन पेषितं वेष्टयेत्पुनः ।
भूनागस्य मृदा सम्यग्धृत भस्मत्वमाप्नुयात् ॥ ११३ ॥

तद्गोले निक्षिपेद्वज्रं सूत्रेणावेष्टयेद्बहिः ॥ १२२ ॥
नागवल्लीदलैश्चैव वेष्टितं धान्यराशिगम् ।
मासान्ते तत्समुद्धृत्य लिपेन्नागलताद्रवैः ॥ १२३ ॥
तद्दलैर्वेष्टितं जानुमध्यस्थं मृदुतां व्रजेत् ।

[चतुर्थः प्रकारः ।]

कान्तपाषाणवक्त्रं वा चूर्णं वा कान्तलोहजम् ॥१२४॥
ससूतमम्लयोगेन दिनमेकं विमर्दयेत् ।
तद्गोले निक्षिपेद्वज्रं निम्बकार्पासकोद्भवैः ॥ १२५ ॥
पत्रैः पिष्टैस्सुसंपेष्य नागवल्लीदलैस्ततः ।
वेष्टितं जानुमध्यस्थं दिनान्ते मृदुतां व्रजेत् ॥ १२६ ॥

[पञ्चमः प्रकारः ।]

एरण्डवृक्षमध्ये तु तत्फले वा क्षिपेत्पविम् ।
मासमात्रात्समुद्धृत्य जानुमध्ये च पूर्ववत् ॥ १२७ ॥
कोमलं जायते वज्रं दिनान्ते नाऽत्र संशयः ।

[षष्ठः प्रकारः ।]

वज्रं तित्तिरिमांसेन वेष्टितं निक्षिपेन्मुखे ॥ १२८ ॥
अतिस्थूलस्य भेकस्य मुखं सूत्रेण वेष्टयेत् ।
निखनेद्धस्तमात्रायां क्षोण्यां मासात्समुद्धरेत् ॥१२९॥
मण्डूकं सम्पुटे रुध्वा सम्यग्गजपुटे पचेत् ।
तद्वज्रं पूर्वगोलस्थं जानुमध्यगतं दिनम् ॥ १३० ॥
भवेद्वज्रौदनं साक्षात्पश्चादाहार्यं योजयेत् ।
सर्ववज्रौदनानां तु मारणं पूर्ववद्भवेत् ॥ १३१ ॥

वज्रद्रुतिः ॥

क्षारलवं रामठं च चणकाम्लाम्लवेतसम् ।
ज्वालामुखी चेक्षुरकं स्थलकुम्भीफलानि च ॥ १३२ ॥
स्नुहीकर्कपयसा श्लक्ष्णं पिष्ट्वा तद्गोलके क्षिपेत् ।
वज्रं विशोधितं सम्यग्वस्त्रे बध्वा हठात्यचेत् ॥ १३३ ॥
डोलायन्त्रेण धान्याम्ले द्रुतं मासाष्टकाद्भवेत् ।
वज्रवल्ल्यन्तरस्थं वा कृत्वा वज्रं निरोधितम् ॥ १३४ ॥
अम्लभाण्डगतं सेव्यं सप्ताहाद्द्रवतां व्रजेत् ।
भस्मोदनं द्रुतिश्चेति त्रिविधं वज्रमारणम् ॥ १३५ ॥
रसबन्धकरं प्रोक्तं नागार्जुनपुरस्सरैः ।

वज्रगुणाः ॥

वज्रं च षड्रसोपेतं सर्वरोगापहारकम् ॥ १३६ ॥
सर्वोपशमनं सौख्यं देहदार्ढ्यं रसायनम् ।
वज्रं रत्नोत्तमं पुण्यं श्रीसौभाग्यविवर्धनम् ॥ १३७ ॥
आयुष्यं धन्यमोजस्यं यशस्यं सर्वपाप्मजित् ।
आयुर्बलं देहसौख्यं रूपं कान्तिं करोति च ॥ १३८ ॥
सेवितं हन्ति रोगांश्च मृतं वज्रं न संशयः ।

नीलम् ॥

नीलम्बु सौरिरत्नं स्यान्नीलाश्मा नीलरत्नकः ॥ १३९ ॥
नीलोपलस्तृणमणी महानीलम्बुनीलकः ।
इन्द्रनीलमणिश्चेति चतुर्धा जातिभेदतः ॥ १४० ॥
मिश्रच्छायो मयेन्द्रियो रक्तः क्षत्रियजातिकः ।

पीतस्तु वैश्यजातियों वृषल कृष्णदीधिति ॥ १४१ ॥

[नीलस्य गुणा दोषाश्च ।]

नीलीरससमाभासा वैष्णवीपुष्पसन्निभा ।
लवलीपुष्पसङ्काशा नीलेन्दीवरसप्रभा ॥ १४२ ॥

अतसीपुष्पसङ्काशा चाप(भस्म)पक्षसमद्युति ।
कृष्णनिकुर्णिकपुष्पसमानद्युतिधारिणी ॥ १४३ ॥

मयूरकण्ठसच्छाया शभो कण्ठनिभा तथा ।
विष्णुदेहसमाभासा भृङ्गपत्रसमप्रभा ॥ १४४ ॥

एताद्दशायाश्शुभकरा इन्द्रनीलमहामणे ।
गुरुत्व स्निग्धकान्तित्व सुराग पार्श्वरञ्जनम् ॥ १४५ ॥

तृणग्राहित्वमित्येते गुणा पञ्च प्रकीर्तिता ।
न विम्लो(निम्नो)निर्मलो गात्रो मसृणो गुरुदीप्तिक ॥
तृणग्राही मृदुर्नीलो दुर्लभो लक्षणान्वित ।
इन्द्रनील शुभ वर्ण्यं सर्वपापनिबर्हणम् ॥ १४७ ॥

आयुर्यशो बल लक्ष्मीमारोग्य च प्रयच्छति ।
नीलस्सतिक्तकोष्णश्च कफपित्तानिलापह ॥ १४८ ॥

यो दधाति शरीरेऽस्य सौख्यमङ्गलदो भवेत् ।

गोमेदक ॥

गोमेदकस्तु गोमेदो राहुरत्न तमो मणि ॥ १४९ ॥

स्वर्भानवप्यडाह्वोऽय पिङ्गस्फटिक इत्यपि ।

गोमूत्राभ यन्मृदु स्निग्धमुष्ण
शुद्धच्छाय गौरव यच्च धत्ते ।
हेमारक्त श्रीमता योग्यमेतत्
गोमेदाख्य रत्नमाख्याति सन्त ॥ १५० ॥

मधुबिन्दु(धूच्छिष्ट)समच्छायं गोमूत्राज्यसमप्रभम् ॥
हेमरक्तं गुरु स्वच्छं स्निग्धं गोमेदकं शुभम् ।
श्वेतं कृष्णं रङ्गहीनं त्रासरेखादिदूषितम् ॥ १५२ ॥
कर्कशं पाटलाकारं दुष्टं गोमेदकं त्यजेत् ।

[गोमेदकगुणाः ।]

मेध्यं गोमेदकं रत्नं यशस्यं श्रीविवर्धनम् ॥ १५३ ॥
मङ्गल्यं कान्तिजननं स्निग्धं सर्वविषापहम् ।
गोमेदकोऽम्लमुष्णं च वातकोपविकारजित् ॥ १५४ ॥
दीपनं पाचनं चैव धृतोऽयं पापनाशनः ।

वैडूर्यम् ॥

वैडूर्यं केतुरत्नं च खराब्दाङ्कुरजं तथा ॥ १५५ ॥
विडूरभूमिजं रत्न मावृष्यं पञ्चनाम च ।

कल्पान्तकालक्षुभितांबुराशि-
निदाह(र्ह्राद)कल्पाद्दितिजेन्द्रनादात् ।
वैडूर्यमुत्पन्नमनेकवर्णं
शोभाभिरामद्युतिरत्नवर्यम् ॥ १५६ ॥
अविदूरे विडूरस्य गिरेरुत्तुङ्गरोधसः ॥ १५७ ॥
कोङ्कचोलकसीमान्ते मणेस्तस्याकरस्स्मृतः ।
तत्र दैत्येन्द्रनिनदं प्रति मेघसुगर्जितैः ॥ १५८ ॥
समुद्भवन्ति वैडूर्यमणयः प्रावृडागमे ।
सिताभ्रधूमसङ्काशमीषत्कृष्णं सितं तु यत् ॥ १५९ ॥
वैडूर्यं नाम तत्प्रोक्तं रत्नवर्णपरीक्षकैः ।
वेणुपत्रविडालाक्षिशिखिकण्ठसमद्युति ॥ १६० ॥

स्निग्धगात्रं गुरु स्वच्छं वैडूर्यं गुणवन्मतम् ।
रेखाभिन्नं लघु स्पष्टं शिलाङ्गारकर्कर्दमम् ॥ १६१ ॥
विवर्णं परुषं कृष्णं वैडूर्यं दोषवत्त्यजेत् ।

[वैडूर्यस्य गुणाः ।]

वैडूर्यं विशदं स्निग्धं प्रीत्यायुर्बलवर्धनम् ॥ १६२ ॥

मङ्गल्यं धारणात्तद्धि सर्वग्रहविपापहम् ।
वैडूर्यमम्लमुष्णं च कफमारुतनाशनम् ॥ १६३ ॥
गुल्मशूलप्रशमनं भूषितं च शुभावहम् ।

पञ्चरत्नानि ॥

माणिक्यं मौक्तिकं वज्रं नीलं मरकतं तथा ॥ १६४ ॥
पञ्चरत्नमिति प्रोक्तं पाप्मालक्ष्मीविपापहम् ।

नवरत्नानि ॥

गोमेदकं पुष्परागं वैडूर्यमपि विद्रुमम् ॥ १६५ ॥
पञ्चरत्नैस्सहैतानि नवरत्नानि निर्दिशेत् ।

उपरत्नानि ॥

सूर्यकान्तः ॥

अथ भवति सूर्यकान्तः

तपनमणिस्तापनश्च रविकान्तः ।
दीप्तोपलोऽग्निगर्भो
ज्वलनाश्माऽर्कोपलश्च वसुनामा ॥ १६६ ॥

श्वेताभ्रकसमं वर्णं हिमाद्रौ चन्द्रसन्निभम् ॥ १६७ ॥
निर्मलं च प्रभायुक्तं स्फटिकं श्रेष्ठमुच्यते ।
हिमालये सिंहले च विन्ध्ये रेवातटे तथा ॥ १६८ ॥

पद्मरागोद्भवे स्थाने विविधं स्फटिकं भवेत् ।
सूर्यकान्तं च तत्रैकं चन्द्रकान्तं तथाऽपरम् ॥ १६९ ॥

सूर्यांशुस्पर्शमात्रेण वह्निं वमति तत्क्षणात् ।
सूर्यकान्तं तदाख्यातं स्फटिकं रत्नवेधितम् ॥ १७० ॥

[सूर्यकान्तस्य गुणाः ।]

सूर्यकान्तो भवेदुष्णो निर्मलश्च रसायनम् ।
वातश्लेष्महरो मेध्यः पूजनाद्धनतुष्टिदः ॥ १७१ ॥

चन्द्रकान्तः ॥

इन्दुकान्तश्चन्द्रकान्तश्चन्द्राश्मा संस्रवोपलः ।
शीताश्मा चन्द्रिकाद्रावः शशिकान्तश्च सप्तधा ॥१७२॥

स्निग्धं श्वेतं पीतमलाऽऽसमन्ताद्-
धत्ते चित्तं स्वस्थतां यन्मुनीनाम् ।
यच्च द्रावं याति चन्द्रांशुसङ्गे
जात्यं रत्नं चन्द्रकान्ताख्यमेतत् ॥ १७३ ॥

[चन्द्रकान्तस्य गुणाः ।]

चन्द्रकान्तस्तु शिशिरः स्निग्धः पित्तासदाहनुत् ।
शिवप्रीतिकरः स्वच्छो महालक्ष्मीविषापहः ॥ १७४ ॥

स्फटिकम् ॥

स्फटिकस्तितोपलस्त्या-
दमलमणिस्तारकोपलस्स्वच्छः ।
शीतोष्णवीर्यमक्ष्णः
पित्तं वातं निहन्ति शोफमम् ॥ १७५ ॥

पुरा प्रोक्तं हि कान्तस्य मया ते लक्षणादिकम् ।

वैक्रान्तम् ॥

वैक्रान्त चैव विक्रान्त नीलवज्र कुवज्रकम् ॥ १७६ ॥

गोनाश क्षुद्रकुलिश चूर्णवज्र च गोनसम् ।
श्वेतो रक्तश्च पीतश्च नील पारावतच्छवि ॥ १७७ ॥

श्यामल कृष्णवर्णश्च कर्बुरश्चाष्टधा हि स ।
वज्राभावे तु वैक्रान्त रसवीर्यादिके समम् ॥ १७८ ॥

अष्टास्रश्चाष्टफलकष्षट्कोणो मसृणो गुरु ।
शुद्धमिश्रितवर्णैश्च युक्तो वैक्रान्त उच्यते ॥ १७९ ॥

[वैक्रान्तशुद्धि ।]

कुलुत्थक्वाथसस्विन्नो वैक्रान्त परिशुध्यति ।
त्रिक्षारै पञ्चलवणैर्वंसामूलाम्लकोद्रवै ॥ १८० ॥

मत्स्यतैलघृतैस्तुल्यै कुलुत्थै काञ्जिकान्वितै ।
ससाह डोलिकायन्त्रे व्याभीकन्दगत पचेत् ॥ १८१ ॥

तसवर्णं तु वैक्रान्त शुद्धिमायाति निश्चितम् ।

[वैक्रान्तभस्म ।]

हयमूत्रेण तत्सेच्य तप्त तप्त द्विससधा ॥ १८२ ॥

ततश्चोत्तरवारुण्या पञ्चाङ्गैर्गोलके क्षिपेत् ।
रुध्वा मूषा पुटे पक्त्वा पुनरुद्धृत्य गोलके ॥ १८३ ॥

क्षिप्त्वा रुध्वा पुटेदेव ससधा भसता व्रजेत् ।

वैक्रान्तसत्वम् ॥

[प्रथम प्रकार ।]

वैक्रान्तस्य पलेक तु पलैक टङ्कणस्य च ॥ १८४ ॥

रविक्षीरे दिन भाव्यं मर्द्यं शिग्रुद्रवैर्दिनम् ।

गुञ्जापिण्याकवह्नीना प्रतिकर्षं वियोजयेत् ॥ १८५ ॥

अनेन गुलिका कृत्वा कोष्ठीयन्त्रे घमेद्दृढम् ।
शङ्खकुन्देन्दुसङ्काशा सत्वं वैक्रान्तज भवेत् ॥ १८६ ॥

[द्वितीय प्रकार ।]

वैक्रान्त वज्रकन्द च सम स्नुक्पयसा सह ।
महिषीनवनीत च सक्षौद्र मर्दयेद्दिनम् ॥ १८७ ॥

पूर्ववद्भमनात्सत्त्वमिन्द्रगोपनिभ भवेत् ।

[तृतीय प्रकार ।]

वन्ध्याचूर्णं सवैक्रान्त छायाया मर्दयेत्समम् ॥ १८८ ॥
अजामूत्रैर्दिनैक तु सत्व रजतवद्भवेत् ।

[चतुर्थ प्रकार ।]

म्रियतेऽष्टपुटैर्गन्धनिम्बुकद्रवसयुत ॥ १८९ ॥

सत्वपातनयोगेन मर्दितश्च वटीकृत ।
मूषाया घटिका ध्मातो वैक्रान्तस्सत्वमुत्सृजेत् ॥१९०॥

[वैक्रान्तद्युति ।]

श्वेतवर्णं तु वैक्रान्तमम्लवेतसभावितम् ।
रसाहान्नाल सन्देह खरे घर्मे द्रवत्यलम् ॥ १९१ ॥

केतकीस्वरस तुल्य सैन्धव स्वर्णपुष्पिकम् ।
इन्द्रगोपसम युक्त सर्वं भाण्डे विनिक्षिपेत् ॥ १९२ ॥

सप्ताह स्वेदयेत्तस्मिन्वैक्रान्त द्रवता व्रजेत् ।

[वैक्रान्तगुणाः ।]

आयुःप्रदश्च बलवर्णकरोऽतिपृष्यः
प्रज्ञाप्रदः सकलदोषमदापहारी ।
दीप्ताग्निकृत्पविसमानगुणस्तरस्वी
वैक्रान्तकः खलु वपुर्बललोहकारी ॥ १९३ ॥

राजावर्तः ॥

आवर्तमणिरावर्तो राजावर्तोऽनलाह्वयः ॥ १९४ ॥

राजावर्तरसस्याथ लक्षणं कथयाम्यहम् ।
वर्णेन भ्रमराभस्स्याद्द्वि प्रकारः प्रकर्मतः ॥ १९५ ॥

एकश्चूर्णाकृतिर्ज्ञेयो द्वितीयो गोलकात्मकः ।
स्वर्णबिन्दुसमायुक्तः स्थिररागस्थिरत्वदः(व्यधः) ॥
रसदो(जतो)द्भवरागस्य(श्च) वर्णोत्कर्षेऽतिदक्षिणः ।
नागस्य रञ्जने श्रेष्ठस्तारे रञ्जनकर्मणि ॥ १९७ ॥

सर्वेषां चलरागाणां रागबन्धनकृन्मतः ।
राजावर्तोऽल्परक्तोरुनीलिकामिश्रितप्रभः ॥ १९८ ॥

गुरुश्च मसृणः श्रेष्ठस्तदन्यो मध्यमः स्मृतः ।

[राजावर्तादिशुद्धिः ।]

निम्बुद्रवैस्सगोमूत्रैस्सक्षारैस्स्वेदिताः खलु ॥ १९९ ॥
द्वित्रिवारेण शुध्यन्ति राजावर्तादिधातवः ।

[राजावर्तभस्म ।]

लुङ्गाम्बुगन्धकोपेतो राजावर्तो विचूर्णितः ॥ २०० ॥
पुटनात्सप्तचारेण राजावर्तो मृतो भवेत् ।

[राजावर्तसत्त्वम् ।]

राजावर्तमयं पात्रे पाचयेन्माहिषैर्घृतैः ॥ २०१ ॥

पयोमिश्रं दिनं चैकं मित्रपञ्चकमिश्रितम् ।
रजन्या पञ्चरात्रेण पिण्डीभूतं तु कारयेत् ॥ २०२ ।

खादिराङ्गारयोगेन कोष्ठ्यां सत्वं विमुञ्चति ।

[राजावर्तगुणाः ।]

प्रमेहक्षयदुर्नामपाण्डुश्लेष्मानिलापहः ॥ २०३ ॥

दीपनः पाचनो वृष्यो राजावर्तो रसायनः ।

गरुडोद्धारः ॥

सस्यको गरुडोद्धारः कालजिद्विषसा(मा)रकः ॥२०४॥

कालकूटविषं पीत्वा गरुडस्सोद्गमक्षमः ।
तदा निर्गत्य तच्चंचोर्बहुधा सस्यकोऽभवत् ॥ २०५ ॥

महारसस्सस्यकस्स्यात्प्रभाभिः पञ्चभिर्युतः ।
धवलो मेचकः पीतो हरितश्चातिलोहितः ॥ २०६ ॥

अतिस्थितो वीतिहोत्रस्सर्वतस्सर्वरूपभाक् ।

[गरुडोद्धारगुणाः ।]

धवलो हरितश्चैव शस्यते तारकर्मणि ॥ २०७ ॥

लोहितो मेचकः पीतश्शास्यते हेमकर्मणि ।
सस्यकस्सर्वरोगघ्नो विषमृत्युभयापहः ॥ २०८ ॥

विमलः ॥

विमलो निर्मलस्वच्छो विमलस्वच्छधातुकः ।
माणसंख्याभिधं शस्तं तारहेम द्विधाकृतः ॥ २०९ ॥

विमलस्त्रिविधः प्रोक्तो हेमाद्यस्तारपूर्विकः ।
तृतीयः काम्यविमलस्तत्र कान्त्या स लक्ष्यते ॥२१०॥
वर्तुलः कोणसंयुक्तः स्निग्धश्च फलकान्वितः ।

[विमलगुणाः ।]

मरुत्पित्तहरो वृष्यो विमलोऽतिरसायनः ॥ २११ ॥

पूर्वो हेमक्रियासूक्तो द्वितीयो वृष्यकर्मणि ।
तृतीयो भेषजे तेषु पूर्वपूर्वो गुणोत्तरः ॥ २१२

[विमलशुद्धिः ।]

आरग्वधरसे स्विन्नो विमलो विमलो भवेत् ।
कदलीकन्दतोयेन विमलं प्रथमं पचेत् ॥ २१३ ॥

अम्लवेतसधान्याम्लमेषीमूत्रे तत. पचेत् ।
टोलयन्त्रे चतुर्यामं शुद्धिरेषां महोत्तमा ॥ २१४ ॥

काकोदुम्बरिकापथ्याद्रवैर्जम्बीरजैर्दिनम् ।
भावयेदातपे तीव्रे विमला शुद्ध्यति ध्रुवम् ॥ २१५ ॥

[विमलसत्वम् ।]

विमलं शिग्रुतोयेन कांक्षीकासीसटङ्कणैः ।
वज्रकन्दसमायुक्तैर्भावयेत्कदलीरसैः ॥ २१६ ॥

मोक्षकक्षारसंयुक्तमन्धमूषागतं धमेत् ।
सत्वं चन्द्रार्कसङ्काशं पतत्यस्य न संशयः ॥ २१७ ॥

पेरोजः- हरिताश्मा ॥

हरिताश्मा च पेरोजो विषारातिर्हरिन्मणिः ।
रसवीर्यविपाकेषु सस्यकस्य गुणानुगः ॥ २१८ ॥

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ अष्टमोल्लासः ॥

॥ नवम उल्लासः ॥

दिव्यौषधिमहौषधिप्रशंसा ॥

श्रीभैरवी—

कीदृशी ओषधी नाथ ! रसकर्मकरी शुभा ।
केन वा भस्म सूतश्च केन वा खोटबन्धनम् ॥ १ ॥

निर्जीवत्व गतस्सूत कथ जीव ददाति स ।
निर्जीवेन तु जीवत्व कथ जीवति शङ्कर ! ॥ २ ॥

एतन्मे संशय ब्रूहि यथा जानाम्यह शिव ! ।

श्रीभैरव —

शृणु भैरवि ! तत्सर्वमपूर्वं कथयामि ते ॥ ३ ॥

ब्रह्मविष्णुसुरेन्द्रार्चेन ज्ञात वीरवन्दिते ! ।
वलीपलितरोगघ्ना मृत्युदारिद्र्यभञ्जना ॥ ४ ॥

रसकर्मकरा दिव्या कुलौषध्यस्सुसिद्धिदा. ।
भ्रमन्ति पशवो मूढा कुलौषधिविवर्जिता ॥ ५ ॥

तृणौषधिरसाना च नैव सिद्धि प्रजायते ।
तस्मात्सर्वप्रयत्नेन ज्ञातव्या तु कुलौषधि ॥ ६ ॥

दिव्यौषध्यश्चतुष्पष्टि कुलमध्ये व्यवस्थिता ।
नैव जानन्ति मूढास्ताश्शिवमोहेन मोहिता ॥ ७ ॥

अदिव्यास्तु तृणौषध्यो जायन्ते गिरिगह्वरे ।
तृणौषध्या रसे सूत नैव बन्ध कदाचन ॥ ८ ॥

अक्षय नैव तिष्ठेत्तु कुलौषधिविवर्जितम् ।
कुलौषध्या विहीनास्तु गगन च न हन्ति ते ॥ ९ ॥

स रसस्तु वरारोहे वह्निमध्ये न तिष्ठति ।
न खोटो न च वा भस्म नैव द्रव्यं करोति सः ॥१०॥

किञ्चिद्द्रव्यं प्रकुर्वन्ति धाम्यमानं न तिष्ठति ।
पत्रे पाके कषे छेदे नैव तिष्ठति काञ्चनम् ॥ ११ ॥

नैव वेधं शतादूर्ध्वं करोति स रसः प्रिये ! ।
यावन्न चाब्दमेकं तु विक्रीतं तत्तु काञ्चनम् ॥ १२ ॥

धर्मार्थिकाममोक्षेषु नैव दद्यात्तु तत्प्रिये ! ।
दिव्यौषध्या यदा देवि ! रसेन्द्रो मर्दितो भवेत् ॥१३॥

कालिकारहितस्सूतस्सदा भवति पार्वति ! ।
परस्य हरते कालं कालिकारहितो रसः ॥ १४ ॥

अष्टानां चैव लोहानां मलं शमयति क्षणात् ।
महामूर्च्छागतं सूतं को वाऽपि कथयेन्मृतम् ॥ १५ ॥

दिव्यौषध्या रसेनैव जायते नष्टचेतनः ।
पञ्चभूतात्मकस्सूतस्तिष्ठते च सदाशिवः ॥ १६ ॥

रसौषध्यो महौषध्यस्सिद्धौषध्यस्तथाऽपराः ।
दिव्यौषध्य इति प्रोक्ता मया प्रोक्ताश्चतुर्विधाः ॥१७॥

दिव्यौषध्यो निगद्यन्ते तासु ता गुणवत्तराः ।
वृक्षवल्लीलतागुल्मतृणवन्दानिका इति ॥ १८ ॥

रसबन्धकरौषध्यप्षड्विधा परिकीर्तिताः ।

चतुष्पष्टिर्दिव्यौषध्यः ॥

१. सोमवल्ली ।

सोमवल्ली महागुल्मा यक्ष(ज्ञ)श्रेष्ठा धनुर्लता ॥ १९ ॥

सोमाह्वा गुल्मवल्ली च यज्ञवल्ली द्विजप्रिया ।

सोमक्षीरा च सोमा च यज्ञा दिव्यलता स्मृता ॥ २० ॥

सोमवल्ली कटुरशीता मधुरा पित्तदाहनुत् ।
तृष्णाविशोषशमनी पाचनी च रसायनी ॥ २१ ॥

पञ्चाङ्गा पञ्चदशच्छदाढ्या
सर्पाकृतिश्शोणितपर्वदेशा ।
सा सोमवल्ली रसबन्धकर्म
करोति राकादिवसोपनीता ॥ २२ ॥

कृष्णे पक्षे प्रगलति दलं प्रत्यहं चैकमेकं
शुक्ले पक्षे प्रभवति पुनर्ल्लंघमाना लता स्यात् ।
तस्या कन्दः कल्पति तरां पूर्णिमायां गृहीतो
बध्वा सूतं कनकसहितं देहलोहं विधत्ते ॥
इयं सोमलता नाम वल्ली परमदुर्लभा ।
अनया बद्धसूतेन्द्रो लक्षवेधी प्रजायते ॥ २४ ॥

चतुर्विंशतिसोमानां लक्ष्म व्यक्तं रसायने ।

२. सोमवृक्षः—महिषवल्ली च ।

करोति सोमवृक्षोऽपि रसबन्धवधादिकम् ॥ २५ ॥

पूर्णिमादिवसानीतस्तयोर्वल्ली गुणाधिका ।
प्रोक्ता महिषवल्ली च प्रतिसोमाऽन्तवल्लिका ॥२६॥

अपत्रवल्लिका प्रोक्ता काण्डशाखा पयस्विनी ।
रसवीर्यविपाकेषु सोमवल्ली समा स्मृता ॥ २७ ॥

३. स्थलपद्मिनी ।

अथातस्स्थलपद्मिन्या दिव्यौषध्या विधिं शृणु ।
पद्मिनीसदृशा पत्रैः पुष्पैरपि च तादृशी ॥ २८ ॥

भङ्गे चैव स्रवेत्क्षीरं रक्तवर्णं सुशोभनम् ।
आक्रम्य वामपादेन पश्येद्गगनमण्डलम् ॥ २९ ॥

पश्येच्च तारकायुक्तं महनक्षत्रमण्डलम् ।
लक्षयोजनतो देवि ! सा ज्ञेया स्थलपद्मिनी ॥ ३० ॥

४. गोनसा ।

गोनसाकारवल्ली स्याच्चित्रमण्डलमण्डिता ।
जरारुङ्मृत्युशमनी रसबन्धवधक्षमा ॥ ३१ ॥

५. उच्चटा ।

अथोच्चटां प्रवक्ष्यामि रसबन्धकरीं प्रिये ! ।
एकमेव भवेन्नालं तस्या रोमप्रवेष्टनम् ॥ ३२ ॥
तस्याग्रे च भवेत्पुष्पं शुक्लतुण्डस्य सन्निभम् ।
तत्फलानि च देवेशि ! शुकपिञ्छनिभानि च ॥ ३३ ॥
तत्कन्दं कूर्मसंस्थानं क्षीरं सिन्दूरसन्निभम् ।
जलं स्रवेन्मधूच्छिष्टे तत्समादाय पार्वति ! ॥ ३४ ॥
वेधयेत्सर्वलोहानि काञ्चनानि भवन्ति च ।

६. ईश्वरी ।

ईश्वरीत्युच्यते काचिदीश्वरीतुल्यरूपिणी ॥ ३५ ॥
भूरिक्षीरपरिस्रावा सबीजरसबन्धिनी ।

७. भूतकेशी ।

निम्बपत्रसदृक्पत्रा भूतकेशीति कथ्यते ॥ ३६ ॥
न व(ब)ध्यते यया सूतस्सूलोऽसौ भि(हि)निबन्धकः ।

८. कृष्णलता ।

भिन्नकज्जलसङ्काशा लता कृष्णलतेत्यसौ ॥ ३७ ॥

निर्बीजमपि बध्नाति रसं सर्वविषापहा ।

९. लशुनवल्ली ।

नाम्ना लशुनवल्ली च तद्वैस्सदृशच्छदा ॥ ३८ ॥
क्षरत्क्षीरा सुकन्दा च रसं बध्नाति वेगतः ।

१०. रुदन्ती ।

चणपत्रोपमैः पत्रैः पुष्पैरपि च तादृशी ॥ ३९ ॥
रुदन्ती नाम विख्याता ह्यधस्ताज्जलवर्षिणी ।
रुदन्तीव जनान्दृष्ट्वा मृत्युदैन्यजराकुलान् ॥ ४० ॥
चतुर्विधा तु सा ज्ञेया पीता रक्ता सिताऽसिता ।
जारिताभ्रं रसं हन्याद्बध्नाति च रसायनी ॥ ४१ ॥

११. वाराह्री ।

मुसलीकन्दवत्कन्दा तद्वल्लाकारवद्दला ।
सुक्षीरा रोमशा सोक्ता वाराही रसबन्धनी ॥ ४२ ॥

१२. सप्तपत्री ।

सप्तपल्लवसंपूर्णा सप्तपत्रीत्यसौ मता ।
रसायनी जराघ्नी च बध्यते पारदस्तया ॥ ४३ ॥

१३. नागिनी ।

नागिनीत्युदिता वल्ली नागभोगसमाङ्गिका ।
सर्पादिकविषघ्नी च सा स्वच्छरसबन्धिनी ॥ ४४ ॥

१४. सर्पिणी ।

सर्पिणी लतिका चान्या सर्पवद्वक्रयष्टिका ।
सक्षीरा स्निग्धपत्रा च बालपारदबन्धिनी ॥ ४५ ॥

१५. छत्रिणी ।

छत्रवद्दण्डपत्रा या नातिनीचा न चोन्नता ।
सुक्षीरा छत्रिणी नाम रसबन्धकरी मता ॥ ४६ ॥

१६. गोशृङ्गी ।

पर्वतेऽश्मसमुद्भूता गोकन्दाकृतिकन्दयुक् ।
क्षता मुञ्चति सा क्षीरं गोशृङ्गी रसबन्धिनी ॥ ४७ ॥

१७ ज्योतिर्लता ।

ज्योतिर्नाम्नी त्रिधा प्रोक्ता वृक्षकन्दतृणात्मिका ।
गिरौ ज्वलति सा रात्रौ लतापारदबन्धिनी ॥४८ ॥

१८. रक्तवल्ली ।

रक्तक्षीरदलाङ्गा या नातिविस्तरवल्लिका ।
रक्तवल्लीयसौ दिव्या निर्दिष्टा रसबन्धिनी ॥ ४९ ॥

१९. पद्मवल्ली ।

या पद्मपत्राकृतिपत्रवल्ली
सा पत्रवल्लीत्युदिता रसज्ञै ।
सक्षीरकन्दा सलिलोद्भवा च
क्षितौ न तिष्ठेद्रसबन्धनी सा ॥ ५० ॥

२०. काकिनी ।

स्थूलकण्टकवर्णाढ्या सा प्रोक्ता काकिनी लता ।
रसबन्धकरी सैषा जरामृत्युविनाशिनी ॥ ५१ ॥

२१. चाण्डाली ।

चाण्डालीति विनिर्दिष्टा त्रिचतुःपत्रधारिणी।
सा च रक्ता क्षीरकन्दा तया सूतो निबध्यते ॥ ५२ ॥

प्रोक्तश्चण्डालकन्दस्यादेकपत्रो द्विपलकः ।
त्रिपत्रोऽथ चतुष्पत्रः पञ्चपत्रश्च भेदतः ॥ ५३ ॥

२२. ताम्रवल्ली ।

ताम्रवर्णलतापत्रपुष्पक्षीरसमन्विता ।
सा ताम्रवल्लिका प्रोक्ता रसलोहादिसाधनी ॥ ५४ ॥

२३. पीतवल्ली ।

पीतपत्रलतापुष्परसयुक्ताऽतिदुर्लभा ।
सा पीतवल्लिकेत्युक्ता रसबन्धविधौ हिता ॥ ५५ ॥

२४. विजया ।

सितक्षीराऽऽर्द्रकीपत्रच्छदना नाऽतिविस्तृता ।
विख्याता विजयेत्येषा रसबन्धविधौ हिता ॥ ५६ ॥

२५. महौषधी ।

त्रिकोणकन्दसंयुक्ता चिलकच्छदनच्छवा ।
महौषधीति सा प्रोक्ता रसबन्धे परं हिता ॥ ५७ ॥

२६. देवदाली ।

शिखिकण्ठाभपलाऽऽढ्या चन्दनामोदमेदुरा ।
देवदालीत्यसौ दिव्या रसं बध्नाति सा क्षणात् ॥५८॥

२७. नवनीतकगन्धी ।

नवनीतकगन्धीति तिक्ता मृक्षणगन्धिनी ।
सक्षीरा रक्तपुष्पा च रसेन्द्रो बध्यते तया ॥ ५९ ॥

२८. गारुडवल्ली ।

सक्षीरा रक्तपुष्पा च बदरीदलवल्कला ।
उक्ता गारुडवल्लीति शीघ्रं बध्नाति पारदम् ॥ ६० ॥

२९. तुम्बिनी ।

तुम्बिनीत्युदिता वल्ली तत्पत्रकुसुमान्विता ।
तिक्तरक्तपयोयुक्ता तत्फला रसबन्धिनी ॥ ६१ ॥

३०. भूतुम्बिनी ।

या तुम्बिनीपत्रसमानपत्रा
भूतुम्बिनी नातिविसर्पिणी सा ।
निम्बूसमानैश्च फलैरुपेता
सर्वामयघ्नी रसबन्धनी च ॥ ६२ ॥

३१. गन्धर्वा ।

एरण्डपत्रवत्पत्रा सक्षीरा नातिविस्तृता ।
गन्धर्वेत्युदिता सा हि तया बन्धं रसो व्रजेत् ॥६३॥

३२. व्याघ्रपादी ।

व्याघ्रांघ्रिसमपत्रा या रक्तपुष्पा पयस्विनी ।
व्याघ्रपादीति निर्दिष्टा रसं बध्नाति निश्चितम् ॥६४॥

३३. महौषधी ।

सप्तच्छदसदृक्पत्रा कृशाङ्गी नातिविस्तृता ।
महौषधीत्यसौ प्रोक्ता रस बध्नाति हन्ति च ॥६५ ॥

३४. गोमारी ।

गोमारीनामिका वल्ली वेणुपत्रसमच्छदा ।
तस्या मूलं समासाद्य शस्तस्सूतो निबध्यते ॥ ६६ ॥

३५. त्रिशूली ।

त्रिशूलाकारपत्रा या शम्याकफलवत्फला ।
त्रिशूलीति समाख्याता विख्याता रसबन्धने ॥ ६७ ॥

३६. रुतसी ।

रुतसीपत्रवत्पत्रफला सा क्षीरकन्दयुक् ।
रुतसी वल्लिकेत्युक्ता गिरिजा रसबन्धनी ॥ ६८ ॥

३७. त्रिदण्डी ।

सुपुष्पा तिलकोपेता रक्तत्रयत्रि(त्वक्त्रि)फलान्विता ।
रसबन्धविधौ प्रोक्ता त्रिदण्डीति कृताभिधा ॥ ६९ ॥

३८. भृङ्गवल्ली ।

भृङ्गवद्वर्णपलाऽऽढ्या क्षीरिणी पीतपुष्पिका ।
भृङ्गवल्लीति सा प्रोक्ता प्रयुक्ता रसबन्धने ॥ ७० ॥

३९. चमरिका ।

चमराकारपत्राऽऽढ्या क्षीरयुक्चन्द्रधारिणी ।
लता चमरिका नाम सा च बध्नाति पारदम् ॥ ७१ ॥

४०. करवीरलता ।

हयमारसमाकारदलपुष्पवती लता ।
करवीरलतेत्युक्ता नितरां सूतबन्धिनी ॥ ७२ ॥

४१. वज्रवल्ली ।

कोरण्डपत्रच्छदनोपमान-
प्रसूनपत्रा च सदुग्धकन्दा ।
सा वज्रवल्ली कटुतिक्तसारा-
वज्राङ्कपत्रा रसबन्धिनी च ॥ ७३ ॥

४२. वारवल्ली ।

रक्तक्षीरवती बिल्वदलोपमदलान्विता ।
वारवल्लीति सा सूतबन्धनी रोगनाशिनी ॥ ७४ ॥

४३. रोहिणी ।

शणपुष्पदलाकारदशपुष्पा च दुग्धयुक् ।
सा रोहिणीति निर्दिष्टा रसराजस्य बन्धनी ॥ ७५ ॥

४४. बिल्विनी ।

ज्योतिष्मतीदलाकारवर्णपर्णा यश(पय)स्विनी ।
रसबन्धविधौ प्रोक्ता बिल्विनीति निगद्यते ॥ ७६ ॥

४५. गोरोचनलता ।

गोरोचनप्रभायुक्तदलवल्लीसमन्विता ।
गोरोचनलता भूतमोचनी रसबन्धनी ॥ ७७ ॥

४६. करीरी ।

श्रीशैलशिखरोद्भूता मार्कण्डीसदृशौषधी ।
रक्तं क्षीर क्षता मुञ्चेत्करीरी रसबन्धिनी ॥ ७८ ॥

४७. अक्षरा ।

पत्रसीसा(?) पत्रवत्पत्रा त्रिवर्षात्फलदायिनी ।
अक्षरेति समाख्याता रसस्यातिनिबन्धिनी ॥ ७९ ॥

४७. अपत्रा ।

सोमवल्लीव निष्पत्रा कज्जलाभरसान्विता ।
अपत्राऽसौ भवेद्विन्ध्ये नात्युच्चा रसबन्धिनी ॥ ८० ॥
आद्ये वर्षे भवेदम्ला भवेत्तिक्ता द्वितीयके ।
तृतीयेऽब्दे च मधुरैः फलैर्युक्ता प्रजायते ॥ ८१ ॥

पित्तज्वरहरा सद्यः सुपत्रफलसंयुता ।

४९. कुटजवल्ली ।

लता कुटजवल्लीति तत्फला तद्दलान्विता ॥ ८२ ॥

मधुरा रुधिरग्रन्थिस्सूतराजनिबन्धिनी ।

५०. मूलकन्दा ।

मूलकन्देति विख्याता मूलवत्फलपत्रिणी ॥ ८३ ॥
लता क्षीरान्विता सूतबन्धनं कुरुते ध्रुवम् ।

५१. ब्राह्मणी ।

पारिजातद्विजा वल्ली शतपुष्पदलच्छदा ॥ ८४ ॥
कृष्णक्षीरफला प्रोक्ता ब्राह्मणी रसबन्धिनी ।

५२. मुनिवल्ली- घृतगन्धा ।

अगस्तिपत्रतत्पत्रा तद्रूपाऽरुणपुष्पिणी ॥ ८५ ॥
घृतगन्धा रसघ्नी सा मुनिवल्लीति कथ्यते ।

५३ निंबवल्ली ।

दलै पुष्पै फलैर्वल्ली निंबवृक्षस्य सन्निभा ॥ ८६ ॥
तन्मूलैर्भक्ष्यते सूतस्सा प्रोक्ता निम्बकन्द लता ।

५४. तिलकन्दा ।

तिलकन्देति विख्याता मूलवत्फलपत्रिणी ॥ ८७ ॥
लता क्षीरवती सूतं निबध्नात्यातपे खरे ।

५५. अतसीवल्ली ।

अतस्य इव पुष्पाणि फलानि च दलानि च ॥ ८८ ॥
अतसीवल्लिका सा हि पारदस्य निबन्धिनी ।

५६. बोधिलता ।

उक्ता बोधिलता बोधिपत्रदुग्धेन संयुता ॥ ८९ ॥
बध्नाति रसराजं सा दानवेन्द्रमिवाच्युत. ।

५७. मधुगन्धा ।

मधुगन्धेति विख्याता निष्पत्रा फलपत्रयुक् ॥ ९० ॥
तस्या कन्दो रस शीघ्रं बन्धन नयति ध्रुवम् ।

५८ कूर्मलता ।

उक्ता कूर्मलता कूर्मरूपकन्दा पयोऽन्विता ॥ ९१ ॥
मल्लिकोपमतत्पत्रप्रसवा रसबन्धिनी ।

५९. माधवी ।

माधवीमूलवन्मूला नागवल्लीदलान्विता ॥ ९२ ॥
माधवीत्युदिता वल्ली तन्मूलैर्बध्यते रस ।

६० विशाला ।

श्वेतपत्रतया वल्ली श्वेतपुष्पफला तथा ॥ ९३ ॥
विशालेति विनिर्दिष्टा साऽपि पारदबन्धिनी ।

६१ महानागा ।

नागकुण्डलवत्कन्दा तत्फणासदृशच्छदा ॥ ९४ ॥
महानागेत्यसौ वल्ली विनिबध्नाति पारदम् ।

६२ मण्डूकलता ।

मण्डूकाकारवत्कन्दा मण्डूकीदलवद्दला ॥ ९५ ॥
मण्डूकलतिकेत्येषा तन्मूलैर्बध्यते रस ।

६३ उदुम्बरलता ।

उदुम्बरफलाकारफल्गुवद्दलवद्दला ॥ ९६ ॥
सोदुम्बरलतेत्युक्ता सूतरान्ध्य बन्धिनी ।

६४. चित्रवल्ली ।

या दुग्धकंदा वटपत्रपत्रा
विचित्रपर्णोरुफला सुदीर्घा ।
सा चित्रवल्लीत्युदिता रसेन्द्रो
निबध्यते तत्फलमध्यसंस्थः ॥ ९७ ॥

चतुष्पष्टिदिव्यौषधिनामसङ्ग्रहः ॥

चतुष्पष्टिरिति प्रोक्ता दिव्यौषध्यो महाबलाः ॥ ९८ ॥

आभिर्बद्धो रसो नृणां देहलोहार्थसाधकः ।
सोमवल्ली सोमवृक्षः स्थलपद्मिनिका ततः ॥ ९९ ॥

गोनसाकारवल्ली च उच्चटा ईश्वरी तत ।
भूतकेशी कृष्णलता ज्ञेया लशुनवल्लरी ॥ १०० ॥

रुदन्ती चैव वाराही सप्तपत्री च नागिनी ।
सर्पिणी छत्रिणी चैव गोशृङ्गी सर्वसिद्धिदा ॥ १०१ ॥

ज्योतिर्नाम्नी त्रिधा रक्तवल्लरी पत्रवल्लरी ।
काकिनी चैव चाण्डाली वल्लरी ताम्रवल्लरी ॥ १०२ ॥

पीतवल्ली च विजया विज्ञेया च महौषधी ।
ज्ञातव्या देवदाली च स्यान्नवानीतगन्धिनी ॥ १०३ ॥

ज्ञेया गरुडवल्ली च तुंबिनी भूमितुंबिनी ।
गन्धर्वा श्यामपादी च विज्ञेया च महौषधी ॥ १०४ ॥

गोमारी च त्रिशूली च तुलसी च त्रिदण्डिका ।
भृङ्गवल्ली चमरिका करवीरलता तत ॥ १०५ ॥

वज्रवल्ली धारवल्ली रोहिणी बिल्विनी तथा ।
गोरोचनलता चैव करीरी चाक्षरा तथा ॥ १०६ ॥

अपत्री कुटजा चल्ली मूलकन्दा च ब्राह्मणी ।
घृतगन्धा निंबवल्ली तिलकन्दाऽतसी तथा ॥ १०८ ॥
चोधिवल्ली मद्यगन्धा कूर्मवल्ली च माधवी ।
विशाला च महानागा ज्ञेया मण्डूकवल्लरी ॥ १०९ ॥
उदुम्बरलता चित्रवल्ली चैव सुरार्चिते ! ।
चतुष्पष्टिरिति प्रोक्ता दिव्यौषध्यो महाबलाः ॥११०॥

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ नवमोल्लासः ॥

॥ दशम उल्लासः ॥

महौषध्यः ॥

श्रीभैरवः—

१. हिमजा ।

हिमजा काञ्चनक्षीरी यवचिञ्चा(त्रा) महाद्विजा ।
हिमावती पीतदुग्धा रेचनी पट्टपर्णिका ॥ १ ॥
तद्दुग्धं हेमकट्कुष्ठं पुलकं रेचनं तथा ।
तेजोवती बहुरसा कनकप्रभाऽन्या
तीक्ष्णाग्निगर्भा सुरवल्लरी च ॥ २ ॥
हिमजा कटुका तिक्ता रेचनी सर्ववातनुत् ।
कृमिशोषो(फो)दरघ्नी च पित्तज्वरहरा तु सा ॥ ३

२. कारवी ।

कारवी कारवल्ली च कषायोष्णा कफापहा ।
कासश्वासहरा बल्या ज्ञेया रसनियामिका ॥ ४ ॥

३. कटुतुंबी।

कटुतुंबी कटुफला राजपुत्री महत्फला ।
कटुतुंबी कटुस्तिक्ता वान्तिकृच्छ्वासवान्तिजित् ॥ ५ ॥
कासघ्नी शोधनी शोफव्रणशूलविषापहा ।
तिक्ततुम्बी तु तिक्ता स्यात्कटुका कटुतुम्बिका ॥ ६ ॥
तुम्बी च कटुतिक्तादितुम्बीपर्यायगा स्मृता ।

४. ज्योतिष्मती।

ज्योतिष्मती नाम लताऽनलप्रभा
ज्योतिर्लता सा कटभी सुपिङ्गला ।
दीप्या च मेध्या मतिदा च दुर्जरा
सारस्वती स्यादमृतार्कसंज्ञया ॥ ७ ॥

५ लिङ्गिनी।

लिङ्गिनी बहुपुत्री स्यादीश्वरी शैववल्लरी ॥ ८ ॥
स्वयंभूर्लिङ्गसम्भूता लैङ्गी चित्रफलान्विता ।
अयस्तम्भकरी लिङ्गबीजा च शिववल्लरी ॥ ९ ॥
लिङ्गिनी कटुरूक्षा च दुर्गन्धा च रसायनी ।
सर्वसिद्धिकरी दिव्या रसराजनियामिका ॥ १० ॥

६. पातालगरुडी।

पातालगरुडी तार्क्षी सौवर्णी गरुडी तथा ।
वत्सादनी दीर्घकाण्डा दृढकाण्डा महाबला ॥ ११ ॥
दीर्घवल्ली दृढलता दर्शनामानि पार्वति ! ।
सर्वभयकरी सैषा सर्पादिविषनाशनी ॥ १२ ॥

७. गिरिकर्णी ।

गिरिकर्णी च कटभी गर्दभी दधिपुष्पिका ।
सितपुष्पी विषघ्नी च श्वेताश्वखुरपुष्पिका ॥ १३ ॥

गिरिकर्णी हिमा तिक्ता पित्तोपद्रवनाशिनी ।
चक्षुष्या विषदोषघ्नी त्रिदोषशमनी च सा ॥ १४ ॥

नीलपुष्पा महानीला स्यान्नीलगिरिकर्णिका ।
नीलाद्रिकर्णी शिशिरा सतिक्ता
रक्तातिसारज्वरदाहहन्त्री ।
प्रतर्दिकोन्मादमदश्रमार्ति-
श्वासार्तिहा स्याद्विषहारिणी च ॥ १५ ॥

८. आखुकर्णी ।

आखुकर्णी भूमिचरा द्रवन्ती बहुपादिका ॥ १६ ॥

सुतश्रेणी द्रवन्ती च न्यग्रोधा माक्षिकाह्वया ।
चित्रा मूषकपुच्छी च प्रत्यक्श्रेणी च शंबरी ॥ १७ ॥

सुतश्रेणी च चक्षुष्या कटुकाऽऽखुविषापहा ।
व्रणदोषहरा चैव नेत्रामयविनाशिनी ॥ १८ ॥

कृष्णिका बहुपर्णी च प्रत्यक्श्रेणी च शंबरी ।
पूतिपर्णी शिवा चाखुकर्णवत्पर्व(र्ण)शालिनी॥ १९ ॥

आखुकर्णी कटुष्णा च कफपित्तहरा सरा ।
आनाहशूलजूत्यर्तिनाशनी पाचनी परा ॥ २० ॥

९. वाराही ।

वाराही स्यात्सूकरी क्रोडकन्या
गृष्टिर्विष्वक्सेनकान्ता कुमारी ।

कौमारी स्याद्भूमपत्री त्रिनेला
क्रौडीकन्या गृष्टिका माधवेष्टा ॥ २१ ॥

वाराही तिक्तकटुका विषपित्तकफापहा ।
कुष्ठमेहकृमिहरा वृष्या बल्या रसायनी ॥ २२ ॥

१०. देवदाली ।

देवदाली त्रिधा प्रोक्ता श्वेता कृष्णा च पीतला ।
सा श्वेता व्याधिशमनी कृष्णा पीता रसायने ॥२३॥

देवदाली कोशफला दाली लोमशपत्रिका ।
कृष्णबीजा कटुफला वृत्तकोशाऽम्लवल्लरी ॥ २४ ॥

जीमूत कण्टकफला वेणी चाक्षुषापहा ।
तुरङ्गिका जालफला गरारिस्सारमूषिका ॥ २५ ॥

देवदाली तु तीक्ष्णोष्णा कटु पाण्डुकफापहा ।
दुर्नामश्वासकासघ्नी कामिलाऽर्तिकापहा ॥ २६ ॥

सर्वलोहद्रुतिकरा पीनसाहिविषापहा ।

११. ऐन्द्री ।

ऐन्द्रीन्द्रवारुण्यरुणा मृगादिनी
गवादनी क्षुद्रसहेन्द्रचिर्भटा ।
सूर्या विषघ्नी रु(गु)णकर्णिकाऽमरा
सुपर्णिका स्यात्फलतारका च ॥ २७ ॥

हरिताक्षी महाक्षी च पीतपुष्पेन्द्रवल्लरी ॥ २८ ॥

हेमपुष्पी क्षुद्रफला वारुणी बालकप्रिया ।
रक्तोर्वारुर्विषलता चक्रवल्ली विषापहा ॥ २९ ॥

अमृता च विशाला च जेयोनिश्शदाह्वया ।

इन्द्रवारुणिका तिक्ता कटुश्शीता च रेचनी ॥ ३० ॥
गुल्मपित्तोदरश्लेष्मकृमिकुष्ठज्वरापहा ।
महेन्द्रवारुणी रम्या चक्रवल्ली महाफला ॥ ३१ ॥
सा महेन्द्री वृत्तफला त्रपुसी त्रपुसा तथा ।
आत्मरक्षा विशाला च दीर्घवल्ली महाफला ॥ ३२ ॥
स्याद्बृहद्वारुणी सौम्या नामान्यस्याश्चतुर्दश ।
माहेन्द्रवारुणी ज्ञेया पूर्वोक्ता गुणवाहिनी ॥ ३३ ॥
रसे वीर्ये विपाके च किञ्चिदेषा गुणाधिका ।

१२. गोजिह्वा ।

गोजिह्वा क्षुरपत्री स्यादधोपुष्पा त्वधोमुखी ॥ ३४ ॥
गोजिह्वा कटुका तीव्रा शीतला पित्तनाशिनी ।
व्रणप्रशमनी चैव ससदन्तविषापनुत् ॥ ३५ ॥

१३ काकतुण्डी ।

काकतुण्डी काकनासा काकसिंही च रक्तला ।
काकदन्ती काकपीलुर्वृत्तरक्तफला तथा ॥ ३६ ॥
काकप्राणा वल्कशल्या कृष्णबीजा च रञ्जकी ।
काकतुण्डी च मधुरा शिशिरा पित्तहारिणी ॥ ३७ ॥
रसायनी दार्ढ्यकरी विशेषात्पलितापहा ।

१४. रक्तपादी ।

रक्तपादी शमीपत्रपत्रा खदिरपत्रिका ॥ ३८ ॥
सङ्कोचनी समङ्गा च नमस्कारी प्रसारणी ।
लज्जालुस्ससपर्णी स्यात्खदिरी मण्डमालिका ॥ ३९ ॥
रक्तमूला ताम्रमूला स्वगुप्ताञ्जलिकारिका ।

लज्जालुश्च कटुस्तीता पित्तातीसारनाशिनी ॥ ४०

शोकदाहज्वरश्वासव्रणकुष्ठकफार्तिनुत् ।
लज्जालुर्वैपरीत्याहुः कटुरुष्णः कफमनुत् ॥ ४१

रसे नियामकेऽत्यन्तं नानाविज्ञानकारकः ।

१५. पुनर्नवा ।

पुनर्नवा त्रिधा प्रोक्ता श्वेता रक्ता च मेचका ॥ ४२ ॥

पुनर्नवा विषहरा कठिल्ला नेत्ररोगहा ।
पृथ्वीका सितवर्षाभूर्दीर्घपत्रा सिताह्वया ॥ ४३ ॥

श्वेता पुनर्नवा सोष्णा तिक्ता कफविषापहा ।
कासहृद्रोगशूलास्रपाण्डुशोफानिलार्तिनुत् ॥ ४४ ॥

पुनर्नवाऽन्या रक्ताख्या कृतमण्डलपत्रिका ।
वैशाखी रक्तसर्वाङ्गा शोफघ्नी विषहा परा ॥ ४५ ॥

पुनर्नवो नवो नव्या प्रावृषेण्या च सारिणी ।
रक्ता पुनर्नवा तिक्ता सारणी शोफनाशिनी ॥ ४६ ॥

रक्तप्रदरदोषघ्नी पाण्डुपित्तप्रमर्दनी ।
श्यामाख्या नीलवर्षाभूर्दीर्घपत्रा पुनर्नवा ॥ ४७ ॥

नीला पुनर्नवा तिक्ता कटूष्णा च रसायनी ।
हृद्रोगपाण्डुश्वयथुश्वासवातकफापहा ॥ ४८ ॥

१६. अत्यम्लपर्णी ।

अत्यम्लपर्णी तीक्ष्णाम्ला कण्डूला वल्लिसारसा ।
वनस्याऽरण्यवासी च कन्दाढ्या कर्कशच्छदा ॥ ४९ ॥

अत्यम्लपर्णी तीक्ष्णाम्ला प्लीहशूलविनाशिनी ।
वातहृद्दीपनी रुच्या गुल्मश्लेष्मामयापहा ॥ ५० ॥

१७. कर्कोटकी ।

कार्कोटकी द्विधा वन्ध्या श्रेष्ठाऽन्या फलमारिणी ।
मृदुकण्टकिनी वृत्तफला सा वनवासिनी ॥ ५१ ॥

वन्ध्या देवी वन्ध्यकार्कोटकी स्या-
न्नागारातिर्नागहन्त्री मनोज्ञा ।
पथ्या दिव्या पुत्रदात्री त्रिकन्दा
श्रीकन्दा सा कन्दवल्ली विपघ्नी ॥ ५२ ॥

योगीश्वरी व्याघ्रपादी कन्या स्यात्षोडशाह्वया ।
वन्ध्या कर्कोटकी तिक्ता कटूष्णा च कफापहा ॥५३॥

स्थावरादिविपघ्नी स्याद्रसबन्धे रसायने ।

१८ शरपुङ्खा ।

शराभिधानपुङ्खा स्याच्छरपुङ्खीति कथ्यते ॥ ५४ ॥

शरपुङ्खी त्रिधा श्वेता रक्ता कृष्णा च कण्टका ।
श्वेताऽप्येषा गुणाऽऽढ्या स्यात्प्रयोगे च रसायने ॥

अन्या तु कण्टपुंखा स्यात्कण्टसायकपुंखिका ।
कण्टस्पृशेव कुण्डी कण्टकशरपुङ्खमूलनिर्यूहः ॥ ५६ ॥

तूर्णमजीर्णविषूचीमहापरतिक्रशानुकार्श्यं च ।
सर्वांश्च शरपुङ्खास्तु कटूष्णा. कफवातहाः ॥ ५७ ॥

अजीर्णशूलकृमिघ्ना ग्रहणीशमनाः परम् ।

१९ भृङ्गराजः ।

मार्कवो भृङ्गराजस्याद्भृङ्गाह्वः केशरञ्जकः ॥ ५८ ॥

पितृप्रियो ब्रह्मपत्री केश्य. कुन्तलवर्धनः ।
पीतोऽन्यः स्वर्णभृङ्गारो हरिवासो हरप्रियः ॥ ५९ ॥

नीलस्तु भृङ्गराजोऽन्यो महानीलस्तु नील्कः ।
महाभृङ्गो नीलपुष्पश्यामलस्तु पडाह्वयः ॥ ६० ॥

भृङ्गराजास्तु चक्षुष्यास्तिक्तोष्णाः केशरञ्जकाः ।
कफशोफविषघ्न्यश्च तत्र नीलो रसायनः ॥ ६१ ॥

२०. गुडूची ।

गुडूची द्विविधा प्रोक्ता कन्दाऽऽढ्या कन्दवर्जिता ।
पूर्वा श्रेष्ठा रसघ्नी सा ज्वलीपलितापहा ॥ ६२ ॥

अपरा व्याधिहारिणी तयोस्सामान्यलक्षणम् ।
कञ्चुकाढ्या स्निग्धपर्णी विशल्या मूरिवल्लरी ॥ ६३ ॥

कन्या कन्दगुडूची च पिण्डालुः कन्दरोहिणी ।
कन्दामृता बहुरुहा ज्ञेया पिण्डगुडूचिका ॥ ६४ ॥

कु(क)न्दोद्भवा गुडूची च कटुष्णा सन्निपातहा ।
ज्वरघ्नी विषभूतघ्नी वलीपलितनाशिनी ॥ ६५ ॥

छिन्नोद्भवा गुडूची स्यादकन्दाऽमृतवल्लरी ।

ज्ञेया गुडूचीद्वयमुष्णवीर्या
तिक्ता कषाया ज्वरनाशिनी च ।
दाहार्तितृष्णाविषरक्तवात-
प्रमेहपाण्डुभ्रमहारिणी च ॥ ६६ ॥

२१. मूर्वा ।

मूर्वा च द्विविधा प्रोक्ता महती च कनीयसी ॥ ६७ ।
मूर्वाऽमरा दिव्यलता गोकर्णी च त्रिकर्णिका ।
भिन्नच्छदा मधुरसा दाहनी दिव्यपर्णिका ॥ ६८ ॥
रक्तला गोपवल्ली च गुच्छपुष्पा पयस्विनी ।

मूर्वा तिक्ता कषायोष्णा हृद्रोगकफवातहृत् ॥ ६९ ॥
चर्मिमेहकुष्ठानि विषमज्वरनाशिनी ।
रसकर्मणि सा श्रेष्ठा गर्भघ्नी वर्तियोगतः ॥ ७० ॥

२२. शङ्खपुष्पी ।

शङ्खपुष्पी सुपुष्पी च शङ्खाह्वा कम्बुमालिनी ।
सितपुष्पी च भूलभा मेध्या वनविलासिनी ॥ ७१ ॥
शङ्खपुष्पी हिमा तिक्ता मेधाकृत्स्वरकारिणी ।
भूतग्रहादिदोषघ्नी वशीकरणसिद्धिदा ॥ ७२ ॥

२३. काकजङ्घा ।

काकजङ्घा वायसी च पारावतपदी तथा ।
काकजङ्घा तु तिक्तोष्णा कृमिव्रणकफापहा ॥ ७३ ॥
बाधिर्याजीर्णजीर्णादिविषमज्वरनाशिनी ।

२४ शतावरी ।

शतावरी शतपदी शताह्वा सूक्ष्मपत्रिका ॥ ७४ ॥
बहुमूला जटामूला तैलवल्ली च वैष्णवी ।
शखा च शतमूला च केशिका शतनेत्रिका ॥ ७५ ॥
महाशतावरी वीरा तुङ्गिनी बहुपत्रिका ।
सहस्रवीर्या सुरसा महापुरुषदन्तिका ॥ ७६ ॥
दग्ध(ऊर्ध्व)कणा(ण्टा)महावीर्या फणिजिह्वा महाशना ।
शतावरीद्वयं वृष्यं मधुरं पित्तजिद्भिमम् ॥ ७७ ॥
महती कफवातघ्नी तिक्ता श्रेष्ठा रसायनी ।

२५ गोक्षुरः ।

गोकण्टक, कण्टफलो गोक्षुरो व्यालदष्टक. ॥ ७८ ॥

त्रिकण्टकश्चेक्षुरक. श्वदंष्ट्रो बहुकण्टकः ।
वनशृङ्गाटकश्चैव स्थलशृङ्गाटकस्तथा ॥ ७९ ॥

स्वादुमौ गोक्षुरकौ सुशीतलौ
बलप्रदौ तौ मधुरौ च बृंहणौ ।
कृच्छ्राश्मरीमेहविदाहनाशनौ
रसायनौ तत्र बृहद्गुणोत्तरः ॥ ८० ॥

२६. काकमाची ।

काकमाची बहुफला वायस्यर्कफला च सा ।
काकमाता गुच्छफला स्वादुपाकरसायनी ॥ ८१

२७. आदित्यभक्ता ।

आदित्यभक्ता वरदा सूर्यकान्तार्कवल्लरी ।
आदित्यभक्ता शिशिरा सतिक्ता
कटुस्तथोष्मा कफहारिणी च ।
त्वग्दोषकण्डूव्रणकुष्ठभूत-
ग्रहौमशीतज्वरहारिणी च ॥ ८२ ॥

२८ नाकुली ।

नाकुली सर्पगन्धा च सुगन्धा रक्तपत्रिका ॥ ८
ईश्वरी नागगन्धा च बह्निपुत्रसखा च सा ।
अन्या महासुगन्धा च सुवहा गन्धनाकुली ॥
सर्पाक्षी फणिहन्त्री च नकुलोल्याऽरिवल्लरी ।
सर्पाक्षी सर्वरोगघ्नी पुत्रोत्पादकरी च सा ॥

२९. क्षीरकन्दः ।

क्षीरकन्दो द्विधा प्रोक्तो विनालस्तु सनालकः ।
विनालो रोगहन्ता स्याद्वयःस्तंभे सनालकः ॥ ८६ ॥
चतुर्वर्णं विषं तत्र रक्तकन्दं च शस्यते ।
भमात्तस्मात्सवेत्क्षीरं रक्तवर्णं सुशोभनम् ॥ ८७ ॥
मेघानां तु निनादेन सञ्जाते सुरशोभिते ! ।
स्नुहीपत्रसमै. पत्रैस्सप्तभिर्हेमसप्रभैः ॥ ८८ ॥
क्षीरकन्दस्तु सूतेन्द्रमारणे बन्धने हितः ।
गुल्मशोफोदरप्लीहनाशनस्तु विरेककृत् ॥ ८९ ॥

३०. सिन्दुवारः ।

सिन्दुवारश्श्वेतपुष्पस्सिद्धकश्चाभ्वसिद्धिदः ।
सुगन्धाऽन्या शितसहा निर्गुण्डी नीलसिन्दुकः ॥९०॥
इन्द्राणी सूतकेशी च नीलपुष्पा च नीलिका ।
सिन्दुवारः कटुस्तिक्तः कफवातक्षयापहः ॥ ९१ ॥
कुष्ठकण्डूतिशमनश्शूलहृद्देहसिद्धिद ।
कट्पणा नीलनिर्गुण्डी तिक्ता रूक्षा च कासजित् ॥
श्लेष्मशोफसमीरार्तिप्रदराध्मानहारिणी ।

३१. अरण्यकार्पासी ।

वनजाऽरण्यकार्पासी भारद्वाजी त्वयाभिधा ॥ ९३ ॥
भारद्वाजी हिमा रुच्या व्रणशस्त्रक्षतापहा ।
तृतीया रक्तका स्तन्या वातपित्तकफापहा ॥ ९४ ॥
तृष्णादाहश्रमभ्रान्तिमूर्च्छाहृद्बलकारिणी ।
तृतीया रक्तकार्पासी रक्तकार्पासकस्स्मृतः ॥ ९५ ॥

३२. कोकिलाक्षः ।

कोकिलाक्षश्रृङ्खली च शृङ्खलो वज्रकण्टक ।
कुसुम्भपत्रो वज्रास्थि तिलपुष्पस्तु शोफहा ॥ ९६ ॥

शृगालकण्ठी क्षुरक इक्षुर पविकण्टक ।
कोकिलाक्षस्तु मधुरदग्नीत पित्तातिसारजित् ॥ ९७ ॥
वृष्यश्शोफहरो वल्यो रुच्यस्सन्तर्पणः पर ।

३३. बृहती ।

महती बृहती सिंही वार्ताकी राष्ट्रकाकली ॥ ९८ ॥

तीक्ष्णकण्टकसर्वाङ्गा बहुपत्री च डोरली ।
भाण्डकी वनवृन्ताकी गुद्रसंख्याभिधानका ॥ ९९ ॥

बृहती कटुतिक्तोष्णा वातजिज्ज्वरहारिणी ।
अरोचकामकासघ्नी श्वासहृद्रोगनाशिनी ॥ १०० ॥

पुत्रदा श्वेतबृहती श्वेतपुष्पफला शुभा ।
विज्ञेया श्वेतबृहती वातश्लेष्मविनाशिनी ॥ १०१ ॥

रुच्या चाञ्जनयोगे च नानानेत्रामयापहा ।
युक्ता द्रव्यविशेषेण पारदस्तम्भसिद्धिदा ॥ १०२ ॥

३४. कण्टकारी ।

कण्टकारी कण्टकिनी दुःस्पर्शा च निदिग्धिका ।
क्षुद्रा व्याघ्री चित्रफला ज्ञेया सर्वाङ्गकण्टका ॥१०३॥

कण्टकारी कटुस्तिक्ता दीपनी श्वासकासजित् ।
प्रतिश्यायत्रिदोषघ्नी कफवातज्वरार्तिनुत् ॥ १०४ ॥
चक्षुष्या दीपनी पुत्रप्रदा रसनियामिका ।

३५. गुञ्जा ।

गुञ्जा च द्विविधा प्रोक्ता श्वेता रक्ता च कृष्णला ॥
गुञ्जा चूडामणिस्सेवा शिखण्डी कृष्णलाऽरुणा ।
कृष्णचूडा रक्तिका च कांभोजी भिल्लभूषणा ॥ १०६ ॥
गुञ्जात्रयं तु तिक्तोष्णं वान्तिकृद्रेचनी शिवा ।
शूलघ्नं विषहृत्पत्रं तत्तैलं सर्वकुष्ठजित् ॥ १०७ ॥
द्रावणे सर्वलोहानां रक्ता पण्ये सिताऽपरा ।

३६. वृद्धदारकः ।

वृद्धदारुक आवेगी जुङ्गको दीर्घवालुकः ॥ १०८ ॥
वृद्ध. कोटरपुष्पी स्यादजान्त्री क्षगलान्त्रिका ।
जीर्णदारु द्वितीयं स्याज्जीर्णभङ्गी सुपुष्पिका ॥१०९॥
अजरा सूक्ष्मपर्णी च विज्ञेया च पटाह्वया ।
वृद्धदारुद्वयं गौल्यं पिच्छिलं कफवातहृत् ॥ ११० ॥
बल्यं कासामदोषघ्नं द्वितीयं स्वल्पवीर्यदम् ।

३७. वाकुची ।

वाकुची सोमराजी च शशिरेखा च कुष्ठहा ॥ १११ ॥
कांभोजी पूतिगन्धा च कालमेषी तथैन्दवी ।
वाकुची कटुतिक्तोष्णा कृमिकुष्ठकफापहा ॥ ११२ ॥
त्वग्दोषविषकण्डूतिखर्जूप्रशमनी च सा ।

३८. अपामार्गः ।

अपामार्गश्शेखरिको मर्कटी दुरभिग्रह. ॥ ११३ ॥
खरमञ्जरिका नन्दी खञ्जो मर्कटपिप्पली ।
अवाक्पुष्पी च वशिरः क्षवकः षड्क्तिकण्टकः ॥११४॥

अपामार्गस्तु तिक्तोष्ण कटुश्च कफनाशन ।
अर्शः कण्डूदरामघ्नो रक्तहृद्ग्राहि वान्तिकृत् ॥ ११५ ॥

रक्तापामार्गक पीत कटुक कफवातनुत् ।
व्रणकण्डूविषघ्नश्च सङ्ग्राही वान्तिकृत्सर ॥ ११६ ॥

३९. प्रपुन्नाट ।

प्रपुन्नाटश्चक्रमर्दो दद्रुघ्नश्च कुलादन ।
व्यावर्तकश्चैडगज खर्नृघ्नो दृढबीजक ॥ ११७ ॥

चक्रमर्द कटुस्तीक्ष्णो मेदोवातकफापह ।
व्रणकण्डूत्तिकुष्ठार्तिदद्रुपामादिदोषनुत् ॥ ११८ ॥

४०. विषमुष्टि ।

विषमुष्टि केशमुष्टिस्सुमुष्टी रणभूषिका ।
विषमुष्टि कटुस्तिक्तो दीपन कफवातहृत् ॥ १२० ॥
कण्ठामयहरो रुच्यो रक्तपित्तार्तिदाहनुत् ।

४१ काण्डीरः ।

काण्डीर काण्डकटुको नाम(सा)सवेदन पटु ॥१२१॥
उग्रकाण्डस्तोयवल्ली कारवल्ली सुकाण्डक ।
काण्डीर कटुतिक्तोष्ण सरदुष्टव्रणार्तिनुत् ॥ १२२ ॥
प्लीहागुल्मोदरश्लीहशूलमन्दाग्निनाशन ।

४२ हस्तिकन्द ।

हस्तिकन्दो हस्तिपद स्थूलकन्दोऽतिकन्दक ॥१२३॥
बृहत्पत्रोऽतिपत्रश्च हस्तिकर्णस्सुकर्णिक ।
वल्दोपरि कुष्ठघ्ना गिरिवासी नगाश्रय ॥ १२४ ॥

हस्तिकन्द कटूष्णस्यात्कफवातामयापह ।

४३ समुद्रशोषी ।

समुद्रशोषी च महालता च
महाबला धूसरपत्रिका च ।
स्यात्कामवृद्धिस्मरवृद्धिसञ्ज्ञ
कन्दर्पजीवी च जितेन्द्रिया च ॥ १२५ ॥

कामवृद्धेस्तु बीज स्यान्मधुरं बलवर्धनम् ॥ १२६ ॥
कामवृद्धिकरं रुच्य बहलेन्द्रियवृद्धिदम् ।

४४ गोरक्षदुग्धी ।

गोरक्षदुग्धी गोरक्षी ताम्रदुग्धी रसायनी ॥ १२७ ॥
तिलक्षीरिणिका धन्या बहुपला तिलाकिता ।
गोरक्षदुग्धी मधुरा वृष्या च ग्राहिणी हिमा ॥१२८॥
सर्ववश्यकरी चैव व्रणसिद्धिगुणप्रदा ।

४५. भूपाटली ।

भूपाटली च कुम्भी च भूनाली रक्तपुष्पिका ॥१२९॥
भूपाटला कटूष्णा च पारदे सुप्रयोजिता ।

४६—५३. अष्टवर्गः

द्विमेदोभयकाकोली वृक्ष्यद्विर्जीवकर्षभम् ॥ १३० ॥
अष्टवर्गमिद वातपित्तजिद्बृंहण परम् ।
नग्नत्वन्दृष्टिकर्णाघ्रिघ्राणजिह्वाङ्गुलीनिमा ॥ १३१ ॥
समूलाश्च सतूलाश्च दुर्गन्धाश्चाष्टवर्गकाः ।

[मेदा।]

मेदा वसा मणिश्छिद्रा जीवनी शल्यपर्णिका ॥१३२॥
मेदस्सारा स्नेहवर्ती नखी पुरुषदन्तिका।
मेदा तु मधुरा शीता पित्तदाहार्तिकासनुत् ॥ १३३ ॥

[महामेदा।]

महामेदा वसुश्छिद्रा जीवनीया च रागिणी।
देवेष्टयसुरमेदा च दिव्या स्वयूपिणी तथा ॥ १३४ ॥
देवगन्धा देवमणिर्वृक्षहारि(रु)द्रसम्मिता।
महामेदा हिमा रुच्या कफशुक्रविवर्धनी ॥ १३५ ॥

[काकोली।]

काकोली दीर्घसदृशा क्षीरशुक्रा च मेदुरा।
कालिका च वयस्था च जीवनी च नवाह्वया ॥१३६॥
काकोली शीतमधुरा क्षयपित्तानिलार्तिनुत्।
रक्तदाहज्वरघ्नी च कफशुक्रविवर्धनी ॥ १३७ ॥

[क्षीरकाकोली।]

द्वितीया क्षीरकाकोली क्षीरशुक्रा पयस्विनी।
वयस्था कर्णसदृशा क्षीरवल्ली विषाणिका ॥ १३८ ॥
रसवीर्यविपाकेषु काकोलीसदृशा च सा।

[वृद्धिः ऋद्धिश्च।]

वृद्धिस्तुष्टिः पुष्टिदा तुष्टिदात्री
मङ्गल्या स्यादग्निरूपा च भद्रा।
ऋद्धिस्सिद्धिः प्राणदा जीवदात्री
प्राणाकारा चेतनीया रथाङ्गी ॥ १३९ ॥

वृद्धिर्ऋद्धिश्च मधुरा सुस्निग्धा रक्तदा हिमा ॥१४०॥
रुचिमेधाकरी श्लेष्मकुष्ठकृमिहरा परा ।

[जीवकः ।]

जीवको जीवनो जीव्यः प्राणदश्चिरजीविकः ॥१४१॥
ह्रस्वाङ्गः कूर्चशीर्षश्च जिह्वाकारः सुमङ्गलः ।
जीवको मधुरश्शीतो रक्तपित्तानिलार्तिहृत् ॥ १४२ ॥
दाहज्वरक्षयं हन्ति शुक्रश्लेष्मविवर्धनः ।

[ऋषभः ।]

गोपतेस्तु यथा नाम ऋषभश्चाङ्गुलीनिभः ॥ १४३ ॥
ओषधी वनवासी च दुर्गन्धः प्राणदश्शुभः ।
जीवके ये गुणास्सन्ति ते गुणास्सन्ति गोपतेः ॥

५४. आदित्यपुत्रः ।

आदित्यपुत्रः कुष्ठानि सुपुत्रश्चार्कपत्रक ।

आदित्यपुत्रः कटुरुष्णवीर्यः
कफापहा वातरुजापहश्च ।
सन्दीपको जाठरगुल्महारी
ज्ञेयस्स चारोचकनाशनश्च ॥ १४५ ॥

५५. हस्तिकर्णी ।

हस्तिकर्णी हस्तिकर्णच्छदनो दीर्घकन्दकः ॥ १४६ ॥
बृहन्नालो दण्डपुष्पः कण्डूलोद्यानभूषणः ।
हस्तिकर्णी प्लीहगुल्मशोफज्वरविनाशनः ॥ १४७ ॥

५६. कपिकच्छूः ।

कपिकच्छूरात्मगुप्ता मर्कटी शूकशिम्बिका ।

कपिरोमफला चण्डा दु.स्पर्शा दूरविग्रहा ॥ १४८ ॥
कच्छूरदशूकशिंची च शिंबिबीजी महाफलां ।
कपिकच्छूस्वादुरसा वृष्या वातक्षयापहा ॥ १४९ ॥
शीतपित्तास्रहन्त्री च विकृतव्रणनाशनी ।

५७. कर्णस्फोटा ।

कर्णस्फोटा कटुस्तिक्ता हिमा सर्वविषापहा ॥ १५० ॥
ग्रहभूतादिदोषघ्नी सर्वव्याधिनिकृन्तनी ।

५८. रुद्रजटा ।

रुद्रा रुद्रजटा सौम्या सुगन्धा सुवहा घना ॥ १५१ ॥
पत्रवल्ली जटावल्ली रुद्राणी पिङ्गला जटा ।
जटा कटुरसा श्वासकासहृद्रोगनाशनी ॥ १५२ ॥
भूतविद्रावणी चैव रक्षसां च निबर्हणी ।

५९. नीलिका ।

नीलिका भृङ्गवल्ली स्यान्नीलिपुष्पी च रञ्जनी ॥१५३॥
कालिका द्वारवाही च रक्तपुष्पी महाफला ।
नीली कटुकतिक्तोष्णा केश्या कासकफापनुत् ॥१५४॥
गण्डूपोदरव्याधिगुल्मागन्तुज्वरापहा ।
अन्या चैव महानीली अमला राजनीलिका ॥ १५५॥
महानीली गुणाढ्या स्याद्वल्लश्रेष्ठा सुवीर्यदा ।

६०. कोशातकी ।

कोशातकी कृतच्छिद्रा जालिनी कृतवेधनी ॥ १५६ ॥
पोटा(ट्वेडा)घुतिक्ता घण्टाली मृदङ्गफलिनी तथा ।

कर्कशच्छदना पीतपुष्पा बहुवितानका ॥ १५७ ॥
कोशातकी तु शिशिरा कटुकाऽल्पकषायका ।
वातपित्तकफघ्नी च मलाध्मानविनाशिनी ॥ १५८ ।
दुर्नामविषभूतघ्नी श्वासकासहरा शुभा ।
तिक्तकोशातकी पीतपुष्पा धूसरपत्रिका ॥ १५९ ॥
कटुकोशातकी तिक्ता दुर्नामविषभूतहा ।
पीनसश्वासकासार्शोव्रणादिव्रणनाशिनी ॥ १६० ॥

६१. जीवन्ती ।

जीवन्ती स्याज्जीवनी जीवनीया
जीवा जीव्या जीवदा जीवदानी ।
शाकश्रेष्ठा जीवभद्रा च भद्रा
मङ्गल्या च क्षुद्रजीवा यशस्या ॥ १६१ ॥
सुजीवन्ती बृहत्पूर्वा पत्रभद्रा प्रियङ्करी ।
मधुरी जीववृक्षश्च ब्रह्मजन्मा यशस्करी ॥ १६२ ॥
जीवन्ती मधुरा शीता रक्तपित्तानिलापहा ।
क्षयदाहज्वरान्हन्ति कफवीर्यविवर्धनी ॥ १६३ ॥
एवमेव महत्पूर्वा जीवन्ती बहुवीर्यदा ।
सूतविद्राविणी ज्ञेया वेगाद्रसनियामिका ॥ १६४ ॥
हेम हैमवती सौम्या तृणगन्धा हिमप्रिया ।
स्वर्णवन्ती सुजीवन्ती स्वर्णजीवा सुवर्णिका ॥ १६५ ॥
हेमपुष्पा स्वर्णलता स्वर्णजीवन्तिका च सा ।
स्वर्णजीवन्तिका वृष्या त्रिदुष्या मधुरा तथा ॥ १६६ ॥
शिशिरा वातपित्तासदाहज्जिह्वल्यवर्धनी ।

६२. जतुका ।

जतुका जन्तुकारी च जीमूता चक्रवर्तिनी ॥ १६७ ॥
तिर्यक्फला विषा(निशा)न्धा च बहुपत्रा सुपत्रिका ।
राजकृष्णा दिनेष्टा च कपिकच्छुफलोपमा ॥ १६८ ॥
राजनी सूक्ष्मवल्ली च भ्रमरी कृष्णवल्लिका ।
तरुवल्ली दिव्यफला विज्ञेया षोडशाभिधा ॥ १६९ ॥

जतुका शिशिरा पित्तरक्तपित्तकफापहा ।
दाहतृष्णावमिघ्नी च रुचिकृद्दीपनी परा ॥ १७० ॥

६३. मुण्डी ।

श्वेता रक्ता च पीता च कृष्णा मुण्डी चतुर्विधा ।
सावर्णी स्यन्मुण्डिनिका भिक्षुः श्रवणशीर्षिक. ॥१७१॥
श्रावणी च मजविका परिव्राजी तपोधना ।
स्रावणी तु कषाया स्यात्कटूष्णा कफपित्तनुत् ॥१७२॥
अर्शोविकारकासघ्नी विषच्छर्दिविनाशिनी ।
महास्रावणिकाऽन्या स्यान्महामुण्डी च लोचनी ॥१७३॥

कदंबपुष्पी विकचाऽलंबुषा लोहिनी तथा ।
महामुण्डी च तिक्तोष्णा ईषद्गौल्या मरुच्छदा ॥
स्वरकृद्रेचनी चैव मेहकृच्च रसायनी ।

६४. विष्णुक्रान्ता ।

विष्णुक्रान्ता नीलपुष्पा नीलक्रान्ताऽपराजिता ॥१७५॥
विष्णुक्रान्ता कटुस्तिक्ता कफवातामयापहा ।

६५. कुमारी ।

नदीतीरेऽथवा ग्रामे नगरेऽद्रितटेऽथवा ॥ १७६ ॥

मृदुकण्टकपत्राणि पीतान्यहिसमानि च ।
शवालसमपुष्पाणि सक्लेदहरितानि च ॥ १७७ ॥

यस्या पत्राणि तिष्ठन्ति सा कुमारीति कथ्यते ।
गृहकन्या कुमारी च दीर्घपत्रा जरामरा ॥ १७८ ॥

गृहकन्या हिमा तिक्ता मदगन्धिः कफापहा ।
पित्तकासविषश्वासकुष्ठघ्नी च रसायनी ॥ १७९ ॥

६६. भूम्यामली ।

भूम्यामली तमाली च भूधात्री दृढपादिका ।
भूधात्री तु कषायाम्ला पित्तमेहविनाशिनी ॥ १८० ॥

शिशिरा मूत्ररोगार्तिशमनी विषनाशिनी ।

६७. बर्हिचूडा ।

बर्हिचूडा शिखिशिखा मयूराद्याभिधा शिखा ॥१८१॥

बर्हिचूडा शिखा स्वादुर्मूलकृच्छ्रविनाशिनी ।
बालग्रहादिशोफघ्नी विषकर्मणि शस्यते ॥ १८२ ॥

६८. ब्राह्मी ।

ब्रह्मा सरस्वती सौम्या सुरश्रेष्ठा सुवर्चला ।
कपोतवेगा वैधात्री दिव्यतेजा महौषधी ॥ १८३ ॥

स्वायंभुवी सोमलता सुरेज्या गृहकन्यका ।
मण्डूकी सुरसा मेध्या विज्ञेया षोडशाह्वया ॥ १८४ ॥

ब्राह्मी हिमा कषाया च तिक्ता वातास्रपित्तजित् ।
बुद्धिं मेधां च प्रज्ञां च कुर्यादायुष्यवर्धनी ॥ १८५ ॥

ब्राह्मी तु सूक्ष्मपत्राऽन्या लघुब्राह्मी जलोद्भवा ।
ब्राह्मी तिक्ता गदोष्णा च रसो वातामशोफहा ॥१८६

६९. तण्डुलीयकः ।

तण्डुलीयस्तु भण्डीरो ग्रन्थिलो बहुवीर्यकः ।
मेघनादस्सुशाकश्च पण्यशाकश्च सप्तधा ॥ १८७ ॥

तण्डुलीयस्तु शिशिरो मधुरो विषनाशनः ।
रुचिकृद्दीपनः पथ्यः पित्तदाहश्रमापहः ॥ १८८ ॥

७०. पाषाणभेदनः ।

पाषाणभेदनोऽश्मघ्नो नगजिच्छैलगर्भजः ।
पाषाणभेदी मधुरस्तिक्तो वातविनाशनः ॥ १८९ ॥
सदाहमूत्रकृच्छ्रघ्नो शीतलश्चाश्मरीहरः ।

७१. हस्तिशुण्डी ।

हस्तिशुण्डी नागशुण्डी शुण्डी धूसरपत्रिका ॥ १९० ॥
हस्तिशुण्डी कषाया स्यात्सन्निपातज्वरापहा ।

७२. क्षुद्राम्लिका ।

क्षुद्राम्लिका तु शाङ्गेरी चुक्राम्ला चुक्रिका च सा ॥
क्षुद्राम्ली च रसे चाम्ला सोष्णा वह्निप्रवर्धनी ।
रुचिकृद्ग्रहणी दोषदुर्नामघ्नी कफापहा ॥ १९२ ॥

७३. ब्रह्मदण्डी ।

ब्रह्मदण्ड्यजदण्डी च कण्टफलफला च सा ।
ब्रह्मदण्डी कटूष्णा स्यात्कफशोफानिलापहा ॥ १९३ ॥

७४. ताली ।

ताली तमाली ताम्रा च ताम्रवल्ली तमालिका ।
सूक्ष्मवल्ली सुलोमा च शोधनी तालिका नव ॥१९४॥

ताम्रवल्ली कषाया स्यात्कफदोषविनाशनी ।
मुखकर्णाऽऽस्यरोगघ्नी श्लेष्मशुद्धिकरा परा ॥१९५॥

७५. खवल्ली ।

खवल्ली वासवल्ली स्यादुदुम्पर्शा व्योमवल्लरी ।
आकाशनामपूर्वा स्याद्वल्लिपर्यायगा स्मृता ॥ १९६ ॥

आकाशवल्ली कटुका मधुरा पित्तनाशनी ।
वृष्या रसायनी बल्या दिव्यौषधिवरा स्मृता ॥१९७॥

७६. सहदेवी ।

सहदेवी देवसहा देवी दण्डोत्पलाह्वया ।
सहदेवी ज्वरहरा रक्तपित्तप्रसादनी ॥ १९८ ॥

७७. लक्ष्मणा ।

लक्ष्मणा पुत्रिकन्दा च पुत्रदा नागिनी तथा ।
नागाह्वा नागपर्णी च कुलिनी मल्लिका च सा ॥

अस्रबिन्दुच्छदा चैव पुंस्कन्धा दशदाह्वया ।
वृष्या रसायनी बल्या नारीबन्धविनाशिनी ॥ २०० ॥

७८. भूकदम्बः ।

भूकदंबस्त्रिधा प्रोक्तश्वेतो रक्तश्च मेचकः ।
कदम्बपत्रवत्पत्रः पञ्चषड्दलसंयुतः ॥ २०१ ॥

भूलग्नश्च जटामध्ये तिक्तसूक्ष्मैकदण्डकः ।
भूकदंब इति प्रोक्तः सूक्ष्मगन्धोग्रगन्धवान् ॥ २०२ ॥

मूकदम्बोऽहिविषहा वीर्यवृद्धिकरः परः ।

७९. तैलकन्दः ।

अथ तैलकन्द उक्तो

द्रावकन्दस्तिलांकितदलश्च ।

करवीरकन्दसंज्ञो

लोहद्रावी विषापहारी च ॥ २०३ ॥

अश्वारिपत्रसङ्काशस्तिलबिन्दुसमन्वितः ॥ २०४ ॥

सस्निग्धा चैव भूमिश्च तैलकन्दो हि विश्रुतः ।

शोफापस्मारहा सूतबन्धनो देहसिद्धिदः ॥ २०५ ॥

८०. विष्णुकन्दः ।

विष्णुकन्दो विष्णुगुप्तस्सुपुटो बहुसंपुटः ।

जलवासी बृहत्कन्दो दीर्घपत्रो हरिप्रियः ॥ २०६ ॥

सर्पादिविषहारी स्याद्रसबन्धकरो हिताः ।

८१. त्रिकर्णिका ।

त्रिकर्णिका बृहत्पत्रा छत्रग्रन्थिनिका च सा ॥२०७॥

विश्वगन्धा कीटमारी हंसांघ्रिस्सूतरञ्जनी ।

८२. नागदन्ती ।

नागदन्ती श्वेतकणा मधुपुष्पा विशोधनी ॥ २०८ ॥

नागस्फोटा विशालाक्षी नागच्छत्री विचक्षणा ।

सर्पपुष्पी शुक्लपुष्पी स्वादुका सा च दन्तिका ॥

नागदन्ती कटुस्तिक्ता रूक्षा वातकफापहा ।

मेधाकृद्विषदोषघ्नी भावि(पाच)नी शुभदायिका ॥

८३. द्रोणपुष्पी ।

द्रोणपुष्पी दीर्घपत्रा चित्रपत्रा कुतुम्बिका ।
द्रोणपुष्पी कटुस्सोष्णा रुच्या वातकफापहा ॥ २११ ॥

अग्निमान्द्यहरा चैव पथ्या वातापहारिणी ।
अन्या चैव महाद्रोणी कुतुम्बादेव पूर्वकः ॥ २१२ ॥

दिव्यपुष्पी महाद्रोणी देवी काञ्जी षडाह्वया ।
देवद्रोणी कटुस्तिक्ता मेध्या वातार्तिभूतनुत् ॥२१३॥

कफवृद्ध्यपहा चैव युक्त्या पारदशोधनी ।

८४ अमृतस्रवा ।

ज्ञेयाऽमृतस्रवा वृक्षरुहाख्या तोयवल्लिका ॥ २१४ ॥

घनवल्ली सितलता नामभिश्शरसम्मिता ।
उक्ताऽमृतस्रवा पथ्या ईषत्तिक्ता रसायनी ॥ २१५ ॥

विषघ्नी व्रणकुष्ठामकामिलाश्वयथूञ्जयेत् ।

८५. पुत्रदात्री ।

पुत्रदात्री तु वातारिर्भ्रमरी श्वेतपुष्पिका ॥ २१६ ॥

वृत्तपत्रा तु गन्धाढ्यवेंशी जाता सुवल्लिनी ।
पुत्रदात्री तु वातघ्नी कटुरूक्षा कफापहा ॥ २१७ ॥

सुरभि सर्वदा पथ्या वन्ध्यादोषविनाशनी ।

८६. शाल्मलीकन्दः ।

शाल्मलीकन्दकश्चाऽथ विजुलो वनवासकः ॥ २१८ ॥

वनवासी मलघ्नश्च मलहन्ता षडाह्वयः ।
मधुरः शाल्मलीकन्दो मलसङ्ग्रहरोगजित् ॥ २१९ ॥

शिशिरः पित्तदाहार्तिशोषसन्तापनाशनः ।

८७. आवर्तकी ।

आवर्तकी तिन्दुकिनी विभाण्डी
विषाणिका रङ्गलता मनोज्ञा ।
सा रक्तपुष्पी महदादिजाली
सा पीतकीलाऽपि च पीतरङ्गा ॥ २२० ॥
वामावर्ता च संप्रोक्ता रुद्रसंख्याऽभिधानका ॥ २२१ ।
आवर्तकी कषायाम्ला शीतला पित्तनाशिनी ।

८८. अम्लपत्री ।

अम्लपत्री दीर्घपत्री रसाम्ला चाम्लिका रसा ॥२२२॥
आम्रातकी काञ्जिका च पर्णवल्ली पलाशिका ।
पलाशी वल्लपत्री च दीर्घवल्ली विषादनी ॥ २२३ ॥
सरपत्री सुवर्णी च स्याच्चतुर्दशाभिधा ।
अरोचकहरा पथ्या पित्तकोपकरी च सा ॥ २२४ ॥

अष्टाशीतिमहौषधीनां नामसङ्ग्रहणम् ॥

हिमजा कारवी चैव कटुतिक्तादितुंबिका ।
ज्योतिष्मती लिङ्गिनी च पातालगरुडी खरी ॥ २२५ ॥
आखुकर्णी नीलपुष्पी वाराही देवदालिका ।
इन्द्रवारुणिका चैव हेन्द्रवारुणिका तथा ॥ २२६ ॥
गोजिह्वा काकतुण्डी च लज्जालुश्च पुनर्नवा ।
अम्लवल्ली वन्ध्या च शरपुंखी च भृङ्गराट् ॥ २२७ ।
गुडूची चाय मूर्वा च काकजङ्घा शतावरी ।

गोक्षुर. काकमाची चादित्यभक्ता च नाकुली ॥२२८॥

क्षीरकन्दस्तु निर्गुण्डी कार्पासी कोकिलाक्षकः ।
बृहती क्षुद्रिका गुञ्जा वृद्धदारुश्च बाकुची ॥ २२९ ॥

अपामार्गश्चक्रमर्दो विषमुष्ट्यबुवल्लरी ।
हस्तिकन्दश्चाग्निशोषी गोरक्षी भूमिपाटली ॥ २३० ॥

अष्टवर्गश्चार्कपुत्री हस्तिकर्ण्यग्निवल्लरी ।
कर्णस्फोटा रुद्रजटा नीली कोशातकी तथा ॥ २३१ ॥

जीवन्ती जतुका मुण्डी विष्णुकान्ता कुमारिका ।
भूम्यामलकी बर्हिचूडा ब्राह्मी स्यात्पङ्कुलीयक ॥२३२॥

पाषाणभिद्धस्तिशुण्डी शार्ङ्गेरी ब्रह्मदण्डिका ।
ताम्रवल्ली खवल्ली च सहदेवी च लक्ष्मणा ॥२३३॥

भूकदम्बस्तैलकन्दो विष्णुकन्दस्त्रिकर्णिका ।
हसपादी नागदन्ती द्रोणपुष्प्यमृतस्रवा ॥ २३४ ॥

पुत्रदा शाल्मलीकन्द आवर्तन्यम्लपत्रिका ।
अष्टाशीतिमहौषध्यो रसकर्मणि पूजिता ॥ २३५ ॥

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ दशमोल्लासः ॥

॥ इति आनन्दकन्दः समाप्तः ॥

॥ परिशिष्टम् ॥

१. परिभाषाः[1] ॥

एसनियामिका ओषध्यः ।

सर्पाक्षी वह्नि(वन्ध्य)कर्कोटी कञ्चुकी जलबिन्दुना(जम्बुका) ।
शतावरी भृङ्गराजः शरपुङ्खा पुनर्नवा ॥ १ ॥

मण्डूकपर्णी मत्स्याक्षी ब्रह्मदण्डी शिखण्डिनी ।
अनन्ता काकजङ्घा च काकमाची कपोतिका ॥ २ ॥

विष्णुक्रान्ता सहचरा सहादेवी महाबला ।
बला नागबला कृष्णा चक्रमर्दः कुरु(लुर)क्षिणी ॥ ३ ॥

पाठा चामलकी नीली ज्वालिनी पद्मचारिणी ।
गोजिह्वा फणिजिह्वा च कोकिलाक्षो घनध्वनिः ॥ ४ ॥

आखुपर्णी त्रिपर्णी च द्विपर्णी चैकपर्णिका ।
तिन्तिडी क्षीरिणी रास्ना मेषशृङ्गी च कुक्कुटी ॥ ५ ॥

कृष्णपर्णी च तुलसी श्वेता च गिरिकर्णिका ।
एता नियामकौषध्यः पुष्पमूलदलान्विताः ॥ ६ ॥

दोलास्वेदः प्रकर्तव्यो मूलेनानेन सुव्रते ! ।

एसनिर्जीवकयं ओषध्यः[2] ।

चाण्डाली राक्षसी व्याघ्री खड्गारी गजकर्णिका ॥ ७ ॥

---

1. अस्मिन्परिशिष्टे एतद्ग्रन्थोद्धृतानां पारिभाषिकपदानां परिभाषोल्लासे यन्त्रादिवर्णनपर उल्लासे चान्याकृतानां विवरणं रसार्णव-रसरत्नसमुच्चय-रसहृदय-रसरत्नाकर-रसचूडामण्यादिभ्य उद्धृत्य दीयते ।

2. रसार्णवादुद्धृताः ।

शङ्खपुष्प्यग्निधमनी लाङ्गली बालमोचका ।
रक्तस्नुही रक्तशृङ्गी रक्तिका नीलचित्रकः ॥ ८ ॥

शृगालजिह्वा बृहती वल्मी चक्री च (प)राजिका(ता) ।
एकवीरा नरकसा रुदन्ती ब्रह्मचारिणी ॥ ९ ॥

उच्चटा मानि(नागि)नीकन्दा कुमारी रक्तचित्रकः ।
लक्ष्मीः शाखोटकश्चैव कन्चुकी मेषशृङ्गिका ॥ १० ॥

हिमावती सोमलता मोदा व्याघ्रनखी शमी ।
काञ्चनी वनराजी च काकमाची च केशिनी ॥ ११ ॥

अजमारी कोटराक्षी हनूमत्यङ्गनायिका ।
नरजीवा हेमपुष्पी काकमुण्डी च कालिका ॥ १२ ॥

तोयवल्ली गजारी च हसांघ्री कटुवुम्बिका ।
ताम्बूली सूर्यभक्ता च रसनिर्जीवकारिकाः ॥ १३ ॥

रसमारिका ओषध्यो दिव्यौषधिबीजानि च[1] ।

कट्वतुम्बी च गोसन्धी देवदालीन्द्रवारुणी ।
बाकुची ब्रह्मबीजानि कार्पासं कृष्णजीरकम् ॥ १४ ॥

कन्चुकी कृष्णकनकं श्वेताकं च पिपीलुकम् ।
दन्तिनी यवचिञ्चा च कर्कोटी कारवल्लिका ॥ १५ ॥

गोजिह्वा काकजङ्घा च महाकाली च शंखरी ।
श्वेतगुञ्जा सिताङ्कोलः पटोली बिल्वमेव च ॥ १६ ॥

एकैकमौषधीबीजं मारयेद्रसभैरवम् ।

रसबन्धकर्ये ओषध्यः[1] ।

रक्तस्नुही सोमलता स्रुन्ती रक्तचित्रक[2] ॥ १७ ॥

[1] सार्णवादुद्धृताः ।

शारसोटकी दग्धरुहा मोदिनी वृद्धदारुक ।
त्रिशूली कृष्णमार्जारी चक्रिका क्षीरकुकुटी ॥ १८ ॥

देवदाली शङ्खपुष्पी काकमाची हनूमती ।
नीलज्योतिस्तृणज्योतिरुत्कटा हेमवल्लरी ॥ १९ ॥

त्रिदण्डी ब्रह्मदण्डी च चक्राङ्की स्थलपद्मिनी ।
नागजिह्वा नागपर्णी वीरा वर्तुलपर्णिका ॥ २० ॥

अर्कपत्री वशपत्री ताम्रपर्णी तथेश्वरी ।
इन्दुरी देवदेवेशि ! रसबन्धकरा प्रिये ! ॥ २१ ॥

रसद्राविका ओषध्य [1] ।

सूर्यावर्तश्च कदली बन्ध्या कोशातकी तथा ।
वज्रकन्दोदककणा काकमाची च शिग्रुक ॥ २२ ॥

देवदाली च देवेशि ! द्राविका परिकीर्तिता ।
दोषान्हरन्ति योगेन धातूना पारदस्य च ॥ २३ ॥

रसकामिका ओषध्य [1] ।

काकमाची घनरव कासमर्द कृताञ्जलि ।
वराहकर्णी सटिरी हसपादी शतावरी ॥ २४ ॥

ताम्बूली नागिनी ब्रह्मी हसपादी च लक्ष्मणा ।
अर्जुनी क्षीरनाली च कारवेल्लोऽर्कपत्रिका ॥ २५ ॥

व्याघ्री चवी कुरवका कामिका सुरवन्दिते ! ।

रसायनिका ओषध्य [1] ।

ब्रह्मदण्डस्त्रिदण्डश्च लोहदण्डस्तृतीयक ॥ २६ ॥

एते रसायने योग्या ब्रह्मविष्णुमहेश्वरा ।

---

1 रसार्णवादुद्धृत ।

पञ्चरत्नम्[1] ।

मन्त्रसिद्धासना देवी तथा कङ्कालखेचरी ॥ २७ ॥
इन्दिरा च क्षमापाली पञ्चमी तु निशाचरी ।
पञ्चरत्नमिदं देवि ! रसशोधनजारणे ॥ २८ ॥

क्षीरवर्गः[2] ।

न्यग्रोधोदुंबराश्वत्थस्नुहीतिल्वकभास्करः ।
दुग्धमुत्तमकन्याश्च क्षीरवर्ग उदाहृतः ॥ २९ ॥
उदुंबरवटाश्वत्थन्यग्रोधार्कस्नुहीद्रुमाः ।
कुरूटका क्षीरकणी कण्टकी च सुगन्धिका ॥ ३० ॥
एतेषा क्षीरवृक्षाणां क्षीरवर्ग उदाहृतः ।

क्षारवर्गः[2] ।

क्षारत्रयं समाख्यातं यवस्वर्जिकटङ्कणम् ॥ ३१ ॥
पलाशो मुष्ककक्षारो यवक्षारस्सुवर्चलः ।
तिलानामुद्भवः क्षारस्तदुक्तं क्षारपञ्चकम् ॥ ३२ ॥
तिलापामार्गकदलीचित्रकार्द्रकमूलकम् ।
शिग्रुमोक्षपलाशश्च केतकी च स्नुहीत्रयम् ॥ ३३ ॥
चिञ्चात्वगर्कनिर्गुण्डीदेवदारुरधोमुखा ।
चलपत्र लाङ्गली च तालमेघरवं तथा ॥ ३४ ॥
ये चान्ये क्षारवृक्षाश्च सर्वमन्तःपुटे दहेत् ।
तमालोड्य जलैर्वस्त्रैर्वध्वा ग्राह्यमधोजलम् ॥ ३५ ॥

---

1. रसार्णवदुद्धृतः ।

2. सरस्वतीमहालयगतरसरत्नसमुच्चयत उद्धृतः । अयं सरस्वतीमहालये उपलभ्यमानोऽन्यत्र मुद्रितादुपलभ्यमानात् क्वचन विशेषचित्समानश्च विद्यते । (म. सं. 10731.)

शोषयेत्पाचयेदग्नौ मृद्भाण्डेन तु तज्जलम् ।
ग्राह्यं क्षारावशेषं तद्वृक्षक्षारोऽयमीरितः ॥ ३६ ॥

तैलवर्गः[1] ।

कङ्गुणीतुम्बिनीघोषाकरञ्जश्रीफलोद्भवम् ।
कटुवातारिसिद्धार्थसोमराजीविभीतजम् ॥ ३७ ॥

अतसीजं महाकालनिम्बजं तिलजं तथा ।
अपामार्गदेवदालीदन्तितुम्बुरुबीजकात् ॥ ३८ ॥

भृङ्गकोलोन्मत्तभल्लातपलाशेभ्यस्तथैव च ।
एतेभ्यस्तैलमादाय रसकर्मणि योजयेत् ॥ ३९ ॥

अम्लवर्गः[1] ।

अम्लवेतसजम्बीरं निंबुक बीजपूरकम् ।
शाङ्गेरी चणकाम्लं च साम्लकं कोलदाडिमम् ॥ ४० ॥

अम्बष्ठा तिन्तिणीक च नारं पारावताङ्घ्रिका ।
करमर्दं च मद्य च अम्लवर्गः प्रकीर्तितः ॥ ४१ ॥

चणकाम्लं च सर्वेषां एकमेव प्रशस्यते ।
रसाना च विशुद्ध्यर्थं जारणाद्रावणे हित ॥ ४२ ॥

अम्लवेतसमेकं वा सर्वेषामुत्तमोत्तमम् ।

अम्लवेतससन्धानक्रमः[1] ।

तद्बीजरहितं चिञ्चाफलं काञ्जिकसंयुतम् ॥ ४३ ॥

पक्त्वा कुर्याद्रसपूतं जम्बीराम्लं च तत्समम् ।
शाङ्गेरीमातुलुङ्गाम्लं यथाप्रोक्तं समाहरेत् ॥ ४४ ॥

वस्त्रपूतं तु तत्सर्वं पचेत्पादावशेषितम् ।

---

1. सरस्वतीमहालयगतरसरत्नसमुच्चयत उद्धृतः ।

सौराष्ट्री तुत्थकासीसं त्रिक्षारं पटुपञ्चकम् ॥ ४५ ॥
धूमसारं च तुल्यांशं सर्वं सञ्चूर्ण्य निक्षिपेत् ।
पूर्वपूर्वं तु पादांशं पुनर्मृद्वग्निना पचेत् ॥ ४६ ॥
घनीभूतं भवेद्यावच्चटुनैकेन चालयन् ।
अम्लवेतस इत्येतज्जायतेऽम्लतरं परम् ॥ ४७ ॥

अथवा—

चिञ्चाफलं काञ्जिकेन सम्यगालोड्य गालितम् ।
नारङ्गलुङ्गल्लिकुचधात्रीवृक्षाम्लसंयुतः ॥ ४८ ॥
शताह्वयैरावृताभ्यां सर्वतस्सदृशो भवेत् ।
एतत्सर्वं समालोड्य शनैर्मृद्वग्निना पचेत् ॥ ४९ ॥
पादावशिष्टे तस्मिंस्तु तत्पादं पटुपञ्चकम् ।
सौराष्ट्री तुत्थकासीसं त्रिक्षारगृहधूमकम् ॥ ५० ॥
एतत्सर्वं समावाप्य तद्यावच्चूर्णतां व्रजेत् ।
द्रवेऽवलोड्य पक्त्वैनं योजयेद्रसकर्मणि ॥ ५१ ॥
अम्लवेतसनामाऽयं रसशास्त्रेषु कीर्तितः ।

मलवर्गः[1] ।

कपोतछागगृध्राणां शिखिकुक्कुटयोश्च विट् ॥ ५२ ॥
गोखराश्वाजनागानां शकृद्वर्गः प्रकीर्तितः ।

मूत्रवर्गः[1] ।

नरोष्ट्रहस्तिकरभमहिषीखरवाजिनाम् ॥ ५३ ॥
गोजाविकानां मूत्राणि मूत्रवर्ग इतीरितः ।

---

1. सरस्वतीमहालयगतरसरत्नसमुच्चयादुद्धृतः ।

रक्तवर्गः[1] ।

मञ्जिष्ठा कुङ्कुमं लाक्षा दाडिमं रक्तचन्दनम् ॥ ५४ ॥
बन्धूककरवीराक्षि किंशुकं रक्तवर्गकः ।

श्वेतवर्गः[1] ।

तगरः कुटजः कुन्दो गुञ्जा जीवन्तिका तथा ॥५५ ॥
सितांभोरुहकन्दश्च श्वेतवर्ग उदाहृतः ।

पीतवर्गः[1] ।

वरानिलाग्निकासीसं कदली कारवल्लिका ॥ ५६ ॥
अतः परं निशाद्वन्द्वं कर्णिकारेन्द्रवारुणी ।
मूलकं चापि कौसुम्भं अक्षनारङ्गकिंशुकम् ॥ ५७ ॥
मदयन्ती पुण्डरीकं पीतवर्गं वदन्ति वै ।

कृष्णवर्गः ।

कदली कारवल्ली च त्रिफला नीलिकानला ॥ ५८ ॥
पङ्कः कासीसबालामं कृष्णवर्ग उदाहृत ।

वसावर्गः[1] ।

जलूकाकालमण्डूककरिप्लाविनराहिजा. ॥ ५९ ॥
शिंशुमारमेषशिखिकर्कटीमीनगोभवाः ।
शूकरस्य वसावर्गो रसकर्मणि कीर्तितः ॥ ६० ॥

पित्तवर्गः ।

महिषीक्रोडमत्स्याक्षिशिखिनार्जोलगोनृणाम् ।
नकुलस्य च पित्तेन पित्तवर्ग उदाहृतः ॥ ६१ ॥

---

1. सरस्वतीमहालयगगरसरत्नसमुद्रयादुद्धृताः ।

शोधनत्रयम्[1] ।

सौवीरं टङ्कणं काचमित्युक्तं शोधनत्रयम् ।

मधुरत्रयम्[1] ।

घृतं गुडं माक्षिकं च विज्ञेयं मधुरत्रयम् ॥ ६२ ॥

मिलपञ्चकम्[1] ।

मध्वाज्यटङ्कणं गुञ्जा गुडं स्यान्मिलपञ्चकम् ।

लोहपर्पटी[2] ।

लोहस्य कुट्यमानस्य सुतप्तस्य दलानि वै ॥ ६३ ॥

पतन्ति तानि स्वीकृत्य ख्यातोऽयं लोहपर्पटः ।

तुलायन्त्रम्[3] (मूषायन्त्रं वा) ।

तुलायन्त्रं तुलाऽऽकारं मूषायन्त्रं तदुच्यते ॥ ६४ ॥

लोहमूषाद्वयं कृत्वा द्वादशाङ्गुलमानतः ।
ईषच्छिद्रान्वितामेकां तत्र गन्धकसंयुताम् ॥ ६५ ॥

मूषायां रसयुक्तायामन्यस्यां तां प्रवेशयेत् ।
तोयं स्यात्सूतकस्याधो गन्धाधो वह्निदीपनम्[4] ॥ ६६ ॥

नियामकं यन्त्रम्[5] ।

भूगे पूरितपूर्ववारिणि रसं निक्षिप्य वस्त्रावृतं
भाण्डे योजितलोहपर्परमुखे चोर्ध्वं पुटे रोधयेत्[5] ।

---

1. सरस्वतीमहालयगतरसरत्नसमुच्चयादुद्धृताः ।
2. रसरत्नाकरतः ऋद्धिखण्डात् । 3. रसपद्धतेः ।
4. इदमेव जारणायन्त्रमिति रसरत्नसमुच्चये ।
5. पूरितयवचिंञ्चाद्यालोडितारनाले भूम्यन्तर्गते भाण्डे रसं वस्त्रावृतं निक्षिप्य लोहपर्परे मुखे दत्वा ऊर्ध्वं करीषाग्निं दद्यादित्यर्थः ।

विद्याधरयन्त्रम्[1] ।

यन्त्रं विद्याधरं ज्ञेयं स्थालीद्वितयसंपुटात् ।
चुल्लीं चतुर्मुखीं कृत्वा यन्त्रभाण्डं निवेशयेत् ॥ ६८ ॥

तत्रौषधं विनिक्षिप्य निरुद्ध्याद्भाण्डकाननम् ।
यन्त्रं विद्याधरं नाम तन्त्रज्ञैः परिकीर्तितम् ॥ ६९ ॥

सारणायन्त्रम्[2] ।

धूर्तपुष्पसमाकारा मूषाऽष्टाङ्गुलदीर्घिका ।
मुखे सुविस्तृता कार्या चतुरङ्गुलसम्मिता ॥ ७० ॥

मृन्मया साऽपि शुष्का च मध्येऽतिमसृणीकृता ।
अन्या पिधानिका मूषा सुनिम्ना छिद्रसंयुता ॥ ७१ ॥

आवर्तितलोहादिस्वरूपम्[3] ।

आवर्तमाने कनके पीता तारे सिता प्रभा ।
शुल्बे नीलनिभा तीक्ष्णे कृष्णवर्णा सुरेश्वरि ! ॥ ७२ ॥

वङ्गे ज्वाला कपोताभा नागे मलिनधूमका ।
शैले तु धूसरा देवि ! आयसे कपिलप्रभा ॥ ७३ ॥

अयस्कान्ते धूम्रवर्णा सस्यके लोहिता भवेत् ।
वज्रे नानाविधा ज्वाला रसत्वे पाण्डुरप्रभा ॥ ७४ ॥

आवर्तितलोहविशुद्धिलक्षणम्[3] ।

न विस्फुलिङ्गो न च बुद्बुदश्च
यदा न रेखा पटलं न शब्दः ।
मूषागतं रत्नसमं स्थिरञ्च
तदा विशुद्धं प्रवदन्ति लोहम् ॥ ७५ ॥

---

1. रसरत्नसमुच्चयतः ।
2. रसप्रकाशसुधाकरतः ।
3. रसार्णवतः ।

प्रतीवाप-निषेकाभिषेकसमयनिर्देशः[1] ।

प्रतीवापः पुरा योज्यो निषेकस्तदनन्तरम् ।
छादनं तु प्रतीवापो निषेकं मज्जनं विदुः ॥ ७६ ॥
अभिषेकं तदिच्छन्ति स्नपनं क्रियते तु यत् ।
वापो निषेकस्नपनं द्रुते निर्मलतां गते ॥ ७७ ॥
उष्णेनैव हि वाञ्छन्ति शीतलं न च वाञ्छति ।

मृतरसपरीक्षा[2] ।

अतेजा अगुरुश्शुभ्रो लोहहा चाचलो रसः ॥ ७८ ॥
यदा नावर्तते वह्नौ नोर्ध्वं गच्छेत्तदा मृतः ।

रसबन्धप्रकाराः[3] ।

पञ्चविंशतिसंख्याकान्रसबन्धान्प्रचक्ष्महे ॥ ७९ ॥
येन येन हि चाञ्चल्यं दुर्ग्रहत्वं च नश्यति ।
रसराजस्य सम्प्रोक्तो बन्धनार्थो हि वार्तिकै. ॥ ८० ॥
हठारोटौ तथाऽऽभासः क्रियाहीनश्च पिष्टिका ।
क्षार. खोटश्च पोटश्च कल्कबन्धश्च कज्जलि. ॥ ८१ ॥
सजीवश्चैव निर्जीवो निर्बीजश्च सबीजकः ।
शृङ्खलाद्रुतिबन्धौ च बालकश्च कुमारक· ॥ ८२ ॥
तरुणश्च तथा वृद्धो मूर्तिबद्धस्तथाऽपरः ।
जलबन्धोऽग्निबन्धश्च सुसंस्कृतकृताभिधः ॥ ८३ ॥
महाबन्धाभिधश्चेति पञ्चविंशतिरीरिताः ।
केचिद्वदन्ति षड्विंशो जलौकाबन्धसंज्ञकः ॥ ८४ ॥
स तावन्नेष्यते देहे स्त्रीणां द्रावेऽतिशस्यते ।

---

1. रसार्णवतः । 2. रससङ्केतकलिकातः 3. रसरत्नसमुच्चयतः ।

हठबन्धः ।

हठो रसस्स विज्ञेयस्सम्यक्शुद्धिविवर्जितः ॥ ८५ ॥
स सेवितो नृणां कुर्यान्मृत्युं वा व्याधिमुद्धतम् ।

आरोटबन्धः ।

सुशोधितो रसस्सम्यगारोट इति कथ्यते ॥ ८६ ॥
स क्षेत्रीकरणे श्रेष्ठश्शनैर्व्याधिविनाशनः ।

आभासबन्धः ।

पुटितो यो रसो याति योगं मुक्त्वा स्वभावताम् ॥ ८७ ॥
भावितो धातुमूलाद्यैराभासो गुणवैकृतेः ।

क्रियाहीनबन्धः ।

असंशोधितलोहाद्यैस्साधितो यो रसोत्तमः ॥ ८८ ॥
क्रियाहीनस्स विज्ञेयो विक्रियां यात्यपथ्यतः ।

पिष्टिकाबन्धः ।

तीव्रातपे गाढतरावमर्दात्
पिष्टीभवेत्सा नवनीतरूपा ।
ख्यातस्स सूतः किल पिष्टिबन्धः
सन्दीपनः पाचनकृद्विशेषात् ॥ ८९ ॥

क्षारबन्धः ।

शङ्खशुक्तिवराटाद्यैर्योऽसौ संसाधितो रसः ॥ ९० ॥
क्षारबन्धः परं दीप्तिपुष्टिकृच्छूलनाशनः ।

खोटबन्धः ।

बन्धो यः खोटतां याति ध्मातो ध्मातः क्षयं व्रजेत् ॥९१

खोटबन्धस्स विज्ञेयः शीघ्रं सर्वगदापहः[1] ।

पोटबन्धः ।

द्रुतकज्जलिका मोचापत्रके चिपिटीकृता ॥ ९२ ॥
स पोटः पर्पटी सैव बालाद्यखिलरोगनुत् ।

कल्कबन्धः ।

स्वेदाद्यैस्साधितः सूतः पङ्कत्वं समुपागतः ॥ ९३ ॥
कल्कबद्धस्स विज्ञेयो योगोक्तफलदायकः ।

कज्जलीबन्धः ।

कज्जली रसगन्धोत्था सुश्लक्ष्णा कज्जलोपमा ॥ ९४ ॥
तत्तद्योगेन संयुक्ता कज्जलीबन्ध उच्यते ।

सजीवबन्धः ।

भस्मीकृतो गच्छति वह्नियोगात्
रसस्सजीवस्स खलु प्रदिष्टः ।
संसेवितोऽसौ न करोति भस्म-
कार्यं जरारोगविनाशनं च ॥ ९५ ॥

निर्जीवबन्धः ।

जीर्णाभ्रको वा परिजीर्णगन्धो
भस्मीकृतश्चाखिललोहमौलिः ।
निर्जीवनामा हि स भस्मसूतो
निश्शेषरोगान्विनिहन्ति सद्यः ॥ ९ . ..

---

1. "पिष्टीस्तम्भस्तु खोटकः । ध्मातो द्रुतो भवेत्खोटस्त्वाहृतश्चूर्णतां व्रजेत् । पुनर्ध्मातो द्रुतः खोट इति खोटस्य लक्षणम् ।" इति रससङ्केत-कलिकायाम् ।

निर्बीजबन्धः ।

रसस्तु पादांशसुवर्णजीर्णः
पिष्टीकृतो गन्धकयोगतश्च ।
तुल्यांशगन्धैः पुटितः क्रमेण
निर्बीजनामा सकलामयघ्नः ॥ ९७ ॥

सबीजबन्धः ।

[1]पिष्टीकृतैरभ्रकसत्त्वहेम-
तारार्ककान्तैः परिजारितो यः ।
हतस्ततप्षड्गुणगन्धकेन
सबीजबद्धो विपुलप्रभावः ॥ ९८ ॥

शृङ्खलाबन्धः[2] ।

वज्रादिनिहतस्सूतो हतस्सूतस्समोऽपरः ॥ ९९ ॥
शृङ्खलाबद्धसूतस्तु देहलोहविधायकः ।
चिरप्रभावां वेगेन व्याप्तिं जानाति शङ्करः ॥१००॥

द्रुतिबन्धः ।

युक्तोऽपि बाह्यद्रुतिभिश्च सूतो
बन्धं गतो वा भसितस्वरूपः ।
स राजिकापादमितो निहन्ति
दुस्साध्यरोगान्द्रुतिबद्धनामा ॥ १०१ ॥

बालकबन्धः ।

समाभ्रजीर्णशिशवजस्तु बालः
संसेवितो योगयुतो जवेन ।

---

1. बीजीकृतैः इति रसमञ्जर्यां आयुर्वेदप्रकाशे च पाठः ।

2. अयं बन्धप्रकारः आनन्दकन्दे वङ्गबन्धप्रकरणे (पृ. ४४५) दरसङ्क(शृङ्ख)लिकाविधिनिरूपणावसरे मूलं एवं प्रपञ्चितः ।

अग्निबन्धः ।

केवलो लोहयुक्तो वा ध्मातः स्याद्गुटिकाकृतिः ।
अक्षीणश्चाग्निबद्धोऽसौ खेचरत्वादिकृत्स हि ॥ १०९ ॥

संस्कृतबन्धः ।

विष्णुक्रान्ताशशिलताकुंभीकनकमूलकैः ।
विशालानागिनीकन्दव्याघ्रपादीकुरण्टकैः ॥ ११० ॥
वृश्चिकालीभशुण्डीभ्यां हंसपादीसहासुरैः ।
अप्रसूतगवां मूत्रैः पिष्टं वाकुलके पचेत् ॥ १११ ॥
पक्वमेवं मृतैर्लोहैर्मर्दितं विपचेद्रसम् ।
यन्त्रेषु मूर्च्छा सूतानामेष कल्पः सुसंस्कृतः ॥ ११२ ॥

महाबन्धः ।

हेम्ना वा रजतेन वा सहचरो ध्मातो व्रजत्येकता
अक्षीणो निबिडो गुरुश्च गुटिकाकारोऽतिदीर्घोज्ज्वलः ।
चूर्णत्वं पटुवत्प्रयाति निहतो घृष्टो न मुञ्चेन्मलं
निर्गन्धो द्रवति क्षणात्स हि महाबन्धाभिधानो रसः ॥ ११३ ॥

सृष्टिः ।

गोऽजाविनरनारीणां मूत्रं शुक्रं च शोणितम् ।
सृष्टिरेषा समाख्याता षण्ढदोषविनाशिनी[1] ॥ ११४ ॥
स्त्रीपुंसोः शुक्रयुगलमप्रसूतारजस्तथा ।
एतत्सृष्टित्रयं प्रोक्तं गुह्यमेतद्वरानने[2] ! ॥ ११५ ॥

वासनामुखचारणप्रकारः[3] ।

अथ शुद्धस्य सूतस्य जारयेत्पूर्वभावितम् ।
गन्धकं तु तुलायन्त्रे पश्चात्सर्वं पलं पलम् ॥ ११६ ॥

---

1. शक्त्यवतारात् । 2. रसावतारात् । 3. 'रसरत्नाकरतः ।

मूषा नालान्विता ऊर्ध्ववक्त्रा स्याद्द्वादशाङ्गुला ।
दृढा लोहमयी कार्या त्वनया सदृशी परा ॥ ११७ ॥
एकस्यां निक्षिपेत्सूतमन्यस्यां गन्धकं समम् ।
एकस्या मुखमध्ये तु ह्यपरस्या मुखं क्षिपेत् ॥ ११८ ॥
लिप्त्वा मृल्लवणैस्सार्धं गन्धकोर्ध्वं पुटेल्लघु ।
रसस्यार्धौ जलं स्थाप्यं धूमं गन्धं विवर्त्तयेत् ॥ ११९ ॥
जीर्णे गन्धे समुद्धाट्य तुल्यगन्धं च दापयेत् ।
इत्येवं षोडशगुणं गन्धं जार्यं पुनः पुनः ॥ १२० ॥
जायते सूतराजोऽयं घासनामुखितो भवेत् ।

ग्राह्याग्राह्यरसलक्षणम्[1] ।

अन्तस्सुनीलो बहिरुज्ज्वलो यो
मध्याह्नसूर्यप्रतिमप्रकाशः ।
शस्तोऽथ धूम्रः परिपाण्डुरश्चेत्
चित्रो न योज्यो रसकर्मसिद्धौ ॥ १२१ ॥

२. प्रकीर्णकम्[2] ॥

सिद्धसाराख्यन्त्रम्[3] ।

चुल्ल्यामारोपयेत्पात्रं गंभीरं कल्कपूरितम् ।
तत्पार्श्वनलिकामार्गाद्द्रुतसत्त्वस्य विपूषाः ॥ १ ॥
पतन्ति येन तद्यन्त्रं सिद्धसाराख्यमीरितम् ।

गर्भसाराख्यन्त्रम्[3] ।

तथैव पात्रं गंभीरं सच्छिद्रकपिधानकम् ॥ २ ॥

---

1. रसमञ्जर्यां ।
2. इतः परं रससंस्कारोपयुक्तानामन्येषाम विषयाणामत्र विवरणं दीयते ।
3 रसकामधेनुतः ।

पिधाय पात्रान्तरतो मध्ये स्वल्पकचोलके ।
पातने बाष्पबिन्दूनां गर्भसारं प्रचक्षते ॥ ३ ॥

परमानन्दमूर्तियन्त्रम्[1] ।

तथैव पार्श्वनाली तु दीर्घा पात्रान्तरं गता ।
द्रवपातो यतः प्रोक्तं परमानन्दमूर्ति तत् ॥ ४ ॥

(अत्राम्लक्षारकाञ्जिकद्रवसत्वपातनम् ।)

पातालयन्त्रम्[1] ।

स्निग्धद्रव्यमृतं पात्रं सच्छिद्रमन्यपात्रके ।
गर्ते निधायोपर्यग्निर्यन्त्रं पातालसंज्ञकम् ॥ ५ ॥

आकाशयन्त्रम्[1] ।

उपर्यग्निघटस्यार्धे खर्परं सम्मुखस्थितम् ।
न्युब्जमुच्चैर्वस्त्रबद्धमुखं मल्लपिधानकम् ॥ ६ ॥
वस्त्रान्तमस्थ द्रव्यचूर्णं द्रवीभूय पतेदधः ।
अन्यपात्रे काचजादौ यन्त्रमाकाशसंज्ञितम् ॥ ७ ॥
तन्मुखे काचकूपी वा साऽधश्छिद्रा सवस्त्रमृत् ।

अथवा—

मृत्तिकादिकूपीवालुकायन्त्रे स्थिता उपरि लम्बमानसकल्कघटाऽध-श्छिद्राद्द्रवबिन्दुपरिपतद्रसादिद्रव्या यदि च स्यात्तदाऽप्याकाशयन्त्रमुक्तम् ।

रञ्जकयन्त्रम्[1] ।

रञ्जकद्रवपूर्णायां स्थालिकायां तु विन्यसेत् ॥ ८ ॥
मृत्तिकाकाचज पात्रं गंभीरोच्चं मनोहरम् ।

---

1. रसकामधेनुतः ।

सूक्ष्मच्छिद्रान्वितां तत्र समारोप्य त्रिपादिकाम् ॥ ९ ॥
तत्र क्षिप्त्वा गन्धचूर्णं तप्तलौहशलाकया ।
सन्दह्य सद्यस्तत्पात्रोपरि पात्रं च तद्विधम् ॥ १० ॥
तथा पिदध्यात्तत्पात्रधानं मज्जेद्भूदवान्तरे ।
तत्तलान्तर्धूमसत्वं लग्नं स्याच्च तथा चरेत् ॥ ११ ॥
छिद्रान्तराद्द्रुतं तैलं मध्यपात्रे पतेदपि ।
इद श्रीरञ्जकं यन्त्रं सर्वतन्त्रेषु गोपितम् ॥ १२ ॥

करणाकरयन्त्रम्[1] ।

सकल्कपात्रं गम्भीरं चुल्लीस्थं च तिरोहितम् ।
स्थाल्यां तत्पात्रान्तस्थरसैश्च्युतस्त्यात्करणाकरम् ॥ १३ ॥

वारुणीयन्त्रम्[1] ।

कूपीद्वयमुखं तिर्यक्कृत्वैकाधोऽग्निदीपनम् ।
तत. क्षारद्रवोऽन्यस्यां पतेद्वारुणिकं च तत् ॥ १४ ॥

ज्योतिर्यन्त्रम्[1] ।

हण्डिकाघस्तु दीपाग्निरूर्ध्वच्छिद्रस्थकूपके ।
तालादिसत्वपातार्थं ज्योतिर्यन्त्रमिदं स्मृतम् ॥ १५ ॥

साध्ययन्त्रम्[1] ।

चुल्लीसंस्थेष्टिकागर्तेऽन्यपात्रेण तिरोहिते ।
तालादिसत्वं निपतेत्साध्ययन्त्रं तदुच्यते ॥ १६ ॥

स्थलकूर्मयन्त्रम्[2] ।

खर्परं पृथुलं सम्यग्विस्तारे तस्य मध्यमे ।

---

1. रसकामधेनुतः । 2. रसदर्पणतः ।

आलवालं मृदा कृत्वा तन्मध्ये पारदं न्यसेत् ॥ १७ ॥
जारणार्थं रसस्योक्तं गन्धादीनामशेषतः ।

जलकूर्मयन्त्रम्[1] ।

दैर्घ्यादधस्थालिकाया मानं स्याद्द्वादशाङ्गुलम् ॥१८॥
षोडशाङ्गुलविस्तारा चतुःकीलयुतां मुखे ।
जलेनापूर्य तां स्थालीं निखनेद्भूमिमध्यतः ॥ १९ ॥
उपरिष्टाच्छरावं तु मुखं कीलेषु निक्षिपेत् ।
अधो भाण्डे जले मग्न शरावं च तथा भवेत् ॥ २० ॥
जलकूर्ममिदं यन्त्रं शस्तं जारणकर्मणि ।

पञ्चमृत्तिकाः[2] ।

वल्मीकमृत्तिका धूमो गैरिकं खटिका पटु ॥ २१ ॥
इत्येते मृत्तिका. पञ्च संप्रोक्ता रसकर्मणि ।

क्षोपार्थे मृत्तिकासाधनम्[3] ।

मृत्कार्पासकिट्टैश्च मृत्तिका साधिताऽपरा ॥ २२ ॥
लाक्षामृच्चूर्णतृणतो मेषीक्षीरेण मर्दयेत् ।
कार्पासजीर्णतृणतो मेषीक्षीरेण मर्दयेत् ॥ २३ ॥
कुक्कुटाण्डरसेनापि मृत्तिकाऽन्या विमर्दिता ।
काचकूपीविलेपार्थमेते द्वे मृत्तिके वरे ॥ २४ ॥
कासीसचूर्णमण्डूरं टङ्कणं नवसादरम् ।
पट्टनि पञ्च निम्बूकरसैस्संमर्दयेन्मृदम् ॥ २५ ॥

---

1. दैवीयामलतः। इदमेव सोमलवं यन्त्रमिति यन्त्राध्याये विनिर्दिष्टपूर्वम्।
2 रसेन्द्रचूडामणितः 3 रसकामधेनुतः।

अथवा—

काचटङ्कणमण्डूरैरेकासंसाधिता भृशम् ॥ ४६ ॥
वटार्कोदुम्बरक्षीरैर्दिनमेकं दृढा भवेत् ।

मदनमुद्रा ।

औदुंबराख्यवटदुग्धपलं पलं च
लाक्षा पलमृषिपलं त्वथ चुम्बकस्य ।
सङ्कुट्यमानमतसीफलतैलमिश्रं
सूतस्य जारणविधौ मदनाख्यमुद्रा ॥ ४७ ॥

अथवा—

चतुर्षु लोहकुण्डेषु क्रमतस्तप्ततोयत. ॥ ४८ ॥
उत्तरोत्तरत क्षेपात्क्वाथयेद्भृशम् ।
यावत्तलस्थितं सिक्थं तावत्तोये भृतं भवेत् ॥ ४९ ॥
तत्सिक्थं जलयन्त्रादौ लेपे प्रवरमीरितम् ।

कूपिकापाकविधिः ।

जीर्णसूक्ष्मस्य वस्त्रस्य कुर्यात्खण्डद्वयं बुधः ॥ ५० ॥
चतुरस्रकाचकूप्यामध्यार्धप्रमाणत. ।
षडंगुलादाशतो मध्ये द्विधा कुर्वीत विस्तृतम् ॥ ५१ ॥
मग्नं तन्मृत्तिकापङ्के काचकूप्यां नियोजयेत् ।
यवप्रमाणच्छिद्रायां दृढमृत्तिकया पुन. ॥ ५२ ॥
खण्डमेकं तु वस्त्रस्य मध्ये छिद्रसमन्वितम् ।
निवेद्य कूपिकानालात्समीकुर्यान्मृदाऽभितः ॥ ५३ ॥
खण्डमन्यमधस्तद्वत्काचकूप्यां नियोजयेत् ।
आतपे तां विशोष्याथ मृदा तद्वद्विलेपयेत् ॥ ५४ ॥

पुनस्तथा वस्त्रखण्डद्वयेन विनियोजयेत् ।
एवं विशोष्य संयोज्य मृत्तिका कर्पटत्रयम् ॥ ५५ ॥

रसादिपिष्टिं प्रक्षिप्य मुद्रां कुर्यात्प्रयत्नतः ।
पिधाय भस्मना कूपीं कण्ठनालविवर्जितम् ॥ ५६ ॥

कण्ठे कोकिलकान्दत्वा पञ्चपाञ्ज्वलितान्मृशम् ।
लोहवंशादिनालीभिर्धमेन्मुखसमीरणैः ॥ ५७ ॥

काचकूपीकण्ठगतं यावद्भिर्गलितं भवेत् ।
सन्दंशेन समीकृत्य सन्धिरोध प्रयत्नतः ॥ ५८ ॥

मुद्रां गलितकाचस्य कुर्यादगोरक्षनिर्मिताम् ।
शनैश्शनै. कोकिलकान्सन्दंशेनापसारयेत् ॥ ५९ ॥

शीतीभूतविभूत्यास्तु गृह्णीयात्कूपिकां ततः ।
मृत्कर्पटचतुष्केण पूर्ववद्विनियोजयेत् ॥ ६० ॥

छिद्रवर्ज्यं केशतुषमृद्भिर्लिप्त्वा विशोषयेत् ।
यन्त्रे चक्रादिके धृत्वा जारणादिक्रियां चरेत् ॥ ६१ ॥

एवं निर्धूमपाकेन सिद्धिः कोटिगुणोत्तरा ।

चुल्लीविधानम् ।

भवेदेकमुखी चुल्ली पातनादिक्रियाकरी ॥ ६२ ॥

चुल्ली च द्विमुखी प्रोक्ता स्वेदनादिषु कर्मसु ।
महास्वेदादिषु तथा चुल्ली तु त्रिमुखी स्मृता ॥ ६३ ॥

चतुर्मुखी जारणादौ सत्त्वपाते च कीर्तिता ।
श्रीनाथाख्या तथा चुल्लो जारणे बहुभिर्मुखै. ॥ ६४ ॥

भावनामात्रा ।

औषधादीना रसैर्यावत्कर्दमाभो भवेद्रसः ।
संप्लावितः परं मानं भावनायाः प्रकीर्तितम् ॥ ६५ ॥

सूक्ष्मच्छिद्रान्वितां तत्र समारोप्य त्रिपादिकाम् ॥ ९ ॥
तत्र क्षिप्त्वा गन्धचूर्णं तप्तलौहशलाकया ।
सन्दह्य सद्यस्तत्पात्रोपरि पात्रं च तद्विधम् ॥ १० ॥
तथा पिदध्यात्तत्पात्रधानं मज्जेद्द्रवान्तरे ।
तत्तलान्तर्धूमसत्वं लग्नं स्याच्च तथा चरेत् ॥ ११ ॥
छिद्रान्तराद्द्रुतं तैलं मध्यपात्रे पतेदपि ।
इदं श्रीरञ्जकं यन्त्रं सर्वतन्त्रेषु गोपितम् ॥ १२ ॥

करुणाकरयन्त्रम्[1] ।

सकल्कपात्रं गम्भीरं चुल्लीस्थं च तिरोहितम् ।
स्थाल्यां तत्तान्तस्थरसैरच्युतम्स्यात्करुणाकरम् ॥ १३ ॥

वारुणीयन्त्रम्[1] ।

नलीद्वयमुखं तिर्यक्कृत्वैकाधोऽग्निदीपनम् ।
तत. क्षारद्रवोऽन्यस्यां पतेद्वारुणिकं च तत् ॥ १४ ॥

ज्योतिर्यन्त्रम्[1] ।

हण्डिकाधस्तु दीपाग्निरूर्ध्वच्छिद्रस्थकूपके ।
तालादिसत्वपातार्थं ज्योतिर्यन्त्रमिदं स्मृतम् ॥ १५ ॥

साध्ययन्त्रम्[1] ।

चुल्लीसंस्थेष्टिकागर्तेऽन्यपात्रेण तिरोहिते ।
तालादिसत्वं निपतेत्साध्ययन्त्रं तदुच्यते ॥ १६ ॥

स्थलकूर्मयन्त्रम्[2] ।

खर्परं पृथुलं सम्यग्विस्तरे तस्य मध्यमे ।

---

1. रसकामधेनुतः । 2. रसदर्पणतः ।

आलवालं मृदा कृत्वा तन्मध्ये पारदं न्यसेत् ॥ १७ ॥
जारणार्थं रसस्योक्तं गन्धादीनामशेषतः ।

जलकूर्मयन्त्रम्[1] ।

दैर्घ्यादिधस्थालिकाया मानं स्याद्द्वादशाङ्गुलम् ॥१८॥
षोडशाङ्गुलविस्तारां चतुःकीलयुतां मुखे ।
जलेनापूर्य तां स्थालीं निखनेद्भूमिमध्यतः ॥ १९ ॥
उपरिष्टाच्छरावं तु मुखं कीलेषु निक्षिपेत् ।
अधो भाण्डे जले मग्नं शरावं च तथा भवेत् ॥ २० ॥
जलकूर्ममिदं यन्त्रं शस्तं जारणकर्मणि ।

पञ्चमृत्तिकाः[2] ।

वल्मीकमृत्तिका धूमो गैरिकं खटिका पटु ॥ २१ ॥
इत्येते मृत्तिकाः पञ्च संप्रोक्ता रसकर्मणि ।

लोपाद्यर्थं मृत्तिकासाधनम्[3] ।

मृत्कार्पासककिट्टैश्च मृत्तिका साविताऽपरा ॥ २२ ॥
लाक्षामृच्चूर्णतृणतो मेषीक्षीरेण मर्दयेत् ।
कार्पासजीर्णतृणतो मेषीक्षीरेण मर्दयेत् ॥ २३ ॥
कुक्कुटाण्डरसेनापि मृत्तिकाऽन्या विमर्दिता ।
काचकूपीविलेपार्थमेते द्वे मृत्तिके वरे ॥ २४ ॥
कासीसचूर्णमण्डूरं टङ्कणं नवसादरम् ।
पटूनि पञ्च निम्बूकरसैस्संमर्दयेन्मृदम् ॥ २५ ॥

---

1. देवीयामलतः । इदमेव सोमानलं यन्त्रमिति यन्त्राध्याये विनिर्दिष्टपूर्वम् ।
2. रसेन्द्रचूडामणितः 3 रसकामधेनुतः ।

फेनतुल्यं च डमरुयन्त्रलेपे मृदुच्यते ।
कुलालकरमृत्कृष्णा पीतमृच्च करंभकम् ॥ २६ ॥

नरकेशाः कागदं च तुषा एतद्विमर्दयेत् ।
द्राक्षागुडादिशुक्तेन वज्रमूषामृदुच्यते ॥ २७ ॥

तुषं भागद्वयं ग्राह्यं भागैकं वस्त्रखण्डकम् ।
मृदं च त्रिगुणीकृत्य जलं दत्वा विमर्दयेत् ॥ २८ ॥

नरकेशं समं कृत्वा किञ्चित्तावत्प्रकुट्टयेत् ।
यावत्सिक्थसमाभासं मृत्पिण्डं जायते तथा ॥ २९ ॥

यथा न शुष्कतामेति तथा यत्नं समाचरेत् ।
एवं सप्तदिनादूर्ध्वं मृदे योगे प्रयोजयेत् ॥ ३० ॥

कूपिकादिविलेपार्थं यन्त्रादेश्च विपक्वमात् ।
जलं बब्बूलनिर्यासं समितां तत्सगं कुरु ॥ ३१ ॥

तयोस्तुल्यं लोहकिट्टं शुद्धमञ्जनसन्निभम् ।
मुद्रा वै वारियन्त्रस्य सिद्ध्यर्थं दुर्लभां कुरु ॥ ३२ ॥

जलाग्नियोगतो नैव भिद्यतेऽत्र कदाचन ।
सूतकस्तु न सङ्गच्छेत्प्रलयाग्निजवेन वै ॥ ३३ ॥

[1]रत्नपुष्पाभवं तैलं कुडवे द्वे जलेन वै ।
प्रस्थेन मिश्रितं वह्नौ तैलशेषं तु कारयेत् ॥ ३४ ॥

तन्माल्ये भूर्जपत्रं तु कुट्टितं चाञ्जनोपमम् ।
पांशुशूकादिरहितं पलमेकं प्रयोजयेत् ॥ ३५ ॥

पलैकं लोहकिट्टे च शुद्धाञ्जनसमप्रभम् ।
विमर्द्य निम्बुनीरेण लेपयेद्वा तदर्थकृत ॥ ३६ ॥

---

1. अतसी ।

काचभागो भवेदेको द्विगुणं मृतभास्करम् ।
रसकांत्पञ्चभागास्त्युप्यड्भागा धौतमृत्तिका ॥ ३७ ॥

आटरूपजलैः पिष्ट्वा संपुटं तेन कारयेत् ।
मूषां विरचयेत्सत्यं रसस्य निगडो भवेत् ॥ ३८ ॥
वह्निमध्यान्न गच्छेद्धि पक्षच्छेदी च तिष्ठति ।
काचकूपी द्वितीया च तृतीयो लोहसंपुट. ॥ ३९ ॥

हठमुद्रा ।

चुबुकं लोहचूर्णं च क्रोडरक्तेन संयुतम् ।
तत्र सर्वं प्रदातव्यं घनघातेन ताडयेत् ॥ ४० ॥
सन्ध्यारभ्योदयो यावत्सूर्यबिंबं च दृश्यते ।
हठमुद्रेति विख्याता सर्वसिद्धैर्नमस्कृता ॥ ४१ ॥

अथवा—

त्रिटङ्कं चुंबकं देयं नवटङ्कमयोरज. ।
नररक्तेन संयुक्तं मेलयित्वा सकृत्सकृत् ॥ ४२ ॥
घनेन कुट्टितं सर्वं चतुर्यामं च मर्दितम् ।
हठमुद्रेति विख्याता सर्वसिद्धैर्नमस्कृता ॥ ४३ ॥

अथवा—

लोहकिट्टं समानीय चूर्णयेद्वै पलानि षट् ।
गालयेद्वस्त्रमध्ये तु खल्वमध्ये निधाय च ॥ ४४ ॥
अजैडकहृदिस्थं च मांसं संमिश्रितं नयेत् ।
कुट्टयेद्दृढहस्तेन मध्ये निक्षिप्य चूर्णकम् ॥ ४५ ॥
सिक्थतुल्यं तु तद्यावत्सिद्धा भवति मृत्तिका ।

अथवा—

काचटङ्कणमण्डूरैष्टकासंसाधिता भृशम् ॥ ४६ ॥

वटार्कोदुम्बरक्षीरैर्दिनमेकं हठा भवेत् ।

मदनमुद्रा ।

औदुंबराख्यवटदुग्धपलं पलं च

लाक्षा पलमुपिपलं त्वथ चुम्बकस्य ।

सङ्चुट्यमानमतसीफलतैलमिश्रं

सूतस्य जारणविधौ मदनाख्यमुद्रा ॥ ४७ ॥

अथवा—

चतुर्षु लोहकुण्डेषु क्रमतस्तप्ततोयत ॥ ४८ ॥

उत्तरोत्तरत क्षेपात्क्याहे क्वाथयेदभृशम् ।

यावत्तलस्थितं सिक्थं तावत्तोये मृतं भवेत् ॥ ४९ ॥

तत्सिक्थं जलयन्त्रादौ लेपे प्रवरमीरितम् ।

कूपिकापाकविधिः ।

जीर्णसूक्ष्मस्य वस्त्रस्य कुर्यात्खण्डद्वयं बुध ॥ ५० ॥

चतुरस्रकाचकूप्यामध्यार्धप्रमाणतः ।

पक्वपादाशतो मध्ये द्विधा कुर्वीत विस्तृतम् ॥ ५१ ॥

मग्नं तन्मृत्तिकापङ्के काचकूप्यां नियोजयेत् ।

यवप्रमाणरिसाया दृढमृत्तिकया पुनः ॥ ५२ ॥

खण्डमेकं तु वस्त्रस्य मध्ये छिद्रसमन्वितम् ।

निवेश्य कूपिकानालात्समीकुर्यान्मृदाऽभितः ॥ ५३ ॥

खण्डमन्यमधस्तद्वत्काचकूप्यां नियोजयेत् ।

आतपे तां विशोष्याथ मृदा तद्वद्विलेपयेत् ॥ ५४ ॥

पुनस्तथा वस्त्रखण्डद्वयेन विनियोजयेत् ।
एवं विशोष्य संयोज्य मृत्तिका कर्पटत्रयम् ॥ ५५ ॥
रसादिपिष्टिं प्रक्षिप्य मुद्रां कुर्यात्प्रयत्नतः ।
पिधाय भस्मना कूर्पीं कण्ठनालविवर्जितम् ॥ ५६ ॥
कण्ठे कोकिलकान्दत्वा पञ्चपाञ्ज्वलितान्भृशम् ।
लोहवंशादिनालीभिर्धमेन्मुखसमीरणैः ॥ ५७ ॥
काचकूपीकण्ठगतं यावद्भिर्गलितं भवेत् ।
सन्दंशेन समीकृत्य सन्धिरोधं प्रयत्नतः ॥ ५८ ॥
मुद्रां गलितकाचस्य कुर्यादगोरक्षनिर्मिताम् ।
शनैश्शनैः कोकिलकान्सन्दंशेनापसारयेत् ॥ ५९ ॥
शीतीभूतविभूत्यास्तु गृह्णीयात्कूपिकां ततः ।
मृत्कर्पटचतुष्केण पूर्ववद्विनियोजयेत् ॥ ६० ॥
छिद्रवर्ज्यं केशतुषमृद्भिर्लिप्त्वा विशोषयेत् ।
यन्त्रे चक्रादिके धृत्वा जारणादिक्रियां चरेत् ॥ ६१ ॥
एवं निर्धूमपाकेन सिद्धिः कोटिगुणोत्तरा ।

चुल्लीविधानम् ।

भवेदेकमुखी चुल्ली पातनादिक्रियाकरी ॥ ६२ ॥
चुल्ली च द्विमुखी प्रोक्ता स्वेदनादिषु कर्मसु ।
महास्वेदादिषु तथा चुल्ली तु त्रिमुखी स्मृता ॥ ६३ ॥
चतुर्मुखी जारणादौ सत्वपाते च कीर्तिता ।
श्रीनाथाख्या तथा चुल्ली जारणे बहुभिर्मुखैः ॥ ६४ ॥

भावनामाला ।

औषधादीनां रसैर्यावत्कर्दमाभो भवेद्रसः ।
सैप्लावितः परं मानं भावनायाः प्रकीर्तितम् ॥ ६५ ॥

विडमात्रा ।

ऊर्ध्वांघश्च विडं दद्याद्रसेन्द्रादष्टमांशतः ।
न न्यूनाधिकमादद्यादन्यथा दोषकृद्भवेत् ॥ ६६ ॥

औषधं शोधनार्थं यदूर्ध्वाधो दीयते बुधैः ।
विडसंज्ञां तु लभते तदिति प्रतिबोधितम् ॥ ६७ ॥

स्नेहाम्लादीनां गुणाः ।

सर्वे मृदुकराः स्नेहाः सर्वे चाम्ला. प्रबोधका. ।
सर्वे मलहराः क्षाराः सर्वे रक्ताश्च रञ्जका. ॥ ६८ ॥

द्रावकाम्ला हि तीक्ष्णाश्च पाचना ह्यामयाग्रहाः ।
रोचको द्रावयेल्लोहान्क्षीरिणो रसबन्धका. ॥ ६९ ॥

तैलपातनविधिः[1] ।

तैलानां पातनं वक्ष्ये सूर्यपाकेन चानलात् ।
जलयोगेन तत्तैलं ग्राह्यं योगेषु योजयेत् ॥ ७० ॥

धत्तूरबीजचूर्णानि वस्त्रपूतानि कारयेत् ।
समूलोत्तरवारुण्या कषायेण विलोडयेत् ॥ ७१ ॥

आलिप्य कांस्यपात्रे तु धारयेदातपे खरे ।
सन्तप्ते स्वच्छवस्त्रेण पीडयेत्तैलमाहरेत् ॥ ७२ ॥

शिग्रुपुष्पार्ककार्पासबीजानामपमार्जनात् ।
ग्राह्य धत्तूरवत्तैलमेकैकस्य पृथक्पृथक् ॥ ७३ ॥

काकतुण्ड्यांस्समूलाया बाकुचीतैलमाहरेत् ।
देवदाल्याश्च जालिन्यास्तिक्तकाकोलितो भवेत् ॥ ७४ ॥

अपामार्गकषायेण तैलं स्याद्विषमुष्टिजम् ।
मूलक्वाथै. कुमार्यास्तु जैपालजं भवेत् ॥ ७५ ॥

---

1. रसरत्नाकरतः ।

रक्तापामार्गक्वाथेन वाकुचीतैलमाहरेत् ।
क्वाथेन चेन्द्रवारुण्यास्तैलमारग्वधं भवेत् ॥ ७६ ॥

कटुतुंबी देवदाली पटोली चेन्द्रवारुणी ।
तिक्तकोशातकी चैषां शुष्कबीजानि कारयेत् ॥ ७७ ॥

काकतुण्ड्या अपामार्गक्वाथे तैलं समाहरेत् ।
बीजानि कटुतुंब्याश्च गोमयेन विलोडयेत् ॥ ७८ ॥

शुष्कधान्यतुषैस्सार्धं कुट्टयेच्च ह्युलूखले ।
निस्त्वगक्षान्विचूर्ण्याथ भृङ्गराजरसैस्सह ॥ ७९ ॥

मर्दयित्वाऽऽतपे तैलं गृह्णीयात्पीडने सति ।
महाकालस्य बीजानि चूर्णितानि विभावयेत् ॥ ८० ॥

धात्रीफलरसेनैव सप्तवारं पुन पुनः ।
सोष्णं कृत्वा तु तच्चूर्णं तैलयन्त्रेण पीडयेत् ॥ ८१ ॥

कृष्णाया· कटुतुंब्याश्च बीजचूर्णानि कारयेत् ।
क्षान्तपाषाणचूर्णं च ह्येकीकृत्य विचूर्णयेत् ॥ ८२ ॥

धान्यराशिगतं पक्षादुद्धृत्य तैलमाहरेत् ।
चूर्णं करञ्जबीजोत्थं भृङ्गराजरसैस्सह ॥ ८३ ॥

समालोड्यातपे तप्तं पीडनात्तैलमाहरेत् ।
धात्रीफलरसैर्भाव्यं चूर्णं पालाशबीजजम् ॥ ८४ ॥

दिनैकं वर्तते यन्त्रे तैलं ग्राह्यं च तैलके ।
गुडत्वग्बीजजं चूर्णं नरमूत्रेण भावयेत् ॥ ८५ ॥

सप्तवारं ततो घर्मे लेपयेत्कांस्यभाजने ।
उद्धृतं दालयेत्तं च तैलं पतति नान्यथा ॥ ८६ ॥

रत्नानामारनालेन पिष्ट्वा चूर्णं विभावयेत

ज्योतिष्मत्याश्च वीजानि चातपे तैलमाहरेत् ॥ ८७ ॥

चूर्णं वरुणवीजोत्थं चिञ्चावीजंत्वगन्वितम् ।
नालिकेराम्बुनाऽऽलोड्य ह्यातपे तैलमाहरेत् ॥ ८८ ॥

गुञ्जाभल्लातवीजोत्थं चूर्णं चित्रकमूलजम् ।
नारिकेलाम्बुनाऽऽलोड्य घर्मे तच्चालयेत्क्षणम् ॥ ८९ ॥

पीडयेत्तं च पट्टाभ्यां तैलं पतति तद्धृतम् ।
आम्रातबीजचूर्णस्य दशांशो चित्रमूलकम् ॥ ९० ॥

नारिकेलाम्बुना पिष्टं घर्मे तैलं समाहरेत् ।
पुत्रजीवस्य वीजानि चूर्णं वा तिन्दुवीजजम् ॥ ९१ ॥

आम्रातवत्कर्तव्यं तेषां तैलं पृथक्पृथक् ।
नारिकेलाम्बुना भाव्यं विल्ववीजस्य चूर्णकम् ॥९२॥

दिनैकं तैलयन्त्रेण तैलमाहृत्य योजयेत् ।
निस्तुषाङ्कोलवीजानां मुखं किञ्चिद्विघर्षयेत् ॥ ९३ ॥

प्ररोहयेत्कांस्यपात्रे पिष्ट्वा चणकलेपितम् ।
तन्मध्ये टङ्कणं स्विन्नं किञ्चित्किञ्चित्प्रलेपयेत् ॥ ९४ ॥

धारयेदातपे तीव्रे मुखात्तैलं समाहरेत् ।
अथवा कांस्यपात्रं तद्धर्मे धार्यमधोमुखम् ॥ ९५ ॥

अधःस्थे कांस्यपात्रे च तैलं पतितमाहरेत् ।
सर्जायुतं समं पिष्ट्वा छिद्रभाण्डे निवेशयेत् ॥ ९६ ॥

तत्क्षणाद्द्रवरूपं च केशतैलमिदं भवेत् ।
अथवोत्तरवारुण्याः कषायेण समाहरेत् ॥ ९७ ॥

तैलं समस्तवीजानां माहयेदातपे खरे ।
पक्वभाण्डानुमालाणां रसमादाय भावयेत् ॥ ९८ ॥

समस्तं वीजचूर्णं तु ह्युक्तानुक्तं पृथक्पृथक् ।

आतपे मुच्यते तैलं साध्यासाध्यं न संशयः ॥ ९९ ॥
गर्भबीजास्थिबीजाद्यं शुक्रविष्ठासनादिकम् ।
सर्वबीजेषु वा तैलं ग्राह्यं पातालयन्त्रके ॥ १०० ॥

शुक्तं सूक्तं वा[1] ।

गुडमधुकाञ्जिकमस्तु-
प्रविभागास्स्युर्यथोत्तरं द्विगुणाः ।
त्रिदिनानि धान्यराशौ
स्थापितमिदमुच्यते शुक्तम् ॥ १०१ ॥

अम्लकाञ्जिकवर्गः[2] ।

वारिणा काञ्जिकं रक्षोहरं स्यात्कुण्डगोलकम् ।
काञ्जिकोद्वाहधातुघ्नकुञ्जलानि महारसम् ॥ १०२ ॥

म्लक्षणं सोमशुक्लाख्यं कुल्माषाभिषुतं च तत् ।
अवन्तिसोमसंज्ञं तच्चेक्षुण्डुलकृतं भवेत् ॥ १०३ ॥

धान्यैर्धान्याम्लकैः शूकक्षुद्रैः स्याच्च युगन्धरम् ।
दलैः पक्वैर्निस्तुषैस्तु सौवीरं यवजैर्मतम् ॥ १०४ ॥

तुषोदकं तदामैस्स्याद्गोधूमैरारनालकम् ।
बाह्लीकनिर्वृतं शिम्बैस्सुतं कन्दफलादिभिः ॥ १०५ ॥

तत्कर्त(र्च)रीभिः पिण्याकी शाण्डाकी मूलसर्षपैः ।
मधुद्राक्षागुडाद्यैस्तु सूक्तमिक्षुरसेन च ॥ १०६ ॥

कुल्माषधान्यमण्डाद्यैर्गोहांबुकमिति स्मृतम् ।
फलाम्लं वटकाद्यैस्स्याच्चुक्रं नष्टाम्लसन्धितम् ॥ १०७ ॥

---

1. अजीर्णमञ्जरीतः । 2. अभिधानकामधेनुतः ।

लवणवर्गः[1] ।

सिन्धुसामुद्ररुचकैः प्रदिष्टं लवणत्रयम् ।
तदुद्भिदबिडाभ्यां च प्रोक्तं लवणपञ्चकम् ॥ १०८ ॥

पांशुपाक्यबिडाख्यैश्च षट्टपट्कं प्रचक्षते ।

सिन्धूत्थगन्धगुटिकं गडकं बिडाह्वं
शाकंभरं रुचककाचरजो जलोत्थम् ।
भौमोपकादिलवणानि तथा द्विभेदाः
क्षाराश्च लावणिकवर्ग इति प्रदिष्टः ॥ १०९ ॥

त्रिगन्धकम्[1] ।

गन्धतालशिलामिस्तु त्रिगन्धकमितीरितम् ॥ ११० ॥

रङ्गाकृष्टिः[2] ।

रङ्गाकृष्टिं प्रवक्ष्यामि यथाज्ञातं तु तत्त्वतः ।
न कुत्रचित्प्रयोगोऽस्ति शास्त्रे वाऽपि न दृश्यते ॥ १११ ॥
रसोपरसधातूनां रङ्गद्रावं तु शोभनम् ।
एतद्बौद्धा विजानन्ति भोटदेशनिवासिनः ॥ ११२ ॥
मणैकं लोहचूर्णस्य स्वर्जिकाया मणद्वयम् ।
त्रिभागं चूर्णकं दत्वा ह्येकस्थमतिमर्दयेत् ॥ ११३ ॥
क्षिप्त्वा चूर्णं तु मृद्भाण्डे ह्यजामूत्रेण पूरयेत् ।
चुल्लिकोपरि संस्थाप्य वह्निं प्रज्वालयेत्ततः ॥ ११४ ॥
यदा फेनस्समागच्छेच्छुक्लवर्णस्तदूर्ध्वतः ।
अन्यपात्रे तदा स्थाप्यं यावद्भ्राति रक्तताम् ॥ ११५ ॥
पश्चात्तं रक्तफेनं च क्षिपेत्पात्रान्तरे पुनः ।
क्षीणे मूत्रजले दद्याद्रक्तं च दृश्यते ॥ ११६ ॥

---

1. रसकामधेनुतः । 2. रससारतः ।

साधद्रक्तं तु गृह्णीयात्पुन पात्रे निधापयेत् ।
यदा रक्तं न दृश्येत तदा वह्निं निवारयेत् ॥ ११७ ॥

रक्तं वस्त्रेण संगाल्य मलशोषं विवर्जयेत् ।
श्वेतफेनेन संयुक्तं तस्यैव जलशोषणम् ॥ ११८ ॥

काचसारितघट्या च तद्धार्यं तदनन्तरम् ।
बृहद्भाण्डं समादाय कुक्षौ च छिद्रसंयुतम् ॥ ११९ ॥

भाण्डमध्ये घटीं क्षिप्त्वा मुखं छिद्रेण योजयेत् ।
[1]घटी चैका च नुञ्जा स्याच्चस्या नालमधोमुखम् ॥ १२० ॥

रुध्वा तदा तयोस्सन्धिं मध्ये चिल्लाणक भवेत् ।
भाण्डं वालुकयाऽऽपूर्य तस्य द्वारं निरुन्धयेत् ॥ १२१ ॥

चह्निप्रज्वालनं तावद्यावच्चिल्लाणको द्रवेत् ।
शीतं यन्त्र समुत्तार्य घटीं प्रक्षालयेत्ततः ॥ १२२ ॥

द्रावं क्षिप्त्वा पुनर्दद्यात्पुन· पाको विधीयते ।
एवं रङ्गद्रुति· प्रोक्ता द्वेगयन्त्रेऽतिशोभना ॥ १२३ ॥

तालो नाग: शिला चौरश्शुल्वं हंसश्च गन्धक· ।
एते रङ्गं विमुञ्चन्ति विद्रुमं गैरिकं तथा ॥ १२४ ॥

वालुकाद्वेगयन्त्रेण पिच्छा केशा द्रवन्ति च ।
अम्लादिद्रावणं कार्यं यन्त्रेणानेन यत्नत: ॥ १२५ ॥

तारारिष्टम् ।

तारारिष्टं रञ्जितं तु कपाल्यादिकरञ्जकै: ।
नाशयेत्तारकं क्षिप्रं सर्वलोहस्य कालिकाम् ॥ १२६ ॥

---

1. तदास्ये काचनालं च तच्च नालमधोमुखम् । इति पाठभेद: ।

कपालीयोगाः[1] ।

शुल्वपत्रपलैकं तु पलार्धं गन्धकस्य च ।
टङ्कणं कर्षमेकं तु कर्षैका रसकज्जली ॥ १२७ ॥

माक्षिकं कर्षमेकं तु सर्वमेकत्र कारयेत् ।
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ॥ १२८ ॥

तं खोटं सूक्ष्मचूर्णं तु [2]दनुजाम्लेन मर्दयेत् ।
आरण्यगोमयेनैव पुटान्दद्याच्चतुर्दश ॥ १२९ ॥

इन्द्रगोपकसङ्काशं जायते नात्र संशयः ।
तच्चूर्णं मधुना युक्तं शुद्धतारं तु रञ्जयेत् ॥ १३० ॥

रञ्जयेत्तीक्ष्णि वाराणि शोभनं हेम जायते ।
एष कापालिकायोगस्सर्वलोहानि रञ्जयेत् ॥ १३१ ॥

रञ्जयेद्रुद्रसूतं च वज्रवल्लं च रञ्जयेत् ।
धारचूर्णपलैकं च मृतनागं पलं तथा ॥ १३२ ॥

वङ्गाभ्रकं पलैकं च तीक्ष्णचूर्णं पलं तथा ।
त्रिशुल्वं नागवङ्गौ च शतैकांशो समन्वितम् ॥ १३३ ॥

त्रिशुल्वं गैरिकैकैकमथवा तीक्ष्णमाक्षिकम् ।
अथवा तीक्ष्णभागौ द्वौ त्रयो घोपात्रवोरगात् ॥ १३४ ॥

ताम्रस्य नव भागास्युस्तारभागचतुष्टयम् ।
अथवा देवदेवेशि ! माक्षिकस्य पलद्वयम् ॥ १३५ ॥

मयूरग्रीवतुल्यैकं मृतनागपलं तथा ।
अथवा वङ्गनागाभ्रमेकैकं सुरवन्दिते ! ॥ १३६ ॥

तीक्ष्णद्वयं त्रिशुल्वं च हेमताप्यचतुष्टयम् ।
यद्वा विमलवैक्रान्तं वङ्गं नागस्तृतीयकम् ॥ १३७ ॥

---

1. रसार्णवतः । 2. चणकाम्लेन इति पाठः ।

सशुल्बमथवा हेम विमलं च भुजङ्गमः ।
एषामन्यतमं देवि ! [1]पूर्वकल्पसमन्वितम् ॥ १३८ ॥

अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ।
पुटयेत्पूर्वयोगेन रञ्जयेत्पूर्वयोगतः ॥ १३९ ॥

नाग शुल्बं तथा तीक्ष्णं [2]कापालीक्रम उत्तमः ।
तेनैव रञ्जयेत्तारं ससवारं पुनः पुनः ॥ १४० ॥

तेनैव रञ्जयेद्धेम ससवारं पुनः पुनः ।
पक्वबीजमिदं श्रेष्ठं सर्वकर्मणि योजयेत् ॥ १४१ ॥

[3]वङ्गं तीक्ष्णं कपाली च शुल्बतारं च रञ्जयेत् ।
रञ्जयेत्सह हेम्ना तु भवेत्कुङ्कुमसन्निभम् ॥ १४२ ॥

रक्तैतले निपिक्तं तु लोहसङ्क्रान्तिनाशनम् ।
आरकापालिचूर्णं तु शुद्धतारं तु रञ्जयेत् ॥ १४३ ॥

विमलेन च नागेन कपाली परमेश्वरि ! ।
रञ्जयेत्सर्वलोहानि तारं हेम विशोषत ॥ १४४ ॥

रञ्जयेत्त्रीणि वाराणि जायते हेम शोभनम् ।
तेनैव रञ्जयेद्धेम ससवारं पुनः पुनः ॥ १४५ ॥

वङ्गं नागं तथा कान्तं शुल्बं तीक्ष्णं च माक्षिकम् ।
रविनागकपाली च शुल्बतारं च रञ्जयेत् ॥ १४६ ॥

रञ्जयेत्त्रीणि वाराणि तारारिष्टं तु जायते ।
तेनैव रञ्जयेद्धेम ससवाराणि पार्वति ! ॥ १४७ ॥

---

1. पूर्वकल्पस्तु पलार्धगन्धकं कर्षकज्वलीमाभ्रिकटङ्कणैः पूर्वयोगेन पुटयेदारण्यगोमयेनेति रसकामधेनुः ।
2. पूर्ववत्खोटं कृत्वाऽम्लेन मर्दयित्वा चतुर्दशधा पुटनम् ।
3. वङ्गतीक्ष्णकपाल्या चेति पाठः ।

रक्तवर्गनिपिक्तं तु लोहसङ्क्रान्तिनाशनम् ।
लवणोदनिपिक्तं तु लोहसङ्क्रान्तिनाशनम् ॥ १४८ ॥
वङ्गं नागं तथा शुल्वं कपाली सुरवन्दिते ! ।
हिङ्गुलं नीलकाचेन तुत्थाम्ललवणेन च ॥ १४९ ॥
विषपित्ताम्लपिष्टेन हन्यात्सङ्क्रान्तिकालिकाम् ।
गैरिकं गन्धकं सूतं तिलतैलेन पेषयेत् ॥ १५० ॥
लेपयेत्तारपत्राणि दत्त्वा शुल्वकपालिकाम् ।
ऊर्ध्वाधस्त्वन्धमूषायां शुभं हेमदलं भवेत् ॥ १५१ ॥
भागैकं हरितालस्य भागैकं गैरिकस्य च ।
माक्षीककल्कभागैकं चत्वारो [1]गोलकस्य च ॥ १५२ ॥
अन्धमूषागतं ध्मातं हेम रञ्जयति क्षणात् ।
अनेन क्रमयोगेन चतुर्वारं तु रञ्जयेत् ॥ १५३ ॥
पक्वबीजमिदं श्रेष्ठं बालार्कसदृशप्रभम् ।
तेन वर्णद्वयोत्कर्षः षोडशांशेन जायते ॥ १५४ ॥
रक्तैले निपिक्तं तु लोहसङ्क्रान्तिनाशनम् ।

मूर्तिबन्धरसलक्षणम्[2] ।

गुरुत्वमरुणत्वं च तेजसा सूर्यसन्निभम् ॥ १५५ ॥
शिखिमध्ये द्रुतं तिष्ठेन्मूर्तिबन्धनलक्षणम् ।
शलाकाजार(ग्रह)णाद्वाऽपि मूर्तिबन्धत्वमिष्यते ॥ १५६ ॥

पट्टबन्धरसलक्षणम्[2] ।

श्वेतं पीतं गुरु तथा मृदुसिक्थकसन्निभम् ।
अग्निमध्ये यदा तिष्ठेत्पट्टबन्धस्य लक्षणम् ॥ १५७ ॥

---

1. मनश्शिलायाः । 2. रसार्णवे ।

एतल्लक्षणसंयुक्तं सूर्यकोटिसमप्रभम् ।
पट्टबन्ध तु वल्लाभं खेचरत्वादिकारकम् ॥ १५८ ॥

खोटबद्धरसलक्षणम्[1] ।

कुक्कुटाण्डनिभं यत्तु लक्ष्यते सैन्धवं यथा ।
आवर्तिते रसस्तद्वत्खोटबद्धस्य लक्षणम् ॥ १५९ ॥

अथवा छेदने स्निग्धं रश्मिना मृदुता भवेत् ।
अक्षयं कठिनं श्वेतं खोटबन्धस्य लक्षणम् ॥ १६० ॥

नागजीर्णशुद्धरसलक्षणम्[1] ।

श्वेतं च विद्धि सुस्निग्धं गुरुभोजनभोजि(मेदि)नम् ।
नागजीर्णं विजानीयाद्रसेन्द्रं कफकोपनम् ॥ १६१ ॥

आरजीर्णशुद्धरसलक्षणम्[1] ।

आकृष्णश्चपलो रूक्षः कपिलः कालिकावृतः ।
तमारजीर्णं जानीयात्सूतकं वातकोपकम् ॥ १६२ ॥

रसकजीर्णशुद्धरसलक्षणम्[1] ।

प्रागुक्तलक्षणैर्युक्तं समस्तैर्जीर्णतां गतम् ।
तथा रसकजीर्णं च रसेन्द्रं सान्निपातिकम् ॥ १६३ ॥

तादृशं वर्जयेद्यत्नात्तथा खलु घनं गुरु ।

---

1. रसार्णवे ।

आनन्दकन्दस्य सपरिशिष्टस्य वर्णानुक्रमणिका ॥

विषयाः ।	पृष्ठसंख्या	विषयाः ।	पृष्ठसंख्या
अ		अन्नपाकक्रमः	३४५
अक्षरा	६३७	अपत्रा	६३७
अग्निजारः	५४७	अपामार्गः	६५३
अग्निजारस्य गुणाः	,,	अभिषेकः	४८९
अग्निजिह्वकबिडः	७७	अभिषेकसमयः	६७८
अग्निबन्धः	६८३	अभ्यङ्गरसायनं	२६७
अङ्कोलकल्पः	२६३	अभ्यङ्गविधिः	२९८
अङ्गनायिकाकल्पः	४१०	अभ्रकं	५३७
अङ्गारकोष्ठी	५१७	अभ्रककठिनसत्वं	५९१
अङ्गाराः	५६०	अभ्रकगुणाः	१३१–५४१
अजपा मुद्रा	३५३	अभ्रकचारणम्	५९
अञ्जनविधिः	२९२	अभ्रकचारणे फलम्	५८
अणुतैलं	२९४	अभ्रकचारणे श्रेष्ठा दिव्यमूल्यः	,,
अतसीवल्ली	६३८	अभ्रकचारणे संस्कारः	५३
अत्यम्लपर्णी	६४८	अभ्रकजारणम्	८०
अधःपातनविधिः	४८	अभ्रकजारणे फलं	८१
अधःपातनयन्त्रं	४८–४२७–५१०	अभ्रकजीर्णरसभस्म	१४२
अनलदलम्	४८२	अभ्रकद्युतिः	८७–१२१–१३५
अनिलदोषः	५	अभ्रकद्युतिभस्म	१३५
अनुपानविधिः	३०७	अभ्रकबीजपाकः	५९७
अनुवासनं	४९	अभ्रकभस्म	५३८
अनुसारणा	९१–९३	अभ्रकभस्मकरणे विशिष्टा-	
अन्धमूषा	५१५	स्संस्काराः	,,

विषया ।	पृष्ठसख्या	विषया ।	पृष्ठसख्या
अभ्रभस्मनोऽमृतीकरणविधि	५४१	अशुद्धकान्तलोहसेवने दोषा	५७२
अभ्रकभेदा	१३२	अशुद्धताम्रसेवने दोषा	५७२
अभ्रकमृदुसत्वं	५९६	अशुद्धतालकसेवने दोषा	५७७
अभ्रकरसायनं	१४२	अशुद्धनागसेवने दोषा	५८८
अभ्रकसत्वगुणा	६००	अशुद्धमन शिलासेवने दोषा	५३०
अभ्रकसत्वनिर्मलीकरणम्	५९८	अशुद्धमाक्षिकसेवने दोषा	५३२
अभ्रकसत्वनिर्माणम्	६०	अशुद्धरजतसेवने दोषा	५६९
अभ्रकसत्वपातनम्	१३३–५२४	अशुद्धवङ्गसेवने दोषा	५८८
अभ्रकसत्वभस्म	१३३	अशुद्धस्वर्णसेवने दोषा	५६३
अभ्रकसत्वमृदूकरणम्	६१	अश्वगन्धाकल्प	२३०
अभ्रकसत्वरसायनसेवाक्रम	१३४	अष्टवर्ग	६५१
अभ्रकसत्वसिन्दूरविधि	५९८	असह्याग्नि रसदोष	५
अभ्रकसिद्धि सत्वपातनाय	५९१	अहिफेनं	५१३
अभ्रकस्वरूपम्	१३२	आ	
अभ्रकाभिषेक	५३	आकरकोष्ठी	५१७
अभ्रकोत्पत्ति	१३१	आकाशयन्त्रं	६८१
अमरीकल्प	३७३	आखुकर्णी	६४३
अमृतस्रवा	६२१	आखुपाषाण	५५६
अमृतोद्भवमन्न	१२८	आग्नेयो रसदोष	४
अम्लकाञ्जिकवर्ग	६९१	आचमनविधि	२८७
अम्लदोषहरयोग	१०७	आचार्यदीक्षा	३९
अम्लपत्री	६६६	आदानविसर्गकालस्वरूप	३३२
अम्लवर्ग	६७३	आदित्यपुत्री	६५७
अम्लवेतस	५६०	आदित्यभक्ता	६५०
अम्लवेतससन्धानक्रम	६७३	आन्तरालिकयन्त्रं	४९८
अयोनाग	४८३	आप्यो रसदोष	४
अरण्यकार्पासी	६५१	आभासबन्ध	६७२
अरिष्टमद्य	३३५	आमलकीकल्प	२१९

विषयाः ।	पृष्ठसंख्या
आरजीर्णाशुद्धरसलक्षणं	७०१
आरोटबन्धः	६७९.
आरोटरसः	१०८–१४८
आरोटरससेवाक्रमः	१०८
आवर्तकी	६६६
आवर्तनविधिः	५१६
आवर्तितद्रव्यस्वरूपं	५१७
आवर्तितलोहविशुद्धिलक्षणं	६७७
आवर्तितलोहादि स्वरूपं	,,
आवापः	४८९-
आसनविधिः	३५२
आसवमद्यं	३३५
इ	
इन्द्रवल्लीकल्पः	२२९
इरिन्दरीकल्पः	४१४
इष्टिकायन्त्रम्	५००
ई	
ईश्वरी	६३१
उ	
उच्चटा	६३१
उच्चटाकल्पः	४१८
उत्तारणं	४८५
उत्थापनं	४६-४८७-४९०
उत्पाटनं	४९३
उदकबन्धः	४२६
उदुंबरलता	६३९
उद्वर्तनयोगाः	२६८
उद्वर्तनविधिः	२९७

विषयाः ।	पृष्ठसंख्या
उपरत्नानि	५२३-६२१
उपरसाः	* ५२२
उपरसानां शोधनम्	५६१
उपःपानगुणाः	२८३
उपःपानरसायनं	२७७
उष्णीषधारणविधिः	३०२
उष्णोदककल्पः	४३१
ऊ	
ऊर्ध्वपातनं	४७
ऊर्ध्वपातनयन्त्रं	४९७
ऋ	
ऋतुचर्या	३२८
ऋद्धिः	६५६
ऋषभकः	६५७
ए	
एलाद्यं तैलम्	२६५
एकविंशतिकः	४८५
ऐ	
ऐन्द्री	६४३
ओ	
ओड्याणबन्धः	३५६
औ	
औपाधिका दोषाः	५
क	
कङ्काल खेचरीकल्पः	४१३
कच्छपयन्त्रं	४२८
कज्जली	४८१
कज्जलीबन्धः	६८०

विषयाः ।	पृष्ठसंख्या	विषयाः ।	पृष्ठसंख्या
कञ्चुकाः	५	काचः	५६०
कञ्चुकीकल्पः	२५१	काचलवणं	५५९
कञ्चुकोष्णीषपादत्रधारण-विधिः	३०२	काण्डीरः	६५४
कटुतुंबीकल्पः	४२२	कान्तं	१२५-५७२
कटुतुंबी	६४२	कान्तग्रहणविधिः	५७२
कण्टकारी	६५२	कान्तजीर्णरसभस्म	१४९
कन्दर्पजलूका	४८०	कान्तद्युतिः	१३१
कन्दुकयन्त्रं	५०४	कान्तबन्धः	४६४
कपर्दः	५५५	कान्तभस्म	१२८
कपालीयोगाः	६९८	कान्तभस्मगुणाः	१२९-५८६
कपिकच्छूः	६५७	कान्तभेदाः	१२५
कपोतपुटं	५२०	कान्तरसायनं	१४२
कपोती रसदोषः	५	कान्तलक्षणम्	१२५ ५८५
कम्पिल्लकः	५५०	कान्तलोहरसायनसेवाक्रमः	१२९
करवीरलता	६३६	कान्तवज्रजीर्णरसभस्म	१५३
करीरी	६३७	कान्तवज्ररसायनम्	१४१
करुणाकरयन्त्रं	६८६	कान्तवज्राभ्रकजीर्णरसभस्म	१५३
कर्कोटकी	६४७	कान्तशुद्धिः	१२७-५८०
कर्तरीकल्पः	४२५	कान्तसत्वजारणम्	८२
कल्कबन्धः	६८०	कान्तसत्वपातनं	१२६
काकजङ्घा	६४९	कान्तसिद्धिक्रमः	५८०
काकतुण्डी	६५१	कान्तस्वरूपं	१२७
काकमाची	६५०	कान्ताभ्रजीर्णरसभस्म	१४९
काकिनी	६२३	कान्ताभ्ररसायनम्	१४३
काकिनीलक्षणं	८	कापालियन्त्रम्	५०८
काकिनीत्वापादनं	,,	कापालियोगाः	६९८
काकोली	६५६	कामसेवाप्रकारः	३२१
		कामेश्वरीघुटिका	१६१

विषयाः।	पृष्ठसंख्या
कांस्यगुणाः	५९३
कांस्यं	५९२
कांस्यभस्म	५९४
कारवी	६४१
कालविध्वंसिनी घुटिका	१६५
कालविभागः	३२८
कालिका रसदोषः	५
कासीसं	५५१
किट्टगतिः रसदोषः	४
कुक्कुटपुटं	५२०
कुक्कुटीकल्पः	२५२
कुटजवल्ली	६३७
कुटीप्रावेशिकरसायनं	३६६
कुन्तवेधः	४९३
कुमारबन्धः	६८२
कुमारी	६६०
कुमारीकल्पः	२२६
कुमुदिनीकल्पः	४२०
कुलमूलिकाबन्धाः	४०८-४१६
कूपिकादिस्वरूपं	५२१
कूपिकापाकविधिः	६२०
कूर्मलता	६३९
कृष्णलता	६३१
कृष्णवर्गः	६७१
कृष्णवैक्रान्तबन्धः	४६२
केशधूपनविधिः	३००
केशरञ्जनतैलं	२६९
केशरञ्जनयोगाः	,,

विषयाः।	पृष्ठसंख्या
कोकिलाः	४८५
कोकिलाक्षः	६५२
कोशातकी	६५९
कोष्ठिनायन्त्रं	५०२
कोष्ठिकोपयुक्ता मृत्	५२५
कोष्ठी	५१७
कोष्ठीयन्त्रम्	५०६
क्रामणानि	१६७
क्रिमिपातनयोगाः	१०८
क्रियाहीनबन्धः	६७९
क्षत्रियजातीयवज्रमारणं	६११
क्षारदोषहरयोगः	१०७
क्षारबन्धः	६७९
क्षारवर्गः	६७२
क्षीरकन्दा	६५१
क्षीरकन्दाकल्पः	४२३
क्षीरकाकोली	६५६
क्षीरवर्गः	६७२
क्षुद्राम्लिका	६६२
क्षेत्रपालमन्त्रोद्धारः	३५
क्षेपवेधः	४९५
क्ष्मापालकल्पः	४१६

ख

खर्परी	५४८
खर्परीगुणाः	,,
खर्परीशुद्धिः	,,
खर्परीसत्वपातनं	,,
खल्वयन्त्रम्	४९५

विषयाः ।	पृष्ठसंख्या
खवलभीयन्त्रम्	४२६
खवल्ली	६६३
खेचरयन्त्रम्	७०८
खेचरीघुटिका	१६२
खेचरीजारणा	९८
खेचरी मुद्रा	३७६
खोटवद्धरसलक्षणं	७०१
खोटवद्धरससेवाप्रकारः	१०८
खोटवद्धरससेवायां क्रामणम्	१०९
खोटबन्धः	६७९-६८०

ग

गगनेश्वरीघुटिका	१६५
गङ्गासागरयन्त्रम्	५०५
गजचर्मरसदोषः	५
गजपुटं	५१९
गण्डूषविधिः	२९४
गणपतिमन्त्रः	३४
गन्धकः	१९३-१२३
गन्धकगुणाः	५२५
गन्धकचारणम्	५९
गन्धकतैलं	५२५
गन्धकद्रुतिः	५२६
गन्धकपिष्टी	३९७-४६८
गन्धकपिष्टीजारणम्	३९९,४६९
गन्धकपिष्टीमारणम्	४७०
गन्धकपिष्टीस्तंभनं	३९९-४६९
गन्धकबन्धः	४०१-४६५
गन्धकभावना	५८

विषयाः ।	पृष्ठसंख्या
गन्धकभेदाः	१९६
गन्धकरसायनं	१९७
गन्धकशुद्धिः	१९६-१२३
गन्धकसत्वपातनं	१२६
गन्धोत्पत्तिः	१९३
गन्धर्वा	६३१
गन्धानुलेपनविधिः	३०१
गरुडवल्ली	६३४
गरुडोद्धारः	६२६
गरुडोद्धारगुणाः	६२६
गर्भद्रावणयोग्यबीजसिद्धिः	८३
गर्भद्रावणे मूषायन्त्रम्	८५
गर्भद्रुतिः	८३–४९२
गर्भद्रुतिप्रकाराः	८५
गर्भयन्त्रम्	४९९–५०६
गर्भसार्यन्त्रं	६८४
गारकोष्ठी	५१८
गारमूषा	५१२
गिरिकर्णी	६४३
गिरिजा रसदोषः	५
गिरिसिन्दूरं	५५०
गुग्गुलुः	५५७
गुग्गुलुकल्पः	२३३
गुञ्जा	६५३
गुडूची	६४८
गुडूचीकल्पः	२०८
गुह्यनागः	४८६
गुह्यसूतः	५१

विषयाः ।	पृष्ठसंख्या
गैरिकं	५४३
गैरिकस्य गुणाः	,,
गोक्षुरः	६४२
गोजिह्वा	६४१
गोनसा	६२१
गोमारी	६३१
गोमेदकः	६१९
गोमेदकगुणाः	६२०
गोरक्षदुग्धी	६१५
गोरोचनलता	६३७
गोर्वरपुटम्	५१९
गोलमूषा	५१४
गोवृक्षी	६३३
गौरीपाषाणकम्	५५१
ग्रसयन्त्रम्	५०१
ग्रासमानम्	४९१
ग्रासमानभेदेन स्वरूप-भेदः	१०४
ग्राह्याग्राह्यकांस्यस्वरूपं	५९३
ग्राह्याग्राह्यताम्रस्वरूपं	५७२
ग्राह्याग्राह्यनागस्वरूपं	५८८
ग्राह्याग्राह्यपित्तलस्वरूपं	५९२
ग्राह्याग्राह्यरजतस्वरूपं	५६८
ग्राह्याग्राह्यरसस्वरूपं	६८४
ग्राह्याग्राह्यस्वर्णस्वरूपं	५६३
ग्राह्याग्राह्याभ्रकस्वरूपं	१३२
ग्रीष्मर्तुचर्या	३३७
ग्रीष्मर्तुस्वरूपं	३३०

घ

घटीयन्त्रम्	५००
घुटिकासिद्धौमन्त्रप्रयोगः	१५८-१६९
घृतगन्धा	६३८
घोषाकुष्ठवल्लं	४८०

च

चक्रयन्त्रम्	५०७
चतुर्बीजक्रमः	६८
चन्दनाद्यं तैलं	२६८
चन्द्रकान्तः	६२२
चन्द्रकान्तगुणाः	,,
चन्द्रदलं	४८२
चन्द्रानलदलं	,,
चन्द्रार्कः	४८४
चन्द्रोदकबन्धः	४२६
चपलः	४८७-५४३
चपलगुणाः	५४३
चपलबन्धः	४७९
चपलस्वरूपं	५४३
चमरिका	६३६
चाण्डाली	६३३
चारणं	५०-४९२
चारणीयाभ्रकसंस्कारः	५३
चिटिचिटी रसदोषः	४
चिल्लकल्पः	२२३-४२०
चित्रभानुविडः	७८
चिल्लवल्ली	६४०
चुल्लीविधानं	६९१

विषयाः।	पृष्ठसंख्या	विषयाः।	पृष्ठसंख्या
छ		जीर्णद्रव्यमानभेदाढ्ये विशेषः	१०३
छगणम्	५६०	जीर्णाभ्रकरसलक्षणम्	८१
छत्रिणी	६३३	जीवकः	६५७
ज		जीवगतिः	४
जतुका	६६०	जीवत एव दिव्यदेहसिद्धिः	१७२
जलकूर्मयन्त्रं	६८७	जीवन्ती	६५९
जलगतिः	४	जीवन्मुक्तलक्षणम्	३४९
जलपानकल्पः	२७६	जीवन्मुक्तिः	,,
जलपानकल्पे पथ्यम्	२७९	जीवन्मुक्तिसाधकशरीरस्थैर्य-संपादनम्	३५१
जलपानकल्पेऽपथ्यम्	,,	ज्योतिर्द्रुमकल्पः	२२९
जलबन्धः	६८२	ज्योतिर्यन्त्रं	६८६
जलमृत्तना	५००	ज्योतिर्लता	६३३
जलशुक्तिः	५५५	ज्योतिष्मती	६४२
जलाजीर्णं	२८१	ज्योतिष्मतीकल्पः	२३०
जलाजीर्णपरिहारः	,,	ज्योतिष्मतीतैलकल्पः	४२१
जलूकाबन्धः	४७९	ज्योतिष्मतीतैलाहरणम्	२३०
जारणा	६०-४९१-४९३	ज्वालामुखविडः	७७
जारणाफलम्	८२	ट	
जारणायन्त्रम्	६७१	टङ्कणं	५५०
जारणार्हौ बडवानल-विडः	३८७	ठ	
जारणाविशेषाः	९७	ठालनं	४८७
जारणे क्रमः	६०-१०४	ड	
जारणे ग्रासमानभेदेन स्वरूप-भेदः	१०४	डमरुयन्त्रं	५००
जारितरसमारणम्	१४०	डोलायन्त्रम्	५०५
जालन्धरबन्धः	३५६	ढ	
जिह्वाविलेखनविधिः	२९२	ढेकीयन्त्रं	५०४

विषयाः ।	पृष्ठसंख्या	विषयाः ।	पृष्ठसंख्या
त		तिर्यक्पातनं	४८
तण्डुलीयकः	६६२	तिर्यक्पातनयन्त्रम्	४९७
तप्तखल्वयन्त्रम्	४९६	तिलश्रीरिणिकाकल्पः	२६२
तरुणबन्धः	६८२	तिलकन्दा	६३८
ताडनं	४८५	तीक्ष्णम्	१३१-५७८
तापिकायन्त्रं	४९९	तीक्ष्णजारणम्	८२
तांबूलचर्वणविधिः	२९६	तीक्ष्णभस्म	१२८
ताम्रं	५७२	तीक्ष्णभस्मगुणाः	५८६
ताम्रबीजं	७६	तीक्ष्णशुद्धिः	१२७
ताम्रभस्म	५७४	तीक्ष्णाग्रम्	६३
ताम्रभस्मगुणाः	,,	तुम्बिनी	६३५
ताम्रभस्मशुद्धिः	५७६	तुल्ययन्त्रम्	५०१-६७६
ताम्रभेदाः	५७२	तुवरकल्पः	२५९
ताम्रवल्ली	६३४	तुवरी	५५१
ताम्रशुद्धिः	५७३	तृणज्योति कल्पः	४१८
तारकृष्टी	४८२	तैलकन्दः	६६४
तारबीजं	७३	तैलपातनविधिः	६९२
तारबीजरञ्जनं	९१	तैलवर्गः	६७३
तारराक्षी	४८२	त्रिकर्णिका	६६४
ताराभ्रं	६३	त्रिगन्धकः	६९६
तारारिष्टं	६९७	त्रिदण्डी	६३५
तालकं	५२७	त्रिपुरभैरवी घुटिका	१६७
तालकगुणाः	५३०	त्रिफलाकल्पः	२२०
तालकबन्धः	४७०	त्रिशूली	६३५
तालकभेदाः	५२७	द	
तालकशुद्धिः	,,	दग्धरङ्गाकल्पः	४२१
तालकसत्वपातनं	५२८	दन्तशोधनविधिः	२८८
ताली	६६३	दशशृङ्ग(सङ्ग)लिकाबन्धः	४४५

विषया ।	पृष्ठसंख्या	विषया ।	पृष्ठसंख्या
दिनचर्या	२८०	**ध**	
दिव्या गुटिका	१६०	धातुमलायुत्पत्तिक्रम	२४०
दिव्यौषधिग्रहणविधि	२७३	धान्याभ्रक	१३३ ४८५
दिव्यौषधिग्रहणयोग्यस्थल निर्देश	२७३	धान्याम्लसन्धानम्	४४
दिव्यौषधिबीजानि	६७०	धारणम्	३६१
दिव्यौषधिमहौषधि-प्रशंसा	६२८	धूपयन्त्रम्	५०३—५१०
दिव्यौषधिरसायनानि	२०४	धूम	४
दिव्यौषध्यश्चतुष्पष्टि	६२९	धूमगति	,,
दीपन	४९ ४९१	धूमपानविधि	२९५
दीपिकायन्त्रं	५०१	धूमवेध	४९४
देवदाली	६३४ ६४४	धौति	४८८
देवदालीकल्प	२११ ४२४	ध्यानम्	३६२
देहकेशधूपनविधि	३००	**न**	
देहवेधक्रम	९४-१०५	नरसारकल्प	४११
दोलायन्त्रम्	५०१	नवनीतगन्धी	६३४
दोषशोधकयोग	१०७	नवरत्नानि	६२१
द्रुति	४९२	नवसार	५०६
द्रुतिबन्ध	४४४ ६८१	नष्टपिष्टि	४९०
द्रुतिमेलनम	८७	नखविधि	२९३
द्रुतिमेलनविधि	४४९	नाकुली	६५०
द्रोणपुष्पी	६६१	नागगुणा	५९१
द्वन्द्वजारणम्	८२	नागदन्ती	६६४
द्वन्द्वमेलनम्	६३	नागदीप	५
द्वन्द्वमेलनाय मूषालेप	६२	नागबीजं	७६
द्वन्द्वयान	४८८	नागबीजरञ्जन	८८
द्वन्द्वितानामभिषेक	६७	नागभस्म	५८८
		नागमायूरयन्त्र	५०७

विषयाः।	पृष्ठसंख्या
नागशुद्धिः	५८८
नागाभ्रं	६३
नागजीर्णाशुद्धरसलक्षणं	७०१
नागिनी	६३२
नाभसदोषः	५
नाभियन्त्रं	५००
नारङ्गदोषः	५
नालिकायन्त्रं	५०५-१०२
नासाजलपानरसायनं	२८४
निगलबन्धः	४७४
निद्रास्वरूपं	३२६
निद्रासेवने नियमाः	३२६
निम्बगुडी	६३८
नियमनं	४९१
नियामनं	४९
नियामकं यन्त्रं	६७६
निरुत्थलोहभस्मपरीक्षा	४८४-५८५
निरोधनं	४८
निरोधनयन्त्रम्	"
निर्गुण्डीकल्पः	२१५
निर्गुण्डीपञ्चाङ्गकल्पः	२१६
निर्गुण्डीपत्रकल्पः	"
निर्गुण्डीमूलकल्पः	२१५
निर्जीवबन्धः	६८०
निर्बीजबन्धः	६८१
निर्मुखचारणा	४९२
निर्मुखचारणाप्रकारः	५२
निर्वाणदीक्षा	३८
निर्वापः	४८९
निर्वाहणं	४८४
निवापसमयः	६७८
निशाचरमूलिकाकल्पः	४०८
निष्कलरसस्तोत्रं	४१
नीलम्	६१९
नीलगुणाः	"
नीलदोषाः	"
नीलवैक्रान्तबन्धः	४६२
नीलाञ्जनं	५१३
नीलिका	६५८
नीलितैलं	२६५
नीलीकल्पः	२२८
नेत्रप्रक्षालनविधिः	२९६

प

पक्वबीजम्	६८
पक्वबीजजारणम्	८२
पक्वमूषा	५१४
पङ्करसः	४८१
पञ्चकर्माणि	१०६
पञ्चदशघुटिकाफलं	१६८
पञ्चबाणचूर्णं	२४७
पञ्चमृत्तिकाः	६८७
पञ्चरत्नं	६७२
पञ्चरत्नानि	६२१
पञ्चसारः	३३८
पट्टबद्धरसलक्षणं	७००
पतङ्गीरागः	४८९
पथ्याकल्पः	२१८

विषयाः ।	पृष्ठसंख्या	विषयाः ।	पृष्ठसंख्या
पथ्याभेदाः	२१८	पीतजलाजीर्णपरिहारः	२८१
पथ्योत्पत्तिः	"	पीतवर्गः	६७५
पद्मरागादिरत्नोत्पत्तिः	११७	पीतवल्ली	६३४
पद्मवल्ली	६३३	पीतवैक्रान्तबन्धः	४६२
पद्मासनं	३५३	पुटयन्त्रम्	५०२
परमानन्दमूर्तियन्त्रं	६८५	पुटानि	५१२
पाचनं	१०६	पुण्डरीकदीपः	५
पाचकाग्निस्वरूपं	३४६	पुनर्दात्री	६६५
पातनं	४६-४९१	पुनर्नवा	६४६
पातनपिष्टी	४८१	पुनर्नवाकल्पः	२२४
पातालकोष्ठी	५१८	पुंयन्त्रमारणम्	६११
पातालगरुडी	६४२	पुष्पधारणविधिः	३०१
पातालयन्त्रं	५०५-५०२-६८५	पुष्परागः	६०८
पानकं	३३८	पुष्परागगुणाः	"
पारदपूजाफलं	२५	पुष्पाञ्जनं	५५४
पार्थिवदीपः	५	पेरेजंः	६२४
पालिकायन्त्रं	४२९	पोटबन्धः	६८०
पाषाणभेदनः	६६२	पोदारश्रृङ्गी	५५१
पिङ्गेली	५	प्रकाशमूषा	५१५
पिञ्जरी	४८३	प्रतिसारणा	९१-९३
पित्तलम्	५९१	प्रतीवापसमयः	६७८
पित्तलगुणाः	५९२	प्रत्याहारः	३५८
पित्तलभस्म	५९४	प्रपुन्नाटः	६५४
पित्तवर्गः	६७५	प्रबोधविधिः	२८५
पिप्पलीकल्पः	२२२	प्रवाल	६०६
पिष्टिकाबन्धः	६७९	प्रवालगुणाः	"
पिष्टी	४८१	प्राणायामः	३५३
पीतजलाजीर्णलक्षणं	२८१	प्राणायामे मुद्राः	३५१

विषयाः ।	पृष्ठसंख्या	विषयाः ।	पृष्ठसंख्या
फ		ब्रह्मदण्डी	६६२
फटकी	५११	ब्रह्मवृक्षकल्पः	२०४
फुल्लिका	४८९	ब्रह्मवृक्षकल्पसिद्धिः	२०९
ब		ब्रह्मवृक्षतैलकल्पः	२०४
बडवानलविडः	७७ ३८७	ब्रह्मवृक्षनिर्यासकल्पः	२०७
बडवामुखविडः	७७-७९	ब्रह्मवृक्षपञ्चाङ्गकल्पः	२०८
बद्धजारणविधिः	४४३	ब्रह्मवृक्षपल्लवकल्पः	२०१
बद्धरसलक्षणम्	१०२ ४७९	ब्रह्मवृक्षपुष्पकल्पः	२०६
बन्धप्रकाराः	४४४-६७८	ब्रह्मवृक्षबीजकल्पः	२०७
बर्हिचूडा	६६१	ब्रह्मवृक्षमूलगुग्गधालीकल्पः	२०८
बलातैलं	२९८	ब्रह्मवृक्षवल्कलकल्पः	२०७
बहिश्शीत	४९०	ब्राह्मणी	६३८
बाकुची	६५३	ब्राह्मी	६६२
बालकबन्धः	६८१	ब्राह्मीकल्पः	२६२
बालजारणा	६०	**भ**	
बालरसः	८२	भङ्गनी	४८९
बाह्यद्युतिः	८६-४९२	भट्टीयन्त्रं	५०५
बिडः	४९३	भल्लातककल्पः	२२४
बिडमाला	६९२	भस्ममूषा	५१५
बिडमूषा	५१३	भाण्डपुटं	५२०
बिडयोगाः	७७	भावनामात्रा	६९१
बिडलवणं	५५९	भृकंदवः	६६३
बिल्वनी	६३७	भूचरीजारणा	९७
बीजं	४८५	भूतकालान्तकरसः	१७२
बीजरञ्जनं	८९	भूतकेशी	६३१
बीजानि	८३	भूतशुद्धिः	१५
बृहती	६५२	भूतुंबिनी	६३५
बोधिलता	६३८	भूधरपुटं	५२०

विषयाः।	पृष्ठसंख्या	विषयाः।	पृष्ठसंख्या
भूधरयन्त्रं	५०९	मनःशिला	५३०
भूनागः	५४५	मनःशिलागुणाः	५३१
भूनागधौतं	४८८	मनःशिलाभेदाः	५३०
भूनागसत्वगुणाः	५४८	मनःशिलाशुद्धिः	,,
भूनागसत्वपातनं	,,	मनःशिलासत्वपातनं	,,
भूपाटली	६५५	मन्त्रसिद्धासनीकल्पः	४१३
भूम्यामलकी	६६१	मन्मथजल्लूका	४७१
भृङ्गराजः	६४७	मयूरतुत्थं	५४१
भृङ्गराजकल्पः	२२५	मयूरतुत्थगुणाः	,,
भृङ्गवल्ली	६३६	मयूरतुत्थशुद्धिः	,,
भोजनविधिः	३०३	मयूरतुत्थसत्वपातनम्	,,
भोजनानन्तरकर्तव्यं	३११	मरकतं	६०७
भोजने वर्ज्याः प्रकाराः	,,	मरकतगुणाः	,,
म		मर्दनं	४५
मञ्जुमूषा	५१४	मर्दनजल्लूका	४७९
मञ्जूषामूषा	,,	मलवर्गः	६७४
मण्डूकदोषः	५	मल्लिनी	५
मण्डूकप्लुतिः	४	मल्लमूषा	५१४
मण्डूकलता	६३९	महारामेश्वरकल्पः	२६५
मण्डूरं	६०१	महानागा	६३९
मण्डूरगुणाः	६०२	महानीलीतैलं	२६७
मण्डूरभस्म	,,	महापुटं	५१९
मण्डूरशुद्धिः	,,	महाबन्धः	६८३
मदनजल्लूका	४८०	महाविडः	७९
मदनमुद्रा	६९०	महाभैरवीघुटिका	१६७
मदनसुन्दरी घुटिका	१६२	महामुद्रा	३५७
मदयगन्धा	६३९	महामेदा	६५६
मधुरत्रयं	६७६	महामेश्वरीघुटिका	१६३

विषयाः ।	पृष्ठसंख्या
महावैश्वानरविडः	७८
महिषवल्ली	६३०
महौषधिः	६३४-६३५
महौषध्यः	६४१
माक्षिकं	५३२
माक्षिकगुणाः	५३७
माक्षिकभेदाः	५३२
माक्षिकशुद्धिः	"
माक्षिकसत्वपातनं	५३४
माणिक्यं	६०३
माणिक्यगुणाः	"
माणिक्यभेदाः	"
माधवमद्यं	३३५
माधवी	६३९
मार्द्वीकमद्यं	३३५
मित्रपञ्चकं	६७६
मुक्ता	६०५
मुक्तागुणाः	"
मुक्ताभेदाः	"
मुद्रीकरणं	५०
मुण्डभस्म	१२८-५८६
मुण्डशुद्धिः	१२७
मुण्डी	६६०
मुण्डीकल्पः	२१०
मुनिवल्ली	६३८
मुसलमूषा	५१४
मुसलीकल्पः	२२८
मूत्रवर्गः	६७४

विषयाः ।	पृष्ठसंख्या
मूर्च्छा	४६-४९०
मूर्तिबद्धरसलक्षणं	७००
मूर्तिबन्धः	६८२
मूर्वा	६४८
मूलकन्दा	६३८
मूलबन्धः	३५६
मूलिकाकल्पेषु रसाधकादि-मेलनातिदेशः	२६७
मूलिकाबन्धः	४०३-४०५
मूषा	५११
मूषाप्यायनं	५१३
मूषायन्त्रं	५०६-६७६
मूषायामावर्तनविधिः	५६
मूषार्थे श्रेष्ठा मृत्	५१५
मूषावङ्कनालकोष्ठिकोपयुक्ता मृत्	५१५
मृतरसपरीक्षा	६७८
मृतसञ्जीवनीघुटिका	१५८
भेदा	६५६
य	
यवक्षारः	५५७
युवा रसः	८२
योगमूषा	५१२
योगरसायनं	३४८
योगसिद्धिः	३५१
योगसिद्धिदकुटीनिर्माणविधिः	३६६
योगाङ्गानि	३५२
योगाभ्यासफलं	३६५

विषयाः ।	पृष्ठसंख्या	विषयाः ।	पृष्ठसंख्या
र		रसक्रामिका ओपध्यः	६७१
रक्तकञ्चुकदोषः	५	रसगतयः	४
रक्तचर्मदोषः	५	रसगता दोषाः	,,
रक्तपादी	६४५	रसगायत्री	३७
रक्तबिन्दुदोषः	५	रसदीक्षा	३२
रक्तरञ्जनतैलं	८८	रसदीक्षायोग्यातिथ्यादयः	,,
रक्तवर्गः	६७१	रसदोषस्वरूपम्	५
रक्तवल्ली	६३२	रसद्राविका ओपध्यः	६७१
रक्तवैक्रान्तबन्धः	४६१	रसनिर्जीवकर्यं ओपध्यः	६६९
रक्तसुहीकल्पः	४१९	रसनियामिका ओपध्यः	,,
रङ्गाकृष्टिः	६९६	रसपर्यायाः	२
रजतं	५६८	रसपर्यायनिरुक्तिः	,,
रजतगुणाः	५७१	रसपूजाफलम्	२५
रजतभस्म	५६९	रसबन्धकर्म ओपध्यः	६७०
रजतभेदाः	५६८	रसबन्धप्रकाराः	४००-६७८
रजतशुद्धिः	५६९	रसभस्मप्रकारः	१३९-१४८-३८८
रञ्जकयन्त्रं	६८१	रसभस्मलक्षणम्	३९७
रञ्जनं	८८-४९२	रसभेदाः	२
रञ्जनक्रमः	९१	रसभेदानामुपयोगः	४
रत्नद्युतिः	८७-१२१	रसभैरवगायत्री	११
रत्नद्युतिबन्धः	४५८	रसभैरवध्यानं	,,
रत्नधारणविधिः	३०१	रसभैरवमन्त्रोद्धारः	१२
रत्नानि	५२३-६०३	रसमन्त्रोद्धारः	४३
रत्नोत्पत्तिः	११७	रसमारिका ओपध्यः	६७०
रसः	२	रसमुखबन्धः	९३
रसकं	५४८	रसमुखीकरणम्	५०
रसकर्मण्यर्हाः	८	रसमूर्च्छनाविधिः	४०५-४७८
रसकाजीर्णाशुद्धरसलक्षणं	७०१	रसलिङ्गप्राणप्रतिष्ठा	२०

विषयाः।	पृष्ठसंख्या
रसलिङ्गभेदाः	१९
रसलिङ्गार्चना	१३
रसवर्णभेदाः	२
रसशालानिर्माणं	९
रसशिष्यलक्षणम्	७
रससुद्धिः	१३८
रससोधनसंस्काराः	३८५
रससंस्कारप्रकाराः	४३
रससंस्काराः	४३
रससंस्कारा विशिष्टाः	३८३
रससन्ध्याविधिः	१०
रससेवायां पथ्यापथ्यम	११३
रससेवायामपथ्यजनिता रोगास्तत्परिहारश्च	११५
रसस्य औपाधिका दोषाः	५
रसस्य किट्टगतिः	४
,, जलगतिः	,,
,, जीवगतिः	,,
,, धूमगतिः	,,
,, नैसर्गिका दोषाः	,,
,, मुखबन्धः	९३
,, यौगिका दोषाः	५
,, स्थानान्तरगतिः	६
,, हंसगतिः	४
रसाङ्कुशमन्त्रोद्धारः	१२
रसाङ्कुशीध्यानम्	११
,, मन्त्रोद्धारः	१२
रसाञ्जनं	५५२

विषयाः।	पृष्ठसंख्या
रसादिमारणाय द्रव्यमानं	६०२
रसादिभिस्वर्णमारणम्	५६५
रसायनकल्पाः	२६४–४४०
रसायनयोगाः	१४२
रसायनसेवाक्रमः	१३६
रसायनसेवायां क्रमणम्	१३७
रसायनार्हं रससंस्कारः	१३८
रसानोपयोगविधिः	१०८
रसाला	३३८
रसावस्थाः	४
रसेन्द्रपूजाविधिः	१०
रसेन्द्रबलिक्रमः	२४
रसेन्द्रस्तोत्रं	२७
रसेसंस्कारैर्जायमाना गुणाः	१०५
रसोत्पत्तिः	२
रसोपदेशकलक्षणम्	७
रागः	३३९
राजावर्तः	६२५
राजावर्तभस्म	,,
राजावर्तसत्वं	६२६
राजावर्तादिशुद्धिः	६२५
रात्रिचर्या	३१९
रात्रिभोजननियमाः	३२०
रासायनिका ओषध्यः	६७१
रुतसी	६३६
रुदन्ती	६३२
रुदन्तीकल्पः	२१४
रुद्रजटा	६५८

विषयाः।	पृष्ठसंख्या
रूप्यमूषा	५१३
रेखावर्तः	४२०
रोधनं	४९१
ल	
लक्ष्मणा	६६३
लघुबन्धाः	४३०
लवणक्षारः	५५८
-दोषहरयोगाः	१०७
-यन्त्रं	५०३-५०९
-वर्गः	६९६
लशुनवल्ली	६३२
लावकपुटं	५२१
लिङ्गिनी	६४२
लेपवेधः	४२४
लेपार्थे मृत्तिकासाधनं	६८७
लोहगुणाः	१३१
-दण्डकल्पः	४२२
-पर्पटी	६७६
-पाकभेदाः	१२९
-पाकस्वरूपं	५८५
-भस्म	१२८-५८१
-भस्मनोऽमृती-करणं	१२९-५८४-६००
-भस्मसिद्धिः	४८४
-भेदाः	१३१
-रसायनसेवाक्रमः	१२९
-वेधक्रमः	९५
-वेधे क्रामणयोगाः	,,
लोहशुद्धिः	१२७
-संस्कारमन्वाः	१२८
लोहाः	५२३
लोहोत्पत्तिः	५७८
व	
वङ्कनालं	५१८
वङ्कनालोपयुक्तमृल्लक्षणं	५१५
वङ्गम्	५८७
-गुणाः	५८८
-बीजं	७६
-भस्म	५८७
-शुद्धिः	,,
वङ्गाभ्रम्	६३
वज्रं	११८-६०८
वज्रक्षारः	५५८
वज्रकान्ताभ्ररसायनं	१४६
-खेचरी घुट्टिका	१६४
-गता गुणाः	६०९
-गता दोषाः	,,
-घण्टेश्वरीघुटिका	१६६
-जीर्णरसभस्म	१५३
-द्रुतिः	१२१-६१८
-द्रुतिभस्म	१२२
-द्रावणमूषा	५१२
-बन्धः	४४१-४४८
-बीजं	९१
-भस्मगुणाः	१२२-६१८
-भेदाः	११८-६०९

विषया ।	पृष्ठसंख्या
वज्रभैरवीघुटिका	१६६
-मारणविधि	६१० ६१२
मूषा	५१२ ५१४ ५१०
मृदुसत्वभस्म	१२२
मृदूकरण	१२१ ६१६
रसायन	११०-१४१
लक्षण	११८
-वल्ली	६३६
-वल्लीकल्प	२६२
शुद्धि	६१०
संस्कार	११९
हेममेलन	६६ ४५६
हेममेलने मूषालेप	६५
वज्राकर	६०२
वज्रानलनिड	७९
वज्रौघ्रजीर्णरसभस्म	१५३
वज्राभ्ररसायनं	१४५
वज्रेश्वरीघुटिका	१६२
वज्रौदन	१२१ ६१६
वत्सनाभि	१९९ ५५०
वन्दाकल्प	३७६
वन्दाकाहरणविधि	३७६
वमनं	१०७
वरनागं	४८६
वरमूषा	५१३
वरलोह	४८२
वर्ज्यानि दन्तकाष्ठानि	२९१
वर्तलोह	५९३

विषया ।	पृष्ठसंख्या
वर्तलोहगुणा	६९४
वर्तलोहभस्म	५९३ ५९४
वर्तलोहशुद्धि	५९३
वर्षर्तुचर्या	३४१
वर्षर्तुस्वरूपं	३३१
वसन्तर्तुचर्या	३३५
वसन्तर्तुस्वरूप	३३०
वसावर्ग	६७१
वह्निविड	७८
वह्निमृत्तना	६०१
वारवल्ली	६३६
वाराहपुट	५२०
वाराही	६३२ ६४३
वाराहीयोग	२४९
वारणीयन्त्र	६८६
वालुकापुट	५२०
वालुकायन्त्र	५०३ ५०८
वासनागुखचारण	५३ ६८३
विकल्प	४
विजया	२३४-६३४
, कल्प	२३४
भेदा	२३६
विजयाया अग्निपाक	२३९
,, चन्द्रपाक	२४०
, सूर्यपाक	२४०
योगा	२३९ २४१
विजयोत्पत्ति	२३४
विजयालक्षण	२३६

विषयाः ।	पृष्ठसंख्या	विषयाः ।	पृष्ठसंख्या
विजयावर्धनक्रमः	२३७	विषसेवनासेवनयोर्नियमः	२०३
विजयाव्यापत्सिद्धी	२५०	विषोत्पत्तिः	१९९
विजयाहरणविधिः	२३८	विषोदरबन्धः	४२८
विजयोत्पत्तिः	२३४	विषोपद्रवचिकित्सा	२०२
विण्मूत्रोत्सर्जनविधिः	२८६	विषोपद्रवहरमन्त्रप्रयोगाः	२०३
विद्याधरयन्त्रं	५००-६७७	विषोपद्रवाः	२०२
विपरीतकरणी मुद्रा	३६०	विष्णुकन्दः	६६४
विप्रजातीयवज्रमारणं	६१२	विष्णुक्रान्ता	६५४
विमलं	६२६	विसर्पकृद्दोषः	५
विमलगुणाः	६२७	वृद्धदारकल्पः	२६०
विमलशुद्धिः	,,	वृद्धदारकः	६५३
विमलसत्वं	,,	वृद्धबन्धः	६८२
विरुद्धान्नं	३०९	वृद्धिः	६५६
विरुद्धान्नवर्जनोपदेशः	३०९	वृद्धो रसः	८२
विरेचनं	१०७	वृन्ताकमूषा	५१३
विशाला	६३१	वेधः	९३-४१५
विशिष्टरोगेषु दन्तकाष्ठधावन वर्जनातिदेशः	२९०	वेधप्रकाराः	१०२
विशिष्टे काले दन्तकाष्ठधावन निषेधः	२९१	वेधोपयोगिनो बन्धाः	४१०
विशेषजारणाक्रमः	९७	वैक्रान्तं	६२३
विषं	१९१-५१०	वैक्रान्तगुणाः	६२५
विषदोषः	५	वैक्रान्तद्रुतिः	६२४
विषभेदाः	२००	वैक्रान्तबन्धः	४००-४६०
विषमुष्टिः	६५४	वैक्रान्तभस्म	६२३
विषयुक्तौदनलक्षण	३०८	वैक्रान्तशुद्धिः	,,
विषरसायनं	२०१	वैक्रान्तसत्वं	,,
विषशुद्धिः	,,	वैक्रान्तसत्वबन्धः	४६३
		वैडूर्यं	६२०
		वैडूर्यगुणाः	,,

विषयाः ।	पृष्ठसंख्या
वैद्यभागः	४८१
वैश्यजातीयवक्त्रमारणं	६१२
वैश्वानरविडः	७७
व्यञ्जनयोगराट्	२४८
व्याघ्रपादी	६३१
व्यायामविधिः	२९७
श	
शङ्खः	५५४
शङ्खपुष्पी	६४९
शतावरी	,,
शब्दवेधः	४२४
शयनविधिः	३२३
शयनीयप्रकाराः	,
शरद्ऋतुचर्या	३४३
शरद्ऋतुस्वरूपं	३३१
शरपुंखा	६४७
शाकवृक्षकल्पः	४२३
शाल्मलीकन्दः	६६५
शिलाजतु	५४४
शिलाजतुगुणाः	,,
शिशिरर्तुचर्या	३३५
शिशिरर्तुस्वरूपं	३३६
शीथुमद्यं	३३६
शुक्तं	६९५
शुक्तिः	५५५
शुण्ठीकल्पः	२२१
शुद्धावर्तः	४८९
शुनकशाल्मलीकल्पः	२१७

विषयाः ।	पृष्ठसंख्या
शुनकशाल्मलीपुष्पकल्पः	२१७
शुनकशाल्मलीफलकल्पः	,,
शुनकशाल्मलीमूलकल्पः	,,
शुल्वनागं	४८३
शुल्वाभ्रं	६३
शूद्रजातीयवक्त्रमारणं	६११
शृङ्खलाबन्धः	६८१
शैलोदकल्पः	४३३
शोधनत्रयं	६७६
शौचविधिः	२८७
श्रीशैले सिद्धिक्रमः	१९२
श्रीशैले सिद्धिलाभः	१७६
श्वेतगुञ्जाकल्पः	४२५
श्वेतब्रह्मवृक्षकल्पः	२०९
श्वेतब्रह्मवृक्षपञ्चाङ्गकल्पः	,,
श्वेतब्रह्मवृक्षबीजकल्पः	,,
श्वेतरञ्जनतैलं	९१
श्वेतवर्गः	६७५
श्वेतवैक्रान्तबन्धः	४६१
श्वेतार्ककल्पः	२१३
श्वेतार्कपर्णकल्पः	,,
ष	
षड्गुणाभ्रजारणेन सर्वदोषनाशः	१०३
षाडवं	३३९
स	
सकम्पः	४
सजीवबन्धः	६८०

विषयाः ।	पृष्ठसंख्या	विषयाः ।	पृष्ठसंख्या ।
संजीवनीजलकल्पः	४२९	सामुद्रं लवणं	५५८
सत्वं	४८५	सारणा	९१-४९५
सदाचाररसायनं	२८५	सारणातैलं	९२
सन्ध्यावन्दनादि नित्यकर्म-		सारणात्रयं	९१
विधिः	३००	सारणाप्रकारः	९३
सन्यासः	४९७	सारणायन्त्रं	६७७
सप्तधातुवेधः	११६	सारणार्थं वज्रबीजं	९१
सप्तपत्री	६३२	सिक्ता	५६०
सबीजबन्ध	६८१	सिद्धचूर्णं	१५८
समयादीक्षा	३२	सिद्धदीक्षा	५०
समाधि	३६४	सिद्धविडः	८०
समुल्लचारणं	५०-४९२	सिद्धयोगः	२४४
समुद्रशोषी	६५५	सिद्धसारयन्त्रं	६८४
संस्कृतबन्धः	६८३	सिद्धाः	३६
सर्जक्षार	५५८	सिद्धासनं	३५२
सर्जरसः	५५६	सिन्दुवारः	६५१
सर्पिणी	६३२	सिन्दूरं	५५२
सर्वक्षारः	५५६	सीसकं	५८८
सर्वजारको विडः	८०	सूक्तं	६९५
सर्वदोषहरयोगः	१०८	सूर्यकान्तः	६२१
सर्वरत्नद्रुतिः	८७	सैन्धवं	५५९
सर्वर्तुसाधारणी चर्या	३४४	सोमराजीकल्पः	२५९
सर्वस्वादुगणः	२४३	सोमलताकल्पः	२५३
सलोमी	५	सोमलताभेदाः	"
सहदेवी	६६३	सोमलतामूलरूपं	"
साधकदीक्षा	३७	सोमलतोपयोगविधिः	२५५
साध्ययन्त्रं	६८६	सोमवल्ली	६२९
सायुणिः	५५६	सोमवृक्षः	६३०

विषयाः।	पृष्ठसंख्या	विषयाः।	पृष्ठसंख्या
सोमानलयन्त्रं	५०५	स्वर्णं भस्म	१२३-५६९
सौराष्ट्री	५१६	,, भस्मगुणाः	५६७
सौवर्चलं लवणं	५१९	, भेदाः	१२२-५६२
सौवीराञ्जनं	५१३	,, मूषा	५१३
स्नेहयन्त्रं	५०७	,, रसायनं	१२३-१४३
स्त्रीजातीयवस्त्रसारणविधिः	६११	,, वज्रजीर्णरसभस्म	१५५
स्थलकूर्मयन्त्रं		,, वज्ररसायनं	१४६
स्थलपद्मिनी	६३०	,, वज्राभ्रकजीर्णरसभस्म	१५५
स्थलपद्मिनीकल्पः	६१९	,, वज्राभ्रकरसायनं	१४७
स्थालीपाकविधिः	६००	, शुद्धिः	१२२-५६२
स्थालीयन्त्रं	५०२	स्वर्णाभ्रकजीर्णरसभस्म	१५१
स्नानविधिः	२९९	स्वर्णाभ्रकरसायनं	१४७
स्नेहनं	१०६	स्वर्णाभ्रकान्तरसायनं	१४४
स्नेहाम्लादीनां गुणाः	६९२	स्वस्थहिता धर्म्या आचाराः	३१३
स्फटिकं	६२२	स्वाङ्गशीतं	४९०
स्रोतोऽञ्जन	५५३	स्वेदन	४३-१०६, ४२०-४२७
स्वर्णं	१२२-५६२	ह	
स्वर्णं कान्तजीर्णरसभस्म	१५२	हठबन्धः	६७९
,, कान्तरसायनं	१४७	हठमुद्रा	६८९
,, कान्तवज्रजीर्णरसभस्म	१५६	हंसगति	४
,, कान्तवज्ररसायनं	१४७	हंसपाकयन्त्रं	५०६
,, कान्तवज्राभ्रकजीर्णरस-भस्म	१५६	हरिताश्म	६२७
,, कान्तवज्राभ्रकरसायनं	१४७	हरिद्राश्म	५४७
,, कान्ताभ्रजीर्णरसभस्म	१५२	हरितकन्दः	६५४
,, गन्धपिष्टी	३९७	हरितकर्णी	६५७
,, जीर्णरसभस्म	१५१	हरितकर्णीकल्पः	२१३
,, द्रुतिः	८७-१२३	हरितकर्णीपिञ्चाङ्गकल्पः	,,
		हरितकर्णीपित्रकल्पः	,,

विषयाः ।	पृष्ठसंख्या	विषयाः ।	पृष्ठसंख्या
हस्तिशुण्डी	६६२	हेमबीजं	६१
हारिद्रदोषः	५	,, ताम्रभस्मसिद्धं	७०
हिमजा	६४१	,, तीक्ष्णभस्मसिद्धं	,,
हिङ्गुलं	५४२	,, नागभस्मसिद्धं	६९
हिङ्गुलगुणाः	५४३	,, वङ्गभस्मसिद्ध	,,
हिङ्गुलशुद्धिः	५४२	हेमरक्ती	४८२
हिङ्गुलसत्वपातनं	,,	हेमसुन्दरी घुटिका	१६१
हिङ्गुलाकृष्टरसः	४८१	हेमाभ्र	६३
हेमकृष्टी	४८२	हेम्नि नागादिनिर्वहणेन वर्ण-	
हेमन्तर्तुचर्या	३३३	व्यत्यासः	७३
हेमन्तर्तुस्वरूपं	३२९		

पाठशुद्धिः ॥

पृष्ठ-संख्या।	पङ्क्ति-संख्या।	अशुद्धः पाठः।	शुद्धः पाठः।
५	९	यौगिकश्च	यौगिकाश्च
६	१६	कोविदः	कोविदैः।
१४	६	प्रतीच्योत्त	प्रतीच्युत्त
२४	२२	अज्ञाना व	अज्ञानाद्भवति
५३	२	दोलाख्ये	तुलाख्ये
७१	३	ताम्रमयं	ताम्रमयः
९०	२३	अन्यः प्रकार इति मास्तु।	
९३	११	सबिन्ये(?)	सबिडे
१०१	५	नीलोत्पलानि	नीलोपलानि
१०४	१३	शतांशे	समांशे
१०९	७	आरोटरसः	आरोटरससेवायै क्षेत्रीकरणम्।
१४६	७	वज्राभ्रकरसायनम्	वैक्राभ्रकान्तरसायनम्।
१५०	१३	कान्ताभ्रकजीर्णरसभस्म	इति तु मुखीकृत इति श्लोकार्धात्माक् निधेयम्।
,,	२०	वैकान्तसत्वस्य	वै कान्तसत्वस्य
१६१	२	मारयेत्	जारयेत्
१७६	१०	दिव्यो सिद्ध	दिव्यः सिद्ध
२०४	२०	विनिक्षि	विनिक्षिपेत्।

पृष्ठ-संख्या ।	पङ्क्ति-संख्या ।	अशुद्धः पाठः ।	शुद्धः पाठः ।
२१५	६	पलत्रयं	फललयम्
२२१	१२	शतफलं	शतपलं
२३२	१६	समान्नं	समन्नं
४२०	१९	निधिं	विधिं
४२१	११	तिलवक्काथ	तिलवत्काथ
४८२	४	हेमपिष्टी तारपिष्टी च	हेमकृष्टी तारकृष्टी च
४९२	७	निर्मुख चारणा	निर्मुखनारणा
४९७	१७	नताधो	नतायो
५२५	८	मद्य	मद्यं